[illegible]

[illegible]

॥ अथ प्रथमशाखान्यायनिर्णयः प्रारभ्यते ॥

श्री[illegible]गेशायनमः ॥ आदावेतेच्च काशी[illegible]यपंडितानांच संमतिं ॥ लेखयित्वा मुद्रितोसौ ग्रं[illegible]ः काश्यां प्रयत्नतः ॥ १ ॥
काशीस्थपंडितानां संमतयः ॥ ॥ अस्मि[illegible]न्नर्थे चोकल इत्युपनाम बापू भट्टस्य संमतिः ॥ १ ॥ सम्मतो यं खनंग इत्यु
पाव्हबालशास्त्रिणः ॥ २ ॥ अस्मिन्नर्थे राजणकर इत्युपनामक कृष्ण भट्टस्य संमतिः ॥ ३ ॥ [illegible]स्मिन्नर्थे वासुदेवभट्ट म
जे इत्युपनामकस्य संमतिः ॥ ४ ॥ अस्मिन्नर्थे जयरामभट्ट पीपले इत्युपनामकस्य संमतिः ॥ ५ ॥ अस्मिन्नर्थे खोंड इत्यु
पनामकस्य रंगभट्टस्य संमतिः ॥ ६ ॥ अस्मिन्नर्थे डोंगरे इत्युपनामकस्य चिंतामणभट्टस्य सम्मतिः ॥ ७ ॥ अस्मिन्नर्थे
नीलकंठदीक्षितस्य संमतिः ॥ ८ ॥ अस्मिन्विषये काशीकररामशास्त्रिणः संमतिः ॥ ९ ॥ अस्मिन्नर्थे काणेत्युपनाम
ककेशवशास्त्रिणः संमतिः ॥ १० ॥ अस्मिन्नर्थे पल्लावझ्झिलवेंकटशास्त्रिणः संमतिः ॥ ११ ॥ अस्मिन्नर्थे मैसूर दक्षिण
मूर्तिशास्त्रिणः संमतिः ॥ १२ ॥ अस्मिन्नर्थे डब्ली त्युपनामक अनन्त भट्टस्य संमतिः ॥ १३ ॥ अधुना कूचिपंचाग्निरा
जमन्नारुशास्त्रिणः ॥ यात्रार्थमागतास्ते ष्वलिखिताप्यत्र सम्मतिः ॥ कूचिपंचाग्निराजमन्नारुशास्त्रिणः संमतिः ॥

॥ अथ प्रथमशाखान्यायनिर्णय प्रारंभः ॥

श्रीगणेशायनमः ॥ शुभमस्तु ॥ उमासुतं देवनरादिवंदितं परात्परं विश्वपतिं गणाधिपम् ॥ नमामि वेदांतसमुद्र गो

चरंपरेशास्त्रनुपरमार्थैकद्यक्रम्॥१॥ श्रीकंठंचरमापतिंगिरिसुतांविघ्नेशमस्मद्गुरून् ध्यात्वावाजसनेयिशाखि
विबुधान्निन्दन्तियेतानथो॥ कण्वंचापिसयाज्ञवल्क्यमपरान् कात्यायनादीन्वरान् बोधायाद्यमयाकृ
तः प्रथमजाशाखाविनिर्णायकः॥२॥ व्याख्या॥ एतेषां मंगलश्लोकानां तात्पर्यार्थस्तुवर्ण्यते॥ श्रीकंठमित्यादिना
रमापतिंचेतिनारायणमित्यर्थः अस्मद्गुरूनित्यंतं उक्तान्सर्वान् ध्यात्वेतिवस्तुनिर्देशात्मकंमंगलंकृत्वा
वक्ष्यमाणग्रंथोमयाकृतइत्यन्वयः। वाजसनेयिशाखिविबुधानिति। वाजसनेयिशाखाप्रविष्टब्राह्मणान्
प्रथमशाखात्मकयाज्ञवल्कीयवेदशाखाध्येतॄनितियावत्। एतानुद्दिश्यएतदितरशाखाप्रविष्टाःज्ञा
नानभिज्ञब्राह्मणाः निंदंति। एते याज्ञवल्क्यप्राप्तशापादिना तच्छिष्यकण्वकात्यायनमाध्यंदिनादिशि
ष्यपरम्पराप्रविष्टाः मध्याह्नकालेचंडालत्वानुभवितारः एतेनिंद्याः अतएव अयोग्याः। एतैः स
ह भोजनप्रतिभोजनयजनयाजनश्राद्धनिमंत्रणादिसव्यवहारोनकर्त्तव्य इतिनिन्दन्ति। केवलमेता
नेवनिन्दन्तीतिन। अपितुएतच्छाखाधिपतिंयाज्ञवल्क्यम्। तच्छिष्यान्कण्वकात्यायनमाध्यंदिनादीनपि
नि[illegible]न्तीतितत्क्रियापदेनसम्बन्धः॥ वरानिति॥ श्रेष्ठान् आत्यन्तिकदोषरहितान् प्रत्युतश्रुतिस्मृत्यादि

प्र॰ शा॰
२

षुप्रतिपादितमाहात्म्यविशिष्टानिस्यापशयः ॥ तानपिकथंनिंदंतीत्याकांक्षायांयाज्ञवल्क्यः वैशंपाय
नेनचंडालोभवेदितिशापंप्राप्तः। तस्मात्तद्वतच्छिष्याः कण्वादयश्च अयोग्याअभवन्नित्यादिरूपेणनिन्द
न्तीतिसूचितोभवति॥ इत्याशयः। कण्वंचापीत्युपक्रम्यकात्यायनादीन्वरानित्यंतश्ग्रंथेन द्योत्यते॥ अ
यंग्रन्थस्तु॥ यजुर्वेदस्यभागद्वयेनप्राप्तशाखयोर्मध्येवक्ष्यमाणरीत्या कल्पादौजगत्स्रष्टृपरमेश्वरेण
सूर्यायदत्ततयाप्रथमाभिव्यक्तिरूपप्रथमजत्वप्राप्तप्रथमशाखाविषयकनिन्दाविचारन्यायनिर्णायकः
॥ येएवंनिन्दन्ति॥ तानशास्त्रानभिज्ञान् प्रतिबोधाय। एतेयाज्ञवल्क्यादयः महांतः ऋषयः ब्रह्मनिष्ठाः
योगीश्वराः स्मृतिसूत्रकर्त्तारः याज्ञवल्क्येनसहविवादंकृत्वाविदग्धः शाकल्योमहर्षिः शापेनमरणंप्रा
प्तः सन् ब्रह्मनिष्ठेनसहविवादकरणदोषप्राप्त्यास्वशरीरास्थिसंस्कारमप्यप्राप्तवानितिबृहदारण्योपनिष
दितद्भाष्यव्याख्यानादिषुप्रतिपाद्यते। अतः एताननुद्दिश्य अस्माभिर्निन्दानकर्त्तव्येतिसाधारणमनु
ष्यमात्रनिन्दायामपि वास्तवतत्कृतदोषोद्घाटनेदोषकृत्समानपापप्राप्तिर्निन्दाकर्त्तुर्भवति। अवास्तवदो
षोद्घाटनेतु तच्छतगुणितपापप्राप्तिर्निन्दकर्त्तुर्भवतीतिधर्मशास्त्रेषूच्यते। तस्मादेतदुद्देश्यकनिन्दास

नि॰
२

वंथानकर्त्तव्येत्स्येवंज्ञानजननाय। अयंग्रन्थः कृतइतिग्रन्थकर्त्तुराशयः ॥१॥ मू॰ ॥ ग्रन्थोयंश्रुतिसम्मत
श्चविमलैः संसेव्यमानः परंदुष्टानांपरनिन्दनार्जितमहापापापहारीसदा॥ अज्ञानांसुखबोधनेनमहतांनिन्दा
नकार्यैतिवैज्ञानंसंजनयन्महीतलगतानज्ञांत्सदारक्षति ॥२॥ व्याख्या॥ ग्रंथोयमिति। अयंवक्ष्यमाणग्र
न्थः श्रुतिसम्मतः। बृहदारण्यजाबालरामतापनीयअद्वैततारकादिश्रुतीनांसम्मतः। याज्ञवल्क्यमा
हात्म्यप्रतिपादनपरत्वात्। विमलैः असूयाअहंकारादिदोषरूपमलरहितैः परंअत्यन्तंसंसेव्यमानः
सम्यक्सेव्यमानः। आद्रीयमाण इत्यभिप्रायः। दुष्टानामिति। असूयाअहंकारपरनिन्दादिदोषवतां। परनि
न्दनेतियाज्ञवल्क्यादिश्रेष्ठद्वेषकनिन्दनेन आर्जितंसंपादितंयन्महापापंत्तदपहारीतन्नाशकइत्यर्थः। अ
ज्ञानामिति। शास्त्राः नभिज्ञानामित्यर्थः तेषांसुखबोधनेनसुखेनसुलभमार्गेणबोधनेन उपदेशद्वारा।
एतेषांमहतांयाज्ञवल्क्यादीनां निन्दाअस्माभिरितः परंनकार्येतिज्ञानंनिश्चयात्मकं संजनयन् उत्पा
दयन् महीतलगतान् सर्वदेशस्थान् अज्ञान् शास्त्रानभिज्ञान् तन्निन्दानिरोधनेनत्वारक्षति। पापराशि
त्वेषसंरक्षणंकरोतीत्यर्थः। निन्दाकिमर्थमस्माभिः कृताइतिपश्चात्तापादिनापापनाशकइतियावत् ॥ १॥

॥ सदेति ॥ सार्वकालिकपश्चात्तापजननद्वारा पापनाशको भवंतीत्यभिप्रायः ॥ २ ॥ मू॰ ॥ श्रीकंठस्थि
तभूमिगोपरमया भक्त्या तदाराधको रामाख्योहमतीवमूढमतिमान्वेदान्तिसंज्ञान्वितः ॥ याचे सर्वजना
न्योपि विदुषः सम्यग्विनीतः सदाग्रन्थोयं परमाभिमानविदुषे देयो न सर्वात्मना ॥ ३ ॥ व्याख्या ॥ श्री
कंठस्थितभूमिग इति । श्रीकंठः । नीलकंठः । विषकंठ इत्यर्थः तत्स्थितभूमिः । नंजनगूढाख्य गरलपुरी
क्षेत्रमित्यभिप्रायः । रामाख्योहं वेदांतिसंज्ञान्वित इति । वेदान्तीतिसंज्ञामात्रमेव । नत्वन्वर्थात्मक वेदांतज्ञा
नवानित्यभिप्रायः । एतादृशोहं सर्वजनान्प्रतिसम्यग्विनीतः सन् बद्धांजलिः याचे प्रार्थये । अपिचा विदुषः प्र
त्यपि याचे इत्यन्वयः किमित्याकांक्षायामाह । अयं ग्रन्थः परमाभिमानविदुष इति । परमश्चासावभिमा
नश्चेति परमाभिमानः तद्विषये यो विद्वान् स परमाभिमानविद्वान् तस्मै सर्वात्मना सर्वप्रकारेणापि न देयः
। नेन प्रार्थितोपि तस्मै न देय इत्यभिप्रायः ॥ ३ ॥ ॥ मू॰ ॥ नासूयापतये कदाचिदपि यो देयो मदीयः स वै
ह्यंधोसौ परमाभिमानपुरुषोऽसूयान्वितः पित्तरुक् ॥ ताभ्यां नैव ततो न देय इति वै साक्षादहं प्रार्थये तस्मा
द्वैदिकसार्वभौमविषयं यत्नं करोम्यादरात् ॥ ४ ॥ व्याख्या ॥ ॥ नासूयापतय इति ॥ ॥ अनसूयापतिः

अत्रिऋषिः तद्भिन्नः अनसूयापतिः असूयाख्यदुर्गुणसंरक्षक इत्यर्थः ।तस्मै च यो मदीयः मत्कृतः अयं ग्रं
थः कदाचिदपि विस्मरणदशायामपीत्यभिप्रायः ।नदेय इत्यन्वयः ।किमर्थमनयोर्न देय इत्यत आह ।अंधो
ताविति ।हि यस्मात् असौ परमाभिमानी पुरुषः ।अंधः अंधप्रायः ।अभिमानात्मकाऽहंकारेण निमीलि
तचक्षुः अतः अस्मै न देय इति ।एवं असूयान्वितः पित्तरुक् पित्तरोगी स दृष्टः यथा पित्तरोगिणः श्वेतोपि शं
खः पित्तदोषेण पीतः शंख इति प्रतिभाति ।एवमेव ।असूयान्वितस्य नरस्य गुणान्वितोपि ग्रंथः दुर्गुणान्वि
त इव प्रतिभाति तस्मात्ताभ्यामयं ग्रंथो न देय इत्यहं साक्षादेव प्रार्थयामीत्यर्थः ।तस्माद्वैदिकसार्वभौ
मविषयेति ।वैदिकसार्वभौमाः वैदिकश्रेष्ठाः याज्ञवल्क्यकण्वकात्यायनादयः तेषां निंदानिवारणाय
यत्नं करोमीत्यभिप्रायः ॥४॥ मूलं ॥ ऋग्वेदीह्यहमादितो समफलं नैवेष्टमात्यंतिकं दाक्षिण्ये समनास्ति किं
चिदपि यत्तस्मादहं कंचन ॥ ह्यर्थे चाप्यिसमाश्रितः परमिमं ग्रंथं न कुर्वेऽधुना किं त्वेवं करणे महस्फलमिदं

कात्यायनीदर्शनं॥८॥ व्याख्या॥ऋग्वेदीति॥ अहं आदितः जन्मतः स्वभावतः। ऋग्वेदी। अहं प्रथमतः शिशि
नोपि याज्ञवल्क्यादीनां महतां अशास्त्रीयनिंदाश्रवणमसहमानः तन्निराकरणाय यत्नं करोमीति तात्प
र्यार्थः एतत्ग्रंथकरणे ननु तव किं प्रयोजनमित्यत आह। मम फलं नैवेष्टमिति। मम किंचिदपि फलं प्रयोजनं आ
त्यंतिकं नेष्टमेव। यत्किंचित्स्फल विषयकाकांक्षा मम नास्तीत्यर्थः। तस्मात् कस्यचिद्दाक्षिण्यं कंचनार्थं वा
समाश्रितः तदुद्दिश्य एतद्ग्रंथं न करिष्यामीति तात्पर्यं। प्रयोजनमनुद्दिश्य न मंदोपि प्रवर्तत इति न्यायात
त्किमर्थमेतद्ग्रंथकरणे तव प्रवृत्तिः इत्याशंक्याह॥ मम तु इदं किमपि प्रयोजनं न भवति किंतु कात्यायनीद
र्शनं महत्फलं। कात्यायनी कात्यायनमहर्षेः पुत्री परमेश्वरस्य भार्या पार्वती तस्याः दर्शनं साक्षात्कारः तत
त्सिद्ध्यर्थमेव मम ग्रंथारंभ इत्याशयः॥८॥ मू॥ तस्याश्चैव पिता महामुनिरसौ कात्यायनो वर्तते तद्देवाध्य
यनं कृतं सविनयं यस्य प्रसादात्परं॥ तस्य श्रीगुरुयाज्ञवल्क्यविदुषो कात्यायनस्यापि वै कण्वस्यापि महामुने

श्च परमा निंदा ह्यथा चागता ॥६॥ व्याख्या ॥ ननु एतद्ग्रंथकर्तृणस्य कात्यायनी दर्शनस्य च कः संबंध इत्या
शंक्याह। तस्या श्चैवेति। तस्याः पूर्वो कायाः कात्यायिन्याः पिता॥ कात्यायनः तद्वेदाध्ययनमिति तत्कर्तृका
ध्ययनं सविनयं शुश्रूषापूर्वकमित्यर्थः यस्य याज्ञवल्क्यस्य प्रसादात्कृतं यन्निकटे आधीतमित्यर्थः। तद्गु
रोः कात्यायनगुरोः याज्ञवल्क्यस्य विदुषः ब्रम्हज्ञानिनः तच्छिष्यस्य कण्वस्य अपि शब्देन माध्यंदिनस्य
चेत्यभिप्रायः। हृथा निंदा चेति यत्र कुत्रापि शास्त्रे अप्रतिपादिता निंदा आगतेति अन्वयः चकारात् वैशं
पायन शापः तस्य सुतः चंडालत्वप्राप्तिरपि तथा शास्त्रा विहितेत्यभिप्रायः ॥६॥ मू॥ सा निंदा परमाज्ञ
लोकरचिता शास्त्रे विरुद्धा च सा तस्याश्चापि हि शास्त्रसागरतले कुत्रापि सत्वं नैवं॥ तस्यार्थस्य विशेष
बोधजनने ग्रंथो मया साधितः तस्मात्सा जननी ममोपरि दयादृष्टिं समाधाय च ॥७॥ व्याख्या ॥ सा निं
दा कथमागतेत्याकांक्षायामाह सा निंदेति सा निंदा शास्त्रा प्रतिपादितेत्यर्थः प्रकृमीज्ञलोकरचितेति

परमश्चासावज्ञश्च परमाज्ञः सचासौलोकश्च परमाज्ञलोकः लोकस्तु भुवनेजनइत्यमरः तैः रचिताकल्पि
तान्नाज्ञास्त्रे विरुद्धः यत्रकुत्रापिशास्त्रे अप्रतिपादिता प्रस्तुत ज्ञास्त्र प्रतिपाद्यमाहात्म्य विरुद्धा चसेतिनिंदे
त्यर्थः तस्याश्चापिहीतितस्याः निंदायाः सत्वंज्ञास्त्रसागरे तलस्पर्शतया तलस्पर्श परिमार्गणेपि यत्र कुत्रा
पिएतादृज्ञानिंदायाः सत्वं नप्राप्तमिति तात्पर्यार्थः तस्यार्थस्येति एतादृज्ञ याज्ञवल्क्या दिज्ञापादिरूप
निंदाभावस्यविशेषतः ज्ञानजननायअयंग्रंथः मयाप्रयासेनसाधितः संपादितः कृतइतियावत् तस्मा
दितियस्मात्पार्वत्याः जनकः कात्यायनः तस्यगुरुः याज्ञवल्क्यः तस्यशिष्याः कण्वमाध्यंदिनादयः
तेषांनिर्मूलेयंनिंदाज्ञापादि निंदातन्निवारणाय अयंग्रंथः मयाकृतः तस्मादितिसंबंधः तस्माद्धे
तोः कात्यायनीपित्रादिनिंदानिवारणार्थंप्रयत्नकरणात् तद्दाक्षिण्येन सर्वलोकजननीकात्यायनीम
मोपरिदयादृष्टिं समाधास्येति उत्तरश्लोकस्यविज्ञादीकरोतीतिक्रियापदेनसंबध्यते॥७॥

नि॰

मू॰

प्रत्यक्षंतुयथाभवेन्ममसदाकात्यायनीसातथास्वंरूपंविशदीकरोतिविमलामातामयाप्रार्थिता।
तत्प्रत्यक्षबलादसाध्यफलमप्यद्यैवसाध्यंभवेत्तस्मात्कश्चनयाचनायपुरुषैरर्थोपिनाभूत्ततः॥८
व्याख्या॥प्रत्यक्षंत्विति॥प्रत्यक्षंअपरोक्षंस्वात्मरूपेणसंशयादिरहिततयासाक्षात्कारोयथाभव
तितथास्वंरूपंसच्चिदानंदस्वरूपंतस्याःपरब्रह्मरूपत्वात्विशदीकरोतीत्यन्वयःविमलाअसूयाऽ
हंकारादिदोषरहितापरमेश्वरीतियावत्।मयाप्रार्थितेतिप्रकर्षेणअर्थितेतिअर्थ्यतइत्यर्थःपुरुषा
र्थैःमोक्षसुखंताद्रूप्येणस्थितामयायाचितेत्यभिप्रायःतत्प्रत्यक्षबलादितितदभिन्नब्रह्मानंदसा
क्षात्कारप्राप्तिमात्रादेवअसाध्यंअप्राप्यंफलंअन्यन्नास्तीत्यभिप्रायःततःतद्ब्रह्मानंदसाक्षात्का
रप्राप्त्यनंतरंअन्यश्चयाचनायकश्चनपुरुषार्थोनभवतीतिसिद्धंभवतितथाचश्रुतिः।आत्मानंचे
द्विजानीयादयमस्मीतिपूरुषः॥किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदिति॥८॥ मू॥गंड

प्र·शा
६

इयं स्थितनारायणाख्यविदुषा चान्यैर्नृसिंहादिभिर्युक्तेनाद्यमहाप्रयासविपुलैः साध्योपि शास्त्रान्वि
तः ।। तस्याः प्रेरणया मया विरचितो ग्रंथोयमस्माद्रात्तस्याश्चैव पदारविंदयुगले भक्त्या मया स्थापि
तः ।। १ ।। व्याख्या ।। अयं ग्रंथः कस्मिन् ग्रामे निर्मित इत्यत आह ।। गंडक्यामित्यादिना ।। अस्य श्लोकस्य
तात्पर्यार्थो वर्ण्यते । मैसूरुदेशे हारनहल्याख्यमहाग्रामसमीपस्थितगंडकीतिग्रामे तत्र स्थितउ
पशांतनारायणभट्टज्योतिष्कनरसिंहभट्टादिभिः सह अत्यंतप्रयासेन शास्त्रयुक्त्यनुभवादिसम
न्वितः प्रथमशाखान्यायनिर्णयाख्यग्रंथः तस्याः कात्यायिन्याः प्रेरणया मया विरचितः सोयं ग्रं
थः तस्याः पादयुगले मया समर्पित इत्याद्यभिप्रायो ग्रंथकर्तुरिति गम्यते । तथा च शिवपुराणे ।। ए
कादशरुद्रसंहितायां एकोनपंचाशदध्याये श्रीकात्यायनीकल्याणोत्सवे । श्रीसूतः । लग्नेशुभे तत्र
विधिः पुरस्तादंकुरार्पणं ।। कृत्वा चाग्निं प्रतिष्ठाप्य स्वसूत्रोक्तेन वर्त्मना ।। उद्वाहं च विशेषेण कारयामा

नि

र्यामास हृष्टधीः॥ सुमंगलाहस्तगृहीतनानारत्नावभास्वद्विमलांबुधारः॥ कात्यायनो गृह्य निजां त
नूजां समर्पयामास महेश्वराय॥ कन्यां दत्वा महेशाय कात्यायनमुनीश्वरः॥ कृतकृत्यमथात्मानंम
न्यते स्म सह प्रियः॥ इत्यादिप्रमाणैः कात्यायनी कात्यायनऋषेः पुत्रीति सर्वशास्त्रसिद्धत्वात् का
त्यायनस्य चंडालत्वे एवं कथं संभवति॥ तितास्यर्थिः ननु त्वं मतियाज्ञवल्क्यकात्यायनादीनां वै
शंपायनशापद्वारा चंडालत्वप्राप्त्या सच्छाखीयब्राम्हणानां इदानीतनानां काण्वमाध्यंदिनशाखाप्र
विष्टानां सर्वेषामप्ययोग्यता वर्तते तैः सह यजनयाजनकन्यादानग्रहणश्राद्धनिमंत्रणादिव्यव
हारो न कर्तव्य इति कोवा उक्तवानूकं प्रति एतादृशदोषपरिहाराय तदुत्तरत्वेन एतादृशग्रंथः क्रि
यते॥ अकांडे तांडवमिति॥ अपृष्टोत्तरमिति असंबद्धप्रलाप इति अनवसरकथनमित्यादि वचनं अ
यं ग्रंथः त्वया क्रियत इत्युक्तिरस्यं तासंगता भवति प्रस्तुतवक्ष्यमाणग्रंथस्य पूर्वोक्तश्लोकानां च

प्र॰ शा॰
७

एतद्ग्रंथप्रतिपाद्यर्थानांचपरस्परसंगतिरेवनप्रतीयतइतिचेत्सत्यं।तथापि।सर्वदेशेषु कचित्
क्कचित्सदेशेषुवाजसनेयब्राम्हणानुद्दिश्यतदितरशाखाब्राम्हणैः पूर्वोक्त सजातीयनिंदाप्रवृत्तिंश्रुत्वा
अयंग्रंथः मयाकरिष्यतेतद्ग्रंथप्रतिपाद्यर्थस्यइदानींप्रतिपादनेसंगतिप्रदर्शनार्थमेव अव्यवहि
तानंतरग्रंथेश्लोकाः क्रियंतइतिहेतोः त्वयाकृतपूर्वपक्षस्यानवकाशः संभवत्येव।एतद्ग्रंथद्रष्टॄन्
प्रतिएतद्ग्रंथकर्ताकांश्चिदर्थान्विज्ञापयति।कथमितिचेत्।अहंतुकाव्यचंपुव्याकरणतर्कादिकि
मपिशास्त्रं नाधीतवान्तथापिमहतांविदुषांसन्निधानवासमात्रेणतत्संपर्कवशात्संस्कृताभा
सज्ञानमात्रेणैवएतद्ग्रंथंकृतवानस्मि ममसमीचीनतयाशास्त्रीयशब्दज्ञानंअर्थज्ञानंचनास्ति।
लोकेपिअसूयादिअहंकारादिदोषरहिताः सत्पुरुषाः नवीनतयाउत्पन्नंग्रंथंदृष्ट्वातस्मिंछब्दव्यु
त्पासमर्थव्युत्पत्त्यसंचारग्राहीत्यैवप्रमेयगतगुणदोषादिकं विचार्यतत्रापिगुणानेवगृण्हंति।इतितु

नि॰

सर्वत्रप्रसिद्धिर्वर्ततेअहंतुअज्ञइतिमय्येवोपवर्ण्यतेसर्वैरपिज्ञायतेच एवंस्थितेएतद्ग्रंथेअयंशब्द
व्यत्यासोऽयमर्थव्यत्यासइतिदोषःसत्पुरुषैर्विद्वद्भिर्नगणनीयःतदुद्भावनेपिसदोषामयिदोषोन
भवतिअहमज्ञइतिमय्येवपूर्वमेवांगीकृतत्वात् स्वभावस्यादोषत्वादितिन्यायाच्चतत्साधकानाम
पिप्रयोजनं नास्ति।तद्दोषसाधनस्यसिद्धसाधनप्रायत्वात्।अपितु एतद्ग्रंथोद्देश्यप्रमेयरूपप्रथम
शाखाप्रवर्तकतच्छिष्यतच्छाखाप्रविष्टयाज्ञवल्क्यकण्वमाध्यंदिनमेधातिथिपारस्करादिऋ
षिइक्ष्वाकुरामकृष्णादिक्षत्रियेदानींतनब्राह्मणादिविषयेशास्त्रीयदोषसद्भावाऽसद्भावविचार
रूपैतद्ग्रंथस्थावांतरप्रमेयेषुगुणदोषप्रतिपादनस्थलगतव्यत्यासस्थितश्चेत् द्रष्टृभिःप्रदर्शनीयः
तस्यसमाधानंवक्तुंममशक्तिरस्तिचेद्विज्ञापयिष्यामिममचएतद्ग्रंथकरणेप्रवृत्तिस्तुश्रुतिस्मृतिसू
त्रेतिहासपुराणादिभिःब्रह्मसूत्रतद्भाष्यतव्याख्यानतद्वार्तिककारव्यासशंकराचार्यप्रभृतिवि

द्यारण्याद्यंतेश्च परमेश्वरावतारवद्भिः स्तूयमानमाहात्म्यवतां विद्वद्वरिष्ठानां महायोगिनां सूत्रस्मृ
तिकर्तॄणां वेदशाखाप्रवर्तकानां महानुभावानां याज्ञवल्क्यकण्वकात्यायनमाध्यंदिनानां।ऽसू
याअहंकारभ्रांत्यज्ञानवज्जनकल्पितमिथ्यानिंदाश्रवणाऽसहनक्तयाजातेतिवेदितव्यं।लोके
यद्यपिप्रायेणविद्वांसः बहुशास्त्राध्ययनंकृत्वाकिंचिद्राजानंधनिकंवाप्राप्यतन्निकटेस्वमाहा-
त्म्यप्रकटनार्थंअन्यंवादिनंवस्तुतःस्वापेक्षयाअधिकशास्त्राध्येतारमपिशास्त्रार्थविचारव्याजेन
छद्मनावाकेनचिच्चमत्कारविशेषेणवाशब्दकोलाहलाद्यट्टहासेनवातात्कालिकअधिकविद्वत्ता
सर्वज्ञत्वादिप्रदर्शनेनतस्मिंछब्दप्रयोगव्यत्यासअर्थज्ञानव्यत्यासादिकंचदोषत्वेनआरोप्यतंजि
त्वातत्सभानायकेनधनवताऐहिकोपयोगिधनादिग्रहणंकुर्वंतीतिसर्वदेशस्थसर्वजनदृष्टत्वेनप्र
सिद्धिर्वर्ततेतादृशाऐहिकफलार्थिनःतथास्वमाहात्म्यख्यापनंइतरवादिनिराकरणमप्यपेक्षित

मितिकृत्वास्वग्रंथे शब्दव्यत्यासार्थव्यत्यासादिदोषः केनचित्प्रकटी क्रियते यदि स्वस्यस्वविद्वत्ता
याः न्यूनताप्राप्तिद्वारास्वाभिमानभंगो भवेदितिभयं वर्ततेममतु अज्ञत्वस्वीकारात् धनवत्संबंधिऐ
हिकप्रयोजनापेक्षा २ भावाच्चशब्दार्थव्यत्यासविषये तत्प्रयुक्ताभिमानभंगविषये च दृष्टिर्नास्ति॥
अपितु एतद्ग्रंथोद्देश्यप्रमेयरूपप्रथमशाखाब्राम्हणयोग्यता २ योग्यताविषये ममसंपूर्णदृष्टेः सत्वा
त् ये केचनवादिनः एतद्ग्रंथे दोषापादकाः अत्रप्रमेयरूपतब्राम्हणयोग्यता २ योग्यताविषयदोषांदर्शयितारो भवेयुः नतु मयि अविदुषि शब्दार्थादिनिमित्तकदोषोद्भावनादिकरणे तेषां प्रयोजना
भावात् तत्रदृष्टिस्तैर्नदेयेतिमयाज्ञाप्यते अपिच अस्मिन्ग्रंथे वाक्यानां बाहुल्यात् तत्रतत्र पूर्वपूर्वो
क्तवाक्यान्येवपुनः पुनरागतानीति केषांचित्स्यात् भ्रमात् नाम प्रत्युत्तरं नागतमिति च केषांचिदापातद्रष्टृणां
प्रतिभातीव मयोच्यते एतद्विषये तथा न मंतव्यं तत्रतत्र पूर्वोक्तानामेव पुनः पुनरुक्तिस्तु क्वचित्

सामान्यार्थं प्रदर्शनार्थं।कुत्रचिद्विशेषार्थप्रदर्शनार्थं कुत्रचित्प्रमाणत्वेन केवलवाक्योदाहरणं तद्व्या
ख्यानप्रदर्शनार्थं च।कुत्रचित्तेषां मध्ये प्रकृतोपयोग्यर्थप्रदर्शनार्थत्वेन पूर्वोक्तानुवादः कुत्रचिदर्थो
नुगमार्थं तद्वाक्यपठनं कुत्रचिद्बहु दूरस्थत्वेनोदाहृतवाक्यानामपि तद्वाक्यतदर्थविस्मरणशंकया
पुनरुदाहरणं कुत्रचिद्वाक्यार्थानां मध्ये प्रकृतोपयोगिनः कस्यचिदर्थस्य तत्प्रकृते विशदीकर–
णार्थं पुनस्तद्वाक्यानां तदर्थानां च प्रदर्शनं इत्यादिबहुनिमित्तैस्तत्रतत्र विशेषप्रयोजनार्थमुदाहृ
तत्वेपि विशेषाकारेण न्याययुक्तत्वेन एतद्ग्रंथदर्शिनां एते दोषा इति न प्रतिभाति अपि च ग्रंथस्य
बहुलत्वेन सर्वप्रश्नानां प्रत्युत्तराणां सद्भावेपि झडिति सकृदवलोकनेनासूया ऽहंकारादिदोषरूपप्र
तिबंधरहिततया सावधानेन सम्यगवलोकने च सर्वेषां प्रत्युत्तरसद्भावो दृश्यत एव।अथवा साव
धानतया असकृदावृत्त्या संपूर्णग्रंथावलोकनानंतरं ग्रंथारंभप्रभृति ग्रंथसमाप्तिपर्यंतं एकैकस्मि

न्वाक्येअयंपूर्वपक्षः अयंसिद्धांतः अस्याक्षेपस्य इदंसमाधानंसम्यग्वर्तते इदंसमाधानमसदुत्तरं अ
स्यसमाधानंनायाति अयमर्थः अस्माभिरंगीकृतः अयत्नांगीकृतइत्यादिरूपेणविस्तारत्वयालेख
नेसति अस्माभिर्यथासामर्थ्यमुत्तरंदीयते एतद्विहाय ऽसूया ऽहंकारादियस्त्वेननुयुत्या अवि
द्यमानदोषारोपणे अज्ञानमयातिषांप्रत्युत्तरंदातुंनशक्यतइतिमयादिज्ञापनाक्रियते ॥ ९ ॥ १ ॥

स्र्॥ उमासुतंदेवनरादिवंदितंपरात्परंविश्वपतिंगणाधिपं ॥ नमामिवेदांतसमूहगोचरं षरेशासू
नुंपरमार्थरूपकं ॥ १ ॥ श्रीकंठंसुरनायकंपरमदांकात्यायनींशारदांविश्वातीतमथापिसर्वजगतो
हेतुंपरंब्रम्हतान् ॥ विष्णुंचापिरमांसुरानपिसदाब्रम्हादिसर्वान्नथोसूर्यादिग्रहरूपकानथगुरून्नत्वे
वमन्यान्वरान् ॥ २ ॥ स्कंदंचापिसुराधिपंमनुमथोव्यासादिकृष्णादिकान्योगींद्रांपरमात्मबोधकप
रश्रीयाज्ञवल्क्यंगुरुं ॥ आपस्तंबमुखान्परापरविदः सूत्रादिकारान्मुनः प्रख्यातप्रभंवपराद्यारमुनिंस्मृ

स्यादिकारंवरं॥ अस्यार्थः॥ उमासुतमिति। परात्परमिति। परमंपरस्तादितिश्रुतेः। परब्रह्मेत्यर्थः अत
एवविश्वपतिमितिजगत्पतिमित्यर्थः। वेदांतसमूहेति। उपनिषद्वर्गप्रतिपाद्यब्रह्मैवेतियावत्। परमा
र्थरूपकमिति। सत्यस्वरूपमित्यर्थः अतएवव्यासः॥ पुराणांतरे॥ यंब्रह्मवेदांतविदोवदंति परंप्रधानं
पुरुषंतथान्ये। विश्वोद्गतेः कारणमीश्वरंवातस्मैनमो विघ्नविनायकाय॥ इत्युक्तवान्। श्रीकंठमिति
सुरनायकमिति। सुरपदोपलक्षितसुरनरतिर्यगादिसर्वप्रपंचनायकमित्यर्थः परमदामिति। परमं
मोक्षरूपफलंददातीतियावत्। विश्वातीतमितिपरब्रम्हणः विशेषणं। तानिति। वक्ष्यमाणसर्वा
निति। पदवाच्यानांविशेषणं। तान्पूर्वोक्तान्वक्ष्यमाणांश्चश्रीकठकात्यायनीसरस्वतीविष्णुसुरादी
नित्यर्थः। तान्सर्वानित्यादिद्वितीयांतपदानांवक्ष्यमाणोत्तरश्लोकस्थनुमइतिक्रियापदेनान्वयः। स्कं
दमिति। सुराधिपंदेवसेनापतिमित्यर्थः। मनुमिति। धर्मशास्त्रकर्तामनुरित्याशयः। योगीशमिति। यो

गीश्वरं याज्ञवल्क्यमिति स्मृतिप्रसिद्धेः परमात्मबोधकं परमिति याज्ञवल्क्यस्य जनकमैत्रेय्यादिभ्यो

ऽन्येभ्यः परमात्मबोधकत्वं बृहदारण्योपनिषदादिश्रुतिभारतपुराणप्रसिद्धं। परापरविद इति। परं

चापरं च ब्रह्म यदोंकार इति प्रश्नोपनिषदि। अथवा द्वे विद्ये वेदितव्ये। परा चैवापरा चेति। मुंडकोपनिष

दि च। उक्तरीत्या तद्विदः सूत्रादिकारादीनिति। आदिशब्देन धर्मसूत्रश्लोकरूपस्मृत्यादि गृह्यते प्रख्या

तप्रभवमिति। नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्र पराशरं चेत्यादिना। महासत्कुलब्रह्मविद्वंशो

त्पन्नत्वं पराशरस्य सूच्यते। स्मृत्यादिकारमिति अत्रस्थ आदिशब्देन विष्णुपुराणपराशरपुराणमि

ति उपपुराणादिकं गृह्यते नुम इति पूर्वोक्तश्लोकद्वयमध्यगत द्वितीयांतपदोपस्थितसर्वदेवान्प्रति

नुम इति क्रियापदप्रयोगः॥ ॥ननु मनुपराशरव्यासापस्तंबादिसूत्रस्मृतिकर्तॄन्प्रति नमस्कारक

रणविषये त्वया कृतश्लोकेषु तेषां मन्वादीनां किमपि विशेषणं न दत्तं याज्ञवल्क्यमात्रस्य तु योगीश्वर

प्र॰ आ

११

त्वपरमात्मबोधकपरत्वगुरुत्वादिविशेषणानि दत्तानि मन्वाद्यपेक्षया याज्ञवल्क्यस्य एतादृशविशेषे
णविशिष्टत्वं अधिकतया कथं संभवति। कथं वा तस्य तद्गुरुत्वं संभवति। ऋग्वेदिनस्तंवत्तच्छिष्यत्वं वा।
इति चेत्सत्यं। यद्यपि मनुपराशरादीनामपि। परमात्मबोधकपरत्वं। योगित्वं। गुरुत्वं च संभवति। तथापि।
याज्ञवल्क्यस्य योगीश्वरत्वं तु। योगीश्वरं याज्ञवल्क्यमिति रूढ्या स्मृतीतिहासपुराणादिषु प्रसिद्धत्वात्
पतंजलिकृतयोगसूत्रव्यासकृततद्भाष्यतद्व्याख्यानरूपवाचस्पत्यायोगमणिप्रभाभावागणेशवृ
त्तिनागोजीभट्टीयवृत्तिभोजवृत्तिचंद्रिकादौ क्वचित्क्वचिद्विभूतिपादे। जन्मौषधमंत्रतपःसमाधि
जाःसिद्धयः इत्यादिसूत्रव्याख्यानावसरे समाधिसिद्धयः। याज्ञवल्क्यादय इति उक्तत्वात्नृसिंहप
रिजातेपि। आदिभागे महास्मृतिकर्तारः। उपस्मृतिकर्तारश्च। एत इति तेषां नामग्रहणप्रकरणे म
हास्मृतिकर्तॄणां नामान्युच्यंते। स्मार्तकर्मनिरूप्यते। तस्य च कर्मणो धर्मशास्त्रप्रमाणकत्वात्॥

नि॰

तत्कर्तारो भिधीयंत इति। पारिजातवाक्यं। तत्रैव महास्मृतिकर्तारः। मनुर्बृहस्पतिर्दक्षोगोतमो
थयमों गिराः। योगीश्वरः प्रचेताश्च शातातपपराशरो। संवर्तो शनसौ शंखलिखितावत्रिरेव च॥
विष्णापस्तंबहारीता धर्मशास्त्रप्रवर्तकाः। एते ह्यष्टादशप्रोक्ता मुनयो नियतव्रताः इति। याज्ञवल्क्यस्मृतौ॥
तव्द्याख्याने च विज्ञानेश्वरीये॥ प्रायश्चित्तकांडे। आत्मोपासनादिप्रकरणे दशोत्तरशततमश्लोके॥
मू। ज्ञेयंचारण्यकमहं यदादित्यादवाप्तवान्। योगशास्त्रं च मत्प्रोक्तं ज्ञेयं योगमभीप्सता॥११०॥ अस्य वि
ज्ञानेश्वरीयव्याख्यानं। किंच। ज्ञेयमिति। चित्तवृत्तेर्विषयांतरतिरस्कारेणात्मनिस्थैर्यं योगः तत्प्राप्त्य
र्थं मया यद्बृहदारण्यकाख्यमादित्यात्प्राप्तं। तच्च ज्ञातव्यं। तथा यन्मयोक्तं योगशास्त्रं तदपि ज्ञातव्यमि
ति। पूर्वोक्तनरसिंहप्रयोगपारिजातवाक्ये स्मृतिकर्तृणां नामनिर्देशप्रस्तावे। मन्वत्रिविष्णुहारीत
याज्ञवल्क्योशनोंगिराः। यमापस्तंबसंवर्ताकात्यायनबृहस्पतिः। पराशरव्यासशंखलिखितोदक्ष

प्र॰ श॰
१२

गौतमो॥ शातातपो वसिष्ठश्च धर्मशास्त्रप्रवर्तकाः॥ इति स्मृतिवाक्ये याज्ञवल्क्यस्य तत्स्मृतिकर्तृको
टौ प्रविष्टत्वात्॥११०॥ इत्यादिनापि तस्य योगीश्वरत्वप्रसिद्धेः॥ ॥ अपि च॥ तस्मिन्नेव याज्ञवल्क्यस्मृ
तौ॥ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां॥ अयं तु परमो धर्मो यद्योगेनात्मदर्शनं॥ इत्यादिश्लोकैः॥
आत्मज्ञानसाधनरूप निदिध्यासितव्य इति श्रुत्यभिहितयोगस्यैव प्राधान्येनैव दर्शितत्वाच्च॥ ॥
विज्ञानेश्वरीयेपि देशाधिकारकहेतूनां अपवादमाह॥ इज्येति॥ इज्यादीनां कर्मणामयमेव परमो धर्मः॥
यद्योगेन बाह्यचित्तवृत्तिनिरोधेनात्मनो दर्शनं याथातथ्यज्ञानं योगेनात्मज्ञाने देशादिनियमो नास्तीत्य
र्थः॥ तदुक्तं॥ यत्रैकाग्रता तत्राविशेषादिति॥ इत्यादिनापि याज्ञवल्क्यस्य योगप्रधानत्वं दर्शितं भवति
किं च पूर्वोक्त याज्ञवल्क्यस्मृत्युक्त॥ ज्ञेयं चारण्यकमिति श्लोके॥ योगशास्त्रं च मत्प्रोक्तं ज्ञेयं योगमभी
प्सता॥ इति॥ तत्कृतयोगशास्त्रस्यापि दर्शितत्वात्॥ तद्योगशास्त्रं अस्मन्निकटे विद्यमानत्वात्॥ तन्मू

नि॰

लभूते अष्टोत्तरशतोपनिषदंतर्गतकासांचिदुपनिषदां मध्ये पठितेषु केषुचिद्वाक्येषु प्रतिपादितयोगभक्ति
याप वादार्थानां तत्कृतयोगशास्त्रप्रतिपाद्यानां च एकरूपत्वावगमाच्च ॥ एतद्व्याख्यानरूपविज्ञाने
श्वरीयेन्च। किंच। ज्ञेयमिति। चित्तवृत्तेर्विषयान्तरतिरस्कारेणात्मनि स्थैर्यं योगस्तत्प्राप्त्यर्थं मयायद्बृहदारण्य
काख्यमादित्यात्प्राप्तम् ॥ तच्च ज्ञातव्यम्। तथायन्मयोक्तं योगशास्त्रं तदपि ज्ञातव्यम् ॥ ११० ॥ इत्या
दिनापि सर्वत्र याज्ञवल्क्यस्य योगप्राधान्येनैवात्मज्ञानत्वप्रतीतेर्बाहुल्यात्। अत एव मनुस्मृतिव्याख्या
मेधातिथीयादिकल्लूकभट्टीयांतेषु ॥ मनुस्मृतौ द्वितीयाध्याये एकोनत्तरशतसंख्याकश्लोकव्याख्याने।
तदाह योगीयाज्ञव ल्क्यः ॥ ह्रासवृद्धी तु सततं दिवसानां यथाक्रमम् ॥ संध्यामुहूर्त्तमात्रं तु ह्रासे वृद्धौ
च सा स्मृता इति। मनुस्मृतौ तृतीयाध्याये। प्रथमसंख्याकश्लोकव्याख्याने। तदाह योगी याज्ञवल्क्यः
प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पंच वेति ॥ धर्मप्रवृत्तौ शौचप्रकरणे। योगीश्वरः यस्मिन्देशे मृगः कृष्ण

प्र·शा·

१३

स्नास्मिन्धर्मान्निबोधत धर्मसंरक्षणार्थाय तस्मिन्देशे महाद्विजइति ॥ अत्रैवस्नानप्रकरणे योगी श्वरः। नस्मात्कायंनमृज्ये तल्लंबरेण करेणवा ॥ श्वानलेह्ये नसाम्यंच पुनः स्नानेनशुध्यति। अत्रैवनदी रजोदोषः। तत्रैवयोगीश्वरः। रजोदुष्टेषुचस्नानंवर्जनद्याद्दिषुद्विजैः। कदर्थितंततः स्नानंसंध्योपास्तिंच तर्पणमिति। तत्रैवपवि—त्रकरणे॥ योगीश्वरः। दार्भंपवित्रंताम्रंवाराजितंहैममेवच॥ बिभृतोदक्षि णेपाणौपवित्रंचोत्तरोत्तरमिति॥ पराशरमाधवीये॥ आचारकांडेप्रथमाध्याये ३९ संख्याकश्लोक व्याख्यानेयोगयाज्ञव ल्क्यः। स्नात्वैवंवाससीशुक्लेचाछिन्नेपरिधायच॥ प्रक्षाल्योरूमृदाचाद्भिर्ह स्तौप्रक्षालयेदिति। पराशरमाधवीये॥ एतच्छ्लोकव्याख्यानेयोगयाज्ञवल्क्यः। भूर्भुवस्स्वर्महर्जनस्तप सत्यंतथैवच। प्रत्योंकारेणसंयुक्तंतथातत्सवितुः पदमिति। अस्मिन्नेवाध्याये अस्मिन्नेवप्रकरणे। यो गयाज्ञवल्क्यः। पूरकःकुंभकोरेच्यः प्राणायामस्त्रिलक्षणः। नासिकाकृष्टउच्छ्वासोध्मातः पूरकउच्य

नि·

त। इति। अस्मिन्नेवप्रकरणे योगयाज्ञवल्क्यस्तु। अतेपित्रणवयोगार्थमाह। अस्मिन्नेवाध्याये गायत्रीजपप्र
करणे॥ ॥ यद्दिवाग्यमलोपस्यजपादिषुकदाचन॥ व्याहारेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययमि
ति॥ अस्मिन्नेवाध्याये ब्रह्मयज्ञप्रकरणे तथाच योगयाज्ञवल्क्यः॥ प्रदक्षिणंसमावृत्य नमस्कृत्यो
पविश्यच॥ दर्भेषुदर्भपाणिभ्यां संहताभ्यांकृतांजलिरिति॥ ॥अस्मिन्नेवाध्याये॥ ॥तर्पणप्रकरणे
॥ ॥योगयाज्ञवल्क्यः॥ ॥यद्युत्धृतंनिषिंचेत्तु तिलास्याभिश्रयेज्जले॥ अतोन्यथातुसव्येनतिलाः
ग्राह्या विचक्षणैरिति॥ अस्मिन्नेवाध्यायेतत्प्रकरणे योगयाज्ञवल्क्योपि। ब्रह्माणंतर्पयेत्पूर्वं विष्णुं
रुद्रंप्रजापतिम्॥ वेदांश्छंदांसिदेवांश्च ऋषींश्चैव तपोधनानिति॥ ॥तत्प्रकरणेयोगयाज्ञवल्क्यः
॥ वसून्रुद्रांस्तथादित्यान्नमस्कारसमन्वितानिति॥ तत्प्रकरणेयोगयाज्ञवल्क्योपि॥ सवर्णेभ्योंज
लिर्देयो नासवर्णेभ्यएवच। गोत्रनामस्वधाकारैस्तर्पयेदनुपूर्वशइति॥ ॥जीवत्पितृतर्पणेविशेष

माह॥ योगयाज्ञवल्क्यः॥ कव्यवाडनलः सोमो यमश्चैवार्यमा तथा॥ अग्निष्वात्ताः सोमपाश्च त
थाबर्हिषदोपि च॥ इति॥ भीष्मतर्पणप्रकरणे योगयाज्ञवल्क्योपि॥ नास्तिक्यभावाद्यस्तांस्तु न तर्पयति वै पितॄन्। पि
बंति देहनिस्त्रावं पितरो स्य जलार्थिन इति॥ तत्प्रकरणे तदाह योगयाज्ञवल्क्यः॥ यावद्देवानृषींश्चैव
पितॄंश्चापि न तर्पयेत्॥ तावन्न पीडयेद्वस्त्रं यो हि स्नातो भवेद्द्विज इति॥ पराशरमाधवीये॥ आचारकां
डे तृतीयाध्याये। पवित्रप्रकरणे योगयाज्ञवल्क्यः। पवित्रे स्थ इति मंत्रेण द्वे पवित्रे च कारयेत्। अंतर्गर्भे कु
शे च्छिन्ने कौशे प्रादेशसंमित इति। तस्मात् याज्ञवल्क्यस्य योगीश्वरत्वं न्यायतः॥ शास्त्रतः प्रसिध्या च स
म्यक् संभवत्येव। किंच। मनुपराशरव्यासादीनामपि। योगसिध्यादेर्विद्यमानत्वेपि तेषां योगरूपविशेष
णं। अनुक्त्वैव याज्ञवल्क्यमात्रस्यैव योगरूपविशेषणं कथं त्वया दत्तमित्याशंकात्वया कृता इयमाशंका
महदाश्चर्यविषया भवति। लोके तावत्। एकां पतिव्रतां स्त्रियमुद्दिश्य इयं महापतिव्रता इत्युक्ते अन्यासां

सर्वासां स्त्रीणां पातिव्रत्यं नास्ति। सर्वा अपि स्वैरिण्य इत्येव मुक्तं भवतीतिवत्। अयं महादाता। अयं म
हाज्ञानी। अयं महानुष्ठाता। इत्याद्युक्ते अन्येषां सर्वेषामपि दातृत्वाभावज्ञानित्वाभावकर्मनिष्ठत्वाभा
वादिकं उक्तं भवतीति तेषां निंदात्वमेव वक्तृतमित्यादि कल्पनां वच्म। अत्यंतं शास्त्रलोकन्यायविरुद्धं प्र
ष्यत इति। कथं त्वया न ज्ञातमित्याश्चर्यं मम प्रतीयते। न हि निंदा न्यायविदामिति। अप्पय्यदीक्षितचरणैः
शिवोत्कर्षप्रतिपादनविषये विष्णोर्निकृष्टत्वं न संभवतीति प्रतिपादनप्रस्तावेन हि निंदितुं प्रवृत्ता
श्रुतिः किंतु स्तुत्यं स्तोतुं प्रवृत्तेति मीमांसान्यायः प्रदर्शितः एवमत्रापि याज्ञवल्क्यस्वरूपकथने अन्येषाम
न्वादीनां योगवत्त्वाभावद्वारा निकृष्टत्वादि निंदा कथंचिदपि न संभवतीति न्यायविद्भिर्निश्चीयत एव तथा
च यथा आदित्यशब्दः सर्वदेवतावाचकोपि सूर्ययोगरूढ्या तं बोधयति यथा वा पंकजशब्दः पंकजन्यस
र्ववाचकोपि पद्मे योगरूढ्या पद्मं बोधयति तथा योगीश्वरशब्दः अन्यवाचकोपि योगरूढ्या याज्ञवल्क्यं

बोधयति। एवमेव याज्ञवल्क्यस्य परमात्मबोधकपरत्वमपि संभवत्येव। तथा हि॥ याज्ञवल्क्यस्मृतौ प्राय
श्चित्तकांडे आत्मोपासनप्रकरणे अष्टोत्तरशततमश्लोकः। द्विसप्ततिसहस्राणि हृदयादभिनिसृताः हि
ताहिता नाम नाड्यस्तासां मध्ये शशिप्रभं॥१०८॥ मंडलं तस्य मध्यस्थ आत्मा दीपइवाचलः॥ संज्ञेयस्तं वि
दित्वेह पुनराजायते न तु॥१०९॥ इत्यादिषु। तत्रैव॥ अनन्यविषयं कृत्वा मनोबुद्धिः स्मृतींद्रियं। ध्येयआत्मा
स्थितो यो सौ हृदये दीपवत्प्रभुः॥१११॥ इत्याद्येश्च॥ न्यायागतधनस्तत्वज्ञाननिष्ठोतिथिप्रियः। श्राद्धकृ
त्सत्यवादी च ग्रहस्थोपि हि मुच्यते॥२०५॥ इत्यंतश्लोकैः आत्मस्वरूपज्ञानजनकं मध्ये मध्ये॥ आकाश
मेकं हि यथा घटादिषु पृथक् भवेत्। तथात्मैको ह्यनेकश्च जलाधारेष्विवांशुमान्॥ इती॥ इत्येवं स कथं
ब्रम्हन् पापयोनिषु जायते॥ ईश्वरश्च कथं भावैरनिष्टैः संप्रयुज्यते॥ इत्यादि शिष्यप्रश्नपूर्वकसमाधा
नादिमुखेन दृष्टांतादिना च आत्मस्वरूपकथनरूपं सम्यक् विवेकविशिष्टं पौनःपुन्येन प्रतिपादनं बहुशो

दृश्यते। तद्यथा मृद्दंडचक्रसंयोगात् कुंभकारो यथा घटं॥ करोति तृणकाष्ठैस्तु गृहं वा गृहकारकः। हेममात्र
मुपादाय रूप्यं वा हेमकारकः॥ निजलालासमायोगात् कोशं वा कोशकारकः॥ कारणान्येवमादाय ता
सु तास्विह योनिषु। सृजत्यात्मानमात्मा च संभूय करणानि च॥ अस्य विज्ञानेश्वरीयव्याख्याने कथमसावा
त्मा जगत्सृजतीत्यत आह। मृदिति॥ यथा हि कुलालो मृच्चक्रादिकं कारणजातमुपादाय करकशरावा
दिकं नानाविधकार्यजातं रचयति। यथा वा॥ वर्धकिः तृणमृत्काष्ठैः परस्परसापेक्षैरेकं गृहाख्यं का
र्यं करोति। यथा वा हेमकारकः। केवलं हेममादाय हेमानुगतमेव कटकमुकुटकुंडलादिकं कार्यमुत्पाद
यति। यथा वा कोशकारकः कीटविशेषो निजलालया आरब्धमात्मबंधनं कोशाख्यमारभते। तथा
त्मापि पृथिव्यादीनि साधनानि परस्परसापेक्षाणि तथा करणानि च श्रोत्रादीन्युपादाय तस्मिन् संसा
रे तासु तासु सुरादियोनिषु स्वयमेवात्मानं निजकर्मबंधवशं शरीरितया सृजति॥१४२॥ इत्यादिषु। पू

र्वोक्तब्रम्हखानिलेति श्लोके।ब्रम्हशब्देन आत्मन एव स्वीकारात्तस्यैव खानिलादि चराचरजगत्स्रष्टु
त्वंप्रतिपाद्यमृद्ध्इडेत्यादिश्लोकद्वयेन सामान्यतःतस्यैवजगत्कारणत्वमभिधायकेवलनिमित्तकार
णत्वनिरस्यर्थंकोशकारकीटदृष्टांतेनअभिन्ननिमित्तोपादानत्वमपितस्यैवप्रसाध्यपुनस्तस्यैव
जीवाभिन्नसाक्ष्यात्मस्वरूपत्वंवक्ष्यमाणमहाभूतानिससानीत्यादिश्लोकैःइंद्रियप्राणमनोबुध्या
दीनांप्रेरकत्वेनतद्भिन्नत्वेनचआत्मनःसिद्धिंप्रदर्शयन्जगत्कारणब्रम्हणएवजीवात्मरूपेणावस्था
नंदर्शयति।तथाचपूर्वोक्तश्लोकः।ब्रम्हखानिलतेजांसिजलंभूश्चेतिधातवः॥इमेलोकादपश्चात्मा
तस्माच्चसचराचरं॥१४४॥अस्यविज्ञानेश्वरीयव्याख्यानं॥पंचधातून्स्वयंषष्ठआदत्तेयुगपत्प्रभु
रित्याद्युक्तमर्थमुपसंहृत्याहब्रम्हेति॥ब्रम्हआत्मा॥खंगगनं।अनिलोवायुःतेजोअग्निःजलंप्रसिद्धं
भूश्चेत्येतेवातादिधातवएवशरीरंव्याप्यधारयंतीतिधातवोऽभिधीयंते।तत्रखादयःपंचधात

वोलोकांतेदृश्यंतइतिलोकाःजडाइतियावत्।एषचिद्धातुरात्माएतस्मात्जडाजडसमुदायात्स्था
वरजंगमात्मकंजगदुत्पद्यते।।१४८।।इतिब्रम्हणएवआत्मत्वेनस्वीकृत्यजगत्कारणत्वमुपपाद्यत
स्येवजीवरूपेणस्थितत्वेनजीवलिंगानिसंसारधर्मरूपाणिप्रतिपादयन्ब्रम्हाभेदंजीवस्यदृढय
यति।ससंदिग्धमतिःकर्मफलमस्तिनवेतिवाविप्लुतःसिद्धमात्मानमसिद्धोपिहिमन्यते।।१६२।।
अस्यविज्ञानेश्वरीयव्याख्यानंउपासनाविशेषसिध्यर्थंसंसारस्वरूपंविवृण्वन्नाहसइतियोसौ
पूर्वोक्तआत्माविप्लुतोऽहंकारदूषितःससकलंकर्मसफलमस्तिनवेतिसंदिग्धमतिर्भवति।यथ
असिद्धोप्यव्यक्तार्थोपिसिद्धमेवव्यक्तार्थमात्मानंमन्यते।।१६२।।ममदाराःसुतामात्याअहमेषामि
तिस्थितिः।हिताहितेषुभावेषुविपरीतमतिःसदा।।१६३।।अस्यव्याख्यानं।।किंचममेति।।तस्य
विप्लुतमतेर्ममकलत्रपुत्रभृत्यादयोअहमेषामित्यतीवममताकुलस्थितिर्भवति।।तथाहिताहि

तकरे कार्यमकर्ट सविप्लुतमतिर्विपरीतमतिः सदा भवेत् ॥१९३॥ इत्यादिना च जीवब्रह्मैकत्वं बृहदा
रण्योपनिषदादिप्रतिपाद्यं अहं ब्रह्मास्मीति । स वा अयमात्मा ब्रह्म इति । अथात आदेशो नेति
नेतीति । इति सएष नेति नेतीति । इति न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय
सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः । इत्यादि तत्त्वमसीत्यादि
च जीवब्रह्मणोरैक्यं जगत्कारणत्वादिरूपब्रह्मलिंगं संसारित्वादिरूपजीवलिंगं च त्यक्त्वा स्मिन्ने
वसच्चिदानंदात्मके धर्मिणि प्रतिपाद्यमानं स्पष्टतया उपपादयन् पूर्वोक्तस्य ब्रह्मण एव जी
वात्मेन स्थितस्य प्राणेंद्रियमनोबुध्यादिव्यतिरेकेण सद्भावेऽशरीरत्व अनुभवं दर्शयति प्रू
र्वस्मा रितमहाभूतानीत्यादिश्लोकैः । तथा च । महाभूतानि सत्यानि यथात्मापि तथैव हि ॥ को
न्यथैकेन नेत्रेण दृष्टमन्येन पश्यति । वाचं वा को विजानाति पुनः संश्रुत्य संश्रुतां ॥१४१॥ अ

स्यार्थः॥अस्यविज्ञानेश्वरीये।किंपुनर्वैषयिकज्ञानेंद्रियव्यतिरिक्तात्मसद्भावेप्रमाणमित्याशंक्याह॥
महाभूतानीति॥यथाहि॥पृथिव्यादिमहाभूतानिसत्यानि।प्रमाणगम्यत्वात्तथात्मापिसत्यः।अन्यथा
यदिबुद्धींद्रियव्यतिरिक्तोज्ञाताध्रुवोनतर्ह्येकेनचक्षुरिंद्रियेणदृष्टंवस्त्वन्येनस्पर्शनेंद्रियेणकोविजा
नाति।यमहमद्राक्षंतमहंस्पृशामीतितथाकस्यचित्पुरुषस्यवाचंपूर्वंश्रुत्वापुनःश्रूयमाणांवाचंत
स्यवागियमितिकःप्रत्यभिजानाति।तस्मात्ज्ञानेंद्रियातिरिक्तोज्ञाताध्रुवइतिसिद्धं॥१४९॥अती
तार्थस्मृतिःकस्यकोवास्वप्नस्यकारकः।जातिरूपवयोवृत्तिविद्यादिभिरहंकृतः॥शब्दादिविषयो
द्योगंकर्मणामनसागिरा॥१५१॥अस्यव्याख्यानं॥किंच॥अतीतेति॥यद्यात्माध्रुवोनस्यात्तर्ह्यनु
भूतार्थगोचरास्मृतिः॥पूर्वानुभवभावितसंस्कारोद्बोधनिबंधना।कस्यभवेन्नह्यन्येनदृष्टेवान्यस्य
स्मृतिरुपपद्यते।तथा।कःस्वप्नज्ञानस्यकारकः।नहींद्रियाणां उपरतव्यापाराणां तत्कारकत्वात्

थाऽहमेवाभिजनत्वादिसंपन्न इत्येवं विधानुसंधानप्रत्ययः। कस्य भवति। स्थिरात्मव्यतिरिक्तस्य
तथा शब्दस्पर्शादिविषयोपभोगसिध्यर्थं सुयोगं मनोवाक्कायैः कः कुर्यात्तस्मादपि बुद्धींद्रियव्य
तिरिक्त आत्मा स्थितः॥१८१॥ इत्यादिभिः पंडितपामरसाधारण्येन अतिसुलभतया जीवब्रह्मैक्यं
जीवात्मनः देहादिसंघातव्यतिरिक्तत्वेन स्थित्यनुभवं च प्रदर्शितवतः याज्ञवल्क्यस्य परमात्मबोध
कपरत्वं संभवत्येवेति। तद्विशेषणमुचितमेव। प्रस्तुत। अतिस्पष्टतया अनुभवप्रयोजक बृहदारण्योप
निषदि च याज्ञवल्क्यस्य परमात्मबोधकपरत्वं प्रतीयते। तथाहि॥ बृहदारण्यके पंचमाध्याये॥ जनको
ह वैदेहो बहुदक्षिणेन यज्ञेनेजे तत्र ह कुरुपंचालानां ब्राम्हणा अभिसमेता बभूवुस्तस्य ह जनकस्य वैदेह
स्य विजिज्ञासा बभूव कस्विदेषां ब्राम्हणानामनूचानतम इति। इत्यादिवाक्येषु याज्ञवल्क्यस्य परमा
त्मानुभवजनक उपपत्तिरूपयुक्त्यादिप्रदर्शननिपुणतरत्वं प्रतीयत एव॥ तथा च एतत्संचमाध्यायस्य

शंकरभगवत्पादीयंभाष्यं॥ जनकोहवैदेह इत्यादियाज्ञवल्कीयंकांडमारभ्यते ॥ उपपत्तिप्रधानत्वादिति॥
अतिक्रांतेनमधुकांडेनसमानार्थत्वेपिसति। नपुनरुक्तता। मधुकांडंह्यागमप्रधानं॥ ॥आगमोप
पत्तिह्यात्मैकत्वप्रकाशनायप्रवृत्तेशक्नुतः करतलगतविल्वमिवदर्शयितुंश्रोतव्योमंतव्य इतिह्युक्तं॥
तस्मादागमार्थस्यैवपरीक्षापूर्वकंनिर्धारणाय। याज्ञवल्कीयंकांडमुपपत्तिप्रधानमारभते॥ ॥ ॥
तस्मिन्नेवद्वितीयखंडे॥ ॥तान्होवाचब्राह्मणाभगवंतोयोवोब्रह्मिष्ठःसएतागाउदजतामिति॥ तेह
ब्राम्हणानदधृषुरथहयाज्ञवल्क्यः स्वमेवब्रह्मचारिणमुवाचैताः॥ सोम्योदजसामश्रवाइति॥ताहो
दाचकार। तेहब्राह्मणाश्चुक्रुधुः॥ कथंनोब्रह्मिष्ठोब्रवीतेत्यथह जनकस्यवैदेहस्यहोताश्वलोबभूव॥ सहैनं
नंपप्रच्छत्वंनुखलुनोयाज्ञवल्क्यब्रह्मिष्ठोसी ३ इतिसहोवाचनमोवयंब्रह्मिष्ठायकुर्मोगोकामा एववयं
स्मइतितंह हततएवप्रष्टुंदध्रेहोताश्वलः॥ अस्यभगवत्पादीयंभाष्यम्॥ ॥गाएवमवरुध्यब्राह्म

णास्तानाह ॥ उवाच हे ब्राह्मणाः भगवंत इत्यामंत्र्य योवः युष्माकं ब्रह्मिष्ठः सर्वेयूयंब्राह्मणाः अतिश
येन युष्माकं ब्रह्मिष्ठः स एतागा उदजतां उत्कालयतु स्वगृहं प्रति तेह ब्राह्मणा न दधृषुः नेह किलेवमुक्ताः
ब्राह्मणाः ब्रह्मिष्ठतामात्मनः प्रतिज्ञातुं नदधृषुः नप्रगल्भाः संवृत्ताः अप्रगल्भभूतेष्वथ याज्ञवल्क्यः स्वंअ
न्तीयमेव ब्रह्मचारिणं अंतेवासिनमुवाच एताः गाः ॥ हे सोम्य उदज उद्गमय अस्मद्गृहान्प्रति हे सामश्रवसा म
विधिं हि श्रुणोति। अतो र्थाच्चतुर्वेदो याज्ञवल्क्यः ताः गाः ह ॥ उदाचकार उत्कालितवानाचार्यगृहं प्रति याज्ञ
वल्क्येन ब्रह्मिष्ठपणस्वीकरणेनात्मनो ब्रह्मिष्ठता प्रतिज्ञातेति तेह चुक्रुधुः क्रुद्धवंन्तः ब्राह्मणाः तेषां
क्रोधाभिप्रायमाचष्टे ॥ कथंनः । अस्माकमेकैकप्रधानानां ब्रह्मिष्ठोस्मीति ब्रवीतेति ॥ अथ ह एवं क्रुद्धेषु
ब्राह्मणेषु जनकस्य यजमानस्य होता ऋत्विक् आश्वलो नाम बभूव आसीत् स एनं याज्ञवल्क्यं ब्रह्मिष्ठा
भिमानी राजाश्रयत्वाच्च धृष्टो याज्ञवल्क्यं पप्रच्छ पृष्टवान् कथं याज्ञवल्क्येति होवाच त्वं नु खलु नो याज्ञ

वल्क्यब्रह्मिष्ठोसी ३ इति ॥ पुनिर्भर्त्सनार्था॥ सहोवाचयाज्ञवल्क्यः नमस्कुर्मोवयंब्रह्मिष्ठायइदानीं
गोकामास्मोवयमिति तंब्रह्मिष्ठप्रतिज्ञंसंतं। ततएवब्रह्मिष्ठपणस्वीकरणात्प्रष्टुंदध्रेधृतवान्। मन्त्रहोता॰
श्वलः। अस्य आनंदगिरीयंव्याख्यानं॥ ब्राह्मणाःवेदाध्ययनसंपन्नाः तदर्थनिष्ठाइतियावत्।उत्कालयत् उ
द्गमयत् यतोयाज्ञवल्क्याद्यजुर्वेदविदः सकाशाद्ब्रह्मचारी सामविधिंशृणोति ऋक्षुचाध्यारूढंसामगी
यते त्रिष्वेवचवेदेष्वंतर्भूतोऽथर्ववेदः तस्मादर्थात् यजुर्वेदिनोमुनेः शिष्यस्यसामवेदाध्ययनानुपपत्तेः
वेदचतुष्टयविशिष्टोमुनिरित्याह अतइति निमित्तनिवेदनपूर्वकंब्राह्मणानां सभ्यानांक्रोधप्राप्तिंदर्शयति
याज्ञवल्क्येनेति। क्रोधानंतर्यमथशब्दार्थंकथयतिक्रुद्धेष्विति आश्वलप्रश्नस्यप्राथम्ये हेतुः॰
राजेति याज्ञवल्क्यमिति अनुवादोन्वयप्रदर्शनार्थः प्रश्नमेवप्रश्नपूर्वकंविशदयति ॥ कथमित्या
दिना। अनोधृत्यंब्रह्मविदोलिंगमिति सूचयति सहेति किमिति तर्हिस्वगृहंप्रतिगावो ब्रह्मिष्ठपणभूता

नीताः तत्राऽऽह इदानीमिति न तस्य तादृशी प्रतिज्ञा प्रतिभातीत्याशंक्याह तत एवेति एतत्प्रथमखण्डे
ब्राह्मणा अभिसमेता बभूवुः। तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कः स्विदेषां ब्राह्मणानामनूचानतम इत्यनेन॥ तान्होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति॥ ते ह ब्राह्मणा
न दधृषुः इत्यनेन च वाक्येन कुरुपांचालादिबहुब्राह्मणानां मध्ये याज्ञवल्क्य एक एव ब्रह्मिष्ठ इति सर्वेषां
प्रदर्शनार्थं एतदाख्यायिकामुखेन श्रुतेस्तात्पर्यं प्रकटीकृतं भवति अतः परमात्मबोधकपरत्वं याज्ञवल्क्य
स्यैवेति श्रुत्या सिद्धं भवति एवमेव एतद्भाष्येपि॥ जनको ह वैदेह इत्यादि याज्ञवल्कीयं काण्डमारभ्यते
उपपत्तिप्रधानत्वादिति कांतेन मधुकाण्डेन समानार्थत्वेपि सति न पुनरुक्तता मधुकांडं ह्यागमप्रधानं
आगमोपपत्तिभ्यां हि आत्मैकत्वप्रकाशनाय प्रवृत्ते शक्नुतः करतलगतबिल्वमिव दर्शयितुं श्रोतव्यो मंतव्यो निदिध्यासितव्य इति ह्युक्तं तस्मादागमार्थस्यैव परीक्षापूर्वकं निर्धारणाय याज्ञवल्कीयं॰

कांडमुपपत्तिप्रधानमारभते इत्यादिवाक्यजातेन याज्ञवल्क्यकांडमिति ब्राह्मणैकदेशस्यापि याज्ञव
ल्क्यसंबंधित्वप्रतिपादनपूर्वकं उपपत्तिप्रधानमिति आत्मानुभवजनकोपायरूपयुक्त्यादि प्रतिपा
दनद्वाराकरतलगतबिल्वमिवेति सम्यगेव अपरोक्षसाक्षात्कारजनकसामर्थ्यं याज्ञवल्क्यस्यैवेति भा
ष्यकारतात्पर्यं स्पष्टीकृतं भवति एवमेव एतद्व्याख्यानरूपे आनंदगिरीये उपपत्तिरुपकर्णं तया पदार्थ
परिशोधनद्वारा तत्त्वहेतुरित्यत्र गमकमाह श्रोतव्य इति कर्णोपकर्णयोरागमोपपत्त्योस्तत्त्वज्ञानहेतुत्वे।
सिद्धं फलितमुपसंहरति तस्मादित्यादिना वाक्यजातेन च परमात्मप्रकाशनहेतूपपादने याज्ञवल्क्य
स्य अतिनिपुणतरत्वं इति व्याख्यानकारतात्पर्यमपि सूचितं भवति॥ एवं द्वितीयखंडेपि। ज्ञान्होवाच॥
ब्राह्मणा भगवंतो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति॥ इत्यनेन बहूनां ब्राह्मणानां मध्ये ब्रह्मवित्त
लभतया अनुभवहेतुपूर्वकब्रह्मबोधकः कश्चिन्नास्तीति परीक्षापूर्वकं गुरुग्रहणं कर्त्तव्यमिति

सु
ज

नको द्वेश्यं प्रकटयति सति तेह ब्राह्मणा नदध्रृषुरित्यनेन तत्रस्थ ब्राह्मणानां सर्वेषामपि ॥ ब्रह्मोपदे
शानधिकारं दर्शयित्वा अथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाचैताः सोम्योदजसामश्रवा इति इ
त्यनेन याज्ञवल्क्य मात्रस्य मुख्य ब्रह्मिष्ठत्वदाढ्यं सूचयित्वा नाह्नोदाचकार ते ह ब्राह्मणाश्चुक्रुधुः । कथं
नो ब्रह्मिष्ठो ब्रवीतेति । इत्यनेन ॥ अनधिकारिप्रयुक्त असूयानिमित्तक क्रोधाविष्टत्वस्य सर्वेषां ब्राह्मणा
नां संभवं ज्ञापयित्वा उत्तरत्राध्यायसमाप्तेः तत्रस्थैरन्यैर्ब्राह्मणैः सह ब्रह्मविचारेषु विवदमानस्य याज्ञ
वल्क्यस्य वेदांत ज्ञाननिपुणतरत्वं प्रकटयति च सति । तस्यैव ज्ञान्युत्तमत्वं स्थापितवतीति श्रुतेस्तात्पर्यं
स्पष्टमेव सिद्धं भवति ॥ अपि च । अथ ह याज्ञवल्क्यः स्वयमेव ब्रह्मचारिणमुवाचैताः सोम्योदजा इति । इ
त्युक्ति मात्रेणैव गोनयनकार्यनिर्वाह संभवात् इत्येवमात्र वक्तव्ये तद्विहाय सामश्रवा इति अधिकृतयाना
मग्रहणरूप प्रतिपादने प्रयोजनाभावेपि । याज्ञवल्क्यस्य चतुर्वेदवित्वज्ञापनार्थं श्रुत्या सामश्रव इत्यं तं

प्रतिपादितमितिहेतोरपियाज्ञवल्क्यस्यचतुर्वेदवित्वेनपरमात्मबोधकपरत्वविषयेश्रुतेर्मुख्यंतात्प
र्यमितिगम्यते ॥ एवंभाष्यकारस्यापिश्रुतितात्पर्यानुरोधेनतत्रस्थब्राम्हणानांसर्वेषांमध्येयाज्ञवल्क्य
स्यैकस्यैवब्रम्हिष्ठत्वंब्रम्हबोधकत्वंइत्यादिप्रकटनद्वाराचतुर्वेदवित्वस्यसामश्रवशब्दनिर्वचनेनस्पं
ष्टीकृतत्वादपियाज्ञवल्क्यस्यपरमात्मबोधकपरत्वमेवतात्पर्यविषयइतिभाष्यवाक्यसंदर्भेणनिश्ची
यते। एवमेवभाष्यव्याख्याकर्तुःआनंदगिरियाचार्यस्यापि। एतद्भाष्यव्याख्यानावसरेश्रुतितात्पर्य
भाष्यतात्पर्याभ्युपगंतृत्वेनभाष्येसामश्रवशब्दनिर्वचनेनयाज्ञवल्क्यस्यचतुर्वेदाध्येतृत्वेभाष्यकारे
णप्रतिपादितेसतिसामवेदाध्येतृत्वंअनुमितमपिऋग्वेदाथर्वणवेदाध्येतृत्वेप्रमाणाभावइत्याशंका
यांऋच्यध्यूढंसामेतिछांदोग्योपनिषद्युक्तरीत्यासाम्नःऋग्विकारत्वेनऋगध्येनाभावेसामाध्ययना
संभवात् ॥ ऋग्वेदाध्येतृत्वमर्थसिद्धं एवंअथर्वणवेदस्यत्रिष्वेवांतर्भावात् चतुर्वेदाध्येतृत्वंयाज्ञवल्क्य

स्यसिद्धमेवेतिव्याख्यानेसाधितत्वात्।व्याख्यातुरपिपूर्वोक्तस्यश्रुतिभाष्योभयात्मकग्रंथस्यइदमेवत
त्त्वार्थमितिनिश्चयात्।अपिचपराशरमाधवीयेपि।आचारकांडेतृतीयाध्यायेश्राद्धभोजनीयब्राह्मणप्र
करणेबृहस्पतिरपि।यद्येकंभोजयेच्छ्राद्धेछंदोगंतत्रभोजयेत्।ऋचोयजूंषिसामानित्रितयंतत्रविद्य
ते॥इतिहेतोरपि।याज्ञवल्क्यस्यपरमात्मबोधकपरत्वं।अबाधितंभवतिननुभाष्यकारैर्व्याख्याक
रैश्चयाज्ञवल्क्यस्यचतुर्वेदवित्त्वंपरंपरयायुक्त्यासाधितमपिवाचनिकतयातद्विषयेबलवत्प्रमाणं
नोपलभ्यतेइतिचेत्नलोकप्रसिद्धसर्ववेदांगीकर्तुर्नैय्यभयिकसांख्यवैखानसपांचरात्रिपाशुपतरा
मानुजीयमाध्वमीमांसकादिभिःमहाप्रमाणत्वेनगृहीतानांविष्णुपुराणभागवतस्कांदपुराणादीनां
मध्यगतग्रंथेषुक्वचित्क्वचित्स्थलेबाष्कलवैशंपायनादिभिःऋग्वेदयजुर्वेदाध्ययनेयाज्ञवल्के
नकृतमितिस्पष्टतयाशब्दतएवप्रतीयते।तथाहि।विष्णुपुराणे॥तृतीयांशे।चतुर्थाध्याये।पराश

र:॥आद्योवेदश्चतुष्पादःशतसाहस्रसंमितः॥ततोदशगुणःकृत्स्नोयज्ञोयंसर्वकामधुक्॥ १ ॥
ततोत्रमत्सुतोव्यासअष्टाविंशतिमेंतरे॥वेदमेकंचतुष्पादचतुर्धाव्यभजत्प्रभुः॥ २॥यथाचतेनते
व्यस्तावेदव्यासेनधीमता॥वेदास्तथासमस्तैस्तैर्व्यस्ताव्यासैस्तथामया॥३॥तदनेनैववेदानांशा
खाभेदान्द्विजोत्तम॥चतुर्युगेषुरचितान्समस्तेष्ववधारय॥४॥कृष्णद्वैपायनंव्यासंविद्धिनाराय
णंप्रभुं॥कोन्योहिभुविमैत्रेयमहाभारतकृद्भवेत्॥५॥तेनव्यस्तायथावेदामत्पुत्रेणमहात्मना॥द्वा
परेह्यत्रमैत्रेयतन्मेशृणुयथार्थतः॥६॥ब्रह्मणाचोदितोव्यासोवेदान्व्यस्तुंप्रचक्रमे॥अथशिष्यां
स्सजग्राहचतुरोवेदपारगान्॥७॥ऋग्वेदग्राहकंपैलंजग्राहसुमहामतिः॥वैशंपायननामानंयजु
र्वेदस्यचाग्रहीत्॥८॥जैमिनिंसामवेदस्यतथैवाथर्ववेदवित्॥सुमंतुस्तस्यशिष्योभूद्वेदव्यासस्य
धीमतः॥९॥रोमहर्षणनामानंमहाबुद्धिंमहामुनिं॥सूतंजग्राहशिष्यंसइतिहासपुराणयोः॥१०॥

प्र॰ श्॰
२३

एवं आसीद्यजुर्वेदस्तं चतुर्धाव्यकल्पयत्॥ चातुर्होत्रमभूद्यस्मिंस्तेन यज्ञमथाकरोत्॥११॥ आध्वर्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथा मुनिः॥ औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः॥१२॥ ततः सर्वज्ञ उद्धृत्य ऋग्वेदं कृतवान्मुनिः॥ यजूंषि च यजुर्वेदं सामवेदं च सामभिः॥१३॥ राज्ञां त्वथर्ववेदेन सर्वकर्माणि सप्रभुः॥ कारयामास मैत्रेय ब्रह्मत्वं च यथास्थिति॥१४॥ सोयमेको महावेदतरुस्तेन पृथक्कृतः॥ चतुर्धा च ततो जातं वेदपादपकाननं॥१५॥ बिभेद प्रथमं विप्रे पैलो ह्यृग्वेदपादपं॥ इंद्रप्रमितये प्रादाद्बाष्कलाय च संहिता॥१६॥ चतुर्धा स बिभेदाथ बाष्कलो द्विजसंहितां॥ बोध्यादिभ्यो ददौ तास्तु शिष्येभ्यः सुमहामतिः॥१७॥ बोध्याग्निमाढकौ तद्वद्याज्ञवल्क्यपराशरौ॥ प्रतिशाखास्तु शाखायास्तस्यास्ते जगृहुर्मुने॥१८॥ इंद्रप्रमितिरेकां तु संहितां स्वसुतं ततः॥ मांडूकेयं महाभागं मैत्रेयाध्यापयत्तदा॥१९॥ तस्य शिष्यप्रशिष्येभ्यः पुत्रशिष्यक्रमाद्ययौ॥२०॥ एवमेव श्रीमद्भागवते द्वादशस्कंधे षष्ठाध्याये॥

नि॰

क्षीणायुषः क्षीणसत्वान्दुर्मेधान्वीक्ष्य कालतः ॥ वेदान्ब्रम्हर्षयो व्यस्यन्हृदिस्थाच्युतचोदिताः ॥४७
अस्मिन्नप्यंतरे ब्रम्हन्भगवन्लोकभावनः ॥ ब्रम्हेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥ ४८ ॥ पराशरा
त्सत्यवत्यामंशांशकलया विभुः ॥ अवतीर्णो महाभागो वेदं चक्रे चतुर्विधं ॥ ४९ ॥ ऋगथर्वायजुःसाम्नां
राशीनुधृत्य वर्गशः ॥ चतस्रः संहिताश्चक्रे सूत्रे मणिगणानिव ॥ ५० ॥ तासां स चतुरः शिष्यानुपहूय महा
मतिः ॥ एकैकां संहितां ब्रम्हन्नेकैकस्मै ददौ विभुः ॥ ५१ ॥ पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ॥ वैशंपा
यनसंज्ञाय निगदाख्यं यजुर्गणं ॥ ५२ ॥ साम्नां जैमिनये प्राह तथा छंदोगसंहितां ॥ अथर्वांगिरसं नाम स्वशि
ष्याय सुमंतवे ॥ ५३ ॥ पैलस्वसंहितामूचे इंद्रप्रमितये मुनिः ॥ बाष्कलाय च सोप्याह शिष्येभ्यः संहितां स्वकां
॥ ५४ ॥ चतुर्था व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ॥ पराशराग्निमित्राभ्यामिंद्रप्रमितिरात्मवान् ॥ ५५ ॥ अ
ध्यापयत्संहितां स्वां मांडूकेयमृषिं कविं ॥ तस्य शिष्यो देवमित्रः सोभर्यादिभ्य ऊचिवान् ॥ ५६ ॥ भारते ॥ हरि

वंशे द्विचत्वारिंशदधिकशततमाध्याये। वैशंपायनः। एतस्मिन्नेव कालेतु चतुर्वेदः षडंगवित्। ब्राम्हणो याज्ञवल्क्यस्य शिष्यः सर्वगुणान्वितः॥ ब्रम्हदत्तेति विख्यातो विप्रो वाजसनेयिनां॥ इति। इत्यादि महाप्रमाणैः याज्ञवल्क्यस्य ऋग्वेदाध्येतृत्वस्मरणात् भाष्यकारोक्त चतुर्वेदाध्येतृत्वं याज्ञवल्क्यस्य सिद्धं भवति। अपिच द्विजमात्रस्यापि चतुर्वेदाध्येतृत्वस्य आवश्यकत्वेन मन्वादिस्मृतिप्रसिद्धेः। तथाहि। याज्ञवल्क्यस्मृतौ विज्ञानेश्वरीये आचारकांडे। प्रतिवेदं ब्रम्हचर्यं द्वादशाब्दानि पंचवा॥ ग्रहणांतिकमित्येके केशांतश्चैव षोडशेति॥ ३७॥ अत्रैव स्नातकप्रकरणे। गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया वेदव्रतानि वा पारं नीत्वा ह्युभयमेव वेति॥ नरसिंहपारिजाते ब्रम्हचर्यप्रकरणे। ब्रम्हचर्य अवधिकालमाह। याज्ञवल्क्यः वेदानधीत्य वेदौ वा वेदं वाथ यथाविधि॥ अविप्लुतब्रम्हचर्यो लक्षण्यां स्त्रियमुद्वहेदिति। कात्यायनगृह्यसूत्रे। अष्टाचत्वारिंशद्वर्षाणि वेदब्रम्हचर्यं चरेद्द्वादश द्वादश वा प्रतिवेदं यावद्ग्रहणं वा इति॥ गौतमधर्मसूत्रेच॥ द्वादशवर्षाण्येकवेदे ब्रम्हचर्यं चरेत् प्रतिद्वादश वा। सर्वेषु ग्रहणांतं वा इति मनुस्मृतावपि तृतीयाध्याये

त्रिंशदाब्दिकंचर्यंगुरौत्रैवेदिकव्रतं॥तदर्धिकंपादिकंवाग्रहणांतिकमेववा॥१॥वेदानधीत्यवेदौवावेदंवापियथाक्रमं॥अविप्लुतब्रम्हचर्योगृहस्थाश्रममाविशेत्॥२॥इति॥आपस्तंबधर्मसूत्रे॥उज्वलायामपि॥तत्रब्रम्हचर्यकालमाह॥अष्टाचत्वारिंशद्वर्षाणिचतुर्णांवेदानामध्ययनकालःएषःप्रतिवेदंद्वादशनवअर्धेनऊनमितीति॥तथाबोधायनधर्मसूत्रेप्रथमाध्याये॥तृतीयखंडे॥अष्टाचत्वारिंशद्वर्षाणिपौराणंवेदब्रम्हचर्यंचतुर्विंशतिंवाद्वादशवाप्रतिवेदंसंवत्सरावमंवाप्रतिकांडंग्रहणांतवेति॥इत्यादिषुबहुषुप्रामाणिकग्रंथेषुएवंप्रतिपादनात्॥ब्राम्हणादीनांचतुर्वेदाध्येतृत्वविधेःसत्वात्॥याज्ञवल्क्यस्यापिचतुर्वेदाध्ययनसंभवात्॥अध्ययनसंभवेअध्यापनस्यापिसंभवाच्च॥सामश्रवादीन्प्रति॥सामवेदाध्यापनं॥कण्वमाध्यंदिनादीन्प्रतियजुर्वेदाध्यापनंअन्यान्शिष्यान्प्रतियथासंभवंऋग्वेदअथर्वणवेदाध्यापनंचयाज्ञवल्क्यस्यसंभवतीतिसिद्धं॥ब्रम्हक्षत्रवैश्यानामपिचतुर्वेदाध्येतृत्वविधानेसतिब्राम्ह

णस्य महर्षेः याज्ञवल्क्यस्य चतुर्वेदवित्वं किमाश्चर्यं ॥ प्रस्तुत ॥ बोधायनगृह्यसूत्रे विवाहप्रकरणे विवाहांगव्रत
विशेषे ॥ ब्राम्हणेन ब्राम्हण्यामुत्पन्नो जात इत्यभिधीयते ॥ उपनयनमात्रेण व्रतानुचारी किंचिद्वेदमधीत्य ब्रा
म्हणः ॥ एकां शाखामधीत्य श्रोत्रियः अंगाध्याय्यनूचानः कल्पाध्यायी ऋषिः कल्पः सूत्र प्रवचना
ध्यायी भ्रूणः ॥ चतुर्वेदाध्यायी ऋषिः अत ऊर्ध्वं देवः ॥ इत्युक्तप्रकारेण चतुर्वेदाध्येतृत्वाभावे ऋषित्वासं
भवात् याज्ञवल्क्यस्य महर्षित्वेन चतुर्वेदाध्येतृत्वमर्थसिद्धं ॥ ननु महाप्रयासेन त्वया याज्ञवल्क्यस्य चतु
र्वेदाध्येतृत्वं साधितं ॥ द्विजमात्रस्यापि चतुर्वेदाध्ययने विधानस्य प्राप्तत्वात् ॥ अस्य कोयं विशेषः ॥ आग
तः इति चेन्नैवं ॥ विधानमात्रेणैव कस्यापि माहात्म्यं न प्रवर्तते अपितु ॥ तथाध्येतृत्वे संभवति ॥ अश्वमेधे
न यजेत ॥ इति विधानमात्रेण अश्वमेधफलं न लभ्यते ॥ तद्वत् चतुर्वेदाध्ययनपूर्वक तज्ज्ञान तदनुष्ठान
तत्फलप्राप्तिसद्भावे तन्माहात्म्यं प्रतिपद्यते ॥ एतेन चतुर्वेदाध्ययने प्राप्ते चतुर्वेदावांतरशाखागत उप

निषदांमुक्तिकोपनिषत्प्रतिपादितप्रकारेणअनेकशताधिकानेकसहस्रोपनिषदांमध्येयथास्म
वंबह्वोपनिषद्ग्रंथस्ययुक्त्यनुभवादिनिपुणतरत्वलाभेनयाज्ञवल्क्यस्यपरोपदेशविषयेपरमात्मबो
धकपरत्वंसमीचीनतयासंभवतीतिवक्तव्यं॥किंचपूर्वारब्धंप्रकृतमनुसरामः॥पंचमाध्यायेप्रथमब्रा
ह्मणेतृतीयखंडिकायांयाज्ञवल्क्यंप्रतिहोताश्वलप्रश्नः॥श्रुतिः॥याज्ञवल्क्येतिहोवाचयदिदꣳसर्वं
मृत्युनाप्तꣳसर्वंमृत्युनाभिपन्नंकेनयजमानोमृत्योराप्तिमतिमुच्यतइतिहोत्रर्त्विजाऽग्निनावाचावा
ग्वैयज्ञस्यहोतातद्येयंवाक्सोयमग्निःसहोतासमुक्तिःसातिमुक्तिः॥८३॥इत्यस्यखंडिकारूपवाक्य
स्यभाष्यव्याख्यानाभ्यांनिर्णीतोर्थःसंक्षेपतःसूच्यते॥तथाहि॥इदंसर्वंस्वाभाविकाज्ञानआसंगप्र
युक्तकाम्यकर्मरूपमृत्युव्याप्तंमृत्योर्वशंगतं॥अतःकर्मकर्तायजमानःअज्ञानआसंगादिप्रयुक्तका
म्यकर्मरूपमृत्योःसकाशात्केनसाधनेनअतिमुच्यतइतियाज्ञवल्क्यंप्रतिआश्वलेनप्रश्नेकृतेअज्ञा

नआसंगनिवृत्तिपर्यंतंअज्ञानादिप्रयुक्तकाम्यकर्मरूपमृत्योःसकाशात्॥यदाकदावाअतिमुक्तिर्नसंभव
ति॥अथवाकर्मप्रयोजकीभूतअग्निदेवताभावनायाःअधियज्ञेषुहोतरिअध्यात्मसुवाचियजमानेचस
र्वदाकृतत्वेकर्मणःमुख्यतयाप्रयोजकीभूतअग्निदेवताप्राप्त्याअज्ञानआसंगप्रयुक्तअग्न्यधीनकाम्य
कर्मरूपमृत्योःसकाशात्अतिमुक्तिर्भवति॥परिच्छिन्नरूपकर्मतदंगहोतृवाग्यजमानाद्यपेक्षयाव्याप
कत्वापरिच्छिन्नत्वस्यअग्नेःसंभवात्॥तव्द्याप्यरूपतदधीनकर्मादिरूपमुक्तेःसंभवोयुक्तएव॥अत
एवकर्मांगीभूतहोतृवाग्यजमानेषुअग्निदेवताभावनासहितकर्मानुष्ठानेनपूर्वोक्तमृत्योःसकाशात्
विमुक्तिरूपफलंयजमानःप्राप्नोतीत्यभिप्रायंआश्वलःमनसिनिधाययाज्ञवल्क्यंपरीक्षार्थंपृष्टवान्॥या
ज्ञवल्क्यःतदभिप्रायंज्ञात्वातदनुरूपमेवतदुत्तरत्वेनकर्मांगरूपहोतृवाग्यजमानेषुअग्निदेवताभावना
सहितकर्मानुष्ठानेनअग्निदेवताप्राप्त्यातदधीनकर्मरूपमृत्योरतिमुच्यते॥इत्युक्तवान्॥एवमेवतदुत्त

रचतुर्थखंडिकायामुक्तानां॥श्रुतिः॥याज्ञवल्क्येतिहोवाचयदिदꣳसर्वमहोरात्राभ्यामाप्तꣳसर्वमहोरा
त्राभ्याममभिपन्नंकेनयजमानोहोरात्रयोराप्तिमतिमुच्यतइत्यध्वर्युणर्त्विजाचक्षुषादित्येनचक्षुर्वैयज्ञस्याध्व
र्युस्तद्यदिदंचक्षुःसोसावादित्यःसोध्वर्युःसमुक्तिःसातिमुक्तिः॥इत्यादिवाक्यानांभाष्यव्याख्यानाभ्यांनिष्पं
नोर्थः॥विविच्यते॥पूर्वोक्तरीत्यास्वाभाविकाज्ञानआसंगप्रयुक्तकर्मप्रयोजकाहोरात्रात्मिककालरूपमृ
त्योःसकाशात्यजमानःकेनसाधनेनअतिमुच्यतइतिपुनःआश्वलेनपृष्टः॥याज्ञवल्क्यःअधियज्ञेषुक
र्मांगीभूताध्वर्युरूपेऋत्विजिअध्यात्मसुचक्षुषियजमानेचआदित्यदृष्टिरूपभावनासहितकर्मानुष्ठाने
नआदित्यदेवताभावप्राप्त्यातव्याप्यअहोरात्रात्मिककर्मप्रयोजककालरूपमृत्युनायजमानःअतिमुच्य
तेतत्कालवशीकृतत्वाभावेनसतंत्रश्चभवति॥अहोरात्रात्मककालस्यआदित्यगतिप्रयुक्तत्वेनआदित्या
धीनत्वादित्यभिप्रायमुक्तवान्॥एतदुत्तरपंचमखंडिकायामुक्तानांश्रुतिः॥याज्ञवल्क्येतिहोवाचयदिदꣳ

सर्वंपूर्वपक्षापरपक्षाभ्यामाप्तꣳसर्वंपूर्वपक्षापरपक्षाभ्यामभिपन्नं केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमति
मुच्यत इत्युद्गात्रर्त्विजा वायुना प्राणेन प्राणो वै यज्ञस्योद्गाता तद्योयं प्राणः स वायुः स उद्गाता स मुक्तिः सातिमुक्तिः॥ इत्यादिवाक्यानां भाष्यव्याख्यानाभ्यां निर्णीतार्थस्तु कर्मप्रयोजनीभूतपूर्वपक्षापरपक्षात्मकतिथिलक्षणकालरूपान्मृत्योः यजमानः केन साधनेन अतिमुक्तिं प्राप्नोतीति पुनः आश्वलेन पृष्टः याज्ञवल्क्यः
काण्वमाध्यंदिनात्मकावांतरशाखाश्रुत्युक्तविकल्पेन अधियज्ञेषु उद्गातरि अध्यात्मस्तु प्राणे यजमा-
ने च वायुदृष्ट्यात्मकभावनासहितकर्मानुष्ठानेन अधियज्ञेषु ब्रम्हनामकऋत्विजि अध्यात्मस्तु मनसि यज-
माने च चंद्रदृष्ट्यात्मकभावनासहितकर्मानुष्ठानेन वा वाय्वभिन्नचंद्रप्राप्त्या चंद्राभिन्नवाय्वात्मकसूत्रा-
त्मप्राप्त्या वा वायुप्रेरितचंद्रगत्यधीनपूर्वपक्षापरपक्षलक्षणतिथ्यात्मककालरूपमृत्योः सकाशात् यज-
मानस्य अतिमुक्तिर्भवति॥ तिथिवृद्धिक्षयहेतोः चंद्रगतेर्वाय्वधीनत्वात् चंद्रप्राप्त्या वा॥ वायुप्राप्त्या वा

तदधीनपूर्वपक्षापरपक्षशब्दिततिथ्यात्मककालात्तद्वशीकृतरूपबंधेनविमुच्य स्वातंत्र्योभवतीति
हेतोःतादृशमृत्योःसकाशात्अतिमुक्तिर्भवतीतितदभिप्रायानुसारेणउत्तरमुक्तवान्॥एवमेवत
दुत्तरषष्ठमखंडिकायाश्रुतिः॥याज्ञवल्क्येतिहोवाचयदिदमंतरिक्षमनारंभणमिवकेनाक्रमेणयज
मानःस्वर्गंलोकमाक्रमतइतिब्रह्मणर्त्विजामनसाचंद्रेणमनोवैयज्ञस्यब्रह्मातद्यदिदंमनःसोसौचंद्रः
सब्रह्मासमुक्तिःसातिमुक्तिरित्यतिमोक्षाथसंपदः॥इत्यादिवाक्यानांभाष्यव्याख्यानाभ्यांअभिप्रेतो
र्थः॥दर्शइष्यते॥पूर्ववदाश्वलेनयजमानःपूर्वोक्तरीत्यास्वाभाविकाज्ञानआसंगप्रयुक्तकाम्यकर्म
तत्प्रयोजकाहोरात्रादिकालतिथ्यादिकालरूपमृत्युभ्यःअतिमुच्यकर्मोपासनाफलरूपस्वर्गादिप्रा
प्त्यर्थंअंतरिक्षाद्यवष्टंभादिनाकेनाक्रमणेनानुसरन्फलंप्राप्नोतीतिपृष्टःयाज्ञवल्क्यः॥अधियज्ञेब्र
ह्मणिऋत्विजिअध्यात्मस्तुमनसियजमानेचचंद्रदेवताभावनयाअंतरिक्षावष्टंभादिनाकर्मोपासना

फलं क्रमेण प्राप्नोति॥ अग्निहोत्रादिकर्मसु॥ अशक्तो वाशक्तो पि तत्क्रियानुष्ठाने अंगानुष्ठानादिवैगुण्य
प्राप्त्या फलासंभवे वा अल्पीयःसु अग्निहोत्रादिषु कर्मसु महाफलाधायक अश्वमेधादिगुणसंपादनरूप
संपदाद्युपासनानुष्ठाने केनचिद्गुणसामान्येन संपदादिन्यायेन अविच्छिन्नभावनायां सत्यां तत्फलप्रा
प्तिरेव भवतीति॥ यत्र राजसूयाश्वमेधादिकर्म द्विजानामनधिकारः अशक्तिश्च भवेत्॥ तत्र संपद्रूपोपास
नाबलेन तत्फलं प्राप्तव्यं अन्यथा तदनुष्ठानाभावे तत्प्रतिपादकवेदभागानां केवलवेदाध्ययनप्रयुक्त
फलसंपादकत्वमेव वक्तव्यं भवेत्॥ तथासति महत्फलाधायकानां अध्ययनमात्रप्रयुक्त फलसंपादक
त्वकल्पना नोचिता। केवलकर्मणामेव फलाध्यायकत्वमिति न॥ अपि तु॥ संपदाद्युपासनानामपि कर्मफ
लाद्यपेक्षया अधिकफलसाधकत्वं श्रुत्यादिसिद्धं॥ तस्मात्कर्मभिः॥ तदंगोपासनादिभिः स्वतंत्र संपदा
द्युपासनादिभिश्च अभिलषितार्थसिद्धिः॥ कर्मवैगुण्यराहित्येन यथोक्तफलसिद्धिश्च भवति॥ इत्या-

घभिप्रायमुक्तवान्॥ एवमेवोत्तरखंडिकासुउक्तासुसप्तमप्रभृतिदशसुखंडिकासुआब्रह्मणांत
सुक्तानां॥ ॥श्रुतिः॥याज्ञवल्क्येतिहोवाचकतिभिरयमद्यर्ग्भिर्होतास्मिन्यज्ञेकरिष्यतीतितिसृ
भिरितिकतमास्तास्तिस्र॥इतिपुरोनुवाक्याचयाज्याचशस्यैवचतृतीया॥किंताभिर्जयतीतियत्किंचे
दंप्राणभृदिति॥७॥याज्ञवल्क्येतिहोवाचकत्ययमद्याध्वर्युरस्मिन्यज्ञआहुतीर्होष्यतीतितिस्रइ
तिकतमास्तास्तिस्रइतियाहुताउज्वलंतियाहुताअतिनेदंतेयाहुताअधिशेरतेकिंताभिर्जयती
तियाहुताउज्वलंतिदेवलोकमेवताभिर्जयतिदीप्यतइवहिदेवलोकोयाहुताअतिनेदंतेपितृलो
कमेवताभिर्जयत्यतीवहिपितृलोकोयाहुताअधिशेरतेमनुष्यलोकमेवताभिर्जयत्यधइवहि
मनुष्यलोकः॥८॥याज्ञवल्क्येतिहोवाचकतिभिरयमद्यब्रह्मायज्ञंदक्षिणतोदेवताभिर्गोपायती
त्येकयेतिकतमासैकेतिमनएवेत्यनंतंवैमनोऽनंताविश्वेदेवाअनंतमेवसतेनलोकंजयति॥९

याज्ञवल्क्येति होवाच कत्ययमद्योद्गाताऽस्मिन्यज्ञे स्तोत्रिया स्तोष्यतीति तिस्र इति कतमास्तास्ति
स्र इति पुरोनुवाक्या च याज्या च शस्यैव तृतीया कतमास्ता या अध्यात्ममिति प्राण एव पुरोनुवाक्याऽपानो
याज्या व्यानः शस्या किं ताभिर्जयतीति पृथिवीलोकमेव पुरोनुवाक्यया जयत्यंतरिक्षलोकं याज्यया द्युलो
कं शस्यया ततो ह होताश्वल उपरराम ॥१०॥ वाक्यानां भाष्यव्याख्यानाभ्यां पर्यवसितोऽर्थः प्रपंच्यते ॥
तथाहि ॥ होतृअध्वर्युब्रह्मोद्गातृभिः क्रीयमाणशंसनहोमयज्ञदक्षिणस्तोत्रविषयप्रश्नतत्क्रियाप्रयोज्य
मंत्रादिसंख्याप्रश्नयोः आश्वलकर्तृकयोः तदनुरूपोत्तरे याज्ञवल्क्येन दत्ते तैः क्रियादिभिः लोकविशेष
जयविषयकप्रश्ने पुनराश्वलेन कृते तत्तत्क्रियानुसारिलोकविशेषजयप्राप्तिविस्तारोऽपि याज्ञवल्क्येन उ
त्तरत्वेन प्रतिपादितः ॥ इत्यतो होताश्वल उपररामेति ब्राह्मणसमाप्तिर्जाता ॥ अथ हैनं जारत्कारव आ
र्तभागः प्रपच्छ याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इति ॥ अष्टौ ग्रहा अष्टावतिग्रहा इति ॥ यत्

तेष्टौग्रहाअष्टावतिग्रहाःकतमेतइति॥१॥प्राणोवैग्रहःसोपानेनातिग्राहेणगृहीतोपानेनहिगंधान्-
जिघ्रति॥२॥वाग्वैग्रहःसनाम्नातिग्राहेणगृहीतोवाचाहिनामान्यभिवदति॥३॥जिव्हावैग्रहःसरसेना
तिग्राहेणगृहीतोजिव्हयाहिरसान्विजानाति॥४॥चक्षुर्वैग्रहःसरूपेणातिग्राहेणगृहीतश्चक्षुषाहिरूपा-
णिपश्यति॥ ॥श्रोत्रंवैग्रहःसशब्देनातिग्राहेणगृहीतःश्रोत्रेणहिशब्दांछृणोति॥६॥मनोवैग्रहःसकाम
नातिग्राहेणगृहीतोमनसाहिकामान्कामयते॥७॥हस्तौवैग्रहःसकर्मणातिग्राहेणगृहीतोहस्ताभ्या
ंहिकर्मकरोति॥८॥त्वग्वैग्रहःसस्पर्शेनातिग्राहेणगृहीतस्त्वचाहिस्पर्शान्वेदयतइत्येतेष्टौग्रहाअष्टाव
तिग्रहाः॥९॥अपिच॥पूर्वोक्तबृहदारण्यपंचमाध्यायेद्वितीयब्राम्हणेजारत्कारवआर्तभागयाज्ञवल्क्यसं
वादे॥याज्ञवल्क्येतिहोवाचयदिदꣳसर्वंमृत्योरन्नंकास्वित्सादेवतायस्यमृत्युरन्नमित्यग्निर्वैमृत्युःसोपा
मन्नमपपुनर्मृत्युंजयतीति॥१०॥मूलश्रुत्याभाष्यव्याख्यानाभ्यांचग्रहातिग्रहशब्दवाच्यानांश्रोत्रादिज्ञा

प्र॰ आ॰
३०

नि

नकर्मेंद्रियतद्विषयशब्दादिविसर्गांतानांपुरुषहिंसकत्वेनमृत्युत्वोपदेशेनतेषांमृत्युरूपाणामपिमृत्युरू
पब्रम्हसाक्षात्कारंअभिप्रेत्यसामान्यतःमृत्योर्मृत्योरंगीकारेतस्यापिमृत्युरपेक्षतइतिअनवस्थादोषः॥
अथवा॥विषयेंद्रियरूपमृत्योरपिमृत्युंतरानंगीकारेतुविषयेंद्रियरूपमृत्योर्नाशाभावेनसंसाररूपमृत्योःना
शाभावात्अनिर्मोक्षप्रसंगः॥इतिउभयथापिदोषाअनिवृत्तिः॥अतोउत्तरंदुर्निरूप्यं॥इतिमत्वाजारत्कारवः
याज्ञवल्क्यंप्रतिपृष्टवान्॥याज्ञवल्क्योपिदुर्वचनीयप्रश्नस्यउत्तरत्वेनब्रम्हसाक्षात्कारेजातेविषयेंद्रियादिस
र्वजगद्रूपमृत्योरपिब्रम्हसाक्षात्काररूपमृत्युभक्षितत्वेननिरवशेषात्अन्यपदार्थस्यब्रम्हव्यतिरेकेणपरमा
र्थतोअभावात्मृत्योर्मृत्युंतरप्रसंगाभावेनअनवस्थायाअनवकाशात्विषयेंद्रियादिरूपमृत्योर्नाशासंभवे
नचउभयदोषप्राप्तिरितियाज्ञवल्क्येनोक्तत्वात्॥याज्ञवल्क्यस्यपरमात्मबोधकपरत्वविषयेनिपुणतरत्वंसर्वे
षांस्पष्टतयाप्रतीयतएव॥इत्यर्थःप्रकटीकृतोभवति॥ अत्रेयंवस्तुगतिः॥अधिष्ठानावशेषोहिनाशःकल्पि

तवस्तुनइतिन्यायेनपरमार्थतः विषयेंद्रियादिरूपमृत्योः तत्कारणीभूताज्ञानरूपमृत्योःएतद्वयभक्षकआ
त्मसाक्षात्काररूपमृत्योःसर्वेषांचअनात्मरूपात्मभिन्नानांमिथ्यात्वेनात्यंतासत्तुल्यानांज्ञानानंतरंइदंसर्वंपू
र्वमपिनासीत्॥इदानीनास्ति॥उत्तरत्रनभविष्यतीत्याकारेणप्रतिपन्नोपाधौत्रैकालिकनिषेधप्रतियोगित्वरू
पमिथ्यात्वस्यसिद्धत्वात्विषयेंद्रियादिमृत्युरूपाणांसर्वजगतांतन्नाशकमृत्योर्ब्रह्मसाक्षात्कारस्यचपरमार्थ
तोप्रसक्तेरेवाभावइतिव्यवस्थिताभवति॥तथाचप्रमाणं॥ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः॥नमुमु
क्षुर्नवैमुक्तः इत्येषापरमार्थता॥इत्यमृतबिंदूपनिषच्छ्रुतेः॥गौडपादाचार्योक्तेश्च॥ एवमेवपूर्वोक्तबृहदा
रण्यपंचमाध्यायगतद्वितीयब्राह्मणे॥याज्ञवल्क्येतिहोवाचयत्रायंपुरुषोम्रियतउदस्मात्प्राणाःक्रामंत्याहोने
तिनेतिहोवाचयाज्ञवल्क्योत्रैवसमवनीयंतेसउच्छ्वयत्याध्मायत्याध्मातोमृतःशेते॥११॥याज्ञवल्क्येतिहोवाच
यत्रायंपुरुषोम्रियतेकिमेनंनजहातीति॥नामेत्यनंतंवैनामानंताविश्वेदेवाअनंतमेवसतेनलोकंजयति१२

प्र॰ शा॰
२१

याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चंद्रं दिशः श्रोत्रं पृथिवीꣳ
शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीत्या
हर सोम्य हस्तमार्तभागावामेवैतस्य वेदिष्यावो न नावेतत्सजन इति तौ होत्क्रम्य मंत्रयांचक्राते तौ ह यदूचतुः
कर्म हैव तदूचतुरथ यत्प्रशशꣳसतुः कर्म हैव तत्प्रशशꣳसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति
ततो ह जारत्कारव आर्तभाग उपरराम ॥ १३ ॥ एतेषां खंडानां ब्राह्मणपरिसमाप्त्यंतानां मुख्यतात्पर्यविष
यनिष्कृष्टार्थस्तु प्रतिपादनीयः ॥ तस्मिन्नर्थे भाष्यव्याख्यानाभ्यां विचार्यमाणे विदुषः मरणकाले प्राणाद
यः अस्माच्छरीरात् उत्क्रमिष्यंति यान वा ॰ तिप्रश्ने कृते उत्क्रमिष्यंतीति चेत्सर्वप्राणिसाधारण्येन उत्क्रम
णस्य मरणरूपत्वात् ॥ ध्रुवं जन्म मृतस्येति न्यायेन पुनरुत्पत्तिप्रसंगरूपदोषः ॥ नोत्क्रामंतीति चेत् ॥ मरणप्र
त्यक्षविरोधरूपदोषश्च प्रसज्येत उभयथापि दोषस्य दुर्निवार्यत्वं ॥ इत्यभिप्रेत्य जारत्कारव आर्तभागः या

नि॰

ज्ञवल्क्यं परीक्षार्थं पृच्छति॥ याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत इत्यादिना तस्य उत्तरत्वेन याज्ञ
वल्क्यः नेति होवाचेत्यादिना ज्ञानिनः अज्ञानस्य नाशितत्वेन तन्मूलकानां प्राणादीनां तदुत्क्रमणस्य लोकां
तरगमनस्य पुनरुत्पत्तेश्च सर्वेषां जगत्पदार्थानां असंतोः च्छेदप्रास्य। उत्क्रमणस्य असंभवेन उत्क्रमणा
भावेपि प्राणादीनां अत्रैव ब्रह्माभिन्नात्मनि विदुषि समवनीयंत इति श्रुत्या आयस्य उक्तत्वात्॥ आत्यंति
कलयरावसिद्धो भवति॥ तद्यथा॥ प्रदीपनिर्वाणवत्॥ अत्रैव लीयंते॥ दृष्टांतांतरत्वेन च श्रुत्यंतरं कला
शब्दवाच्यानां प्राणेंद्रियाणां परस्मिन्नात्मनि प्रलयं दर्शयति॥ एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः
पुरुषायणाः पुरुषं प्राप्यास्तं गच्छंतीति — परेणात्मना अविभागं गच्छंतीति दर्शितं॥ अतः आत्मज्ञा
नी इतरप्राणिवत् न मृतः किंतु आत्मनि इंद्रियमन आदीनां लयानंतरं उच्छ्वास आधानादि प्रत्यक्षात्॥
प्राणादीनां आत्मन्येव प्रलय इति नो त्क्रामंतीति च निश्चीयते इति गम्यते॥ एतदुक्तं भवति॥ ज्ञानिनः स

र्वबंधनिवृत्तेःगमनाभावादुत्क्रमणाभावइति॥एतावताअन्यासूपनिषत्सु॥आत्मज्ञानिनःप्राणाद्युत्क्र
मणाभावःअत्रैवक्षात्मनिविलयनंचेतीतिस्पष्टतयानप्रतिपादितइतिअस्यामुपनिषदिविशेषप्रद
र्शन द्वारेणयाज्ञवल्क्यस्यपरमात्मबोधकपरत्वंदृढयाप्रतीयतेएतेनविदुषःप्राणादीनांउत्क्रमणाभा
वपूर्वकब्रम्हण्येवलयश्रवणात्अन्यवादिसिद्धांतरूपवैकुंठकैलासब्रम्हलोकादिगमनपूर्वकतल्लो
कप्राप्तिरेवमुख्यमोक्षइत्यपिश्रुतिसंमतंनभवतीतिसर्वेषांप्राणिनांनिश्चयप्रत्ययोभवत्येव॥अपिचतत्रैव
पंचमाध्यायेतदुत्तरब्राम्हणेतृतीयसंख्याकेप्रथमखंडे॥ अथहैनंभुज्युर्लाह्यायनिःपप्रच्छयाज्ञवल्क्ये
तिहोवाच।मद्रेषुचरकाःपर्यव्रजामतेपतंजलस्यकाप्यस्यगृहानैमतस्यासीद्दुहितागंधर्वगृहीतात
मपृच्छामकोसीतिसोब्रवीत्सुधन्वांगिरसइतितंयदालोकानामंतानपृच्छामाथैनमब्रूमक्कपा
रिक्षिताअभवन्निति क्कपारिक्षिताअभवन्सत्वापृच्छामियाज्ञवल्क्यक्कपारिक्षिताअभवन्निति

॥१॥ स होवाचोवाच वै सो ऽगच्छन्वै ते तत्र यत्राश्वमेधयाजिनो गच्छंतीति क्व न्वश्वमेधयाजिनो गच्छंतीति द्वात्रिंशतं वै देवरथाह्न्यान्ययं लोकस्तꣳ समंतं पृथिवी द्विस्तावत्पर्येति तांꣳ समंतं पृथिवीं द्विस्तावत्समुद्रः पर्येति तद्यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्रं तावानंतरेणाकाशस्तानिंद्रः सुपर्णो भूत्वा वायवे प्रायच्छत्तान्वायुरात्मनि धित्वा तत्रागमयद्यत्राश्वमेधयाजिनो ऽभवन्नित्येवमिव वै स वायुमेव प्रशशꣳस तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयति य एवं वेद ॥ ततो ह भुज्युर्लाह्यायनिरुपरराम ॥२॥ अस्य ब्राह्मणस्य भाष्यव्याख्यानयोः निर्णीतं तात्पर्यं तु भुज्युर्लाह्यायनिः याज्ञवल्क्यं परीक्षार्थं अश्वमेधयाजिनो गतिः कियत्प्रदेशं व्याप्नोतीति बहिः प्रश्नव्याजेन सूत्रात्मनो महाप्राणस्य स्वरूपज्ञानाय प्रष्टुतः पृष्टवान् याज्ञवल्क्येत्यादिना तदभिप्रायं ज्ञात्वा याज्ञवल्क्यः प्रत्युवाच अश्वमेधयाजिनो गतिप्रदेशनिरूपणद्वारा वायुरेव व्यष्टिर्वायुः समष्टिरित्यादिना सूत्रात्मरूपहिरण्यगर्भात्मकं द्वैतस

नस्याभिमानिकार्यब्रम्हस्वरूयनिरूपणेनतल्लक्षतास्यर्योनुरूपोत्तरंदत्तवान्इत्यपिहेतोःयाज्ञवल्क्य
स्यआत्मानुभवविषयेअसंतनिपुणतरमतित्वंइतिगम्यते।।एतदुत्तरमुषस्तश्चाक्रायणब्राम्हणेख
ंडद्वयस्यभाष्यव्याख्यानादेवनिर्णीततात्पर्यार्थस्तुमूलश्रुतिस्तावत्।।अथहैनमुषस्तश्चाक्रायणःप
प्रच्छयाज्ञवल्क्येतिहोवाच।।यत्साक्षादपरोक्षाद्ब्रम्हयआत्मासर्वांतरःतंमेव्याचक्ष्वेत्येषतआत्मास
र्वांतरःकतमोयाज्ञवल्क्यसर्वांतरोयःप्राणेनप्राणितिसतआत्मासर्वांतरोयोपानेनापानितिसतआ
त्मासर्वांतरोयोव्यानेनव्यानितिसतआत्मासर्वांतरोयउदानेनोदानितिसतआत्मासर्वांतरएषतआ
त्मासर्वांतरः।।१।।सहोवाचोषस्तश्चाक्रायणोयथाविब्रूयादसौगौरसावश्वइत्येवमेवैतद्व्यपदिष्टंभ
वतियदेवसाक्षादपरोक्षाद्ब्रम्हयआत्मासर्वांतरस्तंमेव्याचक्ष्वेत्येषतआत्मासर्वांतरःकतमोयाज्ञव
ल्क्यसर्वांतरःनदृष्टेर्द्रष्टारंपश्येर्नश्रुतेःश्रोतारंशृणुयान्नमतेर्मंतारंमन्वीथा।।नविज्ञातेर्विज्ञाता

रंविजानीयाः एषतआत्मासर्वांतरो ऽतोन्यदार्तं ततो होषस्तश्चाक्रायणउपरराम॥ २॥ इत्यादिवाक्यसं
दर्भेणयत्साक्षादपरोक्षाद्ब्रम्हेति अव्यवधानेनसाक्षादपरोक्षविषयब्रम्हणश्चयआत्मासर्वांतरइतिपंचकोशां
तर्वर्तिप्रत्यगात्मनश्चएकत्वमभिप्रेत्यतत्सूक्ष्मरूपत्वंप्रत्यक्षतयाप्रदर्शइष्यन्मेव्याचक्ष्वेतियाज्ञवल्क्यपरी
क्षार्थंउषस्तश्चाक्रायणः पृष्टवान्तदंतस्तात्पर्यंयाज्ञवल्क्योज्ञात्वाएषतआत्मासर्वांतरइतिसामान्यतयानिर्दि
श्ययः प्राणेनप्राणितियोपानेनापानितिइत्यादिनाप्राणनादिचेष्टाप्रयोजनत्वेनयआत्माचैतन्यरूपः सः ते
तवआत्मास्वभावः स्वरूपंइतिप्राणनादिअंगेनअतींद्रियमात्मानंज्ञापितवान्पुनः उषस्तश्चाक्रायणः॥ ॥
द्वितीयखंडे॥ ॥गोरसावश्च इत्येवंप्रत्यक्षतयादर्शयिष्यामीतिप्रतिज्ञायप्राणनादिअंगेनअनुमितत्वेन
आत्मानंब्रवीषीतियाज्ञवल्क्यंप्रतिउक्तवान्॥ततो याज्ञवल्क्यः॥आत्मनः अवाङ्मनोगोचरत्वेनअतींद्रि
यत्वात्अश्वादिसावयववत्निर्देष्टुं अशक्यइति॥नदृष्टेर्द्रष्टारंपश्येः॥नश्रुतेः श्रोतारंशृणुयात्॥इत्या

दिनासाक्षिरूपस्यसर्वांतरस्यप्रत्यगात्मनः इंद्रियमनोवेद्यतयादर्शयितुमसंभवात्स्वात्मत्वेनैवस्वस्वरू
पदृष्ट्याआत्मामंतव्यइति॥बोधितवान्॥एतेनप्रत्यगात्मप्रश्नेकृतेप्रत्यगात्मनःप्रत्यक्षादिनादर्शयितुमश
क्यत्वात्याज्ञवल्क्यस्यतदज्ञानंप्रकटीकृतंभवति॥प्रकारांतरेणप्रत्यगात्मस्वरूपनिर्देशेकृतेचआत्मनःअवे
द्यत्वेनअवाच्यत्वात्याज्ञवल्क्यस्यभ्रांतिज्ञानवत्वंस्पष्टीकृतंभवतीतिच॥उभयथापियाज्ञवल्क्यस्यन्यूनता
पादानंकर्तव्यमिति॥उषस्तश्चाक्रायणाभिप्रायोभग्नोजातः॥इतिहेतोरपियाज्ञवल्क्यस्यपरमात्मबोधकप
रत्वंसिध्यति॥ एतदुत्तरपंचमब्राम्हणे॥कहोलःकौषीतकेययाज्ञवल्क्यसंवादात्मकैकब्राम्हणखंडब्रा
म्हणतात्पर्यंतद्भाष्यव्याख्यानाभ्यांविशदीकृततात्पर्यार्थःसूच्यते॥ तथाहि ॥मूलश्रुतिः॥अथहैनंक
होलःकौषीतकेयःपप्रच्छयाज्ञवल्क्येतिहोवाचयदेवसाक्षादपरोक्षाद्ब्रम्हयआत्मासर्वांतरस्तंमेव्याच
क्ष्वेत्येषतआत्मासर्वांतरःकतमोयाज्ञवल्क्यसर्वांतरोयोऽशनायापिपासेशोकंमोहंजरांमृत्युमत्येतिएतं

वैतमात्मानंविदित्वाब्राम्हणाःपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंतिया
त्येवपुत्रैषणासावित्तैषणायावित्तैषणासालोकैषणोभेत्येतेएषणेएवभवतः॥तस्माद्ब्राम्हणःपांडित्यंनिर्वि
द्यबाल्येनतिष्ठासेत्॥बाल्यंचपांडित्यंचनिर्विद्याथमुनिरमौनंचमौनंचनिर्विद्याथब्राम्हणःसब्राम्हणःके
नस्याद्येनस्यात्तेनेदृशएवातोन्यदार्तंततोहकहोलःकौषीतकेयउपरराम॥१॥इत्यादिग्रंथैःयाज्ञव
ल्क्यंप्रतिप्रष्टुःकौषीतकेयस्यअभिप्रायस्तुपूर्वब्राम्हणेउषस्तश्चाक्रायणेनयत्साक्षादपरोक्षाद्ब्रम्हयआ
त्मासर्वांतरःतंमेव्याचक्ष्वेतिकृतप्रश्नएवमयापिकृतश्चेत्॥ एषतआत्मासर्वांतरइतियाज्ञवल्क्येन
तंप्रतिदत्तोत्तरस्यैवमांप्रत्यपिदानेचममाभिप्रायाज्ञानेनपुनरुक्ततादोषपूर्वकयोगीश्वरत्वस्यन्यूनताप्रा
प्तिस्तूष्णींस्थितत्वेअज्ञत्वप्राप्तिः॥उभयथापियाज्ञवल्क्यस्यन्यूनतासंभवःइत्याशयेनयाज्ञवल्क्येतितंप्रति
पृष्टवतेकहोलाय॥एषतआत्मासर्वांतरः॥योशनायापिपासेशोकंमोहंजरांमृत्युमत्येतीति॥इतिआत्मनः

अशनायापिपासादिराहित्यविषये क्षुत्पिपासयोः प्राणधर्मत्वेन शोकमोहयोः मनोधर्मत्वेन जरामरणयो
स्थूलदेहधर्मत्वेन च तेषां आत्मानाश्रितत्वेन आत्मनः असंगत्वसिद्धेः तदसंगत्वज्ञानेन पुत्रैषणाद्युत्था
नरूपसन्यासस्य विधानमपि लभ्यत इत्यादिना याज्ञवल्क्यो तत्प्रश्नानुरूपमेवोत्तरं दत्तवान्॥ इत्यतोय
त्साक्षादपरोक्षादित्यारभ्य कतमो याज्ञवल्क्य सर्वांतर इत्यंतवाक्यजातस्य उषस्तश्चाक्रायणकहोलकौषीतकप्र
श्नयोरपि तुल्यत्वेपि तदर्थानुवादपूर्वक कौषीतकप्रश्नार्थस्य अपूर्वत्वरूपस्यात्मनः क्षुत्पिपासादिषड्
र्मिरहितत्वस्य ज्ञापितत्वात्॥ कौषीतकाभिप्रेतारूपशंकायाः स्वल्पावकाशोपि न प्राप्तः॥ ॥एताव
ता उषस्तब्राम्हणे आत्मस्वरूपज्ञानप्रतिपादनं॥ कौषीतकिब्राम्हणे तु आत्मनः अशनायापिपासादि
षड्र्मिरहितत्वज्ञापनात्॥ सन्यासविधानाच्च॥ इत्यनयोरर्थभेदः स्पष्ट एव॥ इतोपि हेतोः याज्ञवल्क्यस्य
परमात्मबोधकपरत्वं दृढीकृतं भवति॥ एतदुत्तर षट्संख्याक गार्गिब्राम्हणे॥ अथ हैनं गार्गी वाचक्नवी

पप्रच्छ याज्ञवल्क्येति होवाच यदिदꣳ सर्वमप्स्वोतं च प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति॥ ॥
इत्यारभ्य वायुअंतरिक्षगंधर्वलोकआदित्यलोकचंद्रलोकनक्षत्रलोकदेवलोकइंद्रलोकप्रजापतिलोकब्रम्ह
लोकांतानां पर्यायेण पूर्वपूर्वस्य उत्तरोत्तरस्य च व्याप्यव्यापकभावेन ओतत्वप्रोतत्वज्ञानविषये याज्ञव
ल्क्यं प्रति गार्गी वाचक्नवी प्रश्नं कृते सति तेन प्रश्नानुरूपोत्तरे दत्ते सति च पुनः पुनः याज्ञवल्क्यं कस्मिन्नु
ब्रम्हलोका ओताश्च प्रोताश्चेत्यंत तया पुनः प्रश्ने कृते याज्ञवल्क्येन॥ गार्गि मातिप्राक्षीर्मा ते मूर्धा व्यप
प्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि मातिप्राक्षीरिति ब्रम्हलोकशब्दवाच्य ब्रम्हांडारंभक भूतादि
रूप विराट् तदारंभक सूत्रात्मस्वरूप हिरण्यगर्भ कारण अव्याकृताकाशादि आगमवेद्य सूक्ष्म वस्तुवि
षयक प्रश्नं अनुमानद्वारा कुर्वती सति सूक्ष्म वस्तुविषयक ज्ञाने भ्रांता भविष्यसीति तात्पर्येण प्रश्ननि
षेधः कृतः॥ एतेन इतरेषां प्रायेण अज्ञात अतिसूक्ष्म अतींद्रिय वस्तुनिरूपणासामर्थ्यात् याज्ञवल्क्यस्य

आत्मज्ञानप्रवीणतयातत्सामर्थ्यात्तत्त्वबोधकपरत्वंसिद्धं॥ ॥मू॥एतदुत्तरसप्तसंख्याकउद्दालकब्रा
म्हणे॥अथहैनमुद्दालकआरुणिःपप्रच्छयाज्ञवल्क्येतिहोवाचमद्रेष्ववसामपतंजलस्यकाप्यस्यगृ
हेषुयज्ञमधीयानास्तस्यासीद्भार्यागंधर्वगृहीतातमपृच्छामकोसीतिसोब्रवीत्कबंधआथर्वणइति
सोब्रवीत्पतंजलंकाप्यंयाज्ञिकांश्चवेत्थनुत्वंकाप्यतत्सूत्रंयेनायंचलोकःपरश्चलोकःसर्वाणिचभूता
निसंदृब्धानिभवंतीतिसोब्रवीत्पतंजलःकाप्योनाहंतद्भगवन्वेदेतिसोब्रवीत्पतंजलंकाप्यंयाज्ञिकाꣳ
श्चवेत्थनुत्वं काप्यतमंतर्यामिणंयइमंचलोकंपरंचलोकꣳसर्वाणिचभूतानियोंतरोयमयतीतिसोब्रवी
त्पतंजलःकाप्योनाहंतद्भगवन्वेदेतिसोब्रवीत्पतंजलंकाप्यंयाज्ञिकाꣳश्चयोवैतत्काप्यसूत्रंविद्या
त्तंचांतर्यामिणमितिसब्रम्हवित्सलोकवित्सदेववित्सवेदवित्सभूतवित्सआत्मवित्ससर्वविदितितेभ्यो
ब्रवीत्तदहंवेदतच्चेत्त्वंयाज्ञवल्क्यसूत्रमविद्वाꣳस्तं चांतर्यामिणंब्रम्हगवीरुदजसेमूर्धातेविपतिष्यती

नि

त्ति वेद वा अहं गौतम तत्सूत्रं तं चांतर्यामिणमिति॥ यो वा इदं कश्चिद्ब्रूयाद्वेद वेदेति॥ यथा वेत्थ॥ तथा ब्रूही
ति॥१॥ सहोवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूता
नि संदृब्धानि भवंति॥ तस्माद्वै गौतम पुरुषं प्रेतमाहुर्व्यस्रंसिषतास्यांगानीति॥ वायुना हि गौतम सूत्रे
ण संदृब्धानि भवंतीत्येवमेवैतद्याज्ञवल्क्यांतर्यामिणं ब्रूहीति॥२॥ इति एतत् खंडस्य भाष्यव्याख्या
नयोः तात्पर्यार्थ उपवर्ण्यते॥ तथाहि॥ पूर्व ब्राम्हणे गार्ग्या ब्रम्हलोकाः कस्मिन् ओताश्च प्रोताश्चेति या
ज्ञवल्क्यं प्रति प्रश्ने कृते आगमात्मक वेदाचार्योपदेशैनैव गम्यमानायाः ब्रम्हलोकशब्दित ब्रम्हांड रूप
विराडारंभक सूत्रात्मात्मक देवता विषयक प्रश्नस्य अनुमानक्रमेण प्रसक्तेः कारणाभावात्॥ गार्गिमाति
प्राक्षीरित्यादिना याज्ञवल्क्येन उच्यमाने गार्गी उपररामेत्यत्र एतत्तात्पर्येणोक्तं॥ तत्तात्पर्यविषयीभूत सूत्रा
त्मरूप वाय्वात्मक हिरण्यगर्भस्वरूपाभिप्रायेण प्रवृत्तस्य उद्दालक प्रश्नस्य सूत्रात्मस्वरूप निरूपण द्वारा या

ज्ञवल्क्येन उत्तरे दत्ते उद्दालकः एवमेवैतद्याज्ञवल्क्यांतर्यामिणं ब्रूहीति याज्ञवल्क्योक्तमर्थं संमतत्वेनां
गीकृतवान्॥ एतेन पूर्वस्मिन् गार्गिब्राह्मणे गार्गिमातिप्राक्षीर्मा ते मूर्धा व्यपप्तदिति शापप्रायेण या
ज्ञवल्क्येनोक्ते सति शापभयाद्गार्गी उपरराम॥ न तु प्रश्नकरणे ऽसमर्था सती उपरराम इति॥ तेन हेतुना॥
याज्ञवल्क्यस्य गार्ग्याः पृष्टांशे वक्तुमज्ञानादसामर्थ्यमिति च॥ केषांचिदविवेकिनां भ्रांतिज्ञानं जाय
मानमपि निरस्तं भवति कथमिति चेत् अल्पप्रज्ञायाः स्त्रीव्यक्ते गार्ग्या अनुमानागम्य आगमैकगम्या
र्थस्य सूत्रात्मरूपहिरण्यगर्भस्वरूपनिरूपणस्य अंतर्यामिस्वरूपनिरूपणस्य च यथावत् ज्ञानसंपादने ऽ
सामर्थ्यात् तु भ्रांत्यात्मक अन्यथाज्ञानसंपादने च सति वक्तृश्रोत्रोर्याज्ञवल्क्यगार्ग्योरनर्थप्राप्तिभयात्॥
याज्ञवल्क्यः मातिप्राक्षीरित्युक्तवान्॥ न तु स्वस्य तदज्ञानप्रयुक्तासामर्थ्यादत एव याज्ञवल्क्यो गार्गिप्रश्नविषयी

भूतयोः सूत्रांतर्यामिणोरेव स्वरूपप्रश्नस्योद्दालकेन कृतस्य समीचीनतया निरूपणं कुर्वन्नुपलभ्यते तस्मादने

नवाक्यजातेनातिसूक्ष्मवस्तुनिर्देशवशात् उद्दालककस्य संतोषोत्पादनेन याज्ञवल्क्यस्यात्मज्ञानोपदेश
कौशल्यं विशदीकृतमिति॥ आत्मबोधकपरत्वं प्राप्तमेव॥ एतस्मिन्नेव ब्राम्हणे तृतीयखंडमारभ्य
अंतर्यामिस्वरूपं निरूपयितुं याज्ञवल्क्य उपक्रमं कृतवान् यः पृथिव्यां तिष्ठन् पृथिव्या अंतरो यं पृथिवी
न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमयत्येष त आत्मांतर्याम्यमृतः॥ एवमुत्तरपर्यायेषु॥ अप्सु॥ अ
ग्नौ॥ अंतरिक्षे॥ वायौ॥ दिवि॥ आदित्ये॥ दिक्षु चंद्रतारके॥ आकाशे॥ तमसि॥ तेजसि॥ इत्याद्यधिदैवादिषु॥
यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योंतरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि
भूतान्यंतरो यमयत्येष त आत्मांतर्याम्यमृत इत्यधिभूतमथाध्यात्मं॥ १५॥ यः प्राणे तिष्ठन्प्राणादंतरो यं प्रा
णो न वेद॥ यस्य प्राणः शरीरं यः प्राणमंतरो यमयत्येष त आत्मांतर्याम्यमृतः॥ १६॥ इत्यादि अध्यात्मादिषु
चरकांतेषु पर्यायेषु अंतर्यामितया स्थितं परमात्मानं एष त आत्मांतर्यामीति याज्ञवल्क्यं प्रतिपृष्टवते उद्दा

प्र॰ श्रा॰
३८

निः

उकायोत्तरत्वेन एष अंतर्यामित्वेन निर्दिष्टः॥ यः परमात्मा॥ परब्रम्ह स ते॥ तव॥ आत्मा॥ स्वभावः॥ स्वरूपं॥ अमृतः॥ अविनाशी॥ इति विशिष्टीति शेषः॥ इत्येवं प्रकारेण सर्वांतर्यामिणमेव ब्रम्हज्ञाने द्धोः स्वरूपत्वेन याज्ञवल्क्यः॥ उपदिष्टवान्॥ तेन उपदेशेन शरीरशरीरिभावेन अंतर्यामिनियम्यभावेन वा पंचभूतप्राणादीनामिव ब्रम्हात्मनोर्भेदज्ञाने प्राप्ते सति॥ तेषां भेदस्योपाधिकत्वेन मुख्यया दृत्या क्रियानिर्वाहक इंद्रियाद्यधिष्ठानीभूत अंगादिसमुदायात्मक शरीरत्वस्य वा॥ अंतर्यामिणः तन्नियामकत्वेन तदभिमानरूप शरीरित्वेन वा यथासंभवमत्यंतभेदस्यासंभवात्॥ अंतर्याम्यात्मक ब्रम्हान्यत्वेन द्रष्टादि जगत्पदार्थानां परमार्थतो सत्वज्ञापनार्थं॥ अदृष्टो द्रष्टा॥ अश्रुतः श्रोता॥ अमतो मंता॥ अविज्ञातो विज्ञाता नान्यो तो स्ति द्रष्टा॥ नान्यो तो स्ति श्रोता॥ नान्यो तो स्ति मंता॥ नान्यो तो स्ति विज्ञाता॥ एष त आत्मा॥ अंतर्याम्यमृतः॥ अतो अन्यदार्तं॥ ततो होद्दालक आरुणिरुपरराम इति ग्रंथसंदर्भेण अदृष्टः केनचित्॥ दृष्टो न भवति॥ अन्यस्य चेतनस्या

भावात्॥ तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाति॥ इतिश्रुत्यंतरात्। स्वयंस्वरूपतःद्रष्टा। दृक्स्वरूपः। नतुदर्शनक्रियाश्रयः। सर्वस्यद्रष्टासर्वस्यसाक्षी। इतितापनीयश्रुतेः॥ अविक्रियः। अविकारी। इत्यादिश्रुतेः॥ सवेत्तिवेद्यं। नचतस्यास्तिवेत्ता। इतिश्वेताश्वतरश्रुतेः। एषहिद्रष्टाश्रोतामंताबोद्धेत्यादिनासमआत्मेतिविद्यात्। इत्यंतेनबह्वृचआरण्यांतर्गता। अथातःसंहितायाउपनिषत्इत्यारण्यश्रुतेश्च। ॥ एवं। अश्रुतःश्रोतेत्यादीनामपिज्ञेयं॥ नान्योतोस्तिद्रष्टा इति। अतःअंतर्यामिरूपब्रम्हणःसकाशात्। अन्यःद्रष्टालोके। अविद्यावशात्देहादिषु। अहंभावमापन्नः। जीवः। प्रमात्रादिरूपेणव्यवह्रीयमाणः। दर्शनादिक्रियाश्रयः। कर्ताभोक्तेत्यादिलक्षणः। यःसर्वानुभूतत्वेनवर्तते। सोपिब्रम्हव्यतिरेकेणपरमार्थतोनास्ति। किंतुअविद्याप्रयोज्यांतःकरणोपाध्यवच्छिंनत्वेनभिन्नतयादृश्यते। एवंनान्योतोस्तिश्रोता। इत्यादीनामपिअर्थोज्ञेयः॥ द्रष्टादिनिषेधःपूर्वपर्यायेषु। अधिदेवाधिभूताध्यात्मादिषु। अंतर्यामिनियम्यत्वेनशरीरि

शरीरत्वेन उक्त सर्वजगत्पदार्थादिषु चरमपद्धि उक्तभेदवद्वस्तुजातस्य निषेधोपलक्षणार्थः॥ अतएव श्रुतिर्व
क्ष्यति॥ अतोन्यदार्तमिति॥ अतः अंतर्यामिरूपब्रम्हणः सकाशादन्यद्वियया शुक्तिरजतादि स्वप्नमायार्थवत् प्रती
तिकालसत्यं। यदन्यदिवावभासते तत्सर्वं आर्तं। आर्तिविशिष्टं पीडाविशिष्टं नश्वरमिति यावत्॥ यथा मृगतृ
ष्णिकाजलं निरूप्यमाणं मिथ्याभूतं सत्। अधिष्ठानज्ञानसमकाल एव नश्यति। तद्वदित्यर्थः॥ वक्ष्यति च॥ श्रु
तिरेव षष्ठाध्याये॥ यत्र वा अन्यदिव स्यात्॥ यत्र हि द्वैतमिव भवति ध्यायतीव लेलायतीवेत्यादिना॥ सर्वत्र
इवशब्देन स्वप्नमायापदार्थवत् मिथ्यात्वं प्रतिपाद्यतः। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना च
आत्मन एकत्वं च प्रतिपादयति॥ अत्र केचित्॥ अंतर्यामिब्राम्हणं शरीरशरीरिभावेन नियम्यनियामकभावे
न च जीवजगतोः ब्रम्हप्रतियोगिकभेदं। वास्तवं मन्यमानाः। जीवादि जगत्सर्वं चिदचिद्रूपं ब्रम्हणः शरीरमिति व
दंति। संक्षेपतः तत्तात्पर्यकथनेन तदसंभावना प्रतिपाद्यते। तथाहि। पूर्वोक्तन्यायेन मुख्यया वृत्त्या लोक

सित्यशरीरित्वशरीरत्वलक्षणासंभवात्॥प्रदर्शितप्रकारेणश्रुत्यानिषिध्यजीवभेदस्य॥जगद्भेदस्य च॥तत्सत्वेन
असत्वतासंभवाच्च॥तदभिप्रेतशरीरित्वशरीरत्वयोःजीवब्रम्हप्रतियोगिकभेदयोरपि॥शशविषाणतुल्य
त्वमेवअस्मिन्विषयेबहुवक्तव्यत्वेपिग्रंथविस्तरभिया॥पूर्वेकालीनभाष्यादिआकरग्रंथेषु॥प्रतिपादि
तत्वेनचोपरम्यते॥ ननुनान्यतोस्तिद्रष्टेत्यत्रअतइत्यस्यसार्वविभक्तिकार्थसंभवात्॥अस्यअंतर्यामि
णः॥अन्योद्रष्टा॥अस्ति, नवेतिशंकानिवारणार्थं॥नान्योतोस्तिद्रष्टेतिश्रुत्या॥अन्यद्रष्टृनिषेधःप्रतिपादितः
ननु॥ब्रम्हणःसकाशात्द्रष्टृमात्रनिषेधःप्रतिपादितः॥इतिचेन्न॥अस्यब्रम्हणःद्रष्टृंतरशंकायाएवअसंभवा
त्॥तादृशशंकायाःप्रसक्तौ॥शास्त्रस्यवादिनः॥प्रत्यक्षादिप्रमाणस्यवा॥कारणत्वेनअप्रसिद्ध्यत्वात्॥अप्र
सक्तप्रतिषेधस्यासंभवाच्च॥कथंचित्तद्रष्टुरपिअंगीकृतत्वेपिपरवादिमतरीत्याबाधकाभावः॥सर्वैरपिद्वैतवा
दिभिःब्रम्हविषयकद्रष्ट्रादिबहुभेदांगीकारेणब्रम्हद्रष्टॄणांमुक्तादीनांबहूनांसंमतत्वात्॥अप्रेक्षितत्वेनप्रसक्तौ

पूर्वोक्तरीत्याशास्त्रवादिप्रत्यक्षादिप्रमाणादिभिरप्रसिद्धस्यशशविषाणतुल्यस्यापिउपेक्षासंभवेद्रष्टुर्द्रष्टातद्र
ष्टातद्रष्टेति॥अनवस्थायाअपिउपेक्षितुमपिशक्यत्वात्॥तद्रीत्याअनवस्थादोषस्यअनपायात्॥अनवस्था
दोषपरिहारायैवप्रथमद्रष्टुरेवअस्माभिर्निषेध्यत्वमुच्यतइतिचेत्॥अतःशब्दस्यसामान्यतःब्रम्हव्यतिरेकेणद्रष्टृं
तरंनास्तीति॥पंचमीविभक्त्यर्थकस्यअस्येतिषष्ठीविभक्त्यर्थकत्वकल्पनायाःमानाभावेनअतोन्यदार्तमिति॥व
क्ष्यमाणश्रुत्याब्रम्हभिन्नपदार्थमात्रस्यनश्वरत्वव्याप्यमिथ्यात्वज्ञापकयाचसहविरुद्धस्यत्वयाकल्पितषष्ठ्यर्थस्य
बाधितत्वप्रसंगोदुर्वारएव॥प्रस्तुत॥ परमतेत्वन्मतेच।ब्रम्हणःकथंचित्रूपवत्त्वेनचाक्षुषादिदृग्विषयत्वांगी-
कारात्॥मुक्तानांभक्तानांध्यातॄणांच॥बहूनांतद्रष्टॄणांसत्वांगीकारेणद्रष्टृंतरनिषेधासंभवसिद्धएव॥ किंच
नान्योतोस्तिश्रोता॥इत्यत्रअन्यस्यब्रम्हविषयकश्रोतृत्वे॥ब्रम्हणःशब्दरूपत्वप्राप्तिप्रसंगः॥शब्दस्यैवश्रोत्रेंद्रिय
विषयत्वात्॥ब्रम्हणःशब्दत्वस्यच॥केनापिवादिना॥अनंगीकृतत्वात्॥अशब्दमस्पर्शमित्यादिश्रुतेश्चब्रम्हवि

षयकश्रोतृत्वस्यकस्याप्यसंभवेनश्रोत्रंतरनिषेधस्यअप्रसंगप्रतिषेधत्वापत्तिप्रसंगः॥नचश्रोतव्यःइत्यत्रश्रव
णविषयत्वेनकर्तव्यइति॥अर्थस्यप्राप्त्यातत्वरूपगुणादिप्रतिपादकशब्दश्रोतृत्वमेवब्रम्हश्रोतृत्वमेवेति
वाच्यं॥तथासति॥द्रष्टत्वस्यापिज्ञानमात्रविषयत्वांगीकारेणद्रष्टव्यइतिश्रुत्याश्रोतव्यइतिश्रुत्याच॥ब्रम्हवि
षयकद्रष्टृंतरश्रोत्रंतरादिनिषेधस्यअत्यंतासंभवात्॥त्वदुक्तअतइत्यादिवाक्यार्थस्यतद्रष्टृंतरनिषेधत्वमि
तित्वदुक्तिरेवअसंगताभवति॥सवेत्तिवेद्यंनचतस्यास्तिवेत्ता॥इत्यादिश्वेताश्वतरश्रुतेश्चद्रष्टृंतरमात्रनिषे
धसिद्ध्यएव॥ अपिचआत्मशब्दस्यसर्वत्रत्वन्मतेअंतर्यामिपरत्वेनअर्थःक्रियते॥अत्रतावत्॥एषतआत्मां
तर्यामीत्यत्र॥एषःतेतव॥आत्माअंतर्यामीइत्यर्थः॥क्रुतश्चेत्॥आत्मशब्देनैवअंतर्यामीत्यर्थस्यसिद्धौपुन
रंतर्यामिशब्दःव्यर्थोभवति॥आत्मशब्दस्यअन्यथार्थवर्णने॥सर्वत्रापिआत्मशब्दस्यतथैवार्थः॥वर्ण्यतां
नाम॥अथवा॥अस्मिन्ब्राम्हणेएषःअंतर्यामीतिशब्दतः॥तेतव॥आत्मा॥अंतर्यामीतिउच्यतेचेत्॥पुनरु

क्तेः प्रयोजनं नास्ति॥ एकस्यामंतर्यामिशब्दार्थस्य उद्देश्यत्वं अपरस्य आत्मशब्दार्थस्य विधेयत्वमिति चेत्॥ लोके घ
टो द्रव्यं इत्यादिप्रयोगेषु उद्देश्यस्य ज्ञातत्वं विधेयस्य अज्ञातत्वं इति स्थिते उद्देश्यार्थज्ञानेन विधेयार्थज्ञानं जायते
अन्यथा उभयोर्ज्ञातत्वे अज्ञातत्वे वा घटो घटः इति ज्ञातत्वेन द्रव्यं द्रव्यं इत्यज्ञातत्वेन वा॥ वाक्यफलीभूत अज्ञाता
र्थज्ञान अनुत्पत्त्या तत्प्रयोगस्य वैयर्थ्यप्रसंगः॥ तद्वदत्रापि॥ अंतर्यामिशब्दार्थज्ञानप्राप्यर्थप्रयुक्तयोः आत्मांतर्या
मिशब्दयोः अर्थज्ञानस्य तुल्यत्वात्॥ अंतर्यामिशब्दार्थज्ञानेन एकेन आत्मशब्दार्थज्ञानेन एकेन वा तत्प्रयोजनसं
भवात् प्रयोगद्वयस्य वैयर्थ्यं प्राप्यते॥ उभयत्र ज्ञानाभावे शब्दप्रयोगप्रयोजनाभावात्॥ उभयप्रयोजनाभावस्य
सिद्धत्वमेव भवति। किंच॥ आत्मशब्दस्य आप्लृ व्याप्तावितिधातोः व्याप्त्यर्थत्वसंभवात्॥ यच्चामोति॥ यदादत्ते॥
यच्चात्ति विषयानिह। यच्चास्य संततो भावः तस्मादात्मेति गीयत इति श्रुतेः व्याप्त्यर्थस्यैव मुख्यत्वात्॥ आत्मस्वभावे
बुद्धौ च क्षेत्रज्ञ आत्मपुरुषः इत्यादिनैघंटुकार्थप्रसिद्धेः स्वयमात्मन्यर्थे इति स्वशब्द आत्मशब्दयोः एकार्थत्वाव

गमात्॥आत्मावैपुत्रनामासि अर्थोवा एष आत्मानः यस्तत्ली इतिश्रुतेः ममात्माभद्रसेनः आत्मनात्मानं वेत्ति आत्मा
नंपरिषिंच॥उद्धरेदात्मनात्मानं॥एके चात्महनोजनाः॥अन्योंतरात्माप्राणमयः इत्यत्र सर्वत्रवैदिक लौकिकप्रयो
गेषुआत्मशब्दस्यरूढ्या॥योगेनमुख्ययावृत्त्यागौणावृत्त्यावा॥आत्मशब्दस्यस्वरूपपरत्वमेव॥नतुस्वबुद्धिकल्पि
तअंतर्यामिपरत्वंकथंचित्संभवति॥प्रस्तुत॥अयंतइध्मआत्माजातवेदः॥तेनेध्यस्ववर्धस्वच॥इतिवैदिक
प्रयोगे॥ हेजातवेदः अयंइध्मः तेआत्मातवस्वरूपं॥इध्माधानेक्तसेहि॥तवस्वरूपत्वात्॥तेनइध्मेन॥इध्यस्व॥
प्रकाशवान्भव॥इंधदीप्ताविति धातोः वर्धस्वच॥इध्मेनअग्नेः वृद्धिदर्शनात् इत्यादौआत्मशब्दस्यस्वरूपपरत्व
मेवनत्वंतर्यामिपरत्वंकथंचित्सिध्यति॥ नवक्तुरात्मोपदेशादितिचेदध्यात्मसंबंधभूमाह्यस्मिन्नहति॥ब्रम्ह
सूत्रेषु॥प्राणस्तथानुगमादित्यधिकरणे॥तद्विषयवाक्ये॥कौषितक्युपनिषदि॥प्रतर्दनंप्रतिइंद्रेणप्राणोस्मिप्र
ज्ञात्मामामेवविजानीहि॥इत्याद्युपदेशोक्तेइंद्रस्वरूपोपदेशात्॥तस्मिन्वाक्येब्रम्हणःप्रतिपाद्यत्वंनास्तीतिपूर्वप

क्षाभिप्रायेणवक्तुःइंद्रस्य॥आत्मोपदेशात्स्वरूपोपदेशात्मांविजानीहि॥त्रिशीर्षाह्णंत्वाष्ट्रमहंतं॥अरुन्मुखा
न्यतीन्सालाहृकेभ्यःप्रायच्छत्॥इत्यादिशब्दविशेषणैश्चप्रतर्दनंप्रतिइंद्ररूपवक्तुःउपदेष्टुः॥इंद्रस्यस्वरूपोपदेशा
त्तस्यवाक्यस्यकौषीतकब्राम्हणरूपस्यब्रम्हप्रतिपादनपरत्वंनसंभवतीतिचेदितिपूर्वमीमांसकपूर्वपक्षः॥
अत्रयअध्यात्मसंबंधभूमाह्यस्मिन्नितिसूत्रभागेन॥अस्मिन्वाक्येअध्यात्मसंबंधभूमपरमात्मस्वरूपज्ञापक
लिंगबाहुल्यं॥वर्ततइतिसूत्रशेषः॥एवंव्यासेनैव॥एतदर्थकसूत्रंकृतं॥तत्रापिसूत्रेनवक्तुरात्मोपदेशादित्य
त्रस्थितस्यआत्मशब्दस्यापिस्वरूपपरत्वमेव॥सर्वैर्वादिभिःवक्तव्यं॥तस्य॥अंतर्यामिपरत्वांगीकारेपरैःवा
दिभिःइंद्रांतर्यामित्वेनब्रम्हणःअभ्युपगतत्वात्॥अंतर्यामिरूपब्रम्हणएव॥प्रतिपाद्यत्वनिषेधप्राप्त्यास्वस्व
सिध्दांतहानिप्रसंगोदुर्वारतया॥पर्वतवत्स्वशिरसिनिक्षिप्तः॥स्यात्॥किंचउत्तरसूत्रे॥शास्त्रदृष्ट्यातूपदेशो
वामदेववदित्यत्रसूत्रावयवपदव्यत्यासकल्पनयाशास्त्रदृष्टइतिपदेनअंतर्यामिणएवसिध्दांतप्रतिपाद्यत्वेनैव

तवादिभिरंगीकृतत्वाच्च॥ अतोपि आत्मशब्दस्य स्वरूपपरत्वमेव वक्तव्यं॥ न त्वंतर्यामिपरत्वं॥ किं बहुना॥ अप्रयो
जकप्रलापेन॥ अंतर्यामिब्राम्हणस्य श्रुत्याद्वैतब्रम्हपरत्वमेव॥ नतु मुख्यया वृत्त्या॥ शरीरि शरीरभाव उपप
द्यतेतिसिद्धं॥ एतद्ब्राम्हणवाक्यार्थैः अंतर्यामिस्वरूपनिरूपणेन आत्मान्यद्रष्टृंतरनिषेधद्वारा साक्षादपरोक्षब्रम्ह
णः दृक्स्वरूपभूत द्रष्टृत्वनिर्धारणेन च आनेतुं अन्यैः दुरवगाह्यविषयानुभवप्रदर्शनेन च आत्माभिन्नापरमा
त्मज्ञानजनकस्वरूपसामर्थ्यं याज्ञवल्क्यस्यैवेति अवधृतो भवति॥ एतदुत्तर अष्टमब्राम्हणे गार्गिवाचक्नवीया
ज्ञवल्क्यसंवादे॥ अथ ह वाचक्नव्युवाच ब्राम्हणा भगवंतो हंताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै
जातु युष्माकमिमं कश्चिद्ब्रम्होद्यं जेतेति पृच्छ गार्गीति॥१॥ साहोवाचाहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्र
पुत्र उज्यं धनुरधिज्यं कृत्वा द्वौ बाणवंतौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामु
पोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति॥२॥ साहोवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदंतरा द्यावापृ

प्र·३ा॰
४२

थिवीइमेयद्भूतंचभवच्चभविष्यच्चेत्याचक्षतेकस्मिꣳस्तदोतंचप्रोतंचेति॥ ३॥ सहोवाचयदूर्ध्वंगार्गिदिवोयद
वाक्पृथिव्यायदंतराद्यावापृथिवीइमेयद्भूतंचभवच्चभविष्यच्चेत्याचक्षतआकाशेतदोतंचप्रोतंचेति॥ ४॥
साहोवाचनमस्तेऽस्तुयाज्ञवल्क्ययोमएतंव्यवचोपरस्मैधारयस्वेतिपृच्छगार्गीति॥ ५॥ साहोवाचयदूर्ध्व-
याज्ञवल्क्यदिवोयदवाक्पृथिव्यायदंतराद्यावापृथिवीइमेयद्भूतंचभवच्चभविष्यच्चेत्याचक्षतेकस्मिꣳस्त
दोतंचप्रोतंचेति॥ ६॥ सहोवाचयदूर्ध्वंगार्गिदिवोयदवाक्पृथिव्यायदंतराद्यावापृथिवीइमेयद्भूतंच
भवच्चभविष्यच्चेत्याचक्षतआकाशएवतदोतंचप्रोतंचेतिकस्मिन्नुखल्वाकाशओतश्चप्रोतश्चेति॥ ७॥ स
होवाचैतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोवा
य्वनाकाशमसंगमरसमगंधमचक्षुष्कमश्रोत्रमवागमनोतेजस्कमप्राणममुखममात्रमनंतरमबाह्यंनतद
श्नातिकिंचनतदश्नातिकश्चन॥ ८॥ एतस्यवाअक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृतौतिष्ठतएतस्यवा

नि॰

अक्षरस्यप्रशासनेगार्गिद्यावापृथिव्यौविधृतेतिष्ठतः॥एतस्यवाअक्षरस्यप्रशासनेगार्गिनिमेषामुहूर्ताअहो-
रात्राण्यर्धमासामासाऋतवःसंवत्सराइति॥विधृतास्तिष्ठंत्येतस्यवाअक्षरस्यप्रशासनेगार्गिप्राच्योन्यान-
द्यःस्पंदंतेश्वेतेभ्यःपर्वतेभ्यःप्रतीच्योन्यायांयांचदिशमन्वेतस्यवाअक्षरस्यप्रशासनेगार्गिददतोमनुष्याः
प्रशꣳसंतियजमानंदेवादर्वींपितरोऽन्वायत्ताः॥९॥योवाएतदक्षरंगार्ग्यविदित्वाअस्मिंल्लोकेजुहोतिय-
जतेतपस्तप्यतेबहूनिवर्षसहस्राण्यंतवदेवास्यतद्भवतियोवाएतदक्षरंगार्ग्यविदित्वास्माल्लोकात्प्रैतिसकृप-
णोथयएतदक्षरंगार्गिविदित्वाऽस्माल्लोकात्प्रैतिसब्राह्मणः॥१०॥तद्वाएतदक्षरंगार्ग्यदृष्टंद्रष्टृश्रुतꣳश्रोतृमतं
मंतृविज्ञातंविज्ञातृनान्यदतोस्तिद्रष्टृनान्यदतोस्तिश्रोतृनान्यदतोस्तिमंतृनान्यदतोस्तिविज्ञात्रेतस्मिन्नुखल्व-
क्षरेगार्ग्याकाशओतश्चप्रोतश्चेति॥११॥साहोवाचब्राह्मणाभगवंतस्तदेवबहुमन्येध्वंयदस्मान्नमस्कारेणमुच्ये-
ध्वंनवैजातुयुष्माकमिमंकश्चिद्ब्रह्मोद्यंजेतेतिततोहवाचक्नव्युपरराम॥१२॥इत्यादिवाक्यसंदर्भैःएतद्भाष्य-

व्याख्यानादिभिश्चमुख्यतासर्यविषयोर्थःप्रकाश्यते॥तथाहि॥अथवाचक्नवीति॥वाचक्नवीगार्गीपूर्वस्मिन्
कालेयाज्ञवल्क्येनमातिप्राक्षीर्माते मूर्धाव्यपप्तद्नतीतिउक्तासतिशिरःपतनभयात्उपरतासतिपुनःब्राम्ह
णाभिप्रायानुसारेणयाज्ञवल्क्यंप्रतिप्रश्नद्वयंकर्तुंप्रवृत्ता॥ ब्राम्हणाभगवंतइत्यादिनाब्राम्हणानुज्ञांप्राप्य
याज्ञवल्क्यंप्रति॥सहोवाचाहंवैत्वायाज्ञवल्क्येत्यादिनातौमेब्रूहीत्यंतेनपृष्टवती॥पृच्छगार्गीतियाज्ञवल्क्येन
उक्तासती॥सहोवाच॥यदूर्ध्वंयाज्ञवल्क्यइत्यादिना॥इत्याचक्षते॥कस्मिंश्तदोतंचप्रोतंचेति॥इत्यंतेनपुनरु
क्तवती॥सहोवाचयदूर्ध्वंगार्गिदिवोयदवागित्यादिना॥ इत्याचक्षतइत्यंतेत॥गार्ग्यभिप्रायमनूद्यआकाशे-
तदोतंचप्रोतंचेति॥पूर्वोक्तयदूर्ध्वंदिवोयदवाक्पृथिव्यायदंतराद्यावापृथिवीइत्यादिनापृष्टस्य॥सूत्रात्मन
व्याकृतजगद्रूपस्यअधिष्ठानत्वेनस्थिते॥अव्याकृताकाशेअंतर्यामिरूपेओतंचप्रोतंच॥अस्तुपृथिवी॥उत्पत्ति
स्थितिप्रलयकालेषुत्रिष्वपिवर्तत इतिउक्तवतेयाज्ञवल्क्याय॥नमस्तेस्तुयाज्ञवल्क्य॥यःत्वं॥ब्रम्हवित्॥ममप्रश्न

स्य वागाद्यगोचरस्य अव्याकृताकाशविषयस्य उत्तरमुक्तवानसि ॥ लोके इतरैः ॥ व्याकृतजगद्रूपसूत्रात्मज्ञान
स्यैव प्राप्तुमशक्यत्वात् ॥ तत्कारणाव्याकृताकाशविषयकज्ञानस्य दुष्प्रापत्वाच्च ॥ तस्मै तुभ्यं ॥ नमोस्तु ॥ इति
संतोषेण तस्य माहात्म्यज्ञानेन च नमस्कारं कृत्वा ॥ अपरस्मै धारयस्वेति ॥ पूर्वं पृष्टप्रश्नयोर्मध्ये ॥ अवशिष्टान्यप्रश्न
स्य उत्तरं ब्रूहीत्युक्तवती ॥ तदनंतरं अक्षरविषयकप्रश्नोत्तररूपं ॥ यदूर्ध्वं दिवो यदवाक्पृथिव्या ॥ इत्यादिना क
स्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति ॥ इत्यंतेन ॥ पृष्टवती गार्गी प्रति ॥ उत्तरत्वेन सहोवाचैतद्वै तदक्षरं गार्गि
ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमित्युपक्रम्य न तदश्नाति कश्चनेत्यंतेन ॥ अव्याकृताकाशाधिष्ठानत्वेन
निरुपाधिकशुद्धब्रह्मरूपमक्षरमभिप्राय ॥ अस्थूलाद्युक्तरूपस्य ॥ वस्तुन एव लोके अप्रसिद्धत्वेन ॥ इंद्रियमन
आद्यविषयत्वेन च ॥ तस्य अक्षरस्य ॥ असत्त्वरूपत्वशंकायां प्राप्तायां ॥ तन्निवारणार्थं ॥ अनुमानरूपेण प्रमाण
मवतारयन् सूर्यचंद्रद्युपृथिवीनिमेषमुहूर्तादिकालनदीपर्वतादिसर्वनियंतृत्वेन ॥ सर्वाधारकत्वेन सर्वव्यव

प्र·शा·
५९
ग

स्थापकत्वेनसर्वेषांभयहेतुत्वेनच॥तदक्षरस्यसत्वंसाधयन्तस्यअक्षरस्यकेवलअनुमानप्रमाणेनकेवल
परोक्षज्ञानविषयत्वंनिराकुर्वंश्च॥अन्यचेतननिषेधनद्वारातस्यस्वस्वरूपभूतनित्यचैतन्यरूपेणयत्साक्षाद
परोक्षाद्ब्रह्मयआत्मासर्वांतरः।योऽशनायापिपासादिधर्मातीतः॥तदक्षरंअदृष्टंद्रष्टृअश्रुतंश्रोतृअमतंमंतृअवि
ज्ञातंविज्ञातृ॥ इत्यादिप्रतिपाद्यस्य॥अन्यचैतन्यइंद्रियमनोअवेद्यस्यस्वस्वरूपेणचेतनत्वात्॥द्रष्ट्रादि
शब्दलक्षितदृङ्मात्रस्यअवस्थानंदर्शी इत्यानान्यदतोस्तिद्रष्टृनान्यदतोस्तिश्रोतृ॥इत्यादिनाअक्षरादन्य
स्यद्रष्ट्रादेःनिषेधनेनअक्षरस्यैवसर्वद्रष्टृशब्दितसर्वसाक्षिस्वरूपेणनित्यापरोक्षतयासर्वैरनुभूतत्वात्॥अस्थू
लमनण्वादिशब्देनतत्पदार्थकशोधकरूपेणप्राहासत्वंद्वंकानिवृत्तिंकृतवान्॥भगवान्याज्ञवल्क्यः॥
अपिचअक्षरसद्भावानुमानस्यसमाकारित्वेनअनुकूलतर्कसदृशंलिंगमपिसूच्यते॥तथाहि॥अक्षरस्यप्र
शासनेगार्गिददतोमनुष्याःप्रशंसंतियजमानंदेवादर्वींपितरोअन्वायत्ताः॥ इत्यादिवाक्यैःहिरण्या

नि·

ददतः जनानु मनुष्याः प्रशंसंति ॥ एते महादातारः पुण्यफलवंतः इति ॥ दानस्य फलसत्वे प्रशंसा युज्यते ॥ फ
लं च तल्लशास्तरि सत्वे संभवति अतः तत्फलनियंतृसत्वं सिद्धं भवति ॥ एवमेव यजमानं ॥ देवा इति यज्ञकर्तारं दे
वा इंद्रादयः चरुपुरोडाशादिहविर्ग्रहणार्थं अनुसरंतीति ॥ उत्तरत्र अन्वायत्ता इति उच्यते ॥ एवं पितरः ॥ दर्वी अ
न्वायत्ता इति च ॥ दर्व्युपलक्षितहोमविशेषं प्रति अनुगच्छंतीति च ॥ देवपितॄणामपि हव्यकव्यदातृमनुष्या
धीनत्ववचनं ॥ सर्वप्रशास्तृनियमितव्यवहारद्योतनद्वारा प्रशास्तृसद्भावं गमयति ॥ अन्यथा एवं न स्यादिति
अनुकूलतर्करूपं लिंगं सूचितं भवति ॥ एवमेव ॥ यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिन्लोके जुहो
तीत्यादिना ॥ यागतप आदीनां अंतवत्वफलप्रदर्शनेन ॥ यो वा एतदविदित्वाऽस्मात्प्रैति स कृपण इति ॥ अ
क्षरज्ञानाभावं निंदित्वा ॥ अथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राम्हणः ॥ इति च ॥ प्रदर्शय
न् वेदनावेदनफलभेदेन अक्षरवेदनस्य मुख्यब्राम्हणत्वकथनेन च तद्वेदनावेदनविषयत्वेनार्थादक्षरसद्भा

वसिद्धिर्न्नोप्यते॥किंचएतद्वाक्षरेगार्गिदृष्टाव्याकृताकाशाधिष्ठानत्वेनस्थितेब्रम्हणिअव्याकृतस्या
काशस्यओतत्वप्रोतत्वमुपसंहरन्सर्वाधारत्वेनापिअक्षरसत्वप्रतिपादनंभवति॥ अपिचकेषांचित्
पापाधिक्यात्॥मंदबुद्धीनां॥अतिपापवतांपुंसांविपरीतामतिर्भवेदितिसूतसंहिताब्रम्हगीतावचनानु
सारेणश्रुतौअस्थूलमनण्वह्रस्वमित्यादिनासर्वरूपत्वनिषेधेत्यक्षरस्यब्रम्हणःअत्यंतावेद्यत्वेन॥अत्यंता
सत्वमेवसिद्धंभवतीतिमनीषाजायते॥ शुद्धांतःकरणस्यगुरुशास्त्रदेवतादिविश्वासरूपश्रद्धावतः
शुद्धाद्वैतवादिनःपक्षेअथातआदेशोनेतिनेतीतिक्रमेणअनात्ममात्रनिषेधनेनयत्साक्षादपरोक्षाद्ब्रम्हय
आत्मासर्वांतरःतदेतत्प्रेयःपुत्रात्प्रेयोवित्तात्प्रेयो ऽन्यस्मात्सर्वस्मात्॥यदंतरतरंहि अयमात्माअहंब्रम्हास्मि
अयमात्माब्रम्हविज्ञानमयोमनोमयप्राणमयश्चक्षुर्मयः॥इत्यादिएतद्बृहदारण्यवाक्यैरेववेद्यस्य॥ब्रम्हणः
सर्वनिषेधावधित्वेनसर्वनिषेधप्रकाशत्वेन॥सर्वनिषेधस्युःस्वरूपत्वेनसर्वनिषेध्याधिष्ठानत्वेनच॥मुमुक्षोः

स्वात्मस्वरूपत्वेनसर्वानुभूतत्वेनच॥स्थितेःकेनापिवारयितुंनशक्यते॥एतेन॥श्रुतेःश्रुत्याद्वैतएवतात्पर्यमि
तिस्पष्टीक्रियते॥तद्यथा॥स्वात्मव्यतिरेकेणब्रह्मणःसत्त्वांगीकारेस्वात्मव्यतिरिक्तस्वरूपनिषेधासंभवः॥
स्वात्मव्यतिरिक्तब्रह्मणोपिसर्वनिषेध्यकोटौप्रविष्टत्वात्॥सर्वंतंपरादाद्योन्यत्रात्मनःसर्वंवेदेत्येतद्बृह
दारण्यश्रुतेश्च॥ तादृशब्रह्मणःशशविषाणतुल्यात्वंतासत्त्वमेवसिद्धंभवति॥ अद्वैतपक्षेतु॥अन्य
सर्वनिषेधेपिसर्वनिषेधकर्तुःस्वात्मनःनिषेद्धुमशक्यत्वात्॥परिशेषात्तन्निषेधावधित्वेनस्वात्मनएव
ब्रह्मत्वंसिद्धंभवतीति॥श्रुतेस्तात्पर्ये॥सम्यक्स्फुटतयाप्रतीयते॥ ॥अतएव॥श्रीशंकरभगव
त्पादाचार्यैःउपदेशसहस्रिकायांप्रतिषेद्धुमशक्यत्वान्नेतिनेतीतिघोषितं॥इदंनाहमिदंनाहमित्यस्याप्र
तिपद्यते॥ भागवतेचद्वादशस्कंदे॥षष्ठाध्यायेद्वात्रिंशत्संख्याकश्लोके॥परंपदंवैष्णवमामनंतितद्यन्ने
तिनेतिनेतीत्यतदुत्सिसृक्षवः॥विसृज्यदौरात्म्यमनन्यसौहृदाहृदोपगृह्यावसितंसमाहितैः॥ ३२॥इया

प्र॰ व्या॰
४७

नि॰

दिभिश्च प्रतिपाद्यार्थस्यैव श्रुतितात्पर्यविषयत्वेन दृढीकृतत्वात्॥ प्रस्तुतसर्वरूपनिषेधेपि निषेधुः स्वरूपेण-
त्वात्स्वरूपेण स्थितस्य ब्रम्हणः निषेधासंभवात्॥ ब्रम्हणः कथंचिदपि॥ अत्यंतासत्वप्रसक्तिरेव नास्तीति चैर्ये
कृत्वा श्रुतिः॥ अथात आदेशो नेति नेतीति॥ अस्थूलमनण्वह्रस्वमिति॥ तदेतद्ब्रम्हापूर्वमनपरमनंतरमबा-
ह्यमयमात्मा ब्रम्हेत्यादिभिर्वाक्यैः निर्भयं यथा भवति तथा॥ स्वच्छंदेन सर्वानात्मरूपदृश्यमात्रनिषेधं कृतव-
ति॥ इति निश्चयो बुद्धिमद्भिः क्रियतएव॥ किं बहुना श्रुतेः॥ श्रुत्याद्वैतएव तात्पर्यमिति सिद्धं॥ एतादृशानाना-
त्ममात्रनिषेधः द्वैतपक्षे कथंचिदपि सुतरां न संभवति॥ एतावता एतद्ब्राम्हणे॥ साहोवाच ब्राम्हणा भग-
वंतस्तदेव बहु मन्येध्वं इत्यादिना कश्चिद्ब्रम्होद्यं ज्येतेत्यंतेन ग्रंथेन तत्र स्थितान् ब्राम्हणान् संबोध्य पूर्वस्मि-
न्याज्ञवल्क्यं प्रति प्रश्नद्वयप्रयोगात्पूर्वमेव मयोक्तप्रकारेण इदानीं मम प्रश्नद्वयस्य सम्यगुत्तरं याज्ञवल्क्योद-
त्तवानिति हेतोः युष्माकं मध्ये एतं ब्रम्होद्यं ब्रम्हज्ञानिनं याज्ञवल्क्यं जेता कश्चिदपि नास्तीति सिद्धत्वात् भग-

वंतः सर्वेपियूयं॥ अस्मैयाज्ञवल्क्यायनमस्कारंकृत्वा॥ एतस्मात्याज्ञवल्क्यात्मुच्यध्वं॥ इतोमागीतरंभव
तांनास्तीतिमयानिश्चीयते॥ इत्येवमुक्त्वागार्गिवाचक्नवीउपररामेति। अयमर्थःभाष्येविस्पष्टः तथाचभाष्यं
साहोवाचहेब्राम्हणाभगवंतः॥ शृणुतमदीयंवचः तदेवबहुमन्येध्वं॥ मच्यध्वं॥ किंतत्॥ यदस्माद्याज्ञ
वल्क्यान्नमस्कारेणमुच्येध्वं॥ मुच्यध्वं॥ अस्मैनमस्कारंकृत्वातदेवबहुमन्यध्वमित्यर्थः॥ जयस्तुमनसा
पिनाशंसनीयः॥ किमुतकार्यंतः॥ तस्मात्ननवैयुष्माकंमध्येजातु॥ कदाचिदपीमं॥ याज्ञवल्क्यं॥ ब्रम्हो
द्यंप्रतिजेता॥ प्रश्नौचेन्मत्स्यंवक्ष्यति॥ नैवेजेताभवितेतिपूर्वमेवमयाप्रतिज्ञातं॥ अद्यापिममायमेवंनिश्च
योब्रम्होद्यंप्रत्येतत्तुल्योनकश्चिद्विद्यतइति॥ ततोहवाचक्नव्युपरराम॥ इति॥ इत्याद्युपपादितप्रकारे
णदृश्यमात्रनिराकरणद्वारादृक्स्वरुपभूतस्वात्मविषयकअनुभवपर्यवसानज्ञापनेनआत्माद्वैतब्रम्हा
त्मैक्यअपरोक्षानुभवजनककोशल्यवत्वेनयाज्ञवल्क्यस्यपरमात्मबोधकपरत्वंस्वतःसिद्धमेव॥

प्र॰शा॰ ४९ | नि॰

अथशाकल्यब्राह्मणमारभ्यते॥तथाहि॥प्रथमखंडिकायां॥अथहैनंविदग्धःशाकल्यंपप्रच्छ॥इत्युपक्रम्य
शतात्रयश्चत्रीचसहस्रेति॥इत्यंतस्य॥एतदुत्तरद्वितीयखंडिकायांच॥सहोवाचमहिमानइत्यारभ्यइं
द्रश्चैवप्रजापतिश्चत्रयस्त्रिंशावित्येतस्यांतस्यच॥वाक्यजातस्यउपनिषन्मूलस्यएतद्भाष्यव्याख्यानयो
श्चशाकल्येनयाज्ञवल्क्यंप्रतिकतिदेवाइति॥ देवतासंख्यानुविषयकप्रश्नेकृतेअवांतरप्रश्नप्रति
वचनयोःवैश्वदेवनिविद्युक्तबहुसंख्याकदेवानांसंकोचकरणेनएकोदेवइत्यंततःप्रतिपाद्यतस्यए
कस्यैवमहाप्राणनामकहिरण्यगर्भात्मकसूत्रात्मनःअन्येदेवाःबहुसंख्याकाः॥परंपरया॥एकस्यैवम
हिमानःविभूतिविशेषाःअंशीभूताःइत्यभिप्रायेण॥देवतासंख्यानांएकत्वप्रभृतिअनेकसंख्यावत्त्वपर्यं
तं॥संख्यासंकोचविकासाभ्यांएकदेवतात्वंउपपाद्यतस्यैकस्यैवकतमएकोदेवइति॥प्राणइतिसब्र
ह्मेत्याचक्षतइतिपरमार्थतोपरब्रह्मस्वरूपस्यउपाधिविशिष्टत्वेनसमष्टिरूपस्यहिरण्यगर्भात्मककार्य

तात्पर्यार्थः

ब्रम्हणःउपास्यत्वंसूचइत्वा ॥ तदवांतरभेदभिन्नानां ॥ देवताविशेषाणांस्वरूपकथनार्थंतेषामेवावां
तरउपास्यत्वज्ञापनार्थंच ॥ अवांतरप्रश्नप्रतिवचनाभ्यां ॥ एतद्ब्राम्हणपरिसमाप्त्यंतंविस्तारःप्रपंच्यते
तथाहि ॥ तृतीयखंडिकायांवसुशब्दनिर्वचनेन ॥ अग्निरित्यादिनक्षत्रांताः ॥ अष्टौवसवःप्रतिपादि
ताः ॥ चतुर्थखंडिकायांरुद्रशब्दनिर्वचनेन ॥ पुरुषशब्दवाच्येदेहे ॥ प्राणशब्दवाच्यानिज्ञानकर्मेंद्रि
याणिदश ॥ आत्मैकादशेति एकादशरुद्राउक्ताः ॥ पंचमखंडिकायां ॥ आदित्यशब्दनिर्वचनेनद्वादशा
दित्याःसूचिताः ॥ षट्संख्याकखंडिकायांइंद्रशब्दवाच्यस्तनइत्नुः यज्ञशब्दवाच्यप्रजापतिश्चक्रमे
णअशनिपशुरूपेणप्रतिपादितः ॥ सप्तमखंडिकायां ॥ एतेषांदेवतानां अन्येषांचकेषांचित् ॥ उपास
नासौलभ्यार्थंषट्संख्याकेषुदेवेषुअंतर्भावंकृत्वा अग्निश्चपृथिवीचवायुश्चांतरिक्षंचादित्यश्चद्यौश्चे
तिषडेतेहीदंसर्वंषडेति ॥ संख्यासंकोचःकृतः ॥ अष्टमखंडिकायां ॥ कतमेतेत्रयोदेवाइतिइमेएवत्र

योलोकाएषुहीमेसर्वेदेवा इति॥कतमौतौद्वौदेवाविस्यंनंचैवप्राणश्चेतिकतमोध्यर्थइति योयंपवत इति
तासामपिषट्देवतानांउपासनासंकोचार्थंत्रिषुदेवेषुतेषामपित्रयाणांद्वयोः॥तयोश्च॥द्वयोरपिएक
स्मिंन्नेवदेवेअंतर्भावःकृतः॥ नवमखंडिकायां॥तदाहुर्यदयमेकइवेवपवतेअथकथमध्यर्ध
इतियदस्मिन्निदं सर्वमध्यार्ध्नोत्तेनाध्यर्धइतिकतमएकोदेवइतिप्राणइतिसब्रह्मेत्याचक्षते॥ इ
तिपूर्वोक्तक्रमेणएकस्यैवमहाप्राणस्यसूत्रात्मनःकार्यब्रह्मणःअनंतदेवतात्मत्वेन विस्तारः॥पुनःअ
वांतरसंख्यासंकोचेनपुनरेकत्वंउपासकाधिकारभेदेनज्ञानतारतम्येणच॥उपासनार्थसंकोचःप्रति
पाद्यते॥तथाचभाष्यं॥ तत्राहुःचोदयंति॥यदयंवायुरेकइवैव॥एकएवपवते अथकथमध्यर्धइ
ति॥यदस्मिन्निदं॥सर्वमध्यार्ध्नोत अस्मिन्वायोसतीदं॥सर्वमध्यार्ध्नोतु॥अधिवृद्धिंप्राप्नोति॥तेन
ध्यर्धइति॥कतमएकोदेवइति॥प्राणइतिसप्राणोब्रह्मसर्वदेवात्मकत्वान्महत्॥ब्रह्म त्यदित्याचक्ष

ते॥त्यदिति॥तद्ब्रह्माचक्षते॥परोक्षाभिधायकेन शब्देनदेवानामेतदेकत्वं॥नानात्वंच॥अनंतानांदेवानां॥
निविलसंख्याविशिष्टेषंतर्भावः॥तेषामपि॥त्रयस्त्रिंशदादिषूत्तरोत्तरेषुयावदेकस्मिन्प्राणे॥प्राणस्यैवचैक-
स्यसर्वोनंतसंख्यातो विस्तरःएवमेकश्चानंतश्च॥अवांतरसंख्याविशिष्टश्च॥प्राणएवतत्रच॥देवस्यैक
स्यनामरूपकर्मगुणशक्तिभेदोऽधिकारभेदात्॥ दशमखंडिकायां॥पृथिव्येवयस्यायतनमग्निर्लोको
मनोज्योतिर्योवैतंपुरुषंविद्यात्सर्वस्यात्मनःपरायणꣳसवैवेदितास्यात्॥याज्ञवल्क्यवेदवाअहंतंपुरुष
ꣳसर्वस्यात्मनःपरायणंयमात्थ॥यएवायꣳशारीरःपुरुषःसएषवावदेवशाकल्यतस्यकादेवतेत्यमृतमि
तिहोवाच॥ अस्यभाष्यं ॥इदानींतस्यैवप्राणस्यब्रह्मणःपुनरष्टधाभेदउपदिश्यते॥पृथिवीएव
यस्यदेवस्यायतनं॥आश्रयःअग्निर्लोको यस्यलोकयत्यनेनेति॥लोकःपश्यतीति॥अग्निनापश्यतीत्य
र्थः॥मनोज्योतिः॥मनसाज्योतिषासंकल्पविकल्पादिकार्यंकरोतियःसोयंमनोज्योतिः॥पृथिवीशरीरो

ध्मिदर्शनो मनसा ।। संकल्पइता ।। पृथिव्यभिमानी ।। कार्यकरणसंघातवान् ।। देव इत्यर्थः ।। स एवं विशिष्टं चैतं
पुरुषं यो विद्यात् विजानीयात् सर्वस्यात्मनः अध्यात्मिकस्य कार्यकरणसंघातस्यात्मनः परमयनं ।। परआ
श्रयः तं परायणं मातृजेन ।। त्वङ्मांसरुधिररूपेण क्षेत्रस्थानीयेन बीजस्थानीयस्य पितृजस्यास्थिमज्जाशु
क्ररूपस्य परमयनं करणात्मनश्च ।। स वै वेदिता स्यात् ।। य एतदेवं वेत्ति ।। स वै वेदिता पंडितः स्यादित्यभिप्रा
यः ।। याज्ञवल्क्य त्वं तमजानन्नेव पंडिताभिमानीत्यभिप्रायः ।। यदि तद्विज्ञाने पांडित्यं लभ्यते वेद वा अहं तं पुरु
षं ।। सर्वस्यात्मनः परायणं यमात्थ यं कथयसि ।। तमहं वेद ।। तत्र शाकल्यस्य वचनं च द्रष्टव्यं ।। यदि त्वं वेत्थ ।
तं पुरुषं ब्रूहि किं विशेषणो सौ शृणु यद्विशेषणः सः ।। य एवायं शारीरः ।। पार्थिवांशः ।। शरीरे भवः शारीरः मा
तृजकोशत्रयरूप इत्यर्थः ।। स एष देवः यस्त्वया पृष्टो हे शाकल्य किं त्वस्ति ।। तत्र वक्तव्यं ।। विशेषणांतरं
तद्वदेव पृच्छेवेत्यर्थः ।। हे शाकल्य ।। स एवं प्रक्षोभितो अमर्षवशग आह तोत्रार्दित इव गजः ।। तस्य देवस्य

शारीरस्य॥ का देवता॥ यस्मान्निष्पद्यते॥ यः सा तस्य॥ देवतेत्यस्मिन् प्रकरणे विवक्षितः॥ अमृतमिति
होवाच॥ अमृतमिति॥ यो भुक्तस्यान्नस्य रसो मातृजस्य॥ लोहितस्य निष्पत्तेर्हेतुः॥ तस्माद्यन्नरसाल्लोहि
तं निष्पद्यते स्त्रियाश्रितं॥ ततश्च लोहितमयं शरीरं बीजाश्रयं समानमन्यत्॥ १०॥ एवमेव उत्तरसप्तदशखंडि
कां तेषु॥ एतस्यैव प्राणदेवस्य अष्टविध आयतनादिभेदेन उपासनार्थं यथा पृथिव्येव यस्यायतनमिति प्र
थमपर्याये॥ चोक्तं॥ तथा द्वितीयादिपर्यायेषु॥ काम एव यस्यायतनं रूपाण्येव यस्यायतनं॥ आकाश एव
यस्यायतनं तम एव यस्यायतनं रूपाण्येव यस्यायतनं आप एव यस्यायतनं रेतएव यस्यायतनं॥ इत्यादि
ना अष्टधा देवलोकपुरुषभेदेन त्रिधा त्रिधात्मानं विभज्यावस्थितः। को देवः प्राण एवोपासनार्थमुपदिष्टः॥
अधुनादिविभागेन पंचधा प्रविभक्तस्यात्मनस्तु उपसंहारार्थमाह॥ मध्ये खंडिकाद्वयं तु शाकल्ययाज्ञवल्क्य
संभाषणरूपं॥ इति तस्य अर्थांतरज्ञापकत्वाभावात्॥ तन्न व्याख्यातं॥ प्रकृतं तु दर्श्यते॥ तद्यथा॥

किंदेवतोऽस्यांप्राच्यांदिश्यसीत्यादित्यदेवत इति स आदित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति कस्मिन्नु चक्षुः प्र
तिष्ठितमिति रूपेष्विति चक्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रतिष्ठितानि ॥ हृदय इति होवाच यस्माद्धृद
येन हि रूपाणि सर्वलोको जानाति तस्माद्धृदये ह्येव रूपाणि प्रतिष्ठितानि भवंतीत्येवमेवैतद्याज्ञवल्क्य ॥ २०
एवं दक्षिणप्रतीच्युदीचिध्रुवसंज्ञासु पंचदिक्षु एकस्यैव पूर्वोक्तप्राणदेवस्य तत्तद्दिग्गतत्वेन उपासनार्थं प्रथ
मपर्यायप्रतिपादितसजातीयविशेषेण ॥ विशिष्टत्वेन विशेषज्ञानपरीक्षार्थं याज्ञवल्क्यं प्रतिशाकल्यः प्रश्ना
न्कृत्वा तेन उत्तरे दत्ते एवमेवैतद्याज्ञवल्क्येति ॥ अंगीकृतवान् ॥ अन्यवाक्येषु प्रतिपर्यायं ॥ किंदेवतो-
ऽस्यांप्राच्यांदिश्यसीतीत्यादिषु असीत्यंतं पदजातं दृश्यते ॥ तत्रायमर्थः ॥ याज्ञवल्क्यं प्रतिशाकल्य वा
क्यं किंदेवतोऽस्यांप्राच्यांदिश्यसीतीति ॥ किंदेवता । कादेवता ॥ अस्य ॥ तव दिग्भूतस्य ॥ असौ हि ॥ याज्ञव
ल्क्य हृदयमात्मानं ॥ दिक्षु पंचधा विभक्तं ॥ दिगात्मभूतं ॥ तद्द्वारेण ॥ सर्वं जगत्तु आत्मत्वेनोपगम्य ॥ अहम

स्मि॥ दिगात्मेति व्यवस्थितः॥ पूर्वाभिमुखः॥ सप्रतिष्ठावचनात्॥ यथा याज्ञवल्क्यस्य प्रतिज्ञा॥ तथैव॥ पृच्छ
ति किंदेवतः सत्वं॥ अस्यां दिशी॥ असीति॥ सर्वत्र हि वेदे॥ यां यां देवतामुपास्ते॥ इहैव तद्भूतः तां तां प्रतिप
द्यत इति॥ तथा च वक्ष्यति षष्ठाध्याये देवो भूत्वा देवानप्येतीति॥ अस्यां प्राच्यां का देवता॥ दिगात्मनस्तव अ
धिष्ठात्री॥ कया देवतया त्वं प्राचीदिग्रूपेण संपन्न इत्यर्थः॥ एतदुत्तरपंचविंशत्संख्याकखंडे॥ अहल्लिकेति
होवाच याज्ञवल्क्यो यत्रैतदन्यत्रास्मन्मन्यासै यध्येतदन्यत्रास्मत्स्याच्छ्वानो वैनदद्युर्वयांसि वैनद्विमथ्नीरन्निति
शाकल्य याज्ञवल्क्य संवादे पूर्वं॥ उक्तपदार्थानां॥ देवादीनां च॥ हृदयप्रतिष्ठितत्व॥ प्रतिपादने सिद्धे ताहृशस्य हृ
दयस्य॥ एतच्छरीराद्बहिः॥ यत्र कुत्र स्थितत्वेन॥ शाकल्याभिप्रायं ज्ञात्वा तदनूद्य तं निषेधति याज्ञवल्क्यः
यत्रैतदन्यत्र अस्मन्मन्यासै इत्यादि॥ अस्मत्तः॥ अस्माच्छरीरात् यत्र कुत्र वा प्रदेशे हृदयं॥ तदुपल
क्षित आत्मा च॥ वर्तत इति॥ मन्यसे यदि तदा॥ एतच्छरीरं हृदयादिरहितं सत् काष्ठलोष्टादिवत्॥

जडत्वेनस्थितंचेत्श्वानोवापक्षिणोवाएतच्छरीरं।भक्षयेयुः॥तस्मात्॥हृदयंअस्मिन्नेवशरीरेवर्ते
तइतिनिश्चेतव्यः॥इतितात्पर्यार्थः॥ एतदुत्तरषड्विंशात्मंखव्याकरवंडिकायां॥कस्मिन्नुत्वंचात्माचप्र
तिष्ठितोस्थइतिप्राणइतिकस्मिन्नुप्राणःप्रतिष्ठितइत्यपानइतिकस्मिन्नपानःप्रतिष्ठितइतिव्यानइ
तिकस्मिन्नुव्यानःप्रतिष्ठितइत्युदानइतिकस्मिन्नूदानःप्रतिष्ठितइतिसमानइतिसएषनेतिनेतीत्यात्मा·
गृह्योनहिगृह्यते ऽशीर्योनहिशीर्यतेसंगोनहिसज्जते ऽसितोनव्यथते॥नरिष्यति॥एतान्यष्टावायतना·
न्यष्टौलोकाअष्टौदेवाअष्टौपुरुषाःसयस्तान्पुरुषान्निरुह्यप्रत्यूह्यात्यक्रामत्तंत्वौपनिषदंपुरुषंपृच्छामितं
चेन्मेनविवक्ष्यसिमूर्धातेविपतिष्यतीति॥तंॱहनमेनेशाकल्यस्तस्यहमूर्धाविपपातापिहास्यपरिमोषिणो
ऽस्थीन्यपजह्रुरन्यन्मन्यमानाः॥ इत्यादिश्रुतिसंदर्भेणपूर्वखंडेनःप्राच्यादिदिग्देवतोपासनप्रतिपाद
कप्रकरणंसमाप्तं॥ शाकल्येनकस्मिन्नुत्वंचात्माचप्रतिष्ठितोस्थःइत्यादिना॥पृष्टोयाज्ञवल्क्यः॥

प्राणइत्यादिनासमानांतंअन्योन्यस्थितिहेतुमुक्तवान्॥तदनंतरंसमानःकस्मिन्नुप्रतिष्ठितइतिशाकल्ये
नवक्तव्ये॥स्थितेशाकल्यस्यसमानव्यतिरिक्ततदधिष्ठानवस्तुज्ञानाभावात्॥शाकल्यप्रश्नोपरमे॥अस्यंत
त्वरया॥समानादिसर्वजगदधिष्ठानब्रम्हाभिन्नप्रत्यगात्मस्वरूपंश्रुत्यैव॥सएषनेतिनेतीत्यादिना॥चतुर्था
ध्यायमधुकांडोक्तरीत्या॥ प्रतिपादितंपुनराख्याइकामनुसृत्यएतानि॥यान्युक्तान्यष्टावायतनानि॥पृ
थिव्येवयस्यायतनमित्येवमादीनि॥अष्टौलोकाः॥अग्निलोकादयो१ष्टौदेवाः॥अमृतमितिहोवाचेत्येव
मादयो१ष्टौपुरुषाःशारीरःपुरुषइत्यादयः॥सयःकश्चित्तान्पुरुषान्॥शारीरप्रभृतीन्निरुत्य।निश्चयेनोत्य
गमइत्वा॥अष्टचतुष्कभेदेनलोकस्थितिमुपपाद्यपुनःप्राचीदिग्द्वारेणप्रत्यूह्य॥स्वात्मनि॥हृदयेअत्यक्रामत
अतिक्रांतवान्॥उपाधिधर्मंहृदयाद्यात्मत्वं॥स्वेनैवात्मनाव्यवस्थितः॥यऔपनिषदःपुरुषःअशनायादि
वर्जितउपनिषत्स्वेवविज्ञेयः॥नान्यप्रमाणगम्यः॥तंत्वात्वां॥विद्याभिमानिनंपुरुषंपृच्छामि।तंचेद्यदिमेन

विवक्ष्यसि॥विस्पष्टंनकथइष्यसि॥मूर्धातेविपतिष्यतीति॥तंस्वौपनिषदंपुरुषंशाकल्योनमेने॥ह॥नवि
ज्ञातवान्किल॥तस्यहमूर्धाविपपात॥विपतितः॥समाप्ता॥आख्यायिकाश्रुतेर्वचनं॥तंहनमेनेइत्यादि॥किं
चअपिहास्य॥परिमोषिणःतस्कराः॥अस्थीन्यपिसंस्कारार्थं॥शिष्यैर्नीयमानानि॥गृहान्प्रत्यपजह्रुः॥अप
हृतवंतः॥किंनिमित्तं॥अस्यतु॥धनंनीयमानं॥मन्यमानाःपूर्ववृत्तात्याख्याइकेहसूचिता॥अष्टाध्या
य्यां॥किल॥शाकल्येनयाज्ञवल्क्यस्य॥समानांतरएवसंवादोनिर्वृत्तः॥तत्रयाज्ञवल्क्येनशापोदत्तः॥पुरे
ऽतिथ्येमरिष्यसिनते॥अस्थीनिचनगृहान्प्राप्स्यंतीतिसतथैव॥ममारतस्यहाप्यन्यन्मन्यमानाःपरिमो
षिणोऽस्थीन्यपजह्रुः॥तस्मान्नोपवादीस्यादुतह्येवंवित्परोभवतीतिसैषाआख्याइकाआचारार्थंसू
चिता॥विद्यास्तुता॥ इतिश्रुतिः॥ब्रह्मज्ञानिनःयाज्ञवल्क्यस्यपक्षपातंस्वीकृत्यशाकल्यः॥ब्रह्मवादि
नासह॥द्वेषसंपादनेनमरणमपिप्राप्य॥स्वशरीरास्थीन्यपि॥संस्कारार्थेस्वगृहंप्रतिप्रापयितुमपियो

गयतांनप्राप्तवान्॥इत्यप्युक्त्वाब्रह्मज्ञानिनासह अन्यैःवादोनकर्तव्यइतिआचारंशिक्षयति॥नतु॥ब्रह्मज्ञा
निनःब्रह्महत्यदोषप्राप्तिःभवेदितिसूचयति॥ एतदुत्तरसप्तविंशतिखंडिकाशविंशतिखंडिकयोःनि
ष्पन्नार्थः॥सूच्यते॥ तथाहिमूलश्रुतिः ॥अथहोवाचब्राह्मणाभगवंतोयोवःकामयतेसमापृच्छतु
सर्वेवामापृच्छतयोवःकामयतेतंपृच्छामिसर्वान्वावःपृच्छामीतितेहब्राह्मणानदधृषुः॥तान्हैतैश्लोकैः
पप्रच्छयथावृक्षोवनस्पतिस्तथैवपुरुषोमृषातस्यलोमानिपर्णानित्वगस्योत्पाटिकाबहिःत्वचएवास्यरुधि
रंप्रस्यंदित्वचउत्पटःतस्मात्तदातृण्णात्प्रैतिरसोवृक्षादिवाहतात्॥मांसान्यस्यशकराणिकिनाटंस्नाव
तत्स्थिरं॥अस्थीन्यंतरतोदारूणिमज्जामज्जोपमाकृता॥यद्वृक्षोवृक्णोरोहतिमूलान्नवतरःपुनः॥मर्त्यः
स्विन्मृत्युनावृक्णःकस्मान्मूलात्प्ररोहति॥रेतसइतिमावोचतजीवतस्तत्प्रजायते॥धानारुहइववैवृक्षोंजसा
प्रेत्यसंभवः॥यत्समूलमावृहेयुर्वृक्षंनपुनराभवेत्॥मर्त्यःस्विन्मृत्युनावृक्णःकस्मान्मूलात्प्ररोहति॥जातएव

प्र॰ श्रा॰ ६४

नजायते को न्वेनंजनयेत्पुनः॥ विज्ञानमानंदं ब्रह्मरातिर्धातुः परायणंतिष्ठमानस्यतद्विद इति॥ इत्यादिनावा

क्यजातेन याज्ञवल्क्यः॥ जनकेन ब्रह्मविदे दत्तमितिगोसहस्रं उद्दिष्टं स्वयंब्रह्मवित्॥ इत्यभिमानेन स्वेनगृ

हीतंचेत्॥ तद्ब्राम्हणसभायां॥ अन्यः कश्चित्॥ ब्रह्मवित्स्थितोवा॥ अस्थितोवास्थितश्चेत्॥ तस्मैच॥

अदत्वा॥ स्वयमेवगृहीतवान्॥ इतिकेषांचित्॥ आशंकाजायेत ॥ इत्येवंमाभूदिति॥ न्यायमालोच्य॥

न्यायप्रदर्शनार्थं न्यायानुसारेण॥ तस्यांसभायांकश्चिदपिब्रम्हवित्नासीदिति॥ सर्वेषांज्ञापनार्थं॥ तान्

ब्राम्हणान्प्रति॥ वः मध्येकश्चिदपिमांप्रतिप्रश्नान्पृच्छतु॥ सर्वेवा॥ मांपृच्छंतु॥ अथवा॥ अहंकंचित्॥ वः

मध्येवक्तारं॥ पृच्छामिसर्वान्वापृच्छामिएतद्विषयेभवतांअनुज्ञाभवितव्येति॥ उक्तवान्तेब्राम्हणाः

प्रत्युत्तरंवक्तुंअनात्मवित्वात्॥ नसमर्थाबभूवुः तेषुतूष्णींस्थितेषु॥ तेषांब्रम्हवित्वाभावंप्रकटयितुंतान्प्र

तियाज्ञवल्क्यः॥ स्वयमेवसंसाररूपपुरुषशरीरादिसर्वजगद्विषयकं॥ तन्मूलभूतब्रम्हविषयकंच॥ कंचित्

नि॰

र्थं॥ब्राम्हणैः अज्ञातविषयं प्रष्टुं गूढार्थोपेतैः कैश्चित्श्लोकैः पृष्टवान् तेषांअविदितत्वात्॥तत्संसारमूलभूतं॥
याज्ञवल्क्याभिप्रायविषयरूपं विज्ञानमानंदंब्रम्हेत्यादिनाश्रुतिरेवउक्तवतीतस्मात्याज्ञवल्क्यस्यैकस्यैवब्रम्ह
वित्वात्॥अन्येषांसर्वेषांब्राम्हणानांतत्रस्थितानांअब्रम्हवित्वाच्च॥याज्ञवल्क्येन गोसहस्त्रग्रहणंयुक्तमे
वेतिन्यायःप्रदर्शितोभवति॥अयमर्थःसर्वोपिभाष्येस्फुटीकृतः॥तथाचभाष्यं॥यस्यनेतिनेत्यन्यप्रतिषेध
द्वारेणब्रम्हणोनिर्देशःकृतः॥तस्यविधिमुखेनकथंनिर्देशःकर्तव्यइति॥पुनराख्यायिकामेवाश्रित्याह॥मू
लंचजगतोवक्तव्यमिति॥आख्यायिकासंबंधस्तुब्रम्हविदोब्राम्हणान्जित्वागोधनंहर्तव्यमिति॥न्यायंम
त्वाह॥अथहोवाच॥अथअनंतरंतूष्णींभूतेषुब्राम्हणेषु॥हउवाच॥हेब्राम्हणाःभगवंतइत्येवं॥संबोध्य
योवःयुष्माकंमध्येकामयतेइच्छति॥याज्ञवल्क्यंपृच्छामीति॥समामागत्यपृच्छतु॥सर्वेवामापृच्छत॥सर्वे
वायूयंमांआपृच्छत॥योवःकामयते॥याज्ञवल्क्योमांपृच्छत्विति॥तंवःपृच्छामि॥सर्वान्वावः॥युष्मानहं

ष्टच्छामि॥तेहब्राम्हणानदधृषुः॥तेब्राम्हणाएवमुक्ताअपि॥नप्रगल्भाःसंवृत्ताः॥किंचिदपिप्रत्युत्तरंवक्तुं॥
तेष्वप्रगल्भभूतेषुब्राम्हणेषुतानूह एतैःवक्ष्यमाणैःश्लोकैःपप्रछष्टष्टवान्॥यथालोकेवृक्षोवनस्पतिःवृक्ष
स्यविशेषणंवनस्पतिरितितथैवपुरुषोअमृषा॥सत्यमेतत्॥तस्यलोमानि॥तस्यपुरुषस्यलोमानितरोः
वनस्पतेःपर्णानित्वगस्योत्पाटकाबहिः॥त्वक्‌अस्यपुरुषस्येतरस्योत्पाटिकवनस्पतेःत्वचाएवसकाशाद
स्यपुरुषस्यरुधिरंप्रस्यंदि॥वनस्पतेःत्वचउत्पटःत्वचएवोत्स्फुटति॥यस्मादेवंसर्वसमानमेववनस्पतेः
पुरुषस्यच॥तस्मात्तदातृण्णात्॥हिंसितात्प्रैतितत्॥रुधिरंनिर्गछति॥वृक्षादिवाहतात्॥छिन्नाद्रसः॥
एवंमांसान्यस्यपुरुषस्यवनस्पतेस्तानि॥शकराणिशकलानीत्यर्थः॥किनाटंवृक्षस्य॥किनाटंनाम॥शक
लेभ्योअभ्यंतरं॥वल्कलरूपंकाष्ठसंलग्नंतत्स्नाववत्पुरुषस्य॥तत्स्थिरं॥तत्किनाटं॥स्नाववद्दृढंहि॥त
त्॥अस्थीनिपुरुषस्यस्नाव्नोअभ्यंतरतोस्थीनिभवंति॥तथा॥किनाटस्याभ्यंतरतोदारूणि॥काष्ठानि॥

मज्जा।।मज्जेव।।वनस्पतेःपुरुषस्यच।।मज्जोपमाकृत।।मज्जाया उपमा।।मज्जोपमा।।नान्योविशेषोस्तीत्यर्थः
यथावनस्पतेर्मज्जा।।तथापुरुषस्य।।यथापुरुषस्यतथावनस्पतेः।।यत्तुयदिवृक्षोवृक्णः।।छिंनःरोहतिपु
नः।।प्ररोहतिप्रादुर्भवति।।मूलात्पुनर्नवतरः।।पूर्वस्मादभिनवतरः।।यदेतस्माद्विशेषणात्।।प्राग्वनस्प
तेः।।पुरुषस्यचसर्वंसामान्यमवगतं।अयंतु।।वनस्पतौविशेषोदृश्यते।।यच्छिंनस्यप्ररोहणं।।नतुपुरुषे
मृत्युनावृक्णेपुनःप्ररोहणंदृश्यते।।भवितव्यंच।।कुतस्प्ररोहणेनतस्माद्वःपृच्छामि।।मर्त्यःमनुष्यःस्विन्
मृत्युनावृक्णः।।कस्मान्मूलात्प्ररोहति।।मृतस्यपुरुषस्यकुतःप्ररोहणमित्यर्थः।।यदिचेदेवंवदतरेतसःप्र
रोहतीति।।मावोचतमैवंवक्तुमर्हत।।कस्मात्यस्माज्जीवतःपुरुषात्तत्।।रेतःप्रजायतेनमृतात्।।अपिच।
धानारुहः।।धानाबीजं।।बीजरुहोपिवृक्षोभवति।।नकेवलंकांडरुहएव।।इवशब्दोअनर्थकः।।वैवृक्षों
जसा।।साक्षात्प्रेत्यमृत्वा।।संभवःधानातोपि।।प्रेत्यसंभवोभवेदंजसावनस्पतेः।।यत्तु।।यदिसहमूलेनधा

प्र·श्रा·
५६

नाथवाहहेयुः॥उद्यच्छेयुः॥उत्सादयेयुर्वृक्षंनपुनराभवेत्॥पुनरागत्यनभवेत्॥तस्माद्वःपृच्छामि॥सर्वस्यैवजगतोमूलंमर्त्यःस्विन्मृत्युनावृक्णःकस्मान्मूलात्प्ररोहतिजातएवेतिमन्यध्वंयदिकिमत्रप्रष्टव्यमितिजनिष्यतोहिसंभवःप्रष्टव्यः॥नजातस्यअयंतुजातएवअतोअस्मिन्विषयेप्रश्नएवनोपपद्यतइतिचेत्॥न॥किंतर्हिमृतःपुनरपिजायतएव॥अन्यथाअकृताभ्यागमकृतनाशप्रसंगात्॥अतोवःपृच्छामिकोन्वेनंमृतंपुनर्जनयेत्॥तन्नविजज्ञाब्राम्हणायतोमृतःपुनःप्ररोहतिजगतोमूलंनविज्ञातंब्राम्हणैःअतोअब्रम्हिष्ठत्वात्॥हतागावोयाज्ञवल्क्येनजिताब्राम्हणाःसमाप्ताख्याइकयज्जगतोमूलं॥एनचशब्देनसाक्षाद्व्यपदिश्यतेब्रम्हविद्याज्ञवल्क्योब्राम्हणान्दृष्टवान्ततःकेनरूपेणश्रुतिरस्मभ्यमाह॥विज्ञानंविज्ञप्तिःविज्ञानंतच्चानंदं॥नविषयमज्ञानवद्दुःखानुविद्धंकिंतर्हिप्रसन्नंशिवमतुलमनायासंनित्यतृप्तमेकरसमित्यर्थः॥किंतत्ब्रम्होभयविशेषणवत्॥रातिःरातेःषष्ठ्यर्थेप्रथमा॥धनस्येत्यर्थः॥

नि·

धनस्यदातुःकर्मकृतोयजमानस्यपरमयनंपरागतिः॥कर्मफलस्यप्रदातृत्वात्॥किंचव्युत्थायैषणाभ्यस्त-
स्मिन्नेवब्राम्हणितिष्ठत्यकर्मकृत्॥तत्ब्रम्हवेत्तीति॥तद्विच तस्यतिष्ठमानस्यचतद्विदःब्रम्हविदइत्यर्थः
परायणमिति॥. शाकल्यब्राम्हणेअष्टाविंशत्संख्याकखंडेषुतत्तद्विवरणप्रकारेणतत्तद्देवतास्वरूप
कथनतत्तत्संख्यासंकोचविकासतत्तद्विलापनक्रमादिभिःआत्मस्वरूपनिर्धारणचमत्कारक्रमप्रदर्शन
पूर्वकसंसारतन्मूलब्रम्हप्रश्नादिभिःयाज्ञवल्क्यस्यब्रम्हविद्वरिष्ठत्वंश्रुत्यैवप्रकटीकृतं॥प्रस्तुतयाज्ञवल्क्य
विद्वेषेणशाकल्यस्यमरणप्राप्तिकथनमुखेनतदस्थ्नामपिग्रहप्राप्त्यभावप्रदर्शनेनच॥याज्ञवल्क्यस्यब्र
म्हहत्याभावसूचनादिभिःश्रुतेःयाज्ञवल्क्यपक्षपातोत्यंतविशदीकृतः॥ एवमेवभगवद्भाष्यकारैःशं
कराचार्यैःतद्व्याख्याकारैःआनंदगिर्याचार्यैश्चएतत्संचमाध्याये॥तत्तद्ब्राम्हणेषुतत्रतत्रयाज्ञवल्क्यमा-
हात्म्यप्रदर्शितप्रकारेणअस्माभिःकृततत्तात्पर्यप्रकटनेनचतेषामपिश्रुतिभाष्यव्याख्यानानांयाज्ञवल्क्य

पक्षपातो अतीवस्फुटतरः॥ प्रतीयत एवतान्नू हैतेश्लोकेरित्यादिशाकल्यब्राम्हणचरमखंडस्यभाष्यव्याख्या
नावसरेआनंदगिरीयाचार्यैः ब्रम्हविदांश्रेष्ठत्वेयाज्ञवल्क्यस्यसिद्धेफलितमाहेतिजगतइति॥ अतइति
इत्यादिना ॥व्याख्यानवाक्यजातेनापिव्याख्याकर्तुरानंदगिरीयाचार्यस्यापियाज्ञवल्क्यमाहात्म्यप्रकटनेन
याज्ञवल्क्यस्यसर्वोत्कृष्टत्वज्ञापनेमुख्यंतात्पर्यमितिस्फुटतयाप्रतिभाति॥ अपिचपूर्वोक्तवाक्यैःयाज्ञवल्क्य
स्यब्रम्हविच्छ्रेष्ठत्वसिद्धिरानंदगिरीयाचार्यैः कंठरवेणप्रतिपादितादृश्यते॥ किंबहुना॥ एतच्छ्रुतिभाष्यव्याख्या
नादिभिःयाज्ञवल्क्यस्यब्रम्हविद्वरिष्ठत्वेनपरमात्मबोधकपरत्वंअबाधितंभवति॥ षष्ठाध्याये ॥एवमेव
बृहदारण्यषष्ठाध्याये॥ जनकोहवैदेहआसांचक्रेथयाज्ञवल्क्यआवव्राजत९ होवाचयाज्ञवल्क्यकिमर्थ
मचारीःपशूनिच्छन्नण्वंतानीतिउभयमेवसम्राडिति होवाच॥ १॥ इत्यादिनाजनकंप्रतिआत्मतत्वबोधनंकृ
त्वासन्न्यासग्रहणंकर्तव्यमितिमनीषयायाज्ञवल्क्यःस्वयमेवागत्यजनकंपृष्टवान्॥ यत्तेकश्चिदब्रवीदित्या

दिनाषड्भिराचार्यैः उपदिष्टोपासनाभेदान् दृष्ट्वा तत्तदुपासनानां॥ एकैकपादोपदिष्टानां॥ यावत्फलाधायकत्वं
नसंभवतीतिज्ञापनाद्द्वारा पादत्रयप्रश्नाकांक्षोत्पादनमुखेन जनकप्रश्नानंतरमेव पंचमाध्यायोक्तसगुणनि
र्गुणब्रह्मसाक्षात्कारसंपादनार्थं शैलिन्युपदिष्टवाग्ब्रह्मोपासनं॥ उदंकः शौल्बायनोपदिष्टप्राणब्रह्मोपास
नं॥ बर्कुर्वार्ष्णोपदिष्टचक्षुर्ब्रह्मोपासनं गर्दभीविपीतभारद्वाजोपदिष्टश्रोत्रब्रह्मोपासनं॥ सत्यकामजाबालो
पदिष्टमनोब्रह्मोपासनं॥ विदग्धः शाकल्योपदिष्टहृदयब्रह्मोपासनं च॥ सायतनसप्रतिष्ठसांगपादत्रयपू
रणोपदेशाद्द्वारा जनकस्य निर्विशेषब्रह्मसाक्षात्कारसंपादनयोग्यतामापाद्य निर्विशेषब्रह्मप्रतिपत्तिप्राप्तीच्छा
जननार्थं॥७॥ जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच नमस्तेऽस्तु याज्ञवल्क्यानु मा शाधीति स होवाच यथा वै सम्रा
ण्महांतमध्वानमेष्यन् रथं वा नावं वा समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्मास्येवं वृंदारक आढ्यः
सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यसीति नाहं तद्भगवन्वेद यत्र गमिष्यामीत्यथ वै तेऽहं त

द्रक्ष्यामियत्रगमिष्यसीतिब्रवीतुभगवानिति॥ इत्यादिश्रुत्युक्तक्रमेणग्रंथप्रतिपादनरीत्याइतोविमुच्यमा
नःक्कगमिष्यसीतिप्रश्नकरणेननाहंतद्भगवन्वेदयत्रगमिष्यामीतिजनकस्यआत्मज्ञानविषयकज्ञानमुत्पाद्य
ज्ञानप्राप्त्याकांक्षामुद्भाव्यजाग्रत्स्वप्नसुषुप्तितुरीयावस्थाभिमानिविश्वतैजसप्राज्ञप्रत्यगात्मस्वरूपकथनत
द्विलापनादिरूपेणऐक्यप्रतिपत्तिसंपादनमार्गेणज्योतिर्ब्राम्हणोक्तरीत्यापरंज्योतिष्ट्वात्मकप्रत्यगात्मत्वक[illegible]ण
ब्रम्हणोनिर्धारणायआदौविश्वादिस्वरूपकथनार्थंइदंब्राम्हणमारभ्यते॥१॥इंधोहवैनामेति॥इंधोहवैनामै
षयोऽयंदक्षिणेऽक्षन्पुरुषस्तंवाएतमिंधꣳसंतमिंद्र इत्याचक्षते॥परोक्षेणैवपरोक्षप्रियाइवहिदेवाः॥प्रत्यक्षद्वि
षः॥२॥अथैतद्वामेऽक्षिणिपुरुषरूपमेषास्यपत्नीविराट्तयोरेषसꣳस्तावोयएषोंतर्हृदयआकाशोऽथैनयो
रेतदन्नंयएषोंतर्हृदयेलोहितपिंडोअथैनयोरेतत्प्रावरणंयदेतदंतर्हृदयेजालकमिवाथैनयोरेषासृतिःसंच
रणीयैषाहृदयादूर्ध्वानाड्युच्चरतियथाकेशःसहस्रधाभिन्नएवमस्यैताहितानामनाड्योंतर्हृदयेप्रतिष्ठि

ताभवंस्येताभिर्वा। एतदास्नवदास्नवतितस्मादेषप्रविविक्ताहारतरइवेवभवत्यस्माच्छारीरादात्मनः॥३॥ एतयोः
खंडयोःविश्वस्यजाग्रदभिमानिनःजीवस्यतैजसेस्वप्नाभिमानिनिजीवेविलापनंकृत्वा। उत्तरखंडेतस्यापिजीवस्य
सुषुप्त्यभिमानिनिप्राज्ञेजीवेविलापनंकृत्वा॥ तस्मिन्नेवखंडेतस्यापिप्राज्ञस्यजीवस्यसएषनेतिनेतीतिनिरुपा
धिकेसाक्षिणिप्रत्यगात्मनिस्वप्रकाशेविलापनेनप्रत्यगात्माभिन्नस्वस्वरूपेअवस्थानात्मकअभयब्रम्हरूपमु-
क्तिं॥ अभयंवैजनकप्राप्तोसीतिज्ञापइत्वाब्रम्हणःस्वप्रकाशत्वंतदुत्तरब्राम्हणेप्रतिपादयितुंतद्ब्रम्हज्ञानसाध
नत्वेनइंधशब्दवाच्यविश्वादीनां। उपासनार्थंचइंधस्यविश्वस्यवैश्वानरस्यपुरुषत्वेनतैजसस्यतत्पत्नीत्वेन-
रूपकंकल्पइत्वा॥ तयोःलौकिकन्यायेनदंपत्योःयथाअंन्नप्रावरणसंचारस्थानादि ..रपेक्षितःतथैवअत्रोपा
सनाद्यर्थंपुरुषशब्देनभोक्तालक्ष्यतेपत्निशब्देनभोग्यंलक्ष्यतेविराट्शब्देनअंन्नमुच्यते॥ अंन्नंविराडितिश्रुतेः
अद्यतेऽत्तिचभूतानितस्मादन्नंतदुच्यतइतिश्रुतेश्चअंन्नंभोग्यंइतितात्पर्येणपत्नीविराडितिश्रुत्योक्तं॥

तयोरेव सह्रस्तावोयएषोंत र्हृदयआकाशइति॥ आवासस्थानं॥ एतयोःअन्नं॥अंतर्हृदयेलोहितपिं
डःअनयोःप्रावरणं॥अंतर्हृदयेजालकमिव॥अनयोःसंचारस्थानं॥हृदयादूर्ध्वानाड्यः इत्यादिनाज्ञानसौ
लभ्यार्थंज्ञानप्रतिबंधरूपपापनाशकउपासनाजन्यापूर्वसंपादनार्थंच॥श्रुतिः॥मुमुक्षुरनुजिघृक्षयाप्रतिपा
दितवती॥ ॥ननुविश्वतैजसयोःपुरुषपत्नीस्वरूपककल्पनमसंगतं॥अनयोरितिद्विवचनात्॥पतिप-
त्न्योःएककालावच्छेदेनस्थितेःप्रतीयमानत्वात्एककालस्थित्यवश्यंभावाच्च॥विश्वतैजसयोःजीवस्वरूप
त्वेनएकत्वात्॥अवस्थाभेदेनभिन्नत्वेपिएकस्मिन्कालेअवस्थाद्वयविशिष्टत्वेनस्थित्यसंभवात्॥यथा॥
बाल्यावस्थायांयौवनावस्थानसिध्यतित्तयोःअवस्थाविशिष्टयोःएकत्वात्॥एककालावच्छेदेनविरु
द्धावस्थाद्वयविशिष्टत्वंएकस्यनसंभवति॥तद्वत्विश्वतैजसयोःजाग्रदवस्थास्वप्नावस्थाविशिष्टयोः
एकत्वेनएककालावच्छेदेनपुरुषपत्नीभावेनस्थितेरत्यंतासंभवः॥प्रतीयते॥कथमुच्यते॥तयोःपतिप

त्नीभावइति॥कथंचित्‌उपासनार्थत्वेनसंभवेपिविश्वादीनांप्रत्यगात्मांतानांउत्तरोत्तरविलापनेनात्मज्ञानंक
थंसंभवति॥अवांतरवाक्यैःविरुध्यार्थज्ञानेसतिमहातात्पर्यार्थज्ञानंवाकथंसंभवति॥इतिचेद्बाढं॥ त
थापि॥पतिपत्नीभावप्रतिपादनंऐक्यज्ञानविवक्षयैवप्रवृत्तमितिज्ञातव्यं॥तथाहि॥लोकेपतिपत्न्योःआलिं
गदशायांपरस्परैक्यज्ञानेनैवसुखाविर्भावः॥अतएवतयोर्गाढालिंगनंसंपाद्यते॥तद्दशायां॥बाह्यविषय
ज्ञानाभावेन॥परस्परशरीरभेदज्ञानाभावेनच अत्यंतैक्यप्राप्तिज्ञानेन॥निरतिशयसुखप्राप्तिवत्॥परमानं
दप्राप्तिरूपफलंप्रत्येकंमन्यते॥तादृशऐक्यज्ञानसुखेनमिथुनप्रयोज्यमैथुनेनैवपुत्रादिर्जायते॥पुत्रादेस्तु॥तदै
क्यजन्यत्वाच्च॥ऐक्यंनामएकत्वं॥तयोश्चदंपत्योः॥पुत्रधनगृहारामक्षेत्रमानावमानसुखदुखादीन्प्रतिएकत्वेनैव
अनुभवितृत्वेनसर्वैःअनुभूयमानत्वात्॥तत्रापिलक्षणया॥एकत्वमेवतात्पर्यविषयोभवति॥एवमेव॥अत्रा
पिविश्वतैजसयोः॥अवस्थाभेदेनभिंनत्वेपिअवस्थारूपविशेषणं॥अग्रहीत्वैवउभयविशेषणरूपउपलक्षण॥

विधया उपलक्षितस्यै कस्यैकजीवात्मनः विवक्षितत्वेन तदैक्यज्ञानप्राप्त्याक्रमेण प्रत्यगात्मस्वरूपज्ञानार्थं मंद
बुद्धिबोधनक्रममनुसृत्य अन्तवासनानुरूपेण पतिपत्न्यादिरूपककल्पनाद्वारा श्रुतिः॥ मुमुक्षुं बोधयति॥ ननु
वाच्यार्थभूतपत्न्यादिस्वरूपज्ञानविवक्षया बोधयति॥ तद्बोधने प्रयोजनाभावात्॥ तद्बोधस्य लोकसिद्धत्वा
च्च॥ अस्मिन्नर्थे एवं श्रुत्यंतरवाक्यानि भवंति दृष्टांताश्च भवंति तथा च श्रुत्यादयः॥ गाढमालिंगमच्चित्तयो
षा जारमिव प्रियं॥ इति जैमिनिवचनघटितवेदवाक्ये प्रियमिति॥ जारमिति च॥ विशेषणात् स्त्रियाः भर्त्र
पेक्षया जारपुरुषे अत्यंतप्रीतिः॥ तत्रापि धनग्रहणादिना संपादितजारापेक्षया केवलभोगार्थं स्वप्रवृत्त्यैव
संपादितजारपुरुषे अतिप्रीतिसद्भावात् प्रीत्यतिशयेन आलिंगनातिशयः॥ गाढशब्देन सूचितत्वात्॥
तेनापि अत्यंतैक्यज्ञानातिशयः विवक्षितो भवति॥ तथैव अस्मिन्नेव बृहदारण्ये सुषुप्त्यवस्थायां॥ वि
श्वतैजसप्राज्ञानां॥ विलापनक्रमेण साक्षिणः॥ प्रसंगात्मनि ऐक्यं प्रतिपाद्यते॥ यथा प्रियया स्त्रिया संपरि

ष्वक्तो न बाह्यं॥ किंचन वेद नांतरं एवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति॥
बिंबप्रतिबिंबभावेन तयोः भेदप्रतीतावपि॥ बिंबे प्रतिबिंबस्य लयात् ऐक्यं प्राप्यते॥ एवं समानप्रकरणस्थ सु
षुप्तिप्रतिपादकछांदोग्यषष्ठाध्यायेपि॥ सता सोम्य तदा संपन्नो भवति॥ स्वमपीतो भवति॥ तस्मादेनं स्व
पितीत्याचक्षते॥ स्वं ह्यपीतो भवति॥ इति स्वस्मिन्नेव स्वस्वरूपे साक्षिणि प्रत्यगात्मनि बिंबभूते स्वस्य विश्वादि
रूपजीवभूत भूतप्रतिबिंबस्य लयात् ऐक्यमेव स्पष्टतया कंठोक्त्या श्रुत्या प्रतिपाद्यते॥ तैत्तरियोपनिषदि
आनंदाध्येवरवल्लिमानिभूतानि जायंत इत्यत्र ग्राम्यधर्मरूपसाधनेन आविर्भूतो यो आनंदः तस्मात्प्रजाः जा
यंत इति॥ ग्राम्यधर्मोपलक्षित आलिंगनादिप्रयुक्त ऐक्यज्ञानमेव विवक्ष्यते॥ एतावता यत्र यत्र प्रीत्य
तिशयः॥ तत्र तत्र तत्प्रयोजकत्वेन ऐक्यज्ञानातिशयः इति व्याप्तेः अनुगतत्वात्॥ तत्र तत्र मुख्यया वृत्या
गौण्या वृत्त्या वा ऐक्यलक्षक तत्तदुचितशब्दप्रयोगो दृश्यते॥ तद्यथा॥ पत्न्याः भर्तुश्च परस्परं असंत

भ॰ ज्ञा॰
६१

प्रीतिप्रयोजकऐक्यज्ञानस्य सत्त्वात्॥ ऐक्यविवक्षया भर्तृपत्निशब्दप्रयोगो दृश्यते॥ श्रुतावपि॥ अर्थो
वा एष आत्मनः यत्पत्नी इति॥ एवं पुत्रेपि प्रीतिप्रयोजकऐक्यज्ञानसंभवात् आत्मा वै पुत्रनामासीति॥ श्रुता
वपि प्रयोगो दृश्यते एवमेव प्रीतिप्रयोजकऐक्यज्ञानबलादेव ममात्मा भद्रसेन इति॥ लौकिकवाक्ये प्रियेभृ
त्ये॥ मम प्राणा हि पांडवा इति च॥ अत्यंतप्रीतिप्रयोजकऐक्यज्ञानादेव स्वभक्तेषु प्राणशब्दप्रयोगः स्मृता
वपि दृश्यते॥ अत एव भगवद्गीतायां॥ प्रियो हि ज्ञानिनोत्यर्थं अहं स च मम प्रियः॥ उदाराः सर्व एवैते ज्ञानी त्वा
त्मैव मे मतमिति॥ एवं स्थिते ऐक्यशब्दितैकत्वं उक्तपदार्थेषु प्रीतितारतम्येन मुख्यगौणशब्दविषयेषु विचा
र्यमाणेषु सिद्धमेव भवति॥ तथा हि॥ भर्तृपत्न्योः एकधनाश्रयत्वेन एकत्वं एकपुत्रजनकत्वेनैकत्वं॥ एकगृ
हारामारामाक्षेत्रादिस्वत्वाश्रयत्वेनैकत्वं॥ एकमानावमानलाभालाभसुखदुःखाद्याश्रयत्वेनैकत्वं॥
लोकसिद्धमेव प्रतीयते॥ अत एव पत्नीदुःखमेव मम दुःखं पत्नीसुखमेव॥ मम सुखं भर्तृसुखमेव मम सुखं

नि॰

भर्तृधनमेव मम धनं॥ पत्नीधनमेव मम धनं॥ भर्तृपुत्र एव मम पुत्रः॥ पत्नीपुत्र एव मम पुत्रः॥ इत्यादिषु बहुषु अ-
र्थेषु ऐक्यप्रयोगो दृश्यते॥ एवमेव पुत्रादिष्वपि॥ यथासंभवं धनक्षेत्रादिषु अर्थेषु ऐक्यज्ञानप्रयोज्यशब्दप्र-
योगो दृश्यते॥ एवं भृत्येपि॥ स्वामिस्वत्वमेव मम स्वत्वं॥ मम स्वत्वमेव स्वामिस्वत्वं॥ इति आदाय व्ययरक्षणा-
दिषु॥ अर्थविषयकस्वत्वाभिमानप्रयुक्तऐक्यज्ञानबलादेव ममात्मा भद्रसेन इति ऐक्यप्रयोगः संभवति॥ एवं
कृष्णस्य पांडवादिषु जयपराजयादि लाभालाभप्रयुक्तैक्यज्ञानबलादेव ऐक्यप्रयोगो भवत्येव॥ एवं सुहृत्त्व॥
सजातीयादिषु स्वकीयपदार्थेषु च॥ प्रीतिप्रयोजकैक्यज्ञानसामर्थ्यादेव ऐक्यशब्दः प्रयुज्यते॥ एवं च ॥ अथैत
द्वामेक्षणि पुरुषरूपमेषास्य पत्नी विराट्॥ इत्यत्रापि पत्नीशब्देन ऐक्यज्ञानप्रयोजकत्वं॥ पत्न्याः लक्ष्यते॥ य-
थावा॥ लोके पुरुषः पत्न्यां स्वरेतोत्पन्नगर्भरूपेण तद्योनिद्वारेण प्रविश्य तया सह एकभावं प्राप्नोति॥ अत एव
पुरुषोपि स्वांशरूपेण प्रविश्य स्त्रियां विद्यमानः सन् तया सह असंतैक्यप्राप्त इव तद्दुःखसुखहर्षविषादादि

सर्वप्राप्त्यात्तदेकभावं गच्छति॥ अयमेवार्थः॥ ऐतरेयोपनिषदि॥ तच्छ्रिया आत्मभावं गच्छति यथा स्वमंगं त-
थातस्मादेनां न हिनस्ति सास्यैतमात्मानमत्रगतं भावयति सा भावयित्री भावयितव्या भवतीति स्पष्टमेव दृश्य-
ते॥ तया सह पुरुषः यथा एकभावं गच्छति। तथा विश्वोपि तैजसेन संहारकत्वं गच्छतीति॥ एकत्वविवक्ष-
या गौण्या वृत्त्या पतित्वपत्नीत्वव्यपदेशः॥ तथा च पत्नीशब्दप्रयोगे सत्यपि विवक्षानुसारेण पुरुषशब्दल-
क्षितवैश्वानरात्मकविश्वस्य हिरण्यगर्भात्मकपत्नीशब्दलक्षिततैजसे ऐक्यबुध्यात्मकविलापनमेव पत्न्या-
दिवाक्यजातस्य लक्ष्यार्थ इति निश्चेतव्यः॥ उत्तरखंडेपि ॥ एतस्य तैजसस्य तस्य प्राची दिक् प्रांचः प्राणा
इत्यादिपदसमुदायलक्षितमहाप्राणोत्पत्तिप्रयोजक अव्याकृताकाशशब्दित अंतर्याम्यात्मक ईश्वराभिन्न
प्राज्ञे ऐक्यबुध्यात्मकविलापनद्वारा तस्यापि प्राज्ञस्य स एष नेति नेतीति॥ निष्प्रपंचात्मनि विलापनस्य वक्ष्यमा-
णत्वात्॥ न च॥ तयोरेष सꣳस्तावो य एषोंतर्हृदय आकाशः॥ अथैनयोरेतदन्नं य एषोंतर्हृदये लोहितपिं-

डोर्थैन योरेतस्यावरणं इत्याद्यायाः दंपतिव्यवहारयोग्यसामग्र्याः प्रतिपादने सति ऐक्यज्ञानसंपादकविला
पादिविषयं प्रतिकिं गायातं। इति वाच्यं॥ तत्सामग्र्याः पूर्वोक्तोपासनाविषये संपादितुमुचितत्वात्॥ यथा तै-
त्तिरीयोपनिषदि॥ सवा एष पुरुषोन्नरसमयः तस्येदमेव शिरः अयं दक्षिणः पक्षः अयमुत्तरः पक्षः अयमात्मा
इदं पुच्छं प्रतिष्ठा इत्युपक्रम्य प्राणमयमनोमयविज्ञानमयआनंदमयादिषु एतज्जातीयत्वेन पंचावयवकल्प
नामुखेन ब्रम्ह पुच्छं प्रतिष्ठेति आनंदमयावयवत्वेन प्रधानस्यापि ब्रम्हणः उपासनासामग्र्यंतर्भूतत्वेन प्रतिपा
दनमुचितमभूत्॥ तथात्रापि विश्वतैजसयोरुपासनार्थत्वेन अन्नप्रावरणादिकल्पनोचितैवभवतीति अनु
संधेयं॥ प्रत्यगात्मज्ञानसंपादनविषये तु॥ यथा॥ तैत्तिरीये॥ स्थूलारुंधतीन्यायेन॥ पंचकोशांतर्वर्त्ति पंच-
कोशादिसर्वाधिष्ठानभूतप्रधानब्रम्हज्ञानार्थं अन्नमयकोशोक्त अवयवकल्पनासजातीयत्वेन अन्यकोशेष्व
पि कल्पनामुखेन आनंदमयकोशावयवरूपेण ब्रम्ह पुच्छं प्रतिष्ठेति सर्वाधारत्वं विवक्षितं॥ तथैवात्रापि॥

भर्तृपत्नीरूपेणविश्वतैजसयोः उपक्रांतत्वात्॥ उपक्रममनुसृत्यमंदबुद्धिप्ररोचनद्वारालोकवासनावासित
पुरुषान्प्रतितदनुरोधेनैवदंपतिसंबंधलौकिकव्यवहाररीत्यासंस्थावान्नप्रावरणादिकल्पनायामपितेषा
मविवक्षितत्वेनविश्वतैजसादिप्रविलापनक्रमस्यैवअत्रविवक्षितत्वात्॥ सर्वप्रविलापनाद्यधिष्ठानप्रत्यगात्म
ज्ञानस्यैवतात्पर्यविषयत्वात्॥ नकश्चनदोषःसंभवति॥ भाष्येतावत्॥ विश्वादिक्रमेणसूक्ष्मसूक्ष्मतारत
म्येनप्रविलापनमेवश्रुतेस्तात्पर्यमित्यत्रगमकंसूच्यते॥ अतःप्रविविक्ताहारःपिंडःतस्मात्प्रविविक्ताहारादपि
प्रविविक्ताहारतरएवलिंगात्मा॥ इव॥ एवभवति॥ अस्माच्छरीरात्॥ शरीरमेवशारीरंतस्माच्छारीरादात्मनः॥
वैश्वानरात्तैजसःसूक्ष्मान्नोपचितोभवतीति॥ एतद्भाष्यवाक्येन॥ तस्माच्छारीरादात्मनः॥ वैश्वानरात्॥ विश्वादि
त्यर्थः॥ सूक्ष्मान्नोपचितोभवति॥ सूक्ष्मतरोभवतीतियावत्॥ अतएवजाग्रतिविश्वोपाधेःअंतःकरणस्यापूर्ण
विकासःस्वप्नेतैजसोपाधेरंतःकरणस्यअर्धविकासःसुषुप्तेप्राज्ञोपाधेरंतःकरणस्यावासनात्मनास्थितिः

इतिशास्त्रसिद्धांतानुरोधेनैव। विश्वापेक्षयातैजसस्यसूक्ष्मत्वंतदपेक्षयाप्राज्ञस्यसूक्ष्मत्वंतदपेक्षयाप्रत्यगात्मनः नेतिनेतीतिनि
षेधावधित्वेनस्वस्वरूपत्वप्राप्तिः॥ इत्यर्थःज्ञापितोभवति॥ अन्यथाएतच्छ्रुतिवाक्यानांपूर्वाध्यायोक्तवाक्या
नां एतदध्यायेपिवक्ष्यमाणवाक्यानांश्रुत्यंतरोक्तवाक्यानांवेदांतसिद्धांतानांचात्यंतविरोधप्राप्त्या एतत्खंडि
कात्मकवाक्यस्यसर्वसमन्वितसम्यग्बोधाजनकत्वेनअप्रामाण्यप्रसंगस्यदुर्वारत्वात् प्रस्तुतविश्वतैजस
योःभर्तृपत्नीत्वेनरूपकत्ववर्णनेपि॥ द्वासुपर्णासयुजासखायेति॥ जीवपरमात्मनोः पक्षिरूपकत्वकल्प
नवत्॥ अजामेकांलोहितशुक्लकृष्णांबह्वीप्रजाःसृज्यमानाःसरूपाःअजोह्येकोजुषमाणोनुशेते॥ जहा
त्येनांभुक्तभोगामजोन्यः॥ इतिमायायाःजीवब्रह्मणोश्चअजादिरूपकत्ववत्॥ हिरण्मयःशकुनिर्ब्र
ह्मनामा इतिब्रह्मणः पक्षिरूपकत्वकल्पनावच्चनकाप्यनुपपत्तिर्लभ्यते॥ तस्यापितैजसस्य उत्तरखंडप्रति
पाद्यप्राणशब्दोपलक्षितअज्ञातप्रत्यगात्मस्वरूपभूतअंतर्यामिअव्याकृतादिशब्दवाच्यईश्वराभिंनप्राज्ञे॥

सुषुप्त्यभिमानिनि ऐक्यज्ञानात्मकविलापनं कृत्वा तस्य सर्वात्मत्वमापाद्य॥ एतद्विदुषः सर्वात्मनः॥ तदभिन्नस्या
पि एतच्चतुर्थखंडोक्तस्य तस्य प्राचीदिक् प्रांचः प्राणा दक्षिणा दिग्दक्षिणे प्राणा इत्युपक्रम्य सर्वा दिशः सर्वे प्रा-
णा इत्यादिवाक्येन सर्वात्मत्वं ईश्वराभिन्नत्वं च प्रदर्श्य॥ तस्यापि प्राज्ञाभिन्नस्य मुमुक्षोः विदुषः स एष नेति नेती
त्यादिना नरिष्यतीत्यंतेनोपदेशेन प्रत्यगात्मनि साक्षिणि स्वप्रकाशे अभयब्रह्माभिन्ने ऐक्यज्ञानरूपविलापनं कृ-
त्वा॥ तदभयब्रह्मरूपेण स्वेनात्मना अवस्थानं अभयं वै जनक प्राप्तोसीति अभयत्वं तस्य स्थापइत्वा तस्य पर
मात्मनः प्रत्यगात्मरूपेण अवस्थितस्य॥ किं स्वरूपमित्याकांक्षायां तस्य सर्वलोकशास्त्राद्यनुभूतसर्वव्यवहा
रप्रयोजक यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरः इत्याद्युपदिष्टस्वप्रकाशत्वं साधइतुं॥ ४॥ एतदुत्तर-
ज्योतिर्ब्राह्मणमारभ्यते॥ ज्योतिर्ब्राह्मणे तु प्रथमखंडे॥ जनकꣳह वैदेहं याज्ञवल्क्यो जगाम स मेनेन व
दिष्य इत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्चाग्निहोत्रे समूदाते तस्मै ह याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव

वत्रेतऽहास्मिंददौ तऽह सम्राळेव पूर्वं पप्रच्छ ॥इत्यादिना अतीतकाले अग्निहोत्रसमुदाते याज्ञवल्क्यजनक
संवादे॥ याज्ञवल्क्येन जनकाय दत्तवरप्रभावेन याज्ञवल्क्यः स्वयमेवागत्य जनकाय॥ आत्मनः स्वयंप्रकाशत्वं नि
र्धारयितुं प्रवर्त्तते॥१॥ तद्द्वितीयखंडे॥ याज्ञवल्क्य किं ज्योतिरेवायं पुरुष इत्युपक्रम्य॥ आत्मैवास्य ज्योतिर्भ
वतीत्यंतस्य वाक्यजातस्य भाष्ये॥ सर्वव्यवहारनिर्वाहकत्वेन ज्योतिषः अनुमानेन सिद्धत्वेपि कार्यकरणसं
घातादिव्यतिरिक्तत्वं वा॥ अव्यतिरिक्तत्वं वा॥ इति संदेह पूर्वपक्षं अवकारयति॥ नन्वेवमनुमानकौशल्ये
जनकस्य किं प्रश्नेन॥ स्वयमेव कस्मान्न प्रतिपद्यत इति॥ सत्यमेवमेतत्॥ तथापि लिंगलिंगिसंबंधविशेषा
णामत्यंतसौक्ष्म्यात् दुरवबोध्यतां मन्यते॥ बहूनामपि पंडितानां किमुतैकस्य अत एव हि धर्मसूक्ष्मनिर्णये परि
षव्द्यापार इष्यते॥ पुरुषविशेषश्चापेक्ष्यते॥ दशावरपरिषत्त्रयो वैको वेति॥ तस्माद्यद्यप्यनुमानकौशल्यं॥ रा
ज्ञः तथाप्यत्र युक्तो याज्ञवल्क्यं प्रष्टुं विज्ञानकौशल्यतारतम्योपपत्तेः पुरुषाणां॥ इत्याद्युक्तप्रकारेण ब्रम्हतत्व-

निर्णयेबुध्दिकोशल्यवेदशास्त्रधर्मब्रम्हतत्वादिविज्ञानवत्पुरुषापेक्षाभवत्येव॥ तथाचकेवलधर्मनिर्णयेपि परिषदपेक्षामन्वादिस्मृतिषुप्रतिपाद्यते॥ तथाहि ॥मनुः॥धर्मेणाधिगतोयेस्तुवेदःसपरिबृम्हणः॥तेशि ष्टाब्राम्हणाज्ञेयाःश्रुतिप्रत्यक्षहेतवः॥दशावरावापरिषद्यंधर्मंपरिचक्षते॥त्र्यवरावापिवृत्तस्थातंधर्मंनविचा लयेत्॥त्रैविद्योहेतुकस्तर्कीनैरुक्तोधर्मपाठकः॥त्रयश्चाश्रमिणःपूर्वेपरिषदेषादशावरा॥ ऋग्वेदविद्य जुर्विच्चसामवेदविदेवच॥त्र्यवरापरिषत्ज्ञेयाधर्मसंशयनिर्णयइति॥ पराशरस्मृतौ ॥तव्द्याख्यानरूप माधवीयेच॥ चत्वारोवात्रयोवापिवेदवंतोग्निहोत्रिणः॥ब्राम्हणानांसमर्थायेपरिषत्साभिधीयते॥ १॥ अनाहिताग्नयोयेचवेदवेदांगपारगाः॥पंचत्रयोवाधर्मज्ञाःपरिषत्साप्रकीर्तिता॥ २ मुनीनामात्मविद्या नांद्विजानांयज्ञयाजिनां॥वेदव्रतेषुस्नातानामेकोपिपरिषद्भवेत्॥ ३॥ पंचपूर्वेमयाप्रोक्तास्तेषांचासंभवेत्र यः॥स्ववृत्तिपरितुष्टायेपरिषत्साप्रकीर्तिता॥३॥ एषांमाधवीयव्याख्यानं॥ अथ॰मुख्यानुकल्पभेदेनप

रिषद्भेदानाह॥ चत्वार इत्यादिना॥ग्राममध्येवर्तमानानांवेदविद्यादिगुणयुक्तानां ब्राम्हणानांमध्ये येऽत्यंतस
मर्थाः तेचत्वारोमुख्यापरिषत्॥ तदसंभवेत्रयोवापरिषत्त्वेन मन्तव्याः॥ एतत्सक्षद्वयमाहिताग्निष्वभिहितं॥तद
संभवेनाहिताग्नयः तत्रापिपंचेतिमुख्यःकल्पः त्रय इत्यनुकल्पः तत्रापिपक्षद्वयस्यासंभवे सत्येक एव परिषद्भ
वेत्॥ तदेकं विशिष्टंसुतीनामित्याद्युक्तं आत्मनिब्रम्हणि विद्यानुभवो एषांते आत्मविद्याः तथाविधाः क्रतुकृत्याः
संतोपि लोकानुग्रहाय यज्ञैरिष्टवंतो यज्ञयाजिनः वेदानामृगादीनांचतुर्णामध्ययनानुष्ठितानितत्तद्वेदोक्तानिव्र
तानितत्तद्व्रतसहितेषु वेदेषु समाप्तेषु यथाविधिस्नाताः॥ शिरोव्रतेस्नातानामितिवापाठः॥आथर्वणिकानां वे
दव्रतेषुमुख्यं शिरोव्रतं॥तथाचाथर्वणिकाआमनंति॥ क्रियावंतःश्रोत्रियाब्रम्हनिष्ठाः स्वयं जुह्वत एकर्षिंश्रद्धयं
तस्तेषामेवैतां ब्रम्हविद्यांवदेत ॥शिरोव्रतंविधिवद्यैस्तुजीर्णमिति॥तस्मिन् शिरोव्रते सत्यनंतरमध्ययनंपरि
समाप्ययथाविधिस्नातास्तेषामेतेषां यथोक्तगुणसंपन्नानां मध्येयः कोप्येकः परिषद्भवेत्॥ तत्रसाग्निकानाम

नग्निकानां द्वौ द्वौ पक्षौ आत्मविदेकः पक्ष इति पंचपक्षा मयाप्रोक्तास्तेषां सर्वेषामसंभवे ये केचन विद्यमानाः श्रेष्ठा
स्त्रयः ते यद्यायुधजीवनाद्यधर्मवृत्तिमनु पजीव्य यथासंभववृत्तिमात्रेण परितुष्टास्तेषामपि परिषत्त्वमविरुद्धं
अंगिरसापि परिषद्विकल्पो दर्शितः॥ चत्वारो वात्रयो वापि वेदवंतोग्निहोत्रिणः॥ येसम्यङ्गि यता विप्राः का
र्याकार्यविनिश्चिताः॥१॥ प्रायश्चित्तप्रणेतारः सप्तते पि प्रकीर्तिताः॥ एकविंशतिभिश्चान्यैः परिषत्त्वं समाग
तैः॥२॥ सावित्रीमात्रसारैस्तु जीर्णवेदव्रतैर्द्विजैः॥ यतीनामात्मविद्यानां ध्यायिनामात्मयाजिनां॥ शिरो
व्रतैश्च स्नातानामेकोपि परिषद्भवेत्॥ एषां लाघवकार्येषु मध्यमेषु तु मध्यमाः॥ महापातकचिंतासु शत
शो भूयये वचेति॥ बृहस्पतिरपि ॥लोकवेदांगधर्मज्ञाः सप्त पंच त्रयोपि वा॥ यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी
सभेति॥ इति ॥याज्ञवल्क्यस्मृतावपि॥ चत्वारो वेदधर्मज्ञाः परिषत्त्रैविद्यमेव वा॥ सा ब्रूते यं स धर्मः स्यादेको
वाध्यात्मवित्तमः॥ इति ॥अस्य विज्ञानेश्वरीयव्याख्यानं॥ कारकहेतुषु ज्ञापकहेतुषु वा संदेहहेतुर्निर्णयहे

तुमाह ॥ चत्वारइति ॥ चत्वारोब्राम्हणाः वेदधर्मशास्त्रज्ञाः परिषत् ॥ तिस्रोविद्याअधीयंतइति ॥ त्रैविद्यास्तेषांस
मूहस्त्रैविद्यं ॥ धर्मशास्त्रज्ञत्वमत्राप्यनुवर्तते ॥ तद्वापरिषत् ॥ सापूर्वोक्तापरिषत् ॥ यद्ब्रूतेसधर्मः ॥ अध्यात्मज्ञा
निषुनिपुणतमः वेदधर्मशास्त्रज्ञश्चयः ॥ सएकोपिवायंब्रूतेसधर्मएव ॥ इत्यादिधर्मशास्त्रेषुप्रतिपादितत्वात् ॥
किंमुंतअंतीद्रियमनआद्यगोचरब्रम्हविषयकज्ञानरूपपरमधर्मनिर्णयेपरिषदपेक्षावर्ततइति ॥ एतदात्म
ज्ञानस्यापिधर्मत्वेनपरमधर्मत्वेनचमनुयाज्ञवल्क्यादिभिःस्मर्यतएवतथाच ॥ मनुः ॥ धृतिःक्षमादमोस्तेयंशौच
मिंद्रियनिग्रहः ॥ धीर्विद्यासत्यमक्रोधोदशकंधर्मलक्षणं ॥ तस्यमेधातिथीयादिकुल्लूकभट्टीयांतव्याख्यानं ॥
दशविधधर्माभिधानेविद्याशब्दवाच्यमात्मज्ञानंधर्मत्वेनोक्तं ॥ अयमेवश्लोकः ॥ याज्ञवल्क्यस्मृतावप्युक्तः ॥
भारतेपि ॥ आत्मज्ञानंतितिक्षाचधर्मःसाधारणोनृप ॥ इति ॥ आत्मज्ञानस्यापिधर्मत्वेनाभिधानात् ॥ याज्ञ
वल्क्येनतु ॥ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां ॥ अयंतुपरमोधर्मोयद्योगेनात्मदर्शनं ॥ इत्युक्तं ॥

अतः आत्मज्ञानस्य धर्मत्वेन परमधर्मत्वेन च प्रतिपादनात्॥ एतद्धर्मविषये जनकस्य बुद्धिकौशल्यसत्वेपि प
रिषदपेक्षायाः प्रसिद्धत्वात्॥ पूर्वोक्तस्मृत्युक्तन्यायेन॥ एको वाध्यात्मवित्तमः॥ इत्युक्तरीत्या ॥मुनीनामात्म
विद्यानां द्विजानां यज्ञयाजिनां॥ वेदव्रतेषु स्नातानामेकोपि परिषद्भवेत्॥ इत्यादि पराशरस्मृतिमूलकवचनरीत्या
च याज्ञवल्क्ये मुनित्वं आत्मज्ञानवत्वं द्विजोत्तमत्वं सर्वयज्ञयाजित्वं चतुर्वेदाध्ययनपूर्वकतत्तद्वेदव्रतानुष्ठातृत्वं
बृहदारण्यबाम्हणोक्तरीत्या अथ ब्राम्हणो भवतीति ब्रम्हवेदनानंतरकालीनमुख्यब्राम्हणत्वं॥ अध्यात्मज्ञास्त्र
वित्वं चेति॥ सर्वधर्माणां विद्यमानत्वात्॥ मुख्यपरिषत्त्वसंभवादेव एकोपि याज्ञवल्क्यः तादृशपरिषच्छब्दवा
च्यो भवति॥ तस्मात् याज्ञवल्क्यस्य चतुर्वेदधर्मशास्त्रयोगशास्त्रलौकिकन्यायादिज्ञानसहिताध्यात्मज्ञानवि
त्तमत्वात्॥ एकेनापि याज्ञवल्क्येन उक्तोर्थः सत्यभूतः॥ इति निश्चित्य जनकः याज्ञवल्क्यं किंज्योतिरेवायं पुरु
ष इति पृष्टवान्॥ एतादृशासूक्ष्मभूतात्मस्वरूपं प्रतिसंदिह्यमानाः ब्राम्हणाः विचारं कृतवंतः॥

ऐतरेयोपनिषदि॥कोयमात्मेतिवयमुपास्महे॥कतरःसआत्माइतिश्रूयते॥ श्वेताश्वतरोपनिषदि ॥ब्रम्हवा
दिनोवदंतिकिंकारणंब्रम्हकुतस्मजाताःजीवावकेनक्कचसंप्रतिष्ठाः॥वर्तामकेनसुखेतरेषुइत्यादिश्रूयते॥
तस्मात्सूक्ष्मवस्तुनिर्णयेबहवोपिअपेक्षिताः॥ तथापियाज्ञवल्क्यस्यसर्वज्ञत्वेनएकस्यैवअतींद्रियआत्म
स्वरूपनिर्धारणसामर्थ्यंवर्ततइति॥ श्रुत्याजनकप्रश्नेनभाष्यव्याख्यानाभ्यांचज्ञापितंभवति॥ तथाच।
आनंदगिरीयव्याख्याने॥ पुरुषविशेषःवेदविदध्यात्मविदित्यादिः॥ तत्रैवएकोवेतिअध्यात्मविदुच्य
ते॥ इत्यादिवाक्यैःसूक्ष्मधर्मनिर्णये॥एकस्यापिअध्यात्मवित्तमस्यपरिषत्वेनग्राह्यत्वं॥तत्तात्पर्यविषय
मिति॥याज्ञवल्क्यस्यैकस्यापिसूक्ष्मरूपस्यात्मनःअंतर्ज्योतिष्ट्वनिर्णयसामर्थ्येनअध्यात्मवित्तमत्वंसिद्धंभव
ति॥१॥ एवंतदुत्तरखंडे ॥यांज्ञवल्क्यकिंज्योतिरेवायंपुरुषइतिजनकेनपृष्टेयाज्ञवल्क्यः॥आदित्यज्योतिः
इत्युक्त्वातदुपपादनार्थंआदित्येनैवायंज्योतिषास्तेइति॥ आसनंक्रियांकरोतीत्यर्थः ॥पल्ययतेइति॥पर्ये

ते॥ गच्छतीत्यर्थः॥ कर्मकुरुते ॥ व्यापारंकरोतीत्यर्थः॥ विपल्येतेति ॥ विपर्येतिआगच्छतीत्यर्थः॥
एवमेवद्वितीयादिखंडेषुआत्मैवास्यज्योतिर्भवतीतिखंडांतं॥ अस्तमितआदित्येकिंज्योतिरेवायमित्यादिनाजन
कप्रश्नः चंद्रमाएवज्योतिः चंद्रमस्यस्तमितेअग्निरेवज्योतिः॥ तेषां अस्तमयेवागेवास्यज्योतिर्भवतीति॥ याज्ञव
ल्क्यस्यप्रतिवचनं॥ तत्रापिवाचः ज्योतिष्ट्वाप्रसिद्धेः ज्योतिष्ट्वस्पष्टीकरणार्थंअधिकतयाउपपादयति॥
वागेवास्यज्योतिर्भवतीत्युपक्रम्य॥ तस्माद्वैसंम्राडपियत्रस्वः पाणिर्नविनिर्ज्ञायतेथयत्रवागुच्चरत्युपैवत
त्रन्येतीति॥ प्रावृट्कालेमेघावरणेअमावास्यायांअग्निप्रकाशाभावेस्वहस्तरेखादिदर्शनायोग्यमंदांध
कारेचसतिज्योतिःप्रयोज्यआसनगमनकार्यनिर्वर्तनपुनरागमनादिव्यवहारासंभवदशायांयत्रकुत्रचितश्व
गर्दभकुक्कुटादिशब्दश्रवणेतच्छब्दरूपज्योतिरवलंबनेनतत्रगमनकार्यनिर्वर्तनआगमनादिव्यवहारंपुरुषः
करोतीतिपुरुषव्यवहारप्रयोजकत्वेनवागुपलक्षितशब्दस्यापिज्योतिष्ट्वंसंभवति॥ एतदुपलक्षितघ्राणस्यर

सनस्यत्वचः तत्तन्निरूपितव्यवहारप्रयोजकत्वेनतत्तदिंद्रियादीनामपिज्योतिष्ट्वंसंभवति॥ तद्यथा॥ पशूनांम
नुष्यस्यवापुष्पादिइष्टगंधग्रहणद्वारातत्पदार्थादानानिष्टगंधग्रहणद्वारातंन्निवृत्त्यादिव्यवहारप्रयोजकत्वरूप
ज्योतिष्ट्वं घ्राणस्यशर्करादिइष्टरसग्रहणद्वारातद्रसविशिष्टपदार्थप्रवृत्त्यनिष्टरसग्रहणद्वारातत्पदार्थनिवृत्त्यादि
व्यवहारप्रयोजकत्वरूपज्योतिष्ट्वंरसनस्यामृदुकठिनशीतोष्णादिस्पर्शनद्वाराप्रवृत्तिनिवृत्त्यादिव्यवहारप्र
योजकत्वरूपज्योतिष्ट्वंत्वगिंद्रियस्य एवंयथासंभवंमनसोपिव्यवहारप्रयोकत्वरूपज्योतिष्ट्वंसंभवत्येव॥
इतिकृत्वा॥ वाचःघ्राणाद्युपलक्षितत्वेनप्रतिपादनंअतएव॥ मनोज्योतिर्जुषतामाज्यंमेविछिन्नंयज्ञंसमिमंदधा
तु॥ यायिष्टउषसोयानिष्टास्ताःसंतनोमिहविषाघृतेनस्वाहा॥ मनसेज्योतिषइदंनममइतिमंत्रप्रयोगेमनसो
पिज्योतिष्ट्वश्रवणात् इंद्रियाणामपिज्योतिष्ट्वसंभवः॥ एतावताज्योतिष्ट्वनिष्कृष्टलक्षणंतु॥ व्यवहारमा
त्रंप्रतिनियतप्रयोजकत्वंज्योतिष्ट्वमितिपर्यवसितंभवति॥ अनयैवदिशाआदित्यादिमनःप र्यंतानां॥ सर्वे

षांअभावदशायांआत्मनोपिएतेषाममभावस्मरणादिव्यवहारप्रयोजकत्वेनस्वस्वरूपस्मरणस्फुरणादिस्वव्यवहा
रप्रयोजकत्वेनचस्वयंज्योतिष्ट्वंस्वतःसिद्धंभवति॥ यद्यपिसुषुप्त्यादिसिद्धसर्वाज्ञानअहंकारादिसर्वजगदभा
वभावज्ञानस्मरणादिरूपव्यवहारप्रयोजकत्वेनअन्यप्रकाशाअनपेक्षिततयासर्वदास्वयंप्रकाशत्वेन
स्वयंज्योतिष्ट्वस्यसिद्धत्वेपिसूर्यादिमनःपर्यंतगौणज्योतिषांसत्वेनतद्विविक्ततयाआत्मज्योतिषोनिर्वक्तुं
प्रदर्शइतुंचाशक्यत्वात्॥स्वप्नावस्थायांपूर्वोक्तसर्वज्योतिषांअभावेनआत्मनएवसर्वव्यवहारप्रयोज
कत्वेनस्वयंज्योतिष्ट्वंविविक्ततयादर्शइतुंसंभवतीतिकृत्वाअग्रेस्वप्नावस्थायां॥ अत्रायंपुरुषःस्वयं
ज्योतिर्भवतीतिवक्ष्यमाणार्थानुसारेणशांतायांवाचिकिंज्योतिरेवायमिति॥प्रश्नस्यउत्तरत्वेनआत्मैवास्य
ज्योतिर्भवतीत्यादिनायाज्ञवल्क्यः॥पूर्ववदुपपादनंकृतवान्॥ एवंक्रमेणआत्मनःपरमज्योतिस्वरूपे
निर्धारितेसति॥जनकस्यआकांक्षावशात्कतमआत्मेतिप्रश्नःप्रवृत्तः॥यद्यपिपूर्वग्रंथसंदर्भेणकापेक

रणसंघातात् विलक्षणत्वेन कार्यकरणसंघातात् सर्वांतरत्वेन स्वप्रकाशत्वेन च आत्मस्वरूपं निर्धारितं
तथापि॥ कार्यकरणसंघाते स्थूलदेह प्राणपंचक ज्ञानेंद्रियपंचक कर्मेंद्रियपंचक अंतःकरणचतुष्ट
यअहंकारतमआदिसंघाते वादिविप्रतिपत्त्या कस्यात्मत्वमित्याकांक्षायां विशेषनिर्धारणासंभवात् वि
शिष्टवस्तुनः आत्मत्वनिश्चयार्थं अध्यात्मवित्तमं याज्ञवल्क्यं शिष्यभूतः जनकः पृच्छति कतम आत्मेति॥
इदं तु युक्ततरमेव प्रश्नकरणं॥ याज्ञवल्क्योपि आत्मज्ञानशिरोमणिः उपपन्नाय शिष्याय जनकाय यथोक्त
कारिणे आत्मनः सम्यक् स्वरूपं उपदेष्टव्यमित्यभिप्रायेण योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुषः॥ स
समानः सन्नुभौ लोकावनुसंचरति॥ ध्यायतीव लेलायतीव॥ स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपा
णि इति॥ उत्तरब्राम्हणान्यारभमाणः॥ योयं विज्ञानमय इत्यादि वाक्यं॥ संग्रहरूपं सूत्रभूतं प्रश्नस्य उत्तरत्वेन उ
पदिष्टवान्॥ तस्यैवार्थस्य उपपत्त्यनुभवादिभिः दार्ढ्यं ज्ञानमापादयन् विवरणरूपेण वक्ष्यति॥ कतम-

आत्मेति॥ वाक्यस्य संक्षेपतः भाष्यव्याख्यानानुरोधेन॥ तात्पर्यार्थः सूच्यते॥ तथाहि॥ योयं विज्ञानमयः प्राणेष्विति॥ यः त्वया लक्ष्यतया दृष्टः सोयं विवेकिनः स्वस्वरूपेण नित्यापरोक्षतया यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर इत्युक्तः॥ अविवेकिनस्तु॥ द्रष्टृत्वश्रोतृत्वकर्तृत्वभोक्तृत्वमुमुक्षुत्वादिधर्माश्रयत्वेन अहमित्यपरोक्षव्यवहारविषयत्वेन॥ कदाचिदेतद्धर्मोपलक्षितत्वेन च॥ असंदिग्धतया सर्वानुभूतः यः स्थितः सः विज्ञानमयः॥ बुद्धिप्रधानः बुद्धिं पुरस्कृत्य तदनुगच्छतीति यावत्॥ वक्ष्यति च॥ ध्यायतीव लेलायतीवेति बुद्धिप्रकाशत्वेन॥ तद्गृह्यदेवमात्मबुद्धिप्रकाशमिति श्रुत्यंतरात्॥ स्वचित्तस्थमिति श्रुत्यंतराच्च॥ व्यवहारे उपहितरूपेण नित्यापरोक्षतया च॥ उद्देशविषयः उत्तरत्र ग्रंथेषु एष सर्वेश्वर एष भूताधिपतिः इत्यादिना स एष नेति नेतीत्यादिना च ज्ञाप्यत्वेन विधातुं योग्यत्वेन च यः स्वप्रकाशनिर्विशेषस्वरूपः परमात्मा सः प्राणेषु हृद्यंतरिति प्राणेषु इंद्रियमुख्यप्राणादिषु॥ तद्विलक्षणतया हृच्छब्दवाच्य अंतःकरणप्रकाशत्वेन॥ यः अंतर्ज्योतिस्वरूपः स एव तव

प्रश्नविषयीभूतः पूर्वोक्तआत्मशब्दलक्ष्यः ज्ञेयइति॥ उत्तरत्वेनप्रतिपादितवान्॥ ननुप्राणेष्वितिसप्तमी
निर्देशात् आत्मनः प्राणाद्यंतर्भूतत्वमेवप्रतिपाद्यते॥ यथा एतेषुब्राम्हणेषुअयंयोग्यः इत्युक्तेब्राम्हणेष्वेवअयमं
तर्भूतोभवति॥ नतुतद्विलक्षणः तद्व्यतिरिक्तश्च एवमात्मनः नप्राणादिविलक्षणत्वं॥ प्राणाद्यतिरिक्तत्वंचेतिचे-
न्न॥ वृक्षेषुशिलातिष्ठति॥ पाषाणेषु वृक्षस्तिष्ठति॥ इत्यादिषुसप्तमीप्रयोगेषुशिलावृक्षयोः परस्परवैलक्षण्यं॥
तद्व्यतिरिक्तत्वंच॥ स्पष्टमेवप्रतीयते॥ एवमत्रापिप्राणेष्वित्यत्रपूर्वोत्तरवाक्येषुपूर्वोत्तराध्यायेषुश्रुत्यंतरेषुच॥
प्राणेंद्रियादीनांजडत्वेनआत्मभिन्नत्वेनच॥ बहुशउपदेशात् प्राणादिसर्वविलक्षणतयाबुध्यादिसर्वप्रकाशत्वे
नसर्वाधिष्ठानत्वेनस्वप्रकाशतयास्वात्मरूपेणस्थितत्वात्॥ नकश्चनशंकावकाशः॥ ननुनैय्यायिकाः॥ मी
मांसकाः बौद्धचार्वाकाश्चतवाभिमतज्योतिरूपात्मनः ज्ञानस्वरूपत्वेनस्वयांगीकृतस्यापितत्स्वरूपज्ञानस्यअन्य
थान्यथैवस्वरूपंवर्णयंति॥ तथाहि ॥चार्वाकः॥ त्वदभिमतआत्मस्वरूपज्ञानस्यकार्यकरणसंघातधर्मत्वं-

प्र·श्रा·
७१

वर्णयति॥ माध्यमिकस्तुशून्यवादी॥ तवाभिमतज्ञानस्वरूपस्यात्मनोपिशून्यत्वंवर्णयति॥ योगाचाराख्यः
बौद्धः क्षणिकविज्ञानवादी॥ त्वदभिमतज्ञानस्यबाह्यार्थरहितक्षणिककेवलविज्ञानमात्रत्वंवर्णयति॥
नैयायिकश्च॥ वैशेषिकश्चत्वदभिमतंज्ञानस्वरूपमात्मानंआत्मगुणत्वेनमत्वाज्ञानाधिकरणमात्मेतिज्ञा
नाश्रयत्वमात्मनोवर्णयति॥ मीमांसकश्चत्वद्ज्ञानमेवस्वविषयविषयकस्वविषयकस्वाश्रयविषयकंअनुव्य
वसायात्मकं व्यवसायात्मकंचउभयात्मकंज्ञानमेकंवर्णयति॥ अतश्चत्वदभिमतज्ञानस्यआत्मत्वासि
द्धिरितिचेन्न॥ सत्यंज्ञानमनंतंब्रम्हेति ॥श्रुत्यंतरात्॥ विज्ञानमानंदंब्रम्हेति ॥एतछ्रुतेश्च॥ ब्रम्हणः
ज्ञानरूपत्वमेवनतुतार्किकाभिमतज्ञानाश्रयत्वं॥ आत्मनःज्ञानाश्रयत्वेंगीकृतेआधाराधेययोःभेदांगीकारे
णआत्मनःज्ञानभिन्नत्वावश्यंभाविलात्॥ ज्ञानभिन्नस्यात्मनःजडत्वप्राप्त्याचैतन्यरूपात्मत्वासंभवःदुर्वारए
व॥ यस्यामतंतस्यमतंमतंयस्यनवेदसः॥ अविज्ञातंविजानतांविज्ञातमविजानतांइति॥ सवेत्तिवे

नि·

द्यं न च तस्यास्ति वेत्ता इत्यादिश्रुतिभ्यः ज्ञानरूपस्य आत्मनः वेदनमात्रविषयत्वनिषेधात्॥ त्वया ज्ञानभिन्नत्वां
गीकारेण तवाभिमत आत्मनः जडत्वं सिद्धमेव॥ मीमांसकपक्षेपि व्यवसायानुव्यवसायोभयात्मकैकज्ञानस्वी
कारेण कर्मकर्तृविरोधरूपदोषो दुर्वारः दृष्टं ते स्वस्याः छिदिरूपक्रियायाः स्वकर्मत्वविरोधः॥ तद्यथा॥ छिदेः क
र्म तु काष्ठं पुरुषस्तु तदाश्रयः॥ छिदिस्तु क्रिया॥ एवं स्थिते स्वस्या एव छिदेः स्वकर्मत्वं स्वाश्रयस्यापि पुरुष
स्यैव छिदिरूपक्रियाकर्मत्वं॥ इत्यत्यंतविरुद्धमेव॥ मीमांसकमते ज्ञानस्य स्वविषयविषयकस्वविषयकस्वाश्रय
विषयकज्ञानस्य कर्मकर्तृत्वादिविरोधः सिद्धः॥ क्षणिकसत्यबाह्यार्थवादी सौत्रांतिकवैभाषिकाख्यबौ
द्धमते॥ क्षणिकज्ञानरूपात्मस्वीकारेण तस्य आत्मनः पूर्वकालीनानुभूतविषयकस्मृतिज्ञानादेः कालांत
रे असंभावात्॥ स्वकृतस्वसंपादितक्रियाज्ञानफलादीनां ऐहिकआमुष्मिकमोक्षादीनां च स्वभोग्यत्वा
संभवप्राप्त्यादिबहुदोषग्रस्तत्वाच्च॥ क्षणिकज्ञानस्य आत्मत्वाभिमतं अविवेकप्रयुक्तमिति निरसनीयं

च

बाह्यार्थरहितकेवलक्षणिकज्ञानमात्रस्य आत्मत्ववादियोगाचाराख्यबौद्धमतेपि॥ पूर्वोक्तक्षणिकसत्य
त्ववादिमतंप्रतिउक्तदूषणग्रस्तत्वं॥अत्रापिसिद्धमेव॥अधिकतयातु॥विज्ञानवादिनःदूषणंसंभवत्ये
व॥ तथाहि ॥बाह्यार्थानंगीकारेज्ञातृज्ञानज्ञेयादि घटपटादिभिन्नभिन्नव्यवहारासंभवस्यदोष
त्वात्॥ननुघटपटादिवत्॥ज्ञानस्येवविकारित्वप्राप्तिःभवतीतिचेत्॥ घटादिवदितिदृष्टांतीभूतस्य
यदाकदावाघटादेरर्थस्यसिद्धत्वावश्यंभावेनदार्ष्टां तिकस्यज्ञानस्यतद्भिन्नत्वेनज्ञानभिन्नोर्थःसिद्धए
व॥ अपिच ॥ज्ञानस्याभावरूपत्वंवा॥भावरूपत्वंवाअभावरूपत्वेयत्किंचित्कार्याजनकत्वेनअर्थांतरे
णपरिणामासंभवेनशून्यवादांतर्भूतत्वेनचदोषांतरप्रसक्तिः॥भावरूपत्वेतुज्ञानभिन्नाभावस्यअंगीकारे
णज्ञानभिन्नार्थस्यकथंचित्अंगीकारप्रसक्तिः॥अभावस्यापिपदार्थत्वेनतार्किकैः लौकिकैश्चबहुशोंगीकृत
त्वात्॥भावात्मकपदार्थस्यतुज्ञानविषयत्वेनतद्भिन्नत्वप्रसिद्धेः॥ज्ञानभिन्नाभावरूपस्यवाअंगीकारेज्ञानभि

न्नार्थसिध्दिर्दुर्वारैव॥ विज्ञानमात्रवादीप्रष्टव्यः॥ तवमतेमोक्षदशायांज्ञानाभावस्यैवमोक्षत्वांगीकारेणत
त्ज्ञानाभावःज्ञानभिन्नोवाज्ञानाभिन्नोवाज्ञानभिन्नत्वेज्ञानभिन्नअर्थसिध्दिःदुर्वारः॥ ज्ञानाभिन्नत्वेज्ञान
स्यैवतद्दशायामपिसत्वात्॥ तत्राभिमतज्ञानाभावरूपमोक्षासिध्याअनिर्मोक्षप्रसंगः॥ अभावप्रतियोगिनो
ज्ञानज्ञानाभावयोः एककालावच्छेदेनसत्वासंभवात्॥ केनापिवादिनातथात्वानंगीकाराच्चतेनैवबौध्ये
नवादिनामोक्षंदशायांज्ञानाभावस्यैवमोक्षरूपफलत्वेनस्वीकारात् मोक्षस्यपदार्थत्वतेनैवस्वीकृतंभ
वेत्॥ अपदार्थस्यप्रार्थनीयत्वाभावेनअपुरुषार्थत्वात्॥ अर्थ्यतइत्यर्थः इतिव्युत्पत्त्यामोक्षस्यअर्थत्वेनै
वअर्थत्वंसिध्यतीतिज्ञानभिन्नार्थःसिध्दएव॥ तद्दशायांज्ञानाभाव स्वेनज्ञानभिन्नज्ञानाभावरूपमो
क्षस्यअंगीकारेणंज्ञानभिन्नार्थोनास्तीतितत्सिध्दांतविरोधःतेनैवअंगीकृतःस्यात्॥ किंचक्षणिकवि
ज्ञानवादेपूर्वकालीनविज्ञानस्यउत्तरकालेनअभावस्यपूर्वलक्षणविज्ञाननाशाउत्तरक्षणविज्ञानोत्प

त्यभावकालेस्वाश्रितसर्वविज्ञानाभावस्यसुषुप्तिकालेसर्वज्ञानाभावस्यपुरुषांतरीयज्ञानाभावस्यच॥
अवश्याभ्युपेयत्वेनज्ञानभिन्नअभावरूपार्थःअवश्यंस्वीकरणीयःस्यात्॥उत्तरज्ञानोत्पत्त्यनंतरंपूर्वज्ञाना
शइतिचेत्॥एकक्षणावच्छेदेनज्ञानद्वयस्यअंगीकारेएकस्यैवज्ञानस्यक्षणद्वयस्थायित्वांगीकारेचसि
द्धांतहानिप्रसंगः॥ भावरूपेणाभावरूपेणच॥ज्ञानस्यैवपरिणामइतिचेत्॥एकांशावच्छेदेनएक
स्यैवक्षीरादिद्रव्यस्यएकपात्रस्थस्यक्षीररूपेणदधिरूपेणचविरुद्ध द्वैरूप्येणपरिणामासंभववत्॥एक
स्यैवज्ञानस्यज्ञानारूपार्थरूपविरुद्धपरिणामद्वयासंभवः॥इतिहेतोःविज्ञानमात्रवादिमतंअसंभावि
तं॥ चार्वाकमतेतुस्थूलदेहगुणःचैतन्यात्मकंज्ञानमितिसिद्धांतः॥ तथाचेत्॥श्यामरक्तादिदेहगु
णस्यमृतदेहे पिविद्यमानत्वात्॥तद्वत्मृतदेहेपिज्ञानरूपगुणस्यतत्रोपलब्धिप्रसंगः॥अपिचस्वप्नाव
स्थायांएतत्स्थूलदेहाभावेनएतत्स्थूलदेहनिष्ठज्ञानरूपगुणस्यस्वप्नदेहेअनुवृत्त्यसंभवात्तत्वज्ञानस्य

अनुभूतत्वात्॥ स्थूलदेहगुणो चैतन्यमित्यसंभवः॥ तन्मतरीत्या पृथिव्यादिभूतचतुष्टयसंघातरूपस्थूलदेहगु
णत्वेन चैतन्यस्यांगीकारे तदात्मकज्ञानांगीकारे च॥ बाह्यभूतचतुष्टयसंघातरूपघटपटवृक्षादिरूपकेषु चित्स्व
दार्थेषु ज्ञानगुणस्य अनुत्पत्तेर्दर्शनात्॥ अत्राप्यनुत्पत्तिप्रसंगेन एवं तत्स्थूलदेहगुणः॥ ज्ञानमिति वक्तुमश
क्यत्वाच्च॥ तदभिमतज्ञानस्य देहगुणत्वं असंभावितमेव॥ शून्यवादिमतस्य तु॥ प्रत्यक्षानुमानसर्वमतशा
स्त्रादिसर्वप्रमाणविरुद्धस्य सर्वैरनुभूयमानत्वेन अत्यंतासंगतत्वात्॥ तदभिमतशून्यस्यैव ज्ञानादिसर्वरूप
त्ववादः॥ सर्वैरनादरणीय एव॥ ७॥ एवं वादिविप्रतिपत्तिं परिहरन् आत्मनः स्वयंज्योतिष्ट्वं प्रसाध्य तस्य अ
नुभवारूढतया प्रदर्शयितुं उत्तरग्रंथः॥ आरभ्यते॥ मूलं तदुत्तरखंडे ॥ स वा अयं पुरुषो जायमान इत्यादिना॥ स
उत्क्रामन् म्रीयमाणः पाप्मनो विजहातीत्यंतेन आत्मनः बुद्धितादात्म्यवशादेव बुध्युपलक्षितकार्यकरणसंघा
तो सत्तो अयमुत्पन्न इव॥ तस्मिन् म्रीयमाणे सोपि मृत इव भवतीति सप्त तेभ्यो भूतेभ्यो समुत्थाय तान्येवानुविन

सतीतिश्रुतिरेववक्ष्यतीत्यभिप्रायंउक्त्वा॥ एतदुत्तरखंडे ॥तस्यवाएतस्यपुरुषस्यद्वेएवस्थानेइत्यादिना॥ अत्रायंपुरुषःस्वयंज्योतिर्भवतीत्यंतेनग्रंथेन॥ अस्यआत्मनःवर्तमानदेहभाविदेहौइहलोकपरलोकशब्दवाच्या॥तयोःवर्तमानदेहभाविदेहयोःधर्माधर्मफलरूपसुखदुःखयोश्च॥अतीतानागतयोःस्वरूपंगुणांश्च॥अयमात्मासंध्येस्वप्नेतिष्ठन्नेवपूर्वदेहसंस्कारउत्तरदेहारंभकविद्याकर्मपूर्वप्रज्ञादीनाश्रित्यजानाति॥ पूर्वदेहवर्तमानदेहलोकाद्यनुभूतसंस्कारादिवशात्स्वप्नंप्राप्यजाग्रद्देहंविहायस्वप्ने॥अन्यान्॥स्वदेहादीन्कल्पइत्वातत्रआदित्यादिज्योतिषःइंद्रियादीनांचअभावेनमनसःवासनात्मकस्वप्नप्रपंचाकारेणपरिणामात्अन्यज्योतिषोऽभावेनस्वस्वरूपसाक्ष्यात्मकज्योतिषेवव्यवहरति॥यद्यपिपूर्वोक्तरीत्याजाग्रतिसूर्यादिप्रकाशसत्वेपिआत्मज्योतिषएवसाक्षात्परंपरयावातस्यभासासर्वमिदंविभातीतिश्रुत्युक्तरीत्यास्वस्यात्मनःस्वप्रकाशत्वेपिमूढानांआदित्यादिप्रकाशसद्भावदशायांआत्मज्योतिषःविविक्तत्वेनस्वप्रकाशत्वे

नच॥ ज्ञानानुदयात्॥ अत्रस्वप्नावस्थायां अत्रायंपुरुषःस्वयंज्योतिर्भवतीतिश्रुत्याप्रतिपादितं॥ ९॥ तदुत्तरखंडे ॥ नतत्ररथानित्यादिनापुष्करिण्यःस्रवंत्यःसृजतेसहिकर्तेत्यंतेनग्रंथेन॥ स्वप्नावस्थायांपरमार्थतःरथादिसर्वपदार्थाभावेपिरथादिनदीपर्यंतान् तदुपलक्षितसर्वपदार्थांश्चअयमात्माकल्पयति॥ सएवकर्ताभवति॥ १०॥ एतदुत्तरखंडे ॥ स्वप्नेनशारीरमित्यादिनापुरुषएकहंसइत्यंतेन॥ स्वप्नेपूर्वशारीरादिजाग्रत्पदार्थान्विलापइत्वा॥ स्वयमसुप्तः॥ जागरूकतयास्थितःसन्सुप्तान्जडपदार्थान्॥ इंद्रियप्राणादीन्तदभावांश्चयथासंभवंप्रकाशयन्पुनःस्वस्वरूपप्रकाशमात्रेणजाग्रदवस्थांप्राप्नोति॥ अतः॥ हिरण्मयः॥ ज्योतिरूपःएकएवसंचरतीतिजाग्रदाद्यवस्थात्रितयेपिआत्मव्यतिरेकेणपदार्थाभावःविवक्ष्यते॥ त्रयःस्वप्नाइतिश्रुत्यंतरात्॥ ११॥ एतदुत्तरखंडे ॥ प्राणेनरक्षन्नित्यादिना॥ एकहंसइत्यंतेनग्रंथेनस्थूलदेहस्यचेतनचेष्टाभावेशवबुध्या अन्यैःदेहोदह्यतेतिशंकयाश्वासोश्वासरूपप्राणेननीचंकुलायप्रायंस्थूलदेहंरक्षन्अयमात्मास्थूलदेहाभिमानंत्यक्त्वास्वप्नावस्थांजिगमिषुःसन्

हंरक्षन्सन्यत्रयत्रविषयेकामउत्पद्यते तंतमनुसरन्स्वप्नावस्थायांजाग्रत् सुषुप्त्यवस्थादिषुच ॥ संचरति ॥
अतःअयंएकहंसःएकएवगच्छति ॥ हनहिंसाग   त्योः ॥ इतिधातोः ॥ १२ ॥ एतदुत्तरखंडे   ॥ स्वप्नांतउ
च्चावचइत्यादिनाभयानिपश्यन्नित्युक्तंतेन ॥ स्वप्नेउत्तमाधम पदार्थान्प्राप्नुवन्स्वप्रकाशरूपःजाग्रज्जन्यसं
स्कारवशात्वासनारूपाणिदेवमनुष्यतिर्यगादिवस्तूनिकल्पइत्वातेष्वेवपदार्थेषुअविद्ययास्त्रीभिःस
हमोदमानइवसिंहादिभिःभयंप्राप्तइवभवतीतिप्रतिपाद्यते ॥ एतावंताइवशब्देनस्वाप्निकानांअर्थानां ॥
मिथ्यात्वंसिद्धं ॥ अनेनैवदृष्टांतेनवक्ष्यमाण ॥ यत्रवाअन्यदिवस्यादित्यत्रयत्रहिद्वैतमिवभवतीत्यत्र
च ॥ स्थितइवशब्देनापिजाग्रत्पदार्थानामपिमिथ्यात्वंसिद्धमेवभवति ॥ १३ ॥ एतदुत्तरखंडे   ॥ आरा
ममस्येत्यादिनाविमोक्षायब्रूहीतीत्युक्तेनग्रंथेन ॥   अस्यात्मनःआरामंक्रीडात्मकंजाग्रत्प्रपंचतत्स्थित
आदित्यादिज्योतिषांइंद्रियाणांचअभावेनस्वप्नेवासनात्मकतयादेहेंद्रियसूर्यादिसर्वप्रपंचनिर्माणंअहर

ह्यस्वप्नेसर्वेजनाःपश्यंति॥तंस्वप्नप्रपंचस्रष्टारंसर्वप्रकाशकज्योतिरूपंआत्मानंकश्चनपुरुषःनपश्यति॥अ
होआश्चर्यंजनानांदौर्भाग्यंकिंवक्तव्यं॥इतिश्रुतिःअनुक्रोशंदर्शयति॥अपिच॥आत्मनःस्वप्नेनिष्कृष्टतया
स्वयंज्योतिष्ट्वेकिंचिल्लिंगमस्ति॥तत्तुतंनायतंबोधयेदितिजनावदंतिकिमर्थमित्युक्तेतत्तदिंद्रियमात्रारूपं
शुक्रंआदायगृहीत्वास्वप्नंप्रतिगच्छति॥सहसाउत्थापनेपुनःतत्तद्गोलकेषुव्यत्यस्ततयाइंद्रियेषुस्थापितेषु
सत्सुतत्प्रयुक्तआंध्यबाधिर्यादीनांदुर्भेषजविषयत्वंभवतीतिलोकप्रसिद्धिरेवलिंगं॥एतेनइंद्रियाणिस्वप्नाव
स्थायांस्थूलदेहेनवर्तंतेआत्मनागृहीतत्वात्स्वप्नावस्थायांतुविषयाःइंद्रियाणिप्रमाताइत्यादिसर्वप्रपंचो
पिवासनामयएवआत्मनाकल्पितःअतःस्वप्नेआदित्यादीनिज्योतींषिइंद्रियाणिचनसंतीतिकृत्वाआत्मज्यो
तिषैवतत्रसर्वप्रकाशव्यवहारःततःआत्मनःस्वयंज्योतिष्ट्वंसिद्धमितितात्पर्यं॥अपिच॥केचित्पामराः॥अ
स्यात्मनःस्वप्नोपिजाग्रदवस्थैवजाग्रतियानिहस्त्यादीनिवस्तूनिपश्यतिस्वप्नेपितान्येवपश्यति॥इतिहेतोः॥

प्र॰शा॰
७६

स्वप्नस्यमिथ्यात्वंनसंभवति॥ततःआत्मनःस्वयंज्योतिष्ट्वमपिनसंभवतीतिपूर्वपक्षेणआहुः॥तदसत्॥उपक्रमे
तावत्॥नतत्ररथाःरथयोगानपंथानोभवंतीतिस्वप्नावस्थायांपदार्थसामान्याभावमुक्त्वाअथरथान्रथ
योगान्पथःसृजते॥सहिकर्तेतिआत्मनःसर्वनिर्मातृत्वस्यश्रुत्यैवउक्तत्वात्॥शुक्रमादायेतिइंद्रियजातं
स्थूलदेहगोलकेभ्योगृहीत्वास्वप्नगमनस्यचोक्तत्वात्॥आत्मनःइतरप्रकाशविविक्तत्वेनस्वप्नावस्थायांस्व
यंज्योतिष्ट्वख्यापनार्थमेवश्रुतेःप्रवृत्तत्वाच्च॥स्वप्नावस्थाकदाचिदपि॥जाग्रदवस्थानभवति॥इत्यभिप्रायेण
पुनःश्रुतिःअत्रायंपुरुषःस्वयंज्योतिर्भवतीतिउक्तवती॥१४॥ एतदुत्तरखंडे॥सवाएषएतस्मिन्संप्र
सादइत्यादिनाविमोक्षायैवब्रूहीत्यंतेन॥ सइति ॥पूर्वपरामृष्टः॥आत्मासंप्रसादइति॥सुषुप्तावस्था
यां॥स्थित्वामृत्युमतिक्रामतीतिशेषः॥ रत्वाचरित्वाइत्यादि॥पुण्यंचपापंचइत्यंतस्य॥ग्रंथस्यअयमात्र
यः॥स्वप्नांतसुषुप्तिंप्रविविक्षुः॥स्वप्नावस्थायामेव॥रत्वाबंध्वादिभिःक्रीडांप्राप्यचरित्वायथासंभवंआचरि

नि॰

त्वा॥ तद्वक्ष्मापनुत्तये॥ सुषुप्तिं प्राप्नोतीत्यर्थः स्वप्नेपि॥ पुण्यं पुण्यफलं सुखं॥ पापं तत्फलं दुःखं च दृष्ट्वैव न तु-
कृत्वेत्यर्थः॥ साक्षिरूपत्वात्॥ तस्य कर्मफललेपाभावाच्च॥ असंग इति वक्ष्यते॥ संप्रसाद इति सप्तम्याः
निर्देशात्॥ तदवस्थायामेव रमणादिकं प्रतीयते॥ इति नश्लोकनीयं॥ वक्ष्यमाण यथा श्येनो वा सुपर्णो
वेति खंडे उक्त दृष्टांतानुरोधेन सुषुप्त्यवस्थायां स्वप्नश्रम विश्रमणमेव विवक्ष्यते॥ सुषुप्तौ क्रीडाचर-
णाद्यसंभवात्॥ अननुभूतत्वाच्च॥ संप्रसादशब्दः सम्यक् प्रसीदतीति आत्मा॥ अस्मामिति संप्रसाद इ-
तिसुषुप्त्यवस्थापरः॥ अपि च॥ पुनः प्रतिन्यायं प्रतीति वाक्यस्य यथागतन्यायमभिप्रेत्य स्वप्नात्
सुषुप्तिं प्राप्तत्वात्॥ पुनः सुषुप्तात् स्वप्नावस्थां प्राप्नोतीति तात्पर्यार्थः॥ किंच॥ आत्मनः असंगत्वं कथ-
मित्युक्ते॥ उत्तरमुच्यते॥ सः आत्मा॥ तत्र स्वप्नावस्थादिषु यत्किंचित्पश्यति॥ वस्तुजातं॥ सुखदुःखादि
कंच॥ तेन सह अनन्वागतः॥ अनुसृत्यागतो न भवति॥ अननुबद्धो भवतीत्यर्थः॥ हि यस्मात्कारणात्

प्र॰ ग्रा॰
७७

एवंतत्तदवस्थासंबंधिसुखदुःखादियत्किंचिल्लेपाभावात्॥अयंअसंगः इतिनिर्धार्यतइति॥१६॥
एतदुत्तरखंडे ॥सवाएषएतस्मिन्स्वप्न इत्यादिनाखंडांतवाक्येनपूर्वखंडोक्तरीत्यारमणादिकंतु सुखदुःखादिदर्शनमात्रं ॥नतुकर्तृत्वंभोक्तृत्वंवातस्यसाक्षित्वात्॥असंगत्वमितिज्ञापितं पुनःप्रतिन्यायमित्रिउक्तरीत्याबुद्ध्यांतायैवजाग्रदवस्थाप्राप्तयेआत्मनःगमनंइत्याद्यर्थः॥प्रतिपाद्यते॥
॥१८॥एतदुत्तरखंडे सवाएषए तस्मिन्बुद्ध्यांतइत्यादिनाखंडांतेनग्रंथेनबुद्ध्यांतेरत्वास्वप्नांतायैव धावतीत्यर्थः॥शेषंपूर्वसमानं॥१७॥ एतदुत्तरखंडे ॥तद्यथामहामत्स्य इत्यादिनास्वप्नांतंचबुद्ध्यांतंचेत्यंतेन॥ अयमात्मायथामहामत्स्यःप्रबलतरःबृहत्परिमाणः॥अप्रतिहतपराक्रमवान्स्वातंत्र्ये णनद्यादिषुउभयकूलेअनुसंचरति॥तथास्वप्नजागरयोःस्वेच्छयाअनुसंचरति॥अत्रायमाशयः॥यथाम त्स्यस्य॥उभयकूलजलादिसंचारेपि॥तद्वशीकृतत्वंनास्ति॥यथा वाजलेसंचारेपिजलविलक्षणतयातन्निमि

नि॰

त्तकत्रीतक्लेदनादिगुणसंबंधो नास्ति॥ एवं अवस्थाद्वयतत्कल्पितदेहादिकार्यकरणसंघातकृतगुणधर्म
क्रियादिसंबंधः तद्द्रष्टृत्वं च॥ अस्य न संभवतीति॥ १९॥ एतदुत्तरखंडे त थाऽस्मिन्नाकाशेश्येनो वे
त्यादिना न कंचन स्वप्नं पश्यतीत्यंतेन ग्रंथेन॥ सुषुप्तेन कंचन स्वप्नं पश्यतीति कंचनेति विशेषणात्॥ लो
कद्वास्वप्नयोः अवस्थात्रयस्यैव नियमितत्वात्॥ कंचन स्वप्नमिति शब्देन स्वप्नस्य बहुत्वं प्रतीयते॥ तथा च॥
जाग्रत्स्वप्नसुषुप्तीनामपि स्वप्नत्वेन मिथ्यात्वविवक्षया श्रुत्या जाग्रतोऽपि मिथ्यात्वं प्रतिपाद्यते॥ तस्य त्रय आव
सथाः त्रयः स्वप्ना इति श्रुत्यंतरात्॥ न कंचन कामं कामयत इति कामसहचर्याच्च स्वप्नस्य बहुत्वमिति हेतोः त्र
याणां मिथ्यात्वं स्पष्टमेव॥ अन्यथा कंचनेति स्वप्नविशेषणवैयर्थ्यप्रसंगः तस्मादात्मनः असंगत्वं सिद्धं॥
आकाशेश्येन दृष्टांतस्तु अविद्याकामकर्माद्युपहितस्य आत्मनः कल्पितजाग्रत्स्वप्नयोः बहुशः श्रमं प्राप्यावि
श्रमणार्थं स्वस्वरूपावस्थानात्मकसुषुप्तिं प्रतिगमनं श्येनादीनां आकाशविहारश्रमापनुत्तये स्वनीडगमन

प्र-श्रा-
७१

वत्॥अपेक्षितं इतिहेतोःआत्मनःसुषुप्तौस्वरूपावस्थानंश्रुत्याप्रतिपाद्यते॥१९॥ एतदुत्तरखंडे ॥ता
वाअस्यैताहितानामनाड्यइत्यादिनापरमोलोकइत्यंतेनग्रंथेन हितानामनाडिसमुदायेषुलिंगोप
लक्षितअंतःकरणोपहितत्वेनअयमात्मास्वप्नादिकंपश्यन्॥तत्रस्वप्नेअविद्याधिक्यवशात्एवंस्वात्मा
नंचोरादयःशात्रवश्चघ्नंतीवजिनंतीवस्ववशंकुर्वंतीवहस्त्यादयःआत्मानंद्रावयंतीवगर्तेपततीवजाग्र
त्कालेयद्यद्भयंपश्यतितत्सर्वंपश्यति॥यदाआत्मज्ञानप्राप्तिसन्निहितकालेअविद्यायाउपक्षीणदशा
प्राप्तौ॥आत्मविद्यायाःप्रकर्षेजातेतदाज्ञानप्राप्तिसन्निहितकालेस्वप्नेदेवइवअहमेवेंद्रादिःराजेवअह
मेवराजेतिअहमेवेदंसर्वोस्मीतिचक्रमेणदेवतोपासनेनप्रकृष्टपुण्यप्रभावेनअविद्याप्रतिबंधनिवृत्ति
पूर्वकं॥आत्मज्ञानांशप्रकर्षेणचैतादृशज्ञानानिभवंतितत्रापिअहमेवेदंसर्वोस्मीतिसर्वात्मभावज्ञानस्यतुप्र
धानत्वात्॥स्वप्नेतादृशज्ञानोत्पत्तौआत्यंतिकाऽविद्यानिवृत्तिः॥अप्रतिबद्धापरोक्षसाक्षात्कारप्राप्तिश्च

नि॰

शीघ्रमेव भवतीति॥ अनुमेय इत्यभिप्रायः॥ श्रुत्या सूच्यते अयमर्थः भाष्यव्याख्यानादिषु स्पष्टः सोऽस्य परमो
लोक इति॥ सः पूर्वोक्तः सर्वात्मभावः अस्य आत्मनः परमो लोकः परमः आत्यंतिकः॥ लोकः स्वभावः॥ स्वरूपमि
ति यावत्॥ आत्मानमेव लोकमुपासीत इति॥ एषांन्तो यमात्मा अयंलोक इति च॥ एतस्मिन्नेव बृहदारण्ये।
लोकशब्दस्य स्वरूपार्थकत्वावगमात्॥ लोक्यते अवलोक्यते॥ दृश्यत इति॥ लोकः लोकृ दर्शन इति धातोः
लोक्यते अनुभूयत इत्यर्थः प्रतिपाद्यते॥ २०॥ एतदुत्तरखंडे ॥ तद्वा अस्यैतत् इत्यादिना॥ श्लोकांत
रमित्यंते न ग्रंथेन तद्वा अस्यैतदिति तत्॥ सर्वात्मभावस्वरूपं॥ अस्य आत्मनः अतिछंदा॥ अतिगतकामस्वरूपं
अत एव अभयं रूपं द्वितीयाभावात्॥ द्वितीयाद्वै भयं भवतीति श्रुतेः अभयं वै जनक प्राप्तोसी त्युक्तत्वाच्च॥
अपहतपाप्मेति॥ अस्य स्वभावतः पापपुण्यरहितत्वाच्च॥ अद्वैतमेव अस्य स्वरूपमिति फलितोऽर्थः॥ तद्यथा प्रि
ययेति स्त्रीपरिष्वंगो दृष्टांतः॥ उदाहृतः एतस्याः श्रुतेः तात्पर्यं॥ अतीतव्यवहितग्रामृहणे॥ अथैतद्वा मेक्षणि

पुरुषरूपमेषास्यपत्नीविराट्॥ इत्यादिखंडिकायां ॥तत्तात्पर्यंवर्णनेविस्तारतयाअस्माभिःऐक्यस्वरू
पएवतात्पर्यमिति॥प्रपंचितं॥एतावतापरस्परंअत्यंतप्रीतिविशिष्टयोःस्त्रीपुरुषयोःसंपरिष्वंगेसत्येवप
रस्परभेदज्ञानाभावात्॥ऐक्यज्ञानेनैवबाह्याभ्यंतरप्रतिपत्तिर्नसंभवति॥एवंआत्मपरमात्मनोःउपाध्य
भावेपरमात्मनिआत्मनोविलयात्॥ऐक्यंप्राप्तस्यआत्मनःएकीभूतत्वात्॥आत्मनःबाह्यांतरपदार्थस्मृति
रेवनास्तीति॥सुषुप्तावस्थायांअहमस्मीइदमस्मीतिच॥भानासंभवः॥भवत्येवतस्मात्॥इंधोहवैइत्यस्यवि
श्वस्यपत्नीविराडितिपतिपत्नीरूपककल्पनायाःविश्वतेजसोरैक्यपवतात्पर्यमिति॥अस्माभिस्तत्रोक्तएवा
र्थः॥अत्रश्रुत्यैवस्फुटीकृतः॥ तद्वेति॥पूर्वोक्तंस्वरूपमेव॥अस्यात्मनःआप्तकामंप्राप्तकामत्वात्॥कृतकृ
त्यत्वादित्यर्थः॥आत्मकामंआत्मनएवस्वेनकाम्यत्वात्॥अतएवअकामंनिर्गतकामत्वात्॥तस्मादेवस्वरूप
तःस्वस्यरूपंशोकांतरंदुःखभिन्नंसुखस्वरूपमिति यावत्॥ इत्यर्थःसूचितः॥ २१॥ एतंद्वुत्तरखंडे

अत्रपितेत्यादिना॥तदासर्वांछोकांनृहृदयस्यभवतीसंतेनग्रंथेन॥अत्रेतिसुषुप्त्यवस्थायांद्वैतप्रतीतिप्र
योजकअविद्याकामकर्माद्याश्रयोपाधिविलीनत्वात्॥आत्मोपाधिशरीरजनकपिताप्यपिताभवतिअ
नयोःतादात्म्यसंबंधाभावात्॥एवंपुत्रोप्यपुत्रःएवंमाताप्यमाता॥लोकाअलोकादेवाअदेवा॥वेदा
अवेदाःस्तेनोअस्तेनः॥भ्रूणःअभ्रूणः॥चांडालोऽचांडालः॥पौल्कसोऽपौल्कसः॥श्रमणोऽश्रमणः॥
तापसोऽतापसः॥ पित्रादिव्यवहारयोग्यत्वाभावात्॥पित्रादीनांअविद्याकल्पितत्वेनमिथ्यात्वात
आत्मनःस्वस्वरूपावस्थानरूपसुषुप्तिदशायांएतेनसंतीतिश्रुत्याप्रतिपादनंआत्यंतिकाविद्यानिवृत्ति
पूर्वकब्रह्मविद्यावद्दशायामपि॥परमार्थतोसर्वजगत्सदार्थभावः॥एवमेवभवतीतिज्ञापनार्थं॥वक्ष्य
तिच॥यत्रत्वस्यसर्वमात्मैवाभूत्॥तत्केनकंपश्येदित्यादिना॥यस्मिन् सर्वाणिभूतान्यात्मैवाभूद्विजान
तः॥तत्रकोमोहःकःशोकएकत्वमनुपश्यतः॥इतिसंहितोक्तेः॥यत्रनान्यत्पश्यतिनान्यच्छृणोति॥ना

न्यद्विजानाति॥सभूमेतिश्रुत्यंतरात्॥स्वाप्ययसंपत्त्योरन्यतरमाविक्षितं हीतिब्रम्हसूत्राच्च॥ श्रमणइ
तिपरिव्राडित्यर्थः॥पौल्कसइतिपुल्कसएवपौल्कसः॥क्षत्रियायांशूद्रेणोत्पन्नःपुल्कसः॥तापसःवान
प्रस्थादिः॥चांडालःब्राम्हण्यांशूद्रेणउत्पन्नश्चांडालः॥चंडालएवचांडालः॥अस्यआत्मनःस्वरूपंअभयं
रूपमिति॥पूर्वखंडोक्तानुसारेणअनन्वागतंपुण्येनानन्वागतंपापेनेति॥पापपुण्यअननुगताख्या
ननुसरणशब्दितलेपाभावःप्रतिपाद्यते॥अनन्वागतमितिनपुंसकलिंगप्रयोगस्तु॥अभयंरूपमिति
शब्दार्थविशेषणत्वप्रदर्शनार्थः॥तीर्णोहि॥तदासर्वाञ्छोकान्हृदयस्यभवतीति॥ तदासुषुप्त्यवस्था
यांहृदयस्यचित्तंच॥चेतोहृदयमितिबुध्युपलक्षितअंतःकरणमुच्यते॥तदाश्रिताःयेशोकाःकाम्यरू
पविषयाप्राप्तिवियोगादिनिमित्तकाः॥पुरुषतापकाःतान्सर्वान्तीर्णोभवति॥हीतियस्मात्कारणा
त्॥सुषुप्त्यवस्थायांअस्यात्मनःद्वैतव्यवहारप्रयोजकअविद्याकामकर्मादिदोषोपाधिसंबंधाभावः॥

तस्मात्तदातीर्णइति॥हेतुर्दर्शितः॥हृदयस्येतिपदं आत्मव्यावृत्त्यर्थं तेन शोकोपलक्षितज्ञानेच्छासुख
दुःखादिगुणाश्रयत्वलक्षणवैशेषिकादिमताभिमतसिद्धांतनिराकरणार्थंश्रुत्याप्रयुक्तं॥ वस्तुतोपिवि
चार्यमाणे॥असंगस्यनिरवयवस्य॥देशकालाद्यपरिच्छिन्नाद्वैतस्वरूपस्यअनित्यगुणधर्मक्रियाश्रयत्वासंभ
वात्॥ध्यायतीवलेलायतीवेति॥सहिस्वप्नोभूत्वेत्यादिश्रौतवाक्यजातेनच॥हृदयोपलक्षितअंतःकर
णाश्रितत्वस्यैवशोकादीनांगुणधर्मादिक्रियाणांच॥सुषुप्तिमूर्छासमाध्यादिषुअंतःकरणतादात्म्या
भावकालेषुअभावात्तथासर्वैरनुभूयमानत्वेनवक्तुमुचितत्वाच्च॥श्रुत्युक्तानुसारेणआत्मनःसुषुप्तौ
अंतःकरणगतशोकाभावःसिद्धएव॥२२॥ एतदुत्तरखंडे ॥यद्वैतन्नपश्यतीत्यादिनाततोन्य
द्विभक्तंयत्पश्येदित्यंतेनग्रंथेन॥सुषुप्त्यवस्थायां॥ यदिआत्मनःस्वप्रकाशत्वेनसद्भावोअंगीक्रिय
ते॥तदाजाग्रत्स्वप्नयोरिवअहमस्मिइदमस्तीत्यादिविशेषज्ञानंकिमर्थंनोपलभ्यतेइत्याशंक्यश्रुतिरा

ह॥ यद्वैतमिति॥ यत्तु द्वैतं वस्तुजातं सुषुप्त्यवस्थायां न पश्यतीति व्यवहारः लोकसिद्धः तस्मिन्वि
चार्यमाणे तु॥ तदा पश्यन्नेव न पश्यतीति वक्तव्यं स्यात्॥ ननु पश्यन्नपि न पश्यतीति विरुद्धव्यवहारः
उच्यत इति चेन्न॥ पश्यन्निह्युक्ते अलुप्तचिद्रूपः सन्नेव दृश्यपदार्थाभावेन न पश्यतीत्यभिप्रायः॥ यथा
प्रदीपः सर्वदा प्रकाशमान एव सन्प्रकाश्यघटाद्यभावेन हेतुना तत्त्व द्रष्टं न प्रकाशयतीतिवत्॥ देव
दत्तः जागरूकतया पश्यन्नेव सन्यज्ञदत्ताभावे सति यज्ञदत्तं॥ न पश्यतीति वच्च॥ पश्यन्नेव तन्न पश्य
तीति व्यवहारसंभवात्॥ विरुद्धव्यवहाराप्रसक्तेः॥ अपि च प्रदीपः भूतादिकालत्रयेपि विद्यमानः
एकरूपतया प्रकाशमानोपि सन्प्रकाश्यघटादिविषयाभावे किं प्रकाशयेत्॥ देवदत्तश्चापि॥ विवृत
चक्षुः सन्॥ यज्ञदत्ताभावे कथं यज्ञदत्तं पश्येत॥ एतावता॥ प्रकाशस्य वा दीपस्य द्रष्टुर्वा देवदत्त
स्य च॥ प्रकाश्याभावे दृश्याभावे च प्रकाशविषये दर्शनविषये वा॥ को वा अपराधः प्राप्तः॥ एवं सति॥

पश्यन्नैतन्नपश्यतीतिव्यवहर्तुः अयमाशयः॥ पश्यन्नित्युक्ते॥ द्रव्याभावं पश्यन्नपि॥ तदभावप्रतियो
गिनः॥ द्रव्यस्य। असत्त्वादेव तन्न पश्यतीति उचितो भवति॥ लोके सुप्तोत्थितानां सर्वेषामपि सुषुप्त्यवस्था
कालीन सर्वद्रव्याभावानुभवजन्यस्मृत्युत्पत्तेः दर्शनात्॥ अहमेतावंतं कालं सुप्तोऽभवं सुषुप्तौ॥ सर्व
द्रव्याभावः तदानीं मयानुभूतः॥ सुखमहमस्वाप्सं॥ न किंचिदवेदिषं॥ इत्याद्याकारेण सर्वद्रव्याभावस्व
रूपसुखसर्वाज्ञानैतत्त्रितयविषयकैकज्ञानस्यावश्यकतयापेक्षितत्वात्॥ तादृशज्ञानस्य अंतःकरणवृ
त्तित्वाभावेन स्फुटतया तदानीमेव तद्विषयस्फुरणाभावेपि सुषुप्त्युत्थानानंतरं तत्त्रितयविषयकस्मृतेः
सर्वैरनुभूयमानत्वात्॥ अनुभवस्मृत्योः समानविषयकत्वनियमात्॥ अनुभवजन्यं ज्ञानं स्मृतिरिति स्मृतेः
अनुभवपूर्वकत्वनियमाच्च घटज्ञानवानहं घटमहं जानामि इत्याद्याकारकअनुव्यवसायज्ञानवत् तदवस्था
यां एतत्त्रितयविषयकज्ञानं स्यैव साक्षिरूपत्वेन स्वस्वरूपात्मकप्रत्यगात्मत्वांगीकारात् आत्मनः जाय

स्वप्नसुषुप्त्यादिअवस्थाअनुभवितुःएकस्यैवअनुस्यूतत्वेनसर्वदासत्वस्यअवश्याभ्युपेयत्वात्॥ अन्यथा
सुषुप्तिदशायांआत्मनःनाशप्राप्त्यभ्युपगमप्रसंगः॥ जाग्रदादौउत्पत्तिप्रसंगश्चतथात्वांगीकारेक्षणिकज्ञा
नरूपबौद्धाभिमतआत्मतुल्यत्वप्रसक्तिः॥ तथास्वीकारेपिआत्मनःपूर्वकालीन स्मृत्यनुपपत्तिकृतहा
नाकृताभ्यागमप्रसक्तिः॥ नित्यत्वादिश्रुतिस्मृतिअनुभवादिप्रमाणविरोधानांप्रसक्तेश्चदुरुत्तरत्वात्॥
कथंचिदुक्तदशायांअहमस्मीइदमस्मीतिजाग्रदादिवत्प्रतीतेःअभावांगीकारेपिसूक्ष्मप्रतीतेःसत्व-
स्यस्मृत्युपपत्त्यादिअन्यथानुपपत्त्याअवश्यमभ्युपेयत्वात्॥ तदनभ्युपगमेपिसर्वप्रकारेणापिकथंचित्आ
त्मसत्वाभ्युपगमस्यअपरिहार्यत्वात्॥ इतरव्यावृत्ततयाअसंगात्मस्वरूपसत्वज्ञानमात्रेणआत्मसाक्षात्का
रतत्प्रयोज्यमोक्षप्राप्तिरूपमुमुक्षुविवक्षितफलसाधकत्वसिद्धेः सुषुप्तिदशायांविशेषज्ञानभावाभाववि
चारस्यनिष्प्रयोजनत्वात् तस्मात् असंमतत्वेनापिबलात्कारेणपूर्वोक्तसर्वोपपत्तिविरोधप्राप्तिप्रसंगेः

नाकामेनापि आत्मसत्त्वस्य अभ्युपगमप्रसक्त्या तदानीं विशेषज्ञानाभावस्य परवादिपूर्वपक्षोद्भावने अप्रयो
जनकत्वात्॥ एतावता तद्दशायां इतरज्ञानस्य सत्त्वेपि असत्त्वेपि वा आत्मनः अवस्थात्रयादिसाक्षित्वेन स
त्त्वांगीकारमात्रेण जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं प्रकाशते तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते॥ इत्या
दिश्रुत्यनुसारेण अनुभवानुसारेण च जाग्रत्स्वप्नसुषुप्तिमूर्छासमाधिउन्मादादिअवस्थासु परस्परव्यावृत्ता
सु अनुवृत्तत्वेन निर्विकारित्वेन असंगत्वेन च आत्मसत्त्वज्ञानस्यैव मोक्षप्रयोजकत्वेनैतादृशमननादेश्च मुमु
क्षोः आत्मज्ञानोत्पादकत्वरूपफलस्य प्राप्यत्वेन अधिकः अव्यावर्तकसुषुप्तिकालीनविशेषज्ञानभावाभाव
विचारः निरर्थकश्रमकर एवेति अत्रोपरम्यते अत एव श्लोकः बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यंतः स्फुरंतं सदा॥ स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया तस्मै श्रीगु
रुमूर्तये इत्यादिशंकरभगवत्पादाचार्यैः उक्तं प्रकृतमनुसरामः॥ एतद्धृतिवाक्यस्थपदानामर्थस्तु॥ हि

१·शा·
९२

नि·

यस्मात्कारणात्॥द्रष्टुः जाग्रत्स्वप्नसुषुप्त्यादिसर्वावस्थाद्रष्टुः॥साक्षिणः दीपादिवत्॥प्रकाशरूपस्य द्रष्टुः॥
तत्स्वरूपभूतायाः दृष्टेः प्रकाशरूपस्य ज्ञानस्य विपरिलोपो न विद्यते॥अविनाशित्वात्॥अलुप्तस्वभावत्वा
दित्यर्थः॥आत्मस्वरूपभूतायाः दृष्टेः प्रदीपादिवत्प्रकाशस्वरूपत्वात्॥लौकिकैः नैयायिकवैशेषिकादिभि
श्चांगीकृतांतःकरणवृत्तिलक्षणजडात्मकधात्वर्थक्रियारूपज्ञानस्य व्यावहारिकलौकिकक्रियात्ववत्॥त
स्याः क्रियात्वासंभवात्॥यथा दीपप्रकाशस्य धात्वर्थरूपक्रियात्वासंभवः॥तथैवेत्यभ्युपगंतव्यः॥किंच द्रष्टु
रिति॥निर्देशमात्रेण दर्शनरूपक्रियाश्रयत्वांगीकारे दर्शनरूपज्ञानभिन्नत्वावश्यंभावेन प्रकाशरूपदीपभि
न्नदीपाश्रयपात्रादेरप्रकाश्यत्ववत्॥आत्मनोपि ज्ञानभिन्नत्वेन हेतुना जडत्वप्रसंगस्य दुर्वारत्वात्॥ अय
मेवार्थः॥श्रुत्यंतरैः स्मृत्या च स्फुटीक्रियते॥तथा च जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाश यति॥कैवल्योपनि
षत्॥प्रकाशते इत्यस्य प्रकाशयतीत्यर्थः॥तंह देवमात्मबुद्धिप्रकाशं इति श्वेताश्वतरोपनिषत्॥तदेवाज्यो

तिषांज्योतिरिति॥ कठवल्ल्युपनिषत्॥ज्योतिषामपितज्ज्योतिः तमसः परमुच्यते॥ इतिगीतास्मृतिः॥ननु
तद्द्वितीयमस्तीति॥ तद्द्वितीयं॥तस्माद्द्वितीयं॥तद्द्वितीयं॥आत्मनः सकाशात्॥द्वितीयं तद्भिन्नं॥प्रमातृ
प्रमाण॥प्रमितिप्रमेयमिति॥किंचिद्वस्त्वपिनास्ति॥ अथवा॥तत्नास्ति॥यत्द्वितीयं॥वस्तुजातं॥जाग्र
त्स्वप्नयोः अविद्ययाप्रतिभातं॥तन्नास्तीत्यर्थः॥तत्रसुषुप्तौ अविद्योपस्थापितस्यदृश्यमात्रस्याभावात्॥ततोन्य
द्विभक्तं यत्पश्येदिति॥ ततः सर्वावभासभावापन्नात्मनः सकाशात् ॥विभक्तं भिन्नं॥अन्यत्॥अनात्मरूपं
यद्वस्तु आत्मापश्येत्॥आत्मनः भिन्नस्य॥अनात्ममात्रस्य॥अभावः पूर्वग्रंथैः श्रुतियुक्त्यनुभवादिभिः॥सम्य
क्प्रदर्शितः॥ इतिहेतोः आत्मातदानी अविद्यमानं वस्तु॥आत्मभिन्नं यत्पश्येदिति॥आक्षेपार्थः यत्किंचिद्वस्तुनः
तदानीं विद्यमानत्वे द्रष्टुं शक्यते॥सर्वाभावात्॥अविद्यमानं कथं पश्येदिति तात्पर्यार्थः॥अयमाशयः॥सु
षुप्तावस्थायां आत्मभिन्नदृश्यमात्राभावात्॥स्वयं एकरूपेण स्वप्रकाशतया सर्वावभासकस्वरूपेण विद्यमा

प्र॰श॰
६४

नएवसन्नपिदृश्याभावादेवहेतोः॥नपश्यतीति॥व्यवहारःसंभवति॥नतुआत्मनः॥अविद्यमानत्वात्॥ आत्मस्वरूपदृष्टेःलुप्तत्वाद्वा॥नपश्यतीतिव्यवहारःप्रयुक्तः॥जाग्रत्स्वप्नयोस्तु॥आत्मनःएवंरूपत्वेपिअविद्याकल्पितदृश्यभेदसमुदायस्यसत्वात्॥एतादृशव्यवहारासंभवःइतिज्ञेयः॥२३॥ एतदुत्तरखंडे॥ यद्वैतन्नजघ्रतीति ॥खंडस्यापिअयमेवार्थः॥ एवमेव ॥यद्वैतन्नविजानाती एतेषांखंडानामपिएकरूपतया॥अर्थोविज्ञेयः॥विशेषस्तु यद्वैतन्नजिघ्रतिइत्यत्रआघ्राणाभावः॥२४॥ एतदुत्तरखंडे ॥यद्वैतन्नरसयतेइत्यत्ररसास्वादनाभावः॥२५॥ एतदुत्तरखंडे ॥यद्वैतन्नवदतिइत्यत्रअभिवदनाभावः॥२६॥ एतदुत्तरखंडे ॥यद्वैतन्नशृणोतीत्यत्रश्रवणाभावः॥खंडः॥२७॥ यद्वैतन्नमनुतेइत्यत्रमननाभावः॥खंडः॥२८॥ यद्वैतन्नस्पृशतिइत्यत्रस्पर्शनाभावः॥खंडः॥२९॥ यद्वैतन्नविजानातिइत्यत्रविज्ञानाभावः॥ खंडः॥३०॥ प्रतिपाद्यते ॥शेषंसर्वसमानं॥यद्यपिस्वयंज्यो

नि॰

तिस्वरूपस्यात्मनःप्रज्ञानघनत्वेनएकरूपत्वेपि॥नानाछिद्रघटोदरस्थदीपप्रभावत्॥चक्षुरादितत्तदिं
द्रियद्वाराअंतःकरणवृत्तिप्रविष्टचित्प्रतिबिंबरूपेणबहिर्निर्गत्यतत्तद्विषयरूपरसादिव्याप्यातत्तच्चैतन्यो
पाधिभूतमनइंद्रियादिप्रयोज्यअभिधेयत्वेनपश्यति॥शृणोति॥जिघ्रति॥रसयतेत्यादिव्यवहारविषयो
भवति॥नस्वरूपतः॥नानात्वं॥प्राप्नोति॥यथास्वच्छः॥स्फटिकः॥रक्तनीलपीतादिउपाधिसंपर्कात्॥तत्त
च्छब्दवाच्यत्वेन॥व्यवह्रीयमाणोदृश्यते॥एवमेवआत्मचैतन्यस्यापि॥तत्तद्व्यापाराद्यनुरूपशब्दाभि
धेयत्वं॥संभवतितद्यथा॥यदेतद्धृदयंमनश्चैतत्॥संज्ञानमाज्ञानं॥इत्युपक्रम्य॥सर्वाण्येवैतानि॥प्रज्ञा
नस्यनामधेयानिभवंतीति॥ऐतरेयश्रुत्यातत्तद्वृत्त्यभिधानविषयत्वंयथावा॥चतुर्थाध्याये॥बृहदारण्ये
सइहप्रविष्टः॥आनखाग्रेभ्यः॥इत्युपक्रम्यसप्राणन्नेवप्राणोनामभवति॥वदन्वाक्॥पश्यंश्चक्षुः॥शृ
ण्वन्श्रोत्रं॥मन्वानोमनः॥तान्यस्यैतानि॥कर्मनामान्येव॥इत्यादिदर्शनात्॥२०॥ तदुत्तरखंडे ॥

यत्र वा अन्यदिव स्यादिसादिना ॥ विजानीयात् इत्यंतेन ग्रंथेन ॥ यत्र इति ॥ यस्मिन् जाग्रति स्वप्ने च ॥ अ
न्यदिव ॥ इव शब्देन जाग्रत्स्वप्नयोः समानतया परमार्थतः आत्मव्यतिरेकेण कश्चन पदार्थो नास्त्येवेति गम्य
ते ॥ अपितु ॥ अविद्यया अन्यदिव वस्तु भ्रांत्या प्रतीयते ॥ यद्येवं तद्दा ॥ अन्यः प्रमाता ॥ अन्यं प्रमेयं चक्षुषा पश्य
तीत्यर्थः ॥ एवं घ्राणेन गंधं श्रवणेन शब्दं ॥ इत्यादि विजानीयादित्यंतं र्डत्यं ॥ ३१ ॥ एतदुत्तरखंडे ॥ स
लिल एको द्रष्टा ॥ इत्यादिना मात्रामुपजीवंतीत्यंतेन ग्रंथेन ॥ सलिल एक इति ॥ उदकमिव ॥ अतिस्व
छत्वात् ॥ आत्मनः धर्मगुणक्रियादिशून्यत्वेन स्वयंज्योतिष्ट्वेन च ॥ स्वछत्वं शास्त्रयुक्तिविद्वदनुभवैश्च ॥ सि
द्धं ॥ सः आत्मा ॥ अत एव एकः अद्वितीयः ॥ पदार्थांतररहितः ॥ द्रष्टा पूर्वोक्तरीत्या दृशिमात्रस्वरूपः ॥ अदृष्टे
तिवा परिछेदः ॥ अदृष्टो द्रष्टेति ॥ पंचमाध्याये प्रदर्शितत्वात् ॥ अद्वैत इति द्रष्टव्याभावात् ॥ यद्यपि एक
इत्यनेनैव द्रष्टव्यमात्रनिषेधः प्राप्तः ॥ तथापि स्वगतभेदनिषेधार्थं अद्वैतशब्दः ॥ प्रवृत्तः लोके वृक्षस्य ॥ ए

कत्वेविस्वगतभेदस्य॥शाखापत्रफलपुष्पादि॥परस्परप्रतियोगिकस्यसिद्धत्वेनएकएववृक्षस्तिष्ठती
ति॥उक्तत्वेपिवृक्षव्यतिरिक्तपदार्थांतरनिषेधः॥प्रतीयते॥नतु॥वृक्षांतर्गतस्वगतपरस्परभेदःनिषिध्य
ते॥तथादेवदत्तस्य॥शरीरप्राणेंद्रियादिविशिष्टवेषेण॥एकत्वेपिदेवदत्तः॥एकोवर्ततेदेवदत्तादन्योना
स्ति॥इतिप्रयोगेसत्यपिच॥देवदत्तांतरस्याप्रतीतावपिदेवदत्तशरीरादि॥स्वगतभेदस्यहस्तपादप्राणें
द्रियमन॥जातिगुणक्रियादिस्वगतभेदस्यपरस्परप्रतियोगिकस्यननिषेधः॥संभवति॥अतः॥अद्वैतइत्युक्ते
द्रष्टव्यमात्रस्यनिषेधेप्राप्तेहङ्मात्रस्यअ वशेषणात्॥अद्वैतत्वसिद्धिर्भवतिनचएकत्वाभिधानेपिदेवद
त्तभिन्नद्रष्टव्यमात्रनिषेधः॥संभवत्येवेतिवाच्यं॥पूर्वोक्तरीत्यादेवदत्तस्यविशिष्टरूपत्वेनस्वगतभेदस्यह
स्तपादादिषुप्राणेंद्रियादिषुच॥परस्परप्रतियोगिकस्यसिद्धत्वेन॥स्वेनैवदेवदत्तेनद्रष्टुंशक्यत्वेनहस्तपा
दादीनांद्रष्टव्यत्वसंभवात्॥अद्वैतोभवतीत्यस्यनपौनरुक्त्यं॥एषब्रह्मलोकइतिएषःआत्मा॥ब्रह्मैवलो

प्र॰ ग्रा॰ ९६

कः ब्रम्हलोकः॥ इति कर्मधारयसमासः॥ लोकः लोक्यते॥ अवलोक्यते॥ अनुभूयते॥ आत्मास्वरूपत्वेनेति
लोकः॥ लोकृ दर्शन इति धातोः आत्मानमेव लोकमुपासीतेत्यादिवत्॥ इति जनकं प्रति याज्ञवल्क्यो उपदि
ष्टवानित्यर्थः॥ अस्य आत्मनः॥ एषा सर्वात्मभावः॥ परमागतिः एषेति॥ स्त्रीलिंगनिर्देशस्य पूर्वोक्तसर्वात्म
भाववाचकत्वासंभवेपि विधेयार्थकगतिशब्दस्य स्त्रीलिंगत्वेन तद्विशेषणतया विधेयाभिप्रायेण स्त्रीलिंग
त्वसंभवात्॥ एषेति पूर्वपरामर्शः॥ पूर्वोक्तसर्वात्मभावाभिप्रायः॥ गम्यत इति गतिः॥ स्वरूपमित्यर्थः॥ स
र्वात्मभाव एव गम्यस्थानं स्वरूपं ब्रम्हादिस्तंबपर्यंताः देहादिरूपाः गतयः अपरमाः अर्चिरादिमार्गेण
ब्रम्हलोकप्राप्तिरूपगतेरपि अपरमत्वात्॥ स्वरूपप्राप्तिः परमागतिः॥ ब्रम्हलोकादयोपि तत्र भेदस्य
सिद्धत्वात्॥ आविद्यकत्वात्॥ अपरमागतिरेव स्वरूपगतिस्तु॥ अन्यत्र गतिगमनासंभवेन परमागति
रित्युच्यते॥ साकाष्ठा सापरागतिरिति श्रुत्यंतरात्॥ यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजा

नि॰

नातीति॥ इतिश्रुत्यंतराच्च॥ सर्वात्मस्वरूपस्वाभाविकआत्मगतेः॥ परमत्वंयुक्तमेवएषास्यपरमासंप
दिति॥ एषः सर्वात्मभावः अस्यआत्मनः परमासंपत्॥ अन्येषांपुत्रधनादिसंपदां॥ सर्वेषामपि॥ इयंसंपत्
उत्तमोत्तमा अतोन्यदार्तमिति श्रुतेः॥ आत्मव्यतिरिक्तस्यसर्वस्यापिअनित्यत्वोक्तेः॥ आब्रह्मभवनाल्लो
काः॥ पुनरावर्तिनोर्जुन॥ मामुपेत्यतुकौंतेयपुनर्जन्मनविद्यते॥ इत्यादिस्मृतेश्च॥ एषेतिस्त्रीलिंगनिर्देशः
सर्वात्मभावस्यपूर्ववत्॥ विधेयाभिप्रायेणएषोस्यपरमोलोकइति॥ एषः अस्येतिपूर्ववत्॥ सर्वात्मभा
वः लोकइतिलोक्यते॥ अनुभूयतइतिलोकः॥ परमः आत्मस्वरूपंसर्वांतरइत्यर्थः॥ अन्योंतरआत्माप्राण
मयः॥ अन्योंतरआत्मामनोमयः॥ एवंक्रमेणआनंदमयात्मनःसकाशात्॥ अंतरतमः॥ ब्रह्मपुच्छंप्रतिष्ठे
ति॥ सर्वांतरतमइति॥ परमात्मैवपरमोलोकः॥ अन्यस्यआत्मांतरस्याभावात्॥ यत्साक्षादपरोक्षाद्ब्रह्मय
आत्मासर्वांतरः इतिबृहदारण्यश्रुतेः॥ एषोस्यपरमआनंदइति। अस्यात्मनः। एषः सर्वात्मभावः। परमानं

दः आत्यंतिकसुखमितियावत्। अद्वैतत्वात्। तदेतत्पुत्रात्प्रेयोवित्तात्प्रेयोन्यस्मात्सर्वस्माद्यदन्तरतरं ह्ययमात्मेतितृतीयाध्यायेप्रतिपादनात्॥ ॥ विज्ञानमानंदं। ब्रह्म। आनंदाद्ध्येवखल्विमानिभूतानिजायंते इत्यादिश्रुतिभ्यः। यत्रनान्यत्पश्यतिइत्युपक्रम्य। सभूमातत्सुखमिति। नाल्पेसुखमस्तितन्मर्त्यमितिच। अन्येषांविषयसुखानां दोषग्रस्तत्वेन। अनित्यत्वं। आत्मस्वरूपसुखस्य। नित्यत्वंनिरुपाधिकत्वं। निरतिशयत्वंच। प्रतिपाद्यते। तथा। सुषुप्ति। समाध्यादिषु अनुभूतत्वाच्च। येहिसंस्पर्शजाभोगादुःखयोनयएवते। आद्यंतवंतः। कौंतेयनतेषुरमतेबुधः। इतिविषयसुखस्य। अनित्यत्वंदोषग्रस्तत्वंचाभिधाय। योंतः सुखोंतरारामइति। स्वरूपसुखस्य। दोषराहित्यं॥ ॥ब्रह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यच॥ शाश्वतस्यचधर्मस्यसुखस्यैकांतिकस्यचेतिच॥ गीतास्मृतेः परमानंदत्वप्रतिपादनाच्च॥ ॥एतस्यैवानंदस्येति॥ उत्तरखंडेवक्ष्यमाणानंदतारतम्यक्रमेणपरमानंदस्य। स्वात्मभूतस्यमात्राः लेशांतां। मात्रां। लेशं। अन्यानिभूतानि। इन्द्रब्रह्मादीनि। उपजीवंति।

तदुपजीव्यजीवंति। स्थितिं प्राप्नुवंतीत्यर्थः ॥ ॥ सैषानंदस्य मीमांसा भवति। युवास्यात्साधुयुवाध्यायकः
इत्यादिगुणविशिष्टसार्वभौमानंदप्रभृति। स एको ब्रह्मण आनंदः। इत्यंतं तारतम्यक्रमेण। परमानंदस्य। तैत्तरी
यश्रुतावपि प्रतीयमानत्वात्॥ ३२ ॥ एतदुत्तरखंडे ॥ ॥ स यो मनुष्याणां राद्धः इत्यादिना सर्वेभ्यो मांते
भ्य उदरौत्सीदिति इत्यंतेन ग्रंथेन ॥ ॥ पूर्वखंडोक्त ॥ एषोऽस्य परम आनंद एतस्यैवानंदस्यान्यानि भूतानि मा
त्रामुपजीवंति। इति वाक्यस्यार्थभूत। परमानंदस्य। विपृषस्थानीयमात्राशब्दितअंशस्वरूपप्रदर्शनेन। समु
द्रस्थानीयपरमानंद। स्वरूपज्ञापनार्थं। तस्य अपरिमितत्व। सूचनार्थत्वं च। इयं खंडिका। आरभ्यते ॥ ॥ तत्र
जिज्ञासोः। बुध्यारोहाय ॥ ॥ स यो मनुष्याणां राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नत
मः स मनुष्याणां परम आनंद इति। सार्वभौमस्य। युधिष्ठिरादेः सर्वभूम्याधिपत्य। सर्वधनाश्रयत्व। गोस्त्रीपुत्रह
स्त्यश्वसेनाविद्याजन। देहादिसर्वबलोपेतत्वेन मनुष्यभोगोपयोगियावत्सामग्रीविशिष्टत्वेन च। संपन्नतमः

सर्वसंपन्नश्रेष्ठः यःपुरुषःतस्ययआनंदः बहुकालसिध्धःसएकःमनुष्यानंदइति।गुणसंख्यातारतंम्य प्र
दर्शनार्थंलोकैः।दृष्टस्यश्रुतस्यवा।प्रदर्शनेनश्रुतिः मुमुक्षोर्बुध्यारोहणंकारयति।सयोमनुष्याणां राध्दइ
त्युपक्रम्य।अथैषएवपरमआनंदइत्यंतेन॥ ॥तैत्तिरीयेपि।युवास्यात्साधुयुवाध्यायकः आशिष्टोदृढि
ष्ठोबलिष्टः तस्येयंपृथिवीसर्वावित्तस्यपूर्णास्यात्सएकोमानुषआनंदइत्युक्तत्वात्अथयेशतंमनुष्याणा
मानंदाःसएकः पितृणांजितलोकानामानंदइति॥ ॥एवंक्रमेणगंधर्वलोकआनंद॥कर्मदेवानंद।
आजानदेवानंदप्रजापतिलोकआनंदब्रह्मलोकआनंदानांउत्तरोत्तरशतगुणितत्वेनउपलक्षणतया
परमानंदस्यप्रदर्शितत्वात्।सएकः परमआनंदइत्यंत्तेन।तस्यैवपरमानंदस्य।ज्ञानभिन्नमुक्तस्यच।अ
भिन्नत्वंप्रतिपाद्यते।यश्चश्रोत्रियोवृजनोकामहतइतिवाक्येन॥सएकोब्रह्मलोकआनंदइतिवाक्ये।य
श्चायस्तु।श्रोत्रियः।वेदवेदार्थवित्।अवृजनः पापरहितः।यथोक्तकारीतियावत्।अ कामहतः।आत्यं

तिकवितृष्णः।सर्वविषयविरागीतियावत्।सः।ब्रंह्मलोकः।ब्रह्मैवलोकः।ब्रंह्मलोकः।ब्रंह्मस्वरूपभूतइ
तितात्पर्यं॥अथैषएवपरमआनंदइति॥ ॥एषःश्रोत्रियत्वादिविशिष्टः।आत्मज्ञान्येव।परमआनंदः
पूर्वखंडांतेउद्दिष्टः।एषएवब्रंह्मलोकः।ब्रंह्मस्वभावइत्यर्थः॥ ॥एषपरमानंदः सुषुप्त्यवस्थायामनुभू
तःपरमानंदःश्रोत्रियस्यअकामहतस्यब्रह्मज्ञानिनः परमानंदस्यच।अत्यंन्ताभेदःप्रदर्शितः।यश्चश्रोत्रिय
इति।एषपरमानंदइतिच।समानविभक्तिवचननिर्देशात्॥ ॥तैत्तिरीयेपि॥ ॥आनंदाध्येवखल्वि
मानिभूतानिजायंते।आनंदेनजातानिजीवंति।आनंदंप्रयंन्त्यभिसंविशंतीति।सर्वोपादानत्वेन॥अपरि
भिन्नत्वेनच।परमानंदत्वंप्रतिपाद्यते।आनंदंब्रंह्मणोविद्वान्नबिभेतिकुतश्चनेति।श्रोत्रियत्वोपलक्षित
ज्ञानिनः।स्वरूपभूतानंदज्ञानेनभयाभावप्रदर्शनेनचब्रंह्मणाविपश्चितेत्यादिवाक्यांतरैश्च।विदुषः।ब्रं
ह्माभेदप्राप्त्यापरमानंदस्वरूपत्वंसिद्धंभवति॥ ॥छांदोग्येपि।यत्रनान्यत्पश्यति।नान्यच्छृणोति।नान्यद्वि

जानाति। सभूमेति॥ तत्सुखमितिचपरमानंदत्वंप्रतिपाद्यते॥ ॥अत्र। अद्वैतात्मस्वरूपानंदविषये। अ
यं। सर्वेषां। नः। अनुभवः। सुषुप्तिदशायां। सार्वजनिनोवर्तते। विद्वदनुभवस्तु। सर्वदावर्तते। इत्यर्थस्यभाष्ये
पिसूचितत्वात्॥ एषब्रंह्मलोकः सम्राडितिहोवाचयाज्ञवल्क्यः। सोहंभगवतेसहस्रंददाम्यतऊर्ध्वंविमो
क्षायैवब्रूहीति॥ पूर्वग्रन्थेषु। तत्रतत्रबहुवारंएतद्वाक्यंपठितम्। अस्यतात्पर्यार्थस्तु। हेभगवन्। याज्ञवल्क्य
। सोहं। त्वया। उपदिष्टः कृतार्थतांप्राप्तः अहंभगवतेतुभ्यं। आचार्यायब्रंह्मोपदेष्ट्रेसहस्रंददामिति॥ ॥पूर्वं
हस्तिऋषभपूःसहस्रंददामीति। पूर्वोक्तरीत्याविद्यानिष्क्रयणार्थं। दक्षिणात्वेन। गवांसहस्रंददामि। अतऊ
र्ध्वं। ब्रंह्मज्ञानसाधनीभूतान्मयाअज्ञातांशान्। मोक्षप्रयोजकीभूतान्ब्रूहीतिजनकप्रश्नाभिप्रायः॥ ॥न
नुपूर्वमेवयाज्ञवल्क्येनोपदिष्टः। जनकःस्वयंकृतार्थतांप्राप्तइव॥ ॥अभयंवैजनकप्राप्तोसीतिहोवाच
याज्ञवल्क्यः। सहोवाचजनकोवैदेहोभयंत्वागच्छताद्याज्ञवल्क्ययोनोभगवन्नभयंवेदयसेनमस्तेस्त्विमे

विदेहाअयमहमस्मीति॥ ॥अन्यत्रविदेहांददामि। मांचापिसहदास्यायेतिचेत्यादिवाक्यैः। तत्रतत्र। स्व
स्यकृतार्थताज्ञापकैतानिवाक्यानिजनकः। उक्तवान्। एवंस्थितेपुनःपुनःसहस्रंददामिअतऊर्ध्वविमोक्षा
येवब्रूहीति॥ इतिजनकेनकिमर्थमुच्यते। तयोःपूर्वापरयोर्विरोधः। स्पष्टतयाप्रतीयते। इतिचेद्बाढम्॥ ॥य
द्यपि। सएषनेतिनेतीत्यादिना। अनात्मनिषेधनेननिषेधावधितयास्वात्मत्वेनब्रह्मणःव्यक्तिज्ञानस्यसंभवा
त्। स्वस्यकृतार्थतां॥ प्राप्तः तथापिजनकःआत्माभिन्नब्रह्मणःअविद्याकल्पितजातिगुणधर्मक्रियादिव्यावर्त
कअज्ञातविशेषांशज्ञानेन। विशेषतोसाकल्येनजगद्व्यावृत्तरूपेणब्रह्मज्ञानार्थंजनकप्रश्नस्यउपपत्तिस्सं
भवति॥ ॥तद्यथा। अयंघटइति। प्रत्यक्षविषयतयाघटस्य। स्वरूपभूतव्यक्तित्वेनरूपेणज्ञातत्वेपि। अयं
घटःद्रव्यंवा। अद्रव्यंवाअयंघटः। पार्थिवोवा। अन्योवा। अयंघटःस्वप्रकाशोवा। अन्यप्रकाश्योवा। अयंनित्यो
वा। अनित्योवेत्यादि। बहुविधसंशयविषयत्वेन। ज्ञातव्यत्वस्य। अवशिष्टत्वात्। तत्ज्ञानंप्राप्नुवतःप्रश्नःउपप

द्यतएव॥ यथावाब्रह्मणः।आत्मस्वरूपत्वेनयत्किंचिद्धर्मोपलक्षिततयाज्ञातत्वेपि।नस्यशून्यवादिरीत्या।
शून्यत्वसंदेहे तत्प्रश्नस्यगुरुणासद्रूपत्वमुपदिश्यते।सद्रूपत्वेपि।सांख्यप्रकृतिवत्।जडत्वसंशयो गुरुणाचे
तनत्वमुपदिश्यते।चेतनत्वेपि।मिमांसकरीत्याजीववत्।परिछिन्नत्वसंशये।अपरिछिन्नत्वरूपानंतत्वमुप
दिश्यते।अपरिछिन्नत्वेपिनैय्यायिकवत्।विभुत्वेन।कर्तृत्वभोक्तृत्वसंशयेअसंङ्गत्वमुपदिश्यते।आकाशव
त्।असंगत्वेपि।अनानंदत्वसंशये।सुखरूपत्वमुपदिश्यते।एवमेवजगंनिष्ठ।अनेकगुणधर्मक्रियादिव्याव
त्तस्वरूपज्ञानार्थं।विशेषविशेषप्रश्नः।तदनुरूप।विशेषोपदेशश्चयथासंभवं।यथाश्रुतिवाक्यंसर्वत्रसंभ
वत्येवेति।बहुकृत्वःप्रश्नोनदोषायभवति॥ ॥नचएवमन्वेषणे।जगन्निष्ठअसंख्याकगुणधर्मक्रियादि।व्या
वृत्यर्थम।ब्रह्मात्मविषयकानेकप्रश्नाः।अपेक्षिताभवंति।तेषामपारत्वात्।संशयात्यंतिकानिवृत्तिप्रसंगः।
दुर्वारइतिवाच्यं॥प्रधानभूतानांकेषांचित्।जगन्निष्ठजातिगुणधर्मक्रियादिविशेषाणांव्यावृत्याब्रह्मस्वरू

पेज्ञाते। अन्येषांगुणभूतानांव्यावृत्तिः स्वेनैवविशिष्येणऊह्यते। इतिहेतोः त्वयोक्तदोषानवकाशः पूर्वोक्ता
नां। सोहंभगवतेसहस्रंददामि॥ अतऊर्ध्वविमोक्षायैवब्रूहीत्येतेषांसर्वेषांवाक्यानामपि। इदमेवतात्प
र्यंद्रष्टव्यम्॥ ॥ अत्रहयाज्ञवल्क्योभिभयांचकारमेधावीराजासर्वेभ्योमांतेभ्यउदरौत्सीदिति॥ वाक्य
स्यतात्पर्यंतुपूर्वंअतऊर्ध्वविमोक्षायैवब्रूहीतिजनकेनपुनः पुनः प्रश्नेकृतेयाज्ञवल्क्यः भीतिंप्राप्तवा
निति श्रुतिर्वक्ति। तद्भयकारणंकिमितिविचारेकृतेनतत्प्रश्नविषयकाज्ञानात्भीतइतिन। उत्तरंवक्तुम
सामर्थ्यात्। भीतइत्यपिनकिंतुराजामेधावीप्रश्नप्रतिवचनाभ्यामेवमांनिरोधंकरोति। मयाप्रतिपादितं
सर्वंस्वप्रश्नोत्तरस्य। एकदेशत्वेनगृहीत्वास्वप्रश्नस्यासंपूर्णोत्तरप्राप्त्यर्थं। पुनः पुनः प्रश्नंकरोतिराज्ञः अति
मेधावित्वात्। पूर्वदत्तवरनिमित्तककामप्रश्नव्याजेनअस्मत्संबंधिसर्वविज्ञानंअयंस्वीकर्तुमिच्छति। इत्ये
वयाज्ञवल्क्यस्यभयकारणंनत्वज्ञानासामर्थ्ये। एतत्कर्तृकप्रश्नतत्प्रतिवचनयोः। अवसानमेवनसंभव

तीतितात्पर्यार्थः॥ ॥तथाच॥भाष्यं॥अत्रह विमोक्षायेत्यस्मिन्वाक्ये।याज्ञवल्क्योभिभयांचकारभीतवा
न्।याज्ञवल्क्यस्यभयकारणमाहश्रुतिः।नयाज्ञवल्क्योवक्तृत्वसामर्थ्याभावाद्भीतवानज्ञानाद्वा॥किंतर्हिमे
धावीराजासर्वेभ्यो।मांतेभ्यःप्रश्ननिर्णयावसानेभ्यःउदरौत्सीत्॥आवृणोतु।अवरोधंकृतवानित्यर्थः।यद्य
न्मयानिर्णीतंप्रश्नानुरूपंउत्तरंविमोक्षार्थंतत्तदेकदेशत्वेनैवकामप्रश्नस्यगृहीत्वापुनःपुनर्मांपर्यनुयु
ङ्क्ते।एव।मेधावित्वादित्येतद्भयकारणं।सर्वंमदीयंविज्ञानंकामप्रश्नव्याजेनोपादित्सतीति॥ ॥एतेनया
ज्ञवल्क्यस्यतत्प्रश्नविषयविषयकज्ञानाभावात्।तत्प्रश्नस्यउत्तरंवक्तुंसामर्थ्याभावाद्वा।भयमुत्पन्नमि
तिकश्चन।जानीयात्।तथाबुद्धिःकस्यापिमाभूदितियाज्ञवल्क्यस्यतद्ज्ञानं।तदसामर्थ्यवानद्भयका
रणंनभवति।अपितु।राजाकामप्रश्नव्याजेनमदीयंसर्वंविज्ञानं।अपहर्तुमिच्छतीति।इदमेवभयकारणं।
इतिस्पष्टतया।याज्ञवल्क्यपक्षपातमनुसृत्य।मेधावीराजासर्वेभ्योमांतेभ्यउदरौत्सीदिति।श्रुतिरेववक्ति।

नस्मात्। श्रुत्याभाष्यकारेणच याज्ञवल्क्यस्यमाहात्म्यप्रकरनेनैव तस्यन्यूनताप्राप्तिः उभयोः असंमतेति
गम्यते॥ ॥ ननु आत्मज्ञानिनः याज्ञवल्क्यस्यस्वनिष्टयावद्विज्ञानं। राजाअपहरतीतिकिमर्थंभयंभव
ति। तद्भयस्य। लोभमूलकत्वं राजास्वसमानविज्ञानवान्भवतीति असूयाचप्रतीयते। एतादृशलाभः अ
सूयाचब्रंह्मविदः तस्यसंभावितः इतिचेत्सत्यं॥ तथापिराज्ञेप्रधानीभूतआत्मज्ञानसाधनानिमुख्यप्रयोज
कानिकानिचित्। पूर्वमेवउक्तानिकिमर्थं। बहूंशज्ञानापेक्षाजायते। पूर्वोक्तसाधनज्ञानादेवमोक्षःसिध्यः।
अथवा। अधिकाकांक्षायामपि। पूर्वोक्तसाधनज्ञानादेवोत्तरोत्स्यत्स्यमानाशंकादीनामपि। स्वयमेवउत्तर
स्य। ऊहितुंशक्यत्वात्। तस्यमहामेधावित्वाच्च। किमर्थंअधिकप्रश्नोत्तरकलापेन। अथवास्वस्यनवनवो
त्पन्नसंशयानांप्रश्नोत्तरपरंपराप्रवाहप्रसक्तौयावज्जीवंउभयोरपिप्रश्नोत्तरव्यापारेणैवकालस्यचरि
तार्थत्वात्। उभयोरैहिकामुष्मिकसंपादककालस्यअसंभवाच्च। राज्ञः अतिमेधावित्वेन। प्रश्नपरंपरायाः

विरामाभावेन उत्पत्स्यमानत्वसंभवाच्च। उत्तरत्र मैत्रेयीब्राह्मणे वक्ष्यमाणरीत्या स्वेन सन्यासग्रहणकर्त
व्यस्य। अतिविलंबरूपविघ्नाचरणं राजा करोतीति याज्ञवल्क्यतात्पर्यस्य सिद्धत्वात्। उत्तरत्र करिष्यमा
णसन्यासविघ्नशंकैव भयकारणं न तु सामान्यतः स्वनिष्ठयावद्विज्ञानस्वीकारशंकैव भयकारणं॥ ॥
लोकेपि केचित् स्वेन कर्तव्यस्य कार्यस्य कालविलंब एव विघ्नं मन्यंते। अतः एतद्विघ्नशंकैव। याज्ञवल्क्यस्य
भयकारणं भवति॥ भाष्यकारस्यापि इदमेव तात्पर्यमिति सूक्ष्मरूपेण विचार्यमाणे अवसीयते॥ ॥नतु
स्वविज्ञानापहरणशंका भयकारणं॥ ॥अन्यथा॥ स्वकर्तव्यसंन्यासग्रहणं विहाय स्वयमेव राजानं
प्रति आगत्य तस्य मुमुक्षुतां। जिज्ञासां चोत्पाद्य तदाकांक्षानिमित्तकतत्प्रश्नादीनां। उत्तरत्वेन आत्मज्ञानं
तत्साधनानि चोपदिश्य। तदानीं स्वनिष्ठसर्वविज्ञानं अयमपहरतीति। भयं प्राप्तुं कथं योग्यो भवेत्। किंच।
स्वयं प्रव्रजिष्यन् स न राज्ञे पूर्वं कामप्रश्नस्य उत्तरं ददामीति। वरं दत्तवानासीत्। प्रत्युत राजा महाप्राज्ञः। जि

ज्ञासूक्ष्म महाधार्मिकः। एतंज्ञानोत्पादनेन कृतार्थं करिष्यामि। न्यायतः विचार्यमाणे तस्य कृतार्थता। मयैव प्रापयितव्या॥ ॥ पंचमाध्याये राज्ञा ब्रह्मोपदेष्टु परीक्षार्थमेव सालंकृत गोसहस्रं ब्रह्मिष्ठायेति दत्तं॥ अतः। मयैव। सः कृतार्थो भवितव्यः। इति। पूर्वब्राह्मणादिषु तद्भाष्येषु च प्रतीयते। अत एव षडाचार्य ब्राह्मणेषु षट्स्वपि। राज्ञा हस्त्यृषभं सहस्रं ददामीति प्रतिपर्यायं। उक्तत्वेपि। पिता मे मन्यत नाननुशिष्य हरेतेति शिष्यं। कृतार्थमकृत्वा। दक्षिणा न हर्तव्येति। मम पितुः संमतमित्युक्त्वा पुनः पुनः राज्ञः अकृतार्थत्वज्ञानमुत्पाद्य ज्ञाने च्छोत्पादन द्वारा। स्वयमुपदिष्टवानित्यपि पूर्वोक्तस्य अर्थस्य गमकं वर्तते॥ २३॥ ॥ तथाहि स्वयं प्रव्रजिष्यन् राजानं प्रति आगत्य ब्रह्मोपदेशं कृत्वा। अभयं वै जनक प्राप्तोसीति शिष्यं मोक्षं प्रापय्य। इमे विदेहा अयमहमस्मि। विदेहान् ददामि मां चापि सह दास्यायेति तेन विदेहराज्य समर्पणं आत्म समर्पणं च कृतमपि तत्परित्यज्य पूर्वं स्थित भार्याद्वयं गृहादिकं च परित्यज्य सन्यासं कृतवानिति। श्रुतौ प्रतीयमानत्वात्। स

प्र॰ शा॰
९३

न्यासस्यकालविलंबरूपविघ्ननिमित्तकभयमेवयाज्ञवल्क्यस्यतात्पर्यविषयः नान्यदितिनिश्चीयते॥ ॥
अपिचविद्यारण्यकृतजीवन्मुक्तिप्रकरणेपि। परंतत्वंविदितवद्भिःसंपाद्यमानोविद्वत्संन्यासः। तच्चयाज्ञव
ल्क्यस्संपादयामास। तथाहिविद्वद्भिः। रोमणिर्भगवान्याज्ञवल्क्यः। इत्युपक्रम्य। कांचित्संगतिंमध्येउपपा
द्य अनंतरं वीतरागकथायांबृहदारण्यषष्ठाध्यायोक्तरीत्यासंक्षेपविस्तराभ्यांअनेकधाजनकंबोधइत्वा
मैत्रेयींबुबोधयिषुस्तस्यास्त्वरयातत्वाभिमुख्याः स्वकर्तव्यंसन्यासंप्रतिजज्ञेतस्तांबोधयित्वास्वयंसन्यासंचकार
तदुभयंमैत्रेयीब्राह्मणस्याद्यंतयोराम्नायते। अथवाबृहदारण्यचतुर्थाध्यायेमैत्रेयिब्राह्मणोक्तरीत्यावाया
ज्ञवल्क्योन्यद्वृत्तमुपाकरिष्यन्मैत्रेयीतिहोचप्रव्रजिष्यन्वाअरेअहमस्मास्थानादस्मीतिएतावदरेखल्वमृ
तत्वमिति। होक्त्वायाज्ञवल्क्यः प्रवव्राजेतिचजीवन्मुक्तिप्रपकरणोक्तरीत्याउभयमैत्रेयिब्राह्मणाद्यंतयो
रपिस्वेनकरिष्यमाणसन्यासस्यत्वरयेतिविशेषणपूर्वकाभिप्रायेणकंठतएवमैत्रेयींप्रतिनिवेदयामास

नि॰

तिश्रुतावेव प्रतीयमानत्वात्। विद्यारण्यैः त्वरया प्रव्राजयिषुरित्यादिपदप्रयोगस्याकृतत्वाच्च। स्वनिष्ठं सर्ववि
ज्ञानं राजा अपहरतीति भयकारणमिति केनापि वक्तुं न शक्यते। प्रत्युत राजानं प्रतिगमनदशायां राजाशि
ष्यो नाभूत्॥ राज्ञः उपदेशानंतरं विदेहान्ददामि। मां चापि सह दास्यायेति आत्मनिवेदनपूर्वकस्वराज्यसमर्प
णं कृतवान्। तथापि राज्यं स्वपत्न्यादिकं सर्वं परित्यज्य सन्न्यासं कृतवानित्यत्र स्वनिष्ठज्ञानापहारं राज्ञा करो
तीति भयकारणमिति अभिवदनं मूर्खप्रलपितमिति पंडितैः सम्यगवगम्यत एव॥ ॥एतदुत्तरखंडे॥ ॥
सन्न्यासपर एतस्मिन् स्वप्नांते इत्यादिना प्रतियोन्याद्रवति बुद्धांतायैव इत्यंतेन ग्रंथेन॥ पूर्वखंडाद्युक्तार्थे
जातं तु स्वयंज्योतिस्वरूपस्यात्मनः जाग्रदादिषु अविद्यया स्वात्मान्यवस्तुसद्भाववत् प्रतीतिसत्त्वसत्त्वक
र्तृकर्मक्रियादिभेदमनूद्य। अवस्थात्रयेऽपि स्वस्यानुस्यूतत्वेन तद्दृश्यानां परस्परावस्थाव्यभिचारित्वेन च असं
गत्वं प्रतिपाद्य। दृष्ट्वैव पुण्यं च पापं चेति बुद्धांतशब्दितजाग्रदादिषु पापपुण्यफलरूपसुखदुःखानुभावा

दिसर्वव्यापारेषुसत्स्वपि।स्वस्यतद्दर्शनमेवनतुकर्तृत्वभोक्तृत्वादिकंइतिसाक्षित्वरूपप्रकाशत्वंस्
चयित्वास्वस्वरूपभूतसर्वात्मत्वंअहमेवेदंसर्वोस्मीतिमन्यतइतिवाक्येनस्वप्नावस्थायांदर्शयि
त्वानादृशप्रतीतेरपिअभावदशायांसुषुप्तौनिष्प्रपंचात्मस्वरूपत्वंप्रत्यक्षतएवज्ञापयित्वामहाम
त्स्यदृष्टांतेनअविद्यावद्दशायांसत्यताज्ञानेनसहस्वप्नांतबुद्धांतसंचरणमप्युपदिश्यतस्यैवात्मनःअ
विद्यादशायां।अज्ञानकामकर्मादिप्रयोज्यभेदव्यापारंप्रदर्शयितुंब्रह्मविद्योत्पत्तेः।प्राक्स्वस्वरूपादीषत्प्र
च्याव्यपुनःप्रतिन्यायंप्रतीतिक्रमेणपुनःबुद्धांतप्रवेशंस्मारयतीश्रुतिः।सवाएषएतस्मिन्निति॥ ॥किं
च॥एतादृशविस्तारश्रवणेपिकिमर्थंजनकः।अतऊर्ध्वंविमोक्षायैवब्रूहीति।एच्छतीत्यत्रपूर्वोक्तसर्वदृष्टां
तदार्ष्टांतादिकमपिदृष्टांतांतर्भूतमेवेतिज्ञात्वापुनःपुनःजनकःएच्छतीतिजनकस्यतात्पर्यंभाष्यकारेण
सूचितं।आत्मातुप्रत्यक्षानुमानोपमानशब्दार्थापत्तिअनुपलब्ध्यादिभिःकार्यकरणसंघातात्।अन्यइति

श्रुत्यादिसर्वप्रमाणैः पंडितलौकिकैश्चस्पष्टतया ज्ञातमपि। अविद्यामाहात्म्यात्। व्यवहारदशायां संघाताभिन्नत्वमेवेति व्यवह्रीयते। सवा एष एतस्मिन्स्वप्नांत इत्यादि पूर्वं व्याख्यातसमानं। अनेनग्रंथेन पूर्वोक्तार्थजातंप्रतिपाद्यते॥ ३४॥ ॥एतदुत्तरखंडे॥ ॥तद्यथानस्सुसमाहितइत्यादिनायत्रैतदूर्ध्वोछ्वासीभवेतीत्यंतेनग्रंथेन॥ अस्यात्मनः अविद्यादशायां। लिङ्गशरीरोपहितत्वेन। लिंगशरीरगमनद्वारालोकांतरगमनादि। व्यवहारस्य औपचारिकतयालौकिकपौराणिकादिदर्शनमनुसृत्यगमनागमनमंगीकृत्यतदनुवादमुखेनमुमुक्षूणां। संसारेवैराग्योत्पादनार्थं। श्रुतिः ग्रहोपस्कररूप उलूखलमुसलशूर्पभांडादिवाहकशकटादिदृष्टांतेनमरणदशायांअंतःकरणतादात्म्यवशात्। जीवस्यापि अतिसंकटप्राप्तिं अनुवदतिसतिविशदयति। तद्यथेति। अनः शकटं उलूखलादिगृहोपस्करंवाहयन्प्रदेशांतरगमनंप्रतिअतिसंकटतयाघोषंकुर्वत्गच्छति। एवमेवआत्माप्राणोत्क्रमणेउपाधिविशि

ष्टः तद्द्वारालोकांतरगमनं प्रति श्वासोच्छ्वासगमनप्राबल्येन घोषं कुर्वन्। क्रोशंन्निव गच्छतीति तत्काले। अस्य महासंकटः जायते। एवमेव जननदशायामपि महान् कष्टः दुःखतमः। सर्वैरनुभूयते। तस्मात् शरीरपरिग्रहस्य तत्यागपूर्वक। शरीरांतरगमनस्य शरीरे विद्यमानेपि रोगपुत्रधनादिवियोगनिमित्त दुःखस्य च सर्वैरनुभूतत्वात्। पुनः शरीरपरिग्रहो यथा न भवति। तथा। आत्मज्ञानसाधनसंपादनं। देहनाशात्प्रागेव कर्तव्यं। देहनाशसमीपकाले तत्साधनं। संपादयितुं अशक्यं इदानीमेव संपादयेदिति श्रुतिः दययापामरपुरुषान्बोधयति अनुक्रोशयति च॥ ॥ इह चेदवेदीदथ सत्यमस्ति। न चेदिहावेदीन्महती विनष्टिः इति श्रुत्यंतराच्च इत्याद्यर्थः प्रतिपाद्यते॥ २५॥ ॥ एतदुत्तरखंडे॥ षट्त्रिंशसंख्याके॥ ॥ स यत्रायमणिमानन्येतीत्यादिना। योन्यात्द्रवति प्राणायैव इत्यंतेन ग्रंथेन॥ सः आत्मा कार्यकरणसंघातोपहितः अत्र तु स्थूलदेहरूपपिंडात्मप्राधान्येन सदिति तच्छब्देन स्थूलदेह एव आदौ

प्रायेण लक्ष्यते यत्र यस्यां मुमूर्षु दशायां जरया वार्धिक्येन उपतपत। उपतपति। रोगादिना। अणिमानन्येति देहादिः कार्श्यं प्राप्नोति यद्दूर्ध्वीकृत्वासीभवति तदा बहुभाराक्रांतशकटवत्। स्थूलदेहस्य असामर्थ्यवशेन तद्व्यवहारानिर्वाहात् आत्मा तं त्यजति। तद्यथेति दृष्टांतः प्रतिपाद्यते॥ ॥ आम्रं वोदुंबरं वेत्यादिना। मरणहेतोर्बहुत्वेन बहुदृष्टांतप्रदर्शनं। आम्रादिफलानि पक्वावस्थायां प्राप्यावा घाताद्युपघातेन वा। बंधनात्। वृंतरसादिरूपात्। संप्रमुच्यत इति। निःसंबंधतया वृक्षात् प्रमुच्यते एवं स्थूलदेहात् निस्संबंधतया निर्लेपं यथा भवति तथा। एतद्देहाभिमानशून्यत्वात् स्वप्नसुषुप्त्यादिगमनवत्। प्राणेन रक्षणाभावन हेतुनेतीत्यभिप्रायः प्रमुच्य। एभ्यो अंगेभ्यः चक्षुरादिभ्यः देहांतरं गच्छति किमर्थमिति चेत्। प्राणायैवेति इंद्रियाद्यभिव्यक्तय इत्यर्थः। इंद्रियद्वारा कर्मफलभोगायेति तात्पर्यं प्रतिन्यायं प्रतियोन्याद्रवतीति। यथा जाग्रत्स्वप्नादिषु योनि शब्दितगमनागमनप्रयोजकं। कारणत्वोपलक्षितं। पौर्वापर्यक्रमस्था

स्याजीवसंचरणंएवमेव। पूर्वशरीरस्यप्राणनिमित्तकं। क्रमसंचरणन्यायेनगमनमित्यर्थः। पुनःशब्देन।
अतीतानेकदेहेषुयथापौनःपुन्येनदेहादिद्वारा प्राणसंयोगः। तद्वदत्रापीत्यभिप्रायः एतत्प्रतिपाद
नं। अस्मिन्संसारे देहाद्देहांतरप्राप्तिः। तदुत्पत्तिविनाशकालादौ। महासंकटप्राप्तिः इत्यादिबहुदोषग्र
स्तत्वात्संसारस्येतितस्मिन्विरज्येतेति। श्रुतेस्तात्पर्यंप्रकटीकृतंभवति॥ ९९॥ ॥एवमेवोत्तरब्राह्म
णे। तदुत्तरमैत्रेयीब्राह्मणेच। सवायमात्माब्रह्मेतिमहावाक्यरूपवाक्येन। आत्मनः ब्रह्मत्वं। सर्वमयस्स
र्वमयोयदेतदिदंमयोदोमयइति। सर्वोपहितत्वेन। सर्वात्मत्वं। एषसर्वेश्वरएषभूताधिपतिरेषभूतपा
लइत्यादिना। तस्यसर्वेश्वरत्वं। सनसाधुनाभूयान्नोयेवासाधुनाकनीयान्। इत्यादिना। तस्यपापपुण्य
संबन्धराहित्यं। मैत्रेय्यरे दृष्टेश्रुतेमते। विज्ञातेइदंसर्वंविदितमित्यादिना। आत्मज्ञानेनसर्वविज्ञानं। स
र्वंतंपरादाद्योन्यत्रात्मनःसर्वंवेदइदंसर्वंयदयमात्मेत्यादिना। अन्वयव्यतिरेकाभ्यां। आत्मव्यतिरेकेण

नि॰

अन्यवस्तुमात्रनिषेधनपूर्वकअद्वैतात्मस्वरूपं। दुंदुभ्याघातादिदृष्टांतेन। कार्यकारणयोरभेदज्ञा
नद्वारा। सर्वस्यापिजगतः। आत्मानन्यत्वंसएषनेतिनेत्यात्मेतिसर्वोपाधिनिषेधनेन। निर्विशेषात्म
स्वरूपत्वं। आत्मन्येवात्मानंपश्यतिसर्वमात्मानंपश्यतिइत्यादिना। सर्वात्मत्वं। एतावदरेखल्वमृतत्वमि
तिहोक्त्वायाज्ञवल्क्योविजहारेति। अमृतत्वरूपमोक्षंप्रति। कर्मोपासनादिसाधनांतरनिरपेक्षत
यैवकेवलात्मज्ञानमेवमोक्षसाधनमितिचजनकमैत्रेय्यौ। प्रतिआत्मोपदेशेनं। आत्मसाक्षात्कारंप्रा
पय्य। स्वयंसंन्यासंकृतवानइत्यादियाज्ञवल्क्यमाहात्म्यप्रदर्शनार्थमेवबृहदारण्यपंचमाध्या
यषष्ठाध्यायप्रवृत्तिरितिगम्यते॥ ॥एवमेवत्रिविधकाशीमाहात्म्यसन्यासविधिश्रीरुद्रजपमाहा
त्म्यब्रह्मसूत्रोक्तवैश्वानरोपासनादिप्रतिपादकब्रह्मसूत्रनद्भाष्यकारव्यासशंकरभगवत्पादाचार्यादि
भिः। मद्वाप्रमाणत्वेनपरिगृहीतद्वात्रिंशदुपनिषदंतर्भूतवाजसनेयशाखांतर्गतलघुजाबालोपनिष

द्यपि॥ ॥याज्ञवल्क्यमाहात्म्यं श्रुत्यैव प्रतिपादितं स्फुटं प्रतीयते॥ ॥तथाहि॥ ॥मोक्षप्राप्तिं प्र
ति। कानि मुख्यसाधनानीति। मुमुक्षोराकांक्षा मनुसत्य॥ श्रुतिः॥ अनुजिघृक्षया। कर्मोपासनायोगब्रह्म
ज्ञानादिमतांश्रेष्ठं याज्ञवल्क्यं प्रति। देवगुरुर्बृहस्पतिः॥ अत्रिरददादौर्वायुप्रजां पुत्रकामायेत्यादिश्रुति
प्रतिपाद्यः सप्तऋष्यंतर्गतः। मूलस्मृतिकर्ता अत्रिः। ब्रह्मविच्छ्रेष्ठः। जनकश्च मोक्षसाधनप्रश्नान्। कृत
वंतः। तत्प्रश्नानामुत्तरत्वेन। याज्ञवल्क्यः। तदनुरूपवाक्यानि उक्तवानिति प्रदर्शनेन याज्ञवल्क्यमाहा
त्म्यमेव प्रकटयति॥ तद्यथा॥ साक्षात्कैवल्यमोक्षं प्रति। साधनानि र्पंचतेषां मध्ये पशुपक्षिकृमिकीटस्था
वरजंगमादिजंतुमात्रस्य। अधिभूतकाश्यांमरणे॥ ॥अत्रहिजंतोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्र
ह्म व्याचष्टे। येनासावमृती भूत्वा मोक्षी भवति। इत्यादिवाक्यैः। परमेश्वरेण कृततारकोपदेशद्वारा। ज्ञाना
न्मोक्षो भवतीति। गंगाविश्वेश्वरमणिकर्णिकादिचिन्हित सर्वजनगंतव्य सर्वप्रसिद्धक्षेत्रे विशेषात्म

कअधिभूतकाशीमरणमेकंमोक्षसाधनं। तस्माद्यत्रक्वचनगच्छति तदेवमन्येतेतीदंवैकुरुक्षेत्रं। देवा
नांदेवयजनंसर्वेषांभूतानांब्रह्मसदनंइत्यादिवाक्यैः। पश्चाद्यपेक्षया। अधिकज्ञानवतःमनुष्यमात्रस्यभा
वनारूपमानशिकक्रियाकरणयोग्यस्य। स्वाभिमतप्रदेशएव। काशीभावनाकर्तुः। इयमेवकाशीति।
भावनाविषयीभूतभावनाकाश्यांमरणे। तत्रापिपरमेश्वरेण। कृततारकोपदेशद्वारा। ब्रह्मात्मज्ञानप्रा
प्त्यामोक्षलाभोभवतीति। काशीभावनापि। मोक्षंप्रति। एकंसाधनं। एवंब्रह्मसूत्रतद्भाष्योक्तरीत्या। स्वदेह
एवकाशी। असिवरणादिकल्पनाद्वारा। जीवपरमात्मैक्यध्यानेन। मोक्षप्राप्तिरिति। मनुष्यविशेषाणांब्रा
ह्मणादीनां॥ वेदवेदांताधिकारिणां। वैश्वानराख्यविराडभिन्नब्रह्मध्यानं। स्वदेहएवअध्यात्मकाशीत्वेन
ज्ञानध्यानात्मकंमोक्षसाधनमेकं। तत्रापि। मुमुक्षूणां। अत्यंतविरक्तानां। शौचाद्यनुष्ठानशीलानां। शुद्धां
तःकरणानां। नैष्ठिकब्रह्मचार्यादीनांसर्वात्मत्वभावनाविशिष्टश्रीरुद्रजपस्यमोक्षसाधनत्वेन। रुद्रजपस

प्र·शा·
९८

वमोक्षसाधनमेकं।सर्वशास्त्रोक्तरीत्याब्रह्मज्ञानस्यअंतरंगसाधनात्मकंसर्वत्यागरूपं।विध्युक्तसंन्यास
त्मकंमोक्षसाधनमेकं।एतेषुपूर्वोक्ताधिकार्यपेक्षया।उत्तरोत्तराधिकारिणः।उत्तमोत्तमाधिकारित्वंप्रति
पाद्यते॥ ॥बृहस्पतिरुवाचयाज्ञवल्क्यंयदनुकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनमि
ति।यत्शास्त्रलोकयोःप्रसिद्धं।अस्माभिःशब्दमात्रेणज्ञातंविशेषतो।अज्ञातं।देवानांदेवयजनमित्या
दिविशेषणविशिष्टंतत्किं।क्षेत्रं।तदेव।अस्माकं।अनुशास्त्रमनुसत्यब्रूहि।उपदिशेति।बृहस्पतिनापृ
ष्टोयाज्ञवल्क्यः।उत्तरत्वेन।अविमुक्तंवैकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनंइतिरूढ्या
यौगिकत्वेनचप्रसिद्धअधिभूतकाश्यात्मकअविमुक्तक्षेत्रमुपदिश्य॥ ॥तस्माद्यत्रक्वचनगच्छतितदे
वमन्यतेतीदंवैकुरुक्षेत्रं।इत्यादिनाकाशीभावनाकर्तुः।यत्रस्थितिः।तत्प्रदेशमेवकाशीत्वेन।इदंवैकुरु
क्षेत्रमित्यादिप्रकारेण।भावनांकुर्यात्।अनयोःप्रसिद्धअधिभूतकाशिउपासककर्तृकभावनाकाशीसे

नि·

त्रयोः अन्यतरस्मिन्कारणेपि। तारकोपदेशद्वारा। मोक्षोभवतीति। तुल्यफलत्वज्ञापनाय। अत्रेति उ
भयसाधारणेन क्षेत्रद्वयमरणकाले॥ अत्र हि जंतोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्मव्याचष्टे। इत्या
दिना काशीद्वयमरणस्य। तुल्यफलत्वं उपदिष्टवान्याज्ञवल्क्यः॥ ॥अनंतरं अथ हैनमत्रिः पप्रच्छ या
ज्ञवल्क्यं य एषोनंतो ऽव्यक्त आत्मा तं कथमहं विजानीयामिति। सहोवाच याज्ञवल्क्यः। अविमुक्त उपा
स्यो य एषोनंत अव्यक्त आत्मेत्यादिना। अध्यात्मकाशीरूपस्वदेह एव। वैश्वानरसाधारणशब्दविशेषा
त्। इति ब्रह्मसूत्रादिकरणस्य। आमनंति चैनमस्मिन् इति गुणसूत्र तद्भाष्यव्याख्यानोक्तरीत्या। जीवब्र
ह्मैक्योपासनादिकं उपदिष्टवान्॥ ॥तदनंतरं। अथ हैनं ब्रह्मचारिण ऊचुः किंजप्येनामृतत्वं ब्रूहीति। स
होवाच याज्ञवल्क्यः शतरुद्रियेणेत्यादिना। सर्वात्मभावनाविशिष्टश्रीरुद्रजपेन मोक्षो भवतीति उक्तवा
न्॥ ॥तदनंतरं। अथ जनको ह वैदेहो याज्ञवल्क्यमुपसमेत्योवाच। भगवन्संन्यासमनुब्रूहि। सहो

वाचयाज्ञवल्क्योब्रह्मचर्यंसमाप्यगृहीभवेत्।इत्यादिनासन्यासविधिंउक्तवान्।एतेषांवाक्यानांकानि
चित्पदानिअवश्यकतयाअध्याहर्तव्यानिभवंतिएतद्विवरणविस्तारः।अविमुक्तादिशब्दानांरूढियो
गिकादिशब्दनिर्वचनपूर्वकप्रमाणवाक्योदाहरणसहितत्वेन।उत्तरत्रप्रपंचते।इत्यत्रोपरम्यते।एताव
ताप्रकृतेयाज्ञवल्क्यंप्रति।सर्वज्ञदेवगुरुःबृहस्पतिः॥महर्षिरत्रिः।केचिन्नैष्टिकब्रह्मचारिणोमहर्षयः।
भारतमोक्षधर्मोक्तरीत्या।व्यासाज्ञया।आगतशुकमहर्षेः।वेदांतसारार्थज्ञापकः।कर्मणैवहिसंसिद्धिमा
स्थिताजनकादयइतिगीतावचनरीत्या।ब्रह्मविच्छ्रेष्ठत्वेनयाज्ञवल्क्यंप्रतिबृहस्पत्यादयः।आगताइति।
याज्ञवल्क्यमाहात्म्यमेव।प्रकटीकर्तुं।श्रुतिःप्रवृत्तेतिगम्यते।ननु।बृहस्पत्यादयः।सर्वज्ञाएव।अज्ञा
तार्थज्ञानसंपादनार्थं।नागताः।अपितु।याज्ञवल्क्यबुद्धिपरिक्षार्थमागताः।इत्याशंकनीयं।याज्ञवल्क्यस्तु
श्रुत्यादिप्रसिद्धप्रभावः।स्वयंस्मृतिकर्ता।योगीश्वरःब्रह्मविद्वरिष्ठः।इतिश्रुतिसूत्रस्मृतिभाष्यादिषु।शंक

रभगवत्पादवार्त्तिककारविद्यारण्यादिभिः। बहुशोतन्माहात्म्यंवर्ण्यते। बृहस्पत्याद्यपेक्षया। सर्वविषये
षु। अयमेवश्रेष्ठइतिवक्तुंशक्यते। बृहस्पत्यादयः। याज्ञवल्क्यज्ञानादिकंपरीक्ष्यकिंफलंदास्यंति। तैःफ
लंप्राप्तम्मितितान्नुद्दिश्यतपआदिकंयाज्ञवल्क्यःकृतवानितिवाफलंयाचितवानितिवा। कुत्रापिप्रमा
नैनास्ति। अस्त्येव। सर्वज्ञानैश्वर्यादिषड्गुणसंपत्तिमत्वेनभगवानिति। श्रुत्यादौप्रयोगोदृश्यते। बृहस्पत्यादी
नामीश्वरत्वे। याज्ञवल्क्येन। तदुपासनायांकृतायांतत्फलंदातुं। तैःपरीक्षाकर्त्तव्याइतितुन्यायः एवंपरि
क्षाहेतूनांमध्ये। कस्यापि। अभावात्। परीक्षार्थमित्यभिवदनं। कुकल्पनमेव। प्रत्युत। बृहस्पतिअत्रिजन
कादयः। याज्ञवल्क्यंप्रतिउपसमेत्येति। शिष्यन्यायःप्रतीयते। जनकस्यतु। याज्ञवल्क्यशिष्यत्वं। श्रुत्यादि
प्रसिद्धमेव। तस्मात्सहचर्यातु। बृहस्पतिअत्र्यादेरपि। तत्सदृशत्वेन। अज्ञातार्थज्ञानसंपादनार्थमेवतेषामाग
मनं। नतुपरीक्षार्थमिति। बुद्धिमद्भिः। निश्चीयतएव॥ ॥अपिच॥ वाजसनेयशाखाभिन्नअथर्वणवेदशा

स्वागतराम ताप्रनीयोपनिषद्यपिच। बृहस्पतिरुवाच याज्ञवल्क्यमिति। अथहैनंभरद्वाजः पप्रच्छेति। अ
थहैनमत्रिः पप्रच्छेति। पुनः भरद्वाजः पप्रच्छेतिच। शाखांतरोपनिषदि। पूर्वोक्तप्रकारेण। बृहस्पत्यत्रिप्रश्न
योः पूर्ववत्। उत्तरप्रतिपादनेपि। अधिकतया भरद्वाजः द्विवारं नवीनप्रश्नौ कृतवान्। इति तस्यामुपनि
षदि। प्रतिपादनंवर्तते। भरद्वाजस्तु तैत्तिरीयकाष्टके श्रुतौ। जीर्णं स्थविरं शयानं इंद्र उपव्रज्योवाचभरद्वा
जेत्यामंत्र्यचतुर्भिरायुर्दद्यां। किमनेन कुर्या इत्यादि। इंद्रेण प्रश्ने कृते सति। ब्रह्मचर्यमिति होवाचेति। भर
द्वाजेन उत्तरे दत्ते। पूर्वं त्रिवारं मया दत्तं अयमपि विद्याभ्यासार्थमेव चरितार्थमगमत्। इदानीमपितथा
माकुरु। वेदस्य अपारत्वात्। इत्यर्थकेन। त्रीनिगिरिरूपान् अविज्ञातान् दर्शयांचकार वेदावाएते। अनंतावै
वेदाः इत्युक्त्वा। अयंवैसर्वविद्येति। नत्वृचा। नयजुषानसाम्नाथोस्तियस्सावित्रं वेदेतिसावित्रनामकसगु
ण ब्रह्मोपासनंउपदिश्य। कृतार्थं तं प्रापायतवान्। इत्याद्यर्थक वेदवाक्यप्रतिपाद्यमहिमावानपिभरद्वा

जः। तारकमंत्रादिमहिमादिप्रश्नजातं याज्ञवल्क्यनिकटे कृतवानिति। इत्याद्यर्थप्रतिपादनेन। बृहस्पति
अत्रिभरद्वाजजनकादयस्सर्वेऽपि। याज्ञवल्क्यपरीक्षार्थमेव प्रश्नान्कृतवंतः इत्याद्युत्प्रेक्षणं कुहकयु
युक्त्यादिप्रयुक्तमिति। न्यायज्ञैः निष्पक्षपातवद्भिः सम्यग्ज्ञायत एव। किं बहुना। असंगतप्रलापेन। अ
द्वैततारकभस्मजाबालादि। कासुचिदुपनिषत्सु। अन्येषु मंत्रादिषु। याज्ञवल्क्यमहात्म्यं। श्रुत्यादिप्रतिपा
द्यं बहुशो दृश्यते। एवमेव शंकरभगवत्पादाचार्यैः। वेदांतशास्त्रमूलभूतब्रह्मसूत्रभाष्यं नवसहस्रसंख्या
कग्रंथवत् कृतं तावत्संख्याकनवसहस्रग्रंथयुक्तं बृहदारण्यकोपनिषद्भाष्यं कृतं। अन्यासां सर्वासामपि।
अल्पसंख्याकग्रंथयुक्तं भाष्यं कृतं। तथा वार्तिककारैः। सुरेश्वराचार्यैः बृहदारण्यवार्तिक तद्व्याख्यानं च।
आनंदगिरीयाचार्यैश्च। द्वादशासहस्रसंख्याकोपरि अधिकसंख्याकग्रंथयुक्तवार्तिकं तद्व्याख्यानं च कृ
तं। वार्तिकग्रंथे तु याज्ञवल्क्यमाहात्म्यं बहुशो दृश्यते। तस्मात् श्रुतिसूत्रभाष्यवार्तिकव्याख्यानादिषु याज्ञ

वल्क्यमाहात्म्यमेवप्राधान्येनप्रतिपाद्यते॥ ॥जीवन्मुक्तिप्रकरणे।अयमेवाभिप्रायः।विद्यारंण्यकृतजी
वन्मुक्तिप्रकरणे।विद्यारंण्यैरेवंप्रकटीकृतः॥ ॥तथाहि॥ ॥जिज्ञासुर्ज्ञानवांश्चेतिपरहंसोद्विधामतः।
प्राग्ज्ञानायजिज्ञासोर्न्यासंवाजिसनेयिनः॥१॥प्रव्राजिनोलोकमेकमिछंतःप्रव्रजंतिहि।एतस्यार्थस्तु
ग्रंथेनवक्ष्यतेमंदबुध्धये॥२॥ ॥लोकोद्विविधः।आत्मलोको।अनात्मलोकश्चेति।तत्र।अनात्मलोकस्य
त्रैविध्यंबृहदारंण्यकेतृतियाध्यायेश्रूयते॥ ॥अथत्रयोवावलोकामनुष्यलोकःपितृलोकः।देवलोक
इति।सोयंमनुष्यलोकःपुत्रेणैवजय्योनान्येनकर्मणा॥कर्मणापितृलोको।विद्ययादेवलोक।इत्यात्मलोक
श्चतत्रैवश्रूयते।योहवाअस्मालोकात्स्वंलोकमदृष्ट्वाप्रैति।सएनमविदितोनभुनक्तेति।आत्मानमेवलोक
मुपासीत।सयआत्मानमेवलोकमुपास्ते।नेहास्यकर्मक्षीयतइतिच।षष्टाध्यायेपि॥किंप्रजयाकरिष्या
मो।येषांनोयमात्माअयंलोकइति॥ ॥सम्यगनुष्टितैः।श्रवणमनननिदिध्यासनैःपरंतत्वंविदितवद्भिः

संपाद्यमानो विद्वत्संन्यासः॥ तं च॥ याज्ञवल्क्यः। संपादयामास॥ तथाहि॥ विद्वच्छिरोमणिर्भगवान् याज्ञ
वल्क्यः विजिगीषकथायां बहुविधेन तत्त्वनिरूपणेन। आश्वलप्रभृतीन् प्रविजित्य वीतरागकथायां संक्षे
पविस्तराभ्यां अनेकधा जनकं बोधयित्वा। मैत्रेयीं बोधयिषुः तस्यास्त्वरयातत्त्वाभिमुख्याया स्वकर्तव्यं सं
न्यासं प्रतिजज्ञे। ततस्तां बोधयित्वा स्वयं संन्यासं चकार। तदुभयं मैत्रेयीब्राह्मणस्याद्यन्तयोराम्नायते। अ
थ ह याज्ञवल्क्योन्यद्वृत्तमुपाकरिष्यन्मैत्रेयीति होवाच॥ प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मीति। ए
तावदरे खल्वमृतत्वमिति होक्त्वा। याज्ञवल्क्यः प्रवव्राजेति च। कहोलब्राह्मणेपि विद्वत्संन्यास आम्नाय
ते। एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षा
चर्यं चरंतीति॥ ॥ पूर्वोक्तयोरुभयोः संन्यासयोः परमहंसत्वं जाबालश्रुतावगम्यते॥ ॥ तत्र हि ज
नकेन संन्यासे पृष्टे सति। याज्ञवल्क्यः। अधिकारविशेषविधानेनोत्तरकालानुष्ठेयेन च। सहितं त्रिवि

दिषासन्यासमभिधायपश्चादग्निणायज्ञोपवीतरहितसाक्षिलेब्राह्मण्येसतिपश्चादात्मज्ञानमेवय
ज्ञोपवीतमितिसमादधौ॥ ॥अतः ब्राह्मयज्ञोपवीताभावात्परमहंसत्वंनिश्चीयते॥ ॥तस्माद्द्वावि
देहराहित्यलक्षणविदेहमुक्तिर्ज्ञानसमकालीना॥ तथाचयाज्ञवल्क्यवचनंश्रूयते॥ अभयंवैजनकप्रा
प्तोसीतिएतावदरे। खल्वमृतत्वमितिचेति॥ ॥ननु॥ ॥ब्रह्मविषयत्वेपि॥ तेषामापातज्ञानमेवनतु॥
सम्यग्वेदनमितिचेन्न॥ ॥तथासत्यस्माकमपितदीयवाक्यैरुत्पन्नायाविद्यायाः असम्यक्त्वप्रसंगत्वात्।
सम्यक्त्वेपिपरोक्षज्ञानमेवेतिचेन्न॥ ॥यत्साक्षादपरोक्षाद्ब्रह्मेतिमुख्यापरोक्षविषयतयैवविशेषतः प्र
श्नोत्तरोपलंभात्॥ ॥इयमेवह्यस्मदभिमतजीवन्मुक्तिः। याज्ञवल्क्यस्यविजिगीषुदशायांनतादृशी।
बाधितचित्तविश्रांतये। विद्वत्संन्यासस्यतेनकरिष्यमाणत्वात्। नकेवलमस्यविजिगीषा। किंतुधनतृ
ष्णापि। महती। यतः बहूनांब्रह्मविदांपुरतः। स्थापितंसालकारंगोसहस्रंअपहृत्यस्वयमेवददमाह। न

सोवयंब्रह्मिष्ठायकुर्मोगोकामा। एववयंस्मइति। इतरानब्रह्मविदोअवज्ञातुमियंकाचिद्वचोभंगीतिचे
द्यमपि। तर्ह्यपरोदोषः इतरेच। ब्रह्मविदः स्वकीयंधनमनेनअपहृतमितिमत्वाचुक्रुधुः॥ ॥स्वयंचक्रो
धपरवशः शाकल्यं। शापेनमारयामास॥ ॥नचास्यब्रह्मघ्नः मोक्षाभावः शंकनीयः कौषीतकिनः समाम
नंतिनास्यकेनचकर्मणालोकोमीयते। नमातृवधेन। नपितृवधेन। न स्तेयेन। नभ्रूणहत्ययेति॥ ॥शेषो
पि। स्वकृतायामार्यायांपंचाशीत्यामिदमाह॥ हयमेधशतसहस्राण्यथकुरुतेब्रह्मघातलक्षकाणि। परमा
र्थविन्नपुण्यैर्नचपापैः स्पृश्यतेविमलइति॥ ॥जनकस्यापिसमाधिव्युत्थितस्यईदृशमेवाचरणंपठ्यते
॥ ॥तूष्णीमथचिरंस्थित्वाजनकोज्ञानजीवितः। व्युत्थितश्चिंतयामासमनसाशमशालिना॥ किमुपादेय
मस्तीहयत्नात्संसाधयामिकिं। स्वतस्थितस्यशुद्धस्यचित्तेः कामेस्तिकल्पना। नाभिवाछाम्यसंप्राप्तंसंप्राप्तंन
त्यजाम्यहं। स्वस्यआत्मनितिष्ठामियन्ममास्तितदस्तुमे। इतिसंचिंत्यजनकोयथाप्राप्तंक्रियामसौ। असक्तः

कर्तुमुत्तस्थोदिनंदिनपतिर्यथा। भविष्यंनानुसंधत्तेनातीतंचिंतयत्यसौ। वर्तमाननिमेषंतुहसन्नेवानु
वर्तत इति। तदेवं यथोक्तेनवासनाक्षयेनचयथोक्ताजीवन्मुक्तिर्भविष्यतीतिसुस्थितं॥ ॥इत्यादिनापि
।जनकस्यापीति। अपिशब्देनजनकस्यैव। एतादृश। जीवन्मुक्तिसिद्धौ। तद्गुरोः याज्ञवल्क्यस्यब्रह्मविद्व
रिष्ठत्वमितिकिमुवक्तव्यंइत्यभिप्रायः॥ ॥तस्मिन्नेवप्रकरणे॥ आप्राप्तप्राप्तौश्रूयते॥ अभयंवैजन
कप्राप्तोसीतितस्मात्तत्सर्वमभवदिति। ब्रह्मवेदब्रह्मैवभवतीतिच॥ ॥विद्यारण्यकृतपंचदशीप्रक
रणेपिवाजनेयि शतपथब्राह्मणवाक्यानांयाज्ञवल्क्यादिवाक्यानांचमहाप्रमाणत्वेनउदाहृत्यतेषांबहु
पूज्यत्वेनप्रतिपादनंदृश्यते॥ ॥तथाहि॥ ॥चित्रपटदीपिकायां १०३ संख्याकश्लोके॥ ॥प्रधान
क्षेत्रज्ञपतिर्गुणेशइतिहिश्रुतिः॥ अरंण्यकेसंभ्रमेणह्यंतर्याम्युपपादितः इति॥ आरंण्यकमितिशतप
थब्राह्मणांतर्गतबृहदारण्यमित्यर्थः॥ अनेनवाजसनेयिशाखागतब्राह्मणात्मकश्रुतेरपिमहाप्रमाणत्वे

नविद्यारण्याचार्यैः स्वीकृतमितिगम्यते॥ तृप्तिदीपिकायां ८५ संख्याकश्लोके॥ ॥ अन्यथायाज्ञवल्क्य
देराचार्यत्वं न संभवेत्॥ ॥ द्वैतदृष्टावविद्वत्ता द्वैतादृष्टैन वाग्वदेदिति॥ ॥ याज्ञवल्क्यस्य ब्रह्मविदा
चार्यत्वं प्रतिपादितं॥ ॥ तत्रैव २०१ संख्याकश्लोकः॥ आत्मा कतम इत्युक्ते याज्ञवल्क्यो विबोधयन्॥
विज्ञानमयमारभ्यासंगतं पर्यशेषयदिति॥ २०१॥ याज्ञवल्क्यस्य परमात्मबोधकवरत्वं साधितं॥
॥ कूटस्थदीपिकायां ३९ संख्याकश्लोकः समुत्थायैषभूतेभ्यः स्तान्येवानुविनश्यति॥ विस्पष्टमिति मैत्रे
य्यै याज्ञवल्क्य उवाच हीति॥ ३९॥ इति॥ इत्यादिना याज्ञवल्क्यस्य ब्रह्मोपदेष्टृत्वं प्रकाशितं॥ द्वैतविवेकेन
व संख्याकश्लोकः॥ विराण्मनुनरा गावः खराश्वाजादयस्तथा॥ पिपीलिकावधिद्वन्द्वा इति वाजसनेयिनः
॥ ९॥ इति॥ ॥ वाजनेयि बृहदारण्यब्राह्मणस्यापि प्रामाण्यं सिद्धं भवति॥ ॥ तत्रैव आत्मानंदप्रकरणे
॥ पंच संख्याकश्लोकः॥ ॥ मू॥ बोधयामास मैत्रेयीं याज्ञवल्क्यो निजप्रियां॥ नवा अरे व सुरर्थे पतिप्रियइती

रमन्॥ इति॥ ॥तत्रैवतत्प्रकरणे॥ ॥श्लोकः॥५४॥मू॥आत्माप्रेयान्प्रियः शेषोद्वेष्योपेक्ष्योतदन्ययोः॥ ॥ इतिव्यवस्थितोलोकः याज्ञवल्क्यमतंचतत्॥५४॥ ॥अस्यव्याख्यानं॥ एतावताग्रंथसंदर्भेणोपपादितमर्थंबुभुत्सिसौकर्यायसंक्षिप्यदर्शयति।आत्मेत्यादिनाव्यवस्थितोलोकइत्यंतमन्वयः।आत्माप्रत्यगानंदः। प्रेयान्अतिशयेनप्रियः शेषः सोपसर्जनभूतपदार्थः प्रियः तदन्ययोः ताभ्यामात्मनस्तद्धेषाच्च अन्ययोर्व्याघ्रपथिगततृणादिरूपयोः द्वेष्योपेक्ष्येयथाक्रमंभवतइतिएवंचातुर्विध्येनलोकोव्यवस्थितः। व्यवस्थांप्राप्तः उक्तप्रकारचतुष्टयातिरिक्तंनकिंचिद्विद्यतइत्यभिप्रायः अयमर्थः श्रुत्याभिहितोपीत्याह याज्ञवल्क्यमतंचतदिति।आत्मादीनांप्रियतमत्वादिकं।यत्तद्याज्ञवल्क्यमतंचयाज्ञवल्क्यस्यापिसंमतमित्यर्थः॥५४ ॥ इत्यादिनायाज्ञवल्क्यस्यापिसम्म तमित्यनेनब्रह्मविदः संमतमेवईश्वरसंमतमित्यभिप्रायेणयाज्ञवल्क्य संमतमित्युक्तं॥ ॥ अतएवयाज्ञवल्क्यस्यईश्वरतुल्यत्वेनअयोग्यताभावः सिद्धएवभवति॥ ॥त

त्रैवब्रह्मानंदप्रकरणे॥ ६२॥ श्लोकः॥ मूलं॥ ब्रह्मविज्ञानमानंदमितिवाजसनेयिनः॥ पठंत्यतः स्वप्रका
शंसुखंब्रह्मैवनेतरत्॥ ६२॥ श्लोकः॥ मूलं॥ ब्रह्मविज्ञानमानंदमितिवाजसनेयिनः॥ पठंत्यतः स्वप्रकाशं
सुखंब्रह्मैवनेतरत्॥ ६२॥ श्लोकः॥ ॥ इत्यनेनवाजसनेयिनांशाखाया॥ यजुर्वेदत्वेन। प्रामाण्यंप्रतिपा
दितं॥ ॥ तत्रैवविद्यानंदप्रकरणे॥ ॥ ४॥ श्लोकः। ऐहिकामुष्मिकंचेत्येवंदुःखंद्विधेरितं॥ निवृत्तिमैहिक
स्याह बृहदारण्यकंवचः॥ ४॥ इत्यादिनाचतुर्वेदभाष्येउभयमीमांसाधिकरणार्थमाला। अष्टोत्तरशतोपनि
षद्दीपिकापराशरमाधवीयादिसर्वशास्त्रकर्तुः सर्वज्ञस्यविद्यारण्यस्यपरमसम्मतत्वेनयाज्ञवल्क्यतच्छाखा
वेदस्यतच्छिष्यकण्वकात्यायनमाध्यंदिनपारस्करादीनांतद्वचनानांचपूज्यतयाप्रमाणतयाचसर्वशा
स्त्रेषुस्वीकृतत्वदर्शनादपिप्रामाण्यंसुस्थितं॥ ॥ तस्मात्श्रुतितद्भाष्यतद्व्याख्यानतद्वार्तिकविद्या
रण्यकृतजीवन्मुक्तिप्रकरणपंचदशीप्रकरणादिभिः याज्ञवल्क्यस्यपरमात्मबोधकपरत्वंस्फुटतया

प्रतीयमानत्वेनदृढतरंभवति॥ ॥ननु॥याज्ञवल्क्यस्य।कथंचित्।योगीश्वरत्वं।परमात्मबोधकपर
त्वंचसंभावितमिति।अंगीकारे॥तवऋग्वेदिनः।याज्ञवल्क्यः।कथंगुरुर्भवेत्।इतिचेत्सत्यं।तथा।व
र्णत्रयज्ञ..नानामपिचतुर्वेदाध्येतृत्वविधानस्य।सर्वगृह्यसूत्रेषुधर्मशास्त्रादिषुच।प्रसिद्धतयाप्रती
यमानत्वात् पूर्वंअस्माभिः तद्वाक्यानिउदाहृतानि॥ ॥बृहदारण्यपंचमाध्यायेद्वितीयखंडेसामश्र
वाइत्यत्रभाष्यव्याख्यानादिषु।याज्ञवल्क्यस्यचतुर्वेदाध्येतृत्वं।अध्यापयितृत्वंचप्रतिपादितं।तदनु
सारेण।विष्णुपुराणभागवतादिषुच।ऋग्वेदाध्येतृत्वंप्रतीयते।तथाच।विष्णुपुराणं।तृतीयांशेच
तुर्थाध्याये॥ ॥सोयमेकोमहावेदतरुस्तेनपृथक्कृतः।चतुर्धाचततोजातंवेदपादपकाननं॥१५॥
बिभेदप्रथमंविप्रपैलोऋग्वेदपादपं।इंद्रप्रमितयेप्रादाद्बाष्कलायचसंहितां॥१६॥चतुर्धासबिभे
दाथबाष्कलोद्विजसंहितां।बोध्यादिभ्योददौतास्तुशिष्येभ्यःसुमहामतिः॥१७॥बोध्याग्निमाढका

हृद्याज्ञवल्क्यपराशरौ॥ प्रतिशाखास्तुशाखयास्तस्यास्तेजगृहुर्मुने॥१८॥ इंद्रप्रमितिरेकांतुसंहितां
स्वसुतंततः॥ मांडूकेयंमहाभागंमैत्रेयाध्यापयत्तदा॥१९॥ तस्यशिष्यप्रशिष्येभ्यःपुत्रशिष्यक्रमाद्य
याविति॥२०॥ ॥श्रीमद्भागवतेपि॥ ॥श्रीमद्भागवतेद्वादशस्कंदेषष्टाध्याये॥ ॥पराशरात्सत्यवत्या
मंशांशकलयाविभुः॥ अवतीर्णोमहाभागोवेदंचक्रेचतुर्विधं॥४९॥ ऋगथर्वयजुस्साम्नांराशीनुद्धृत्यव
र्गशः॥ चतस्रःसंहिताश्चक्रेसूत्रेमणिगणानिव॥५१॥ तासांसचतुरःशिष्याननुपहूयमहामतिः॥ एकैकां
संहितांब्रह्मन्नेकैकस्मैददौविभुः॥५१॥ पैलायसंहितामाद्यांबह्वृचाख्यामुवाचह॥ वैशंपायनसंज्ञायनि
गदाख्यंयजुर्गणं॥५२॥ साम्नांजैमिनयेप्राहतथाछंदोगसंहितां॥ अथर्वांगिरसंनामस्वशिष्यायसुमंतवे
॥५३॥ पैलःस्वसंहितामूचेइंद्रप्रमितयेमुनिः॥ बाष्कलायचसोप्याहशिष्येभ्यःसंहितांस्वकां॥५४॥ चतुर्धा
व्यस्यबोध्याययाज्ञवल्क्यायभार्गव॥ पराशराग्निमित्राभ्यामिंद्रप्रमितरात्मवान्॥५५॥ ॥तथासमहाभा

रते॥ ॥हरिवंशेद्विचत्वारिंशदधिकशततमाध्याये॥वैशंपायनः॥एतस्मिन्नेवकालेतुचतुर्वेदः षडंग
वित्।ब्राह्मणोयाज्ञवल्क्यस्यशिष्योधर्मगुणान्वितः॥१॥अश्वमेधः कृतस्तेनवसुदेवस्यधीमतः॥ब्रह्मद
त्तइतिख्यातोविप्रोवाजसनेयिनांइत्यत्र॥ ॥ब्रह्मदत्तस्ययाज्ञवल्क्यशिष्यत्वेनविशेषणाभिधानात्॥शि
ष्यस्यैवचतुर्वेदाध्येतृत्वे तद्गुरोःयाज्ञवल्कस्यचतुर्वेदाध्येतृत्वं।अध्यापयितृत्वंचार्थसिद्धंइतिहेतोःचतु
र्वेदांतर्गतऋग्वेदाध्यापयितृत्वस्यापिसिद्धत्वेनतच्छिष्यपरंपराप्राप्तस्यतच्छिष्यत्वंअस्माकमपिसंभव
त्येवइतिकृत्वा।अस्मद्गुरुत्वेनव्यपदेशःकृतः॥ ॥इत्यादिषुयाज्ञवल्क्यस्यापि।ऋग्वेदाध्येतृत्वअध्याप
यितृत्वपरंपरायांप्रविष्टत्वेनश्रूयमाणत्वात्॥ ॥बोधायनगृह्यसूत्रेविवाहप्रकरणेदशविधव्रताचरणप्र
स्तावे॥ ॥ब्राह्मणेनब्राह्मण्यामुत्पन्नोजातइत्यभिधीयते।उपनयनमात्रोव्रतानुचारीकिंचिद्वेदमधीत्यब्रा
ह्मणः।एकांशाखामधीत्यश्रोत्रियः।अंगाध्यायिह्यनूचानः।कल्पाध्यायीऋषिकल्पः।सूत्रप्रवचनाध्यायीभ्रू

णः। चतुर्वेदाध्यायी ऋषिः अत ऊर्ध्वं देवः इत्यनेनापि। महर्षित्वेन चतुर्वेदाध्येतृत्वं अध्यापयितृत्वं च याज्ञ
वल्क्यस्यापि संभवति। तच्छिष्यपरंपराप्राप्तत्वेन ऋग्वेदिनोपि मम तच्छिष्यत्वसंभवात्। तस्यापि। परंपर
यास्मद्गुरुत्वमपि संभवत्येव॥ अत एव। अस्मदीय ऋग्वेदसंध्याप्रकरणे॥ सूर्यश्चेत्यस्य मंत्रस्य। याज्ञवल्क्य
उपनिषदृषिः। अग्निश्चेत्यस्य मंत्रस्य याज्ञवल्क्य उपनिषदृषिः। इति अस्मदीयकर्मांग मंत्रद्रष्टृत्वं श्रूयते। एव
मेव। एतद्याज्ञवल्क्यशिष्याणां कण्वकात्यायनादीनामपि ऋग्वेदगतमंत्रद्रष्टृत्वं श्रूयते॥ तथा हि॥ उदुत्यं जात
वेदसमिति त्रयोदशर्चस्य सूक्तस्य कण्वपुत्रः प्रस्कण्व ऋषिः सूर्यो देवता। नवाद्या गायत्रीछंदः। उद्वयं तमसस्प
रीति च तस्रोनुष्टुभः। उद्यन्नद्येत्यंत्यतृचो रोगघ्न उपनिषत्। अंत्योर्धर्चो द्विषन्नाशनि सूर्योपस्थाने विनियोगः इति
॥ ॥ ऋग्वेदस्मार्तप्रदीपका प्रयोग नवग्रहकर्म विनियुक्त मंत्राणां मध्ये सूर्यप्रत्यधिदेवता रुद्रदेवताकस्य
पमंत्रस्य। कद्रुद्रायकण्वो रुद्रो गायत्रेति कण्वर्षिः तन्मंत्रद्रष्टृत्वं प्रतीयते॥ ॥ तस्मिन्नेव स्मार्तप्रदीपिका प्र

योगेवृषोत्सर्गप्रकरणे॥ ॥कद्रुद्रायेतिनवर्चस्यसूक्तस्यकण्वोरुद्रस्त्रितीयामैत्रावरुणिश्चांत्या
स्तृचः।सौम्योगायत्र्यानुष्टुबिति॥नरसिंहपारिजातप्रयोगेशिवग्रहयज्ञप्रकरणे॥ ॥शिवस्यदक्षि
णपाणौआतूनइंद्रइत्यस्यकाण्वकुसीदिविनायकोगायत्रीइतिकाण्वस्यतन्मंत्रद्रष्टृत्वंप्रतीयते॥नर
सिंहपारिजातप्रयोगे॥ ॥कौतुकबंधनप्रकरणे॥श्रियेजातइत्यस्यकाण्वःपरमानसोमःत्रिष्टुप्अ
नेनश्रियावाहस्तेबध्नीयात्॥ ॥अन्येष्वपिऋग्वेदगतेषुमंत्रेष्वपि।कण्वादिर्मंत्रद्रष्टृकत्वंप्रतीयते।का
त्यायनस्यऋग्वेदानुक्रमणिकाभाष्यादिग्रंथेषुकात्यायनकर्तृकत्वंप्रतीयते।कण्वकात्यायनादीनांऋग्वे
दगतमंत्रद्रष्टृत्वंतदंगोपांगग्रंथकर्तृत्वंचतत्रतत्रप्रतीयते।तेषामपिकण्वकात्यायनादीनांयाज्ञवल्क्यशा
खाप्रविष्टत्वात्।ऋग्वेदस्यापियाज्ञवल्क्यशिष्यपरंपराप्राप्तत्वेनऋग्वेदिनोपिममयाज्ञवल्क्यशिष्यत्वंसं
भवत्येव॥ ॥अपिच।विद्यारण्यकृतजीवन्मुक्तिप्रकरणे॥ ॥ननुब्रह्मविषयत्वेपितेषामापातज्ञानमे

वनतु।सम्यग्वेदनमितिचेन्न।तथासत्यस्माकमपितदीयवाक्यैरुत्पन्नायाः।विद्यायाः।असम्यक्त्वप्रसंगा
त्।सम्यक्त्वेपिपरोक्षज्ञानमेवेतिचेन्न।यत्साक्षादपरोक्षाद्ब्रह्मेतिमुख्यापरोक्षविषयतयैवविशेषतःप्रश्नो
त्तरोपलंभात्॥ ॥इत्यत्र।तेषामितिपदस्यपूर्वग्रंथसंदर्भेणयाज्ञवल्क्यादीनामितिविद्यारण्यैरेवत
त्पूर्वग्रंथेस्पष्टतयातद्वाचकशब्दैरेवप्रतिपादितत्वात्।बृहदारण्यादिश्रुत्यादिषुजनकमैत्रेयादिब्रह्मोपदे
शव्याजेनयाज्ञवल्क्येनप्रतिपादितवाक्ययुक्तिअनुभवादिभिः।अस्माभिःसंपादितब्रह्मपरोक्षज्ञानस्यापि।
परोक्षत्वापत्ति॥प्रसंगःदुर्वारइत्यभिप्रायेण।विद्यारण्यैःकृतापादनेनजनकादीन्प्रतियाज्ञवल्क्यकृतोप
देशादेव।स्वस्यापिब्रह्मज्ञानंप्राप्तंइतितात्पर्यस्यप्रकटीकृतत्वात्।विद्यारण्यगुरोरपि।परंपरयाब्रह्मोपदे
ष्टागुरुः।याज्ञवल्क्यएवेतिनिश्चयसिद्धौविद्यारण्यशिष्यपरंपराप्राप्तयत्किंचिज्ज्ञानवतःममापिगुरोर्गु
रुत्वेनयाज्ञवल्क्योगुरुरिति।वक्तव्येकोवा।अंतरायःप्रसज्येत।अयमर्थः॥सर्वोपिविद्यारण्यकृतपंचद

शीप्रकरणेअतिविस्तृततयाप्रकाश्यते॥ ॥तस्मात्॥वेदांतविदांसर्वेषामपियाज्ञवल्क्योगुरुरितिवक्तुंउचिततयाशक्यतएव॥अतः याज्ञवल्क्यंगुरुमितिमयोक्तंसंभावितमेव॥ननु। त्वया। याज्ञवल्क्यस्यमाहात्म्यवर्णनेनतच्छाखांतर्भूतकण्वमाध्यंदिनकात्यायनादीनामपि। माहात्म्यसूचनद्वारा। तच्छाखिनांसर्वेषांब्राह्मणानमपि। श्रेष्ठ्यं। आश्वलायन। आपस्तंबबोधायन। द्राह्यायनादिशाखाप्रविष्ट। ब्राह्मणसमानत्वमेवेतिउच्यते॥ ॥लोके। क्वचित्क्वचित्प्रदेशेषु। अन्यशाखिनांब्राह्मणानां। याज्ञवल्क्यशाखाप्रविष्टब्राह्मणानांचभोजनप्रतिभोजन॥श्राद्धनिमंत्रण। यजनयाजनादिषुपरस्परसव्यवहारोनदृश्यते। क्वचित्स्थलेतन्मूलभूत। कालिकाखंडाख्यपुराणस्थग्रन्थोपिवर्ततइतिवदंति। त्वयोक्तशास्त्रादेः कालिकाखंडानुसारिक्वाचित्देशीयलोकव्यवहारस्यचविरोधेसति। कथंनिश्चयः भवितव्यः। इति। संशयोवर्तते॥ ॥तथाहि॥स्कंदपुराणेकालिकाखंडे। सप्तदशाध्याये॥ ॥वैशंपायननामासौमुनिस्त

त्र सुधार्मिकः। याज्ञवल्क्यस्तथा कण्वो विप्रो माध्यंदिनाह्वयः॥ १॥ कात्यायनश्च मेधावी नित्यमाध्ययने रतः
यजूंष्यध्ययतां तेषां मुनीनां तु गुरोर्मुखात्॥ २॥ गुरोर्गुरोश्च पुत्रस्तु गुरुशिष्यांतरालके॥ चचार बालश्चापल्या
त् कांडिकस्यात्मजो मुनेः॥ ३॥ तस्य चैवाभवच्छिष्यो वैशंपायननामकः॥ तदाध्ययनविघ्नं नो माभूदिति वि
शंकितः॥ ४॥ वारयामास तं बालं कुशैस्तं ताडयन्पदे। कुशसंताडनादेव बालः पंचत्वमागतः॥ ५॥ ततोथ
कांडिको दुःखात्सुरुरोद महास्वतः। वैशंपायनसंज्ञस्तु ब्रह्महत्यातुरो भवत्॥ ६॥ कृत्वानध्ययनं ते तु मु
नयस्सर्व एव तु। तूष्णींभूतास्तदा खिन्नाः स्वाध्यायाभावशंकया॥ ७॥ कोयं विघ्नस्समुत्पन्नः इति चाहुः पर
स्परं॥ स वैशंपायनो गत्वा प्रणम्य चरणे गुरोः॥ ८॥ प्रसीद भगवन् मह्यं गुरुद्रोहस्य निष्कृतिं। हत्यायाश्चैव
बालस्य निष्कृतिं प्रकरोम्यहं॥ ९॥ तस्य तद्वचनं श्रुत्वा गुरुस्तस्यापि कांडिकः। उवाच तं तु मा भैषीरिति तं
स्यहितं ब्रुवन्॥ १०॥ याज्ञवल्क्यं समाहूय कांडिकः प्राह तद्गुरुः॥ वैशंपायनसंज्ञस्य मम बालवधात्तु नः॥ ११॥

ब्रह्महत्याबालवधौसंजातौनियतात्मनः।तन्निष्कृतिंभवंतश्चप्रकुर्वंतुसमाहिताः॥१२॥तद्गुरोश्चवचः
श्रुत्वायाज्ञवल्क्योब्रवीद्वचः।कण्वंकात्यायनंचैवतथामाध्यंदिनंप्रति॥१३॥अस्माभिस्सर्वशिष्यैश्चकण्व
माध्यंदिनादिभिः॥वैशंपायनहत्यायाः व्रताचरणमुक्तवान्॥१४॥तच्छ्रुत्वामुनयः सर्वेकण्वमाध्यंदिनाद्
यः।याज्ञवल्क्यंप्रतिप्राहुस्सरोषमिदमद्भुतं॥१५॥कर्ताकर्मफलंभुङ्क्ते अन्येषांतत्रकाकथा।वैशंपायनएवै
कः करोतुनिष्कृतिंततः॥१६॥गुरुस्तेषांवचश्श्रुत्वासरोषमिदमब्रवीत्।मत्तोधीतोवेदभागोयुष्माभिर्दीयतां
मम॥१७॥ततस्तेचुक्रुशुस्सर्वेयाज्ञवल्क्यादयस्तदा।अधीतवेदभागानांछर्दिंप्राप्तास्तदाभुवि॥१८॥ततोये
तुगुरोःशिष्यास्तित्तिरापक्षिणोभवन्।तेतुचान्येतथाभूत्वातेतुचान्येपिसर्वशः॥१९॥तच्छर्दितंयजुर्जातंह्य
न्येशिष्यागुरोस्तुयेभक्षयंतस्ततस्तेपितैत्तिरीयाभवंस्तदा॥२०॥ततोगुरुःकोपयुक्तःशशापमुनिपुंगवान्।
कण्वादयस्ततोयूयंचंडालत्वमवाप्स्यथ॥२१॥इतिशप्तागुरोस्तेतुयाज्ञवल्क्यादयस्तदा।कण्वःकात्यायनश्चै

वतथामाध्यंदिनोमुनिः॥२२॥जग्मुस्सर्वेतदासूर्यंतपस्तेपुस्सुदुष्करं॥तुष्टुवुर्नियमोपेतायाज्ञवल्क्या
दयस्तदा॥२३॥एवंद्वादशवर्षाणिसूर्यंध्यात्वाविचक्षणाः।सूर्यप्रसादंलब्ध्वाचतेनवेदगणांस्तदा॥२४॥
गृहीतवंतस्तेसर्वेयाज्ञवल्क्याद्योभृशं।येनवाजिस्वरूपेणअध्यापयितवान्प्रभुः॥२५॥अयातयामछं
दांसिशुक्लसंज्ञानिकानिचित्।यजूंषिशुक्लरूपाणिअध्यापयित्वानूरवगः॥२६॥ ॥इत्यादिपुराणा
दिप्रमाणस्यसत्वात्।कथंवाजसनेयिनांयाज्ञवल्क्यशाखाप्रविष्टानांब्राह्मणानां।आश्वलायनआपस्तं
बादिशाखाप्रविष्टब्राह्मणसमानत्वंसंभवति।तेषांशापग्रस्तत्वात्।इतिचेद्वादं॥ ॥एतस्मिन्नर्थेइद
मेवप्रमाणंवा।अन्यत्प्रमाणमस्तिवा।इदमेवप्रमाणमितिचेत्।अस्यत्वयोदाहृतपुराणवाक्यजातस्यप्रा
माण्येकिंप्रमाणं।इतिपृच्छ्यते।ननुप्रमाणस्यापिप्रमाणांतरापेक्षायांअनवस्थादोषप्रसक्तिः॥अपिचलो
कसिद्धवेदशास्त्रपुराणादिप्रमाणानामपि।प्रमाणांतरापेक्षायाः।अवश्यंभावित्वेन।अनवस्थाप्राप्ताआ

प्र॰शा॰ ११०

त्वंतिकमूलप्रमाणासंभवेन वेदादिसर्वप्रमाणानामपि प्रामाण्योच्छेदप्रसंगस्य दुर्वारत्वादिति चेन्नैवं। यद्यपि। अस्मदुक्तप्रतिबंधि — त्वेन त्वयोक्तरीत्या। लोकसिद्ध वेदशास्त्रादिरूपप्रमाणानामपि। अप्रामाण्यसंभवाशंकामूढानां भवत्येव॥ तथापि पर्यालोचनायां कृतायां। त्वयैव लोकसिद्धप्रमाणानां वेदशास्त्रादीनामिति वेदशास्त्ररूपप्रमाणानां लोकसिद्धत्वरूपविशेषणविशिष्टत्वस्य अंगीकृतत्वादेव लोकसिद्धानां प्रमाणानां वेदादीनां अप्रामाण्यशंकानवकाशस्सिद्ध एव॥ ॥ लोकेपि। नहि दृष्टे अनुपपन्नं नामेति। न्यायानुसारेण पुरस्थित आलोकविशिष्ट। अव्यवहितसन्निहितचक्षुस्सन्निकृष्टे। घटादौ प्रत्यक्षज्ञानविषये। संशयादिशंकानवकाशः। इति सर्वसंमतः। एवमेव वेदशास्त्रपुराणादीनां। सर्वदेशसर्वकालवैदिकमतप्रविष्टब्राह्मणादिचंडालांतसर्वजनेषु एकरूपतया यथासंभवं प्रकृतिविकृतिभावेन वा विद्यमानानां प्रामाण्यस्य अबाधितत्वेन सर्वसंप्रतिपन्नत्वेन। असंदिग्ध। अविपर्यस्ततया च। सर्वैः। अंगीकृतत्वा

नि॰

रामः ११०

त्।तस्ययदाकदावा।यस्मिन्कस्मिन्देशेवा।यस्यकस्यचिद्द्विपुरुषस्य।वैदिकमतप्रविष्टस्य।संदेहादेःसंभ
वोनास्त्येवइत्यविवादं॥ ॥त्वयोक्तकालिकाखंडाख्यपुराणवाक्यानांतुसर्वदेशेषुसर्वकालेषु।सर्वज्ञनै
श्चवेदादीनामिव।प्रसिद्धतया।असंदिग्धाविपर्यस्ततयाचप्रामाण्यस्य।अनंगीकृतत्वादेव।तदप्रामाण्य
शंकायाः।अतिसुलभतरत्वेनसर्वेषांजनानां।उत्पद्यतएवेत्यत्राप्यविवादं॥ ॥कालिकाखंडविषयक
प्रामाण्याप्रामाण्यविचारः।उत्तरत्रकरिष्यतइत्यत्रतदुपरमः क्रियते॥ ॥वाजसनेयिब्राह्मणानांअयोग्य
त्वविषये।प्रमाणंकिं।वेदरूपंवा।स्मृतिरूपंवा।पुराणरूपंवा।अन्यद्वेतिपृच्छ्यते।अन्यत्प्रमाणमस्ती
तिचेत्।तत्किंरूपंइतिचपृच्छ्यते।एतस्मिन्विषये।वेदस्मृत्यादिकंतुप्रमाणंनास्ति।मयोक्तकालिकाखंड
व्यतिरेकेण।अन्यत्।मयानदृष्टंनश्रुतंच॥ ॥अपितुपूर्वंमयोक्तरीत्याक्वचित्त्वद्देशेषु।वाजसनेयब्राह्म
णानां।इतरशाखाप्रविष्टआपस्तंबआश्वलायनादिसूत्रानुयायिब्राह्मणानांचभोजनप्रतिभोजनयजन

याजनश्राद्धनिमंत्रणादिसव्यवहाराभावएवप्रमाणं।इतिचेत्।एतादृशप्रामाण्यस्यस्वस्वेष्टविषयेषु।सर्व
त्रसर्वैः उदाहरणविषये।अतिसुलभत्वेनसर्वविषयेष्वपिसर्वैः।उदाहर्तुंशक्यत्वात्।स्वस्वेछानुरूपव्य
वहारसित्येरपिअतिसुलभत्वप्रसंगः॥ ॥अपिचलोकेसर्वैरपिमूढैः।वस्तुस्वरूपविचारंविनैव॥अन्य
स्यव्यवहारदर्शनमात्रेणव्यवहारःप्रवर्तते॥ ॥तद्यथा॥गतानुगतिकोलोकः नलोकः पारमार्थिकः।वेलावा
लुकलिंगेननष्टंमेताम्रभाजनं॥इत्याख्यायिकालोकेवर्तते।अस्यार्थस्तु॥ ॥कश्चनब्राह्मणः।कस्मिंश्चित्क्षे
त्रे।बहुजनाश्रये।स्वयंपत्नीपुत्रगृहादिरहितस्सन्भिक्षादिकंकुर्वन् तत्रस्थितः।कदाचित्ग्रामांतरप्रया
णार्थं।स्वकीयताम्रभाजनंनिक्षिप्यगंतुंउद्युक्तःसन्तस्मिन्ग्रामेमहानद्यां।जनरहितदेशे।सिकतेषुगर्तंकृ
त्वातस्मिन्ताम्रभाजनंनिक्षिप्यसिकतादिनातदाछाद्यपुनः आगतश्चेत्।स्वज्ञापनार्थं।तत्सिकतजातेन।त
दुपरिलिंगाकारंकृत्वाइतरव्यावृत्यर्थं।लिंगोपरिजलसेचनपूर्वकपुष्पाणिनिक्षिप्यग्रामांतरंगतवान्।तद

नंतरं अन्यः स्नानार्थमागतः। स्नानं कृत्वा एतल्लिंगं दृष्ट्वा। अस्मिन् क्षेत्रे एवं लिंगं पूजनीयं वा। किं वेति। आलो
च्य एवमेव सोदकं सपुष्पं। सैकतलिंगं। एकं सोपि कृतवान्। एवमन्योपि। एकं लिंगं कृतवान्। एवमेव। एकं दृ
ष्ट्वा एकः। एकं दृष्ट्वा एकः बहूनि लिंगानि कृतवंतः। तदनंतरं। पूर्वं ताम्रभाजननिक्षेपकर्ता। आगत्य एतेषु लिं
गेषु। कानिचिल्लिंगस्थानानि खातयित्वा दृष्टवान्। तत्र कुत्रचित् पिताम्रभाजनं न प्राप्तवान्। तदानीं पूर्वोक्त श्लो
कं॥ गतानुगतिको लोकः। इत्येवं सर्वत्र जनेषु उक्तवानिति। लोकेप्यपहारो बहुशो वर्तते॥ ॥तस्य श्लोकस्य प
दार्थस्तु उच्यते। गतानुगतिको लोक इति। कश्चन किंचित्कार्यं प्रति। गतश्चेत्। अन्योपि तद्गतिमनुसृत्य गच्छ
तीति अनुगतिकः। तद्गमनानुसारिगतिमानित्यर्थः। लोकः जनः। लोकस्तु भुवने जने। इति प्रमाणात्। न लोकः
पारमर्थिक इति। लोकः जनः। पारमार्थिको न भवति। परमश्चासावर्थश्च परमार्थः। अर्थ्यते प्रार्थ्यते सर्वैरिति
परमस्वरूपमिति यावत् यद्यत्काम्यं वस्तु तत्स्वरूपं। सर्वैः प्रार्थ्यत एव। तादृशवस्तुनः परमार्थस्वरूपज्ञा

नवान्‌पारमार्थिकः।अयंतुलोकः नपारमार्थिकः।अपारमार्थिकः।वस्तुयाथात्म्यज्ञानवान्‌ नभवतीतितात्प
र्यार्थः।एतावताएतदुक्तंभवति।लोकेसर्वोपिजनः एकस्यव्यवहारंदृष्ट्वास्वयमपितद्व्यवहारंकरोति।अ
यंकिमर्थंएतादृशव्यवहारंकृतवान्‌।किंकार्यंतस्य।तद्वस्तुनः किंरूपं।इत्यादिकंअविचार्यैव।तत्कृतव्यव
हारसजातीयव्यवहारमेवकरोति।नतुतद्व्यवहारविषयवस्तुस्वरूपंज्ञात्वा।तत्रयोजनमालोच्य।स्वाधि
कारंस्वसाध्यंइत्यादिकंजानन्‌व्यवहारंकरोतीतिश्लोकार्थः॥ ॥प्रस्तुत॥पराशरमाधवीयादिषु।विष्णु
पुराणभारतादिवाक्यावष्टंभेन।कलियुगधर्मप्रशंसाप्रस्तावे।यस्ययद्रोचते।तस्यतदेवशास्त्रमिति।तदि
च्छाप्रवृत्तेरेवप्रमाणतयाइदानींतनव्यवहारस्यअनुवादाच्चमूढजनकृतव्यवहारस्यैवत्वयाप्रमाणत्वेन
स्वीकारात्‌।तवबुद्धिकौशल्यंकिंवक्तव्यं।एतत्कालाधिपतेः।कलेःराज्ञः वैभवमिति।अस्माकंमहान्‌संतो
षोजातः।प्रकृतेतु।शास्त्रीययोग्यतायोग्यताविचारप्रकरणे।मूढजनप्रवृत्तेःप्रमाणत्वेनस्वीकारः।उभये

रावयोरपिनोचितः। तथामूढव्यवहारमात्रस्यतुप्रामाण्यस्वीकारपक्षेमहानविवेकः प्रसज्येत॥ ॥त
थाहि। सर्वेषामपिजंतूनांप्रायेण। स्वात्मनः व्यतिरिक्तत्वेनदेहज्ञानंवर्ततएव॥ ॥तद्यथा। मातापितृ
रजोरेतस्संयोगप्राक्काले। रजोरेतसोः द्रवीभावेनमातापितृशरीरे। तदवयवांतर्भूतत्वेनस्थितत्वात्। तस्मि
न्कालेस्थूलशरीरस्यस्थित्यसंभावात्। तत्रदेहोनस्थितः तन्निर्गमनकालेमूत्रद्वारस्यअतिसूक्ष्मत्वेनदेहस्य
निर्गमनासंभवात्। प्रत्येकंमातापित्रोः रजोरेतः प्रत्यक्षविषयदशायांस्थूलदेहोनस्थितः। रजोरेतसोः संयोग
कालेतत्पिंडभावकालेचसावयवोदेहोनस्थितः। एवमेवक्रमेण उदरात्बहिर्निर्गमनानंतरमपिबहिस्थि
तशिशुदेहः अल्पपरिमाणतयादृष्टएव। अन्नादिपरिणामेनस्थूलत्वेनदेहोवृद्धिंप्राप्तः। मातापित्रोः शरीर
एव। रजोरेतसोः सद्भावकालमारभ्यमरणपर्यंतं। जीवस्यसद्भावे। सत्येव। देहादिवृद्धिर्जायते। जीवासत्वे
नजायतइति। अन्वयव्यतिरेकाभ्यांजीवद्देहमृतदेहजीवद्भस्मतरक्षादिषुजीवव्याप्तेः। अव्याप्तेश्चसर्वैरनु

भूयमानत्वात्। अनंतरं मरणदशायां। सावयवसंपूर्णदेहे स्थितेपि देवदत्तो मृत इति। मातापितृभार्यादि
कास्सर्वेपि रुदंतीति स्वयं मरिष्यामि। एतद्देहं त्यक्त्वा कुत्र वा गमिष्यामि। इति च व्यसनं प्राप्नोति च। किंच मनु
ष्यमात्रैरपि पिशाचशरीरस्य विद्यमानत्वेनांगीकृतत्वात्। मृतस्यैव पुरुषस्य कर्मवशात्। पिशाचदेहप्राप्तेः
अनुभूतत्वाच्च। मनुष्यदेहस्य मरणानंतरं खननदहनाभ्यां नष्टत्वेपि तस्य जीवस्य पिशाचत्वप्राप्त्या। इतरबाध
नेन। भूतभविष्यत्कथनेन। परकायप्रवेशेन। तदुक्तप्रतीकारवशात्। पिशाचत्वनिवृत्त्या। तदुक्तभाविफलद
र्शनेन। इतरासाध्यकार्यप्रदर्शनेन च पूर्वकालीनदेहनाशानंतरं तत्सत्वेन च सर्वैरनुभूतत्वात्। जीवो भिन्नो
देह इति सर्वलोकसिद्धः। एवं स्थिते व्यवहारे। आलोच्यमाने देहाद्भिन्न एव आत्मेति मनुष्यः सम्यग्जानाति। प
शुरपि स्वमातरं स्वपुत्रं च आघ्राणेन मृतं ज्ञात्वा। संपूर्णअंगविशिष्टं देहं दृष्ट्वापि देहाद्भिन्न आत्मा गत इति ज्ञा
त्वा। तद्विहाय गच्छति। एतावता सर्वेषामपि देहभिन्नआत्मज्ञानस्य सत्वेपि। व्यवहारदशायां देहपातपर्यंतं

नि॰

डितानामपि देहोहमिति ज्ञानस्य। तत्प्रयुक्तकामक्रोधादिव्यवहारस्य च अबाधितप्रवृत्तेर्दर्शनात्॥ ॥

प्रस्तुतलोकेपि चतुरंगादिनामक क्रीडार्थत्वेन एकस्मिन्नेव काष्टे राजेति। मंत्रीति गज इति। अश्व इति पदातिरिति। रथ इति च संकेतं कृत्वा। तत्तदाकाररूपे काष्टशकले। तत्तद्बुध्धिमारोप्य तेष्वेव स्वपक्ष इति शत्रुपक्ष इति च। रक्तादिवर्णभेदेन कल्पयित्वा तत्क्रीडार्थव्यवहारे प्रवृत्ते सति। तत्क्रीडाव्यवहारदशायां कल्पितशत्रुपक्षप्रविष्टपदातिअश्वरथादीनां। स्वेन जितत्वे स्वस्य महती हर्षोत्पत्तिः। तत्तत्तारतम्येन भवति। स्वपक्षप्रविष्टरथादीनां परेण जितत्वे तु तारतम्येन महद्व्यसनप्राप्तिः। इति सर्वैः दृष्टएव। विचार्यमाणे पक्षप्रतिपक्षाभिमानिनोः। तटस्थानां पश्यतां च। उभयोः पक्षयोः। जयापजयतत्तत्प्रयोजनाप्रयोजनतद्भावाभावादीनां। अत्यंताभावज्ञानस्य दृढत्वेन सत्वेपि। उभयोः क्रीडावतोः हर्षविषादअसूयाक्रोधादीनां। सर्वत्र सर्वैः दृष्टत्वेन। अज्ञानभ्रांतिप्रयुक्ततद्व्यवहारस्य लोकसिध्धत्ववत् मूढजनव्यवहारस्यापि प्रमाणत्वेन विवेकिभिः अपशु

सद्दृश्यैः गृहीतुंअत्यंतानुचितत्वात्॥ ॥अतएवब्रह्मसूत्रभाष्येपि।शंकरभगवत्पादाचार्यैः॥ ॥पश्वादि
भिश्चाविशेषादिति॥ ॥मनुष्याणांपशूनांचव्यवहारकाले।देहादिभ्रांतिज्ञानंसमानमेवेतिप्रतिपादितं॥
॥किंचभारते॥ ॥आहारनिद्राभयमैथुनानिसामान्यमेतत्पशुभिर्नराणां।ज्ञानंमनुष्येषुविशेषतोस्तिज्ञानेन
हीनः पशुभिस्समानइतिचप्रतिपादितं॥ ॥एवमेवव्यवहारकालेअन्यशरीरोत्पन्नपत्न्यां।स्वेनोत्सृष्टमल
मूत्रोत्सर्जनक्रिम्यादिवत्।स्वरेतोत्पन्नपुत्रे॥ ॥स्वबहिर्भूतअत्यंतभिन्नगृहधनादिषुचस्वात्यंताभेदज्ञानादि
व्यवहारस्य।सर्वैः सर्वदेशकालेषुदृष्टत्वाच्चलोकव्यवहारस्यप्रामाण्यांगीकारोअसंगतएव।क्वचित्शास्त्री
यव्यवहारेपि।शास्त्रीयबलाबलविचारेदुर्बलस्यशास्त्रस्यमुख्यप्रामाण्यंनसंभवतिक्वचित्लोकव्यवहार
स्यापिशास्त्राविरुद्धत्वेप्रामाण्यंसंभवत्येव॥ ॥अतींद्रियस्यधर्माधर्मपरब्रह्मजातियोग्यता।अयोग्यताश्रे
ष्ठ्यनिंदितत्वादेः प्रत्यक्षादिप्रमाणांतरागम्यत्वेन।शास्त्रैकगम्यत्वादेव।शास्त्रविचारेणैवतत्स्वरूपज्ञानंसंपा

द्नीयं॥ ॥लोकेपिमहतोराज्ञः।महतोविदुषः।बहुशास्त्रज्ञस्यबहुकुशलबुध्येश्चग्रामांतरगमनवेलायां।अज्ञातमार्गप्रश्नस्य।नदीतरणप्रदेशप्रश्नस्यऔषध्यादिपदार्थनिष्ठसंयोगवियोगजन्यगुणदोषादिप्रश्नस्यच।आबालगोपालादिअत्यंतमूढान्प्रतिकर्तव्यत्वेनआवश्यकत्वप्राप्तेः दुर्वारत्वात्।किमुत।शास्त्रीययोग्यतायोग्यतादिरूपगुणदोषादिलक्षण।अतीतकालानागतकालप्राप्तप्राप्तव्यव्यवहितलोकदेशकालप्रयुक्त।सूक्ष्मातींद्रियजातिशाखादिनिमित्तकव्यवहाराहर्त्वानर्हत्वादिविचारस्यशास्त्रैकवेद्यत्वमिति॥ तदपिशास्त्रेणैवप्रतिपादितं॥ ॥तथाहि॥स्मृतिसारसमुच्चये।माधवीयादिषुच॥ ॥यस्मिन्देशेयआचारः पारंपर्यक्रमागतः।श्रुतिस्मृत्यविरुद्धोयस्सग्राह्योनेतरस्तदेति॥ ॥तथाचनरसिंहप्रयोगपारिजातेश्रुत्यादिप्रमाणनिर्णयप्रकरणे॥ ॥ हारीतः।वेदाः प्रमाणंस्मृतयः प्रमाणंधर्मार्थयुक्तंवचनंप्रमाणं।यस्यप्रमाणंनभवेत्प्रमाणंकस्तस्यकुर्याद्वचनंप्रमाणं॥इति॥ ॥तथाश्रुत्यादिप्रमाणबलाब

लंचतत्रैवपारिजातेप्रतिपादयति। लौगाक्षिः॥ ॥श्रुतिस्मृतिविरोधेतुश्रुतिरेवगरीयसी। अविरोधेत
तः कार्यंस्मार्तंवैदिकवत्सदा॥ ॥श्रुतिस्मृतिपुराणेषुविरोधेषुपरस्परं पूर्वंपूर्वंबलीयस्स्यादितिन्याय
विदोविदुः॥ ॥चतुर्विंशन्मते॥ ॥स्मृतेर्वेदविरोधेतुपरित्यागोविधीयते। तथैवलौकिकंवाक्यंस्मृ
तिबाधेपरित्यजेत्॥ ॥व्यासश्च॥धर्मंयोबाधतेधर्मोनसधर्मः कदाचन। अविरोधेतुयोधर्मःसधर्मः स
द्भिरुच्यते॥ ॥तस्माद्विरोधेधर्मस्यनिश्चित्यगुरुलाघवं। तयोर्भूयस्तमंविद्वान्कुर्याद्धर्मविनिर्णयं॥ ॥
पराशरमाधवीयेपि॥ ॥प्रायश्चित्तकांडेअष्टमाध्यायेपरिषत्प्रकरणेनामधारकविप्रस्वरूपलक्षणं
॥ ॥सावित्र्याश्चापिगायत्र्यासंध्योपास्त्यग्निकार्ययोः अज्ञानात्कृषिकर्तारोब्राह्मणानामधारकाः॥ ॥
॥इति॥ ॥ अस्यव्याख्यानं॥ यथोक्तविशेषणरहितानांपरिषत्त्वंनिषेद्धुंतेषांस्वरूपमाह॥ परा
शरः॥ ॥सावित्र्याइति॥ ॥तत्सवितुर्वरेण्यमिति। सवितृप्रतिपादकत्वात्सावित्री। णिकार। य

कारयोः। विश्लेषणचतुर्विंशत्यक्षरत्वाद्गायत्री। चतुर्विंशत्यक्षरा गायत्रीतिश्रुतेः॥ ॥
सावित्र्यादीनामज्ञानान्नमुख्या ब्राह्मणाः ब्रह्मवेदः तमधीत्य अर्थंच। अवगत्य ये। अनुति
ष्ठंतिमुख्याः ते ब्राह्मणाः॥ तथाह अंगिराः॥ ॥ जन्मशरीरविद्याभिराचारेण श्रुतेन
च॥ ॥ धर्मेणचयथोक्तेन ब्राह्मणत्वं विधीयतइति॥ ॥ अस्यव्याख्यानं॥ येतुगायत्रीं
सम्यङ्न जानंतिदूरे। तदनुष्ठानं तेविशिष्टमातापितृजन्या। अपि। ब्राह्मणनाममात्रंधारयं
ति॥ नतुयथोक्तब्राह्मणशब्दार्थत्वं तेषुविद्यते। अतएव। याजनध्यापनादिजीवनहेत्वसंभ
वाज्जीवनायकृषिंकुर्वंति। तेषुब्राह्मणशब्दार्थत्वाभावं॥ व्यास आह। ब्रह्मबीजसमुत्पन्नोमंत्रसं
स्कारवर्जितः। जातिमात्रोपजीवीयः नब्राह्मणइतिस्मृतइति॥ नामधारकवद्ब्राह्मणब्रुवस्यापि
नमुख्यं ब्राह्मण्यं ब्राह्मणब्रुवश्चतुर्विंशतिमतेदर्शितः॥ ॥ गर्भादानादिसंस्कारैर्वेदोपनयनै

र्युतः।नाध्यापयतिनाधितेसभवेद्ब्राह्मणब्रुवइति॥२॥ ॥ब्राह्मणब्रुवलक्षणं॥ ॥पराशर
मूलं॥अव्रतानाममंत्राणांजातिमात्रोपजीविनां॥सहस्रशस्समेतानांपरिषत्त्वं नविद्यते॥अस्य
व्याख्यानं॥अमुख्यब्राह्मणानांतुत्स्वव्यवहारदर्शनेनप्रायश्चित्तविशेषपरिज्ञानेपिपरिषत्त्व।
योग्यतानास्तीत्याह॥अव्रतानामिति।सोम्यप्राजापत्यादिव्रतहीनाः।अव्रताः अनधीतवेदा
अमंत्राः।नन्वध्यात्मविद्यायुक्तस्यैकस्यैवपरिषत्त्वमस्ति।एकोवाध्यात्मवित्तमइतिस्मर
णात्।अध्यात्मविद्यारहितस्यत्वेकस्यपरिषत्त्वाभावेपि।चतुर्णांपरिषत्त्वंस्मर्यते॥ ॥
चत्वारोवेदधर्मज्ञाःपरिषदिति॥ ॥अनयैवदिशाअध्ययनादिरहितानांपंचषण्णां
।परिषत्त्वाभावेपि॥सहस्रसंख्यायुक्तानांपरिषत्त्वंभवतीत्याशंक्य।तन्निराकरणाय
।सहस्रशस्समेतानामित्युक्तं।अध्ययनादिहीनवन्नास्तिकादीनामपि॥ परि

षत्वंनास्ति। तदुक्तंचतुर्विंशतिमते॥ ॥ वेदपाठाद्यनियताधर्मशास्त्रविवर्जि
ताः॥ परिषत्वंनतेषांस्यान्नास्तिकानांविशेषतः॥ ॥ अनाहिताग्नयोज्ञानात्के
वलंवेदपारगाः॥ पिशुनाःक्रूरकर्माणः परिषत्वंनविद्यते॥ ॥ शास्त्रज्ञादुष्ट
कर्माणःप्रतिकूलास्त्वसूयकाः॥ हेतुकाःछिन्नमर्यादाः परिषत्वेविवर्जिताइति॥४०॥
पराशरमूलं॥ यद्वदंतितमोमूढाःमूर्खाधर्ममतद्विदः॥ तत्पापंशतधाभूत्वातद्वक्तॄ
नधिगच्छतीति॥५॥ अज्ञात्वाधर्मशास्त्राणिप्रायश्चित्तंददातियः॥प्रायश्चि॒त्तीभवे
त्पूतःकिल्बिषंपरिषद्व्रजेदिति॥ अस्यव्याख्यानं॥ पूर्वंधर्मशास्त्रंविजानतामिति
विशेषणेनतद्विज्ञानरहितस्यपायश्चित्तवक्तृत्वंनास्तीति॥ यद्यपीत्यूचितं॥
तदेवात्रयदित्यादिश्लोकद्वये। नप्रपंचयति॥ अज्ञानंद्विविधंसत्यपि॥ धर्म

शास्त्रपाठे न्यायनिर्णयकौशलाभावेन प्रकृतस्य सूक्ष्मस्य प्रायश्चित्तविशेषस्यापरिज्ञानमेकं॥ द्वयव्यवहारेण॥ सत्यपि परिज्ञाने धर्मशास्त्रापरिशीलनमपरं॥ तदुभयमभिलक्ष्य श्लोकद्वयं॥ तमोमूढाः प्रज्ञामांद्येन तमसा सूक्ष्मन्यायेषु विभ्रांताः मूर्खाः पंडितंमन्याः अतद्विदः प्रायश्चित्तविशेषमजानंतः तादृशाः पुरुषाः यत्पापमुद्दिश्य धर्मं प्रायश्चित्तमन्यथा वदंति॥ तत्पापं शतधा भूत्वा तान्मूर्खान् वक्तॄन् प्राप्नोति॥ अंगिराश्चैतदेवाह॥ यत्तु धर्ममजानद्भिः प्रायश्चित्तं सभागतैः तत्पापं शतधा भूत्वा वक्तॄनेवोपतिष्ठतीति प्रायश्चित्तमन्यथाकारित्वान्नशुध्यति॥ यस्तु धर्मशास्त्रपाठहीनः॥ प्रायश्चित्तविशेषं लोकतोवगत्य निर्दिशति तत्र यथाशास्त्रानुष्ठातृत्वात्प्रायश्चित्ती पूतो भवति॥ स तु वक्ता किल्बिषं व्रजेत्॥ धर्मशास्त्राणामपठितत्वात्॥ तत्पाठाभावे विधायकवचनस्योदाहर्तुमशक्यत्वात्॥ उदाहृत्यैव वचनं प्रायश्चित्तं निर्देष्टव्यमिति हि पूर्वमुक्तं॥ ऋषिवक्त्रोद्गतान् धर्मान् गायंतो वेदपारगाः इति अंगिरा अपि॥ वचः पूर्वमुदाहार्यं यथोक्तं धर्म

वक्तृभिः॥पश्चात्कार्यानुसारेणशक्त्याकुर्युरनुग्रहं॥नहितेषामतिक्रम्यवचनानिमहात्मनां॥प्रज्ञानेनैवविं
द्वद्भिःशक्यमन्यत्समाषितुमिति॥६॥ मू॥चत्वारोवात्रयोवापियंब्रूयुर्वेदपारगाः॥सधर्मइतिविज्ञेयोनेत
रैस्तुसहस्रशः॥७॥ अस्यव्याख्यानं ॥धर्मशास्त्रपरिज्ञानस्यन्यायनिर्णयकौशलस्यचसद्भावेप्यनवधा
नादिचित्तदोषशंकाव्युदासायस्वसमानैस्त्रिचतुरैःसहसंवादोपेक्षितइत्यभिप्रेत्याह॥ चत्वारइति॥बहू
नामन्योन्यसंवादेनयोनिश्चितःसएवधर्मइतिविज्ञेयः॥इतरैरन्योन्यसंवादमनाद्रियमाणैःसहस्रसंख्याक
वचनपाठपुरःसरमभिहितोपिविसंवादशंकायाःअनिराकृतत्वान्नासौधर्मत्वेनस्वीकार्यः॥७॥ पराश
रमू॰॥प्रमाणमार्गमार्गतोयेधर्मंप्रवदन्तिवै॥तेषामुद्विजितेपापंसद्भूतगुणवादिनां॥८॥ अस्यव्याख्यानं
सत्स्वपित्रिचतुर्णांपरस्परसंवादेविप्रकीर्णेष्वनेकेषुधर्मशास्त्रेषुक्वापिकस्यचिद्विशेषस्यसंभवात्तायश्चित्तनि
र्देशवेलायांपुनःशास्त्राणिपर्यालोच्यैवनिर्देष्टव्यमित्याह॥प्रमाणेतिप्रमाणमार्गोधर्मशास्त्रंतात्पर्यं॥तस्य

प्र॰शा॰
११८

नि॰

मार्गःन्यायेननिष्कर्षःतंकुर्वंतएव॥येधर्मंप्रवदंतितेभ्यःपापमुद्विजतेनाशयोग्यतामापद्यतइतियावत्॥तत्र
हेतुःसद्भूतेतिसन्भूतःसत्यभूतःअन्यथाभावमप्राप्तःपरस्परसंवादेनानवधानादिदोषाभावात्पुनःशास्त्रपर्या
लोचनेननिरूढरहस्यावगमाच्च॥गुणोधर्मःश्रेयोहेतुत्वात्तादृशधर्मवादित्वात्तेभ्यःपापस्योद्वेगोयुक्तःपर
स्परसंवादःपुनःधर्मशास्त्रपाठश्चांगिरसादर्शितः॥ तस्मिन्लुप्तादितेपापेयथावत्स्वर्मपाठकाः॥तेत
थातत्रजल्पेयुर्विमृशंतःपरस्परमिति॥पापेपापकारिणिपुरुषे॥१०॥ परिषत्तारतम्यं॥ पराशरस्तु
चत्वारोवात्रयोवापिवेदवंतोग्निहोत्रिणः॥ब्राम्हणानांसमर्थायेपरिषत्साभिधीयते॥११॥अनाहिताग्नयो
येचवेदवेदांगपारगाः॥पंचत्रयोवाधर्मज्ञाःपरिषत्साप्रकीर्तिता॥१२॥ मुनीनामात्मविद्यानांद्विजानांयज्ञ
याजिनां॥वेदव्रतेषुस्नातानामेकोपिपरिषद्भवेत्॥१३॥ पंचपूर्वंमयाप्रोक्तास्तेषांचासंभवेत्रयः॥स्ववृत्ति
परितुष्टायेपरिषत्साप्रकीर्तिता॥१४॥ असव्याख्यानं ॥अथमुख्यानुकल्पभेदेनपरिषद्भेदानाह ॥

चत्वार इत्यादिना॥ ग्राममध्ये वर्तमानानां वेदविद्यादिगुणयुक्तानां ब्राम्हणानां मध्ये ये अत्यंतसमर्थाः ते च त्वा
रो मुख्या परिषत्॥ तदसंभवे त्रयो वा परिषत्वेन ग्राह्याः॥ तत्पक्षद्वयमाहिताग्निष्वभिहितं तदसंभवे अना
हिताग्नयः तत्रापि पंचेति मुख्यः कल्पः त्रय इत्यनुकल्पः तत्रापि पक्षद्वयस्यासंभवे सत्येक एव परिषद्भवेत्॥ तदे
कं विशिष्टं मुनीनामित्याद्युक्तं आत्मनि ब्रम्हणि विद्यानुभवो येषां ते आत्मविद्याः तथाविधाः कृतकृत्याः संतोपि लो
कानुग्रहाय यज्ञैरिष्टवंतो यज्ञयाजिनः वेदानामृगादीनां चतुर्णामध्ययनान्यान्यनुष्ठितानि तत्तद्वेदोक्तानि व्रतानि
तत्तद्व्रतसहितेषु वेदेषु समाप्तेषु यथाविधिस्नाताः शिरोव्रतेन स्नातानामिति वा पाठः आथर्वणिकानां वेदव्रते
षु मुख्यं शिरोव्रतं तथा चाथर्वणिका आमनंति क्रियावंतः श्रोत्रिया ब्रम्हनिष्ठाः स्वयंजुह्वत एकर्षिं श्रद्धावंतः स्तेषा
मेवैतां ब्रम्हविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णमिति॥ तस्मिन् शिरोव्रते सत्यनंतरमध्ययनं परिसमाप्य
यथाविधि स्नाता स्तेषामेतेषां यथोक्तगुणसंपन्नानां मध्ये यः कोप्येकः परिषद्भवेत्॥ तत्र साग्निका नाम नग्नि-

कामं द्वौ द्वौ पक्षौ आत्मविदेकः पक्ष इति ॥ पंचपक्षा मया प्रोक्तास्तेषां सर्वेषामसंभवे । एके च न विद्यमानाः श्रेष्ठाः
त्रयः ते यद्यायुधजीवनाद्यधर्मे वृत्तिमनुपजीव्य यथासंभववृत्तिमात्रेण परितुष्टास्तेषामपि परिषत्त्वमविरुध्यं
अंगिरसापि परिषद्विकल्पो दर्शितः ॥ चत्वारो वा त्रयो वापि वेदवंतोग्निहोत्रिणः ॥ ये सम्यङ्नियता विप्राः
कार्याकार्यविनिश्चिताः ॥ प्रायश्चित्तप्रणेतारः सप्त तेपि प्रकीर्तिताः ॥ एकविंशतिभिश्चान्यैः परिषत्त्वं समा-
गतैः ॥ सावित्रीमात्रसारैस्तु चीर्णवेदव्रतैर्द्विजैः ॥ यतीनामात्मविद्यानां ध्यायिनामात्मयाजिनां ॥ शिरोव्रते-
श्चस्नातानामेकोपि परिषद्भवेत् ॥ येषां लाघवकार्येषु मध्यमेषु तु मध्यमाः ॥ महापातकचिंतासु शतशो भूयस्त-
वचेति ॥ बृहस्पतिरपि ॥ लोकवेदांगधर्मज्ञाः सप्त पंच त्रयोपि वा ॥ यत्रोपविष्टा विप्रास्तुः सा यज्ञसदृशी सभेति ॥
॥१४॥ अनधीतब्राम्हणस्वरूपं ॥ पराशरमूल ॥ अतऊर्ध्वं तु ये विप्राः केवलं नामधारकाः ॥ परिषत्त्वं न तेष्वस्ति
सहस्रगुणितेष्वपि ॥१५॥ अस्य व्याख्याने ॥ नामधारकविप्राणां परिषत्त्वं नास्तीति यत्सूर्वमुदाहृतं तदे

वदृष्टांतेन दृढीकर्तुं सिंहावलोकनन्यायेन पुनः पुनः परामृशति ॥ अत इति ॥ अतऊर्ध्वं वर्णितेषु परिषत्पक्षेषु अव
गम्यमानेभ्यो गुणवद्भ्यो ब्राम्हणेभ्यऊर्ध्वं तव्द्यतिरिक्ता गुणरहिताइति यावत् ॥ १५ ॥ पराशरमूलं ॥ यथा काष्ठ
मयो हस्ति यथा चर्ममयो मृगः ॥ ब्राम्हणस्त्वनधीयानस्त्रयस्ते नामधारकाः ॥ १६ ॥ अस्य व्याख्यानं
गुणरहितब्राम्हणेषु ब्राम्हण इति नाममात्रं केवलं वर्तते न तु ब्राम्हणशब्दप्रवृत्तिनिमित्तार्थो मुख्योऽस्तीत्येवमर्थं दृ
ष्टांताभ्यां विशदयति ॥ यथेति हस्तित्वं मृगत्वं जातिद्वयं तत्तच्छब्दप्रवृत्तिनिमित्तं ॥ नचैतत्काष्ठमयचर्ममययो
र्विद्यते तथापि हस्तिमृगनामसादृश्यमात्रेण प्रयुज्यते ॥ तद्वद्वेदाध्ययनविहीने ब्राम्हणशब्दप्रयोगः ॥ १६
पराशरमूलं ॥ ग्रामस्थानं यथा शून्यं यथा कूपस्तु निर्जलः ॥ यथा हुतमनग्नौ च अमंत्रा ब्राम्हणास्तथा ॥ १७ ॥
अस्य व्याख्यानं ॥ ननु ब्राम्हणशब्दस्यावयवार्थस्तस्मिन्माभूत् ॥ जातिस्तु विद्यते विशिष्टमातापितृजन्यत्वं ब्राम्ह
णत्वजातिः तथा च ब्राम्हणशब्दस्य तस्मिन्योगिकत्वासंभवेपि रूढेः सद्भावाद्विषमौ दृष्टांतावित्याशंक्याह ॥

ग्रामेति ग्रामशब्दो हि जननिवासस्थाने भूभागविशेषे मुख्यया वृत्त्या वर्तते॥ कूपशब्दश्च जलाधारे खाते होमश
ब्दार्थश्च शास्त्रसंस्कृतवह्नौ हविःप्रक्षेपरूपः तत्र जनविशिष्टस्थानं मुख्यो ग्रामः जनशून्यस्थानं तु ग्रामाभासः।
कूपहोमयोरप्याभासत्वमेव योजनीयं॥ तैरेतैः दृष्टांतैरयं नामधारको जातिमात्रसद्भावेपि ब्राम्हणाभासः न तु मु
ख्यः पंकजशब्दस्य च यद्यपि जातिः प्रवृत्तिनिमित्तं तथाप्यवयवार्थस्तस्मिन्निमित्ते तर्भवत्येव ततो योगरूढ इति
व्यवह्रीयते एवं ब्राम्हणशब्दस्यापि योगरूढत्वाज्जातिसद्भावेपि योगहीनत्वादाभासत्वं द्रष्टव्यं॥१७॥ पराश
रमूल॥ यथा षंढोफलः स्त्रीषु यथा गौरूषराफला॥ यथा चाग्नेःफलं दानं तथा विप्रोनृचोफलः॥१८॥ अस्य व्या
ख्यानं॥ ननु मुख्यसंभवे तस्य मुख्यं ग्राह्यं॥ तदसंभवे त्वमुख्यमपि ग्राह्यमिति लोकवेदस्थितिः॥ तथा चाध्ययना
दिसंपन्नमुख्यब्राम्हणानामसंभवे सति ब्राम्हणाभासानामपि कचित्परिषत्त्वं स्यादित्याशंक्याह॥ यथेति अमुख्य
मपि यत्र कार्यक्षमं भवति तत्र मुख्यासंभवे तदुपादेयं यथा वैदिके कर्मणि सोमाभावे पूतिकाभिषवः यथा लोके शा

त्यभावे कोद्रवादिः तद्ब्राह्मणाभासस्यापि कार्यक्षमत्वे कचिदुपादेयत्वं स्यात्॥ नत्वध्ययनहीनस्य प्रायश्चित्तवि धानक्षमत्वमस्ति॥ नहि पुंस्त्वोपेतस्यासंभवेपि षंडः कश्चित्प्रजामुत्पादयन्नुपलभ्यते॥ नापि भूमिरूषरा काचित्सलति नाप्यज्ञः प्रतिगृण्हन्दातृफलहेतुः एवमसावपि ऋग्गादिमंत्रविहीनः न पापनिवृत्तिफलहेतुः॥१४॥ पराशर रमूल॥ चित्रकर्मयथानेकै रंगैरुन्मील्यते शनैः॥ ब्राह्मण्यमपि तद्वत्स्यात् संस्कारैर्मंत्रपूर्वकैः॥१५॥ अस्य व्याख्यानं ननु नामधारकः षंडादिवदफलश्चेत्तर्हि संस्कारैरपि तस्य कोतिशयः स्यात् नहि स्वदारसहस्रेणापि षंडः प्रजननयितुं प्रभवतीत्याशंक्य दृष्टांतेन संस्कारकृतोत्कर्षं संभावयति चित्रकर्मेति चित्रकारः प्रथमं पटादौ मषिरेखाभिः सर्वा वयवाभिः संपूर्णानि मनुष्यादिरूपाणि लिखति॥ नच तानि तावता दर्शनीयत्वमापद्यंते॥ पुनस्तान्येव रूपाणि नानाविधवर्णप्रक्षेपेणोन्मीलितानि दर्शनीयतामापाद्यंते एवं जातिब्राह्मण्यं शास्त्रीयसंस्कारैरुद्बुध्यते मंत्र संस्कारेण विद्यादयोप्युपलक्ष्यंते अतएवांगिराः॥ जन्मशारीरविद्याभिराचारेण श्रुतेन च॥ धर्मेण च यथोक्तेन ब्रा

ह्मणत्वंविधीयते॥चित्रकर्मयथानेकैरंगैरुन्मील्यतेशनैः॥ब्राह्मण्यमपितद्वत्स्यात्संस्कारैर्विधिपूर्वकैरिति॥१९॥
पराशरमूले॥प्रायश्चित्तंप्रयच्छंतियेद्विजानामधारकाः॥तेद्विजाःपापकर्मणःसमेतानरकंययुः॥२०॥
अस्यव्याख्यानं॥ननुयत्रसंस्कृताबहवोनसंतितत्रैकेनसंस्कृतेनसहइतरेनामधारकाःप्रायश्चित्तविधाने
स्युरित्याशंक्याह॥ प्रायश्चित्तमिति॥समेताएकेनसंस्कृतेनसंगताःययुःयांतीत्यर्थः॥यद्यपिसंस्कृतःस्व
यंनरकंनार्हतितथाप्यनर्हैःसहएकस्यांपरिषद्युपवेशनात्तस्यनरकप्राप्तिः॥एतच्चचतुर्विंशतिमतेस्पष्टी-
कृतं॥प्रायश्चित्तंप्रयच्छंतियेद्विजानामधारकाः॥तेसर्वेपापकर्मणःसमेतोनरकंव्रजेदिति॥समेतोनामधार
कैसंगतःतावतैवापराधेनमंत्रसंस्कृतोपिनरकंप्राप्नोति॥२०॥ पराशरमूल ॥येपठंतिद्विजावेदंपंच
यज्ञरताश्चये॥त्रैलोक्यंतारयंत्येतेपंचेंद्रियरताअपि॥२१॥ अस्यव्याख्यानं ॥ननुसंस्कृतानांबहूनांम

पिग्रहिणां कथं परिषत्त्वं स्यान्नामधारकवत्तेषामिंद्रियरतत्वादित्याशंक्याह यइति॥ वेदो हि निखिलपा
पापनयने समर्थः॥ तथा च तैत्तिरीयब्राम्हणे वत्सादिपरंपरया प्राप्तं पापं स्वाध्यायोपहंतीति श्रूयते अग्निं वै जातं पा
प्माजग्राह तं देवा आहुतीभिः पाप्मानमपाघ्नन्नाहुतीनां यज्ञेन यज्ञस्य दक्षिणाभिर्दक्षिणानां ब्राम्हणेन ब्राम्हण
स्य छंदोभिः छंदसा ऽ स्वाध्यायेनापहतपाप्मा स्वाध्यायो देवपवित्रं वा एतदिति मनुरपि॥ वेदाभ्यासोन्वहं
शक्त्या महायज्ञक्रियाक्षमा॥ नाशयंत्याशु पापानि महापातकजान्यपि॥ यथैधस्तेजसा वन्हिः प्राप्तं निर्दह
ति क्षणात्॥ तथा ज्ञानकृतं पापं कृत्स्नं दहति वेदवित्॥ यथा जातबलो वन्हिर्दहत्यार्द्रानपि द्रुमान्॥ तथा द
हति वेदज्ञः कर्मजं दोषमात्मन इति॥ ये तु श्रुत्याल्हवः संतः प्रमादाद्यादिदोषेण पठितं वेदं धारयितुमसम
र्थास्तेपि पंचमहायज्ञानुष्ठानात् क्षीणपापा एव पंचमहायज्ञानां पापक्षयहेतुत्वं प्रथमाध्याये प्रपंचितं॥
अतश्च पंचेंद्रियसक्तानामक्षीणपापत्वेन परिषत्त्वमविरुद्धं॥२१॥ वेदप्रशंसा ॥पराशरमूल॥ संप्रण

तस्मश्शानेषुदीप्तोग्निःसर्वभक्षकः॥एवंचवेदविद्विप्रःसर्वभक्षोहिदैवतं॥२२॥अस्यव्याख्यानं॥नन्वेवम
पिपंचयज्ञादिभिःपरिशुद्धेषुगृहेषुपरकीयंपापमनुप्रविशतिपरान्नभोजनादेस्तत्पापकत्वात्तदुक्तं
हिमनुष्याणांमन्नमाश्रित्यतिष्ठति॥अन्नादेर्भ्रूणहामार्ष्टीत्यादिस्मरणादित्यतआह॥संप्रणीतइति॥न
न्वग्निःश्मशाननीतशवादिभक्षणप्रयुक्तइत्येतावतादेवत्वंपरित्यजति॥एवंवेदविदोभूदेवस्यअभक्ष्यभो
ज्यादिदोषमात्रेणभूदेवत्वंनापैति॥एकैकस्यमंत्रस्याभक्ष्यभक्षणाद्यशेषदोषनिवर्तकत्वात्॥तथाचमंत्र
लिंगंयदन्नमद्म्यनृतेनदेवादास्यन्नदास्यन्नुतवाकरिष्यन्॥यद्देवानांचक्षुष्यागोअस्तियदेवकिंचप्रतिज
ग्राहमग्निर्मातस्मादनृणंकृणोतु॥यदन्नमद्मिबहुधाविरूपंवासोहिरण्यमुतगामजामविं॥यद्देवानामि
त्यादि॥अनृतेनपरकीयादौस्वकीयत्वादिवचनेनदास्यन्अनर्हेभ्योनष्टशौचादिभ्यःस्नेहानुबंधेनहव्यकव्य
योःप्रयच्छन्अतिथिभ्योयोग्येभ्यःअदास्यन्अप्रयच्छन्करिष्यन्नन्नभक्षणव्यतिरिक्तमविहितंप्रतिषिद्धं

वाकुर्वन्॥चक्षुष्यागःनग्नपरयोषिदवेक्षणादितथादेवानामागःविष्ण्वाद्यंदेवंदृष्ट्वाप्यनमस्कारादियदेव
किंचअश्वमहिषकालपुरुषाद्यप्रतिग्राह्यंयत्किंचिद्यत्तिनग्राहंप्रतिगृहीतवानस्मि॥बहुधाविरूपं॥गणा
न्नगणिकान्नादिरूपेणानेकदोषयुक्तंयदन्नमद्मि॥भक्षितवानस्मि॥यथोक्ताःसर्वस्माद्दोषजातान्मामनृ
णंपूतं॥अग्निःकरोत्विति मंत्रार्थः॥तथाचपवमानसूक्तादिमहिमाभिधीयतेऋयविक्रयाद्योनिदोषादभ
क्ष्यभोजनात्प्रतिग्रहाद्सद्भोजनाच्चापिनृशंसंतत्सावमानीभिरहंपुनामीति॥तथासामगानेसामगाःपठं
तिअभोज्यभोजनेकृतेपंथाअधोदिवइतिसामगायेदितिशेषः॥ मनुरपि॥प्रतिगृह्याप्रतिग्राह्यंभुक्त्वा
चान्नंविगर्हितं॥जपंस्तरत्समंदीयंपूयतेमासवस्व्यहात्॥हत्वालोकानपीमांस्त्रीनश्नन्नपियतस्ततः
ऋग्वेदंधारयन्विप्रोनैनःप्राप्नोतिकिंचनेति॥२२॥ पराशरमूल ॥अमेध्यानिचसर्वाणिप्रक्षिप्यंते
यथोदके॥तथैवकिल्बिषंसर्वंप्रक्षिपेच्चद्विजोत्तमे॥२३॥ अस्यव्याख्यानं ॥ननूक्तरीत्यावेदविदः

स्वकीयंपापमनुदंतुनाम॥तथापितैलोक्यंतारयंत्येते इतियदुक्तंतत्कथमित्याशंकादृष्टांतेनतदुपपादय
ति॥अमेध्यानीति॥गंगादिजलेस्नातुंप्रविष्टाःशरीरगतस्वेदादीन्यमेध्यानिप्रक्षिपंतिनैतावतातज्जलम
पूतंभवति॥प्रत्युतमलोपेतान्पुरुषान्मलापनयनेनपुनाति॥एवंप्रायश्चित्तीस्वकीयमशेषंपापंवेदवि
त्सुप्रक्षिपेत्॥तत्रप्रक्षेपणंनामतदपनयनायतेषामग्रेनिवेदनंतेचतदपनयनांगीकारमात्रेणनदुष्यं
ति॥प्रत्युततदपनयनसमर्थंशास्त्रीयमुपायमुपदिश्यपापिनमुद्धरंति॥तस्मात्तारयंतीत्युपपन्नं॥२३॥
पराशरमूलं॥गायत्रीरहितोविप्रःशूद्रादप्यशुचिर्भवेत्॥गायत्रीब्रम्हतत्वज्ञाःसंपूज्यंतेजनैर्द्विजाः॥२४
अस्यव्याख्यानं॥ननुवेदविदश्चेदीदृशोमहिमातर्हिवेदविदांदैनंदिनगायत्र्युपास्त्यादयलसानामपिपरि
षत्वंप्रसज्येतेत्यतआह॥गायत्रीति॥गायत्रीचब्रम्हचगायत्रीब्रम्हणीतयोस्तत्वंगायत्रीब्रम्हतत्वं॥गाय
त्र्यास्तत्वमंगन्यासकल्पावर्णविशेषध्यानादिब्रम्हणस्तत्वं॥वेदोक्ताशेषानुष्ठानादितदुभयंयथावदगत्या

नुतिष्ठंतस्तत्त्वज्ञा इह विवक्षिताः॥ब्रम्हपरमात्मा तस्य तत्त्वं वेदांतप्रतिपाद्यं स्वरूपं तद्गायत्र्याः भर्गशब्दवाच्यत्वे
नावगम्य तदुपासते इति गायत्रीब्रम्हतत्त्वज्ञा इति वा॥२५॥ पराशरमूल ॥धर्मशास्त्ररथारूढा वेदखड्गध
रा द्विजाः॥क्रीडार्थमपि यं ब्रूयुः स धर्मः परमः स्मृतः॥२६॥ अस्य व्याख्यानं ॥ननु दुःशीलानां परिषत्त्वाभ्यु
पगमे धर्मनिश्चिस्य प्रायश्चित्तं स्यान्यथाभावः शक्यतइत्यत आह॥धर्मशास्त्रेति॥यथा युद्धार्थं रथमारुह्य ख
ड्गं धृत्वागतस्य योद्धुर्मुहूर्तमात्रं विलंबितोपि युद्धे खड्गचालनादिरूपा युद्धोचिते वलीला प्रवर्तते॥तद्वत्श्रु
ताद्वेदादिरूपाद्रथात्धर्मशास्त्राशिक्षुयो निपुणो ब्राम्हणः इंद्रियपरवशोपि चिरं शास्त्रवासनावासितत्वात् क्रीडन्न
पि यथाशास्त्रमेव ब्रूते॥किमु वक्तव्यं॥बुद्धिपूर्वं परिषद्युपविश्य अब्रुवन्विब्रुवन्वापि नरो भवति॥किल्बिषीत्यादि
शास्त्रं चावगत्यान्यथा न ब्रूत इति॥२६॥ विज्ञानेश्वरीये प्रथमाध्याये आचारकांडे ॥इज्याचारदमाहिं
सादानस्वाध्यायकर्मणां॥अयं तु परमो धर्मो यद्योगेनात्मदर्शनं॥१॥ अस्य व्याख्यानं ॥देशादिकारक

मे

हेतूनामपवादमाह॥इज्येति॥इज्यादीनां कर्मणामयमेव परमोधर्मः॥यद्योगेन बाह्य चित्तवृत्तिनिरोधेना त्मनोदर्शनं॥याथातथ्यज्ञानं योगेनात्मज्ञाने देशादिनियमोनास्तीत्यर्थः॥तदुक्तं यत्रैकाग्रता तत्राविशेषादिति॥४॥तत्रैव विज्ञाने ध्यरीये॥चत्वारोवेदधर्मज्ञाः परिषत्त्रैविद्यमेव वा॥सा ब्रूते यं स धर्मः स्यादेको वाध्यात्मवित्तमः॥५॥अस्य व्याख्यानं॥कारकहेतुषु ज्ञापकहेतुषु वा संदेहे हेतुनिर्णयहेतुमाह॥चत्वा रइति॥चत्वारो ब्राह्मणा वेदधर्मशास्त्रज्ञाः परिषत्त्रिस्रो विद्यास्तेषां समूहस्त्रैविद्यं धर्मशास्त्रज्ञत्वमत्रा प्यनुवर्तते॥तद्वा परिषत्॥सा पूर्वोक्ता परिषद्यं ब्रूते स धर्मः॥अध्यात्मज्ञानिषु निपुणतमो वेदधर्मशास्त्रज्ञश्च यः स एकोपि वा यं ब्रूते स धर्म एव॥५॥मनुस्मृतौ प्रथमाध्याये॥ मूलं ॥भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः॥बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः॥१॥ ब्राह्मणेषु च विद्वांसः विद्वत्सु कृतबुद्धयः॥ कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः॥ इति मुद्राक्षरसंभूतमनुस्मृतौ॥ बोधायनधर्मसूत्रस्य व्याख्या

अधीयत्स्वदति ब्रह्म विद्या ५

त्पधूर्तस्वामिकृतप्राचीनभाष्येशंकराचार्यकृतसनत्सुजातीयभाष्येच॥ ब्रह्मविज्ञोपरंभूतंनकिंचिदिहविद्यत इति॥मनुवचनमधिकतयाश्ठितंवर्तते॥अस्यव्याख्यानं॥ भूतानामिति॥भूतारब्धानांस्थावरजंगमानांमध्येप्राणिनःकीटादयश्रेष्ठाःकदाचित्सुखलेशात्तेषामपिबुद्धिजीविनःस्वार्थमिरर्थदंशोपसर्पणापसर्पणकारिणःपश्वादयस्तेभ्योपिमनुष्याःप्रकृष्टज्ञानसंबंधात्तेभ्योपिब्राह्मणाःसर्वपूज्यत्वात्॥अपवर्गाधिकारयोग्यत्वाच॥९६॥अस्मिन्नेवमनुस्मृतौषष्ठाध्याये॥ध्यानिकंसर्वमेवैतद्यदेतदभिशब्दितं॥नह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुतेति॥८२॥अस्मिन्नेवमनुस्मृतौद्वितीयाध्याये॥ विद्वद्भिःसेवितःसद्भिर्नित्यमद्वेषरागिभिः॥हृदयेनाभ्यनुज्ञातोयोधर्मस्तन्निबोधत॥१॥अस्मिन्नेवमनुस्मृतौद्वितीयाध्याये॥ वेदोखिलोधर्ममूलंस्मृतिशीलेचतद्विदां॥आचारश्चैवसाधूनामात्मनस्तुष्टिरेवच॥६॥ अस्यव्याख्यानं ॥ साधूनामिति॥धार्मिकाणामित्यर्थः॥आत्मतुष्टिश्चेति॥वैकल्पिकपदार्थेविषयाधर्मेप्रमाणं॥६॥ ॥

अस्मिन्नेवाध्यायेमनुमूलं॥ यःकश्चित्कस्यचिद्धर्मोमनुनापरिकीर्तितः॥ससर्वोभिहितोवेदेसर्वज्ञानमयो
हिसः॥७॥अस्यव्याख्यानं ॥वेदादन्येषांवेदमूलत्वेनप्रामाण्यमभिहितेपिमनुस्मृतेःसर्वोत्कर्षज्ञापनायवि
शेषेणवेदमूलतामाह॥यःकश्चिदिति॥यःकश्चित्कस्यचिद्ब्राम्हणादेर्मनुनाधर्मउक्तः॥ससर्वोवेदेप्रतिपा
दितः॥यस्मात्सर्वज्ञोसौमनुःसर्वज्ञतयाचोत्सन्नविप्रकीर्णापठ्यमानवेदार्थसम्यग्ज्ञात्वालोकहितायोप
निबद्धवान्॥गोविंदराजस्तु॥सर्वमयइत्यस्यसर्वज्ञानारब्धएवंवेदइतिवेदविशेषणतामाह॥७॥
मनुस्मृतौद्वादशाध्यायेमनुमूलं ॥यथाजातबलोवन्हिर्दहत्यार्द्रानपिद्रुमान्॥तथादहतिवेदज्ञःकर्म
जंदोषमात्मनः॥१०१॥ अस्यव्याख्यानं ॥यथेति॥यथाप्रवृद्धोग्निरार्द्रानपिद्रुमान्दहत्येवमग्रंथतोर्थत
श्चवेदज्ञःप्रतिषिद्धाद्याचरणादिकर्मजनितंपापमात्मनोनाशयति॥एवंचनकेवलंस्वर्गोपवर्गादिहेतुः
किंतुपापनिवृत्तिहेतुरितिदर्शितः॥१०१॥ मनुमूलं ॥वेदशास्त्रार्थतत्वज्ञोयत्रतत्राश्रमेवसन्॥इहैव

लोकेतिष्ठन्सन्ब्रम्हभूयायकल्पते॥१०२॥ अस्यव्याख्यानं ॥यस्तत्वतोवेदंतदर्थंचकर्मवेदात्मकं
जानातिसनित्यनैमित्तिककर्मानुगृहीतब्रम्हज्ञानेनब्रम्हचर्याद्याश्रमावस्थितःअस्मिन्नेवलोकेतिष्ठ
न्ब्रम्हत्वायकल्पते॥१०२॥ मनुमूलं ॥अज्ञेभ्योग्रंथिनःश्रेष्ठाःग्रंथिभ्योधारिणोवराः॥धारिभ्योज्ञा
निनश्रेष्ठाज्ञानिभ्योव्यवसायिनः॥१०३॥ अस्यव्याख्यानं ॥अज्ञेभ्यइतिउभयोःप्रशस्यत्वेसतिअन्यत
रातिशयविवक्षायांश्रेष्ठइति॥इष्टिनोविधानात् ईषदध्ययनशीलाःतेभ्योयथाध्येतारःश्रेष्ठाःतेभ्यःअधी
तग्रंथधारणसमर्थाःश्रेष्ठाःतेनग्रंथिनःपठितविस्मृतग्रंथाबोद्धव्याः॥अर्थविज्ञःअधीतग्रंथार्थज्ञाःप्र
कृष्टाःतेभ्यःअनुष्ठातारः॥१०३॥ मनुमूलं ॥तपोविद्याचविप्रस्यनिःश्रेयसकरंपरं॥तपसाकि
ल्बिषंहंतिविद्ययामृतमश्नुते॥१०४॥अस्यव्याख्यानं ॥तपइति॥तपःस्वधर्मवृत्तित्वमितितावद्द
र्शनात्॥आश्रमविहितंकर्मआत्मज्ञानंचब्राम्हणस्यमोक्षसाधनंतत्रतपसःअवांतरव्यापारमाह॥

तपसापापमपहति॥ब्रह्मज्ञानेनमोक्षमाप्नोति॥तथाचश्रुतिः॥विद्यांचाविद्यांचयस्तद्वेदोभय
ꣳसह॥अविद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुते॥विद्यातोन्यदविद्याकर्मकृत्स्नंदुःखसाधनत्वान्मृ
त्युःपापंश्रुत्यर्थएवायंमनुनाव्याख्यायोक्तः॥१०४॥ मनुमूलं ॥प्रत्यक्षंचानुमानंचशास्त्रंचविवि
धागमं॥त्रयंसुविदितंकार्यंधर्मसिद्धिमभीप्सता॥१०५॥ अस्यव्याख्यानं ॥प्रत्यक्षमिति॥
धर्मस्यतत्त्वावबोधमिच्छताप्रत्यक्षमनुमानंचधर्मसाधनभूतद्रव्यगुणजातितत्त्वज्ञानायशास्त्रंचवे
दमूलस्मृत्यादिरूपंनानाप्रकारधर्मस्वरूपविज्ञानायसुविदितंकर्तव्यंतदेवचप्रमाणत्रयंमनोरभिमतं
उपमानार्थापत्त्यादेश्चअनुमानांतर्भावः॥१०५॥ मनुमूलं ॥आर्षंधर्मोपदेशंचवेदशास्त्राविरोधि
ना॥यस्तर्केणानुसंधत्तेसधर्मंवेदनेतरः॥१०६॥ अस्यव्याख्यानं ॥आर्षमितिऋषिदृष्टत्वात्॥
आर्षंवेदःधर्मोपदेशंचतन्मूलस्मृत्यादिकंयस्तदविरुद्धेनमीमांसादिन्यायेनविचारयति॥सधर्मंजाना

तिनतुमीमांसानभिज्ञः धर्मैकरणं वेदः मीमांसाच इतिकर्तव्यतास्थानीयातदुक्तं भट्टवार्तिककृता॥ धर्मे
प्रमीयमाणे हि वेदेन करणात्मना॥ इतिकर्तव्यताभागं मीमांसा पूरइष्यति॥१०६॥ मनुमूलं ॥नैश्रेय
समिदं कर्मयथोदितमशेषतः॥मानवस्यास्यशास्त्रस्यरहस्यमुपदिश्यते॥१०७॥ अस्यव्याख्यानं
नैश्रेयसमिति॥निश्रेयससाधनं कर्म निःशेषेण यथावदुदितं॥अतऊर्ध्वं अस्यमानवशास्त्रस्यरहस्यंगो
पनीयमिदं वक्ष्यमाणंशृणुत॥१०७॥मनुमूलं ॥धर्मेणाधिगतोयैस्तुवेदःसपरिबृंहणः॥तेशिष्टाब्राम्ह
णाज्ञेयाःश्रुतिप्रत्यक्षहेतवः॥१०९॥अस्यव्याख्यानं ॥धर्मेणेति॥ब्रम्हचर्यायुक्तधर्मेणयैरंगमीमां
साधर्मशास्त्रपुराणाद्युपबृंहितोवेदोधिगतः॥तेब्राम्हणाःश्रुतेःप्रत्यक्षीकरणेहेतवोयेश्रुतिंपठित्वात
दर्थमुपदिशंति॥तेशिष्टाइतिज्ञेयाः॥१०९॥ मनुमूलं ॥अनाम्नातेषुधर्मेषुकथंस्यादितिचेद्भवेत्॥
यंशिष्टाब्राम्हणाब्रूयुःसधर्मस्यादशंकितः॥१०८॥ अस्यव्याख्यानं ॥अनाम्नातेष्विति॥अस्यश्ला

प्र·शा
१२७

स्त्रस्यअसमस्तधर्माभिधानमाशंक्यबोधयति॥सामान्यविधिप्राप्तेषुविशेषेणअनुपदिष्टेषुकथंक
र्तव्यंस्यादितियदिसंशयोभवेत्तदायंधर्मंवक्ष्यमाणलक्षणंशिष्टाब्राह्मणाःब्रूयुःसतत्रनिश्चितोधर्मः
स्यात्॥१०९॥ मनुमूलं ॥दशावरावापरिषद्यंधर्मंपरिकल्पयेत्॥त्र्यवरावापिवृत्तस्थातंधर्मंनविचा
लयेत्॥११०॥ अस्यव्याख्यानं ॥दशेति॥यदिबहवःसंतःअवहितानभवंतितदादशावरास्त्र्यव
राश्चेतिवक्ष्यमाणलक्षणायस्याःसापरिषत्॥तदभावेत्रयोवरायस्याःसावासदाचारायंधर्मंनिश्चिनुया
त्॥तंधर्मंत्वेनस्वीकुर्यात्नविसंवदेत्॥११०॥ मनुमूलं ॥त्रैविद्योहैतुकस्तर्कीनैरुक्तोधर्मपाठकः॥त्र
यश्चाश्रमिणःपूर्वेपरिषत्स्याद्दशावरा॥१११॥ अस्यव्याख्यानं ॥त्रैविद्यइति॥वेदत्रयसंबंधशाखा
त्रयाध्येतारःश्रुतिस्मृत्यविरुद्धन्यायशास्त्रज्ञोमीमांसात्मकतदर्थवित्निरुक्तज्ञोमानवादिशास्त्रवेदि
ब्रह्मचारिगृहस्थवानप्रस्थाइत्येहदशावरापरिषत्स्यात्॥१११॥ मनुमूलं ॥ऋग्वेदविद्यजुर्विच्चसा

मवेदविदेवच॥त्र्यवरापरिषद्ज्ञेयाधर्मसंशयनिर्णये॥११२॥अस्यव्याख्यानं ॥ऋग्वेदविदिति॥ऋग्यजुः
सामवेद त्रयाणांशाखानांयेअध्येतारः तदर्थज्ञाश्चत्रयःसाधर्मसंदेहनिरासार्थंत्र्यवरापरिषद्बोद्धव्या तदभावे
॥११२॥ मनुमूलं ॥एकोपिवेदविद्धर्मंयंव्यवस्येद्द्विजोत्तमः॥सविज्ञेयःपरोधर्मोनाज्ञानामुदितोयु
तैः॥११३॥अस्यव्याख्यानं ॥एकोपीतिएकोपिवेदार्थधर्मज्ञोयंधर्मं निश्चिनुयात्॥प्रकृष्टोधर्मःसबो
द्धव्यः नवेदानभिज्ञानांदशाभिःसहस्रैरप्युक्तः वेदैर्बुद्धोयं वेदार्थधर्मज्ञपरःएतच्चश्रेष्ठोपलक्षणं॥स्मृ
तिपुराणमीमांसान्यायशास्त्रज्ञोपिगुरुपरंपरोपदेशाविदपि॥ तथाश्लोक ॥केवलंशास्त्रमाश्रित्यनक
र्तव्योविनिर्णयः॥युक्तिहीनविचारेतुधर्महानिःप्रजायते॥ तेनबहुस्मृतिज्ञोपि यदिसस्यकृप्रायश्चित्तादि
धर्मंजानातितदातेनाप्येकेनधर्मउक्तः॥प्रकृष्टोधर्मोज्ञेयःअतएवयमः॥ श्लोकः ॥एकोद्वौवात्रयोवा
पि यद्ब्रूयुर्धर्मपाठकाः॥सधर्मइतिविज्ञेयोनेतरेषांसहस्रशः॥११३॥ मनुमूलं ॥अव्रतानाममंत्राणां

वि

जातिमात्रोपजीविनां॥सहस्रशः समेतानां परिषत्त्वं न विद्यते॥११४॥अस्य व्याख्यानं ॥अव्रतानामिति
सावित्र्यादिब्रह्मचारिव्रतरहितानां मंत्रवेदाध्ययनरहितानां ब्राह्मणजातिमात्रधारिणां बहूनामपि मिलिता
नां परिषत्त्वं नास्ति॥धर्मनिर्णयसामर्थ्याभावात्॥११४॥ मनुमूलं ॥यं वदंति तमोभूता मूर्खा धर्ममत
द्विदः॥तत्पापं शतधा भूत्वा तद्वक्तॄननुगच्छति॥११५॥ अस्य व्याख्यानं ॥यमिति॥तमोगुणबहुला मू
र्खाः धर्मप्रमाणवेदार्थानभिज्ञाः अत एव प्रश्नविषयधर्माविदः प्रायश्चित्तादि धर्मं यं पुरुषं प्रत्युपदिशंति त
दीयं पापं शतगुणं भूत्वा वाचकान् बहून् भजते॥११५॥मनुमूलं ॥एतद्वोभिहितं सर्वं निश्रेयसकरं परं॥अ
स्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिं॥११६॥ अस्य व्याख्यानं ॥एतदिति॥एतं निश्रेयससाधकं प्रकृ
ष्टं धर्मादिकं सर्वं युष्माकमभिहितं एतदनुतिष्ठन् ब्राम्हणादिः परमां गतिं स्वर्गापवर्गरूपां प्राप्नोति॥११६॥मनु
मूलं ॥एवं स भगवान्देवो लोकानां हितकाम्यया॥धर्मस्य परमं गुह्यं ममेदं सर्वमुक्तवान्॥११७॥

अस्यव्याख्यानं ॥एवमिति॥ सभगवान् ऐश्वर्यादिसंयुक्तो द्योतनाद्देवो मनूरुक्तप्रकारेण इदं सर्वं धर्मस्य परमार्थं शुश्रूषु शिष्येभ्यः अगोपनीयं लोकहितेच्छया ममेदं सर्वमुक्तवानिति भृगुर्महर्षीनाह॥ एवमुपसंहृत्य महर्षीणां हिताय उक्तमपि आत्मज्ञानं प्रकृष्टमोक्षोपकारकतया पृथक्कृत्याह॥११७॥ मनुमूलं ॥सर्वमात्मनि संपश्येत्सच्चासच्च समाहितः॥ सर्वं ह्यात्मनि संपश्यन्नाधर्मे कुरुते मनः॥११८॥ अस्यव्याख्यानं सर्वमिति॥ सद्भावमसद्भावं चैवं सर्वं ब्राह्मणो जानन् ब्रह्मस्वरूपमात्मन्युपस्थितं तदात्मकमनन्यमनाध्यानप्रकर्षेण साक्षात्कुर्यात्॥ यस्मात्सर्वमात्मत्वेन पश्यन् रागद्वेषाभावात्॥ अधर्मे मनो न कुरुते एतदेव स्पष्टयति ॥११८॥ मनुमूलं ॥आत्मैव देवताः सर्वाः सर्वमात्मन्यवस्थितं॥ आत्मा हि जनयत्येषां कर्मयोगं शरीरिणां ॥११९॥ अस्यव्याख्यानं ॥आत्मेति इन्द्राद्याः सर्वे देवताः परमात्मैव सर्वात्मत्वात्॥ परमात्मनः सर्वं जगदात्मन्येवावस्थितं परमात्मपरिणामत्वात्॥ हिरवधारणेर्थे परमात्मैवेषां क्षेत्रज्ञादीनां कर्मसंबंधं जनयति

तथाचश्रुतिः एषह्येवसाधुकर्मकारयतियमूर्ध्वंनिनीषतिएषह्येवासाधुकर्मकारयतियमधोनिनीषतीति॥ इ
दानींवक्ष्यमाणब्रह्मध्यानविशेषोपयोगितयादेहिकाकाशादिषुबाह्याकाशादीनांलयमाह॥ ११९॥ आपस्तं
बधर्मसूत्रेपि॥ द्वितीयप्रश्नेसप्तमपटले ॥ कुहकशठनास्तिकबालवादेषुनधर्माधर्मौचरतआवंस्वइतिन
देवगंधर्वानपितरइत्याचक्षते यंधर्मोयमधर्मइति॥ एतव्याख्यानरूपोज्वलायां॥ देवादयः॥ प्रकृष्ट
ज्ञानाब्रूयुः इमौधर्माधर्मौभवतइति॥ ततः कुहकादिवादेषुनस्याहंचनातदभावाच्चवंचनासंभवइतिइदं
चात्रद्रष्टव्यं॥ प्रत्यक्षादेरगोचरौधर्माधर्मौकिंतुनिर्दोषवेदगम्यौतदभावेतन्मूलशास्त्रावगम्यौ इति॥ यत्र
तुप्रायश्चित्तादौविषयव्यवस्थादुष्करातत्रनिर्णयमाह॥ यत्त्वार्याःक्रियमाणंप्रशंसंतिसधर्मोयद्गर्हंतेसो
धर्मः आर्याःशिष्टास्त्रैवर्णिकाः बहुवचनाच्चत्वारस्त्रयोवायथाह याज्ञवल्क्यः॥ चत्वारोवेदधर्मज्ञाःप
रिषत्त्रैविद्यमेववा॥ साब्रूतेयंसधर्मस्यादेकोवाध्यात्मवित्तमइति॥ इदानींश्रुतिस्मृत्योःप्रत्यक्षयोरदर्शनेशि

ष्टाचाराद वगम्यो धर्मः कार्य इत्याह ॥ सर्वजनपदेष्वेकांतं समाहितमार्याणां वृत्तं ॥ सम्यग्विनीतानां वृद्धा-
नामात्मवतामलोलुपानामदांभिकानां वृत्तसादृश्यं भजेत ॥ सम्यग्विनीताः आचार्याधीनः स्यादित्यादि-
ना ॥ विनयसंपन्नाः वृद्धाः परिणतवयसः यद्वनेविषयवश्यतापि स्यादि ति तीदमुक्तं आत्मवंतो जितेंद्रियाः
अ लोलुपाः अकृपणाः अदांभिकाः अधर्मध्वजाः एवंभूतानामार्याणां सर्वजनपदेषु यदेकांतेन अव्यभि-
चारेण समाहितं अनुमतं वृत्तं अनुष्ठानं न मातुलसुतापरिणयादिवत् ॥ कतिपयविषयं ॥ वृत्तसादृश्यं भ
जेत ॥ तदनुरूपं चेष्टेत ॥ न तेषामनुष्ठानं निर्मूलं संभवति ॥ संभवति च ॥ वैदिकानामुत्सन्नपाठब्राम्हणानुभ
व इति ॥ एवमुभौ लोकावभिजयतीति ॥ एवं श्रुतिस्मृतिमूलसदाचारमूलमनुष्ठानं कुर्वन्नुभौ लोकावभि
जयतीति ॥ इमं चामुं चेति ॥ गौतमधर्मसूत्रेपि प्रथमाध्यायेन वमखंडे यच्चात्यवंतो वृद्धाः सम्यग्विनी-
तादंभलोभमोहवियुक्ता- वेदविद आचक्षते तत्समाचरेदिति ॥ तस्मिन्नेव गौतमधर्मसूत्रे तस्मिन्नेवा

ध्यायेतस्मिन्नेवखंडे॥ सत्यधर्मार्यवृत्तःशिष्टोध्यापकःशौचविशिष्टःश्रुतिनिरतःस्यान्नित्यमहिंस्रःमृदुदृ
ढकारीदमदानशीलएवमाचारोमातापितरौपूर्वापरान्संबंधान्दुरितेभ्योमोक्षइष्यन्स्नातकःशश्वद्ब्रह्मलोका
न्नच्यवतेनच्यवते॥ तस्मिन्नेवगौतमधर्मसूत्रेद्वितीयाध्यायेएकादशसंख्याकखंडे तस्यव्यवहारोवेदो
धर्मशास्त्राण्यंगान्युपवेदाःपुराणादेशजातिकुलधर्माश्चाम्नायैरविरुद्धाःप्रमाणं तस्मिन्नेवगौतमधर्म
सूत्रेद्वितीयाध्यायेद्वादशसंख्याकखंडे अधर्मसंयुक्तेपुरुषशक्त्यपराधानुबंधविज्ञानाद्दंडनियोगोनु
ज्ञानंवा वेदविन्समवायवचनादिति॥ तस्मिन्नेवगौतमधर्मसूत्रेद्वितीयाध्यायेत्रयोदशसंख्याक
खंडे विप्रतिपत्तौसाक्षिनिमित्तासत्यव्यवस्थाबहवस्युरनिंदितास्स्वकर्मसुप्रात्ययिकाइति॥गौतमधर्म
सूत्रभाष्येमस्करीयेद्वितीयप्रपाठकेत्रयोदशखंडात्मकत्रयोदशाध्याये वाक्पारुष्येसंप्रतिपत्तौदंडउ
क्तःयदातुविप्रतिपद्यंतेतदाकथमित्यतआह॥ विप्रतिपत्तौसाक्षिनिमित्तासत्यव्यवस्था॥विप्रतिपत्ति

र्नानाविधाप्रतिपत्तिःअविप्रतिपत्त्यपिनोक्तस्तस्यांतस्यांसाक्षिहेतुकासत्यव्यवस्थापना॥साक्षिणःपंचप्रकाराः
यथाहनारदः॥लिखितस्मारितश्चैवयदृच्छाभिज्ञएवच॥गूढश्चोत्तरसाक्षीचसाक्षीपंचविधःस्मृतइति॥ता
न्विचार्यतत्त्वमवबुध्येतेत्यर्थः॥साक्षिनिमित्तंसत्यमितिवक्तव्येव्यवस्थाग्रहणंसाक्षिणांविप्रतिपत्तौबहूनांव
चनंप्रमाणं॥तत्रापिसंदेहेविद्वद्वचनंप्रमाणंतत्रापिसंदेहेतैरेवशपथपूर्वकंतैःप्रतिपादयितव्यमित्येवमर्थःतेतु
पुनःकियंतःकिंलक्षणाइत्यतआह॥बहवस्युरनिंदिताःस्वकर्मसुप्रात्ययिकाराज्ञांबहवस्युरवरास्युरित्यर्थः॥
यथाहमनुः॥ त्र्यवरैःसद्भिरुद्भाव्यःनृपब्राम्हणसन्निधाविति॥स्युःग्रहणंसंदेहव्युदासार्थंअनिंदिताःस्वक
र्मसुविहिताःविहितानुष्ठानिनइत्यर्थः॥स्वग्रहणात्धनपुत्रादावपि॥ यथाहमनुः ॥गृहिणःपुत्रिणोमौल्या
इत्यादिकर्मस्वितिबहुवचनंआपद्विहितस्याप्युपसंग्रहार्थः॥प्रात्येकाराज्ञांप्रत्ययेनयेचरंतितेप्रात्येकाःरा
ज्ञांबहुषुकर्मसुपरीक्षिताःसर्वत्राप्रतिपत्तिःएतेआप्ताएतेतिनिश्चिताइत्यर्थः॥बहुवचनाद्राजनियुक्तानां

सभादीनामपि॥ मूलसूत्रं ॥निष्प्रीत्यनभितापाश्चान्यतरस्मिन्निष्प्रीयतः अनभितापाश्चनकृतसंग्रहाः नशत्रवश्चेत्यर्थः चकारान्नाअरिसंबंधिनश्च तथाह मनुः॥ नार्थसंबंधिनोनाप्ता नसभार्यानवैरिणः॥इत्यादि अन्यतरस्मिन्नर्थिनिप्रत्यर्थिनिवाइत्यर्थः॥अपिशूद्राःएवंविधाः शूद्रा अपिकिंपुनर्विधाइतिएवंचगुणवद्द्विजात्यभावेएवंविधाशूद्राअपिभवंतीतिद्रष्टव्यं॥ ब्राम्हणस्यब्राम्हणवचनादनवरोध्यो अनिबध्यश्च॥अब्राम्हणःक्षत्रियादिः अब्राम्हणग्रहणादेवसिध्येब्राम्हणग्रहणंश्रोत्रियपरिग्रहणार्थंइतरोग्राह्यएवेति॥तुशब्दः नोनेनापिलिंगेनग्राह्याः॥ विशेषेणब्राम्हणोइति अब्राम्हणवचनादनवरोध्यः नग्राह्यःअस्यवृत्तांतस्यासौ ब्राम्हणःसाक्षीत्यब्राब्रम्हणो नोक्तेराज्ञासौसाक्षित्वेनग्राह्यइत्यर्थः॥अथशब्देनब्राम्हणःपत्रकेनारोपितश्चेदारोपितोभवत्येवेत्यभिप्रायः॥असमवेताःपृष्टाःप्रब्रूयुःसमुदितायावंतस्तेअसमुदिता अपिराज्ञाप्राड्विवाकेनवापृष्टाःप्रब्रूयुःआप्रश्नात्तव्यापारंमौनिनएवभवेयुरितिप्रशब्दोपादानंकिंच॥अवचनेचरोषिणःस्युःप्रश्नकालेप्यवचनेच

कारात् अन्यथावचनेच दोषिणो दंडभाजः॥ तथाचमनुः ॥सभावानप्रवेष्टव्या वक्तव्यंवासमंजसं॥अब्रुव न्विब्रुवन्वापिनरोभवतिकिल्बिषीति॥तस्मात्तथ्यमेव वक्तव्यमित्यभिप्रायः॥नकेवलंतथ्यवचने दंडाभावमात्रं विपर्यये दंडभाक्त्वमेव किंतर्हिस्वर्गःसत्यवचने विपर्ययेनरकःसत्यवचननिमित्तधर्मात् स्वर्गश्चभवति॥वि पर्ययेचानृतवचननिमित्तादधर्मान्नरकश्चभवतिवचनग्रहणंसाक्षिणामेतत्फलं नतुव्यवस्थाहेतुर्नृपस्येति इदानीयत्रपंचप्रकाराअपिसाक्षिणोनभवंति॥तत्रकथमित्याह॥ अनिबद्धैरपिवक्तव्यंनिष्प्रयत्नेनबुधाः स्मृताःपंचविधत्वेनस्मृताइत्यर्थःएवंपंचविधत्वेनस्मर्यते॥तेअनिबद्धाःयेनकेनचित्प्रकारेणतद्व्यापारज्ञाःग्रा म्यादयइत्यर्थःतैरपिशब्दोनिबद्धाभावसूचनार्थः॥अनिबद्धाअपीत्युक्तेपिसाक्षिप्रकारसत्वात्साक्षिणस्युः सामर्थ्यादिलब्धित्वादेवसमस्तार्थैलभ्यमानेवक्तव्यग्रहणंतत्रापिएषांवचनंप्रमाणत्वेननिर्दिष्टंतेषामेववचनं॥ ग्रात्यंनार्थसंबंधादिवचनंततश्चार्थसंबंधादिदोषरहितैरेववक्तव्यमितिनपीडाकृतेनिबंधःतत्रनिबंधशब्दे

नव्यवस्था उच्यते॥ निश्चयं बंधो निबंधः पीडाकरत्वे हिंसादौ निबंधानामप्रतिषेधोस्तीत्यर्थः॥ पंचप्रकारै रन्यैश्च
अर्थसंबंधादिदूषणयुक्तैरपि वक्तव्यमित्यभिप्रायः॥ तथा चोशनाः ॥ साहसे सर्वे भवंतीति तथा प्रमत्तोक्ते च
प्रमत्तः अज्ञातः वंचनया प्रज्ञाब्दोपादानात् यदा निगूढः साक्षिणः कृत्वा उपायैरेनं रहस्यापादयति ततस्तत्स्था
अर्थसंबंधादिदूषणयुक्ता अपि साक्षिणो भवंतीति प्रमत्तेनोक्ते परिभाषित इत्यर्थः॥ चकारात् स्त्रीगमनव्यापा
रेपि॥ तथा च व्याघ्रः॥ स्तेये च साहसे चैव संसर्गे च स्त्रियस्तथा॥ गदादीनां प्रयोगे च न दोषः साक्षिषु स्मृत इति॥
विपर्ययेन रक उक्तः सः न केवलं तेषामेव किं तर्हि साक्षिसभ्यराजकर्तृषु दोषो धर्मतंत्रपीडायां यत्र धर्मतंत्रपी
डायतः सम्यग्व्यवहारादर्शनात् तत्रयस्यैव दोषेण कर्ता लिप्यते॥ एवं साक्ष्यादयोपि॥ ननु च साक्षिणो दो
षयुक्ता एव किमर्थं पुनरिहाभिधानमित्युच्यते॥ यदीह साक्षिग्रहणं न क्रियते ततः सभ्यादीनामसाक्षि
क एव व्यवहारो दोष उक्तः स्यात् साक्षिते तु साक्षिणामेवेति ससाक्षिकेपि दोषप्रापणार्थं यावतादो

षिणकर्तासंबध्यतेतावान्दोषःसभ्यादीनामपिस्वापराधात्पृथक्पृथगुपपद्यते॥ननुदंडशब्द इतिद्रष्ट
व्यंतंत्रशब्देनलोकव्यवहारउच्यतेततश्चतत्पीडाचनकर्तव्येतितद्ग्रहणंशपथेनैकेसत्यंकर्मयदातु
साक्ष्यादिप्रमाणांतरमत्यस्तमयःतदाग्नापथेनशापादिनाएकेसत्यधर्मसत्यव्यवस्थापनमिदंतिश
पथंचाभियुज्यमानस्यइतरेणव्यवसितत्वात्सत्यमितिवक्तव्येकर्मग्रहणंव्यवहारादन्यत्रापिलौकि
कव्यापारसंदेहशपथस्यानुप्रवेशार्थं॥तथाचश्रुतिः॥अद्यामुरीययदियातुधानोअस्मीत्यागोतम
स्तुन्यायेनैवतत्रप्रमाणलेशोसतिप्रथमश्रुतिन्यायोवेतिद्रष्टव्यं॥तद्देवराजब्राम्हणसंसदस्यादब्रा
म्हणानांतद्रूपत्वंदेवसंसदिदेवसंनिधौदेवशब्देनदेवताप्रतिमाआदित्यादयोवाउच्यंतेराजाव्यव
हारदर्शीब्राम्हणःतद्ग्रहणंव्यवहारलौकिकग्रहणनिवृत्यर्थःएवंचव्यवहारेदेवतादिसन्निधौलौकि
कयंत्रतंत्रचिदितिद्रष्टव्यंअर्थांतरनिमित्तोव्यवहारःअपराधनिमित्तोलौकिकइति॥अब्राम्हणाः

क्षत्रियादयः स्याद्ग्रहणं क्रमनिवृत्त्यर्थं तत्र देवतालाभे विप्रसंसदि तदलाभे राजसंसदि द्रष्टव्यं ॥ तथाच
स्मृत्यंतरं अब्राम्हणान्नृपः समस्कारयद्देवसंन्निधौ ॥ शपथं तदलाभे च ब्राम्हणस्य समीपत इति शपथं तद
लाभे नृपस्याथ भगवान्कास्य पोब्रवीदिति ॥ अलाभे च कार्यांतर व्यग्रापेक्षयाद्रष्टव्यः अविप्राणामिति
वक्तव्ये गुरु सूत्रकरणमश्रोत्रियब्राम्हणस्यापि देवतासन्निधिप्रवेशार्थं एवं श्रोत्रियब्राम्हणस्य सत्यश
ब्दोच्चारणं शपथं भवतीति द्रष्टव्यं स्मृत्यंतरोपसंग्रहार्थं स्याद्ग्रहणमित्येके ॥ यथाह मनुः ॥ सत्येन शापये
द्विप्रं क्षत्रियं वाहनायुधैः ॥ गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैरिति देवब्राम्हणसमक्षमिति वक्तव्ये सं
सदि ग्रहणं देवतायाः सन्निहितसंगोपसंग्रहार्थं सभायां छलादिदोषरहितायां ॥ यथाह नारदः ॥ न
सा सभा यत्र न संति वृद्धा न ते वृद्धा ये न वदंति धर्मं ॥ नासौ धर्मो यत्र न सत्यमस्ति न तत्सत्यं यच्छलेनानुविद्ध
मिति ॥ साक्षिणां हं मान्येन दोष उक्तः विशेषार्थमिदानीमाह ॥ क्षुद्रपश्वनृते साक्षि दशमां तिक्षुद्रपशवः

अजाविकादयः तद्विषये अनृतवचने दशपुरुषान्हंति॥ अवशेषार्हंतीति दशस्वबंधुजनने यावत्सापं
तावदस्य भवतीत्यर्थः एवं सर्वत्र तत्रत्यानुरूपेण दंडप्रायश्चित्तकल्पनं॥ साक्षिग्रहणं सभ्यादीनामपि
गोश्वपुरुषभूमिषु दशगुणोत्तरां उत्तरमुत्तरं दशगुणं भवति गोविषये शतगुणं अश्वविषये सहस्रगुणं इ
त्यादि॥ पंच पश्वनृते हंति दश हंति गवानृते॥ शतमश्वानृते हंति सहस्रं पुरुषानृत इत्यादि यदुक्तं स्मृत्यंत
रे॥ तत्परिग्रहविशेषापेक्षया प्रयोजनापेक्षया वा द्रष्टव्यं सर्वं वा भूमौ भूमिविषये शतसहस्रं सर्वं वा अप्सु
ष्वजातं कृताकृत क्षेत्रभेदेन विकल्पो द्रष्टव्यः॥ हरणे नरकः भूमेरिति विपरिणामः अविशेषाकल्पाभवति॥
दोषवचनप्रसंगेन्चैतदुक्तं इदानीं प्रकृतमाह॥ अप्सु मैथुनसंयोगे च अप्सुरूपा द्याधारावस्थितासु मैथुनसंयो
गे च॥ मैथुनसंयोगे वा पुरुषगमनादावित्यर्थः॥ संयोगग्रहणं कन्यालक्षणादावपि चकारः अब्ग्रहणं मैथुन
विशेषणार्थं मा भूदिति भूमिवद्दोषः एवं च हरणेपि नरको द्रष्टव्यः॥ पशुवन्मधुसर्पिषोः मधुघृतविषये क्षुद्रप

श्वनृततुल्योदोषः॥गोवद्भस्त्रहिरण्यधान्यब्रम्हसुवस्त्रादिविषयेनृतेगवानृतवद्दोषःब्रम्हानृतंअधीतवेदमन
धीतवेदमित्युक्तेयानेश्ववत्हस्त्यादियाननिमित्तेनृतेश्वाद्यनृततुल्योदोषःकेचिदन्यथाव्याचक्षते॥पशुवन्मधु
सर्पिषोरित्यारभ्यनाश्वानृतवद्दोषः॥मधुसर्पिषोर्हरणेतत्रब्रम्हशब्देनवेदांगानिलिखितानि॥पुस्तुकान्या
हुः यानहरणेचाश्वानृततुल्योदोषःविदित्वेवमपिदोषइत्युक्तेसोनृतमेववक्तिततःमिथ्यावचनेयाप्योदंडश्च
साक्षिअनृतउक्तेयाप्यहागर्ह्यःसलोकसमक्षंव्यवहारछेदनार्थंपुरुषशक्त्यादिविज्ञानात्तन्मूल्यप्रमाणेनदंडश्च
भवतिप्रयोजनापेक्षयापरिग्रहाविशेषापेक्षयाचसमस्तव्यवस्थापरिकल्पनार्थश्चकारः॥यानेष्वितिबहुवच
नमचेतनानांशिबिकादीनामप्युपसंग्रहार्थंअधिकारादेवसिद्धेसाक्षिग्रहणेसएवव्याप्योदंड्यश्चसभ्याद
योदंड्याएवेतिअस्यापवादमाह॥नानृतवचनेदोषोजीवनंचेत्तदधीनंयदातत्सवचनात्परस्यावश्यंभावि
जीवनछेदःतदासाक्षिणानृतमपिवक्तव्यंतस्मिन्नित्युक्तेनपूर्वोक्तोदोषःनतुपापीयसोजीवनंतुशब्दो।विशेषार्थी

एतत्ज्ञापयतिअवश्यंभाव्यनृतवचनेदोषः॥तथातुवधनिमित्तात्सत्यादनृतमेवविशिष्टमल्पतरत्वादि
दोषादिति॥तथाचमनुः॥शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौभवेद्वधः॥तत्रवक्तव्यमनृतंतद्धिसत्याद्विशिष्यत
इति॥यदेवमन्येतजीवनव्ययंपारयति॥रेवमवतिष्ठेयायवकरोतीतिमन्यते॥तत्रानृतमेवस्मृत्यंतरे॥
आयुर्विभागेनाश्रमप्रतिपत्तिविधानात्॥ यथाहमनुः ॥चतुर्थमायुषोभागमित्यादि यथोदाहृतौशन
सवचनाच्च॥पूर्णचत्वारिंशद्वर्षोगृहीभवेदिति॥व्याघ्रवचनाच्च॥अतोशब्दत्रयंनतिष्ठेदितिकण्ववचनाच्च
तत्रदुर्ज्ञेयत्वादायुर्विभागस्यशतवर्षाच्चतुर्भागोगृह्यते॥सोप्येकवेदाध्यायिनःयदुक्तंत्रिंशद्वर्षंतदपि
वेदद्वयाध्यायिनःयदुक्तंचत्वारिंशद्वर्षंतद्वेदत्रयाध्यायिनःयद्यसौप्रागेवपरिसमाप्तविद्यःअपरिसमा
प्तविद्यश्चेद्यावताकालेनपरिसमाप्यस्नातोभवेत्॥तस्मादूर्ध्वंवर्षत्रयमकृतदारोनतिष्ठेदित्येवंनियत
कालमेवावस्थानंतस्माद्यंगृहस्थांतर्भूतएवततश्चानाश्रमीनतिष्ठेत्दिनमेकमपिद्विजइतिदक्षवचन

स्यत्तु विधुर विषत्वं द्रष्टव्यं॥ तत्र दिनमेकमपीति॥ सतिसंभव इति शेषः पराधीनत्वात् कन्यालाभस्य तथैवा
नाश्रमी न तिष्ठेद्दिनमेकमपि यत्नमकुर्वन्नेति शेषः तत्र पूर्वस्मिन् पक्षे संभवस्याकर्तृ शेषः असंभवे न दोषः इतर
स्मिन् पक्षे यत्नमकर्तृ दोषः॥ तस्मिन्नेव गौतमधर्मसूत्रे द्वितीयाध्याये एकविंशतिसंख्याकखंडे ॥त्यजे
त्पितरं राजघातकं शूद्रयाजकं वेदविप्लावकं भ्रूणहनं यश्चांत्यावसायिभिः सह संवसेदंत्यावसायिन्यां वात
स्य विद्यागुरून् योनिसंबंधांश्च सन्निपात्य सर्वाण्युदकादीनि प्रेतकर्माणि कुर्युः पात्रं चास्य विपर्यस्येयुर्दासः
कर्मकरो वावकरादमेध्यपात्रमानीय दासीघटात्पूरयित्वा दक्षिणामुखः पदा विपर्यस्येदमुमनूदकं करोमी
ति नामग्रहं तं सर्वेन्वालभेरन् प्राचीनावीतिनो मुक्तशिखा विद्यागुरवो योनिसंबंधाश्च वीक्षेरन् अप उप
स्पृश्य ग्रामं प्रविशंति अत ऊर्ध्वं तेन संभाष्य तिष्ठेदेकरात्रं जपन् सावित्रीमज्ञानपूर्वं ज्ञानपूर्वं चेत्त्रैरात्रं॥
अस्य गौतमधर्मसूत्रस्य मस्करीयाख्यभाष्ये ॥त्यजेत्पितरं राजघातकं॥ शूद्रयाजकं॥ शूद्रार्थयाजकं॥

बेदविप्लावकंभ्रूणहनंयश्चांतावसायिभिःसहसंवसेदित्यंतावसायिन्याः॥ त्यजेद्वक्ष्यमाणेनविधिना-
पितरमिति॥पितृवचनाद्दंडापूपिकयापुत्रादीनामर्थसिध्दस्त्यागः॥राजघातकंराजानंन्यायवंतमभिचा
रेणयोहिनस्ति॥सत्यक्तव्यः॥एवंचान्यायवृत्तमाभिचारेणप्रमापयतोनास्तित्यागः॥तथापुराणमुक्तं॥
चतुर्विधंहतंतेनयोहिनस्तिमहीपतिं॥बहिष्कार्यःससर्वैणपापकर्मीणंमंत्रतइति॥ यस्तुवक्ष्यतिनकर्हि
चित्॥मातापित्रोरवृत्तिरितितदन्योद्रष्टव्यः॥शूद्रयाचकंशूद्रस्ययोनिषादस्थपतीष्टिंकरोति॥तस्येष्टिवि-
धानात्एवंतर्हिभ्रूणहत्यायांसर्वस्योत्सादनंद्रष्टव्यंशूद्रार्थयाजकंयःशूद्राद्दधिगम्यार्थेयागंकरोति॥
तथाहमनुः॥येशूद्राद्दधिगम्यार्थमिति॥वेदविप्लावकंअनध्याप्याध्यापकं॥भ्रूणहनंभ्रूणहाब्रम्हहातद्ग्रह
णंपतितोपलक्षणं॥यथाहमनुः ॥पतितस्योदकंकार्यंसस्तनोर्बांधवैर्बहिः॥निंदितेहनिसायान्हेचानृत्वि
ग्गुरुसंनिधाविति॥यश्चांतावसायिभिः॥सहसंवसेत्तस्यविद्यागुरून्॥अंत्यावसायिनः॥चंडालादयः॥यथाहांगिराः

प्र॰ शा
१२६

चंडालश्वपचस्तक्षःसूतोवैदेहकस्तथा॥मागधोयोगधोचैवसर्वेत्वंसावसायिनइति॥ तैःसहैकत्रावस्था
नेवसति॥चकाराचक्रकादिभिश्चयथाहकण्वः॥चाक्रिकःपुल्कसोजंभःस्वरजीवीप्रदीपकः॥एतेचशूद्रैरसमा
स्त्वस्पृश्याःपरिकीर्तिताइति॥अंत्यावसायिन्यांवसेदितिसंबंधः॥तयासहमैथुनमाचरतीत्यर्थः॥ अ
थकिमेतेषुराजघातकादिषुनिमित्तेषुसत्सुपतितत्वंभवेत्सतितोनभवतीतिसंदेहः॥किंच॥पतितोयदि
तावद्भवतिततोब्रम्हहासुरापेयस्तैवैषांस्तमासंक्रत्वात्यजेत्सतितंपितरमित्येतावदेववक्तव्यंएवंचेद्भ्रूण
हनमितिनवक्तव्यंभविष्यति॥अथनभवति॥ततस्त्यागोनयुज्यते॥स्मृत्यंतरेपि॥पतितत्वसंन्नियोगादे
वत्यागविधिरुक्तः॥तथाचदर्शितोमानवश्लोकः॥पतितस्योदकंकार्यमित्यादिअत्रोच्यतेपतितत्वंताव
द्॥भवत्येषुनिमित्तेषुतथापिमहापातकीमध्येनपठितं॥प्रायश्चित्तलाघवार्थंभ्रूणघ्नहणेतत्साम्योपपादने
तत्समप्रायश्चित्तार्थज्ञापनार्थं॥यत्रतुसमीक्रियतेतत्रहीनताहिगम्यतेएवंसर्वत्रसमीकरणविषयेसर्वप्रा

नि॰

यश्चित्तमेवद्रष्टव्यं॥तत्रऋत्विक्समीक्षियते॥तत्रहीनता॥एवंतर्हितुल्यप्रायश्चित्तत्वात्अधिगम्यते॥
ंकोटसाक्ष्यादीनामिह्पाठःप्रसज्येतेतिचेत्उच्यते॥एतेष्वेवपतितेषुपितात्यक्तव्योनत्वन्यत्रेतिभेदारंभः॥अत्रत्रा
जघातादिष्वबुद्धिपूर्वेष्वपिपतितत्वंद्रष्टव्यं॥कुतःसहोपदिष्टानांमध्येएकस्याबुद्धिपूर्वेविषयेपिपतितत्वद
र्शनात्॥ यथाहमनुः ॥चंडालांत्यस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच॥पतत्यज्ञानतोविप्रोज्ञानात्साम्यंतु
गच्छतीति॥ अत्रेदानीतस्यत्यागविधिरुच्यते॥विद्यागुरून्योनिसंबंधान्सन्निपात्यासर्वाण्युदककर्मा
णिकुर्युःतस्मात्त्याज्यआत्मनःविद्यागुर्वाचार्यगुरूपाध्यायाः॥बहुवचनप्रयोगादपियोनिसंबंधाःमातुल
मातामहादयः॥तथापि॥बहुवचन मुक्तप्रयोजनमुक्तं॥चकारादृत्विग्याज्यादयश्चसन्निपात्यएकीकृ
त्यअयमेवंकर्माएतंत्यक्षाम्यहमेनमिति॥प्रकाशंकृत्वापुत्रादयोज्ञातयोजीवतएवसर्वाण्युदकदानसाध्या
दीनिप्रेतकर्माणिकुर्युः॥पात्रंचास्यविपर्यस्येयुः॥अस्यत्याज्यस्यपात्रंचविपर्यस्येयुः॥तमुक्तंयोग्यताभा

वादत एवज्ञातयः विपर्यस्येयुः विपर्यासो अनुदकीकरणं उदकदानेन समुच्चयार्थश्चकारः श्राद्धमनंतरं मा
भूदिति ततश्चोदकदानं कृत्वा श्राद्धं कुर्यादिति॥ द्रष्टव्यं कथं विपर्यस्येयुरित्याह दासः कर्मकरो वा अवकरादमे
ध्यपात्रमानीय दासीघटं पूरइत्वा॥ दक्षिणामुखः पदा विपर्यस्येयुः अमुमनूदकं करोमीति नाम्न ग्॥ दा
सोऽध्वजभृतादिः व्ध्वजाभृतोभुक्त दासो ग्रहजः क्रीतदुर्मो पेतृको दंड दासश्च सप्तैते दासयोनय इति॥ कर्म
करोश्चोतुकः संभवतश्च अनयोर्विकल्पः अवकरात्तु वर्जस्थानादशुचिपात्रं किंचिदादाया दासी परिचा
रिणी तस्मात्रं घटास्पूरयित्वा अन्येनेवान्यत्र दासीघटस्याशुचित्वं द्रष्टव्यं दक्षिणामुखो भूत्वा पद्मा पादेन वि
पर्यस्येत् अपसव्यमुत्सृजेत् अमुं देवदत्तमनूदकं करोमीति मंत्रमुक्त्वा अमुमित्यनेनैव नामग्रहण स्यसिद्ध
स्यान्नामग्रहमिति विस्पष्टार्थं न तूपांशु जपेदिति तं सर्वे अन्वालभेरन् प्राचीनावीतिनो मुक्तशिखाः॥ तं दासं
कर्मकरं वा सर्वे सपिंडा न केवलं पुत्राः अन्वालभेरन् संस्पृशेयुरित्यर्थः॥ प्राचीनावीतिनः अपसव्ययज्ञोपवी

तिनःमुक्तशिखाःशिखाविकीर्यमाणेनैवज्ञापकेनान्यस्मिन्नाचमनादौशुभकर्मणिमुक्तशिखस्यायोग्यत्वं
द्रष्टव्यंविद्यागुरवोयोनिसंबंधाश्चवीक्षेरन्नतुस्पृशेयुरित्यर्थः॥चकारादृत्विगादयश्चअपउपस्पृश्यग्रा
मंप्रविशंतिएवमिदंकर्मकृत्वाततस्मात्स्वागृहान्गच्छंति॥एकस्मिन्नेवाह्निश्राद्धादीनिगम्यंते॥ग्राममप्रवे
शोपदेशाच्च॥बहिरितीदंवक्तव्यमितिततऊर्ध्वंतेनसंभाष्यति षेदेकरात्रंजपन्सावित्रीमज्ञानपूर्वंअत
स्त्यागादूर्ध्वंतेनसहसंभाषणंकृत्वाअज्ञानादिदंप्रायश्चित्तंद्रष्टव्यं॥तिष्ठेदित्येकवचनात्तज्ज्ञात्यादेरन्योपिना
धिकाराज्ज्ञातिरेवएकंरात्रमहोरात्रंनभुंजीतेत्यर्थः॥सावित्रीजपन्ज्ञानपूर्वंचेत्त्रिरात्रंयस्तुबुद्धिपूर्वमनेन
संभाषणेसत्रिरात्रमेवंविधोक्तंआतिष्ठेत्॥अस्यामेवगौतमधर्मसूत्रभाष्याख्यमस्कर्यांअन्यत्रप्रकरणेएत
त्सूत्रभाष्येएवयथाह प्रजापतिः॥गोब्राह्मणहतानांचविद्युतापार्थिवेनच॥स्वात्मनस्त्यागिनांचैवपति-
तानांतथैवच॥शास्त्रैर्हतानांविप्राणांचरंतीनांचकामतः॥पाषंडानाश्रितानांचप्रेतकर्मनविद्यते॥स्नेहका

र्भयादिभ्योयस्तत्कुर्यान्नराधमः॥चंडालेनहतस्यापितस्यवक्ष्यामिनिष्कृतिं॥एषामन्यतमंप्रेतंयोवहेत
दहेतवा॥चरेत्सांतपनंकृच्छ्रमथवाचेत्तप्तकृच्छ्रकं॥तच्छवंकेवलंस्पृष्ट्वापातइत्वाश्रुवातथा॥एकरात्रंतुना-
श्नीयात्त्रिरात्रंबुद्धिपूर्वके॥श्राद्धंकृत्वाचरेत्कृच्छ्रमथवासांतपनंचरेत्॥तथाश्राद्धभुजांचैवद्विगुणंब्रह्म-
चारिणामिति॥इत्यादिनामपिपित्रादीनामपित्यागस्यप्रेतकर्मादिनिषेधस्यचप्रतिपादनात्॥वेदशास्त्र-
विरुद्धाचारस्यपित्रादिपरंपरयाप्राप्तस्यापित्यागःकर्तव्यइतिकिमुवक्तव्यं॥ बोधायनधर्मसूत्रेप्रथमा-
ध्यायेप्रथमखंडे ॥उपदिष्टोधर्मःप्रतिवेदंतस्यानुव्याख्यास्यामः ॥स्मार्तोद्वितीयःतृतीयःशिष्टागमः
शिष्टाःखलुविगतमत्सराःनिरहंकाराःकुंभीधान्याःअलोलुपाःदंभदर्पलोभमोहक्रोधवर्जिताः॥धर्मेणाधि-
गतोयेषांवेदःसपरिबृंहणः॥शिष्टास्तदनुमानज्ञाःश्रुतिप्रत्यक्षहेतवइति॥तदभावेदशावरापरिषदित्य-
प्युदाहरंति॥चातुर्वैद्यंचकल्पांगवित्धर्मपरिपाठकः॥आश्रमस्थास्त्रयोविप्राःपरिषद्वैषादशावरा॥पंच

वा स्युस्त्रयो वा स्युरेको वा स्यादनिंदितः॥ प्रतिवक्ता तु धर्मस्य नेतरे तु सहस्रशः॥ यथा दारुमयो हस्ती यथा
चर्ममयो मृगः॥ ब्राम्हणाश्चानधीयानः त्रयस्ते नामधारकाः॥ यद्वदंति तमो मूढाः मूर्खा धर्ममजानतः॥ तत्पा-
पं शतधा भूत्वा वक्तॄन् समधिगच्छति॥ बहुद्वारस्य धर्मस्य सूक्ष्मा दुरनुगा गतिः॥ तस्मान्न वाच्यो ह्येकेन ब-
हुज्ञेनापि संशये॥ धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः॥ क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः॥ य-
थाश्मनि स्थितं तोयं मारुतार्कौ प्रणाशयेत्॥ तद्वत्कर्तरि यत्पापं जलवत्संप्रलीयते॥ शरीरं बलमायुश्च वयः
कालं च कर्म च॥ समीक्ष्य धर्मविद्बुद्ध्या प्रायश्चित्तानि निर्दिशेत्॥ अव्रतानाममंत्राणां जातिमात्रोपजीविनां
सहस्रशः समेतानां परिषत्वं न विद्यते॥ परिषत्वं न विद्यत इति॥ बोधायनधर्मसूत्रे प्रथमाध्याये द्वितीयखं-
डे ॥ पंचधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतो याश्च दक्षिणतस्तानि व्याख्यास्यामः॥ यथैतदनुपेतेन स्त्रि-
याच सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृगमनमित्यथोत्तरत ऊर्णाविक्रयः सीधुपानमुभयतोद-

द्भिर्व्यवहारः आयुधीयकं समुद्रसंयानमितीतरेतरस्मिन् कुर्वन्दूष्यतीतरश्चेतरस्मिन् तत्र तत्र प्रामाण्यमेव स्या
दिति॥ तथैव बोधायनधर्मसूत्रे च ॥देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं॥ उपपत्तिमवस्थां च ज्ञात्वा क
र्म समाचरेदिति॥ तैत्तिरीयोपनिषदि ॥आचार्यो ऽन्तेवासिनमनुशास्ति॥ इत्युपक्रम्य॥ यान्यनवद्यानि
कर्माणि तानि सेवितव्यानि नो इतराणि यान्यस्माकं सुचरितानि॥ तानि त्वयोपास्यानि नो इतराणि॥
इमामेव श्रुतिं॥ माधवीये प्रयोगपारिजाते च उदाहृतवंतः॥ मनुस्मृतौ प्रथमाध्याये अष्टादशो
त्तरशतसंख्याकश्लोकः॥ देशधर्मान्जातिधर्मान् कुलधर्मांश्च शाश्वतान्॥ पाषंडगणधर्मांश्च शास्त्रेऽस्मि
न्नुक्तवान्मनुः॥ अस्य व्याख्याने ॥देशधर्मानिति॥ प्रतिनियतदेशेऽनुष्ठीयमानदेशधर्माः ब्राह्मणादि
जातिनियता जातिधर्माः कुलविशेषाश्रयाः कुलधर्माः वेदबाह्यागमसमाश्रया प्रतिषिद्धव्रतचर्ये पाषंडा
तद्योगात्पुरुषोऽपि पाषंडः तंनिमित्ता ये धर्माः पाषंडिनो विकर्मस्थाः निस्सादयः तेषां पृथक् धर्मानभिधानात्

गणःसमूहोवणिगादीनां॥ मनुस्मृतौद्वितीयाध्याये ॥सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं॥तंदेवनि
र्मितंदेशंब्रम्हावर्तंप्रचक्षते॥१७॥तस्मिन्देशेयआचारःपारंपर्यक्रमागतः॥वर्णानांसांतरालानांससदा
चारउच्यते॥१८॥ अस्यव्याख्यानं ॥तस्मिन्देशइति॥तस्मिन्देशेप्रायेणशिष्टानांसंभवात्॥तेषां
ब्राम्हणादिवर्णानांसंकीर्णजातिपर्यंतानांयआचारःपारंपर्यक्रमागतोनत्विदानींतनःससदाचारोभि
धीयते॥१३॥ मनुमूले ॥कुरुक्षेत्रंचमत्स्याश्चपंचालाःशूरसेनकाः॥एषब्रम्हर्षिदेशोवैब्रम्हावर्तादनंत
रः॥१९॥एतद्देशप्रसूतस्यसकाशादग्रजन्मनः॥स्वंस्वंचरित्रंशिक्षेरन्पृथिव्यांसर्वमानवाः॥२०॥ वेदांग
निरुक्ते॥स्थाणुरयंभारहारःकिलाभूदधीत्यवेदंनविजानातियोर्थं॥योर्थज्ञइत्सकलंभद्रमश्नुते॥नाक
मेतिज्ञानविधूतपाप्मा॥अस्याहरुचःनिरुक्तं॥ यदधीतमविज्ञातंनिगदेनैवशब्द्यते॥अनग्नाविवशुष्कैधः
नतज्ज्वलतिकर्हिचित्॥एवंशास्त्रार्थेसिद्धेशास्त्रविरुद्धतयालोकव्यवहारःप्रामाणिकोनभवति॥ननुतत्त

देशीयव्यवहारस्यापिप्राचीनपरंपरयाप्राप्तस्यप्रामाणिकत्वंकेश्चित्॥उच्यतइतिचेन्न॥शास्त्राविरुद्धव्यव
हारस्यैवप्रामाणिकत्वसिद्धेः नतुशास्त्रविरुद्धव्यवहारस्यतत्तद्देशीयस्यापिपरंपराप्राप्तत्वेपिबहुजनैःअनु
ष्ठितत्वेपिप्रामाणिकत्वंसद्भिःअंगीक्रियते।तथाचशास्त्रे॥देशाद्याचारप्रकरणे॥स्मृतिसारसमुच्चयेपराशर
माधवीयादिषुच॥ यस्मिन्देशेयआचारःपारंपर्यक्रमागतः॥श्रुतिस्मृत्यविरुद्धोयःसग्राह्योनेतरःसदेति
गौतमधर्मसूत्रेद्वितीयाध्यायेएकादशसंख्याकखंडे॥ तस्यव्यवहारोवेदोधर्मशास्त्राण्यंगान्युपवेदाःपु
राणंदेशजातिकुलधर्माश्चाम्नायैरविरुद्धाःप्रमाणं॥एतस्यमस्करीयंभाष्यं॥किंचदेशकालकुलधर्माश्चा
म्नायैरविरुद्धाःप्रमाणं॥देशधर्मःकौतुकमंगलादि॥जातिधर्मःआभीरादीनांदंतरागाभावादिकुलधर्मो
दक्षिणतश्चूडावशिष्टानामित्यादि॥आम्नायैर्वेदशास्त्रादिभिःपूर्वोक्तैर्बहुवचनप्रयोगात्॥अविरुद्धाःअ
बाधिताःप्रमाणानांवक्ष्यमाणानांकर्षकादीनामप्याम्नायाविरुद्धत्वज्ञापनार्थश्चकारः॥देशधर्मादीनपि

सम्यक्ज्ञात्वाआम्नायाविरुद्धेगृह्णीयात्विरुद्धेत्यक्तव्याः इत्येवमर्थमुपदेशः॥ तत्रापिदेशविशेषेण
अनुष्ठानस्यापिशास्त्रविरुद्धस्याप्रामाणिकत्वमुच्यते॥तथाच॥ बोधायनधर्मसूत्रप्रथमाध्याये द्विती
यखंडे ॥पंचधाविप्रतिपत्तिर्दक्षिणतस्तथोत्तरतोयाचदक्षिणतस्तानिव्याख्यास्यामः॥यथैतदनुपेते
नस्त्रियाचसहभोजनंपर्युषितभोजनंमातुलपितृष्वसृदुहितृगमनमित्यथोत्तरतऊर्णाविक्रयः सीधुपा
नमुभयतोदद्भिर्व्यवहारः आयुधीयकंसमुद्रसंयानमितीतरेतरस्मिन्कुर्वन्दुष्यतीतरश्चेतरस्मिन्तत्र
तत्रप्रामाण्यमेवस्यादिति॥ मनुस्मृतौप्रथमाध्याये ॥अष्टादशोत्तरशतसंख्याकश्लोकः॥ देशध
र्मान्जातिधर्मान्कुलधर्मांश्चशाश्वतान्॥पाषंडगणधर्मांश्चशास्त्रेस्मिन्नुक्तवान्मनुः॥ अस्यव्या
ख्याने॥ देशधर्मानिति॥प्रतिनियतदेशेनुष्ठीयमानादेशधर्माः ब्राह्मणादिजातिनियता॥जातिधर्मा
कुलविशेषाश्रयाः॥कुलधर्माः वेदबाह्यागमसमाश्रयाप्रतिषिद्धव्रतचर्यापाषंडतद्योगात्पुरुषोपिपा

षंडः॥ तन्निमित्ता ये धर्माः पाषंडिनो विकर्मस्थानित्यादयः तेषां पृथग्धर्मानभिधानात्॥ गणः समूहो वणि-
गादीनां॥ मनुस्मृतौ द्वितीयाध्याये सप्तदशसंख्याकश्लोके॥ सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं॥
तं देवनिर्मितं देशं ब्रम्हावर्तं प्रचक्षते। तस्मिन्देशे य आचारः पारंपर्यक्रमागतः॥ वर्णानां सांतरालानां सस
दाचार उच्यते॥१८॥ अस्य व्याख्यानं ॥सरस्वतीति॥ धर्मस्य स्वरूपं प्रमाणं॥ परिभाषां चोक्त्वा इदानीं धर्मा
नुष्ठानयोग्यदेशानाह ॥सरस्वतीदृषद्वतीत्यादिना॥१७॥ तस्मिन्देश इति॥ तस्मिन्देशे प्रायेण शिष्टा
ष्टानां संभवात् तेषां ब्राम्हणादिवर्णानां संकीर्णजातिपर्यंतानां य आचारः पारंपर्यक्रमागतो न त्विदानींतनः
स सदाचारोभिधीयते॥१८॥ मनुस्मृतौ अस्मिन्नेवाध्याये एकोनविंशतिसंख्याकश्लोके॥ कुरुक्षेत्रं च म
त्स्याश्च पंचालाः शूरसेनकाः॥ एष ब्रम्हर्षिदेशो वै ब्रम्हावर्तादनंतरः॥१९॥ अस्य व्याख्यानं ॥कुरुक्षेत्र
मिति॥ मत्स्यादिशब्द बहुवचनांता एव देशविशेषवाचकाः पंचालाः॥ कन्याकुब्जदेशाः शूरसेनकाः मधु

रादेशाः एष ब्रम्हर्षि देशो ब्रम्हावर्तात्किंचिदूनः॥१९॥ मनुस्मृतौ अस्मिन्नेवाध्याये विंशतिसंख्याकश्लोके
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः॥ स्वंस्वंचरित्रंशिक्षेरन्पृथिव्यांसर्वमानवाः॥२०॥ अस्य व्याख्यानं
एतद्देशेति॥ कुरुक्षेत्रादिदेशजातस्य ब्राम्हणस्य सकाशात्सर्वमनुष्या आत्मीयमाचारं शिक्षेरन्॥२०॥
इत्यादि धर्मशास्त्रवाक्यैः शास्त्रोदितमेव देशजातिकुलाद्याचारजातं अनुष्ठेयं न तु मूर्खजनैः बहुभिः वंशपा
रंपर्येण आचरितमपि अनादरणीयमेव तस्य प्रामाणिकत्वं न संभवति तद्यथा स्मृतिसारसमुच्चयोक्त
यस्मिंदेशे य आचारः इति वाक्ये श्रुतिस्मृत्यविरुध्यः इति विशेषणोपादानात्॥ गौतमधर्मसूत्रोक्त तस्य व्य
वहारो वेदो धर्मशास्त्राणी स्युपक्रम्य देशजात्यादि धर्माः आम्नायैरविरुध्याः प्रमाणमित्यपि पूर्वाचारस्य वे
दा विरुध्यत्वेएव प्रामाण्यं॥ विरुध्यत्वे तु अप्रामाण्यमिति सूचनात्॥ बोधायनधर्मसूत्रोक्त पंचधा वि
प्रतिपत्तिरित्युपक्रम्य नर्मदा दक्षिणदेशेषु मातुलकन्यका परिणयः॥ पितृष्वसृकन्यापरिणयः॥ अनुपनीते

नसहपंक्तिभोजनं स्त्रीपंक्तौ सहभोजनं पर्युषितान्नभोजनं इति पंचानाचाराः॥ अपि ग्राह्यत्वेन शास्त्रे प्रतिपा
दिताः॥ एवमेव नर्मदोत्तरदेशेषु सीधुपानमिति॥ मद्यविशेषपानं ऊर्णाविक्रयः॥ अश्वादिक्रयविक्रयादिव्य
वहारः जीवनार्थं शस्त्रधारणं समुद्रसंयानमिति॥ पंचानाचारः॥ ग्राह्यत्वेन प्रतिपादिताः॥ उत्तरदेशोक्ता
नाचाराणां॥ दक्षिणदेशस्थैरनुष्ठाने महान्दोषः॥ दक्षिणदेशेषु उक्तानाचाराणां औत्तरीयैः अनुष्ठितत्वे
महान्दोषः॥ इति हेतोः तत्तद्देशेषु तत्तदुक्ताचाराणामेव प्रामाणिकत्वमिति प्रतिपादनात्॥ मनुस्मृत्यु
क्तश्लोकेपि॥ देशधर्मान्जातिधर्मान् इत्यादिना शास्त्राविरुद्धस्यैव देशजात्यादि धर्माणां ग्राह्यत्वमिति
सूचनात् पाषंडगणधर्मांश्चेति वचनेन तद्व्याख्यानोक्तरीत्या वेदविरुद्धागमाद्याचाराणां वैदिकब्राम्हण
क्षत्रियशूद्रादिभिः अननुष्ठेयत्वमेवेति सूचनाच्च ब्राम्हणादीनां वेदप्राधान्याच्च॥ मनूक्तं ॥ सरस्वतीदृषद्व
त्योरिति तस्मिन्देशे य आचार इति श्लोकद्वयेन वेदाविरुद्धतद्देशनिष्ठशिष्टाचारस्यैव सदाचारत्वेन सर्वदेश

स्यैरपितदाचारग्रहणस्यैवाभ्यनुज्ञानात्॥ मनूक्त ॥कुरुक्षेत्रंचमत्स्याश्चेति॥ एतद्देशप्रसूतस्येति च श्लोक द्वयेन॥तदुक्तदेशविशेषोत्पन्नब्राम्हणस्य सकाशात् पृथिव्यांस्थिताः सर्वे मनुष्याः स्वस्ववर्णाश्रमादिंआचारान्गृण्हीयुः॥आचारविषयकोपदेशंगृण्हीयुः इतियावत्॥ इत्यनेनार्थप्रतिपादनेन स्वस्वदेश स्वस्वजाति स्वस्वपित्रादिपरंपराप्राप्ताचारान्वेदशास्त्र विरुद्धान्आचारान्कुरुक्षेत्रादिस्थितब्राम्हणोपदेशप्राप्तान्स्वी कुर्युः॥ इतिमनोरभिप्रायप्रकाशनाच्चशास्त्राविरुद्धएवआचारःग्राह्यः इतिसिद्धोभवति॥अतः लोको चारानुमितप्रमाणस्यप्रामाण्यं॥यदाकदापिनसंभवतिननुशास्त्रविरुद्धाचारःअप्रामाणिक इति त्वयो च्यतेखलुतच्छास्त्रंकिंरूपंकथंवर्तते इतिचेदुच्यते॥ श्रुत्यादिप्रमाणनिर्णयप्रकरणं ॥नरसिं हप्रयोगपारिजातेआदिभागेश्रुत्यादिप्रमाणनिर्णयप्रकरणे हारीतः॥वेदाःप्रमाणंस्मृतयःप्रमाणं धर्मार्थयुक्तंवचनंप्रमाणं॥यस्यप्रमाणंनभवेत्प्रमाणंकस्तस्यकुर्याद्वचनंप्रमाणमिति॥ अस्यार्थः

वेदानांतन्मूलस्मृतीनांतदविरुद्धधर्मार्थयुक्तवचनानांचसर्वशास्त्रलोकसिद्धानांप्रामाण्यनिश्चयेअबाधिते
सतियस्याविवेकिनःअश्रद्धालोःप्रमाणानिनभवंतिएतादृशाविवेकपुरुषस्यएतदप्रामाण्यप्रतिपाद
कवचनमपिकःपुरुषःविवेकीप्रमाणमितिस्वीकुर्यात्॥ननुवेदस्यकेनरूपेणप्रामाण्यंसिध्यति॥अनादि
त्वेनवाईश्वरोच्चरितत्वेनवा अनादित्वेलोकसिद्धजगत्सत्यत्वदेहात्मत्वादिभ्रांतिज्ञानप्रयुक्तव्यवहार
स्यापिप्रामाण्यापत्तिप्रसंगः॥ईश्वरोच्चरितत्वेतुईश्वरसद्भावेवेदस्यैवप्रमाणत्ववेदस्यईश्वरोच्चरित
त्वेनप्रामाण्यंचअन्योन्याश्रयदोषःप्रसज्येत॥ईश्वरोच्चरितत्ववि षयेतुप्रत्यक्षादिप्रमाणानांअसंभवा
त्॥तदंशेपिवेदस्यैवप्रामाण्यांगीकारेवेदप्रमाणस्यसंदिग्धत्वादेवतदपिनसंभवति॥कथंचित्ईश्व
रोच्चरितत्वांगीकारेपिशब्दबुद्धिकर्मणांस्वल्पकालावस्थायित्वनिश्चयात्॥शाक्षादीश्वरोच्चरितवर्णा
नांइदानींसत्वासंभवेनतत्सजातीयतत्सजातीयवर्णानुपूर्वविशिष्टवर्णानामेवइदानींतनवेदरूप-

त्वांगीकारमसत्तयामुख्यतयाईश्वरोच्चरितत्वासंभवः॥तत्सजातीयत्वनिश्चयेपिप्रमाणाभावःअन्ये
पिबहवोदोषाःसंभवंतितेषांप्रतिपादनंसर्वमतसमन्चयग्रंथेद्रष्टव्यंकथंचित्नैयायिकमतरीत्यावे
दस्यईश्वरोच्चरितत्वांगीकारेपि॥विष्णोःईश्वरत्वात॥तेनस्वीकृतवुत्थावतारेतत्कृतवुत्थागमस्यापि
ईश्वरोच्चरितत्वेनप्रामाण्यापत्तिर्दुर्वाराभवति॥वाचाविरूपनित्ययाइतिवेदवाक्यानुसारेणमीमांस
कोक्तरीत्यावेदस्यअनादित्वेनप्रामाण्यांगीकारेपूर्वोक्तरीत्यादेहात्मत्वजगत्सत्वादिअनादिव्यवहा
रवाक्यस्यापिप्रामाण्यापत्तिप्रसंगश्चभवति॥एतावताउभयरूपेणापिवेदस्य प्रामाण्यंनसिध्यती
तिचेद्बाढं॥लोकसिद्धतयाशास्त्रसिद्धतयाचयुक्तिसहकृतत्वेनअनुभवपर्यवसायित्वात्वेदस्यप्रमा
करणत्वेनैवप्रामाण्यंवेदानांसिद्धमेवभवति॥अतएवपूर्वमीमांसकोत्तरमीमांसकादिसर्ववैदिकैःवे
दस्यस्वतःप्रामाण्यमभ्युपगतंस्वतःप्रामाण्यमित्युक्तेसतःइत्यस्यशब्दस्यसार्वविभक्तिकस्तसिःइतिप्र

माणात् स्वत्वेन स्वस्वरूपेणेत्यर्थः॥ स्वस्वरूपेणेत्युक्ते प्रमाकरणत्वेनैतियावत्॥ तेनरूपेणप्रमाणमित्यभिप्रायः
तद्यथाअन्यप्रमाणनिरपेक्षतेमाव्यापारानुबंधिनी विषयतेतिन्यायेन स्वोद्देश्यविषयविषयकज्ञानजननेप्रमा
णांतरनिरपेक्षत्वात्॥ स्वतःप्रमाणमिति॥ यथाप्रत्यक्षरूपंप्रमाणंप्रमाणांतरंनापेक्षते प्रत्यक्षप्रमाणो
त्पत्तिमात्रेणैवस्वविषयविषयक अज्ञान संशय विपर्ययज्ञानादीनांअसत्वात्॥ स्वेनरूपेणप्रमा
करणत्वेनैवप्रामाण्यंभजते॥ एवंवेदस्यापिप्रमाणांतरनिरपेक्षत्वेनप्रामाण्यंसंभवति॥ तदुक्तंपूर्व
मीमांसायांप्रथमाध्यायेतर्कपादात्मकप्रथमपादे॥ प्रत्यक्षप्रमाणांतरनिरपेक्षत्वेजैमिनीयंसूत्रं॥ स
तिसंप्रयोगेपुरुषस्येंद्रियाणांबुद्धिजन्मबादरायणस्यानपेक्षत्वादिति॥ जैमिनिनासूत्रितं॥ ॥
अस्यार्थस्तुशबरस्वामिभाष्येप्रकटीकृतं॥ तथाहि॥ सति। विद्यमाने। विषये। घटादौ पुरुषस्य प्रमातुः
इंद्रियाणांचसंप्रयोगे विषयसंसर्गेजातेसति। बुद्धिजन्य। बुद्धेः प्रत्यक्षात्मकज्ञानस्य। जन्म। उत्पत्तिः भव

आत्मासभोक्तुः इत्यपरे॥ एवंबहवोप्रतिपन्नाः ॥इत्यस्मिन्भाष्यवाक्ये॥ सर्वस्यात्मत्वाच्च॥ब्रम्हणः ब्रम्हा
त्मित्वप्रसिद्धिः॥सर्वोहि॥आत्मास्तित्वं॥प्रत्येतिननाहमस्मीति॥यदिहिनात्मास्तित्वप्रसिद्धिः॥स्यात्
सर्वोलोकोनाहमस्मीतिप्रतीयात्॥आत्माचब्रम्ह॥इत्यादिवाक्येषु॥स्वात्मनएवब्रम्हत्वेनज्ञापितत्वा
त्॥ब्रम्हात्मैक्यज्ञानद्वाराहृथ्यमात्रव्यावृत्तनिष्कृष्टात्मस्वरूपावस्थानलक्षणमुक्तिंप्रति॥अज्ञानात्मक
प्रतिबंधकनिवृत्तिमात्रसाधकवेदस्यरोगनिवर्तकऔषधज्ञापकवाक्यवत्॥प्रमाकरणत्वेनप्रामाण्य
सिद्धेः॥तत्प्रतिपाद्यब्रम्हात्मत्वेनावस्थानरूपमुक्त्यनुभवस्यएतद्देहावच्छेदेनैवप्राप्तिसंभवाच्च॥वेद
स्यप्रमाकरणत्वेनप्रामाण्यंअबाधितं॥ तस्मिन्नेवभाष्ये ॥प्रथमाध्यायेप्रथमपादे॥जन्माद्यस्ययत
इतिद्वितीयाधिकरणसूत्रभाष्यावसरे॥नधर्मजिज्ञासायामिवश्रुत्यादयएवप्रमाणं॥ब्रम्हजिज्ञासायां॥
किंतुश्रुत्यादयोनुभवादयश्च॥यथासंभवमिहप्रमाणं॥अनुभवावसानत्वात्॥भूतवस्तुविषयत्वाच्च॥

ब्रम्हविज्ञानस्य अस्यभाष्यस्यरामानंदीयंव्यारव्यानं॥नेतिजिज्ञास्ये॥धर्मइव जिज्ञास्ये॥ब्रम्हणी
तिव्यारव्येयं॥अनुभवोब्रम्हसाक्षात्काराख्यो विद्वदनुभवः॥आदिपदात्॥मननिदिध्यासयोर्ग्रहः
तत्रहेतुमाह॥अनुभवेति॥मुक्त्यर्थे॥ब्रम्हज्ञानस्य॥शाब्दस्य॥साक्षात्कारावसानत्वापेक्षणात्॥अत्य
ग्भूतसिद्धब्रम्हगोचरत्वेनसाक्षात्कारफलकत्वसंभवात्तदर्थे॥मननाद्यपेक्षायुक्ता॥ तस्मिन्नेव
भाष्येप्रथमाध्यायेप्रथमपादेचतुर्थाधिकरणतत्तुसमन्वयादितिसूत्रभाष्यावसरे॥नचपरिनिष्ठितव
स्तुस्वरूपत्वेपिप्रत्यक्षादिविषयत्वं॥तत्वमसी—ति॥ब्रम्हात्मभावस्यशास्त्रमंतरेणानवगम्यमान
त्वात्॥यत्तुहेयोपादेयरहितत्वादुपदेशानर्थक्यमिति॥नैषदोषः॥हेयोपादेयशून्यब्रम्हात्मावगमा
देवसर्वक्लेशप्रह णात्॥पुरुषार्थसिद्धेः॥ तस्मिन्नेवतत्तुसमन्वयादित्यधिकरणसूत्रभाष्यए
व॥एकत्वेहेयोपादेयशून्यतयाक्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः॥नहि॥ब्रम्हात्मैकत्वविज्ञा

नेनोन्मथितस्याद्वैतविज्ञानस्य पुनःसंभवोस्ति॥ येनोपासनाविधिशेषत्वं ब्रह्म प्रतिपद्येत॥ यद्यपि
अन्यत्र वेदवाक्यानां विधिसंस्पर्शमंतरेण प्रमाणत्वं न दृष्टं॥ तथाप्यात्मविज्ञानस्य फलपर्यंतत्वात्
न तद्विषयस्य शास्त्रस्य प्रामाण्यं शक्यं॥ प्रत्याख्यातुं न चानुमानगम्यं शास्त्रप्रामाण्यं॥ येनान्यत्र दृष्टं
निदर्शनमपेक्षेत॥ तस्मात्सिद्धं ब्रह्मणः शास्त्रप्रमाणकत्वं॥ अस्य रामानंदीयं व्याख्यानं॥ वेदां
ताः न स्वार्थे मानं अक्रियार्थत्वात्॥ नोरोदीदित्यादिवदित्यनुमानेन निष्फलार्थकत्वमुपाधिरित्याह
तथापीति॥ अर्थवादानां निष्फलत्वं स्वार्थामानत्वेपीत्यर्थः॥ तद्विषयस्य तत्करणस्य स्वार्थे ब्रह्मा
त्मनीति शेषः॥ सफलज्ञानकरणत्वेन वेदांतानां स्वार्थे मानत्वसिद्धेः॥ नक्रियार्थकत्वं तद्व्यापकमि
ति भावः॥ ननु माभूद्वेदप्रामाण्यस्य व्यापकं॥ क्रियार्थकत्वं॥ व्याप्यं तु भविष्यति॥ तदभावात् वेदांता
नां प्रामाण्यं दुर्ज्ञानमिति नेत्याह॥ न चेति॥ येन॥ वेदप्रामाण्यस्यानुमानगम्यत्वे नान्यत्र क्वचिद्दृष्टां

तमपेक्षेत॥ तदेवनास्तीत्यर्थः॥ चक्षुरादिवद्धेदस्यस्वतःप्रामाण्यज्ञानान्नतव्याप्तिलिंगाद्यपेक्षा॥
प्रामाण्यसंशयेतुफलवदज्ञाताबाधितार्थतास्यमीतप्रामाण्यनिश्चयोनक्रियार्थत्वेन॥ अस्मि
न्नेवतत्तुसमन्वयादितिसूत्रभाष्ये ॥अशरीरत्वमेवधर्मकार्यमितिचेन्न॥ तस्यस्वाभाविकत्वात्
अशरीरंशरीरेष्वनवस्थेष्ववस्थितं॥ महांतंविभुमात्मानंमत्वाधीरोनशोचति॥ अप्राणोह्यमनाःशुभ्रो
ह्यसंगोह्ययंपुरुषः॥ इत्यादिश्रुतिभ्यः॥ अतएवानुष्ठेयफलविलक्षणंमोक्षाख्यमशरीरत्वंनित्यमिति
सिद्धं॥ एतस्मिन्नेवतत्तुसमन्वयादितिसूत्रभाष्ये॥ इदंतुपारमार्थिकं॥ कूटस्थंनित्यं॥ व्योमवत्॥ स
र्वव्यापि॥ सर्वविक्रियारहितंनित्यतृप्तंनिरवयवंस्वयंज्योतिःस्वभावं॥ यत्रधर्माधर्मौसहकार्येणका
लत्रयंचनोपावर्तेते॥ तदशरीरंमोक्षाख्यं॥ अन्यत्रधर्मादित्यादिश्रुतिभ्यः॥ अतःतद्ब्रम्ह॥ तत्रैव॥
अपिचब्रम्हवेदब्रम्हैवभवति॥ क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे॥ आनंदंब्रम्हणोविद्वान्

बिभेतिकुतश्चन॥अभयंवैजनकप्राप्तोसि॥तदात्मानमेवावेदहंब्रम्हास्मीति॥तस्मात्तत्सर्वमभवत्
तत्रकोमोहःकःशोकएकत्वमनुपश्यतः॥ इत्येवमाद्याश्रुतयः॥ब्रम्हविद्यानंतरंमोक्षंदर्शयंत्योम
ध्येकार्यांतरंवारयंति॥ तथा॥तद्धैतत्पश्यन्नृषिर्वामदेवःप्रतिपेदेअहं॥मनुरभवंसूर्यश्चइति॥ब्रम्ह
दर्शनसर्वात्मभावयोर्मध्येकर्तव्यांतरवारणीयोदाहार्ये॥यथातिष्ठन्गायतीतितिष्ठतिगाययोः मध्ये
तत्कर्तृकं॥कार्यांतरंनास्तीतिगम्यते॥ त्वंहिनःपिता॥योस्माकंअविद्यायाःपरंपारंतारयसि॥श्रु
तंत्येवमेभगवदृशेभ्यःतरतिशोकमात्मविदिति॥सोहंभगवःशोचामितंमाभगवांछोकस्यपारंतार
यतु॥इतितस्मैमृदितकषायायतमसःपारंदर्शयति॥भगवान्सनत्कुमारःइतिचैवमाद्याःश्रुतयोमो
क्षप्रतिबंधनिवृत्तिमात्रमेवात्मज्ञानस्यफलंदर्शयंति॥ तत्रैव॥अतोनपुरुषव्यापारतंत्रा॥ब्रम्हविद्या
किंतर्हि॥प्रत्यक्षादिप्रमाणविषयवस्तुज्ञानवद्वस्तुतंत्रैव॥ तत्रैव॥अविद्याकल्पितभेदनिवृत्तिपरत्वा

च्छास्त्रस्य॥ नहि शास्त्रमिदं तया विषयभूतं ब्रह्म प्रतिपादयिषति॥ किं तर्हि प्रत्यगात्मत्वेनाविषयतया प्र-
तिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति॥ तथा च शास्त्रं॥ यस्यामतं तस्य मतं मि-
त्यादि न दृष्टेर्द्रष्टारं पश्येः॥ इति चैवमादि॥ अतो विद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरू-
पसमर्पणान्न मोक्षस्यानित्यत्वदोषः॥ तत्रैव॥ स एष नेति नेत्यात्मा॥ इत्यात्मशब्दात्॥ आत्मनश्च प्रत्या-
ख्यातुमशक्यत्वात्॥ तत्रैव॥ य एव निराकर्ता तस्यैवात्मत्वात्॥ आत्मत्वादेव च सर्वेषां न हेयः॥ नाप्युपा-
देयः॥ सर्वं हि विनश्यतु विकारजातं पुरुषांतं विनश्यति॥ पुरुषो हि विनाशहेत्वभावादविनाशी विक्रिया-
हेत्वभावाच्च॥ कूटस्थनित्यः॥ अत एव नित्यशुद्धमुक्तस्वभावः॥ सा काष्ठा॥ सा परा गतिरिति श्रुतेः॥
इत्यादिभाष्यकारतात्पर्यानुसारेणापि ब्रह्मणः स्वात्मत्वादेव॥ न च॥ परोक्षत्वं इति हेतोश्च॥ आत्मत्वेन
ब्रह्मानुभवस्य ईश्वरानुग्रहवता पुरुषेण प्राप्यत्वसिद्धेश्च॥ अत एव सूत्रभाष्यव्याख्याकर्तुः इदमेवता-

स्यर्यमितिगम्यते ॥ तथा च वेदस्य प्रमाकरणत्वेनैव प्रामाण्यं ॥ ब्रम्हणः ॥ आत्माभिन्नत्वेन तत्साक्षात्कारये
स्यतापि ॥ संभवति ॥ तथाहि ॥ जन्माद्यस्य यत इति ॥ सूत्रभाष्ये ॥ न धर्मजिज्ञासायामिव श्रुत्यादय एव प्र
माणं ॥ ब्रम्हजिज्ञासायामिति वाक्यस्य रामानंदीयं व्याख्यानं ॥ नेति ॥ जिज्ञास्ये ॥ धर्म इव ॥ जिज्ञास्ये ब्रम्ह
णि ॥ इति व्याख्येयं ॥ अनुभवो ॥ ब्रम्हसाक्षात्काराख्यो विद्वदनुभवः ॥ आदिपदात् ॥ मनननिदिध्यासयो
र्ग्रहः ॥ तत्र हेतुमाह ॥ अनुभवेति ॥ मुक्त्यर्थं ॥ ब्रम्हज्ञानस्य ॥ शाब्दस्य साक्षात्कारावसानत्वापेक्षणात् ॥
प्रत्यग्भूतसिद्धब्रम्हगोचरत्वेन साक्षात्कारफलकत्वसंभवात्तदर्थं मननाद्यपेक्षा युक्ता ॥ न च ब्रम्हानुभवो
नास्तीति वक्तुं शक्यते ॥ न हि अंधस्य सूर्यदर्शनाभावे तु सूर्य एव नास्तीति वक्तुं शक्यते ॥ लोकेपि वैद्यशास्त्रो
क्त औषधसेवने कृतेपि केषांचित् रोगनिवृत्त्यभावदर्शनमात्रेण तादृशौषधस्य तत्प्रतिपादकशास्त्रस्य
च यथासंभवं अप्रयोजकत्वं अप्रामाण्यं च वक्तुं न शक्यते ॥ अन्येषां बहूनां दृष्टादृष्टप्रतिबंधकरहिता-

नां यथोक्तसाधनविशिष्टानां तदौषधेनैव रोगनिवृत्तिदर्शनात्॥ एवं ज्योतिःशास्त्रोक्तग्रहणग्रहाति
चारवक्रचारप्रश्नज्ञातकादिफलानां क्वचित् क्वचित् सामग्रीव्यत्यासेन फलव्यत्यासदर्शनेन तच्छास्त्र
स्याप्रामाण्यं वक्तुं केनापि न शक्यते॥ अन्यत्र बहूनां तत्प्रतिपाद्यार्थानां यथोक्तरीत्या सम्यग्दर्शनबाहु
ल्यप्राप्तेः तद्वद्वेदप्रतिपाद्यार्थानामपि यथासंभवं फलप्राप्तिसिद्धेः अवश्यंभावित्वात्॥ वेदानां प्रमाक
रणत्वेन प्रामाण्यं सिद्धं॥ किंच वेदैकदेशस्य उपवेदस्य वेदांगानां च पूर्वोक्तरीत्या योगमंत्रवैद्यज्योति
ष्यादीनां फलदर्शनप्रयुक्तप्रमाकरणत्वेन प्रामाण्यस्य सिद्धौ सत्यां तदंगिनः वेदस्य स्वतःप्रामाण्यं कि
मु वक्तव्यं॥ तथैव मनुस्मृतौ द्वितीयाध्याये षट्संख्याकश्लोकः॥ वेदोखिलो धर्ममूलं स्मृतिशीले
च तद्विदां॥ आचारश्चैव साधूनां आत्मनस्तुष्टिरेव च॥ ६॥ अस्य व्याख्यानं ॥ इदानीं धर्मप्रमाणा
न्याहेत्युपक्रम्य॥ वेदस्य च धर्मे प्रामाण्यं यथानुभवकरणत्वरूपं न्यायसिद्धं॥ अनुभवो प्रमा तत्कर॰

नि॰

णंप्रमाणंप्रमाकरणत्वेनप्रामाण्यमित्यर्थः॥मनुस्मृतिव्याख्याकर्तृमेधातिथ्यादिकुल्लूकभट्टांतानाम
पिवेदस्यप्रमाकरणत्वेनैवप्रामाण्यमितितात्पर्यंस्फुटीकृतंभवति॥स्मृत्यादीनामपितन्मूलत्वेनैवप्रा-
माण्यप्रतिपादनार्थमनूद्यते॥इत्यादिनाधर्मवत्अतींद्रियत्वेनब्रह्मविषयत्वेपिवेदस्यैवअनुभवक
रणत्वेनप्रामाण्यंधर्मशब्देनब्रह्मणोपिउपलक्षितत्वात्ब्रह्मविषयेपिवेदस्यप्रमाकरणत्वंसंभवती-
तितात्पर्यार्थःस्मृतेरपिवेदमूलत्वेनप्रामाण्यंसिद्धंभवति॥तथाचपतंजलिकृतयोगसूत्रं॥अनुभूतवि
षयासंप्रमोषास्मृतिः॥इतिवेदार्थमनुभूयमन्वादयस्मरंतीतिस्मृतिः॥अतएवन्यायसूत्रकृतागोतमेन
पूर्वोक्तरीत्यावेदाःअप्रमाणंवाक्यत्वात्अस्मदादिवाक्यविशेषवदितिसत्प्रतिपक्षानुमानस्यविरोधित्वेन
वेदाःप्रमाणंवेदत्वात्मंत्रायुर्वेदवत्॥इत्यादिस्वसूत्रैरेवआयुर्वेदस्यगारुडादिमंत्रस्यवेदत्वेनहेतुना॥
तत्फलीभूतविषनिवृत्तिरोगनिवृत्तिफलदर्शनादेवतद्भागस्यवेदस्यप्रामाण्यमितिसाधितं॥तदृष्टां

प्र० शा०
१९७

तेनैनैव सर्वोपि वेदः प्रमाणभूत इत्यपि साधितः॥ भारतेपि ॥पुराणं मानवो धर्मः सांगो वेदश्चिकित्सकं॥आज्ञासिद्धानि चत्वारि न हंतव्यानि हेतुभिः॥इत्याद्युक्तं॥अपि च शास्त्रं विना केवलानुमानादि प्रमाणेन धर्माधर्मोद्यतींद्रिय अर्थविषयक ज्ञानासंभावात्॥शास्त्रस्यैव मुख्यप्रामाण्यं वक्तव्यं॥तदनंगीकारे प्रत्यक्षस्यैकस्यैव प्रामाण्यप्रसक्त्या प्रत्यक्षमेकं चार्वाका इति॥चार्वाकवादप्रसक्तिः॥तावन्मात्रेण प्रत्यक्षेण तैहिकामुष्मिक लौकिकवैदिकार्थज्ञानप्रयुक्तव्यवहारानिर्वाहात्॥सर्वव्यवहाराभावप्रसंगश्च भवेत्॥ तद्यथा प्रत्यक्षैकप्रमाणवादिनः सर्पदंशने मरणप्राप्तिः॥व्याघ्रस्य मनुष्यभक्षकत्वं मातापित्रोः स्वजनकत्वं रोगादेः औषधादि प्रतीकारः इत्यादि ज्ञानं प्रत्यक्षसाधनेनैव संभवतीति ज्ञत्वात् तत्प्रवृत्ति तत्तत्प्रतीकारकरणं तत्तस्मान्निवृत्त्यादि प्रत्यक्षागोचरव्यवहारासंभवप्राप्तिप्रसंगः॥शब्दानुमानादि प्रमाणानंगीकारात्॥शब्दानुमानादि प्रमाणे॥विना पूर्वोक्तार्थविषयकज्ञानासंभवात्॥सर्व

नि०

व्यवहारोच्छेदकप्रसंगस्य तादवस्थ्यमेव॥ ननु त्वयोक्तानां प्रमाकरणत्वेनैव वेदस्य प्रामाण्यसाधकानां हेतूनां वेदबाह्यतंत्रागमशास्त्रनामकेषु ग्रंथेषु कथंचित्संभवेन॥ वेदप्रामाण्यलक्षणस्य तत्रातिव्याप्तिसंभवात् तद्विषये त्वदुक्ततश्रमः व्यर्थएव भवेदिति चेन्न॥ यद्यपि मूढैः अविवेकिभिः शास्त्रानुमानप्रत्यक्षादिप्रमाणगत्यनभिज्ञैः विचाररहितैः तथाप्रामाण्याभासत्वेन वेदान्यशास्त्रनामकग्रंथानां प्रतीतिसद्भावः प्राप्यतएव॥ तथापि पूर्वोक्तविपरीतैः न्यायज्ञैः ईश्वरप्रसादवद्भिः क्षीणपापैः न तथा प्रत्ययः प्राप्यते॥ अपितु विचारद्वारा यथास्थितमेव वेदस्य प्रमाकरणत्वेनैव प्रामाण्यं प्राप्यते॥ वेदान्यस्य वेदप्रामाण्यव्याप्यं लौकिकं प्रामाण्यमिति च भवति॥ तत्प्रामाण्यं तु वेदप्रामाण्याभासमिव प्रतीयते॥ तथाच ॥श्वेताश्वतरोपनिषदि॥ यस्य देवे परा भक्तिः यथा देवे तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इति॥ ब्रह्मोपनिषद्यप्येवं ईश्वरानुग्रहाद्देवपुंसामद्वैतवासना॥ महाभयकृतत्राणाद्द्विता

प्र॰श्रा॰
१६६

णासुपजायते॥इति॥ अपि पापवतां पुंसां विपरीता मतिर्भवेदिति॥ सूतसंहितावचनाच्च॥ पापवतामेव वेदान्येषु प्रामाण्यज्ञानं जायते॥ प्रस्तुतना वेदविन्मनुते तं बृहंतमिति॥ वेदैरनेकैरहमेव वेद्य इति सर्वे वेदा यत्पदमामनंतीत्यादिश्रुतिभ्यः वेदस्य सुख्यतात्पर्यविषयीभूतोर्थः परंब्रम्हैवेति प्रतिपाद्यते॥ अत एव ऋचो अक्षरे परमे व्योमन्॥ यस्मिं देवा अधि विश्वे निषेदुः॥ यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासत इति॥ ऋचो अक्षर इति॥ अक्षरे नाशरहिते परमे व्योमन्॥ परमे व्योम्नि॥ पराकाशे यस्मिन्॥ एतादृशे ब्रम्हणि विश्वे देवाः सर्वे देवाः अधिनिषेदुः॥ अधि उपरि निषेदुः॥ नितरां सेदुः॥ अधिष्ठानत्वेन सेवितवंत इत्यर्थः॥ ऋचः॥ ऋगुपलक्षिता वेदाश्च अधिनिषेदुः॥ प्रतिपाद्यतासंबंधेन तिष्ठंति यद्ब्रम्हतात्पर्येण प्रतिपादयंतीत्यर्थः॥ एतेन ऋगादयः वेदाः तदुपलक्षिताः सर्वे जगत्पदार्थाः यस्मिन् ब्रम्हणि कल्पिताः इति तात्पर्यार्थः॥ यस्तन्न वेद यः पुरुषः तत् ब्रम्ह न वेद॥ अहमेव ब्रम्हेति॥ न॰

नि॰

साक्षात्करोति॥ ऋचाकिं करिष्यति॥ यजुषाकिं करिष्यति॥ साम्नाकिं करिष्यतीत्यर्थः॥ किंफलंप्राप्नो
तीतियावत्॥ यइत्तद्विदुः॥ येजनाः इतु इत्थंप्रकारेण संहितायाः॥ ब्राम्हणनिरुक्तादिवैदिकअंगवि
शेषैरेव॥ तत्तु॥ ब्रम्ह॥ वेदविजानाति॥ तइमे॥ तेइमे॥ ताहृश ज्ञानिनः॥ समासते॥ सम्यक्आसते॥
आसनंकुर्वंति॥ स्थितिंप्राप्नुवंतीत्यर्थः॥ असम्भुविभूसत्तायामितिधातोःसद्रूपप्राप्तिलक्षणमोक्षंप्रा
प्नुवंतीत्यर्थः॥ मनुनापि॥ वेदशास्त्रार्थतत्वज्ञः यत्रतत्राश्रमेवसन्॥ इहैवलोकेतिष्ठन्स ब्रम्हभूया
यकल्पतइति॥ वेदशास्त्रतात्पर्यस्य ब्रम्हणएवमुख्यार्थत्वेन प्रतिपादितत्वाच्च॥ ब्रम्हज्ञानेनैव सर्वैर्वे
दार्थज्ञातत्वस्योपपत्तेः ब्रम्हणस्तुस्वात्माभिन्नत्वात्॥ कथंचित्॥ ईश्वरगुरुशास्त्रादिअनुग्रहेणअप
रोक्षसाक्षात्कारंप्राप्तुंशक्यत्वाच्च॥ वेदस्यमुख्यार्थरूपब्रम्हविषयकंप्रमाकरणत्वेनैव वेदस्यमुख्यप्रा
माण्यंसिद्ध्येत् तंत्वौपनिषदंपुरुषंपृच्छामि इतिश्रुतेश्च प्रामाण्यस्य नकाचिदनुपपत्तिः॥ अतएव यत्सा

क्षादपरोक्षाद्ब्रम्हयआत्मासर्वांतरः॥अयमात्माब्रम्हअहंब्रम्हास्मिइत्यादिश्रुतयःआत्मनएवब्र
म्हत्वेनअपरोक्षज्ञानविषयत्वं॥ब्रम्हणोप्रतिपादयंति॥अतःविद्वदनुभवबलादपि॥नचास्तीरेवृक्षेपं
चफलानिसंतीति॥लौकिकवाक्यप्रामाण्यवच्च॥वेदवाक्यस्यापि॥अनुभवपर्यवसायित्वेनापि॥ब्र
म्हणःप्रमाकरणरूपमहाप्रामाण्यस्यअबाधितत्वेनसिद्धत्वात्॥अपिचनैयायिकादिवेदप्रामाण्यां
गीकर्तृभिःचार्वाकबौद्धादिप्रामाण्यानंगीकर्तृभिश्चसर्वैःमोक्षेप्सुभिःवादिभिःमोक्षस्यपरमपुरुषार्थ
त्वेनप्रार्थ्यते॥तत्तत्साधनेषुतत्तद्ग्रंथोक्तेषुयत्नंकुर्वंतीतिसर्वलोकसिद्धः॥तत्रतावत्मोक्षइत्युक्तेमुचुल्मो
क्षणइतिधातोःबंधनिवृत्तिःउच्यते॥बंधस्तु देहेंद्रियप्राणसंभूतविशिष्टत्वेनऐहिकामुष्मिकादिसुख
दुःखभोक्तृत्वतत्प्रयोजककर्तृत्वादिसाधनदेहोत्पत्तिविनाशलोकांतरगमना गमनादिरूपसंसारःय
थामतंयथाभिप्रेतंयथासंभवंयथायोग्यंजन्ममरणादिरूपः॥ मोक्षस्तुतन्निवृत्तिपूर्वकआत्यंतिकदुः

खनिवृत्तिद्वाराआनंदावाप्तिरिति चाभ्युपगम्यते॥ तथाच वैदिकमते आत्मनः आकाशवदसंगत्वं तद्भि
न्नस्य अनात्ममात्रस्य स्वप्नमायादिवत्॥ मिथ्यात्वं इति सिद्धांतीकरणेन आत्यंतिकदुःखनिवृत्तिद्वारानि
रतिशयानंदस्वरूपावाप्तिफलस्य सुषुप्तिनिर्विकल्पसमाधिआत्मसाक्षात्कारादौ योग्यपुरुषैः अनुभूय
मानत्वेन पूर्वोक्तबंधनिवृत्तिरूपफलस्य संभवयोग्यतायाः संभावितत्वेन सर्वैः अंगीकरणीयत्वा
त्॥ विद्वद्भिस्तु साक्षादेव अनुभूयमानत्वाच्च सर्ववादिभिरंगीकृतआत्यंतिकदुःखनिवृत्तिपूर्वे
कपरमानंदावाप्तिलक्षणमोक्षप्राप्तेः वेदजन्यज्ञानेन इदानीमेव ज्ञानोत्पत्तिसमकाले प्राप्तुमुचि
तत्वात्॥ मोक्षरूपफलप्राप्तिदर्शनेन तदर्थं वेदप्रतिपादकवेदस्यानुभवज्ञानजनकत्वेन प्रामाण्यं
सर्ववादिभिरप्यंगीकर्तव्यमेवेत॥ सर्वजनैः एतादृशानुभवस्य लब्धत्वेपि तत्प्राप्तियोग्यैः कैश्चित्तज्ज्ञ
नैः अनुभूतत्वदर्शनेन तदनुभवयोग्यतायाः वेदप्रयोजकत्वसंभावनायाः सर्वेषामपि भवितव्येति

बुध्दिमद्भिःनिश्चीयतएव॥अन्यथास्त्रीणांभूम्यादेश्चपुत्रोत्पत्तिसस्योत्पत्तियोग्यताज्ञानादेवका
संचित्स्त्रीणांभूम्यादीनांचपुत्रसस्याद्युत्पत्त्यभावेपितत्सस्यर्थेविवाहकृष्यादौप्रवृत्तिदर्शनंन
स्यात्॥वैदिकमतेआत्मान्यस्यसर्वस्यापिमिथ्यात्वांगीकारेणआत्मनःअसंगत्वांगीकारेणआ
त्मनःअसंगत्वांगीकाराच्चबंधमोक्षज्ञानसाधनादिसर्वेषांकालत्रयेपिपरमार्थतोअसत्वांगी
कारात्॥तथाच॥ननिरोधोनचोत्पत्तिःनबद्धोनचसाधकः॥नमुमुक्षुःर्नैवमुक्तःइत्येषापरमार्थ
ता॥इतिश्रुतेःआत्मासंगःततोन्यत्स्यादैंद्रजालंहिमायिकं॥इत्यचंचलनिर्णीतेकुतोमनसिवा
सनेतिस्मृतेश्च॥अनयोःआत्मासंगत्वअनात्ममिथ्यात्वयोःजाग्रत्स्वप्नसुषुप्त्यादिषुईषन्न्यूनत
यावापिसर्वमनुष्यैः यथासंभवंअनुभूयमानत्वाच्च॥वेदबाह्यशास्त्रनामकग्रंथेषुवेदप्रामा
ण्यलक्षणस्यअतिव्याप्त्यभावःसिद्ध्यत्येव॥अनयोःवेदप्रामाण्यवेदबाह्यशास्त्राप्रामाण्य

योश्चतारतम्यंतत्कृततारतम्यंतन्न्यायतारतम्यंतयोःपरस्परप्रकृतिविकृतिभावतारत
म्यादिकंचसर्वंबहुविस्तृततयाशास्त्रन्यायोपबृंहितत्वेनसर्वमतसमन्वयाख्यग्रंथांतरेविचा
रितमितिकृत्वा अत्रोपरम्यते अधिकविचारस्तुसर्वमतसमन्वयाख्यास्मत्कृतग्रंथेद्रष्टव्यः
तद्विचारस्य अस्मिन्ग्रंथे अधिकतया वक्तुं अकांडेतांडवमितिन्यायेन अनवसरत्वात्॥अ
त्रप्रतिपादनेप्रयोजनाभावात्तद्विचारस्य बहुग्रंथसाध्यत्वात् अप्रकृतत्वात् एतद्ग्रंथबाहु
ल्यप्राप्तिभयाच्चनलिखितंइतिमंतव्यं॥एतस्मिन्ग्रंथेतुवेदबाह्यविषयकसर्वसंशयोपिनिव
र्तितएव॥नचत्वयोक्तवेदप्रामाण्यलक्षणस्यवेदबाह्यशास्त्रप्रामाण्ये अतिव्याप्तेःतद्दोषनिवृत्तिं वि
ना॥त्वदुक्तवेदप्रामाण्यासिद्धिर्दुर्वारैवेतिवाच्यं॥अस्मदुक्तवेदप्रामाण्यस्य प्रमाकरणत्वेन अनुभवप
र्यवसायित्वेसिद्धेसतितत्संशयनिवृत्तिद्वारातदुक्तसाधनफलादेःसिद्धिनिश्चयेनैवतत्कार्यप्र

हत्यादिसर्वव्यवहारनिर्वाहात्॥ अन्यशास्त्रस्य प्रामाण्यमस्ति वा न वेति विचारस्य इदानीमप्रकृतत्वा
त्॥ तद्विचाराभावस्य वेदप्रामाण्यप्रयुक्तव्यवहाराप्रतिबंधकत्वाच्च॥ तद्विचारावसरासंभवः प्राप्यत एव।
नहि लोके कस्यचित्पुरुषस्य पुंस्त्वसद्भावनिश्चये विवाहगर्भाधानपुत्रोत्पादनादिव्यवहारस्य कस्याश्चित्
स्त्रियाः स्त्रीत्वादिनिश्चये प्रजाप्रसवादिसर्वव्यवहारस्य कस्यचिद्भूप्रदेशस्य भूमित्वनिश्चये तत्प्रयुक्तबीजा
वापसस्यादिप्राप्त्यादिव्यवहारस्य च तत्तत्समाकरणत्वरूपप्रामाण्यवद्वाक्यप्रयुक्तव्यवहाराणां सर्वेषामपि
तावन्मात्रेण निर्वाहे सति तदन्यस्त्रीपुरुषभूम्यादितत्पदार्थनिष्ठयोग्यतादिविचारकरणीयत्वस्य पूर्वोक्तव्यव
हारं प्रति अनावश्यकत्वात् अप्रयोजकत्वात् प्रयोजनाभावात् तदभावस्य अप्रतिबंधकत्वाच्च॥ पूर्वोक्तव्य
वहारे अन्यविचारस्य अनादरणीयत्वमेव लभ्यते॥ अपि च प्रमाणस्य महत्प्रामाण्यमिति अल्पप्रामाण्य
मिति लौकिकप्रामाण्यमिति वैदिकप्रामाण्यमिति व्यापकप्रामाण्यमिति व्याप्यप्रामाण्यमित्यादि अनेक

प्रकारप्रामाण्यस्य विद्यमानत्वेनतेषांमध्येतत्तद्योग्यतानुरूपप्रामाण्यस्य वेदबाह्यतंत्रादिष्वपि विद्यमान
त्वेपिवेदनिष्ठप्रामाण्यसदृशत्वंनसंभवतीत्यत्रतद्विचारदशायामेव तत्प्रतिपादकग्रंथेस्पष्टतयाप्रतीयते
अस्मिन्ग्रंथेतद्विचारस्याप्रकृतत्वेपित्वमनःसमाधानार्थंयत्किंचिदंशप्रतिपादनेनतद्दिक्प्रदर्शनंअतिसं
क्षेपतःक्रियते॥तथाहि॥वैदिकवेदबाह्यशास्त्रतंत्रादीनां सर्वेषामपि परलोकप्रधानत्वात्धर्माधर्ममोक्ष
तत्साधनरूपअतींद्रियपदार्थज्ञानविषयेशास्त्रंविना लौकिकवाक्यानुसारेण अनुमानादिना वा निर्णेतुमश
क्यत्वात्॥वैदिकमुक्तेःब्रम्हाभिन्नआत्मस्वरूपावस्थानरूपायाःक्षीणपापैःविद्वद्भिः इदानीमेवअनुभवविष
यत्वात्मुक्तिरूपफलस्यचआ संतिकदुःखनिवृत्तिपूर्वकपरमानंदप्राप्तिरूपस्यचअनुभूतत्वेनतत्प्रतिपादक
वेदस्यअनधिगताबाधितार्थविषयक ज्ञानस्यप्रमाणत्वेन तत्करणस्यवेदस्यप्रामाण्यंअनुभवानुसारेणैव
सिध्यति॥अनधिगतमित्युक्तेवेदश्रवणात्पूर्वंयदज्ञातंआत्माभिन्नब्रम्हरूपंवस्तुतच्चअबाधितंअबाधित

मित्युक्ते ।यदा कदा वा तद्वस्तुनः सत्वरूपत्वादेव बाध्यत्वं न संभवति॥बाध्यत्वं नाम॥ शुक्तिरूप्यादिवत्॥कालांतरे प्रकारांतरेण ज्ञातस्य तदुत्तरे कालांतरे पूर्वं शुक्तेः इदं रजतमिति रजतत्वेन रूपेण ज्ञातायाः कालांतरे प्रमाणजन्यप्रमात्मकज्ञानदशायां नेदं रजतमिति॥पूर्वं ज्ञातरजतत्वेन रूपेणैव निषेधो बाधः॥तत्प्रतियोगि रजतं बाधितं॥तस्य नेदमिति॥निषेधात्मकबाधप्रतियोगित्वमेव बाध्यत्वं येन रूपेण ज्ञातं तेन रूपेण निषेधः बाधः॥तदप्रतियोगित्वमबाध्यत्वं॥अत एव नेदं रजतमिति रजतबाधदशायां रजते वस्तुनि विचार्यमाणे सति पूर्वं न तत्र रजतं नासीत्॥इदानीमपि नास्ति॥उत्तरकालेपि न भविष्यत इति कालत्रयेपि कल्पितरजतस्य सत्वाभावात् प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्वस्य कल्पितरजते सत्वात्॥तस्य बाध्यत्वसिद्धिः॥शुक्तेस्तु अधिष्ठानभूतायाः रजताध्यासप्राक्कालेपि रजताध्यासकालेपि नेदं रजतमिति तद्बाधकालेपि चेदमिदमिति॥इ

दंत्वेनरूपेणसत्वात्॥तस्या अबाध्यत्वसिद्धिश्चभवेत्॥यथा॥तथामोक्षप्रयोजकज्ञानविषयस्यब्रम्हणः
मुमुक्ष्वात्मरूपेणस्थितत्वात्॥तादृशात्मनः अज्ञानदशायां इदानीमनुभूयमानसुखदुःखादिफलप्र
योजकत्वेनानुमितकर्मकर्तृत्वेनजन्मांतरेमुक्तिदशायां तदनुभवितृत्वेन चकालत्रयेपिपूर्वमहमा
संइदानीमस्मि॥उत्तरकालेमुक्तिसुखंअनुभविष्यामीतिप्रतीतिविषयत्वेनस्वात्मनः सर्वदासद्भा
वात्॥नेदंरजतमितिवत्॥क्वचित्कालेपि अहं नभवामिकिंतु॥अहंअन्यः इतिबाधज्ञानस्यचअ
संतासंभवात्॥अबाध्यत्वंसिद्धमेव अतः॥पूर्वोक्तरीत्या अनधिगतंअबाधितंयद्ब्रम्हवस्तु तत्आ
त्मरूपेणस्थितंतद्विषयकं अहंब्रम्हास्मीत्याकारकंज्ञानंसैवप्रमेत्युच्यते॥तत्प्रमाकरणं॥तत्प्रमा
जनकंअहंब्रम्हास्मितत्त्वमसि॥अयमात्माब्रम्ह प्रज्ञानंब्रम्ह॥ यत्साक्षादपरोक्षाद्ब्रम्ह यआत्मासर्वां
तरः इत्यादिवाक्यरूपः वेदःप्रमाणंतन्निष्ठप्रामाण्यमेवमहाप्रामाण्यमित्युच्यते॥ तज्ज्ञानादेवआत्मा

प्र॰ शा॰
१६३

ज्ञाननिवृत्त्या अज्ञानप्रयुक्तजगन्मिथ्यात्वनिवृत्त्युपलक्षितात्मसंगात्माभिन्नब्रम्हरूपस्य स्वरूपेणावस्थान
लक्षणनिरतिशयानंदप्राप्तिरूपसुख्यमोक्षलाभात्॥ तज्ज्ञानसाधनीभूतउपासनाप्रतिपादकउप
निषद्रूपवेदवाक्यस्य तत्प्रामाण्यव्याप्यप्रामाण्यं तत्साधनस्य यज्ञादिश्रौतस्मार्तकर्मणः चित्तशु
द्धिद्वारा आत्मविविदिषाजनकत्वेन तत्प्रतिपादकवेदवाक्यरूपस्य॥ तमेतंवेदानुवचनेनब्रा
म्हणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेत्यादेः संहिताब्राम्हणादेश्च तद्व्याप्यप्रामाण्यं वेदे
तरतर्कव्याकरणादिशास्त्राणां वेदज्ञानसहकारिकारणानां तद्व्याप्यलौकिकंप्रामाण्यं वेदबाह्य
बौद्धचार्वाकार्हतम्लेच्छादिशास्त्रनामकग्रंथानां परंपरया बहुरूपेण आत्मज्ञानसाधनसाधनत्वे
न लौकिकगौणंप्रामाण्यं॥ इत्यादितारतम्यक्रमेण सर्वेषामपि यथाकथंचित्प्रामाण्यस्य ——— संभ
वेपि मुख्यतया निरतिशयफलहेतुत्वेन अनुभवपर्यवसायित्वेन अबाधितार्थज्ञानजनकत्वेनउ

नि॰

दानीमेवजीवदशायां वेदप्रतिपाद्यज्ञानमोक्षआत्मस्वरूपादि अनुभवहेतुत्वेन च संशयविपर्ये-
या-ज्ञानादिरहिततया अनुभवयोग्यआत्मवस्तुविषयकसाक्षात्कारसंपादकत्वेन महत्प्रामा
ण्यं वेदस्यैव संभवति वेदेतरमतस्थानां वेदबाह्यमतस्थानां च शास्त्राणां देहपातानंतरभावि
स्वर्गवैकुंठकैलासादिदेशविशेषप्राप्त्यादि बहुभेदभिन्नमताभिमतानां मोक्षप्रतिपादकवाक्या
नां चार्वाकबौद्धजैनम्लेच्छहूणशैवादिमुक्तिप्रतिपादिकानां तन्मुक्तिसाधकज्ञानध्यानक्रियादि
प्रतिपादकवाक्यानां च यथासंभवं यथायोग्यं लौकिकं गौणं प्रामाण्यं संभवतीति वक्तुं शक्यते तत्र
वैदिकमुक्तेः जीवदशायामेव विद्यमानत्वप्रतिपादकश्रुत्यादयः प्रमाणानि भवंति॥ तथा च॥ तमेवं वि
द्वानमृत इह भवति नान्यः पंथा विद्यतेऽयनायेति ब्रम्हैव सन् ब्रम्हाप्येति य एवं वेद॥ देवो भूत्वा देवानप्ये-
तीति॥ इहैव लोके तिष्ठन् स ब्रम्हभूयाय कल्पत इति॥ इह जीविते क्षेमं गच्छति पंडित इति॥ ब्रम्हभूतःप्र

सन्नात्मानशोचतिनकांक्षति॥इत्यादिश्रुतिस्मृतिप्रमाणस्यसत्वात्॥तस्मिन्नेवजन्मनिवेदप्रतिपाद्य
मोक्षादेःअनुभूतत्वेनवेदस्यप्रमाकरणत्वेनप्रामाण्यमेवमहाप्रामाण्यमितिसंभवति॥वेदेतरवाक्यवे
दबाह्यशास्त्रादीनांदेहपातानंतरभाविपारलौकिकअनुभाव्यमुक्त्यादिप्रतिपादकत्वेनसंदिग्धप्रा-
माण्यस्यगौणत्वंसंभवति॥तेषांसर्वेषांमुक्त्यादिफलानांपरोक्षज्ञानविषयत्वेनपरस्परवादिविप्रतिप
त्तेःअनिवार्यत्वाच्च॥एवंवेदेतरशास्त्रनामकसर्वग्रंथानामपिवेदमूलकत्वावश्यंभावित्वेनवेदप्रकृति
कत्वेनवेदविकृति-त्वाच्चतत्तन्मतशास्त्रेष्वेववैदिकमतात्॥स्वस्वमतस्थानांस्वस्वमतस्थापकानांस्वस्व
मतप्रणेतॄणांचनिर्गमनंभूतकालेवर्तमानकालेभविष्यत्कालेचवैदिकमतात्निर्गतस्यस्वमतप्रवेशःतैरंगी
कृतइतिइदानीमपिवेदबाह्यैःसर्वमतस्थैःवैदिकमतात्॥आकृष्यस्वमतप्रवेशनेयत्नःक्रियतइत्यर्थः॥
सर्वैरनुभूयतएव॥इतोपिहेतोःवैदिकमतप्रभवत्वंअन्यमतानांवेदांगीकर्तॄणांवेदबाह्यानांसर्वेषांच

संभाव्यते॥ तस्मादेवतन्मतानां सर्वेषां तत्तन्मतकर्तृभिः पूर्वं वैदिकमतस्थितदशायां वैदिकसिद्धांतार्थेषु एकैकदेशार्थं गृहीत्वा स्वस्वबुद्धिकल्पितं कांश्चिदर्थानपि मेलयित्वा अभिनवाभिनवतया स्वस्वमतं कृतवंत इत्यप्यर्थः॥ तत्तन्मतग्रंथेषु वैदिकमतश्रुतिस्मृतीतिहासपुराणादिषु च प्रतीयते॥ अतोपि हेतोः सर्वमतानामपि वैदिकमतविकृतित्वेन तन्मतप्रभवत्वं वैदिकैकदेशित्वं च सिद्ध्यंभवति पूर्वोक्तरीत्या वेदप्रतिपाद्यकारीरेष्ट्यादिफलस्य वृष्ट्यादेः कर्मजन्यत्वस्य गारुडमंत्रादिजन्यविषप्रहरणरूपफलस्य उपनिषज्ज्ञन्यज्ञानविषयत्वस्य योगवेदांतादिप्रयुक्तफलस्य वेदांतप्रयोज्यत्वस्य च अनुभूतत्ववत् वेदबाह्यमतप्रतिपाद्यफलानामपि वैदिकफलवत् वृष्टिविषप्रहरणयोगादिरूपाणां अनुभूतत्वात् प्रमाकरणत्वेन प्रामाण्यं तत्तच्छास्त्राणामपि संभवतीति पूर्वपक्षिणा यदुक्तं तत्सर्वं वक्ष्यमाणरीत्या परिहीयत एव॥ वेदविकृतित्वेन वेदांगविकृतित्वेन च॥ ज्योतिष्यवैद्ययोगमंत्रवेदांतरामायणभारतभागवतपुराणादीनां प्राकृतआंध्रद्रा

विडमहाराष्ट्रघूर्जरकर्नाटकगौडादिभाषयारचितानामिववेदबाह्यशैववसौरगाणपत्यवैष्णवजैनबौद्धचा
र्वाकम्लेच्छहूणादिमतानांतत्तच्छास्त्राणांचपूर्वोक्तरीत्याविस्तृतसर्वमतसमन्वयग्रंथोक्तरीत्याचवैदिकमत
प्रभवत्वाद्यनेकहेतुभिःज्योतिर्विद्वरामायणभागवतादीनांप्राकृतआंध्रादिभाषयारचितवत्॥म्लेच्छहूणा
दिभाषयावेदोक्तार्थाने—वपरंपरयाप्राप्तान्स्वग्रंथरूपेणरचितवंतः॥अतःवेदार्थविकृतित्वेनकथंचित्
गौणंप्रामाण्यंसंभवत्येवेति॥तत्तच्छास्त्राणामपिप्राकृतग्रंथप्रतिपाद्यफलवत्वेदविकृतित्वेनरूपेणपरं
परयावेदप्रतिपाद्यत्वसंभवात्अपिचवेदप्रतिपाद्यबहूनामर्थानांमध्येएकदेशरूपएकैकस्यार्थस्यशैव
वैष्णवसौरगाणपत्यशाक्तबौद्धजैनम्लेच्छहूणादिभिःवेदांगीकर्तृवेदबाह्यसर्वमतस्थैरपिगृहीतत्वाच्च
ननुवेदस्यप्रामाण्यविषयेत्वयाबहुप्रकारेणसमाधानेकृतेपित्वदुक्तप्रामाण्यसदृशत्वमेववेदबाह्यशा
स्त्रप्रामाण्यस्यापिसंभवतीतिप्रतिभातीतिचेन्न॥वेदबाह्यशास्त्रप्रामाण्यादिविचारस्यअवशिष्टत्वेपि

पूर्वोक्तरीत्या अनुभवादिना प्रमाकारणत्वेनैव वेदप्रामाण्यस्य सिद्धत्वात् ॥ तदवशिष्ट विचारं विनापि आर

ब्ध प्रकृतैतद्ग्रंथकरणस्य निर्वाहसंभवात् तद्विचाराभावस्य एतद्ग्रंथकरण प्रतिबंधकत्वाभावाच्च ॥ तस्येदानीं

अप्रकृतत्वं इति तस्मिन्न प्रवृत्तिः ॥ अथवा वेदबाह्यतंत्राणामपि वेद प्रामाण्यस्तदशप्रामाण्य संशय विचा

रस्य कर्तव्यत्वावश्यकत्वे अपेक्षिते सति अस्माभिः क्रियमाणे तद्ग्रंथसंपूर्तेऽनंतरं त्वया प्रश्ने कृते सति तदा तद्वि

चारः अस्माभिरभिधीयते इत्यलं अतिवादेन एतावता न्यायतः विचार्यमाणे तत्तन्मत शास्त्रयुक्ति न्याय अ

नुभव फलतारतम्य अभ्युपगम प्रमाणादितारतम्य बलाबलादि हेतुभिः वैदिकैकदेशिमत वेदबाह्यम

तानांच सर्वेषामपि पूर्वोक्तरीत्या वेदार्थैकदेशार्थकत्वेन वैदिकप्रमाणैकदेशप्रमाणकत्वेन वैदिक

साधनैकदेशसाधनकत्वेन वैदिकफलैकदेशफलवत्त्वेन वैदिकप्रतिपाद्यैकदेशप्रतिपादकत्वेन

वैदिकमतप्रभवत्वेन च वेदविरुद्धत्वेन वेदप्रामाण्यैकदेशप्रामाण्यं गोपतया संभवत्येव ॥ अथ-

मर्थःसर्वोपिन्यायतःतत्तच्छास्त्रोक्तरीत्याचयथासंभवेत्॥ तथाविस्तारतयाअस्मत्कृतसर्वमतसम
न्वयाख्यग्रंथेविशदीकृतोवर्ततेतद्ग्रंथावलोकनेतन्मतविचाराकांक्षशांतिःसंपूर्णतयाभवत्येवेति
अत्रतद्विचारःनक्रियते॥अनेनापिहेतुनासर्वदेशसर्वकालस्थितैःसर्वैःवेदमतानुयायिभिःनिः
शंकतयावेदप्रामाण्यस्यअबाधितंयथाभवतितथाअभ्युपगतत्वेनचवेदाःप्रमाणं॥इत्यत्रतद्वि
षयकसंशयविपर्ययअज्ञानादिःकश्चनदोषःनप्रसुपस्थाप्यते॥ अपिचश्चुत्यादिप्रमाणनिर्णय
प्रकरणे॥नरसिंहप्रयोगपारिजाते ॥हारीतवचने॥वेदाःप्रमाणं॥इत्यस्यवाक्यस्यअर्थतयाशास्त्र
युक्त्यनुभवादिभिःसर्वलोकअभ्युपगतव्यवहारैश्चवेदानांस्वतःप्रामाण्यंप्रतिपादितं॥इदानींवेद
मूलकत्वेनस्मृतयःप्रमाणमितिवाक्यस्यअर्थोवर्ण्यते तथाहि॥अनुभवजन्यंज्ञानंस्मृतिः॥
इतिशास्त्रविदांसंकेतः॥अपिचसंराधनेप्रत्यक्षानुमानाभ्यांइतिव्यासकृतब्रह्ममीमांसासूत्रेपुण

वं सूत्रितत्वात्॥ तस्य सूत्रस्य भगवत्पादीयभाष्ये॥ प्रत्यक्षशब्दस्य श्रुतिपरत्वेन अनुमानशब्दस्य स्मृतिपरत्वेन च अर्थः कृतः सिंहो देवदत्त इतिवत्॥ प्रत्यक्षनिष्ठप्रमाणांतरानपेक्षत्वगुणयोगात् वेदस्यापि प्रत्यक्षत्वव्यपदेशः गौणः॥ तथैव जैमिनिकृतपूर्वमीमांसासूत्रे च विरोधे त्वनपेक्षं स्यात्। असति ह्यनुमानं इति औदुंबराधिकरणे॥ सूत्रितत्वाच्च॥ अनुमानशब्दस्य स्मृतिपरत्वं भाट्टादिमीमांसकैरेवोक्तमिति सिद्धं अनुमीयते मूलभूता श्रुतिः। अनया स्मृत्येति॥ अनुमानं स्मृतिः॥ इत्यपि व्युत्पत्तेः शास्त्रसिद्धत्वाच्च॥ एतत्सजातीय अर्थकत्वेन स्मृतेरपि॥ स्मर्यते मूलभूता श्रुतिः अनयेति॥ स्मृतिः॥ इति व्युत्पत्तिसंभवः शास्त्रप्रतिपाद्यो वर्तते॥ तथा च मनुस्मृतौ द्वितीयाध्याये॥ वेदोऽखिलो धर्ममूलं स्मृतशीले च तद्विदां॥ आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥६॥ अस्य श्लोकस्य व्याख्यानं॥ इदानीं धर्मप्रमाणान्याह। वेदोऽखिलो धर्ममूलमिति॥ वेदः ऋग्यजुःसामाथर्वणलक्षणः स सर्वो विध्यर्थवादमंत्रात्मा धर्मे मूलं प्रमाणं

अर्थवादानामपिविध्येकवाक्यतया स्थापकत्वेन धर्मेप्रामाण्यात्॥ यथाहजैमिनिः॥ विधिनात्वेकवाक्य
त्वात्स्तुत्यर्थेन विधीनां स्युर्मंत्रार्थवादानामपि॥ विधिवाक्यैकवाक्यतयैव धर्मेप्रामाण्यं॥ प्रयोगकाले-
चानुष्ठेयस्मारकत्वं वेदस्य च धर्मेप्रामाण्यं॥ यथानुभवकरणस्वरूपन्यायसिद्धं स्मृत्यादीनामपि तन्मूलत्वे
नैव प्रामाण्य प्रतिपादनार्थमनूद्यते॥ मन्वादीनां च वेदविदां स्मृतिःधर्मेप्रमाणं वेदविदामिति विशेषणोपादा
नात् वेदमूलत्वेनैव स्मृत्यादीनां प्रामाण्यमभिमतं शीलं ब्रह्मण्यतादिरूपं॥ तदाह हारीतः॥ ब्रह्मण्यता देवपि
तृभक्तता सौम्यता अपरोपतापिता अनसूयता मृदुता अपारुष्यं तु मैत्रता प्रियवादित्वं कृतज्ञता शरण्य
ता कारुण्यं प्रशांतिश्चेति त्रयोदशविधं शीलं गोविंदराजस्तु शीलं रागद्वेषपरित्याग इत्याह आचारः कंबलव-
ल्कलाद्याचरणरूपः साधूनां धार्मिकाणां आत्मतुष्टिश्च वैकल्पिकपदार्थविषया धर्मे प्रमाणं॥ तदाह ग
र्गव्यासः॥ वैकल्पिकी आत्मतुष्टिः प्रमाणं॥ ६॥ यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः॥ स सर्वोभिहि

तो वेदे सर्वज्ञानमयो हि सः॥ वेदादन्येषां वेदमूलत्वेन प्रामाण्येभिहितेपि मनुस्मृतेः सर्वोत्कर्षज्ञापनाय वि
शेषेण वेदमूलतामाह॥ यः कश्चिदिति॥ यः कश्चित्कस्यचिद्ब्राम्हणादेर्मनुनाधर्म उक्तः॥ स सर्वो वेदे प्रतिपादि
तः॥ यस्मात् सर्वज्ञोसौ मनुः सर्वज्ञतया चोत्सन्नविप्रकीर्णपठ्यमानवेदार्थं सम्यक्ज्ञात्वा लोकहिताय प
निबद्धवान्॥ गोविंदराजस्तु सर्वमय इत्यस्य सर्वज्ञानाकर ब्धएव वेद इति वेदविशेषणतामाह॥७॥ इत्या
दिधर्मशास्त्रवचनैः स्मृत्यादीनां सर्वेषामपि श्रुतिमूलकत्वेन च प्रामाण्यं सिद्धं भवति॥ वेदोखिल इति म
नुवचने॥ स्मृतिशील इति स्मृतेः॥ धर्मे प्रामाण्यं अभिहितं॥ प्रद्युत यः कश्चित्कस्यचिदिति मनुवचने॥ मनू
क्तसर्वस्याप्यर्थजातस्य वेदाभिहितत्वंप्रतिपादितं। तस्मात्स्मृत्यादीनां अप्रत्यक्षवेदमूलकत्वेन प्रत्यक्षवेदमूलकत्वेन च प्र
माण्यं स्यापितं भवति॥ ततः स्मृत्यर्थः॥ सर्वोपि वेदार्थ एवेति ज्ञातव्यः॥ अष्टकाः कर्तव्याः॥ इत्यत्रापि तत
स्मृतेः वेदमूलत्वेन प्रामाण्यं शास्त्रेण निश्चितं॥ पूर्वमीमांसायामपि वेदाविरुद्धस्मृतीनां सर्वासामपि वेद

वत्प्रामाण्यं॥ विचार्यस्मृत्यधिकरणादिषु दृढीकृतं॥ ततः पूर्वोक्तहारीतवचने॥ वेदाः प्रमाणं स्मृतयः प्रमा
णमित्युक्तं॥ तथैव धर्मार्थयुक्तं वचनं प्रमाणमिति वाक्यस्य अर्थस्तु॥ धर्मः पारलौकिकसुखहेतुः अर्थः॥
अर्थ्यते प्रार्थ्यत इत्यर्थः॥ धनकनकस्त्रीपुत्रगोपश्वादिरूपः ऐहिकसुखहेतुः एतदुभयाविरुद्धसाधनादि
ज्ञापकं वचनमेव धर्मार्थयुक्तवचनं॥ तस्य मन्वादिशास्त्रजन्यज्ञानप्रयोज्यत्वात्॥ तथाच बृहस्पतिस्मृतौ
तावदेव प्रमाणानि तर्कव्याकरणानि च॥ धर्मार्थमोक्षोपदेष्टा मनुर्यावन्न दृश्यत इति॥ धर्मो द्विविधः॥
धर्मः परमधर्मश्चेति॥ मनुनैवाधृतिक्षमे॥ त्याद्युपलक्षितयज्ञाध्ययनदानादीनां आत्मज्ञानस्यापि धर्मत्वमु
क्तं॥ तथाच मनुस्मृतौ ॥ धृतिक्षमा दमास्तेयं शौचमिंद्रियनिग्रहः॥ धीर्विद्या सत्यमक्रोधो दशकं ध
र्मलक्षणमिति॥ स्वर्गादिसुखसाधनत्वेन आत्मज्ञानसाधनत्वेन च॥ यथासंभवं धृत्यादीनां यज्ञादीनां च
धर्मसाधनत्वं इति॥ प्रतिपादनेन स्वर्गादिसुखहेतुः धर्मः तमेतं वेदानुवचनेन ब्राम्हणा विविदिषंति यज्ञे

नदानेनतपसानाशकेनेत्यादिश्रुत्या॥ सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यतइत्यादिगीतावचनेनचआ
त्मज्ञानरूपधर्मंप्रतिसर्वेषांकर्मणांसाधनत्वात्॥ तेषामपिधर्मत्वव्यवहाराः॥ कर्मधर्मशब्दयोःएकार्थ
कत्वेनशास्त्रेषुप्रयोगोबहुशोदृश्यते॥ परमधर्मस्तु॥ याज्ञवल्क्येनदर्शितः॥ इज्याचारदमाहिंसादान
स्वाध्यायकर्मणां॥ अयंतुपरमोधर्मोयद्योगेनात्मदर्शनमिति॥ आत्मज्ञानस्यैवपरमधर्मत्वाभिधानात्एत
दुभयात्मकामुष्मिकाधर्मैहिकार्थमुक्तं॥ तत्सतिपत्तिजनकं॥ ऐहिकामुष्मिकफलाविरुद्धंयद्वचनं
तदपिश्रुतिस्मृतिवत्॥ प्रमाणमेव॥ एतादृशसर्वशास्त्रसर्वलोकसर्वकालसर्वाविरुद्धश्रुतिस्मृ
तिधर्मार्थयुक्तवचनरूपप्रमाणानियस्यकस्यचित्मूर्खस्यप्रमाकरणत्वेनप्रमाणानिनभवंति॥ प्र
माणत्वेनतेनस्वीक्रियंते॥ तस्यमूर्खस्यवचनंसर्वविरुद्धंप्रमाणत्वेनकःपुरुषःविवेकीस्वीकरोति
कोपिपुरुषःमनुष्यमात्रःनस्वीकरोतीत्यर्थः॥ तादृशमूर्खस्यप्रमाणस्वरूपानभिज्ञस्यपशुस

मानत्वात्॥ सतु मनुष्य एव न भवति॥ किंतु शृंगादिरहितः पशुः॥ मनुस्मृतावपि प्रत्यक्षमनुमानंच
शास्त्रंच विविधागमं॥ त्रयंसुविदितंकार्यंधर्मसिद्धिमभीप्सता॥ इति प्रमाणत्रयस्यैवमनुष्यत्वेन स्वी
कारः प्रमाणानभिज्ञस्य पशुत्वेन धर्मे तस्यानधिकारः॥ इति तात्पर्यार्थः॥ बोधायनधर्मसूत्रेपि॥ उ
पदिष्टो धर्मः प्रतिवेदं तस्यानुव्याख्यास्यामः॥ स्मार्तो द्वितीयः तृतीयः शिष्टागम इति॥ धर्मे विषये वे
दस्य अखिलस्य प्रथमं प्रामाण्यं तदनुसृतस्य स्मृत्यादेः द्वितीयं प्रामाण्यं तत्प्रामाण्याधीनप्रामाण्यत्वा
त्॥ तदनुसृतशिष्टागमस्य तृतीयं प्रामाण्यं तदुभयप्रामाण्याधीनप्रामाण्यत्वात्॥ शिष्टलक्षणं तु बो
धायनेनैव उत्तरत्र वक्ष्यते॥ श्रुतिस्मृतिपुराणशिष्टागम आत्मतुष्टि लौकिकवाक्य लौकिकाचारादीनां प्र
र्वः पूर्वप्रमाणविरोधे उत्तरोत्तरप्रमाणानां॥ अप्रमाणत्वेन त्याज्यत्वमेव॥ तथाहि ॥ नरसिंहप्रयोग
पारिजाते॥ लौगाक्षिः॥ श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी॥ अविरोधे ततः कार्यं स्मार्तं वैदिकवत्त

ति·

दा॥ इतिश्रुत्यासहस्मृतीनां विरोधे स्मृत्यर्थस्य त्याज्यत्वमेवेति॥ अर्थः॥ तद्यथा॥ श्रौते कर्मणि अग्निहो
त्रादौ यजमानस्य सूतकाद्याशौचप्राप्तिकाले स्मृत्या औपासनवैश्वदेवादि कर्मानधिकारित्वस्य प्रतिपादि
तत्वेपि अग्निहोत्र रूपश्रौत कर्मणि आशौचकालेपि यजमानस्य तत्कर्माधिकारित्वेन स्मृत्युक्त आशौच
स्य तत्काले त्याग एव॥ अपिच॥ संध्ययोश्च बहिर्ग्रामात्॥ आसनं वाग्यतश्चेति॥ आपस्तंबसूत्ररूपया
स्मृत्या उक्तरूपेण सूर्यनक्षत्रोदयपर्यंतं तत्रैव उक्तजपानुष्ठानस्य श्रुत्युक्त सूर्योदय सूर्यास्तमयकालयोः
अग्न्युद्धरणविधानेन सह विरोधे स्मृत्युक्तग्रामबहिर्जपस्य त्याज्यत्वं संभवति॥ अत एव आपस्तंबेनैव श्रुतिल
क्षणं बलीय इति॥ आहिताग्नेः बहिर्जपनिवारणं कृतं॥ किंच स्मृत्युक्त सूर्यचंद्रग्रहणयुक्त ग्रस्तास्तमयनि
मित्तक दिवाभोजननिषेधकालेपि दर्शपूर्णमासेष्ट्यंगभूत पुरोडाशभक्षणस्य तद्ग्रहणादावपि आहिताग्नेः
कर्तव्यत्वेन श्रुति विधानस्य बलीयस्त्वात्॥ स्मृत्युक्त अदनीयप्राशननिषेधः त्याज्य एव भवति॥ प्रस्तुत

देवा

श्रुत्युक्तब्रह्मजगत्कारणवादेन कपिलकणादगौतमपतंजलिदेवलाद्युक्तप्रकृतिरूपप्रधानजगत्कारणवा
दस्य परमाणुजगत्कारणवादादेश्च श्रुतिविरोधात्॥ त्याग एव भवति॥ एवं सर्वत्र श्रुतिविरुद्धार्थांशे स्मृत्यु
क्तार्थस्य त्याग एव भवति॥ श्रुतेर्गरीयस्त्वात् गुरुतरप्रमाणत्वादित्यर्थः॥ लोकेपि प्रत्यक्षानुमानउपमाना
दिप्रमाणानां मध्ये कस्यचित् प्रमाणस्यापि प्रमाकरणरूपप्रत्यक्षेन सह विरोधे सति तस्य प्रमाणस्य त्या
ज्यत्वमेव दृश्यते॥ तद्यथा ॥ काष्ठस्य अग्निना विरोधे अनुमानादिप्रमाणेन सिद्धेपि प्रत्यक्षेण प्रमा
णेन काष्ठाश्रिताव्यक्ताग्नेः विरोधाभावादर्शनात्॥ तदंशे तद्विषयक अनुमानादिप्रमाणस्य त्याज्यत्वमेव भव
ति प्रत्यक्षप्रमाणस्य अनुमानाद्यपेक्षया बलीयस्त्वात्॥ अत एव पूर्वमीमांसायां प्रथमाध्याये प्रथमपादा
त्मक तर्कपादे। सतिसंप्रयोगे पुरुषस्येंद्रियाणां बुद्धिजन्म बादराणस्यानपेक्षत्वात्॥ इति जैमिनिना सूत्रितं
तस्यार्थस्तु सति विद्यमाने वस्तुनि पुरुषस्य जीवात्मनः इंद्रियाणां च संप्रयोगे सति विद्यमाने घटादौ संनिकर्षे स

तीत्यर्थः॥ तुष्विजन्माबुस्येः ज्ञानस्यप्रत्यक्षात्मकस्यजन्मउत्पत्तिः भवतीतिशेषः॥ अनपेक्षत्वादितिहेतुः॥ अन
पेक्षत्वात्॥ यथा॥ अनुमानोपमानादीनांप्रत्यक्षापेक्षावर्त्तते॥ नतथा॥ प्रत्यक्षप्रमाणस्यप्रमाणांतरापेक्षा॥
अतएव॥ अनुमानमित्यत्रप्रत्यक्षप्रमाणं अनुअनुसृत्यमानंप्रमाणंभवतीत्यनुमानं॥ पक्षहेतुव्याप्तिपक्षधर्मता
दीनां॥ प्रत्यक्षप्रयोज्यत्वात्॥ उपमानमित्यत्रापि॥ प्रत्यक्षस्यउपसमीपेमानंप्रमाणंभवतीति॥ उपमानं॥ गो
सदृशोगवयः इत्यत्रगवयप्रत्यक्षसमीपकालएव। गोसादृश्यज्ञानंजायते॥ अतएवोपमानमिति॥ एवंसर्व
त्रापिप्रमाणेषुयोज्यं॥ इत्येवमर्थः॥ मीमांसासूत्रवृत्तिभाष्यकारेणचशबरस्वाम्यादिनाप्रदर्शितः॥ बाद
रायणस्येतिबादरायणग्रहणंपूजार्थं॥ नतुमतविकल्पप्रकाशमानार्थं॥ अपितुबादरायणस्यममगुरोः उ
त्तरमीमांसात्मकवेदांतसूत्रकर्तुः व्यासस्यापिइदंमयोक्तंप्रत्यक्षलक्षणंसंमतमिति॥ जैमिनेस्तात्पर्यं॥ अ
तः प्रत्यक्षस्यप्रमाणांतरानपेक्षत्वेनमुख्यंप्रथमंप्रामाण्यं॥ तद्विरोधेसति॥ इतरप्रमाणानांप्रामाण्यंन

भवति॥ एवंश्रुतिप्रमाणस्यअत्यंतबलीयस्त्वमित्यभिप्रायः॥ अविरोधेतिश्रुत्यासहस्मृतेः विरोधाभावेसतिस्मृ
त्युक्तकर्मणामपिश्रुत्युक्तकर्मवत्‌अवश्यमनुष्ठेयत्वं अपिचश्रुतिस्मृतिपुराणेषु विरोधेषुपरस्परं॥ पूर्वंपूर्वंबलीयस्या
दितिन्यायविदोविदुः॥ स्मृतेःश्रुत्याविरोधेसतितदंशेअप्रामाण्यं॥ पुराणस्यस्मृतिविरोधेतदंशे॥ अ
प्रामाण्यंततः॥ तद्विरुद्धांशःनानुष्ठेयइत्यर्थः॥ चतुर्विंशन्मते॥ स्मृतेर्वेदविरोधेतुपरित्यागोविधीयते
तथैवलौकिकंवाक्यंस्मृतिबाधेपरित्यजेदिति॥ स्मृतेःवेदविरोधेसति॥ त्यागःविधीयते॥ यथेतिअध्या
हारःकर्तव्यः॥ तथेतिउत्तरार्धेदृष्टत्वात्‌॥ दृष्टांतदार्ष्टांतिकयोःमध्येअन्यतरस्यउक्तत्वेअन्यतरस्यापिअ
वश्यंभावित्वनियमात्‌॥ तथैवेतिदार्ष्टांतिकप्रतिपादनेनदृष्टांतोपिग्रंथकर्तुरभिप्रायः॥ अंगीकर्तव्यः
अन्यथातथैवेत्युक्तेः॥ यथेतिआक्षेपागमः॥ अनिवार्योभवति॥ तथैवयथावेदविरोधेस्मृतेःत्यागःआ
वश्यकः॥ तथैवस्मृत्याविरोधेसतिलौकिकवाक्यस्यअप्रामाणिकत्वेनत्यागः॥ आवश्यकःत्यागइत्युक्ते

शास्त्रविरुद्धलौकिकवाक्यानुसारि अनुष्ठानं परित्यजेदित्यभिप्रायः॥ लौकिकवाक्यमिति॥ लोक-
स्तु भुवने जने इति प्रमाणात्॥ लोकसंबंधिवाक्यं॥ जनवक्तृकवाक्यमिति यावत्॥ एतदुक्तं भवति॥ लो
कैः जनैः बहुभिर्वा शास्त्रानभिज्ञैः॥ शास्त्रोक्तानुष्ठानरहितैः॥ कामक्रोधदंभासूयादिग्रस्तत्वेन शास्त्र
विरुद्धानुष्ठानशीलैः यदुक्तं वाक्यं॥ इतरानुष्ठापकं॥ तत्॥ अप्रामाणिकमेव तदनुसारि अनुष्ठानं त्य
जेत्॥ अत्रस्थवाक्यशब्दः॥ तादृशजनानुष्ठानलक्षक श्च भवति॥ एतावता तादृशलौकिकजनवा
क्यं॥ तदनुसारि अनुष्ठानं च पितृपरंपराप्राप्तमपि सर्वथा परित्यजेदिति तात्पर्यमिति ज्ञेयं॥ न च शि
ष्टाचारस्य प्रामाणिकत्वमिति॥ शास्त्रसिद्धांततः बहुभिः शिष्टत्वेन अभिमतैः बहुसंख्याकैः अनुष्ठितं
परंपराप्राप्तं॥ कथं त्याज्यमिति त्वयोच्यते॥ इति वाच्यं मया नोच्यते॥ किंतु पूर्वोक्तवक्ष्यमाणधर्मशा
स्त्रवाक्येषु तथोच्यते शिष्टलक्षणस्यापि॥ तत्रैव स्मृत्यादौ वक्ष्यमाणत्वात्॥ शिष्टैः शास्त्रविरुद्धानु

ष्ठाननस्तीक्रियतएव॥ विरुद्धानुष्ठानेसतितेषांशिष्टत्वमेवअसिद्धंभवति॥ शिष्टेतराणांबहुसंख्य
कानामपि॥ अनुष्ठानेनप्रामाणिकंभवति॥ तेषांपरिषत्त्वयोग्यताभावात्॥ वक्ष्यंतिचमनुपराशरयाज्ञ
वल्क्यादयःपरिषत्त्वंनविद्यतइत्यादिना॥ व्यासश्च॥ धर्मंयोबाधतेधर्मोनसधर्मःकदाचन॥ अविरो
धेनुयोधर्मःसधर्मःसद्भिरुच्यतइति॥ बहुश्रुतिबहु—धर्मशास्त्रविरुद्धं॥ किंचित्श्रुतिवचनं॥ धर्म
शास्त्रवचनंवा॥ बहुशास्त्रोक्तधर्मबाधते॥ तद्वचनमप्रमाणमित्याह व्यासः॥ धर्मंयोबाधतइति॥ य
कश्चनधर्मःयत्किंचिद्वचनप्रतिपाद्यः॥ धर्मत्वेनप्रतीतः॥ अन्यधर्मवचनैःसह॥ विरुध्यतेसतुधर्मोनभ
वति॥ किंतुअर्थशास्त्रप्रतिपाद्यइवअर्थरूपएवभवति॥ बहुश्रुतिबहुस्मृतिविरोधात्॥ अतएवयद
कदावा॥ तद्वचनंप्रमाणंनभवति॥ तद्यथाश्येनेनाभिचरन्यजेत इति॥ निषादस्थपतिंयाजयेदिति॥
बृहदारण्यअष्टमाध्यायेस्वपत्नीजारमरणार्थंआभिचारकप्रयोगउक्तः॥ तद्वचनजातंचइत्यादिश्रु

तितन्मूलकस्मृतिवचनजातंच॥गुरुंवाबालवृद्धौवाब्राम्हणंवाबहुश्रुतं॥आततायिनमायांतंहन्या
देवाविचारयन्॥नाततायिवधेदोषोहंतुर्भवतिकश्चन॥आततायिनमायातंअपिवेदांतपारगं॥जि
घांसंतंजिघांसीयात्नतेनभ्रूणहाभवेत्॥इतिमनुवचनजातं॥आततायिनमायांतंअपिवेदांतपा
रगं॥जिघांसंतंजिघांसीयात्नतेनब्रम्हाभवेदिति॥आपस्तंबवचनंएतादृशएतत्सजातीयश्रुतिस्मृति
वचनजातं॥ब्राम्हणकर्तृकब्राम्हणकर्मकवधादिप्रवर्तकं॥अप्रमाणंतस्यार्थस्यकेवलप्रत्यक्षश्रुतिप
रोक्षश्रुतितन्मूलकस्मृत्यादिप्रतिपाद्यत्वेपिसतुअर्थएवधर्मोनभवति॥किंतुअर्थशास्त्रभागरूपश्रुति
स्मृतिप्रतिपाद्यत्वेन॥केवलैहिकअर्थरूपपुरुषार्थोतन्मूलोभवति॥इतिकृत्वातस्यअर्थत्वमेवनतुधर्म
त्वंइत्यतः॥तेनैवापस्तंबेनमनुनाच॥ब्रम्हहत्याप्रायश्चित्तविधानात्॥किंच॥अग्निदोगरदश्चैवशस्त्रपा
णिर्धनापहः॥क्षेत्रदारापहर्ताचषडेतेह्याततायिनः॥इतिआपस्तंबेनैवउक्तत्वाच्च॥आततायिव्यतिरेके

णअस्यब्राम्हणहननेनिमित्ताभावात्॥अर्थात्॥आततायी॥ब्राम्हणहननमेवप्राप्यते॥तस्यहनने॥
दोषोनास्तीति॥मनुनाआपस्तंबेनचपूर्वमुक्तं तथासति॥प्रायश्चित्तकांडेमन्वापस्तंबादिभिः॥सर्वैरपि
ब्रम्हहत्याप्रायश्चित्तंमहत्तमत्वेनोक्तं विरुध्येत अतः श्रुतिस्मृत्यादिभिः कैश्चिद्वाक्यैः प्रतिपादितत्वात्॥ध
र्मत्वेनप्रतीयमानोपिधर्मोनभवति॥किंतु॥अर्थएवऐहिकोपयोगीतियावत्॥अतएवआपस्तंबेनैव
ब्रम्हहत्याप्रायश्चित्तविधानप्रस्तापे॥ धर्मार्थयोःसन्निपातेअर्थग्राहिणएवएतदिति॥अर्थरूपपुरु
षार्थऐहिकफलं॥उद्दिश्यब्रम्हवधेप्रवृत्तस्यएतत्प्रायश्चित्तमुक्तमिति॥उक्तत्वात्॥ब्रम्हणेब्राम्हणमालभे
तक्षत्राययराजन्यं मरुद्भ्योवैश्यंइत्यादिश्रुतिप्रतिपादितपुरुषमेधयागप्रयुक्तब्राम्हणहननेदोषोनास्तिप्रयु
त॥स्वर्गादिफलंभवतीतिआपस्तंबतात्पर्यं॥अतः॥तस्यधर्मत्वमेवक्षत्रियस्यतुयुद्धेब्राम्हणहननमपिस्व
र्गहेतुःतदकरणेमहान्दोषःतत्करणेदोषोनास्तिइतिमन्वादिस्मृतिषुभगवद्गीतायांअर्जुनंप्रतिकृष्णोपदे

शेनच अवगम्यते ॥ अयमर्थः भारतादिषु स्पष्टतया द्रोणादिरूपगुरुहननं भीष्मादिरूपवृद्धहननं कृपादि
रूपब्राम्हणहननंच धर्मराजार्जुनादिभिः कृतमितिउद्घुष्यते ॥ तस्मात् क्षत्रियस्य युद्धे ब्राम्हणहननं धर्मरू
पत्वेन विधिविहितं ॥ इतिकृत्वा न दोषाय भवति ॥ युद्धव्यतिरेकेण हनने अर्थप्रयोजनत्वात्तस्य इति हेतोः
अर्थरूपत्वमेव आततायिहननस्य धर्मत्वं न संभवति ॥ तथाच ॥ याज्ञवल्क्यस्मृतौ तव्द्यारव्यारूपविज्ञानेश्व
रीयेचव्यवहारकांडे ॥ स्मृत्योर्विरोधेन्यायस्तु बलवान्व्यवहारतः ॥ अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमितिस्थि
तिः ॥ इत्यत्र अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमित्युक्ते अर्थशास्त्रं ज्योतिष्यवैद्यनीतिशास्त्रादिरूपं ऐहिक
फलसाधनादिज्ञापकं ॥ धर्मशास्त्रंतु अतींद्रियस्वर्गमोक्षादिपारलौकिकफलसाधनादिज्ञापकं ॥ तयोः सं
निपाते तयोर्विरोधे प्राप्तेवा ॥ अर्थशास्त्रात् ॥ ऐहिकफलसाधनादिप्रतिपादकात् ॥ आमुष्मिकफलसाध
नादिप्रतिपादकं धर्मशास्त्रमेव बलवत् ज्ञानानुष्ठानयोः प्रमाणभूतं इति ज्ञेयं ॥ धर्मशास्त्रस्य स्वर्गापवर्गा

जन्मादिपारलोकफलस्यउत्कृष्टत्वेनतत्प्रतिपादकत्वादस्यापिउत्कृष्टत्वंअर्थशास्त्रस्यरोहिकधनपुत्रप
शुआरोग्यायुःकाम्यादिफलसाधनादिविषयाणांअनित्यत्वादिदोषग्रस्तत्वेननिकृष्टत्वात्॥तत्प्रतिपाद
कत्वेनअस्यापिनिकृष्टत्वंतस्यधर्मत्वंनसंभवतियदिचश्रुतिस्मृत्युक्तत्वेनैवधर्मत्वांगीकारेश्रुतिस्मृत्युक्ता
भिचारनिषादस्यपतियाजनआततायिहननाद्यकरणेप्रायश्चित्तस्यअवश्यंविधानंभवेत्॥ तथाकुत्रा
पिप्रायश्चितकांडेआततायिहननाद्यकरणेप्रायश्चित्तविधानस्यअदर्शनात्॥अश्रुतत्वाच्च॥प्रस्तुतउत्तर
त्रवक्ष्यमाण॥ गोतमधर्मसूत्रे ॥त्यजेत्पिततरंराजघातकंशूद्रयाजकं इत्यादिना॥निषादस्थपत्यादिशू
द्रयाजकस्यपितुरपित्यागरूपघटस्फोटनादिकर्मविधानात्॥श्येनेनाभिचरन्यजेतइत्यादिश्रुतिरूपविधिस
दृशवाक्यविहिताभिचारकरणेनप्राप्तब्राम्हणहननस्यप्रायश्चित्तविधानाच्च॥जैमिनिरपि॥इदमपिध
र्मलक्षणमसूत्रयत्॥चोदनालक्षणोर्थोधर्मइतिउभयचोदनयालक्ष्यते॥अर्थःश्रेयःसाधनंज्योतिष्टोमा

दि॥ अनर्थः प्रत्यवायसाधनं॥ श्येनादितत्र वेदप्रमाणकं श्रेयःसाधनं ज्योतिष्टोमादिधर्म इति सूत्रार्थः
स्मृत्यादयोपि वेदमूलत्वेनैव धर्मे प्रमाणं इति दर्शयिष्यामः॥ इत्यादि मनुस्मृति द्वितीयाध्यायगत प्रथ
मश्लोक रूपे॥ विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिरित्येतच्छ्लोक व्याख्याने कुल्लूकभट्टादिभिः
श्येनयागादेः प्रत्यवायसाधनत्वेन अनर्थत्वात्॥ अधर्मत्वमिति व्याख्यानं कृतं॥ तस्मात् श्रुतिस्मृत्युदि
तवाक्यानामपि बहुश्रुतिस्मृत्युक्त धर्मविरोधित्वेन धर्मत्वेन प्रतीयमानोर्थं प्रतिपादक श्रुतिस्मृति वा
क्यानामपि अर्थशास्त्रत्वेन तत्प्रतिपाद्यार्थानां ऐहिकफलसाधनादिरूपार्थत्वमेव॥ नतु पारलौकिकार्थं
रूपधर्मत्वं संभवति॥ यद्यपि वेदशास्त्रोक्तानां सर्वेषामप्यर्थानां धर्मत्वमेवेति वक्तव्यं स्यात्॥ तथापि।
तेष्वेव श्रुतिस्मृति वचनेषु केषुचित् अर्थशास्त्रत्वं केषुचित् धर्मशास्त्रत्वं वर्ततइति विभागः संभवति॥
तद्यथा॥ श्येनेनाभिचरन्यजेत॥ निषादस्थपतिं याजयेत्॥ बृहदारण्योक्त स्वपत्नीजारमरणाभिचार

प्रयोगरूपइत्यादिवेदभागःस्मृतिषुच॥स्नातकप्रकरणे॥आश्वलायनादिसूत्ररूपासु॥नवर्षेति-
धावेत्॥नवृक्षमारोहेत्॥नकूपमवरोहेत्॥ननदीबाहुभ्यांतरेत। इत्याद्यर्थकस्मृतिभागः॥ज्योति
ष्येपि॥गुरुबलआयुरारोग्यफलप्रयोजककालादिप्रतिपादकत्वंअर्थशास्त्रत्वंनतुतस्यधर्मशास्त्र
त्वंईदृशस्मृत्युक्तवर्षधावनादिकरणेश्रुत्युक्ताभिचाराद्यकरणेज्योतिष्योक्तगुरुबलाबलाद्यज्ञाने
चप्रायश्चित्ताश्रवणात्॥तस्मात्॥धर्मंयोबाधतेइत्युक्त्याबाधकत्वेनप्रतिपादितधर्मशब्दस्यापि
अर्थपरत्वमेववक्तव्यमितिसिद्धं॥ निषादस्थपतिंयाजयेदित्यत्रणिच्प्रयोगात्॥पुरोहितंप्रति
विधिःप्रवृत्तःपुरोहितस्यस्वकर्तव्यत्वेनविध्यभावात्॥स्वकर्तव्यतायाःअनावश्यकत्वेनयाजनप्रयु
क्तऐहिकद्रव्यादिलाभरूपअर्थहेतुत्वात्॥तद्वाक्यस्यअर्थशास्त्रत्वमेवेतिस्पष्टमेवप्रतीयते॥ अविरो
धेतुयोधर्मइतिबह्वश्रुतिस्मृतिविरोधाभावेनशास्त्रमहातात्पर्यविरोधाभावेनच॥योधर्मःप्रतिपाद्यते

नि·

सएव धर्मः॥ नतु अर्थशास्त्राश्रयणेन अर्थवादादिरूपवाक्येन वा प्रतिपाद्योऽर्थः धर्मो न भवति॥ इति सद्भिः
शिष्टैः पृच्छ्यते॥ एवमेव शिष्टानां तात्पर्यमित्यर्थः॥ तस्माद्विरोधे धर्मस्य निश्चित्य गुरुलाघवं॥ तयोर्भू
यस्तमं विद्वान्कुर्यात्धर्मविनिर्णयं॥ तस्मादिति॥ पूर्वोक्तरीत्या तात्पर्येण बहुशास्त्रोक्त धर्मज्ञा तस्य
विरोधे विरोधसंशये प्राप्ते सति॥ तस्मात्॥ धर्माधर्मलक्षणविषयकं निश्चयस्य अतिसूक्ष्मत्वेन दुर्ज्ञे
यत्वात्॥ धर्माधर्मयोः धर्मपरमधर्मयोः धर्मार्थयोः स्वरूपं तात्पर्येण प्रतिपाद्यत्वं॥ अर्थवादवाक्येन प्र
तिपाद्यत्वादिकं च ज्ञात्वा तद्देशतत्कालतद्योग्यतादि गौरवलाघवमालोच्य तयोः द्वंद्वयोः धर्माधर्मध
र्मार्थादिरूपाणां मध्ये हेतुस्वरूपकार्यादिभूयस्तमन्यायबलबाहुल्यं विद्वान् विजानन्॥ सन् धर्मविनि
र्णयं अनुष्ठेयस्य इतिकर्तव्यतादिरूपं कुर्यात्॥ निश्चित्य वदेदित्यर्थः॥ ननु विद्वान् धर्मनिर्णयं कुर्यादिति
व्यासवचने पूर्वमुक्तं सः विद्वान् कः तस्य विद्वत्तायाः किं लक्षणं तस्य विदुषः सूक्ष्मधर्मनिर्णयप्रयुक्त दोषा

दिकंसंभवतिवानवा॥इत्याशंकायांइदमुच्यते॥ इदंब्राम्हण्यंअन्वर्थनामकंमुख्यंतुब्राम्हण्यंब्रम्हवि
त्वमेव॥अथब्राम्हणोभवतीति॥बृहदारण्योपनिषदि॥ब्रम्हवेदनानंतरमेवब्राम्हण्यमुक्तं॥तथाभारत
सनत्सुजातीये॥सत्वेयोब्राम्हणस्त्वयेतिधृतराष्ट्रंप्रतिसनत्सुजातवचनं॥गौणंब्राम्हण्यंतुब्रम्हवेदःतदा
श्रयोब्राम्हणःतदधीतेतज्जानातीतिब्राम्हणशब्दनिर्वचनस्यव्याकरणप्रमाणसद्भावात्॥ ब्रम्हवादि
नोवदंतिब्रम्हचारीइत्यादिप्रयोगदर्शनाच्च॥तादृशब्राम्हण्यवानेवब्राम्हणःविद्वानित्युच्यते॥तस्यब्राम्ह
ण्यमेवविद्वत्तारूपंभवतितद्ब्राम्हण्येनैवसर्वदोषासंस्पृष्टत्वेनतस्यमोक्षादिफलभाक्त्वंइतिकथ्यते॥
तथाहि॥ वेदांगनिरुक्तेस्थाणूरयंभारहारःकिलाभूदधीत्यवेदंनविजानातियोर्थं॥योर्थज्ञइत्सकलंभ
द्रमश्नुतेनाकमेतिज्ञानविधूतपाप्मा इति अस्याऋचःनिरुक्तं॥ यदधीतमविज्ञातंनिगदेनैवशब्द्यते॥
अनग्नाविवशुष्केधःनतज्ज्वलतिकर्हिचित्॥इति॥ अस्याःऋचः॥अयमर्थः॥यःपुरुषःवेदंअधीत्यत

स्यार्थंनविजानातिसोयंभारहारःग्रहभारधारकःस्थाणुःस्तंभःअभूत्किलकिलेतिप्रसिद्धिद्योतनार्थः॥
यःइत्॥इत्थंप्रकारेणवेदस्यमंत्रादेःसंहिताभागस्यब्राह्मणनिरुक्तव्याकरणस्मृतीतिहासपुराणाद्यनु
सारेणयथार्थंअर्थंजानाति॥सःसकलंभद्रमश्नुते॥इहलोकेपरलोकेचसुखसाधनमश्नुते॥प्राप्नोतिना
कमेतिस्वर्गंप्राप्नोतिकंसुखं॥अकंदुःखं॥नाकंसुखंइतिवार्थः॥ज्ञानविधूतपाप्माज्ञानेनआत्मज्ञानेनवि
धूतःपाप्मापापरूपःज्ञानप्रतिबंधकःअज्ञानलक्षणःएनसःज्ञानविधूतपाप्माज्ञानेनपापप्रयोजकंअ
ज्ञानंनिरस्यमोक्षंप्राप्नोतीतितात्पर्यार्थः॥ अस्यनिरुक्तस्यायमर्थः॥ अविज्ञातंअविज्ञातार्थकं
वेदजातंनिगदेनैवशब्द्यते॥ गुरूपदिष्टमार्गेणैवअध्यासनाशब्द्यते॥ शब्दःक्रियतेतद्वेदजातंताद्दशा
ध्येतुःतत्कुलीभूतंस्वर्गापवर्गादिसाधकंनभवति॥अनेनअविज्ञातार्थत्वाद्वेदजातस्येतिहेतोःअनग्नौ
अग्निभिन्नजलादौप्रक्षिप्तंशुष्कमपिएधःकाष्ठंकर्हिचित्नज्वलति॥प्रकाशादिकंनप्राप्नोति॥ यथातथा

अविज्ञातार्थवेदभागः फलप्रयोजकोनभवतीतितात्पर्यार्थः॥ पराशरमाधवीयेअष्टमाध्यायेपरिषत्प्र
करणे ॥नामधारकविप्रस्वरूपलक्षणे॥सावित्र्याश्चापिगायत्र्या इत्येतच्छ्लोकव्याख्याने॥अंगिराः॥जन्म
शारीरविद्याभिराचारेणश्रुतेनच॥धर्मेणचयथोक्तेनब्राम्हणत्वंविधीयतइति॥ अस्यव्याख्यानं ॥जन्मे
तिजन्मविशिष्टमातापितृकुलशीलानूचानादिवंशजन्यत्वेनसत्कुलप्रसूतत्वंशारीरं॥गर्भाधानपुंसवनजा
तकर्मनामकरणअन्नप्राशनचौलोपनयनादिसंस्कारविशिष्टत्वंविद्याभिःवेदवेदांतमीमांसाधर्मशास्त्रज्ञा
नैःविशिष्टत्वंआचारेणशास्त्रोक्तानुष्ठानेनविशिष्टत्वंश्रुतेनव्याकरणआन्वीक्षिक्यादिवेदांगोपांगशास्त्रज्ञा
नविशि।ष्टत्वं॥यथोक्तेनशास्त्रविधानोक्तप्रकारेणधर्मेणधर्मानुष्ठानविशिष्टत्वंचकारात्॥अनुक्तशिष्टलक्ष
णत्वंलक्ष्यते॥एताहृशसर्वधर्मविशिष्टत्वमेवब्राम्हण्यशब्देनलक्ष्यतइत्यभिप्रायः॥ तत्रैवपराशरमूलं ॥
चित्रकर्मयथानेकैरंगैरुन्मील्यतेशनैः॥ब्राम्हण्यमपितद्वत्स्यात्संस्कारैर्मंत्रपूर्वकैः॥१९॥ अस्यव्याख्यानं॥

ननु नामधारकः षंडादिवदफलश्चेत्तर्हि संस्कारैरपि तस्य कोतिशयः स्यात्॥ नहि स्वदारसहस्रेणापि षंडः प्र
जनइतुं प्रभवतीत्याशंक्य दृष्टांतेन संस्कारकृतोत्कर्षं संभावयति॥ चित्रकर्मेति॥ चित्रकारः प्रथमपदादौ म
षिरेखाभिः सर्वावयवाभिः संपूर्णादि मनुष्यादिरूपाणि लिखति॥ नचतानि तावता दर्शनीयत्वमापद्यंते॥ पु
नस्तान्येव रूपाणि नानाविधवर्णप्रक्षेपेणोन्मीलितानि दर्शनीयतामापद्यंते॥ एवं जातिब्राम्हणः शास्त्रीयसं
स्कारैरुत्कृष्यते॥ मंत्रसंस्कारेण विद्यादयो प्युपलक्ष्यंते॥ अतएवांगिराः॥ जन्मशारीरइत्यादि श्लोकः॥ जन्म
शारीरइत्यादिना॥ पूर्वोक्तश्लोकव्याख्यानादेव गतार्थः॥ चित्रकर्मयथानेकैरिति अंगिरोवचनमपि॥ गतार्थ
मेव॥ पराशरमाधवीयेपरिषत्प्रकरणे ॥ येपठंति द्विजावेदमिति मूलश्लोकव्याख्यानेमनुवचनं॥
वेदाभ्यासोन्वहं शक्त्या पंचयज्ञक्रिया क्षमा॥ नाशयंत्याशुपापानि महापातकजान्यपि॥ वेदाभ्यासइ
ति॥ अन्वहं प्रतिदिनमित्यर्थः॥ वेदाभ्यासः ब्रम्हयज्ञरूपवेदपठणं शक्त्येति॥ यथासंभवं पंचयज्ञक्रि

प्र-शा॰
१७६

याः वैश्वदेवादयः॥ यद्यपि ब्रह्मस्तस्य पंचयज्ञांतर्भूतत्वं तथापि पृथग्ग्रहणं प्राधान्यद्योतनार्थं॥ ब्रा
म्हणा आगताः वसिष्ठोप्यागत इति वत्॥ ब्राम्हण परिव्राजक न्यायवच्च क्षमा अपकारिणि प्रत्यपकार
चिकीर्षाभावः एतानि आशु शीघ्रं पापानि नाशयंति महापातकजान्यपीति किमुत॥ उपपातका
दीनि इति तात्पर्यं॥ एतस्मिन्नेव एतच्छ्लोक व्याख्याने॥ मनुवचनं॥ यथैधस्तेजसा वन्हिः प्राप्तं
निर्दहति क्षणात्॥ तथा ज्ञानकृतं पापं कृत्स्नं दहति वेदविदिति॥ यथेति दृष्टांतः॥ अग्निः प्राप्तं स्व
संबद्धं एधः काष्ठं॥ क्षणात् शीघ्रं निर्दहति॥ निःशेषं दहति॥ तेजसा स्वनिष्ठदाहकशक्त्या तथैव वे
दवित् वेदार्थं धर्मब्रम्हरूपं वेत्ति जानातीति वेदवित्॥ अज्ञानकृतं कृत्स्नं॥ साकल्येन पापजातं निर्द
हतीति नितरां निःशेषं दहतीत्यर्थः॥ एतस्मिन्नेव एतत्॥ श्लोकव्याख्याने मनुवचनं॥ यथा जातबलो
वन्हिर्दहत्यार्द्रानपि द्रुमान्॥ तथा दहति वेदज्ञः कर्मजं दोषमात्मन इति॥ यथा जातबलः प्रभूतप्र

नि॰

काशौष्ठ्यअवयव. वृत्थिगुणवान् अग्निः आर्द्रानपिद्रुमान् दहति अपिशब्दात्॥शुष्क वृक्षं दहने अ
ग्नेः सामर्थ्यं किमु वक्तव्यमिति॥केमुतिकन्यायः प्रदर्शितः॥एतत् अपिशब्दग्रहणं दार्ष्टान्तिकीभू
तआत्मनः प्राप्त कायिक वाचिक मानसिकजन्य कर्मजं पापं॥वेदज्ञः वेदार्थज्ञः अर्थानुष्ठानं पूर्वकआ
त्मज्ञ इत्यभिप्रायः॥सर्वं दहतीति किमु वक्तव्यमिति। प्रदर्शनार्थं दोषमिति सामान्येन प्रयोगात्॥सर्वं
दोषमिति तात्पर्यं॥ पराशरमाधवीये प्रायश्चित्तकांडे अष्टमाध्याये परिषत्प्रकरणे ॥संप्रणीत
स्मशानेषु इत्येतच्छ्लोक व्याख्याने मनुवचनं॥ प्रतिगृह्याप्रतिग्राह्यं भुक्त्वाचान्नं विगर्हितं॥जपंस्तर
त्समंदीयं पूयतेमानवस्त्र्यहात्॥ अप्रतिग्राह्यं निषिद्धं तुलापुरुषादिद्रव्यं॥चंडालकर्तृकादिदेयं वा
विज्ञानेश्वरीये प्रथमाध्याये आचारकांडे ॥इज्याचारदमाहिंसादानस्वाध्यायकर्मणां॥अयंतु पर
मोधर्मोयद्योगेनात्मदर्शनं॥ ६॥ अस्यव्याख्यानं ॥देशादिकारकहेतूनामपवादमाह्

इज्येति॥ इज्यादीनां कर्मणामयमेव परमो धर्मः॥ यद्योगेन बाह्यचित्तवृत्तिनिरोधेनात्मदर्शनं याथा
तथ्यज्ञानं योगेनात्मज्ञाने देशादिनियमो नास्तीत्यर्थः॥ तदुक्तं यत्रैकाग्रता तत्राविशेषादिति॥ १॥
मनुस्मृतौ प्रथमाध्याये॥ भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुध्दिजीविनः॥ बुध्दिमत्सु नराः श्रेष्ठा नरेषु
ब्राम्हणास्मृताः॥ ९६॥ अस्यव्याख्यानं ॥ भूतानामिति॥ भूतारब्धानां स्थावरजंगमानां मध्ये
प्राणिनः उच्छासनिश्वासरूपप्राणवंतः कीटादयः श्रेष्ठाः॥ कदाचित्सुखलेशात्तेषामपि बुध्दिजीविनः
सार्थनिरर्थदेशोपसर्पणा सर्पणकारिणः पश्चादयस्तेभ्योपि मनुष्याः प्रकृष्टज्ञानसंबंधात्तेभ्योपि ब्राम्ह
णाः सर्वपूज्यत्वात्॥ अपवर्गाधिकारयोग्यत्वाच्च॥ ९६॥ अस्मिन्नेव मनुस्मृतौ अस्मिन्नेवाध्याये ॥
ब्राम्हणेषु च विद्वांसः विद्वत्सु कृतबुध्दयः॥ कृतबुध्दिषु कर्तारः कर्तृषु ब्रम्हवेदिनः॥ ९७॥ अस्यव्याख्यानं
ब्राम्हणेषु चेति॥ ब्राम्हणेषु तु मध्ये विद्वांसो महाफलज्योतिष्टोमादिकर्माधिकारित्वात्तेभ्योपि कृतबुध्दयः

अनागतेपिकृतं मयेतिबुद्धिर्येषां शास्त्रोक्तानुष्ठानेषू सन्नकर्तव्यताबुद्ध्य इत्यर्थः॥ तेभ्योपिअनुष्ठातारः हि
ताहितप्राप्तपरिहारभागित्वात्॥ तेभ्योपिब्रम्हविदः मोक्षलाभात्॥ ९७॥ अस्मिन्नेवमनुस्मृतौ षष्ठाध्याये
ध्यानिकं सर्वमेवैतद्यदेतदभिशब्दितं॥ नह्यनध्यात्मवित्कश्चित्क्रियाफलमुपाश्नुते॥ ८२॥ अस्यव्याख्या
नं॥ ध्यानिकमिति॥ यदेतदित्यात्मतंतसन्निधानं पूर्वश्लोकोदितं परामृश्यते॥ यदेतदुक्तं पुत्रादिममत्वत्या
गोमानावमानादिहानिब्रम्हण्येवावस्थानं सर्वमेवैतत् ध्यानिकं॥ आत्मनः परमात्मत्वेन ध्याने सतिभव
ति॥ यदाआत्मानं परमात्मे तिजानातितदा॥ सर्वसत्वान्नविशिष्यते॥ तस्यकुत्रचिन्ममत्वं॥ मानावमाना
दिकं वाभवति तथाविधज्ञानात् ब्रम्हात्मत्वंचजायते॥ ध्यानिकविशेषात्॥ ध्येयविशेषाभावे परमात्मध्या
नार्थमाह॥ नह्यनध्यात्मविदितियस्मादात्मानं जीवमधिकृत्ययदुक्तं तस्य परमात्मत्वं तद्योनजानाति॥ नध्या
यति॥ नप्रकृतध्यानक्रियाफलं ममत्वत्यागमानावमानादिहानिं मोक्षंचनप्राप्नोति॥ ८२॥ अस्मिन्नेवमनु

स्मृतौ द्वादशाध्याये। वेदशास्त्रार्थतत्वज्ञो यत्र तत्राश्रमे वसन्॥ इहैव लोके तिष्ठन् स ब्रम्हभूयाय कल्पते॥ १०१॥
अस्य व्याख्यानं ॥ वेदेति॥ यस्तत्वतो वेदं तदर्थं च कर्म वेदात्मकं जानाति॥ स नित्य नैमित्तिक कर्मानुगृही
तब्रम्हज्ञानेन ब्रम्हचर्याद्याश्रमावस्थितः॥ अस्मिन्नेव लोके तिष्ठन् ब्रम्हत्वाय कल्पते॥ १०२॥ अस्मिन्नेव म
नुस्मृतौ अस्मिन्नेवाध्याये ॥ अज्ञेभ्यो ग्रंथिनः श्रेष्ठा ग्रंथिभ्यो धारिणो वराः॥ धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो॥
व्यवसायिनः॥ १०३॥ अस्य व्याख्यानं ॥ अज्ञेभ्य इति॥ उभयोः प्रशस्यत्वे सति॥ अन्यतरातिशयविवक्षायां॥
श्रेष्ठ इति॥ इष्टिनो विधानात् ईषदध्ययन ज्ञाः तेभ्यो ग्रंथाध्येतारः श्रेष्ठाः अधीतग्रंथ धारणसमर्थाः श्रेष्ठाः ते
न ग्रंथिनः पठित विस्मृतग्रंथा बोध्यव्याः॥ अर्थविज्ञः अधीतग्रंथार्थज्ञाः प्रकृष्टाः तेभ्यः अनुष्ठातारः॥ १०३॥ अ
स्मिन्नेवाध्याये ॥ तपो विद्या च विप्रस्य निःश्रेयसकरं परं॥ तपसा किल्बिषं हंति विद्ययामृतमश्नुते॥ १०४॥
अस्य व्याख्यानं ॥ तप इति॥ तपः स्वधर्मवृत्तित्वमिति तावद्दर्शनात्॥ आश्रमविहितं कर्म॥ आत्मज्ञानं च॥

ब्राम्हणस्यमोक्षसाधनंतत्रतपस्तःअवांतरव्यापारमाह॥तपसापापमपहंति॥ब्रम्हज्ञानेनमोक्षमाप्नोति॥
तथाचश्रुतिः॥विद्यांचाविद्यांचयस्तद्वेदोभयꣳसह॥अविद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुते॥विद्यातोन्यद
विद्याकर्ममृत्युर्दुःखसाधनत्वान्मृत्युःपापंश्रुत्यर्थएवायंमनुनाव्याख्यायोक्तः॥१०४॥ अस्मिन्नेवाध्याये
एतद्वोभिहितंसर्वंनिश्रेयसकरंपरं॥अस्मादप्रच्युतोविप्रःप्राप्नोतिपरमांगतिं॥११६॥ अस्यव्याख्यानं॥
एतदिति॥एतंनिश्रेयससाधकंप्रकृष्टं॥धर्मादिकंसर्वंयुष्माकमभिहितं॥एतदनुतिष्ठन्ब्राम्हणादिःपरमां
गतिंस्वर्गापवर्गरूपांप्राप्नोति॥११६॥ अस्मिन्नेवाध्याये सर्वमात्मनिसंपश्येत्सच्चासच्चसमाहितः॥सर्वं
ह्यात्मनिसंपश्यन्नाधर्मेकुरुतेमनः॥११८॥ अस्यव्याख्यानं ॥सर्वमिति॥सद्भावमसद्भावंचैवंसर्वंब्राम्ह
णोजानन्ब्रम्हस्वरूपमात्मन्युपस्थितंतदात्मकमनन्यमनाःध्यानप्रकर्षेणसाक्षात्कुर्यात्॥यस्मात्सर्वमात्मत्वेन
पश्यन्रागद्वेषाभावात्॥अधर्मेमनोनकुरुते॥एतदेवस्पष्टयति॥११८॥ अस्मिन्नेवाध्याये ॥एवंसभगवा

न्देवोलोकानांहितकाम्यया॥ धर्मस्यपरमंगुह्यंममेदंसर्वमुक्तवान्॥११७॥ अस्यव्याख्यानं ॥एवमिति॥स
भगवान्ऐश्वर्यादिसंयुक्तोद्योतनाद्देवोमनुरुक्तप्रकारेणइदंसर्वंधर्मस्यपरमार्थंशिश्रूषुशिष्येभ्यः॥अगोपनीयं
लोकहितेछयाममेदंसर्वमुक्तवानितिभृगुर्महर्षीनाह॥एवमुपसंहृत्यमहर्षीणांहितायउक्तमपिआत्मज्ञानं
प्रकृष्टमोक्षोपकारकतयापृथक्कृत्याह॥११७॥ अस्मिन्नेवाध्याये आत्मैवदेवताःसर्वाःसर्वमात्मन्यवस्थि
तं॥आत्माहिजनयत्येषांकर्मयोगंशरीरिणां॥११९॥ अस्यव्याख्यानं आत्मेति॥इंद्राद्याःसर्वदेवताःपर
मात्मैवसर्वात्मत्वात्॥परमात्मनःसर्वजगदात्मन्येवावस्थितंपरमात्मपरिणामत्वात्॥हिरवधारणेर्थेपरमा
त्मैवैषांक्षेत्रज्ञादीनांकर्मसंबंधंजनयति॥तथाचश्रुतिः॥एषह्येवसाधुकर्मकारयति॥यमूर्ध्वंनिनीषतिए
षह्येवासाधुकर्मकारयतियमधोनिनीषतीति॥इदानींवक्ष्यमाणब्रह्मध्यानविशेषोपयोगतयादेहिकाका
शादिषुबाह्याकाशादीनांलयमाह॥११९॥ गोतमधर्मसूत्रेप्रथमाध्यायेनवमखंडे॥ सत्यधर्मार्यवृत्तःशि

ष्टोध्यापकः शौचविशिष्टः श्रुतिनिरतस्यान्नित्यमहिंस्रुः मृदुदृढकारीदमदानशील एवमाचारो मातापितरौ पूर्वपरान् संबंधान् दुरितेभ्यो मोक्षयिष्यन् स्नातकः शश्वद्ब्रह्मलोकान्न च्यवते न च्यवते॥ तस्य मस्करीयं भाष्यं सत्यधर्म इति॥ सत्यं अवध्याहिंसागोचरं यथार्थभाषणं धर्मः शास्त्रोक्तानुष्ठानं॥ आर्यवृत्तः आर्याः श्रेष्ठाः तेषां वृत्तं चत्तानि सत्यधर्मो र्यवृत्तानि यस्य सः सत्यधर्मार्यवृत्तः तत्स्वभाव मिति यावत्॥ शिष्टः आर्यस्वभावः अध्यापकः शिष्येभ्यः वेदशास्त्राद्युपदेष्टा वक्ष्यमाणशिष्टलक्षणवान्॥ शौचविशिष्टः॥ शौचं हि द्विविधं प्रोक्तं बाह्यमाभ्यंतरं तथा॥ मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथांतरमित्युक्तलक्षणशौचविशिष्टः भावशुद्धिः क्रोधासूयाहंकारादिदोषरहितत्वेन अंतःकरणशुद्धिः॥ श्रुतिनिरतः॥ वेदवेदांताद्यर्थविचारैकनिष्ठः॥ नित्यमहिंस्रः नित्यं सर्वदा अहिंस्रः शास्त्राविहितहिंसारहितः॥ मृदुदृढकारी इतरबाधकानुत्पादनेन दृढसत्कारीत्यर्थः॥ दमः दानशीलः॥ दमश्च दानं च॥ दमदाने॥ त एव शीलं स्वभावः यस्य दमदानशीलः दमः बा

स्येंद्रियनिग्रहः॥दानंदेशकालपात्रकालोचितद्रव्यत्यागः एवमाचारः॥एतादृश आचारवान्॥मातापि
तरौ स्वमातापितरौ पूर्वापरान् संबंधान्॥स्वस्मात्पूर्वसंबंधान् पितृपितामहप्रपितामहप्रभृतीन् अप
रसंबंधान्पुत्रपौत्रादिस्ववश्यान्दुरितेभ्यो मोक्षयिष्यन्॥पापसंबंधराहित्यं करिष्यन् स्नातकः स्नातक
त्वोपलक्षितगृहस्थाश्रमी॥शाश्वदिति॥शाश्वत्सौनःशुन्ये इति प्रमाणात्॥शाश्वदिति ब्रंम्हलोकविशेषणं॥
शाश्वतब्रम्हलोकादित्यभिप्रायः॥ब्रम्हलोकात्सगुणब्रम्हस्थानात्॥हिरण्यगर्भ संनिधानप्राप्तेः॥नच्य
वते च्युतो नभवति॥नपुनरावर्तत इत्यर्थः॥नच्यवत इति द्विरभ्यासः॥खंडसमाप्तिद्योतनार्थः॥श्रुतिनि
रतस्यादित्यत्र स्थितस्याच्छब्दार्थः॥सर्वत्र प्रत्येकं॥स्नातकशब्दार्थविशेषणीभूतप्रथमांतपदार्थैः सह
संबध्यते तद्यथा॥सत्यधर्मार्यवृत्तः॥स्याद्यदिशिष्टस्याद्यदि अध्यापकः स्याद्यदि सह स्नातकः॥ब्रम्ह
लोकान्नच्यवते॥इति संबध्यते॥ एवं उत्तरत्रापि सर्वत्राप्यूह्यं॥एवं ब्राम्हणस्वरूपस्यमुख्य ब्राम्हणत्व

स्यब्रम्हवित्वलक्षणस्य॥ गौणब्राम्हण्यस्यवेदवित्वलक्षणस्यप्रतिपादितत्वेनतद्वतोब्राम्हणस्यपरिष-
त्वविष्टत्वेपिधर्मवक्तृत्वेपिगर्हिताशनगर्हितप्रतिग्रहादिव्यवहारेपिनदोषः॥इत्याद्यर्थस्यप्रतिपादितत्वा
त्॥एतादृशपुरुषाणांधर्मसंशयेनिर्णेतृत्वंसंभवति॥नान्येषांएतद्ब्राम्हण्यलक्षणगुणरहितानांकोटिगुणि
तानामपिब्राम्हणानांसंभवतीतिशास्त्रनिश्चयोवर्तते॥ अतएवविदुषामेवपरिषत्वनामकधर्मनिर्णे
तृत्वप्राप्तिद्वाराशिष्टत्वशिष्टत्वेनतदाचारस्यैवप्रामाण्यप्राप्त्या अन्येषांबहुकोटिगुणितानांअविवेकिनांशा
स्त्रविरुद्धानुष्ठातॄणांशास्त्रार्थानभिज्ञानां॥आचारःअप्रामाणिकएवेति॥स्थापयितुंमनुपराशरआपस्तं
बबोधायनगौतमादिवचनानिमन्वादिस्मृतिव्याख्यानेषुमेधातिथ्यादिषुमाधवीयादिषुचउदाहरिष्यंति।
तथाहि॥पराशरमाधवीयेअष्टमाध्यायेप्रायश्चित्तकांडेपरिषत्प्रकरणे॥ पराशरमूलं॥प्रमाणमार्गंमा
र्गंतोयेधर्मंप्रवदंतिवै॥तेषामुद्विजतेपापंसद्भूतगुणवादिनां॥ ३॥ अस्यव्याख्यानं ॥सत्यपित्रिचतु

र्णौ परस्परसंवादे विप्रकीर्णेष्वनेकेषु धर्मशास्त्रेषु क्वापि कस्यचिद्विशेषस्य संभवात्प्रायश्चित्तनिर्देशवेलायां
पुनःशास्त्राणि पर्यालोच्यैव निर्देष्टव्यमित्याह प्रमाणेति ॥ प्रमाणमार्गो धर्मशास्त्रतात्पर्यं ॥ तस्य मार्गः न्याये
न निष्कर्षः ॥ तं कुर्वंत एव ये धर्मं प्रवदंति तेभ्यः पापमुद्विजते ॥ नाशयोग्यतामापद्यत इति यावत् तत्र हेतुस्स
द्भूतेति ॥ सद्भूतः सत्यभूतः अन्यथाभावमप्राप्तः परस्परसंवादेनानवधानादिदोषाभावात्पुनःशास्त्रपर्यालो
चनेन निगूढरहस्यावगमाच्च ॥ गुणो धर्मः श्रेयोहेतुत्वात्तादृशधर्मवादित्वात्तेभ्यः पापस्योद्वेगो युक्तः परस्पर
संवादः पुनर्धर्मशास्त्रपाठश्चांगिरसा दर्शितः ॥ तस्मिन्नुत्पादिते पापे यथावद्धर्मपाठकाः ॥ ते तथा तत्र ज
ल्पेयुर्विमृशंतः परस्परमिति ॥ पापे पापकारिणि पुरुषे ॥ १२ ॥ पराशरमूलं ॥ मुनीनामात्मविद्यानां द्वि
जानां यज्ञयाजिनां ॥ वेदव्रतेषु स्नातानामेकोपि परिषद्भवेत् ॥ १३ ॥ पराशरमूलं ॥ चत्वारो वा त्रयो
वापि वेदवंतोग्निहोत्रिणः ॥ ब्राह्मणानां समर्था ये परिषत्साभिधीयते ॥ ११ ॥ अनाहिताग्नयो ये च वेदवेदां

गपारगाः॥ पंचत्रयो वा धर्मज्ञाः परिषत्सा प्रकीर्तिता॥ १३॥ पंच पूर्वं मया प्रोक्तास्तेषां चासंभवे त्रयः॥ स्ववृ
त्तिपरितुष्टा ये परिषत्सा प्रकीर्तिता॥ १४॥ अस्य व्याख्यानं ॥ अथ मुख्यानुकल्पभेदेन परिषद्भेदानाह
चत्वार इत्यादिना॥ ग्राममध्ये वर्तमानानां वेदविद्यादिगुणयुक्तानां ब्राह्मणानां मध्ये ये अत्यंत समर्थाः ते च
त्वारो मुख्यपरिषत्॥ तदसंभवे त्रयो वा परिषत्वेन ग्राह्याः एतस्य श्लोकद्वयमाहिताग्निष्वभिहितं॥ तदसंभवे अना
हिताग्नयः॥ तत्रापि पंचेति मुख्यः कल्पः॥ त्रय इत्यनुकल्पः तत्रापि॥ पक्षद्वयासंभवे सत्येक एव परिषद्भवेत्
तदेकं विशिष्टं मुनीनामित्याद्युक्तं॥ आत्मनि ब्रह्मणि विद्यानुभवो येषां ते आत्मविद्याः तथाविधाः कृतकृत्याः
संतोपि लोकानुग्रहाय यज्ञैरिष्टवंतो यज्ञयाजिनः वेदानामृगादीनां चतुर्णामध्ययनाथानुष्ठितानि तत्तद्वेदो
क्तानि व्रतानि तत्तद्व्रतसहितेषु वेदेषु समाप्तेषु यथाविधि स्नाताः शिरोव्रतेन स्नातानामिति वा पाठः॥ आथर्व
णिकानां वेदव्रतेषु मुख्यं शिरोव्रतं तथा चाथर्वणिका आमनंति क्रियावंतः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयंतः तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णमिति

कर्षिश्चाध्ययंतस्तेषामेवैतां ब्रम्हविद्यां वदेत शिरोव्रतं विधिवद्यैस्तुचीर्णमिति॥ तस्मिन् शिरोव्रते सत्यनंतरमध्य
यनं परिसमाप्य यथाविधि स्नातास्तेषामेतेषां यथोक्तगुणसंपन्नानां मध्ये यः कोप्येकः परिषद्भवेत्॥ तत्र साग्निका
नामनग्निकानां द्वौ द्वौ पक्षौ आत्मविदेकः पक्ष इति॥ पंचपक्षा मया प्रोक्तास्तेषां सर्वेषामसंभवे ये केचन विद्यमानाः
॥ श्रेष्ठास्त्रयः ते यद्यायुधजीवनाद्यधर्मवृत्तिमनुपजीव्य यथासंभववृत्तिमात्रेण परितुष्टास्तेषामपि परिषत्वम
विरुद्धं॥ अंगिरसापि परिषद्विकल्पो दर्शितः॥ चत्वारो वा त्रयो वापि वेदवंतोग्निहोत्रिणः॥ ये सम्यक् नियता
विप्राः कार्याकार्यविनिश्चिता इति॥ चत्वार इति॥ सम्यक् नियता इति॥ सम्यक् शास्त्रोक्तप्रकारेण नियताः
नियमविशिष्टाः कार्याकार्यविनिश्चिता इति॥ कार्यंच॥ अकार्यंच कार्याकार्ये॥ ते विनिश्चिते यैस्ते
कार्याकार्यविनिश्चिताः शास्त्रतात्पर्यविषयकार्याकार्यविवेकज्ञानवंत इत्यर्थः॥ प्रायश्चित्तप्रणेतारः सप्त तेपि प्र
कीर्तिताः॥ एकविंशतिभिश्चान्यैः परिषत्वं समागतैः॥ इति अन्यैः॥ शास्त्रज्ञैः परिषत्वं प्राप्तैः एकविंशतिसंख्या

केः सहस्रसंख्याकाः पूर्वोक्ताः तस्माद् दशाश्च धर्मशास्त्रज्ञाः ब्राम्हणाः प्रायश्चित्तनिर्णयकर्तारः ते पि भवंतीति
शेषः॥ सावित्रीमात्रसारैस्तु चीर्णवेदव्रतैर्द्विजैः॥ इति ॥ सावित्रीमात्रसारैरिति॥ सावित्रीगायत्रीमात्रसारैः तन्मात्रप्र
धानैः उपनयनगायत्रीमात्रजपपरैरित्यर्थः॥ गायत्री व्यतिरेकेण वेदाध्ययनरहितैरिति यावत् ब्राम्हणेन ब्राम्ह
ण्यामुत्पन्नो जात इत्यभिधीयते॥ उपनयनमात्रो व्रतानुचारी किंचिद्वेदमधीत्य ब्राम्हणः इति बोधायनधर्मसू
त्रात्॥ चीर्णवेदव्रतैरिति॥ चरितवेदव्रतैरित्यर्थः॥ वेदव्रतानि तु आग्नेयसौम्यप्राजापत्यवैश्वदेवादीनि तत्त
च्छाखागृह्यसूत्रोक्तानि अत एव कात्यायनः॥ त्रयः स्नातका भवंति विद्यास्नातको व्रतस्नातको विद्याव्रतस्ना
तक इति॥ समाप्य वेदमसमाप्य व्रतं यः समावर्तते स विद्यास्नातक इति॥ समाप्य व्रतमसमाप्य वेदं यः स
मावर्तते स व्रतस्नातकः॥ समाप्य वेदं समाप्य व्रतमुभयं यः समावर्तते स विद्याव्रतस्नातक इति॥ तेषां म
ध्ये ये ते उक्ताः व्रतस्नातकाः॥ अत्रस्थ द्विजशब्दः ब्राम्हणलक्ष्यकः क्षत्रियादीनां परिषत्वासंभवात्॥ एते

प्र.शा.
१६६

षा ब्राम्हणत्वं तु आपस्तंबधर्मसूत्रे श्रौतप्रायश्चित्तविधायकश्रीनिवासदीक्षितीयादौ च॥ यस्य पिता-
पितामहावनुपेतौ स्यातामिति॥ आपस्तंबसूत्रस्वारस्यात् गायत्र्या अपि वेदत्वेन तन्मात्राध्ययनादपि
ब्राम्हणत्वसिद्धेः स्पष्टीकृतत्वाच्च॥ तेषां परिषत्वं कथं स्यादित्याकांक्षायां एतैः सह पूर्ववचनोक्ता स्तेसप्त
संख्याकाः प्रायश्चित्तप्रणेतारः भवंतीत्यभिप्रायः॥ अत्रस्थतुशब्दः चकारार्थः॥ एतैः समुच्चिनोति॥ अ-
न्यथासावित्रीमात्रसारैरिति॥ तृतीयांतपदैः श्लोकार्धेन च॥ कर्तृकर्मक्रियादि अन्वयाभावेन अर्थाभा-
वप्रसंगः दुरुत्थरएव॥ यतीनामात्मविद्यानां ध्यायिनामात्मयाजिनां॥ शिरोव्रतैश्च स्नातानामेकोपि
परिषद्भवेत्॥ यतीनामिति॥ यत्नशीलानामित्यर्थः॥ यती प्रयत्न इति धातोः॥ यतता मपि॥ सिद्धाना-
मिति गीताप्रयोगदर्शनात् आत्मज्ञानादौ यत्नशीलानामित्यभिप्रायः॥ अन्यथा संन्यासिपरत्वे संन्यासि-
नां परिषत्वासंभवः प्राप्यते परिषत्सकरणे क्कुत्रापि संन्यासिनः परिषत्वानभिधानात्॥ प्रस्तुत मनुस्मृतौ॥

नि॰

यतिधर्मप्रकरणेषष्ठाध्याये॥ नचोत्पातनिमित्ताभ्यांननक्षत्रांगविद्यया॥ नानुशासनवादाभ्यां भिक्षां लि-
प्सेतकर्हिचित्॥ इतिधर्मोपदेशस्ययतेःनिंदित्वाच्च॥ आत्मविद्यानांब्रम्हज्ञानवतांध्यायिनांआत्मध्यानप
राणांआत्मयाजिनां॥ ब्रम्हार्पणंब्रम्हहविःब्रम्हाग्नाविति न्यायेन सर्वत्रब्रम्हबुध्यायागंकुर्वतां॥ तथाच
मनुस्मृतौ सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि॥ समंपश्यन्नात्मयाजीस्वाराज्यमधिगच्छतीत्यत्र॥ आत्म
याजीतिपदस्यब्रम्हार्पणन्यायेनयागःआत्मयागइति मेधातिथ्यादिभिःव्याख्यातत्वात्‌शिरोव्रतैरितिआ
थर्वणिकानांगृह्यसूत्रप्रसिद्धशिरस्यग्निधारणादिरूपव्रताचरणवतामित्यर्थः॥ येषांलाघवकार्येषुम
ध्यमेषुतुमध्यमाः॥ महापातकचिंतासुशतशोभूयएवचेति॥ येषामिति येषांकार्याणांमध्येलाघवकार्येषु
प्रायश्चित्तादिषुधर्मोपदेशादिषुच॥ लघुतरकार्येषुअल्पदोषवत्सुअल्पसंख्याकाःब्राम्हणाएवपरिषद्भ
वेत्॥ एवंमध्यमेषुदोषापादकमध्यमकार्येषुमध्यमसंख्याकाःब्राम्हणाःपरिषत्॥ महापातकादिम

हाद्दोषविशिष्टकार्यविषयकविचारनिर्णयेषुशतशोभूयएवचेति॥शतशःसहस्रशःअतोपिभूयःबहुसं
ख्याकाःब्राम्हणाःपरिषद्भवेयुरितितात्पर्यार्थः॥ बृहस्पतिरपि॥लोकवेदांगधर्मज्ञाःसप्तपंचत्रयोपि
वा॥यत्रोपविष्टाविप्रास्युःसायज्ञसदृशीसभेति॥ लोकवेदांगइति॥लोकश्चवेदाश्चअंगानिच॥लोक
वेदांगानितेषांसंबंधीयोधर्मःतैःप्रतिपाद्योयःसधर्मइत्यर्थः॥ तद्यथालोकधर्मःलोकाविरुद्धधर्मइत्य
र्थः॥लोकस्तुभुवनेजनइतिप्रमाणात्॥लोकशब्देनजनाएव॥अत्रउच्यंते॥ जनाविरुद्धोधर्मइति॥या
वत्॥तथाचयाज्ञवल्क्यः॥अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नत्विति॥शास्त्रेणधर्मादनपेतमपि॥अस्वर्ग्यं
स्वर्गसाधनंनभवति॥यत्तन्नाचरेत्सधर्मोनकिंतुलोकाविरुद्ध एवधर्मः॥मधुपर्कादिषुगोवधादिरूपध
र्मस्यशास्त्रविहितत्वेपिइदानींसर्वदेशेष्वपिआचाराभावात्॥अनाचारपराहतत्वात्कलियुगेगवालंबश्च
लगवादौ॥गोहननस्यनिषिद्धत्वाच्च॥लोकविरुद्धाभावस्यैवधर्मत्वंननु॥केवललोकाचारस्यैवप्रमाणत्वं

आयातमित्याशंक्याह॥ वेद इति लोकाचारस्य क्वचिद्देशे क्वचित्काले तथादृष्टत्वेपि॥ सर्वदेशसर्वकाला
दिषु व्याप्तः वेदोदितो धर्मः तदविरुद्धस्य तथैव लोकधर्मस्य प्रामाण्यं नतु वेदविरुद्धस्य प्रामाण्यं॥ यदा कदा
वा न संभवतीति॥ तस्य मनुपराशरयाज्ञवल्क्यादिस्मृतिकारैः॥ आपस्तंबबोधायनगोतमादिसूत्रका
रैश्च प्रतिपदमेवोक्तत्वात्॥ वेदाविरुद्धलोकधर्मस्यैव प्रामाण्यमिति॥ एतद्वचनस्मृतिकर्तृबृहस्पतेस्तात्प
र्यं इति गम्यते अयमर्थः॥ धर्मं यो बाधते इति व्यासवचनव्याख्याने प्रपंचितः॥ वेदस्य तात्पर्यं सर्वैर्नज्ञायत इ-
त्याशंक्य अंगमित्याह॥ वेदांगानां तदुपलक्षितस्मृतीतिहासपुराणानां निरुक्तव्याकरणादीनां च वेदार्थप्रका
शकानां प्रमाणत्वांगीकारात् वेदार्थरूप अंगादिप्रतिपाद्यानामपि धर्मत्वं सिध्यतीत्यभिप्रायः॥ अत एव श्रुता
वपि॥ वाजेवाजे वत इत्याह॥ अन्नं वै वाजः इति॥ संहितामंत्रादिरूपवेदभागस्य ब्राम्हणरूपश्रुत्यैव॥ वाज
शब्दस्य भ्रांतेः॥ अन्यथार्थः क्रियते तन्माभूदित्यभिप्रायेण वाजशब्दस्य अन्नरूपार्थः कृतः॥ मनुरपि॥ इति

हासपुराणाभ्यांवेदंसमुपबृंहयदितिउक्तवान्॥ मनुष्यस्यअज्ञानभ्रांत्यादिदोषग्रस्तत्वात्॥ तैःवेदार्थःयथा
वन्नैवज्ञायते॥ इतिमनोरभिप्रायः॥ "धर्मेणाधिगतोयैस्तुवेदस्सपरिबृंहणः॥ शिष्टास्तदनुमानज्ञाःश्रुतिप्र
त्यक्षहेतवइति॥ बोधायनधर्मसूत्रे॥ इतिच॥ उक्तत्वाच्च॥ वेदतदंगस्मृतीतिहाससर्वदेशशिष्टाचारादिभिः॥ अ
विरुद्धएवधर्मः॥ इतिज्ञापनार्थमेव॥ लोकवेदांगधर्मज्ञइति॥ बृहस्पतिनोक्तं॥ अथवालोकज्ञःनीतिशास्त्रज्ञः
वेदज्ञःवेदार्थज्ञःअंगज्ञःअंगार्थज्ञःधर्मज्ञःधर्मशास्त्रज्ञइति॥ तएतेलोकवेदांगसर्वज्ञाःशेषंस्पष्टं॥ सप्तपंचत्रयो
पिवेतिपूर्वापूर्वसंख्याकब्राह्मणासंभवेअनुकल्पेनउत्तरोत्तरसंख्याकानामेवपरिषत्त्वंप्रतिपाद्यते॥ पराश
रमाधवीयेअष्टमाध्यायेपरिषत्प्रकरणे॥ संप्रणीतश्मशानेष्वपीतिएतच्छ्लोकव्याख्याने॥ मनुवचने॥ हत्वालो
कानपीमांस्त्रीनश्नंनपियतस्ततः॥ ऋग्वेदंधारयन्विप्रोनैनःप्राप्नोतिकिंचनेति॥ विप्रःब्राह्मणःऋग्वेदंधारयन्
ग्रंथतःअर्थतःतद्ज्ञानानुष्ठानतश्चस्थितिंप्राप्नुवन्त्रीन्लोकानपिहत्वापिहननंकुर्वन्नपिलोकस्तुभुवनेजनइ

तिप्रमाणात्॥ त्रिभुवनस्थजनानपीतियावत्॥ यतस्ततः अश्नन्नपिगर्हितान्नभोजनं कुर्वन्नपिच॥ एनः यत्किं
चित्पापमपिनप्राप्नोतीत्यर्थः॥ अस्मिन्नेवाध्यायेपराशरमूलं॥ येपठंतिद्विजावेदं पंचयज्ञरताश्चये॥ त्रैलोक्यं
तारयंत्येतेपंचेंद्रियरताअपि॥२१॥ अस्यव्याख्यानं ॥ ननुसंस्कृतानांबहूनामपिगृहीणांकथंपरिष
त्वंस्यान्नामधारकृचत्तेषामिंद्रियरतत्वादित्याशंकायांमाहायइति॥ वेदोहिनिखिलपापापनयनेसमर्थः॥
तथाचतैत्तिरीयब्राम्हणेवत्स्यादिपरंपरयाप्राप्तं पापंस्वाध्यायोपहंतीति॥ श्रूयते॥ अग्निर्वैजातंपाप्मानंजग्रा
हतंदेवाआहुतिभिःपाप्मानमपाघ्नन्नाहुतीनांयज्ञेनयज्ञस्यदक्षिणाभिर्दक्षिणानांब्राम्हणेनब्राम्हणस्यछं
दोभिःछंदसां स्वाध्यायेनापहतपाप्मास्वाध्यायोदेवपवित्रंवाएतदिति॥ मनुरपि ॥ वेदाभ्यासोन्वहं
शक्त्यापंचयज्ञक्रियाक्षमा॥ नाशयंत्याशुपापानिमहापातकजान्यपि॥ यथैधस्तेजसावन्हिःप्राप्तंनिर्दहति
क्षणात्॥ यथाज्ञानकृतंपापंकृत्स्नंदहतिवेदवित्॥ यथाजातबलोवन्हिर्दहत्यार्द्रानपिद्रुमान्॥ तथादहति

वेदज्ञः कर्मजं दोषमाप्नोति इति॥ येतु श्रद्धालवः संतः प्रज्ञामांद्यादिदोषेण पठितं वेदं धारयितुमसमर्थास्ते
पि पंचमहायज्ञानुष्ठानात् क्षीणपापा एव पंचमहायज्ञानां पापक्षयहेतुत्वं प्रथमाध्याये प्रपंचितं॥ अत
श्च पंचेंद्रियसक्तानामपि क्षीणपापत्वेन परिषत्त्वमविरुद्धं॥ २१॥ अस्मिन्नेवाध्याये परिषत्प्रकरणे
पराशरमूलं॥ संप्रणीतश्मशानेषु दीप्तोग्निः सर्वभक्षकः॥ एवं च वेदविद्विप्रः सर्वभक्षोहि दैवतं॥ २२॥
अस्य व्याख्यानं ॥ नन्वेवमपि पंचयज्ञादिभिः परिशुद्धेषु गृहीषु परकीयं पापमनुप्रविशति परान्नभो
जनादेस्तत्प्रापकत्वात्॥ दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति॥ अन्नादे भ्रूणहा मार्ष्टीत्यादि स्मरण
दित्यत आह॥ संप्रणीत इति॥ न ह्यग्निः श्मशाननीतशवादिभक्षणप्रयुक्तं दुःखं तावतादेवत्वं परित्यज
ति॥ एवं वेदविदो भूदेवस्य अभक्ष्यभोज्यादिदोषमात्रेण भूदेवत्वं नापयाति॥ एकैकस्य मंत्रस्याभक्ष्यभक्ष
णाद्यशेषदोषनिवर्तकत्वात्॥ तथा च मंत्रलिंगं॥ यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वा करिष्यन्

यद्देवानांचक्षुष्यागोअस्तियदेवकिंचप्रतिजग्राहमग्निर्मातस्मादनृणंकृणोतु॥यदन्नमद्मिबहुधावि
रूपं॥वासोहिरण्यमुतगामजाममविं॥यद्देवामित्यादि॥अनृतेनपरकीयादौस्वकीयत्वादिवचनेनदास्यन्
अनर्हेभ्योनष्टशौचादिभ्यःस्नेहानुबंधेनहव्यकव्ययोःप्रयच्छन्अतिथिभ्योयोग्येभ्यःअदास्यन्अप्रयच्छन्
करिष्यन्नन्नभक्षणव्यतिरिक्तमविहितंप्रतिषिद्धंवाकुर्वन्चक्षुष्यागःनग्नपरयोषिद्वेक्षणादितथादे
वानामागःविष्ण्वादिदेवंदृष्ट्वाप्यनमस्कारादि॰यदेवकिंचअश्वमहिषकालपुरुषाद्यप्रतिग्राह्यंयत्किंचि
त्प्रतिजग्राहंप्रतिगृहीतवानस्मि॥बहुधाविरूपंगणान्नगणिकान्नादिरूपेणानेकदोषयुक्तंयदन्नमद्मि
भक्षितवानस्मि॥यथोक्तात्सर्वस्माद्दोषजातान्मामनृणंपूतं॥अग्निःकरोत्विति मंत्रार्थः॥तथाचपवमान
सूक्तादिमहिमाभिधीयते॥कयदिक्रयायोनिदोषादभक्ष्यभोजनात्प्रतिग्रहाद्दसद्भोजनाच्चापिनृशंसंतत्पा
वमानीभिरहंपुनामीति॥तथासामगानेसामगाःपठंति॥अभोज्यभोजनेकृतेपंथाअधोदिवइतिसामगा

येदितिशेषः॥ मनुरपि॥ प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितं॥ जपंस्तरत्समंदीयं पूयते मानवस्त्र्य-
हात्॥ हत्वा लोकानपीमांस्त्रीनश्नन्नपि यतस्ततः॥ ऋग्वेदं धारयन्विप्रो नैनः प्राप्नोति किंचनेति॥ २२॥ ऋग्वेद
मंत्रमाहात्म्यं प्रतिपाद्यते॥ पराशरमूलं ॥ अमेध्यानि च सर्वाणि प्रक्षिप्यंते यथोदके॥ तथैव किल्बिषं स
र्वं प्रक्षिपेच्च द्विजोत्तमे॥ २३॥ अस्य व्याख्यानं ॥ ननूक्तरीत्या वेदविदः स्वकीयं पापमपनुदंतु नाम तथापि
त्रैलोक्यं तारयंत्येते इति यदुक्तं तत्कथमित्याशंक्य दृष्टांतेन तदुपपादयति॥ अमेध्यानीति॥ गंगादिजले स्ना
तुं प्रविष्टाः शरीरगतस्वेदादीन्यमेध्यानि प्रक्षिपंति नैतावता॥ तज्जलमपूतं भवति॥ प्रत्युत मलोपेतान् पुरुषा
न् मलापनयनेन पुनाति॥ एवं प्रायश्चित्ती स्वकीयमशेषं पापं वेदवित्सु प्रक्षिपति॥ तत्र प्रक्षेपणं नाम तदपन
यनाय तेषामग्रे निवेदनं ते च तदपनयनांगीकारमात्रेण न दूष्यंति॥ प्रत्युत तदपनयनसमर्थं शास्त्रीयमुपा
यमुपदिश्य पापिनमुद्धरंति तस्मात्तारयंति॥ इत्युपपन्नं॥ २३॥ पराशरमूलं ॥ धर्मशास्त्ररथारूढा वेदख

ड्गधरा द्विजाः॥ क्रीडार्थमपियंब्रूयुः सधर्मः परमस्मृतः॥ २८॥ अस्यव्याख्यानं ॥ ननुदुःशीलानांपरिष
त्त्वाभ्युपगमेधर्मेनिश्चितस्यप्रायश्चित्तस्यान्यथाभावःशक्यतइत्यतआह॥ धर्मशास्त्रेति॥ यथायुद्धार्थेरथमारु
ह्यखड्गंधृत्वागतस्ययोद्धुर्मुहूर्तमात्रंविलंबितोपियुद्धेखड्गचालनादिरूपायुद्धोचितैवलीलाप्रवर्तते॥ त
द्वत्खलुताद्देशादिरूपाद्यथात्वर्मशास्त्रवेदीयोनिपुणोब्राम्हणः इंद्रियपरवशोपिचिरंशास्त्रवासनावासितत्वा
त्क्रीडन्नपियथाशास्त्रमेवब्रूते॥ किमुवक्तव्यंबुद्धिपूर्वंपरिषद्युपविश्यअब्रुवन्विब्रुवन्वापिनरोभवतिकिल्बि
षीत्यादिशास्त्रंचावगत्यान्यथानब्रूतइति॥ २८॥ विज्ञानेश्वरीयेपिप्रथमाध्यायेआचारकांडे ॥ चत्वारोवे
दधर्मज्ञाःपरिषत्त्रैविद्यमेववा॥ साब्रूतेयंसधर्मस्यादेकोवाध्यात्मवित्तमः॥ ९॥ अस्यव्याख्यानं ॥ कारक
हेतुषुज्ञापकहेतुषुवासंदेहेहेतुनिर्णयहेतुमाह॥ चत्वारइति॥ चत्वारोब्राम्हणावेदधर्मशास्त्रज्ञाःपरिषत्॥ ति
स्रोविद्याअधीयंतइति॥ त्रैविद्यास्तेषांसमूहस्त्रैविद्यंधर्मशास्त्रज्ञत्वमत्राप्यनुवर्तते॥ तद्वापरिषत्॥ सापूर्वोक्ता

परिषद्यं ब्रूते स धर्मः अध्यात्मज्ञानिषु निपुणतमो वेदधर्मशास्त्रज्ञश्च यः॥ स एकोपि वा यं ब्रूते स धर्म एव॥९॥
मनुस्मृतौ द्वादशाध्याये॥ मनुमूलं ॥यथाजातबलो वह्निर्दहत्यार्द्रानपि द्रुमान्॥ तथा दहति वेदज्ञः कर्मजं दो
षमात्मनः॥१११॥ अस्य व्याख्यानं ॥यथेति॥ यथा प्रवृद्धोग्निरार्द्रानपि द्रुमान्दहत्येवं ग्रंथतोर्थतश्च वेदज्ञः प्र
तिषिद्धाद्याचरणादिकर्मजनितं पापमात्मनो नाशयति॥ एवं च न केवलं स्वर्गापवर्गादिहेतुः किंतु पापनिवृत्तिहे
तुरिति दर्शितः॥११२॥ मनुमूलं ॥दशावरा वा परिषद्यं धर्मं परिकल्पयेत्॥ त्र्यवरा वापि वृत्तस्था तं धर्मं न वि
चालयेत्॥११०॥ अस्य व्याख्यानं ॥दशेति॥ यदि बहवः संतः अवहिता न भवंति तदा दशावरा त्र्यवरा चेति
वक्ष्यमाणलक्षणं यस्याः सा परिषत् तदभावे त्रयो वरा यस्याः सा वा सदाचारा यं धर्मं निश्चिनुयात्॥ तं धर्मत्वेन स्वी
कुर्यात्॥ न विसंवदेत्॥११०॥ मनुमूलं ॥त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः॥ त्रयश्चाश्रमिणः पूर्वे परिष
त्स्याद्दशावरा॥१११॥ अस्य व्याख्यानं ॥त्रैविद्य इति॥ वेदत्रयसंबंधशाखात्रयाध्येतारः श्रुतिस्मृत्यविरु

स्थन्यायशास्त्रज्ञो मीमांसात्मकतर्कवित् निरुक्तज्ञो मानवादिशास्त्रवेदी ब्रम्हचारी गृहस्थवानप्रस्थइत्येहदशा

वरापरिषत् स्यात्॥११॥ मनुमूलं ॥ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च॥त्र्यवरापरिषद्ज्ञेया धर्मसंशयनि

र्णये॥११२॥ अस्यव्याख्यानं ॥ऋग्वेदविदिति॥ऋग्यजुःसामवेदशाखानां येअध्येतारः तदर्थज्ञाश्च त्रयःसा

धर्मसंदेहनिरासार्थं त्र्यवरापरिषद्बोद्धव्या तदभावे॥११२॥ एकोपिवेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः॥सविज्ञेयः

परोधर्मो नाज्ञानामुदितोयुतैः॥११३॥ अस्यव्याख्यानं ॥एकोपीति॥एकोपिवेदार्थधर्मज्ञो यं धर्मनिश्चिनु

यात्॥प्रकृष्टोधर्मःसबोद्धव्यः नवेदानभिज्ञानां दशभिः॥सहस्रैरप्युक्तः वेदविद्धब्दोयं वेदार्थधर्मज्ञपरः एतच्च श्रेष्ठो

पलक्षणं॥स्मृतिपुराणमीमांसान्यायशास्त्रज्ञोपि गुरुपरंपरोपदेशविदपि॥तथाश्लोकः॥केवलंशास्त्रमाश्रित्य नक

र्तव्योपिनिर्णयः॥युक्तिहीनविचारेतु धर्महानिःप्रजायते॥तेनबहुस्मृतिज्ञोपियदि सम्यक्प्रायश्चित्तादिधर्मंजाना

ति॥तदातेनाप्येकेन धर्मउक्तः प्रकृष्टोधर्मोज्ञेयः॥अतएवयमः॥श्लो॥एकोद्वौवात्रयोवापि यं ब्रूयुर्धर्मपाठकाः॥स

धर्मइतिविज्ञेयोनेतरेषांसहस्रशः॥११३॥ निगदव्याख्यानं ॥गोतममसूत्रेपिप्रथमाध्यायेनवमखंडे यच्चात्मवंतोवृद्धाःसम्यग्विनीतादंभलोभमोहवियुक्तावेदविदआचक्षतेतत्समाचरेदिति॥ अस्यार्थः॥यत्तु॥यत्।आत्मवंतः बुद्धिमंतः ज्ञानवंतइत्यर्थः॥वृद्धाः वयसाज्ञानेनचवृद्धाः॥सम्यग्विनीताः॥सम्यक् शास्त्रानुसारेणविनीताः नम्राः दंभः धर्मध्वजत्वं॥लोभः कार्पण्यं॥मोहः कार्याकार्यविवेकशून्यता॥एतैर्दुर्गुणैर्वियुक्ताः वेदविदः पूर्वोक्तरीत्यावेदार्थज्ञानिनः॥यत्कर्मआचक्षते॥तत्कर्मसमाचरेत्॥ तत्कर्मसमाचरेदिति॥सम्यगनुष्ठानंकुर्यादित्यर्थः॥ यच्चेत्यत्रस्थचकारात्॥अनुक्तमपिप्रायश्चित्तादिकंधर्मादिकंचसमाचरेदित्यभिप्रायः॥तस्मिन्नेवगोतमधर्मसूत्रेद्वितीयाध्यायेद्वादशसंख्याकखंडे ॥धर्मसंयुक्तेपुरुषशक्त्यपराधानुसंबंधविज्ञानाद्दंडनियोगोनुज्ञानंवा॥वेदवित्समवायवचनादिति॥ धर्मसंयुक्तेपुरुषेपापकर्मा नुष्ठानवति॥पापकारिपुरुषविषयेइत्यर्थः॥पुरुषशक्त्यपराधइत्यादिना॥पुरुषःस

सुरुषस्वरूपं लौकिकवैदिकयोग्यतातच्छक्तिः देहादिसामर्थ्यं तदपराधः बुद्धिपूर्वकाबुद्धिपूर्वकसकृदभ्या
ससाहसादिरूपः अनुबंधः तत्कार्याधिकारसंपादकपरस्परसंबंधविशिष्टसामग्रीसमुदायरूपश्चे॥तेषां प्र
त्येकं तत्तद्विषयकं विज्ञानात् विशेषज्ञानात् संशयविपर्यासरहितत्वेन निश्चयज्ञानादित्यर्थः॥देशकालजात्य
वस्थाद्यनुरूपदंडनियोगः॥शिक्षाविधानं॥वेदवित्समवायवचनात्॥वेदवित् वेदार्थवित्॥पूर्वोक्तरीत्याप
रिषल्लक्षणवान्॥तेषां समवायः परस्परसंबंधः वेदविदां समूह इति लक्ष्यार्थः॥एतावता परिषदिति लक्ष्य
ते॥तत्परिषद्वचनात्॥दंडनियोगो वा अनुज्ञानं वा शिक्षाभावनिर्णयो वा॥राज्ञा अन्यैर्वा कर्तव्य इति शेषः॥
बोधायनधर्मसूत्रे प्रथमाध्याये प्रथमखंडे तदभावे दशावरा परिषदित्युदाहरंति॥चातुर्वैद्यं चक-
ल्पांगवित्धर्मपरिपाठकः॥आश्रमस्थास्त्रयो विप्रापरिषच्चेषा दशावरा॥पंच वा स्युस्त्रयो वा स्युरेको वा स्याद
निंदितः॥प्रतिवक्ता तु धर्मस्य नेतरे तु सहस्रशः॥इति॥तदभाव इति पूर्वोक्तशिष्टलक्षणविशिष्टशिष्टाभाव इत्य

र्थः॥ तस्मिन्नेव खंडे॥ धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः॥ क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः॥ इति अस्य श्लोकस्यार्थः॥ पूर्वं पराशरमाधवीये परिषत्प्रकरणे प्रदर्शितः॥ तस्मिन्नेव खंडे॥ यथाश्मनि स्थितं तोयं मारुतार्कौ प्रणाशयेत्॥ तद्वत्कृतं परिषदा पंजलवत्संप्रलीयते॥ यथा शिलास्थं जलं वायुसूर्यादिना तत्रैव लयं प्राप्नोति तद्वत्॥ परिषदुक्तप्रकारेण कृतप्रायश्चित्तस्य पापं विलीयते नाशं प्राप्नोतीत्यर्थः॥ एवं परिषद्योग्यानां ब्राम्हणानां प्रायश्चित्तविधायकत्वं धर्मोपदेष्टृत्वं च संभवति॥ नान्येषां एतल्लक्षणरहितानां परिषत्त्वं संभवति॥ तेषां अन्येषां परिषदयोग्यानां शास्त्रतात्पर्यज्ञानाभावात्॥ तदनुष्ठानाभावाच्च॥ पूर्वोक्तपरिषद्योग्यानां ब्राम्हणानां शिष्टत्वेन तेषां आचारस्य शिष्टाचारत्वात्॥ शिष्टाचारस्य शास्त्रियप्रमाणत्वाच्च॥ तन्मध्ये एकेनाप्युपदिष्टधर्मस्य तदनुष्ठिताचारस्य वा प्रमाणत्वं संभवति॥ तदन्येषां बहुजनोपदिष्टधर्माणां तदनुष्ठिताचाराणां च प्रमाणत्वेन शास्त्रीययोग्यतायोग्यताविचारे उदाहरणीयत्वासंभवात्॥ केवल मूढाचारस्य अप्रामाण्यमेवेत्यभिप्रा

येणमनुपराशरआपस्तंबगौतमबोधायनादयः परिषदयोग्यब्राम्हणानांस्वरूपंआहुः॥ परिषदयोग्यप्र
करणं॥तथाहि॥पराशरमाधवीयेअष्टमाध्यायेपरिषत्प्रकरणे॥ब्राम्हणब्रुवलक्षणप्रस्तावेपरिषदयोग्या-
नाह॥ पराशरमूलं ॥अव्रतानाममंत्राणांजातिमात्रोपजीविनां॥सहस्रशःसमेतानांपरिषत्वंनविद्य-
ते॥४॥ अस्यव्याख्यानं ॥अमुख्यब्राम्हणानांदृष्टव्यवहारदर्शनेनप्रायश्चित्तविशेषपरिज्ञानेपिपरिष
त्वयोग्यतानास्तीत्याह॥अव्रतानामिति॥सौम्यप्राजापत्यादिव्रतहीनाःअव्रताःअनधीतवेदाःअमंत्राःनन्व
ध्यात्मविद्यायुक्तस्यैकस्यैवपरिषत्वमस्ति॥एकोवाध्यात्मवित्तमइतिस्मरणात्॥अध्यात्मविद्यारहितस्यत्वे
कस्यपरिषत्वाभावेपिचतुर्णांपरिषत्वंस्मर्यते॥ चत्वारोवेदधर्मज्ञाःपरिषदिति॥अनयैवदिशाअध्ययनादि
रहितानांपंचषण्णांपरिषत्वाभावेपिसहस्रसंख्यायुक्तानांपरिषत्वंसंभवतीत्याशंक्यतन्निराकरणायसहस्र
शःसमेतानामित्युक्तंअध्ययनादिहीनवन्नास्तिकादीनामपिपरिषत्वंनास्तितदुक्तं॥चतुर्विंशतिमते॥वेदपाठा

यनियताधर्मशास्त्रविवर्जिताः॥परिषत्वंनतेषांस्यान्नास्तिकानांविशेषतः॥अनाहिताग्नयोज्ञानाःकेवलंवे
दपारगाः॥पिशुनाःक्रूरकर्माणःपरिषत्वंनविद्यते॥ शास्त्रज्ञादुष्टकर्माणःप्रतिकूलास्त्वसूयकाः॥हेतुकाभि
न्नमर्यादाःपरिषत्वेविवर्जिताइति॥४॥ एतच्छ्लोकव्याख्यानगतचतुर्विंशतिमतोक्तश्लोकः॥ वेदपाठाद्य
नियताधर्मशास्त्रविवर्जिताः॥परिषत्वंनतेषांस्यान्नास्तिकानांविशेषतः॥नास्तिकानामिति॥नास्तिकाःवेद
शास्त्रेषुअप्रामाण्यबुध्यावेदनिंदकाइत्यर्थः॥एतच्छ्लोकव्याख्याने॥ चतुर्विंशतिमते ॥अनाहिताग्नयोज्ञा
नाःकेवलंवेदपारगाः॥पिशुनाःक्रूरकर्माणःपरिषत्वंनविद्यते॥वेदपारगाअपि॥अनाहिताग्नित्वात्॥वेदशा
स्त्रार्थाज्ञानात्॥पिशुनत्वात्॥प्राणिहिंसादिक्रूरकर्मत्वाच्च॥तेषांपरिषत्वंनविद्यते॥तत्रैवचतुर्विंशतिमते॥
शास्त्रज्ञादुष्टकर्माणःप्रतिकूलास्त्वसूयकाः॥हेतुकाभिन्नमर्यादाःपरिषत्वेविवर्जिताइति॥धर्मशास्त्रज्ञाअपि
दुष्टकर्माणःशास्त्रनिषिद्धाचरणशीलाःप्रतिकूलाःधर्मप्रतिकूलानुष्ठातारःविहिताकरणशीलाइतियावत्

निषिद्धाचरणशीलस्य पूर्वमुक्तत्वात्॥ तथाच याज्ञवल्क्यः॥ विहितस्याननुष्ठानान्निंदितस्य च सेवनात्॥ अनि
ग्रहाच्चेंद्रियाणां नरः पतनमृच्छतीति॥ असूयकाः परगुणाऽसहमानाः हैतुकाः सर्वत्र हेतुवादेन स्वर्गनरकादि अ
तींद्रियपदार्थानां युक्त्या निराकरणशीलाः भिन्नमर्यादाः शास्त्रीयव्यवस्थाभेदका इत्यर्थः॥ एते परिषत्त्वे अयो
ग्या इति यावत्॥ अस्मिन्नेवाध्याये अस्मिन्नेव प्रकरणे अनधीतब्राम्हणप्रस्तावे॥ पराशरमूलं अतऊ
र्ध्वं तु ये विप्राः केवलं नामधारकाः॥ परिषत्त्वं न तेष्वस्ति सहस्रगुणितेष्वपि॥१६॥ अस्य व्याख्यानं ॥ नामधा
रकविप्राणां परिषत्त्वं नास्तीत्यर्थः॥ यत्पूर्वमुदाहृतं तत्तदेव दृष्टांतेन दृढीकर्तुं सिंहावलोकनन्यायेन पुनः परामृ
शति॥ अत इति॥ अतऊर्ध्वं वर्णितेषु परिषत्सदस्येषु अवगम्यमानेभ्यो गुणवद्भ्यो ब्राम्हणेभ्य ऊर्ध्वं तद्व्यतिरिक्ता गु
णरहिता इति यावत्॥ १६॥ अस्मिन्नेवाध्याये अस्मिन्नेव प्रकरणे ॥ परिषदयोग्यानाह॥ पराशरमूलं
यथा श्मशानं यथा शून्यं यथा कूपस्तु निर्जलः॥ यथा हुतमनग्नौ च अमंत्रा ब्राम्हणास्तथा॥ १७॥ अस्य व्याख्या

नं॥ ननु ब्राम्हणशब्दस्यावयवार्थस्तस्मिन्माभूत्॥ जातिस्तु विद्यते। विशिष्टमातापितृजन्यत्वं ब्राम्हणत्वजा
तिस्तथा च ब्राम्हणशब्दस्य तस्मिन्यौगिकत्वासंभवेपि रूढिसद्भावा द्विषमो दृष्टांता वित्याशंक्याह॥ यामे
ति ग्रामशब्दो हि जननिवासस्थाने भूभागविशेषे मुख्ययावृत्त्या वर्तते॥ कूपशब्दश्च जलाधारे रवाते॥ होम
शब्दार्थश्च शास्त्रसंस्कृतवन्हौ हविःप्रक्षेपरूपः॥ तत्र जनविशिष्टस्थानं मुख्यो ग्रामः॥ जनशून्यस्थानं तु ग्रा
माभासः॥ कूपहोमयोरप्याभासत्वमेवं योजनीयं॥ तैरेतैः दृष्टांतैरयं नामधारको जातिमात्रसद्भावेपि ब्राम्ह
णाभासः॥ न तु मुख्यः॥ पंकजशब्दस्य च यद्यपि जातिः प्रवृत्तिनिमित्तं तथाप्यवयवार्थस्तस्मिन्निमित्ते तर्भव
से वत ततो योगरूढ इति व्यवह्रीयते एवं ब्राम्हणशब्दस्यापि योगरूढत्वाज्जातिसद्भावेपि योगहीनत्वादाभा
सत्वं द्रष्टव्यं॥ १७॥ पराशरमूलं ॥ यथा षंडोफलस्त्रीषु यथा गोरूषराफला॥ यथा चाज्ञेफलं दानं तथा वि
प्रोनृचोफलः॥ १८॥ अस्य व्याख्यानं ॥ ननु मुख्यसंभवे सत्यमुख्यं न ग्राह्यं॥ तदसंभवे त्वमुख्यमपि ग्रा

त्वमितिलोकवेदस्थितिः॥ तथाचाध्ययनादिसंपन्नमुख्यब्राह्मणानामसंभवेसतिब्राह्मणाभासानामपि
क्वचित्परिषत्वंस्यादित्याह॥ यथेतिअमुख्यमपियत्रकार्यक्षमंभवतितत्रमुख्यासंभवेतदुपादेयं॥ यथावै
दिकेकर्मणिसोमाभावेपूतीकाभिषवः॥ यथालोकेशाल्यभावेकोद्रवादिःतद्वद्ब्राह्मणाभासस्यापिकार्यक्ष
मत्वेक्वचिदुपादेयत्वंस्यात्॥ नत्वध्ययनहीनस्यप्रायश्चित्तविधानक्षमत्वमस्ति॥ नहिपुंस्त्वोपेतस्यासंभवेपि
षंडःकश्चित्स्त्रजामुत्पादयन्नुपलभ्यते॥ नापिभूमिरूषराक्वचित्फलति॥ नाप्यज्ञःप्रतिगृण्हन्दातृफलहेतुःए
वमसावपिऋगादिमंत्रविहीनःनपापनिवृत्तिफलहेतुः॥१३॥ पराशरमूलं ॥गायत्रीरहितोविप्रःशूद्रादप
प्यशुचिर्भवेत्॥ गायत्रीब्रह्मतत्वज्ञाःसंपूज्यंतेजनैर्द्विजाः॥२४॥ अस्यव्याख्यानं ॥ननुवेदविदश्चेदीदृ
शोमहिमातर्हिवेदविदांदैनंदिनगायत्र्युपास्त्याद्यलसानामपिपरिषत्वंप्रसज्येतेत्यतआह॥ गायत्रीति॥ गा
यत्रीचब्रह्मचगायत्रीब्रह्माणी।तयोस्तत्वंगायत्रीब्रह्मतत्वंगायत्र्यास्तत्वमंगन्यासकलावर्णविशेषध्यानादि

म्हणत्वं॥वेदोक्ताशेषानुष्ठानादितदुभयंयथावदवगत्यानुतिष्ठंतस्तत्त्वज्ञाइहविवक्षिताःब्रम्हपरमात्मातस्य
तत्त्वंवेदांतप्रतिपाद्यंस्वरूपंतद्गायत्र्यांभर्गशब्दवाच्यत्वेनावगत्यतदुपासतेतिगायत्रीब्रम्हतत्त्वज्ञाइतिवा॥
॥२४॥मनुस्मृतौद्वादशाध्याये मनुमूलं अव्रतानाममंत्राणांजातिमात्रोपजीविनां॥सहस्रशःसमेता
नांपरिषत्त्वंनविद्यते॥११४॥ अस्यव्याख्यानं अव्रतानामिति॥सावित्र्यादिब्रम्हचारिव्रतरहितानांमंत्रवे
दाध्ययनरहितानांब्राम्हणजातिमात्रधारिणांबहूनामपिमिलितानांपरिषत्त्वंनास्ति॥धर्मनिर्णयसामर्थ्याभा
वात्॥११४॥तस्मिन्नेवगौतमधर्मसूत्रेद्वितीयाध्यायेएकविंशतिसंख्याकखंडे ॥त्यजेत्पितरंराजघातकं
शूद्रयाजकंवेदविप्लावकंभ्रूणहनंयश्चांत्यावसायिभिःसहसंवसेदंतावसायिन्यांवातस्यविद्यागुरून्योनिसं
बंधांश्चसन्निपात्यसर्वाण्युदकदानादीनिप्रेतकर्माणिकुर्युः॥पात्रंचास्यविपर्यसेयुर्दासःकर्मकरोवावकरादमे
ध्यपात्रमानीयदासीघटात्पूरयित्वादक्षिणामुखःपदाविपर्यस्येदमुमनुदकंकरोमीतिनामग्रहंतंसर्वैन्वालमे

रन्प्राचीनावीतिनोमुक्तशिखाविद्यागुरवोयोनिसंबंधाश्चवीक्ष्येरन् अप्सु उपस्पृश्यग्रामंप्रविशंतिअतऊर्ध्वं
तेनसंभाष्यतिष्ठेदेकरात्रंजपन्सावित्रीमज्ञानपूर्वंज्ञानपूर्वंचेत्त्रिरात्रं॥इत्यादिराजघातकशूद्रयाजकमित्रिनि
षादस्थपतिंयाजयेदित्यत्रप्रसिद्धाद्यःशूद्रयाजकंवासामान्यतःशूद्रयाजकंवावेदविप्लावकमिति॥वेदनिंदापू
र्वकवेदोक्तानुष्ठानरहितवेदनिषिद्धानुष्ठानपरवेदविरुद्धैकाचरणशीलं॥भ्रूणहनंभ्रूणहत्याकारिणं॥यः॥पि
ताअंत्यावसायिभिःसहसंवसेत्॥नीचैःनीचजातिविशिष्टैर्वा॥अत्यंतसहवासंकरोति॥अंतावसायिन्यांवे
ति॥तादृशस्त्रीविषयेवा॥सहसंवसेदित्यनुवर्तते॥तंपितरंत्यजेदित्यन्वयः॥यश्चेति॥यःपित्वातमितिसंबंधः
यत्तदोर्नित्यसंबंधइतिवत्संभवति॥त्यजेदित्युक्तं॥तत्यागविधिःइदानींप्रदर्श्यते॥तस्यपितुःविद्यागुरून्विद्याप्र
दातृन्योनिसंबंधान्ज्ञातीन्मातृपितृआत्मसंबंधान्बांधवत्रयजनान्सर्वान्बंधून्चकारात्स्वजातिकुलगो
त्रइष्टादीन्सर्वानित्यर्थोलभ्यते॥सन्निपात्यसमूहीकृत्यसर्वाण्युदकादीनिप्रेतकर्माणिकुर्युः॥पात्रंचास्यविपर्यसे

युः॥अस्यपितुः तन्नामग्रहणपूर्वकस्थापितंपात्रंवक्ष्यमाणलक्षणंघटादिकंनिराकुर्युः॥निरसनंकुर्युरित्यर्थः॥
दासःकर्मकरोवा इति॥गृहकर्मणिनियुक्तोवाअवकरात्॥चत्वरादिदूषितप्रदेशात्अमेध्यपात्रंअयोग्यपात्रं
पुराणघटादिकं॥आनीयआदाय॥दासीघटात्पूरइत्वा॥दास्यानीतघटस्यजलात्॥जलमादायएतत्पात्रंपूरइ
त्वादक्षिणामुखःपुनःदक्षिणाभिमुखःसन्पदाविपर्यस्येत्पादेनताडयेदित्यभिप्रायः॥अमुमनूदकंकरोमी
तिनामग्रहः॥अमुंपितरंतादृशशर्माणंएतत्पात्रंअनूदकं॥उदकदानाद्युपलक्षितप्रेतपितृकर्मानर्हंकरोमी
तिउच्चैःउच्चरन्सन्पदाविपर्यस्येदित्यनेनपूर्वेणसंबंधः॥नामग्रह इति नामग्रहणंनामग्रहणपूर्वकंत्यजेदिति
तात्पर्यार्थः॥तंसर्वेन्वालभेरन्॥तंपुत्रंत्यागकाले बांधवादयःसर्वेपितत्रस्थाः॥अन्वालभेरन्अन्वारंभणंकुर्युरि
त्यर्थः॥प्राचीनावीतिनोमुक्तशिखाः इतितत्रस्थाःसर्वेपिप्राचीनावीतिनः॥विकीर्णकेशाःभवेयुरिति॥अध्या
हारः॥विद्यागुरवोयोनिसंबंधाश्चवीक्षेरन्निति॥तत्त्यक्तघटं पितुःविद्यागुरवःयोनिसंबंधाश्चसर्वेपि विक्षेरन्॥स

म्यकूपस्थेयुरित्यर्थः॥अपउपस्पृश्येति॥स्नात्वेत्यर्थः॥अवगाहनस्नानंकृत्वाग्रामंप्रविशंतीति॥ग्रामंप्रविशेयुरि
त्यभिप्रायः॥अतऊर्ध्वंतेनसंभाष्येति॥अतऊर्ध्वंएतत्स्नागानंतरंतेनत्यक्तेनपुरुषेणसहपुत्रादयःसर्वेपिबंधवा
श्चप्रत्येकंसंभाष्यसंभाषणंकृत्वातिष्ठेदेकरात्रंजपन्सावित्रीमज्ञानपूर्वेज्ञानपूर्वेचेत्रिरात्रमितिगायत्रीजपन्
तिष्ठेदित्यर्थः॥ बोधायनधर्मसूत्रेप्रथमाध्यायेप्रथमखंडे ॥अव्रतानाममंत्राणांजातिमात्रोपजीविनां॥
सहस्रशःसमेतानांपरिषत्वंनविद्यतइति॥अव्रतानामिति॥आग्नेयसौम्यादिसावित्र्यादिस्वस्वगृह्योक्तवेद
व्रतरहितानांअमंत्राणांवेदवेदार्थज्ञानरहितानामित्यर्थः॥तेषांपरिषत्वंनविद्यते॥परिषद्योग्यानभवंतीतिया
वत्॥ननुब्राह्मणानांमध्येकेषांचित्परिषद्योग्यत्वंकेषांचित्तदयोग्यत्वंइतित्वयोक्तं॥अयोग्याःकेतेषांकानि
नामानि॥तेषांलक्षणंकिं॥इतिचेत्उच्यते॥तथाहि॥नामधारकब्राह्मणाः॥ पराशरमाधवीयेप्रायश्चित्तकां
डेअष्टमाध्यायेपरिषत्प्रकरणेनामधारकस्वरूपविप्रलक्षणं॥सावित्र्याश्चापिगायत्र्याःसंध्योपास्त्यग्निकार्ये

योः॥अस्तानात्कृषिकर्तारोब्राम्हणानामधारकाः॥इति॥अस्यव्याख्यानं ॥यथोक्तविशेषणरहितानांपरिष
त्वंनिषिध्युंतेषांस्वरूपमाह॥सावित्र्याइति॥तत्सवितुर्वरेण्यमितिसवितृप्रतिपादकत्वात्सावित्रीणिकारयकार
योर्विश्लेषेणचतुर्विंशत्यक्षरत्वाद्गायत्रीचतुर्विंशत्यक्षरागायत्रीतिश्रुतेः॥सावित्र्यादीनामद्यानान्मुख्यब्राम्ह
णाः॥ब्रम्हवेदः॥तमधीत्य॥अर्थंचअवगत्ययेअनुतिष्ठंतितेब्राम्हणाः॥तथाहांगिराः॥जन्मशारीरविद्याभिराचा
रेणश्रुतेनच॥धर्मेणचयथोक्तेनब्राम्हणत्वंविधीयतइति॥ अस्यव्याख्यानं ॥येतुगायत्रीसम्यक्नजानंति
दूरेतदनुष्ठानं॥ते॥विशिष्टमातापितृजन्या॥अपि॥ब्राम्हण नाममात्रंधारयंति॥नतु॥यथोक्तब्राम्हणशब्दार्थत्वं
तेषुविद्यतेअतएव॥याजनाध्यापनादिजीवनहेत्वसंभवाज्जीवनाय॥कृषिंकुर्वंति॥तेषुब्राम्हणशब्दार्थत्वाभा
वं॥व्यासआह॥ब्रम्हबीजसमुत्पन्नोमंत्रसंस्कार वर्जितः॥जातिमात्रोपजीवीयःसब्राम्हणद्विस्मृतइति॥
नामधारकवद्ब्राम्हणब्रुवस्यापिनमुख्यंब्राम्हण्यं॥ब्राम्हणब्रुवश्चतुर्विंशतिमतेदर्शितः॥ गर्भाधानादिसं

स्कारैर्वैदोपनयनैर्युतः॥ नाध्यापयति नाधीते स भवेद्ब्राम्हणब्रुव इति॥ पराशरमूलं ॥अव्रतानाममंत्रा-
णांजातिमात्रोपजीविनां॥ सहस्रशः समेतानां परिषत्वं न विद्यते॥ अस्य व्याख्यानं ॥अस्य श्लोकस्य परिष
दयोग्यप्रकरणे अर्थः कृतः॥ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः॥ ब्राम्हणस्त्वनधीयानस्त्रयस्ते नामधा
रकाः॥१६॥ अस्य व्याख्यानं ॥गुणरहितब्राम्हणेषु ब्राम्हण इति नाममात्रं केवलं वर्तते न तु ब्राम्हणशब्दप्रवृ
त्तिनिमित्तसंबंधमुख्योस्तीत्येवमर्थः दृष्टांताभ्यां विशदयति॥ यथेति॥ हस्तित्वं मृगत्वं जातिद्वयं तत्तच्छब्दप्रवृत्तिनिमि-
त्तं॥ न चैतत्काष्ठमयचर्ममययोर्विद्यते॥ तथापि हस्तिमृगनामसादृश्यमात्रेण प्रयुज्यते॥ तद्वद्वेदाध्ययनविही-
ने ब्राम्हणशब्दप्रयोगः॥१७॥ पराशरमाधवीये परिषत्प्रकरणे नामधारकब्राम्हणप्रस्तावे॥ गायत्र्याश्चापि
सावित्र्या इत्येतच्छ्लोकव्याख्याने॥ व्यासवचनं॥ ब्रम्हबीजसमुत्पन्नो मंत्रसंस्कारवर्जितः॥ जातिमात्रोपजीवी यः
स ब्राम्हण इति स्मृत इति॥ मंत्रसंस्कारवर्जित इति॥ मंत्रः वेदाध्ययन तदर्थानुसंधानं॥ तद्वर्जितः तद्रहितः गर्भा-

धानादिसंस्काररहितश्च ब्राम्हणजातिविशिष्टमातापितृजन्यः ब्राम्हणस्वरूपजातिमात्राश्रयः स ब्राम्हण इति नाममात्रेण स्मृतः॥ सर्वैः स्मर्यते व्यवह्रीयत इति यावत्॥ तस्मिन्नेव व्याख्याने ब्राम्हणब्रुवश्चतुर्विंशतिमते दर्शितः॥ गर्भाधानादिसंस्कारैर्वेदोपनयनैर्युतः॥ नाध्यापयति नाधीते स भवेद्ब्राम्हणब्रुव इति॥ गर्भाधानादिसंस्कारैः संस्कृतोपि यः ब्राम्हणः नाध्यापयति शिष्यान् वेदाध्ययनं न कारयति॥ स्वयमध्ययनं न करोति॥ वेदोपनयनैः वेदाध्ययनार्थं उपनयनं वेदोपनयनं॥ वेदोपनयनानि तैः गर्भाधानादिसंस्कारैः युतः विशिष्टः इत्यर्थस्य वक्तृतात्पर्यविषयत्वेपि अंत इति वर्णलोपश्छांदसः॥ स्मृतेः छंदस्तुल्यत्वात्॥ वेदोपनयनस्य बहुवचनविषयत्वायोगाच्च॥ यः सः ब्रम्हणब्रुव इत्युच्यते॥ एवं बोधायनधर्मसूत्रे प्रथमाध्याये प्रथमखंडे यथा दारुमयो हस्ती यथा चर्ममयो मृगः॥ ब्राम्हणश्चानधीयानस्त्रयस्ते नामधारकाः॥ अस्य श्लोकस्यार्थः॥ पूर्वं पराशरमाधवीये परिषत्प्रकरणे यथा काष्ठमयो हस्तीति श्लोकव्याख्याने प्रदर्शितः॥ ननु॥ लोके बहवः शास्त्रज्ञा न संति॥

शास्त्रेषु लोकव्यवहारानुसारेण प्राप्तानां पापादीनां धर्मसंशयादीनां च तदनुरूपमेव अत्यंत अनेकप्रभेदेन धर्मो-
पदेशप्रायश्चित्तादिकं नप्रतिपाद्यते तत्र कथं वा निर्णयो भवेत्॥ इति चेत् सत्यं॥ तथापि पूर्वोक्तधर्मशास्त्रैरेव संदि-
ग्धानां धर्माणां प्रायश्चित्तादीनां च शिष्टवचनशिष्टाचरणादिबलात् निर्णयः कर्तव्य इति॥ प्रतिपादितत्वात्॥ तथै-
व निर्णयो भवितव्यः॥ इति प्राप्तः॥ ननु तथा चेत् शिष्टाः के तेषां लक्षणं॥ किं तदनुवर्तनं॥ कथं कर्तव्यं॥ इत्याकांक्षायां शि-
ष्टलक्षणादिकमुच्यते॥ तथाहि॥ शिष्टलक्षणादिप्रकरणं मनुस्मृतौ तृतीयाध्याये प्रथमश्लोके॥ विद्वद्भिः सेवितः सद्भि-
र्नित्यमद्वेषरागिभिः॥ हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत॥१॥ अस्य व्याख्यानं ॥ प्रकृष्टपरमात्मज्ञानरूपध-
र्मज्ञानाय जगत्कारणं ब्रह्म प्रतिपाद्याधुना ब्रह्मज्ञानांगभूतं संस्कारादिरूपं धर्मं प्रतिपादयिषुः धर्मसामान्यलक्षणं प्रथ-
ममाह॥ विद्वद्भिरिति॥ विद्वद्भिर्वेदविद्भिः सद्भिर्धार्मिकै रागद्वेषशून्यैरनुष्ठितो हृदयेनाभिमुख्येन ज्ञात इत्यनेन श्रेयःसाधन-
मभिमतं तत्र हि॥ स्वरसान्मनोभिमुखी भवति॥ वेदविद्भिर्ज्ञात इति विशेषणोपादानसामर्थ्यात्॥ ज्ञातस्य वेदस्यैव श्रेय

साधनत्वानेकारणत्वंविवक्षितं॥ खड्गधारिणा हत इत्युक्ते धृतखड्गस्यैव हनने प्राधान्यं॥ अतो वेदप्रमाणकः श्रेयःसा
धनं धर्म इत्युक्तं॥ एवंविधो यो धर्मस्तं निबोधत उक्तार्थसंग्रहश्लोकः॥ वेदविद्भिर्ज्ञात इति प्रयुंजानो विशेषणं वेदादेव प
रिज्ञातो धर्म इत्युक्तवान् मनुः॥ हृदयेनाभिमुख्येन ज्ञात इत्यपि निर्दिशन्॥ श्रेयःसाधनमित्याह॥ तं दर्शयति मखं मनुः॥ वेदः
प्रमाणकः॥ श्रेयःसाधनं धर्म इत्यतः मन्वुक्तमेव मुनयः प्रणिन्युर्धर्मलक्षणं॥ अत एव हारीतः ॥ अथातो धर्मं व्याख्यास्या
मः॥ श्रुतिप्रमाणको धर्मः॥ श्रुतिश्च द्विविधा वैदिकी तांत्रिकी च॥ भविष्यत्पुराणे॥ धर्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयलक्ष
णं॥ न तु पंचविधः प्रोक्तो वेदो मूलः सनातनः॥ अस्य सम्यगनुष्ठानात्स्वर्गो मोक्षश्च जायते॥ इहलोके सुखैश्व[illegible]मतुलं च ख
गाधिप॥ श्रेयःसाधनमित्यर्थः॥ जैमिनिरपि॥ इदमपि धर्मलक्षणमसूत्रयत्॥ चोदनालक्षणोऽर्थो धर्म इत्युभयचो
दनयालक्ष्यतेऽर्थः॥ श्रेयःसाधनं ज्योतिष्टोमादिः॥ अनर्थः प्रत्यवायसाधनं श्येनादिः॥ तत्र वेदप्रमाणकं श्रे
यःसाधनं॥ ज्योतिष्टोमादिधर्म इति सूत्रार्थः॥ स्मृत्यादयोपि वेदमूलत्वेनैव धर्मप्रमाणमिति दर्शयिष्यामः॥

गोविंदराजस्तु॥हृदयेनाभ्यनुज्ञातइत्यंतःकरणविचिकित्साशून्य इति व्याख्यातवान्॥तन्मते वेदविद्भि
रित्यनुष्ठितः॥संशयरहितश्च य धर्म इति धर्मलक्षणंस्यात्॥एतच्च दृष्टार्थग्रामगमनादिसाधारणंधर्मलक्ष
णं॥विचक्षणानश्रद्दधते॥मेधातिथिस्तु॥हृदयेनाभ्यनुज्ञातइतियत्रचित्तंप्रवर्तयतीति व्याख्या य॥अ
थवा हृदयंवेदस्तद्ध्यधीतोभावनादिरूपेण हृदि अयंस्थितोहृदयमित्युच्यतेइत्युक्तवान्॥१॥ मनुस्मृतौ
द्वादशाध्यायेमनुमूलं॥ धर्मेणाधिगतोयैस्तु वेदःसपरिबृंहणः॥तेशिष्टाब्राह्मणाज्ञेयाःश्रुतिप्रत्यक्ष
हेतवः॥१०९॥ अस्य व्याख्यानं ॥धर्मेणेति॥ब्रह्मचर्याद्युक्तधर्मेणयैरंगमीमांसाधर्मशास्त्रपुराणा
द्युपबृंहितो वेदोधिगतः तेब्राह्मणाः॥श्रुतेःप्रत्यक्षीकरणेहेतवोयेश्रुतिंपठित्वा तदर्थमुपदिशंति तेशि
ष्टाविज्ञेयाः॥१०९॥ आपस्तंबधर्मसूत्रेपि॥द्वितीयप्रश्नेसप्तमपटलेकुहकशठनास्तिकबालवादेषुनध
र्माधर्मौचरतआवंस्वइतिनदेवगंधर्वानपितरइत्याचक्षतेऽयंधर्मोयमधर्मइति॥एतव्याख्यानरूपोज्व

लायां॥ देवादयः प्रकृष्टज्ञाना ब्रूयुः॥ इमौ धर्माधर्मौ भवत इति॥ ततः कुहकादिवादेषु नस्याद्वंचना॥ तदभा
वाच्च वंचनासंभव इति॥ इदं चात्र द्रष्टव्यं॥ प्रत्यक्षादेरगोचरौ धर्माधर्मौ किंतु॥ नित्यनिर्दोषवेदगम्यौ॥ तदभावे
तन्मूलशास्त्रावगम्यौ इति यत्र तु प्रायश्चित्तादौ विषयव्यवस्था दुष्करा तत्र निर्णयमाह॥ यत्रार्याः दुष्करा तत्र नि
र्णयमाह॥ यत्रार्याः क्रियमाणं प्रशंसंति॥ स धर्मो यद्गर्हंते॥ सोधर्मः॥ आर्याः शिष्टाः स्त्रैवर्णिकाः॥ बहुवचनाच्च
त्वारस्त्रयो वा॥ यथाह याज्ञवल्क्यः॥ चत्वारो वेदधर्मज्ञाः परिषत्त्रैविद्यमेव वा॥ सा ब्रूते यं स धर्मस्यादेको वा
ध्यात्मवित्तम इति इदानीं॥ श्रुतिस्मृत्योः प्रत्यक्षयोरदर्शने शिष्टाचारादवगम्यो धर्मः॥ कार्य इत्याह॥ सर्वजनपदे
ष्वेकांतसमाहितमार्याणां वृत्तं॥ सम्यग्विनीतानां वृद्धानामात्मवतामलोलुपानामदांभिकानां वृत्तसादृश्यं भजे
त॥ बोधायनधर्मसूत्रे प्रथमाध्याये प्रथमखंडे ॥ शिष्टाः खलु विगतमत्सराः निरहंकाराः कुंभीधान्याः॥
अलोलुपाः दंभदर्पलोभमोहक्रोधवर्जिताः॥ धर्मेणाधिगतो येषां वेदः सपरिबृंहणः॥ शिष्टास्तदनुमानज्ञाः श्रुति

प्रत्यक्षहेतव इति॥शिष्टाः के इत्यत आह॥विगतमत्सराः विगतः निरस्तः मत्सरो यैस्ते खल्विति॥सर्वत्रानुवर्तते॥
खल्विति प्रसिध्यार्थः॥निरहंकाराः निर्गतः अहंकारः देहादिषु अहंभावो येषां ते निरहंकाराः॥कुंभीधान्याः कुं
भीति पात्रविशेषः तस्य यावत्संधान्यं येषां ते कुंभीधान्याः अल्पाशा इत्यर्थः॥अलोलुपाः विषयप्रयुक्तचनश्चांचल्यर
हिताः॥दंभदर्पलोभमोहक्रोधवर्जिताः॥दंभः धर्मध्वजिता॥दर्पः गर्वादिरूपः॥लोभः परार्थदाने कार्पण्यं॥मोहः
कार्याकार्यादि वस्तुविवेकज्ञानशून्यता॥क्रोधः कोपश्च एते गुणाः वर्जिताः यैस्ते ते शिष्टाः अत्र अस्मिन्नर्थे स्मृत्यं
तरमुदाहरति॥ धर्मेणाधिगतो येषां वेदः सपरिबृंहणः॥शिष्टास्तदनुमानज्ञाः श्रुतिप्रत्यक्षहेतव इति॥ अ
स्य श्लोकस्य मनुस्मृतिस्थ केषांचिच्छ्लोकानां व्याख्यानावसरे अस्मिन्नेव ग्रंथे पूर्वमेव अर्थः कृतः॥इत्यत्रोपस्तते
एवंशिष्टलक्षणे उक्तेपि शिष्टोक्ति शिष्टाचरणादीनां प्रमाणत्वेपि धर्मसंशयवेलायां शिष्टैरपि मीमांसादिधः॥
स्त्रन्यायानुसारेणैव धर्मादिनिर्णयः कर्तव्यः॥इत्याह॥तथाह॥ मीमांसान्यायः॥मनुस्मृतौ द्वादशाध्याये नु

प्र॰ शा॰ २०१

मूलं॥प्रत्यक्षंचानुमानंचशास्त्रंचविविधागमं॥त्रयंसुविदितंकार्यंधर्मसिद्धिमभीप्सता॥१०५॥ अस्यव्याख्या
नं ॥प्रत्यक्षमिति॥धर्मस्यतत्वावबोधमिच्छता॥प्रत्यक्षमनुमानंच॥धर्मसाधनभूतद्रव्यगुणजातितत्वज्ञा
नाय शास्त्रंचवेदमूलस्मृत्यादिरूपंनानाप्रकारधर्मस्वरूपवित्तानायसुविदितंकर्तव्यंतदेवचप्रमाणत्रयंमनोर
भिमतं॥उपमानार्थापत्यादेश्चअनुमानांतर्भावः॥१०५॥ अस्मिन्नेवमनुस्मृतौअस्मिन्नेवाध्याये मनुमूलं
आर्षंधर्मोपदेशंचवेदशास्त्राविरोधिना॥यस्तर्केणानुसंधत्तेसधर्मंवेदनेतरः॥१०६॥ अस्यव्याख्यानं ॥आ
र्षमितिऋषिदृष्टत्वात्॥आर्षवेदंधर्मोपदेशंचतन्मूलस्मृत्यादिकं॥यस्तदविरुद्धेनमीमांसादिन्यायेनविचारय
ति॥सधर्मंजानाति॥ननु॥मीमांसानामभिन्नः॥धर्मैकरणं॥वेदःमीमांसाचइतिकर्तव्यतास्थानीया॥तदुक्तं
भट्टवार्तिककृता॥धर्मेप्रमीयमाणे हिवेदेनकरणात्मना॥इतिकर्तव्यताभागंमीमांसापूरयिष्यतीति॥१०६॥
मनुमूलं ॥निःश्रेयसमिदंकर्मयथोदितमशेषतः॥मानवस्यास्यशास्त्रस्यरहस्यमपिदिश्यते॥१०७॥

नि॰

अस्यव्याख्यानं   निश्रेयसमिति॥एतंनिश्रेयससाधनंकर्मनिःशेषेणयथावदुदितं॥अतऊर्व्वं॥अस्यमान
वशास्त्रस्यरहस्यंगोपनीयमिदंवक्ष्यमाणंश्रुणुत॥१०७॥ मनुमूलं ॥अनाम्नातेषुधर्मेषुकथंस्यादितिचेद्भवे
त्॥यंशिष्टाब्राम्हणाब्रूयुःसधर्मःस्यादशंकितः॥१०८॥ अस्यव्याख्यानं ॥अनाम्नातेष्विति॥अस्यशास्त्रस्य
असमस्तधर्माभिधानमाशंक्यबोधयति॥सामान्यविधिप्राप्तेषुविशेषेणअनुपदिष्टेषुकथंकर्तव्यंस्यादितियदि
संशयोभवेत्तदायंधर्मंवक्ष्यमाणलक्षणाशिष्टाःब्राम्हणाःब्रूयुः॥सतत्रनिश्चितोधर्मःस्यात्॥१०९॥ मनुमूलं
एकोपिवेदविद्धर्मंयंव्यवस्येद्द्विजोत्तमः॥सविज्ञेयःपरोधर्मोनाज्ञानामुदितोयुतैः॥११३॥ अस्यव्याख्यानं
एकोपीति॥एकोपिवेदार्थधर्मज्ञोयंधर्मंनिश्चुनुयात्॥प्रकृष्टोधर्मःसबोद्धव्यः॥नेवेदानभिज्ञानांदशभिःसहस्रैर
प्युक्तः॥वेदविच्छब्दोयंवेदार्थधर्मज्ञपरः॥एतच्चश्रेष्ठोपलक्षणं॥स्मृतिपुराणमीमांसान्यायशास्त्रज्ञोपिगुरुपरंपरो
पदेशविदपि॥तथाश्लोकः॥केवलंशास्त्रमाश्रित्यनकर्तव्योविनिर्णयः॥युक्तिहीनविचारेतुधर्महानिःप्रजायते

तेनबहुस्मृतिज्ञोपियदिसम्यक्प्रायश्चित्तादिधर्मंजानातितदातेनाप्येकेनधर्मउक्तःप्रकृष्टोधर्मोज्ञेयः॥अतएवय
मः॥श्लो ॥एकोद्वौवात्रयोवापि यद्ब्रूयुर्धर्मपाठकाः॥सधर्मइतिविज्ञेयोनेतरेषांसहस्रशः॥११३॥ एतच्छ्लोकव्या
ख्यानोक्तश्लोकः॥ केवलंशास्त्रमाश्रित्यनकर्तव्योविनिर्णयः॥युक्तिहीनविचारेतुधर्महानिःप्रजायते ॥बहुशास्त्र
ज्ञोपिकेवलशास्त्रावलंबनेनधर्मनिर्णयोनकर्तव्यः॥अपितुमीमांसानीतिशास्त्रादिलौकिकधर्मशास्त्रादियुक्तिभिः
सम्यग्विचार्यगौरवलाघवंदेशकालवयोवस्थाद्यनुरूपं॥शक्तियोग्यंआलोच्यधर्मनिर्णयःकर्तव्यः॥इतितात्पर्या
र्थः॥ पराशरमाधवीयेअष्टमाध्यायेपरिषत्प्रकरणे ॥प्रमाणमार्गंमार्गंतोइतिश्लोकव्याख्यानेअंगिरोव
चनं॥तस्मिन्नुत्पादितेपापेयथावद्धर्मपाठकाः॥तेतथातत्रजल्पेयुर्विमृशंतःपरस्परमिति॥ पापेपापकारि
णिपुरुषे॥ गौतमधर्मसूत्रेद्वितीयाध्यायेत्रयोदशसंख्याकखंडे विप्रतिपत्तौसाक्षिनिमित्तासत्यव्यवस्था
बहवस्तुरनिंदिता॥प्रत्यायिकाइति॥ विप्रतिपत्तौविविधाप्रतिपत्तिःविप्रतिपत्तिः॥विरुद्धाप्रतिपत्तिर्वा॥अ

नेककोटिकज्ञानंसंशयज्ञानमित्यर्थः॥ एकविषयंद्विप्रकारकज्ञानंइतियावत्॥ प्रत्यक्षानुमानादिप्रमाणैःअन्यतर
कोटिकविषयनिश्चयज्ञानानुत्पत्तौसत्यवस्तुविषयकव्यवस्थासाक्षिनिमित्ताभवतीतिशेषः॥ साक्षिवचनेनैवव्य
वस्थाकर्तव्या॥ साक्षित्वंनामउभयविरुद्धकोटौअन्यतरकोट्यप्रविष्टत्वेसतिसाक्षाद्रष्टृत्वंसाक्षित्वंसाक्षिणस्तु
बहवस्तुः॥ बहुसंख्याकाअपेक्षिताइत्यर्थः॥ तेतुअनिंदितास्तुर्यदिलोकेअसत्यवादित्वेनअधार्मिकत्वेननिंदि
ताःनभवेयुर्यदितदातेसाक्षिणोभवंति॥ अन्यथाकोटिगुणिता॥ अपिसाक्षिणोनभवंति॥ तेषांवचनैःसत्यव्यव
स्थानकर्तव्येतितात्पर्यार्थः॥ तदेवाभिप्रायंसूचयति॥ प्रत्यायिकाइति॥ लोकेसत्यधर्मादिसद्गुणशीलत्वेनसर्वज
नसंमताभवेयुर्यदीत्यभिप्रायार्थः॥ बोधायनधर्मसूत्रेप्रथमाध्यायेप्रथमखंडे ॥ बहुद्वारस्यधर्मस्यसूक्ष्मा
दुरनुगागतिः॥ तस्मान्नवाच्योह्येकेनबहुज्ञेनापिसंशयेइति॥ बहुद्वारस्येति॥ बहुमार्गस्येत्यर्थः॥ देशकाल
गौरवलाघवादिनाधर्मःबहुविधोभवतीत्याशयः॥ अतएवतस्यगतिः॥ गम्यतइतिगतिः॥ गम्यस्थानं

पर्यवसानमित्यर्थः॥सा गतिः सूक्ष्मा दुरवगाह्या॥तस्मात् धर्मसंशये प्राप्ते बहुज्ञेन बहुशास्त्रन्यायवि
दापि प्रमादानवधानादिदोषेण कालदेशावस्थाशक्तिवयोद्रव्यादिभेदेन च बहुप्रकारत्वप्राप्तधर्म
वक्तृत्वस्य कष्टतरत्वात्॥एकेन धर्मनिर्णयः न वाच्यः॥इति धर्मनिर्णयस्य पापहेतुत्वसंभवः॥द्योतते।
तथैव बोधायनसूत्रे पराशरमाधवीये च॥देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं॥उपपत्तिमवस्थां च
ज्ञात्वा कर्म समाचरेदिति॥ अस्यार्थः देशमिति नर्मदादक्षिणोत्तरशास्त्रविभक्तदेशं आंध्रद्राविडमहाराष्ट्रादिदेशं
तत्तदवांतरप्रदेशं वा॥कालमिति॥कलियुगादिमहाकालं वा॥वर्षाकालहिमवत्काल राजकीयव्यवहार
भेदभिन्नकालादिविशेषितकालं वा तथात्मानमिति॥यथा देशकालभेदेन कर्मभेदो वक्ष्यते॥तथा॥आत्मानं
शरीरादि॥संघातं॥शक्तिं॥ज्ञानं॥पदार्थदेहादिसामर्थ्यं॥द्रव्यं॥धनधान्यादिरूपं द्रव्यं प्रयोजनं एतस्मिन् क
र्मणि प्रवृत्ते॥लौकिकं वा शास्त्रीयं वा॥द्रव्यनिमित्तप्रयोजनं फलतारतम्यमित्यर्थः॥उपपत्तिं॥सामग्रीसंपत्तिं।

अवस्थां॥रोगजराद्युच्चाद्यवस्थां च॥ज्ञात्वा तारतम्यलाघवगौरवलाघवादिकं पर्यालोच्य एतत्सर्वानुरूपमेव कर्माचरेत्॥लौकिकवैदिकव्यापारं कुर्यात्॥कर्मादिशेदिति पाठे धर्माधर्मप्रायश्चित्तादिकर्म आदिशेत्॥उपदिशेदित्यर्थः॥बोधायनधर्मसूत्रे ॥शरीरं बलमायुश्च वयः कालं च कर्म च॥समीक्ष्य धर्मविद्बुध्या प्रायश्चित्तं प्रकल्पयेत्॥इति॥ शरीरं॥देहं॥बलं॥आयुश्च॥वयः॥यव्वनादि॥धर्मवित्॥बुध्या ॥सम्यक्॥ईक्ष्य॥आलोच्य॥प्रायश्चित्तं॥कर्माद्यनुरूपं॥प्रकल्पयेत्॥निर्दिशेदित्यर्थः॥ तैत्तिरीयोपनिषदि ॥आचार्योंतेवासिननुशास्ति॥ इत्युपक्रम्य यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि यान्यस्माक॰सुचरितानि तानि त्वयोपास्यानि नो इतराणि इति॥ अस्यार्थः॥आचार्यः॥गुरुः ॥अंतेवासिनं शिष्यं॥अनुशास्ति॥अनु॥ शा स्त्रमनुसृत्य॥शास्त्रोक्तार्थमेव॥शास्ति॥शिक्षति॥शाङ् अनुशासने इति धातोः॥उपदिशतीत्यर्थः॥सत्यं वद धर्मं चर॥इत्याद्युपक्रम्य॥यान्यनवद्यानि कर्माणि॥कर्माणि॥लौकिकानि वैदिकानि च॥अनवद्यानि॥शास्त्रोक्त

दोषरहितानितानित्वयाउपास्यानि॥अनुष्ठेयानि॥नो॥इतराणि॥तद्भिन्नानि॥शास्त्रदोषयुक्तानि॥त्वया॥नो
पास्यानि॥नानुष्ठेयानीत्यर्थः॥ननुभवतां॥आचार्याणां॥चरितानि॥आचरितानि॥कर्माणि॥मयापि॥आच
रितव्यानिभवंतु॥इतिशिष्याशयं॥आशंक्याह॥यान्यस्माकꣳसुचरितानीति॥यानि॥अस्माकं॥नः॥सुच
रितानि॥सुचरित्राणिशास्त्रीयानुष्ठानानि॥तान्येवत्वयाउपास्यानि॥अनुष्ठेयानि॥नोइतराणि॥तद्विपरीता
निदुश्चरित्राणि॥शास्त्रनिषिद्धाचरणानि॥नोपास्यानि॥नानुष्ठेयानीत्यर्थः॥ एवंप्रकारेणधर्मनिर्णयेप्रा
यश्चित्तनिर्णयादौच॥शास्त्रन्याययुक्तितात्पर्यादिकंच॥पर्यालोच्यविचारपूर्वकंनिर्णयःकर्तव्यः॥अन्यथाशा
स्त्रज्ञत्वाभिमानेनवा॥अज्ञानादिनावा॥लोकव्यवहारदर्शनबलाद्वा॥शास्त्रतात्पर्यविरुद्धार्थप्रतिपादनेवक्तॄ
णांमहत्पातकंसंभवतीतिस्मृतिकाराआहुः॥ पराशरमाधवीयेप्रायश्चित्तकांडेअष्टमाध्यायेपरिषत्प्रकरणे॥
यद्वदंतितमोमूढाःमूर्खाधर्ममतद्विदः॥तत्पापंशतधाभूत्वातद्वक्तॄनधिगच्छतीति॥८॥ अज्ञात्वाधर्मशास्त्राणिप्रा

यश्चित्तं ददाति यः॥प्रायश्चित्तीभवेत्पूतः किल्बिषं परिषद्व्रजेत्॥६॥ पूर्वं धर्मशास्त्रं विजानतामिति॥ विशेषणेन तद्वि
ज्ञानरहितस्य प्रायश्चित्तनिर्णयकर्तृत्वं नास्तीति यदर्थात्सूचितं॥ तदेवात्र॥ यदित्यादिश्लोकद्वयेन प्रपंचयति॥
अज्ञानं द्विविधं॥ सत्यपि धर्मशास्त्रपाठे न्यायनिर्णयकौशलाभावेन॥ प्रकृतस्य सूक्ष्मस्य॥ प्रायश्चित्तविशेषस्याप
रिज्ञानमेकं॥ वृद्धव्यवहारेण सत्यपि॥ परिज्ञाने धर्मशास्त्रापरिशीलनमपरं॥ तदुभयमभिलक्ष्य श्लोकद्वयं॥ तमो
मूढाः प्रज्ञामांद्येन॥ तमसा सूक्ष्मन्यायेषु॥ विभ्रान्ताः॥ मूर्खाः पंडितंमन्याः॥ अतद्विदः प्रायश्चित्तविशेषमजानंतः ताद
शाः पुरुषाः यस्य पापमुद्दिश्य धर्मं प्रायश्चित्तमन्यथा वदंति॥ तत्पापं शतधा भूत्वा तन्मूर्खान्वक्तॄन्प्राप्नोति॥ अंगिरा
श्चैतदेवाह॥ यत्तु धर्ममजानद्भिः प्रायश्चित्तं समागतैः॥ तत्पापं शतधा भूत्वा वक्तॄनेवोपतिष्ठतीति॥ प्रायश्चित्त
मन्यथा कारित्वान्न शुध्यति॥ यस्तु धर्मशास्त्रपाठहीनः प्रायश्चित्तविशेषं लोकतोवगत्य निर्दिशति॥ तत्र यथाशास्त्रानुष्ठा
नृत्वात्सा यश्चित्ती पूतो भवति। स तु वक्ता किल्बिषं व्रजेत्॥ धर्मशास्त्राणामपठितत्वात्॥ तत्पाठाभावे विधायकत्व

नस्योदाहर्तुमशक्यत्वात्॥उदाहृतैवं वचनं प्रायश्चित्तं निर्देष्टव्यमिति हि पूर्वमुक्तं॥ ऋषिवक्त्रोद्गतान्धर्मान्गायंतो
वेदपारगा इति॥अंगिरा अपि॥वचः पूर्वमुदाहार्यं यथोक्तं धर्मवक्तृभिः॥पश्चात्कार्यानुसारेण शक्त्या कुर्युरनुग्र
हं॥न हि तेषामतिक्रम्य वचनानि महात्मनां॥प्रज्ञानेनैव विद्वद्भिः शक्यमन्यत्प्रभाषितुमिति॥ पराशरमाधवी
येऽष्टमाध्याये परिषत्प्रकरणे॥ पराशरमूलं ॥प्रायश्चित्तं प्रयच्छंति ये द्विजा नामधारकाः॥ते द्विजाः पा
पकर्मणः समेता नरकं ययुः॥ अस्य व्याख्यानं ॥ननु यत्र संस्कृता बहवो न संति तत्रैकेन संस्कृतेन स
ह इतरे नामधारकाः प्रायश्चित्तविधाने स्युरित्याशंक्याह॥प्रायश्चित्तमिति॥समेता एकेन संस्कृतेन संगतास्ते
ययुः॥यांतीत्यर्थः॥यद्यपि संस्कृतः॥स्वयं नरकं नार्हति॥तथाप्यनर्हैः सह एकस्यां परिषद्युपवेशनात्तस्य
नरकप्राप्तिः॥एतच्चतुर्विंशतिमते स्पष्टीकृतं॥प्रायश्चित्तं प्रयच्छंति ये द्विजा नामधारकाः॥ते सर्वे पापक
र्माणः समेतो नरकं व्रजेदिति॥समेतो नामधारकैः सगतिः तावतैवापराधेन मंत्रसंस्कृतोपि नरकं प्राप्नो

ति॥ अस्मिन्नेवस्मृतौअस्मिन्नेवाध्यायेसंप्रणीतस्मशाने चि तिश्लोकव्याख्याने॥श्लो॥उष्ट्रंतंहिमनुष्या
णामन्नमाश्रित्यतिष्ठति॥अन्नादेर्भ्रूणहामार्ष्टित्यादिस्मरणादित्यतआह॥संप्रणीतइति॥नत्वग्निःस्मशाननीव
शवादिभक्षणप्रयुक्तइत्येतावतादेवत्वंपरित्यजति॥एवंवेदविदोभूदेवस्यअभक्ष्याभोज्यादिदोषमात्रेणभूदे
वत्वंनापयति॥एकैकस्यमंत्रस्याभक्षणाद्यशेषदोषनिवर्तकत्वात्॥तथाचमंत्रलिंगं॥ यदन्नमद्म्यनृतेन
देवदास्यन्नदास्यन्नुतवाकरिष्यन्॥यद्देवानांचक्षुष्यागोअस्तियदेवकिंचप्रतिजग्राहमग्निर्मातस्मादनृणं
करोतु॥यदन्नमद्मिबहुधाविरूपं॥वासोहिरण्यमुतगामजामविं॥यद्देवानामित्यादिअनृतेनपरकीयादोस्व
कीयत्वादिवचनेनदास्यन्अनर्हेभ्योनष्टशौचादिभ्यःस्नेहानुबंधेनहव्यकव्ययोःप्रयछन्अतिथिभ्योयोग्ये
भ्यः॥अदास्यन्अप्रयछन्॥करिष्यन्नंन्नभक्षणव्यतिरिक्तमविहितं॥प्रतिषिद्धंवाकुर्वन्॥चक्षुष्यागः॥नग्न
परयोषिदावेक्षणादितथादेवानामागः॥विष्णवाद्यंदेवंदृष्ट्वाप्यनमस्कारादि॥यदेवकिंचअभ्यमहिषकालपु

म॰ शा॰
२०६

कृषाद्यप्रतिग्राह्यं यत्किंचित्प्रतिजग्राहं॥ प्रतिगृहीतवानस्मि॥ बहुधा विरूपं गणान्नगणिकान्नादिरूपेणा
नेकदोषयुक्तं॥ यदन्नमभिभक्षितवानस्मि॥ यथोक्तात्सर्वस्माद्दोषाज्जातान्मामनृणं पूतं॥ अग्निः करोत्विति
मंत्रार्थः॥ तथा चपवमानसूक्तादिमहिमाभिधीयते॥ क्रयविक्रयाद्योनिदोषाद्यभक्ष्यभोजनात्प्रतिग्रहात्॥ अ
सद्भोजनाच्चापि नृशंसं तत्सावमानीभिरहं पुनामीति॥ तथा सामगानेसामगाः पठंति अभोज्यभोजनेकृतेपं-
था अथो दिव इति सामगायेदिति शेषः॥ मनुरपि॥ प्रतिगृह्याप्रतिग्राह्यं भुक्त्वा चान्नं विगर्हितं॥ जपंस्तरत्समंदी
यं पूयते मानवस्त्र्यहात्॥ हत्वा लोकानपीमांस्त्रीनश्नन्नपि यतस्ततः॥ ऋग्वेदं धारयन्विप्रो नैनः प्राप्नोति किंचने
ति॥ मनुस्मृतौ द्वादशाध्याये मनुमूलं ॥ यं वदंति तमोभूता मूर्खा धर्ममतद्विदः॥ तत्पापं शतधा भूत्वा तद्वक्तॄ
ननुगच्छति॥ अस्य व्याख्यानं यमिति॥ तमोगुणबहुला मूर्खाः धर्मप्रमाणवेदानभिज्ञाः॥ अतएव प्रभवि
षय धर्मविदः प्रायश्चित्तादिधर्मं यं पुरुषं प्रत्युपदिशंति तदीयं पापं शतगुणं भूत्वा वाचकान्बहून्भजते॥ ११६॥

नि॰

बोधायनसूत्रे प्रथमाध्याये प्रथमखंडे यद्वदंति तमोमूढाः मूर्खाधर्ममजानतः॥ तत्पापंशतधाभूत्वा वक्तॄनृसम
धिगच्छति॥ अस्यश्लोकस्यव्याख्यानं पराशरमाधवीयश्लोकव्याख्यानेन अस्यश्लोकार्थस्य व्याख्यातत्वा
त्॥ अत्रोपरम्यते॥ अतएवऋषिवाक्योदाहरणपूर्वकमेवधर्मनिर्णयोदाहरणंकर्तव्यमित्याहुः॥ तथाहि॥
पराशरमाधवीये अष्टमाध्याये॥ यद्वदंति तमोमूढा इति श्लोकव्याख्याने॥ श्लो॥ ऋषिवाक्योद्धृतान्धर्मान्गा
यंतोवेदपारगा इति॥ अंगिराअपि ॥वचःपूर्वमुदाहार्यं यथोक्तं धर्मवक्तृभिः॥ पश्चात्कार्यानुसारेण शक्त्या
कुर्युरनुग्रहं॥ नहितेषामतिक्रम्यवचनानिमहात्मनां॥ प्रज्ञानेनैवविद्वद्भिःशक्यमन्यत्प्रभाषितुमिति॥ एवंधर्म
शास्त्रवचनाभिधानपूर्वकमेवधर्मनिर्णयेकर्तव्येपिस्वस्यधर्मशास्त्रार्थज्ञानेसत्यपिप्रमादानवधानादिनाविरु
द्धाभिधानंभवति॥ अतःस्वसमानैः त्रिचतुर्भिः॥ न्यायविद्भिः॥ शास्त्रार्थविचारं कृत्वा तत्संमत्या प्रायश्चित्तादिभिः
धर्मनिर्णयःकार्यः॥ इत्याहुः॥ पराशरमाधवीये अष्टमाध्याये परिषत्प्रकरणे॥ पराशरमूलं॥ चत्वारोवात्र

प्र॰१॥॰
२॰७

योवापियंब्रूयुर्वेदपारगाः॥सधर्मइतिविज्ञेयोनेतरैस्तुसहस्रशः॥७॥ अस्यव्याख्यानं ॥धर्मशास्त्रपरिज्ञान
स्यन्यायनिर्णयकौशलस्यचसद्भावेप्यनवधानादिचित्तदोषशंकाव्युदासायस्वसमानैस्त्रिचतुरैःसहसंवा
दोपेक्षितइत्यभिप्रेत्याह॥चत्वारइति॥बहूनामन्योन्यसंवादेनयोनिश्चितःसएवधर्मइतिविज्ञेयः॥इतरैर
न्योन्यसंवादमनाद्रियमाणैःसहस्रसंख्याकवचनपाठपुरःसरमभिहितोपिविसंवादशंकायाअनिराकृत
त्वान्नासौधर्मत्वेनस्वीकार्यः॥८॥ पराशरस्मृतौअस्मिन्नेवाध्याये॥पराशरमूल ॥प्रमाणमार्गंमिति
श्लोकव्याख्यानं॥ अंगिरोवचनं ॥तस्मिन्स्तुसादितेपापेयथावद्धर्मपाठकाः॥तेतथातत्कल्पयेयुर्विमृशंतः
परस्परमिति॥ पापेपापकारिणिपुरुषे ॥एवंप्रकारेणधर्मशास्त्रेषुदेशाचारादेरपितत्तद्देशीयपारंपर्या
गतलौकिकाचारस्यप्रामाण्यंनोक्तं॥अपितुशास्त्राचारस्यैवशास्त्रोक्तदेशविशेषाचारस्यैवप्रामाण्यस्वी
कारस्यशास्त्रोक्तत्वात्॥तथाचमनुस्मृतौ ॥सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं॥ इतिश्लोकेन ॥ तदुत्तर

नि॰

ज

यस्मिन्देशे य आचारः॥ इतिश्लोकेन॥ तदुत्तर ॥कुरुक्षेत्रं च मत्स्याश्च॥ इतिश्लोकेन ॥एतदुत्तर॥ एतद्देशप्रसूतस्य सकाशादग्रजन्मनः॥ इतिश्लोकेन च॥ पूर्वोक्तदेशाचारप्रकरणे उक्तरीत्या॥ शास्त्रोक्तदेशविशेषाचारस्यैव प्रामाण्यं सिध्यति॥ नतु तत्तद्देशीयलौकिकाचारस्य प्रामाण्यं संभवति॥ देशाचारप्रकरणोक्त॥ यस्मिन्देशे य आचारः इति॥ स्मृतिसारसमुच्चयग्रंथोक्तवचने॥ श्रुतिस्मृत्यविरुद्धो यः स ग्राह्य इति॥ उक्तरीत्यापि॥ शास्त्राविरुद्धाचारस्यैव प्रामाण्यं सिध्यति॥ पूर्वोक्तदेशाचारप्रकरणस्थात् तस्य व्यवहारो वेदो धर्मशास्त्राणीत्युपक्रम्य॥ आम्नायैरविरुद्धाः प्रमाणमिति॥ गौतमधर्मसूत्रोक्तत्वाच्च॥ पूर्वोक्तदेशाचारप्रकरणोक्तरीत्या पंचधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतः इत्युक्तरीत्या दक्षिणदेशस्य मातुलकन्यापरिणयादिपंचानाचारग्राह्यत्वस्य नर्मदोत्तरदेशे सीधुपानादिपंचानाचारग्राह्यत्वस्य च॥ देशाचारस्य शास्त्रीयव्यवस्थानुरूपेण तत्तदाचारप्रामाण्यं बोधायनधर्मसूत्रे प्रतिपादितं॥ इति हेतोः॥ पूर्वोक्तदेशाचारप्रकरणस्थित ॥देशधर्मान्जातिधर्मान्

र्मान् कुलधर्मांश्च शाश्वतान्॥ इत्यादिश्लोकोक्तदेशजात्यादिव्यवस्थितशास्त्रीयाचारस्यैव प्रामाण्यमिति मनुवचनाच्च॥ शास्त्रोक्तदेशकुलाद्याचारस्यैव प्रामाण्यात्॥ तद्विरुद्धदेशस्य बहुजनपारंपर्येण अनुष्ठिताचारस्यापि अप्रमाणत्वेन त्याज्यत्वावश्यंभावित्वाच्च तादृशलौकिकाचारस्य अतींद्रियशास्त्रैकगम्ययोग्यतायोग्यताविचारनिर्णयविचारेनोदाहरणीयत्वं सिद्धमेव भवति॥ शास्त्रीयाचारस्यैव प्रामाण्यमित्युक्तस्य। शास्त्रप्रमाणकत्वं वक्तुं शास्त्रस्वरूपं। वक्तव्यमिति। तदनंतरं। श्रुतिस्मृतिपुराणशिष्टाचारशास्त्राविरुद्धलोकाचारस्य च स्वरूपं। नारसिंहपारिजातोक्तहारीतवचनादिभिः वेदाः प्रमाणं। स्मृतयः प्रमाणं। धर्मार्थयुक्तं वचनं प्रमाणं इत्यादिना प्रमाणस्वरूपमुक्त्वा। तादृशप्रमाणानां श्रुतिस्मृतिपुराणलोकाचारादीनां परस्परविरोधे पूर्वपूर्वस्य बलीयस्त्वमिति। नरसिंहपारिजातोक्तं। लोगाक्षिवचनादिभिः। बलाबलनिर्णयानंतरं। एतत्प्रमाणाश्रयीभूतस्य एतत्प्रमाणविधेयस्य एतत्प्रमाणोक्त अनुष्ठातुः ब्राह्मणस्य ब्राह्मण्यस्वरूपं वक्तुं। ब्राह्मण्यलक्षणं।

पराशरमाधवीप्रोक्तं अंगिरोवचनादिभिः जन्मशारीरविद्याभिरित्यादिनावाक्यजातेन प्रतिपाद्य तादृशब्राह्मण्य
वतां ब्राह्मणानामेवं धर्मोपदेष्टृत्वं प्रायश्चित्तविधायकत्वंचेतिवक्तुं तेषामेव परिषत्वनामकपरिषद्योग्यत्वं त
दन्येषांपरिषद्योग्यत्वंनास्तीतिवक्तुं प्रमाणमार्गं मार्गं ज्ञायेधर्मप्रवदंति वै। इत्यादिपराशरमूलस्मृतिवचना
द्भिः निर्णयंकृत्वा तदनंतरं। तद्भिन्नानां उक्तब्राह्मण्याभावात् ब्राह्मणनामधारकत्वेन परिषद्योग्यत्वं अव्र
तानाम मंत्राणांजातिमात्रोपजीविनां इत्यादिपराशरस्मृतिमूलवचनादिभिरुक्त्वा तदनंतरं परिषद्योग्यबहु सं
ख्याकब्राह्मणाभावे कथंधर्मनिर्णयः स्यादित्याशंकायां शिष्टोक्तस्यवा शिष्टाचारस्यवा प्रामाण्यांगीकारेण तदनु
रूपएवधर्मनिर्णयो भवितव्यः इतिवक्तुं शिष्टलक्षणादिकं विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः इति मनुस्मृत्या
दिवचनैरुक्त्वा धर्मसंशये प्रायश्चित्तसंशयेच सूक्ष्मरूपेणतयोः विवेक्तुं अशक्तत्वात् कथं कर्तव्यमित्याकां
क्षायां मीमांसाधर्मशास्त्रादिन्यायानुसारेण गौरवलाघव अधिकारविषयव्यवस्थादिकं विचार्य पर्यालोच्य त
दनुरूपेण निर्णयो भवितव्य इति। मीमांसादिन्यायप्रदर्शनं। प्रत्यक्षंचानुमानंच शास्त्रंचविविधागमं इत्यादि

मनुवचनादिभिः प्रतिपाद्य तदनंतरं पूर्वोक्तपरिषद्योग्यैः श्रुतिस्मृतिन्यायविरुद्धैः वाक्यादिभिश्च अन्यथा
धर्मप्रायश्चित्तादिनिर्णये पापिनः पापं शतधा शतगुणितं भूत्वा अन्यथावक्तॄनधिगच्छतीति यद्वदंतितः
मोमूढामूर्खा धर्ममतद्विदः इत्यादिपराशरमूलवचनादिभिः धर्मान्यथाभाववक्तृत्वं। निंदित्वा ऋष्युक्तवच
नान्येव कंठरवेणस्पष्टमुक्त्वा तदर्थाभिधानं कर्त्तव्यमिति पराशरमाधवीयव्याख्याने ऋषिवक्त्रोद्गतान्धर्मा
न्गायंतो वेदपारगाः वचः पूर्वमुदाहार्यं यथोक्तं धर्मवक्तृभिः इत्यादि अंगिरोवचनादिभिः प्रतिपादितत्वात्
एवं स्थिते शास्त्रार्थे शास्त्रानभिज्ञैः केवललौकिकपरंपराप्राप्तबहुजनव्यापारानुसारि बहुजनानुष्ठिताशा
स्त्रिय आचारस्य तेषां वाक्यस्य कथं प्रामाण्यं संभवेत् पूर्वोक्तवचनजातैस्तदुपष्टंभकन्यायादिभिश्च केवललौ
काचाराप्रामाण्यस्य प्रपंचितत्वात् प्रथमप्रकरणोक्ते वेदाः प्रमाणं स्मृतयः प्रमाणं इत्यादिभिः धर्मशास्त्रे
वेदविरोधे सति स्मृतेः तदंशे अप्रामाण्यात् त्याग एव एवं श्रुतिस्मृतिविरोधे पुराणशिष्टाचारादीनामपि तदंशे
अप्रामाण्यात्त्याग एव। तद्यथा भागवतादिकेषु चित्पुराणादिग्रंथे षु क्वचित्क्वचित्तस्थलेषु श्रुतिविरुद्धार्थस्य सोमपा

गादिक्रतुषुकैश्चिद्राजादिभिःहविष्ट्वेनहुताःपशवः परलोकेतान्राजादीन् यजमानान्बाधितवंतइतिबाधि
ष्यंतइतिच। अस्मिन्नेवलोकेकेनचित्सामर्थ्येनज्ञात्वाभीताइतिच आख्यायिकादिकंश्रूयते। अग्नीषोमीयेपशु
मालभेतवायव्यंश्वेतमालभेतभूतिकामइत्यादिश्रुत्यातेषांविरोधेसतितदंशे अप्रामाण्यात् तेषांत्यागएव
भवति एवंस्थितेप्रमाणभूतानांस्मृतिमूलकानांत्यागेसंभवतिसतिलौकिकाचारस्यश्रुतिस्मृतिविरुद्धस्यअ
धिकसंख्याकैर्जनैःपारंपर्येणानुष्ठितत्वेपिअप्रामाण्यसंभवेनत्यागः कर्तव्यइत्यत्रकिंसुवक्तव्यंतस्मात् शास्त्र
विरुद्धलोकाचारः अत्यंताप्रामाणिकएव। ततःतस्यत्यागएवन्यायतःयुक्ततरः इतिज्ञेयं। ननुपितृवाक्यप
रिपालनस्य महाधर्मत्वेनशास्त्रानुसारेण श्रीरामादिभिरपि अनुष्ठितत्वेनरामायणपुराणादिषुश्रूयतेयेनाऽ
स्यपितरोयाताःयेनयाताःपितामहाः इत्यादिमनुस्मृतिवचनादिभिः मातृदेवोभव पितृदेवोभव यथामा
तृमान्पितृमानाचार्यवान् ब्रूयात् इत्यादिस्मृतिश्रुत्यादिभिः प्रमाणैःपित्राद्याचारस्यपित्राद्युपदेशस्यचम
हाधर्मत्वेनपित्रादिपरंपराऽऽचारस्यशास्त्रविरुद्धत्वेत्यागःकर्तव्यइतित्वयाकथमुच्यतेइतिचेत्। बाढं। नत

याम पोच्यते अपितु पूर्वोक्त श्रुतिस्मृतिसूत्रादिबहुवचनैः शास्त्रविरुद्धाचारस्य शास्त्रविरुद्ध पित्रादि लौकि
कवाक्यस्यच त्याज्यत्वं उक्तमेव त्वया विस्मृतमिव भाति प्रत्युत पूर्वोक्तधर्मशास्त्रवचनेषु सूत्रादिषु च व
क्ष्यमाण धर्मशास्त्रवचनेषु च मातापितृ आचार्यादीनामपि शास्त्रविरुद्ध कर्मानुष्ठाने तेषामपि त्यागः कर्त्तव्य इ
ति प्रतिपाद्यते। तथाहि पूर्वोक्त गौतम धर्मसूत्रे तद्भाष्य रूप मस्करीयेच त्यजेत्पितरं राजघातकमित्यादिवाक्यैः
घटस्फोटन पर्यंत प्रयोगः प्रतिपाद्यते। मनुस्मृतौ तृतीयाध्याये श्राद्धनिमंत्रणप्रकरणे १५७ संख्याक श्लोके अ
कारणं परित्यज्य मातापितृगुरूंस्तथा इति वचने अकारणपरित्यक्त इति विशेषणात् शास्त्र विरुद्धाचार रूप
कारण सत्वे त्यागः अभिमत इति गम्यते एवं आपस्तंब धर्मसूत्रे आचार्यादीनां केषांचित् शास्त्रविरुद्ध निषिद्धा
चारे कृते तेषामपि सव्यवहार योग्यता नास्तीति च प्रतिपाद्यते एवं बहुषु धर्मशास्त्र ग्रंथेषु माता पित्राचार्यादीना
मेव शास्त्रविरुद्धाचारे त्यागस्यैव शास्त्राभिमतत्वे तेषां वाक्यानां तदाचाराणां शास्त्रविरुद्धानां त्यागस्य कर्तव्य
तायां कोपांतरापः प्रसज्येत नतु लोकाचारस्याप्रमाणिकत्वेपि कालिकाखंडाख्य पुराणवाक्यस्य वेदमूलत्वेन

शास्त्रत्वांगीकारावश्यंभावित्वात्। तादृशलोकाचारस्य मूलभूतत्वेन प्रमाणतया ऽस्माभिः पूर्वमुदाहृतत्वा
च्च तेनैव पुराणप्रमाणेन वाजसनेयब्राह्मणशाखामूलत्वेन प्रसिद्ध याज्ञवल्क्यकण्वमाध्यंदिनकात्यायनानां
शापप्राप्त्या तच्छाखिनां सर्वेषामपि अयोग्यत्वं सिद्धमेव भवति। इति चेत्सत्यं यदि एतत्कालिकाखंडाख्य पुराण
स्थवाक्यस्य याज्ञवल्क्यादिशापप्राप्तिप्रतिपादकस्य प्रामाण्ये सिद्धे सति त्वदभिमतार्थसिद्धिर्भवेत् तस्य प्राम
ण्यसंदेहः अस्माभिः पूर्वमेवउक्तः इदानीं तत्संशयनिवृत्तिरूपकं प्रामाण्यस्य त्वया कथं साध्यते नच अप्रामाण्यं
वा त्वया कथं साध्यत इति वाच्यं सर्वत्राप्रसिद्धत्वादेव प्रामाण्यसंदेहो वर्तत एव अतः तदप्रामाण्यस्य अस्माभिः अ
वश्य तया साधनीयत्वस्य केनापि हेतुना निर्बंधो नास्ति त्वया तु याज्ञवल्क्यादिशापप्राप्तिं साधयता अवश्यं तत्प्रा
माण्यं साधनीयमेव भवति तदसाधने तवाभिमततच्छापप्राप्तिप्रमाणाभावेन त्वदभिमतार्थसिद्धिर्न भवत्येव यथा
लोके कश्चित्पुरुषः स्वद्रव्यं अयमपहृतवान् अयं चोरः इति राजकीयस्थाने उक्तवान्यदि तदा केन प्रमाणेन
अयं चोर इति अस्य चोरत्वं त्वया कथं साध्यते इति राजकीयैः जनैः अयं पृष्टः तादृशप्रमाणं दर्शयितुं प्रवर्तते एवं

आपस्तंब धर्मसूत्रेपिराजधर्म प्रकरणे अपराधसंशयेन दंडःकर्त्तव्यः दैवेनवाविचित्यदंडंकुर्यात् इत्यर्थक
वाक्यादपिसंदिग्धापराधीनदंड्योभवति यस्तु तदुपरि अपराधरूपदोषं वदति सएवनतत्साधको भवति तथा
त्वमपि शापप्रापकवाक्यस्य प्रामाण्यं त्वयैवसाधनीयमिति प्राप्तं ममदोषशंकाभावादेव किमपि साधनीय
कार्यंनसंभवति अपिच लोकेसंदिग्धे अर्थेप्रमाणांतरैःनिश्चयासंभवे शब्दमात्रस्यैव प्रामाण्यांगीकारपक्षे त
च्छब्दस्यैवसर्वदेशेषु सर्वकालेषुसर्वजनैः उच्चार्यमाणस्य एकरूपतया स्थितत्वावश्यंभावात् तस्यशब्दस्य य
द्रूपेणप्रामाण्यंप्रसक्तं तद्रूपेणाच तस्यएकरूपत्वस्याप्यपेक्षितत्वात् तद्वाक्यस्य यद्ग्रंथांतर्भूतत्वं तस्यापि एक
रूपत्वावश्यंभावित्वाच्च अन्यथा एतेषु यत्किंचिद्व्यत्यासे तद्वाक्यस्य अप्रामाण्यं शिरसिनिक्षिप्तंभवति इत्य
यं न्यायः लोकशास्त्रयोः सर्वत्रप्रसिद्धः एवंस्थिते त्वयाकालिकाखंड इति उच्यते खलु सकस्मिन्पुराणे वर्तत
इति अस्माभिः पृच्छ्यते स्कांदपुराणस्थः इत्युच्यते यदि तदा अन्यैः त्वत्सदृशैः वाजसनेयब्राह्मणविरोधिभिः
एतद्दूषकैः कैश्चिज्जनैः सःकालिकाखंडः ब्रह्मांडपुराणस्थइति उच्यते तयोर्विरोधएकः नदास्तु पूर्ववाक्यसंद

भेश्चभिन्नभिन्नतया वर्तंत इत्यपरो विरोधः एवमेव विचार्यमाणे बहवो विरोधा उपलभ्यंते सर्वदेशेषु भागवतवि
ष्णुपुराणस्कांदस्थसूतसंहिता शंकरसंहिता ब्रह्मोत्तरखंड काशीखंड इत्यादिवत् कालिकाखंडस्य सर्वदेशे
षु सर्वजनैः दृष्टत्वेन श्रुतत्वेन वा प्रसिद्धिर्नास्ति कथंचित् यत्रकुत्रचित् अस्तित्वांगीकारेपि याज्ञवल्क्या
दिशापप्रतिपादक कालिकाखंडांतर्भूतसप्तदशाध्यायस्य कल्पितत्वमिति कैश्चिदुच्यते एवंस्थिते प्रसि
द्ध काशीखंडादिवत् निश्चयाभावात् संदिग्धप्रामाण्यस्य कथं वा निश्चयो भवेत् त्वपातस्य प्रामाण्यनिश्च
यः केनप्रकारेण साध्यते प्रत्युत पूर्वं यत्त्वया प्रदर्शितः स्कांदपुराणस्थकालिकाखंडाख्य ग्रंथः तदंतर्भूत
सप्तदशसंख्याकाध्यायात्मक वाक्येपि परस्परं महान्विरोधो दृश्यते तथाहि त्वदुदाहृतकालिकाखंडांतर्ग
त सप्तदशाध्याये। वैशंपायन नामासौ मुनिस्तत्र सुधार्मिकः याज्ञवल्क्यस्तथा कण्वो विप्रो माध्यंदिनाव्हय
१ कात्यायनश्च मेधावी नियमाध्ययने रतः यजूंष्यध्ययतां तेषां मुनीनां तु गुरोर्मुखात् इत्यत्र वैशंपायन
निकटे याज्ञवल्क्य कण्व माध्यंदिन कात्यायनाश्च चत्वारो ऋषयः यजुर्वेदाध्ययनं कृतवंत इति प्रतीयते महा

भारत भागवतविष्णुपुराणस्कांदपुराणांतर्गतसौरसंहितादिकेषु सिद्धपुराणेषु याज्ञवल्क्यएकएववैशंपाय
ननिकटे यजुर्वेदाध्ययनं कृतवानितिबहुशोश्रूयते अतः महाप्रमाणत्वेनसर्वजनपरिगृहीत भारतविष्णुपु
राणभागवतस्कांदपुरादिबहुप्रसिद्धानेकग्रंथेषुप्रतिपाद्यमानार्थेनसह अप्रसिद्धाज्ञातसंदिग्धप्रामाण्यक
कालिकाखंडवाक्यप्रतिपाद्यार्थस्यमहान्विरोधः प्रत्यक्षतएवदृश्यते अपिचकण्वमाध्यंदिनकात्यायनानांवैशं
पायननिकटे यजुर्वेदाध्ययनंजातमिति कुत्रापि भारतभागवतस्कांदादिपुराणेषुश्रुतिषुस्मृतिषुनश्रूयतेनदृ
श्यतेच प्रत्युत याज्ञवल्क्यादिकात्यायनांतानांचतुर्णामपिसहाध्यायित्वेनवैशंपायननिकटे अध्ययनंजातमि
तित्वत्कालिकाखंडेदृश्यते अन्यत्रसर्वत्रासंदिग्धप्रामाण्यकग्रंथेषुवाजसनेयिनामकयाज्ञवल्क्यशाखां
तःप्रविष्टत्वेनसाक्षात्परंपरयावायाज्ञवल्क्यशिष्यत्वमेवकण्वमाध्यंदिनकात्यायनानांश्रूयतेप्रतीयतेच अ
तोपि तवकालिकाखंडस्थस्यतद्वाक्यस्य इतर भारतपुराणादिप्रसिद्धप्रामाणिकग्रंथैःसहमहान्विरोधः
अपरोदोषः अतएवकात्यायनप्रणीतपरिशिष्टाख्यचरणव्यूहनामकसर्ववेदस्वरूपादिप्रतिपादकसर्वदे

शाख्यासमर्वशिष्टैः परिगृहीतप्रमाणभूतेग्रंथे तत्रवाजसनेयानांसप्तदशभेदाभवंति जाबाला बौधेया काण्वा
माध्यंदिनाः शापीयास्थापायनीयाः कापालाः पौंड्रवत्साः आवटिकाः परमआवटिकाः पाराशर्याः वैधेयाः वैने
याः औधेयाः गालवाः कात्यायनीयाः वैजवाश्चेति एतेकण्वमाध्यंदिनकात्यायनाश्चवाजसनेयात्मकयाज्ञ
वल्क्यशाखाप्रविष्टाइतिकृत्वासाक्षात्परंपरयावायाज्ञवल्क्यशिष्यकोटिप्रविष्टाइति अर्थः एतद्वाक्ये काण्वा
माध्यंदिनाः कात्यायनीयाः इतितत्तन्नामकशब्दैरवगम्यते अपिच कात्यायनशाखावेदलक्षणादिनिर्माय
कमातिशास्त्राख्यग्रंथेतत्प्रणीतृकर्तृकमंगलश्लोकेषु॥ प्रणम्याद्यंदिनमणियोगीश्वरशिरोमणिं सर्वज्ञंयाज्ञ
वल्क्यस्यशिष्यंकात्यायनंमुनिं इति महर्षेर्याज्ञवल्क्यस्य शिष्यंकात्यायनंमुनि कर्मणामनसावाचानत्वा
स्वाध्यायमारभेम् इत्यादिग्रंथैरपि कात्यायनादेरपियाज्ञवल्क्यशिष्यत्वमेव ननुयाज्ञवल्क्यसमानत्वं प्र
तीयते तथैवश्रीमद्भागवतेद्वादशस्कंदे षष्ठाध्यायेषट्षष्ठितमसंख्याकश्लोकव्याख्यान मूलश्लोकः।
याज्ञवल्क्यस्ततोब्रह्मंछंदांस्यधिगवेषयन् गुरोरविद्यमानानिसूपतस्थेर्कमीश्वरं ६६ अस्यश्रीधरीयव्या

ख्यानं। काण्वमाध्यंदिनादि शाखाप्रसंगमाह याज्ञवल्क्य इति गुरोर्वैशंपायनस्यव्यासेन विभज्यानुक्तत्वा
त् अविद्यमानानि अपि अधिकानि गवेषयन् मृगयन् सूपतस्थेसम्यक्तुष्टाव वेदानामीश्वरं तथाचश्रुतिः
ऋग्भिः पूर्वाह्णेदिविदेवईयते यजुर्वेदेतिष्ठतिमध्येन्हः सामवेदेनास्तमयेमहीयते वेदैरशून्यस्त्रिभिरेति
सूर्यइति ६६ इत्यादिना च व्यासः चतुर्वेदविभागकर्ता यजुर्वेदात्मकं एकं वेदं विभज्य केचिद्भागं वैशंपायना
य अध्यापयितवान् तद्भागः याज्ञवल्क्येन अधीतत्वात् तच्छर्दिरूपेण परिणतः अन्यैः वैशंपायन शिष्यैः
तित्तिरिरूपेणभक्षितः तेषां तैत्तिरीयाइत्याख्या अभवत् जगत्स्त्रष्टापरमेश्वरेण सर्गादौ सूर्याय उपदिष्टः वे
दभागः सूर्यमुखेनयाज्ञवल्क्यंप्रति आगतःसः यजुर्वेदभागः सूर्यनिकटे याज्ञवल्क्येनाधीतः इतिहेतोः वा
जसनेयिशाखा इतिनामधेयंप्राप्तः ततः याज्ञवल्क्येन उपदिष्टोभागः काण्वमाध्यंदिनकात्यायनादि अवांतर

शाखाभेदेन सप्तदशधाविभक्ताइति तथाच विष्णुपुराणे तृतीयांशेपंचमाऽध्याये शाखाभेदास्तु तेषांवेद

शपंचच वाजिनां काण्वाद्यास्तु महाभाग याज्ञवल्क्याः प्रकीर्तिताः इति। पूर्वोक्तचरणव्यूहाख्य ग्रन्थे। त

दर्शिताः। अथवाजसनेयिनां सप्तदश भेदा भवंतीत्यादिना॥ तस्मादेवसूर्यात्प्राप्तयजुर्वेद भागस्य। शुक्ल
यजुष्ट्वमिति आख्याप्राप्ता शुद्धत्वात्॥ तस्यैव अयातयाम इतिच॥ योग्यत्वप्रतिपादकशब्दवाच्यत्वं। सर्वशा
स्त्रेषुव्यवह्रियते। अनेनच्छर्दितः। यजुर्भागस्य कृष्णयजुष्ट्वमिति। मुक्तिकोपनिषदि श्रीरामेणैव हनुमते उपदि
ष्टम्। एवमेव सर्वत्र वेदेतिहास पुराणादिषु तैत्तिरीया इति। वाजसनेयिन इति। शुक्लयजुर्वेद इति। कृष्णय
जुर्वेद इतिच। विभक्तव्यवहारो बहुशो दृश्यते। अत एव। अस्मिन्नेव भागवते। अस्मिन्नेवस्कंधे अस्मिन्नेवा
ध्याये एतच्छ्लोकात्पूर्वश्लोकैरस्य मर्थो दृढीक्रियते॥ तथाहि॥ एकषष्ठितमश्लोकव्याख्याने॥ मूलं॥ वैशंपा
यनशिष्यावैचरकाध्वर्यवो भवन्। यच्चेरुर्ब्रह्महत्यां हःक्षपणंस्वगुरोर्व्रतम्॥ ६१॥ अस्यश्रीधरीयव्याख्या
नम्॥ यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह॥ वैशंपायनेति। चरकनाममनिरुक्तिमाह। यद्यस्मात्त्येतोः चेरु
रितिब्रह्महत्यारूपमंहः। क्षप यतीतितथाचस्वगुरोरनुष्ठेयंव्रतम्। तद्व्रताचरणाच्चरका इत्यर्थः॥६१॥ तथैव वि
ष्णुपुराणे तृतीयांशे। पंचमाध्याये द्वादशसंख्याकश्लोकव्याख्याने॥ मूलं॥ श्रीपराशरः॥ इत्युक्त्वारुधिरा

क्तानि सरूपाणि यजूंषि सः। छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः॥१२॥ अस्य श्रीधरीयं व्याख्यानं ना॰
स्ति॥ श्लोकः॥ यजूंष्यथ विसृष्टानि। याज्ञवल्क्येन वै द्विज। जगृहुस्तित्तिरा भूत्वा तैत्तिरीयास्तु ते ततः॥१३॥अ
स्य श्रीधरीयं व्याख्यानं यजूंषीति॥ छर्दितानां यजुषां विप्ररूपेण ग्रहणस्यायुक्तत्वात्। तित्तिराः पक्षिणो भूत्वा
मुनयस्तानि जगृहुः॥ ततो हेतोस्ते मुनयस्तैत्तरीयाः प्रसिद्धाः॥१३॥ मूलं॥ ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितै
स्तु यैः॥ चरकाध्वर्यवं ते तु चरणान्मुनिसत्तम॥१४॥ अस्य श्रीधरीयव्याख्यानं॥ ब्रह्महत्येति॥ ततोऽन्येषां चर
णाध्वर्युसमाख्यां निर्वक्ति॥ ब्रह्महत्याव्रतमिति॥ ब्रह्महत्यानिवृत्त्यर्थं व्रतं यैश्चरणात्। कर्मा चरणात्। चीर्णम्।
यजुश्शाखाध्यायित्वात् तेषां चरणाध्वर्युसमाख्या चरणाध्वर्यवस्ते त्विति च पाठः॥१४॥ श्लोकाः॥ श्रीपराशरः॥
एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः॥ अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः॥ २०॥ श्रीधरीयव्याख्यानम्
॥एवमिति॥ तस्य गुरुः वैशंपायनो यानि सम्यङ् वेत्ति॥ व्यासेनानुपदिष्टत्वात्॥२०॥ मूलं॥ यजूंषि यैरधीतानि
तानि विप्रैर्द्विजोत्तम॥ वाजिनस्ते समाख्याता सूर्योऽश्वस्सोऽभवद्यतः॥२१॥ अस्य व्याख्यानं नास्ति॥ मूलं॥ शाखा

भेदास्ते तेषां वेदश पंचच वाजिनां ॥ कण्वाद्यास्ते महाभागा याज्ञवल्क्याः प्रकीर्तिताः ॥२०॥ श्रीधरीयंव्याख्यानं
नास्ति ॥ इत्यादिशास्त्रानुरोधेन कण्वमाध्यंदिनकात्यायनादीनां वाजसनेयात्मकयाज्ञवल्क्यशाखाप्रविष्टत्वेन
याज्ञवल्क्यशिष्यत्वमेव सिद्धं भवति ॥ ननु याज्ञवल्क्यसहाध्यायित्वं संभवति ॥ एवंस्थिते त्वत्कालिकाख
ण्डस्थवाक्ये याज्ञवल्क्यादिकात्यायनांतानां चतुर्णामपि वैशंपायननिकटे यजुर्वेदाध्येतृत्वं प्रतिपाद्यते ख
लु ॥ अनयोः प्रामाणिकविष्णुपुराणाद्युक्तार्थकालिकाखंडार्थयोः परस्परात्यंतविरोधो दुरुद्धर एव भवति ॥
अतोपि हेतोर्त्वत्कालिकाखंडवाक्यस्य विरोधस्सिद्ध एव ॥ किंच ॥ त्वत्कालिकाखंडवाक्ये ॥ गुरोर्गुरोश्च
पुत्रस्त्वं गुरुशिष्यांतरालके । चचार बाल्यश्चापल्यात्कौंडिकस्यात्मजो मुनेः ॥२॥ इतिप्रतिपादितोर्थः । वि
ष्णुपुराणभागवतस्कंदपुराणस्य सौरसंहितादिषु भारतादिषु च याज्ञवल्क्यस्य वैशंपायन एव प्रथमगु
रुः । वैशंपायनस्य तु वेदव्यास एव गुरुः । इति आश्वलायनगृह्यसूत्रे च ब्रह्मयज्ञतर्पणप्रकरणे गुरुपरंपरा
प्राप्तानां पितृत्वे न पितृतर्पणकोटिप्रविष्टानां कौषीतकऐतरेयशाकलबाष्कलसांख्यायनशौनकआश्वलायना

दिसहपाठेषु व्यासशिष्याणां मुख्यतया गौणतया परंपरया वा। ऋकुशाखाध्यापयितृकोदिष्टविष्टत्वेन।
सुमंतुजैमिनिवैशंपायनपैलसूतादीनां परिपठितत्वादेतेषामेव सुमंतुजैमिनिवैशंपायनादीनां महाभारते
पराशरमाधवीयादिषु च प्रत्येकं चतुर्वेदप्रवर्तकत्वेन चतुर्णां सुमंतुजैमिन्यादीनां पुराणप्रवर्तकत्वेन सूत॰
स्य च व्यासोपदेशात्। व्यासशिष्यत्वमिति सर्वत्रउद्घुष्यते। तद्विहाय तत्र कालिकाखंडे एतद्वाक्येन कौंडिकस्य
शिष्यो वैशंपायनः वैशंपायनस्य शिष्याः याज्ञवल्क्यादिकात्यायनांताः॥ चत्वारः शिष्या इति प्रतिपादिताः।
अयमर्थस्तु। यत्र कुत्रापि प्रामाणिकश्रुतिस्मृतीतिहासपुराणादिशास्त्रग्रंथेषु लौकिकेषु च न प्रतिपादितः॥ प्रस्तु
त॥ व्यासशिष्यो वैशंपायनः॥ वैशंपायनशिष्यः एतेषु मध्ये याज्ञवल्क्य एक एव इत्यर्थस्तु सर्वत्र प्रसिद्धतरो दृ
श्यते॥ तस्मादनयोरप्रसिद्धसंदिग्धप्रमाणकएकदेशरूपतत्र कालिकाखंडप्रतिपाद्यार्थस्य सर्वप्रसिद्धप्रमाणशा
स्त्रप्रतिपाद्यार्थयोश्च अत्यंतविरोधस्तु सर्वैरनुभूयत एव॥ तस्य चैवाऽभवच्छिष्यो वैशंपायननामकः॥ तदा
ध्ययनविघ्नं नो माभूदिति विशंकितः॥४॥ वारयामास तं बालं कुशैस्संताडयत्पदे॥ कुशैस्संताडनादेव बा

लः पंचत्वमागतः ॥ ५ ॥ ततोथ कौंडिको दुःखात्सुरुरोद महास्वनः । वैशंपायनस्त्वस्तु ब्रह्महत्यातुरोभवदिति ॥ अपिच ॥ तत्कालिकाखंडवाक्येस्तैश्लोकैः कौंडिकशिष्यो वैशंपायनः । स्वशिष्यान् याज्ञवल्क्यादिकात्यायनांतान् । अध्यापयंस्तन् । स्थितः । तदानीं स्वस्य स्वशिष्याणां चांतराले स्वगुरोः कौंडिकस्य पुत्रो बाल आगतः । गुरुशिष्ययोर्मध्ये आगतश्चेदनध्ययनं कर्तव्यमिति शास्त्रोपदेशं स्मृत्वा तं बालं दर्भैरताडयत् ॥ तावन्मात्रेण स बालो मृतिं गतः । तत्प्रयुक्तदुःखेन कौंडिकस्सुरुरोद । बालहननं । गुरुपुत्रहननं । ब्राह्मणहनननिमित्तदोषत्रयं वैशंपायनस्य प्राप्तम् । एतादृशभयात्त्कौंडिकं प्रतिगत्वा स्वप्राप्तं निवेदयामास । अस्यार्थस्य विष्णुपुराणभागवतादिप्रसिद्धा । संदिग्धप्रमाणरूपपुराणादिषु कस्मिंश्चिन्मेरुपर्वतप्रदेशे कस्मांश्चित्कालविशेषादर्वागेव सर्वैः ऋषय आगंतव्याः । तदवधिकालानंतरं कश्चन ऋषिरनागतश्चेत्तस्य सप्तरात्रांतर्भूतकाल एव ब्रह्महत्या भविष्यतीति बहुभिर्ऋषिभिः प्रतिज्ञा कृता । तस्मिन्व्यवस्थितावधिकाले वैशंपायनो नागतः ॥ अत ऋषीणां शापसदृशीप्रतिज्ञावशात् । स्वस्त्रीयं बालं पदास्पृष्टं अताडयत् । तावन्मात्रेण स तु मृतः । तत्प्रयुक्तब्रह्महत्या

द्रोषो वैशंपायनस्यागतः। तद्व्रतचर्यां कर्तुं अशक्तस्सन्। स्वशिष्यान्प्रति। यूयं प्रायश्चित्तं मत्कृते कुरुध्वमित्युक्तवान्। एतस्मिन्नंतरे याज्ञवल्क्यस्स्वगुरुं वैशंपायनं प्रति। अल्पशक्तिमद्भिस्तैः किं प्रायश्चित्तं क्रियते। अहं सुदुष्करमपि प्रायश्चित्तं करिष्यामीत्युक्तवान्। इत्याद्यर्थः स्पष्टतया प्रतीयते। अतस्त्वत्कालिकखंडप्रतिपाद्यार्थस्य विष्णुपुराणभागवतभारतादिप्रमाणग्रंथप्रतिपाद्यार्थस्य च महान्विरोधो ज्ञायत एव॥ किंच॥ कृत्वानध्ययनं ते तु मुनयः सर्व एव तु। तूष्णींभूता तदास्विनाः स्वाध्यायाभावशंकया॥१७॥ कोयं विघ्नस्समुत्पन्न इति चाहुः परस्परं॥ स वैशंपायनो गत्वा प्रणम्य चरणौ गुरुं॥१८॥ प्रसीद भगवन्मह्यं गुरुद्रोहस्य निष्कृतिं॥ हत्यायाश्चैव बालस्य निष्कृतिं प्रकरोम्यहं॥१९॥ तस्य तद्वचनं श्रुत्वा गुरुस्तस्यापि कांडिकः। उवाच तं तु मा भैषीरिति तत्स्य हितं ब्रुवन्॥१०॥ याज्ञवल्क्यं समाहूय कांडिकः प्राह तद्गुरुः। वैशंपायनसंज्ञस्य मम बालवधास्तु नः॥११॥ ब्रह्महत्याबालवधौ संजातौ नियतात्मनः। तन्निष्कृतिं भवंतश्च प्रकुर्वंतु समाहिताः॥१२॥ त द्गुरोश्च वचः श्रुत्वा याज्ञवल्क्योऽब्रवीद्वचः॥ कण्वं कात्यायनं चैव तथा माध्यंदिनं प्रति॥१३॥ अस्माभिः सर्वशिष्यैश्च कण्वमाध्यं

दिनादिभिः। वैशंपायनहत्यायाव्रताचरणमुक्तवान् ॥१४॥ तच्छ्रुत्वामुनयः सर्वेकण्वमाध्यंदिनादयः।
याज्ञवल्क्यंप्रतिप्राहुस्सरोषमिदमद्भुतं॥१५॥ कर्ताकर्मफलंभुङ्क्ते अन्येषांतत्रकाकथा।वैशंपायनएवैकः स्
रोन्निष्कृतिंततः॥१६॥ गुरुस्तेषांवचः श्रुत्वासरोषमिदमब्रवीत्॥मत्तोधीतोवेदभागोह्युष्माभिर्दीयतांम
म॥१७॥ ततस्तेचुक्रुशुस्सर्वेयाज्ञवल्क्यादयस्तदा॥ अधीतवेदभागानांछर्दिंप्रापास्तदाभुवि॥१८॥ ततोये
तुगुरोश्शिष्यास्तित्तिरापक्षिणोभवन्।तेतुचान्येतथाभूत्वातेतुचान्येपिसर्वशः॥ तच्छर्दितयजुर्जातंह्यन्ये
शिष्यागुरोस्तकये भक्षयंतस्ततस्तेपितैत्तिरीयाःभवंस्तदा।२०॥ ततोगुरुःकोपयुक्तश्शशापमुनिपुंगवान्
॥कण्वादयस्ततोह्यूयंचंडालत्वमवाप्स्यथ॥२१॥ इत्यादिग्रंथेषुकांडिकस्यवैशंपायनगुरुत्वंप्रतीयते।
पूर्वोक्तरीत्याप्रमाणभूतचरणव्यूहाख्यपरिशिष्टग्रंथेकांडिकस्यतैत्तिरीयशाखाप्रविष्टत्वंप्रतीयते।तथान्त्य
परिशिष्टाख्यचरणव्यूहेतैत्तिरीयकानांद्विभेदाभवंति॥ औख्याः।कांडिकेयाश्चेति॥ तत्रकांडिकेयानांपंच
भेदाभवंति॥कालेयाः॥ शाट्यायनीय ः॥ हिरण्यकेशाभारद्वाजा॥ आपस्तंबाश्चेति॥ अथवा॥ आयस्तंबीधे

धायनी। सत्याषाढीहिरण्यकेशी॥ औधेया श्चेति॥ इत्यत्र। कांडिकस्यापि आपस्तंबबोधायनवत् तैत्तिरीय॰
शाखाप्रविष्टत्वश्रवणात्। तत्कालिकाखंडवाक्योक्तकांडिकस्य वैशंपायनगुरुत्वासिद्धेः॥ तैत्तिरीयाणां
तु खंडत्रयोक्तरीत्या वैशंपायनात् अध्ययनग्रहणानंतरं तदध्ययनविषयीभूतयजुर्गणस्य याज्ञवल्क्य
छर्दितत्वेन तद्भक्षणात् तैत्तिरीयशाखोत्पत्तिरिति तत्कालिकाखंडग्रंथेपि विष्णुपुराणभागवतादिषु च॰
स्पष्टतया प्रतीयमानत्वात्। याज्ञवल्क्यगुरोरपि वैशंपायनस्य कांडिको गुरुरिति कथं वा संभाव्येत अतो
पि तत्कालिकाखंडवाक्यस्य लोकसिद्धप्रमाणभूतविष्णुपुराणभागवतादेश्च अर्थतः महान्विरोध इति
त्वयैव ज्ञायते॥ अपि च॥ याज्ञवल्क्यादीनां चतुर्णामपि वैशंपायनेन कण्वादयस्त्ततो यूयं चंडालत्वमवा॰
प्स्यथ इति शापो दत्त इति तत्कालिकाखंडे तूक्तं प्रसिद्धप्रमाणरूपविष्णुपुराणभागवतादिषु तु। वैशंपा
यनेन स्वभागस्य ब्रह्महत्यायाः प्रायश्चित्तं मत्कृते यूयं कुरुध्वमिति स्वशिष्यान्प्रति उच्यमाने सति याज्ञवल्क्यः
अल्पशक्तिभिः किं क्रियते। अहं करिष्यामीत्युक्तिमात्रेणैव वैशंपायनः क्रुद्धः सन्। मदधीतं यजुर्जातं महांत्व

यादीयतामित्युक्तोयाज्ञवल्क्यः। छर्दिंकृत्वापुनरध्ययनार्थंसूर्यंप्रतिजगामेतिप्रतिपाद्यते॥नतुवैशंपायनः
शापंदत्तवानितिप्रतिपाद्यते। अतोपिनिश्चितप्रामाण्यकभागवतादिपुराणादेःसंदिग्धप्रामाण्यकतत्त्वका
लिकाखंडस्थवाक्यस्यचमहान्विरोधस्सिद्धएवभवति॥अपिचतत्त्वकालिकाखंडे। वैशंपायननामासौमु
निस्तत्रसुधार्मिकः। याज्ञवल्क्यस्तथाकण्वोविप्रामाध्यंदिनादयः। कात्यायनश्चमेधावीनियमाध्ययनेरताः
॥यजूंष्यध्ययतांतेषांमुनीनांतुगुरोर्मुखात्॥गुरोर्गुरोश्चपुत्रस्तुगुरुशिष्यांतरालके। इत्यादिवाक्येन॥
याज्ञवल्क्यंसमाहूयकौंडिकःप्राहतद्गुरुः। वैशंपायनसंज्ञस्यममबालवधात्त्वनः। ब्रह्महत्याबालवधोसं
जातोनियतात्मनः। तंनिष्कृतिंभवंतश्चप्रकुर्वंतुसमाहिताः॥तद्गुरोश्चवचःश्रुत्वायाज्ञवल्क्योब्रवीद्वचः॥
कण्वंकात्यायनंचैवततोमाध्यंदिनंप्रति॥अस्माभिस्सर्वशिष्यैश्चकण्वमाध्यंदिनादिभिः॥वैशंपायनहत्या
याःव्रताचरणमुक्तवान्। तच्छ्रुत्वामुनयःसर्वेकण्वमाध्यंदिनादयः। याज्ञवल्क्यंप्रतिप्राहुस्सरोषमिदम
द्भुतं॥इत्यादिवाक्यैश्चवैशंपायननिकटेयाज्ञवल्क्यकण्वकात्सायनमाध्यंदिनाश्चत्वारस्सर्वयजुर्वेदाध्य

यनंकृतवंतइतिकौंडिकपुत्रहननप्रयुक्त इत्यादोषः वैशंपायनस्य आगतइति।तेनकरिष्यमाणहत्या
व्रतंयूयंकुरुध्वमिति याज्ञवल्क्यादिकात्यायनांतशिष्यानेवकौंडिक आहूयउक्तवानिति॥ तैर्व्रताचरणानं
गीकारात्मदधीतवेदजातंदीयतामिति वैशंपायनेनोक्ताः एतेचत्वारएवछर्दिंकृतवंतः ततःकोपविशिष्ट
स्सन् एतान्येवचतुःसंख्याकान् शिष्यान्प्रति वैशंपायनोशापंदत्तवानित्यंतग्रंथेषुएतेचत्वारएवतन्निकवे
अध्ययनंकृतवंतइत्यर्थः स्फुटतयाप्रतीयते।तदनंतरंछर्दितंयजुर्गणंवैशंपायनस्य अन्यशिष्याः गृहीतवंत
इतिचप्रतीयते।अनयोर्विरोधएकः॥अन्यबहुशिष्याणांसत्वेपूर्वमेवतांत्सर्वानाहूययूयंसर्वेएतद्ब्रह्महः
त्याव्रताचरणंकुरुध्वमितिकिमर्थंनोक्तवान्। तैरनंगीकारे।मत्तअधीतोवेदभागोदीयतामिति तान्प्रतिकिम
र्थंनोक्तवान्।तदनंतरंतैरपिछर्दिःकिमर्थंनकृता।तेषांकिमर्थंशापंनदत्तवान्।इत्याद्याक्षेपस्यकिंसमाधानं
त्वयाक्रियते॥ किंच॥ एवंद्वादशवर्षाणि सूर्यंध्यात्वाविचक्षणाः।सूर्यप्रसादंलब्ध्वाचतेनवेदगणांस्तथा॥
येनवाजिस्वरूपेण अध्यापयितवान्प्रभुः॥ अयातयामसंज्ञानिशुक्लसंज्ञानिकानिचित् यजूंषि शुद्धरूपाणि

अध्यापयितवान्खगः। इत्यादितवकालिकाखंडवचनैरेवचंडालत्वप्राप्तान्याज्ञवल्क्यादीन् वेदगणान् ॥
अयातयामसंज्ञानिशुल्कसंज्ञानिकानिचित्॥ यजूंषिसूर्यअध्यापयितवानितिवाक्यैः परस्परविरोधोमहा
न्लभ्यते॥ एतादृशअयोग्यत्वप्राप्तान्सूर्यः कथंअध्यापयेत्॥ तद्वद्वाक्यानिशुल्कानीति। शुक्लानि। अया
तयामानीति। योग्यानिकथंवाभवेयुः॥ एतादृशविरोधेपिकथंत्वयापरिह्रीयते। इति॥ त्वयैवज्ञातव्यः॥ ए
वंपूर्वोक्ताः वक्ष्यमाणाश्चबहवोविरोधाश्चवक्ष्यमाणरीत्याश्रुतिस्मृतिपुराणेतिहासन्यायशुक्त्यनुभवादि
भिः बहवोविरोधाश्चतत्तत्प्रकरणप्रतिपादनवेलायांप्रकाश्यंते॥ इत्यलमित्युपरम्यते॥ प्रस्तुतपुराणाद्यंत
रेषुयाज्ञवल्क्यादीनांतच्छाखिब्राह्मणानांच माहात्म्यमेवप्रतिपाद्यते। तथाहि॥ आदित्यपुराणे। शौनकादि
ऋषयऊचुः॥ वदसूतमहाभागसर्वशास्त्रार्थपारग॥ जनकस्योपदेशंचयाज्ञवल्क्यस्यवैभवं॥ सूतः। सर्व
दाब्राह्मणापूज्यास्सर्वदासर्वचेतनैः। सर्वस्यप्रभवोविप्राः श्रुताध्ययनशालिनः। तेभ्यःक्रियापराःश्रेष्ठास्ते
भ्योप्यध्यात्मवित्तमाः॥ ऋषयः॥ किंतुल्याब्राह्मणास्सर्वेसंतिहीनाधिकाःयथा। वक्तुमर्हस्यशेषेणसर्वशा

स्त्रविशारदाःस्मृताः। हीनत्वमधिकत्वंचतत्स्वधर्मनिबंधनात्। स्वधर्माच्छ्रेष्ठतांयांतिपरधर्मान्निकृष्टतां। गायत्रीमात्रसारास्तुतैत्तिरी
यस्ततोधिकः॥ ऋग्वेदीचततःश्रेष्ठोसामगस्तुततोधिकः। ततस्त्वपाठ्यसाम्नायांशाखायांशिक्षितोद्विजः। सामगश्रेष्ठादिशि
ष्याणांछंदोगानांमपिस्वयं। आचार्योयाज्ञवल्क्योहिस्वश्रुत्याप्रतिपादितः। तस्मात्तदीयायेशिष्यास्सामगेभ्योऽधिका
स्मृताः। तेषांशिष्यास्तुयेविप्रास्तेषांतेषांतथापराः। शिष्यास्तेषामेवमेवपारम्पर्यसमागताः। तेभ्योहव्यानिकव्यानिदेयान्येव
द्विजोत्तमैः॥ विद्यमानेषुविप्रेषुयजुश्शाखागतेषुवै। तान्हित्वाभोजयेदन्यान्हव्यकव्येषुनारकी॥ यजुश्शब्दोयमत्रैवशु
क्लवेदेचयुज्यते॥ यजूंषियैरधीतानितेतुविप्रैर्द्विजोत्तमाः। यस्मात्सूर्योवाजिरूपीभूत्वावेदंयजुर्गणम्॥ अ
ध्यापयामासततोयाज्ञवल्क्यंमहामुनिं। ततस्तेशाखिनस्सर्वेवाजिनामानएवहि॥ भवेयुस्सर्वदायस्मा
द्वाजिरूपधरोप्यहं। तुभ्यंयजुर्गणंसम्यक्शुद्धरूपंप्रदत्तवान्। इतिसूर्यस्तुप्रोवाचयाज्ञवल्क्यंमहामु
निं ततःप्रभृतितेसर्वेकाण्वमाध्यंदिनादयः॥ तच्छाखिनस्तुविप्रायावाजिसंज्ञाबभूवुहे॥ भोक्तृष्वन्येषुसम
विप्रेषुपित्र्येदैवेचकर्मणि॥ तद्वाजिनांभावनायाब्राह्मणानांकृतंभवेत्। सौवर्णादिषुबिंबेषुदेवताभाव

नाथयथा। भोक्तव्यमन्येषुविप्रेषुवाजिब्राह्मणाभावनायाज्ञवल्क्यप्रभावस्तुवर्णितोवैष्णवेपुरा। पराशरेणमुनिना
कण्वादीनांविशेषतः॥ जनकस्यमहाबाहोर्ब्रह्मिष्ठस्यविशेषतः। गुरुत्वंशापयोगीशोऽस्वकीयोपनिषच्छ्रुतेः॥ ए
तद्वृत्तान्तमखिलं आरण्योपनिषत्स्फुटं॥ पंचमेपाठकेषष्ठेयाज्ञवल्क्यस्यवैभवं आश्वलादिविदग्धान्तैर्मुनि
भिः स्वस्वयुक्तिभिः। ताडितोऽपिपरंखेदंनप्रापइतिवैश्रुतिः॥ तेषांचविजयंलब्ध्वास्वप्रभावंप्रदर्शयन्॥ जनक
स्यविदेहस्यज्ञानमुत्पादयन्भृशं। मैत्रेय्याश्चात्मविज्ञानंदृढमुत्पादयंस्ततः। पारिव्राज्यंगृहीत्वासौयाज्ञव
ल्क्योमहामुनिः॥ इत्यादिकंचसैवाहबृहदारण्यकश्रुतिः। श्रुतिस्मृतिपुराणेषुयाज्ञवल्क्यस्यवैभवम्। यद
स्तिवेत्तिकोवान्यःकृष्णद्वैपायनादृते॥ तस्माद्धव्यानिकव्यानिदातव्यानिद्विजातिभिः। वाजिनेदत्तमेकंतु त
त्कोटिगुणितंभवेत्॥ कृच्छ्रंचैवातिकृच्छ्रंचचांद्रायणमथापिवा॥ अश्नीयाद्याचपित्वान्नंशुद्धंवाजसनेयिनं
स्त्रियंनग्नांनवीक्षेतदृष्ट्वासूर्यंविलोकयेत्। संध्याकालेचरात्रौचविप्रंवाजसनेयिनं। निशीथेनिर्जलेदेशेरोगा
र्तंवाकलेवरे॥ औषधेपीयमानेवात्वरायांसंकटेयथा॥ स्पृष्टोयदिभवेद्विप्रोचंडालादिशतैरपिशुचिरेवभवे

डूयोस्पृष्ट्वावाजसनेयिनम्। अश्राव्यवचसांरात्रौपापिनांप्रतिलोमिनां वात्वंचेच्छृणुयाद्धिप्रोवाजिवाजीतिकी
र्तयेत् ॥ अज्ञानाद्यदिशूद्रंवास्पृश्यानंवाशवांतिकंप्रदक्षिणंपरिक्रामेत्सपापीब्रह्महाभवेत् भूप्रदक्षिणमेतस्य
प्रायश्चित्तंविदुर्बुधाः ॥ रहस्यमेतंनविदुर्वाजिविप्रप्रदक्षिणम् ॥ शूद्रान्नंवारनालंवाकीटकेशादिदूषितं॰
निर्माल्यंरजकंभोवालशुनंवाप्रमादतः । भक्षयित्वातुसर्वस्यप्रायश्चित्तमिदंपरम्। यद्वाजिनांगृहेगत्वातदी॰
यान्नस्यभोजनम् कलेर्दोषनिवृत्त्यास्यात्तारकंहिविधंस्मृतम्। शिवसंकीर्तनंवाथवाजिब्राह्मणकीर्तनंसत्यंसत्यं
पुनस्सत्यंभुजमुध्दुत्यकथ्यते। नकश्चित्सदृशोलोकेविप्रोवाजसनेयिनां ॥ एवंप्रकारेणअन्येष्वपिपुराणे
तिहासादिप्रामाणिकग्रन्थेषुएवमेवउच्यमानत्वात्। कथंनिर्णयःकर्तव्यइतित्वांप्रतिअस्माभिःपृच्छ्यते
। अनयोःकालिकाखंडादित्यपुराणयोः ॥ पुराणत्वाविशेषात्। कस्याप्रामाण्यमितिनिश्चयोभवति। ननु ॥
मयापूर्वोक्तप्रकारेणप्रायेणबहुप्रदेशेषुकालिकाखंडोक्तरीत्याबहुजनैर्वाजसनेयिब्राह्मणानांन्यूनतापा॰
द्नेनसव्यवहारादिकंनकुर्वंतीतिहेतोः मीमांसान्यायेन बह्वनुग्रहन्यायोत्रआनीतव्योभवति। बहुजनैस्त

थानुष्ठितत्वात्। तन्मूलभूतस्यकालिकाखंडस्यैवप्रामाण्यंवक्तव्यमिति उचितंभवति। आदित्यपुराणस्यतु अ
प्रसिद्धत्वात्। लोकाचारविरुद्धत्वाच्च अप्रामाण्यमेववक्तुमुचितंभवति॥ इतिचेत्सत्यं॥ यदिलोकाचारः शा
स्त्राविरुद्धश्चेत्प्रामाणिकः। विरुद्धश्चेदप्रामाणिकइति धर्मशास्त्रवचनशतैः पूर्वमस्माभिः स्थापितं। तथापि वि
स्पष्टमितिदृश्यते। बह्वनुग्रहन्यायस्यापिप्राधान्यंतदाभवति। स्वसजातीयविद्यादियोग्यतादिविशिष्टानामेवस
मानानांबहूनांमध्येबहुजनैरनुगृहीतः। स्वीकृतः। पक्षएवबह्वनुग्रहन्यायइतिमीमांसायां प्रतिपाद्यते। तन्मध्येअ
ल्पजनैरनुगृहीतःपक्षः नन्यायइतिमीमांसायांलोकेपितात्पर्यसिद्धांतः। एतादृशलक्षणोबह्वनुग्रहन्यायोयदाभव
ति। सएवबह्वनुग्रहन्यायइति॥ पराशरमाधवीयेप्रायश्चित्तकांडे। अष्टमाध्यायेसप्तमश्लोकः॥ मूलं॥ चत्वारोवा
त्रयोवापियंब्रूयुर्वेदपारगाः॥ सधर्मइतिविज्ञेयोनेतरैस्तुसहस्रशः॥ ७॥ अस्यमाधवीयंव्याख्यानं। धर्मशास्त्रप
रिज्ञानस्यन्यायनिर्णयकौशलस्यचसद्भावेप्यनवधानादिनिमित्तदोषशंकाप्युदासाय स्वसमानैस्त्रिचतुरैस्सह संवा
दोपेक्षितइत्यभिप्रेत्याह। चत्वारइति॥ बहूनामन्योन्यसंवादेनयोनिश्चितः। सएवधर्मइतिविज्ञेयः। इतरैरन्यो

न्यसंवादमनादृत्यमाणैस्सहस्रसंख्याकवचनपाठपुरस्सरमभिहितोऽपि विसंवादशंकाया अनिराकृतत्वान्नासौ धर्मत्वेन स्वीकार्यः । तस्माच्छास्त्रविरुद्धस्य मूढाचारस्य अप्रामाणिकत्वेन अग्राह्यत्वमिति ॥ पूर्वं धर्मशास्त्रोक्तमेव सर्वदा त्वया अनुसंधेयं । अन्यथा बहुजनपरिगृहीतस्यैव आचारस्य बह्वनुग्रहन्यायेन ग्राह्यत्वांगीकारे ब्राह्मणापेक्षया ब्राह्मणेतरस्य चंडालांतमनुष्याणां बहुसंख्याकत्वेन । मनुष्यत्वाविशेषात् । बह्वनुग्रहन्यायबलाच्च । तेषामाचारस्यैव मुख्यतया ग्राह्यत्वापत्तिप्रसंगो दुर्वार एव भवति ॥ अपि च ॥ तदपेक्षयापि । द्वीपांतरस्थबहुसंख्याकमनुष्यविशेषाणां तेषामपि तत्परंपरया अनादिप्राप्तस्य अंत्यमलभक्षणादिभावस्य मनुष्यत्वाविशेषाद्धेतोः । बह्वनुग्रहन्यायबलाच्च ॥ तस्यापि आवश्यकतया मुख्यग्राह्यतापत्तिप्रसंगश्च । भवेदेव । तदपेक्षयापि पश्वादीनां बहुत्वेन । जातिमात्रावच्छेदेन प्राप्तस्य सर्वदेशसर्वकालव्याप्तस्य स्वसृगमनादेराचारस्य प्राणित्वाविशेषात् । बह्वनुग्रहन्यायबलाच्च स्वीकारस्यापि अवश्यकरणीयत्वापत्तेर्दुर्वारत्वाच्च ॥ तस्मान्मनुष्यमात्रस्य शास्त्रानुगृहीताचारमात्रानुष्ठातृत्वं युक्तम् । शास्त्रविरुद्धाचारानुष्ठातॄणां तु लोकशास्त्रविरोधेन ऐहिकामुष्मिकफलाभावेन सह । अनर्थप्राप्तिर्दुर्वारैव

भवति॥ इतिहेतोरपिमूढबहुजनपरिगृहीताध्या रमूलभूतस्यकालिकाखंडस्यापिप्रामाण्यंनिश्चितत्वेननसिध्य
तीतितत्त्वैवज्ञायते। अपिच॥ लोकेपि॥ निश्चितप्रमाणकस्यसंदिग्धप्रमाणकस्य व्यवहारस्यएकस्मिन्विषये
समावेशेसति। निश्चितप्रमाणकस्यैवबस्तुतत्त्वसिद्धिर्भवतीतिसर्वजनैरभ्युपगम्यते। तद्यथा। कश्चित्पुरुषः कांचित
स्त्रियमुद्दिश्य। इयंपरपुरुषसंयोगंकृतवतीत्युक्तवान्। तदाव्यभिचारसंशयेप्राज्ञाःमिलित्वाविचारंकृतवंतः॥व्य
भिचारदर्शनेप्रमाणाभावोनिश्चितोवर्तते॥ अयंतुपुरुषोवदति। अस्यवाक्यस्यप्रामाण्यसंदेहः। व्यभिचारस्य
तुकेनचित्प्रमाणेनाप्यसिद्धत्वात्। व्यभिचाराभावोनिश्चितप्रमाणकइति सर्वैर्निश्चयः क्रियते॥ अन्यथा॥ केन
चिद्दुष्टेनस्वाननुकूलद्वेषेण आरोपितमिथ्याव्यभिचारेणवा। केनचित्संदिग्धानुमानेनवा। कैश्चिदन्यैरपरे
ष्संदेहोत्पादनेनवा। व्यभिचारनिश्चयेकृतेसर्वस्त्रीणामपिव्यभिचारवत्त्वसंदेहप्राप्त्यासर्वस्त्रीणामपिव्यभि
चारवत्त्वप्रसंगोदुर्वारोभवति। एवंरीत्यैवस्वमातृस्वभ्रातामहि। स्वपितृपत्न्यादिस्ववंशोत्पादकसर्वस्त्रीणांव्य
भिचारवत्त्व. संदेहप्राप्त्यास्ववंशजनकस्त्रीणामधोकृत्याश्वितस्त्रियः शूद्रचंडालादिसंयोगसंभवेनतदुत्प.

प्र·शा
२२२

न्नवंशोत्पन्नत्वेनस्वस्यापिचंडालत्वादिसंभावनायां दुर्निवा र्यत्वप्रसंगस्संभवत्येव ॥ अतोनिश्चितप्रमाणकव्य
वहारानुसारेणसंदिग्धप्रमाणकव्यवहारस्यापिविनीयमानत्वौचित्यात् । प्रसिद्धनिश्चितप्रामाण्यकविष्णुपुरा
णभागवतभारतादिउक्तानुसारेणआदित्यपुराणस्यप्रामाण्यंवक्तुमपि उचितत्वसंभवः ॥ कालिकाखंडस्यतुस
र्वप्रमाणान्यायविरुद्धत्वेनप्रामाण्यसंदेहोदुरुद्धरएव ॥ किंच ॥ एकप्रमाणविषयेवस्तुनितत्प्रमाणेननिश्चितेस
त्यपितस्य अनेकप्रमाणबाधितत्वेमातेनादृशः प्रत्यक्षप्रमाणस्यापिप्रामाण्यापगमस्संभवत्येव ॥ तद्यथा ॥ प्र
त्यक्षप्रमाणसिद्धेसर्वमनुष्यैर्गृहीतेप्रादेशमात्रश्चंद्रइत्याकारकप्रत्यक्षविषयेचंद्रेप्रादेशमात्रपरिमाणवत्वभ्रांति
ज्ञानविषयोभवति ॥ तद्यथा ॥ प्रादेशमात्रश्चंद्रइतिसर्वेषांसर्वदाऽसंदिग्धत्वेनप्रत्यक्षविषयत्वेपिह्योरादिदशायां
ज्योतिश्शास्त्रोक्तरीत्यालक्षयोजनपरिमितमंडलस्य । दूरस्थपर्वतस्ययोजनांतरव्यवधानेसति अल्पपरिमा
णवत्वदृष्टांतेनलक्षयोजनादूर्ध्वेस्थितमंडलस्यअल्पपरिमाणवत्वदर्शनानुमानेनपौर्णमास्याचंद्रोदयकालेहस्त
चतुष्टयपरिमितमंडलस्यप्रत्यक्षदर्शनाच्चप्रादेशमात्रपरिमितत्वस्यचंद्रप्रत्यक्षप्रमाणस्यप्रमाणत्रयबाध्यत्वंयथा

नि·

२२९

॥ तथाकालिकाखंडस्यसंदिग्धप्रामाण्यकत्वेनप्रामाण्यनिश्चयाऽसिद्धौसत्यां। तस्यश्रुतिस्मृतीतिहासपुराणा
दिबहुप्रमाणबाध्यत्वंसंभवतीतिकिमुवक्तव्यं॥ तस्मादपिकालिकाखंडवाक्यस्यप्रामाण्यनिश्चयासिद्धिस्संभ
वत्येव॥नन्नु। तवादित्यपुराणस्यापिकालिकाखंडवदेवाप्रसिद्धत्वात्॥सामान्यशास्त्राप्रतिपादितवाजसनेयब्रा
ह्मणमाहात्म्यप्रतिपादकत्वाच्च। प्रामाण्यनिश्चयोनभवत्येवेतिचेन्न॥आदित्यपुराणस्यापि अर्थवादसदृशत्वे
नवाजसनेयिब्राह्मणमाहात्म्यप्रतिपादकत्वेपियाज्ञवल्क्यादीनांशापाद्यप्रतिपादनाद्यंशेविष्णुपुराणभागवत
भारतबृहदारण्याद्युपनिषच्छ्रुत्यनुसारित्वात्संदिग्धप्रामाण्यवत्वंनसंभवति॥निश्चितप्रामाण्यवत्वमेवसंभ
वतीतिवक्तव्यं। नच॥तथाचेदादित्यपुराणस्यवाजिब्राह्मणमाहात्म्यप्रतिपादकत्वेनतत् स्तुत्यर्थवादत्वात्प्रा
माण्यमितिवाच्यं। तथासति तवकालिकाखंडस्यापिनिंदार्थवादत्वेनप्रामाण्याऽसिद्धिस्त्वयैवाऽभ्युपगताभवति निं
दार्थवादस्तु। महतांयाज्ञवल्क्यकण्वमाध्यंदिनकात्यायनानां महर्षित्वेनमहायोगित्वेनच श्रेष्ठानामपि। गुर्वभि
मतानन्नुकरणेनैवमहानीचस्वरूपचंडालत्वप्राप्तिसंभवे। किमुत। अन्येषामल्पशक्तिमतांगुरुमत्यननुकं

प्र॰ नि॰
२२३

रणे अनर्थप्राप्तिर्भवेदिति ॥ निंदार्थवादरूपः । अयंकालिकाखंडाख्यग्रंथः । इत्यपिसिद्धोभवति । तत्राभिमतानु
सारेणादित्यपुराणस्यार्थवादत्वांगीकारेपिनप्रामाण्यहानिः । अर्थवादवाक्यानांपुरुषप्ररोचनतात्पर्यकत्वात् ॥
तद्यथाप्रजाभिरग्नेअमृतत्वमस्यामिति ॥ अपामसोमममृताअभूमाइति ॥ श्रुत्यादिभ्यः ॥ समस्तसंपत्समवा
प्तिहेतवस्समुत्थितापत्कुलधूमकेतवः । अपारसंसा रसमुद्रसेतवः पुनंतुमांब्राह्मणपादपांसवइति ॥
आपद्घनध्वांतसहस्रभानवस्समीहितार्थार्पणकामधेनवः । समस्ततीर्थांबुपवित्रमूर्तयोरक्षंतुमांब्राह्म
णपादपांसवः ॥ इत्यादिभारतपुराणादिभ्यः स्तुत्यवस्तुप्रशंसाप्रतिपादनं अर्थवादवाक्यस्यस्वभावएव ॥
तत आदित्यपुराणस्यकथंचिदेतदंशेप्रामाण्यसंदेहस्वीकारेपिविष्णुपुराणादिबलात् अस्मदभिमतार्थ
शापाद्यभावसिद्धिर्भवति ॥ तत्रकालिकाखंडस्याप्रामाण्यासिद्धौशापादिप्राप्तिरूपतत्राभिमतार्थसिद्धेः निर
वलंबनत्वात् । अत्यंताभावएवप्राप्यते ॥ ॥ ननुतत्रादित्यपुराणंकेनचित्तच्छास्त्रविनाकल्पितमितिमाति ॥
वाजसनेयिब्राह्मणमाहात्म्यमात्रप्रतिपादकत्वादितिचेत् । तत्रकालिकाखंडपुराणवाक्यस्यापिकेनचित्कल्पित

त्वंसिद्धमेव भवति ॥ श्रुतिस्मृतिपुराणेतिहास भाष्यादिग्रंथेषु परम ऋषित्वेनयोगीश्वरत्वेनब्रह्मज्ञानिशिरोमणित्वेन सर्वशास्त्राध्यापयितृत्वेनप्रतिपादितानांमहतांयाज्ञवल्क्यादीनांचंडालत्वप्राप्तिप्रतिपादनात् ॥ सर्वशास्त्र विरुद्धत्वाच्च॥ सपत्नी विधवान्यायेन पुराणवाक्यत्वाऽविशेषात् ॥ अन्यतराप्रामाण्यांगीकारे अन्यतरस्यापि अप्रामाण्यप्राप्तिरर्थसिद्धैव ॥ यथासपत्नींप्रति। अन्यया। त्वंविधवेत्युच्यमाने। स्वस्यापिवैधव्यं अर्थसिद्धमेव भवति तद्वदत्रापीति ज्ञेयं॥ संगनोयदिसर्वज्ञः कणादोनेतिकाप्रमा॥ कपिलोयदिसर्वज्ञः कणादोनेतिकाप्रमा॥ तावुभौयदिसर्वज्ञौमतभेदः कथंभवेत् ॥ इतिन्यायेनकालिकाखंडवाक्यस्य आदित्यपुराणवाक्यस्यच अन्यतरस्यअप्रामाण्ये। अन्यतरस्याऽप्रामाण्यं नसंभवतीत्यत्र किंप्रमाणं भवति। उभयोःप्रमाण्यांगीकारेच परस्परविरुद्धार्थवत्वंवाकथंसंभवेत॥ अपिच॥ लोकेकस्मिंश्चित्पुरुषविषये अपराधसंशयेसति प्रमाणांतरप्रतीत्यभावेच तत्पुरुषवाक्यादेवतन्निर्णयकर्त्तव्यतायांप्राप्तायांसत्यां। तद्वाक्यविचारेणैवतेनपुरुषेणो वउच्यमानेपुवाक्येषु पूर्वोत्तरवाक्यविरोधः। पूर्वोत्तरसंगतिविरोधः। पूर्वोत्तरार्थविरोधः इत्यादिकंदोषजातमेवबुद्धिमद्भिः शोध्यते

तच्छोधनेनैव तदपराधादिनिर्णयः क्रियते ॥ एवंस्थितेतवकालिकाखंडवाक्यस्य एकपुराणेत्वेनएकरूपत
याचप्रामाण्यंवक्तव्यं॥ नथासति ॥ एकरूपतयेवभवितव्यं॥ अत्रतु॥ कैश्चित्तत्तत्रस्थितैरेवकालिकाखंडा
ख्यंएतद्वाक्यंब्रह्मांडपुराणस्थमित्युच्यते॥ त्वयातु॥ स्कांदपुराणस्थमित्युच्यते॥ कैश्चिदाख्यायिकाप्रका
रांतरेणप्रतिपाद्यते॥ इदानीं तवनिकटस्थित तवकालिकाखंडवाक्यस्य अन्यथार्थः प्रतीयते॥ ततस्तयो
रेकरूपत्वेनप्रतिपादनाभावात्॥ त्वत्कालिकाखंडवाक्यस्येवाप्रामाण्यापत्ति प्रसंगः सिद्धोभवत्येव॥ तद्यथा
॥ त्वन्निकटस्थकालिकाखंडवाक्ये पूर्वोक्तरीत्यायाज्ञवल्क्यादीनां वैशंपायनगुरुपुत्रहननप्रयुक्तब्रह्महत्या
याः वैशंपायनप्राप्तायाः तदभिमतानुसारेणतद्दत्ताः तत्रुष्टानप्रयुक्तशापः वैशंपायनेनयाज्ञवल्क्यादीनांप्राप्तः
॥ इत्याद्यर्थस्यएतद्विलक्षणरूपआख्यायिकार्थस्यचात्यंतविरोधः प्रतीयते॥ तथाहि॥ अन्यस्मिन्नदेशे
स्थितकालिकाखंडवाक्येनस्थिताया आख्यायिकातु कंचिद्राजानंप्रति वैशंपायनशिष्याणांमध्येदिनक्रमेणास
णएकैकः शिष्यः। आशीर्वादाक्षतान्गृहीत्वागत्वातस्मै अनेनदातव्यमिति वैशंपायना ऽज्ञानुसारेणप्रतिदिनंत

च्छिष्याः आचरितवंतः। एकस्मिन्दिने दिनक्रमेण तत्कालप्राप्तनियमानुसारेण याज्ञवल्क्यो गत्वा। राजगृहे स्तंभोपरि अक्षतान्निधाय। स्वगृहं प्रति आगतवान्। तदनंतरं। तच्छुष्करूपस्तंभ आर्द्रीभावं प्राप्य। फलपुष्पादि मान्बभूव॥ तदनंतरं राजा दृष्ट्वा। अयमेव शिष्यः प्रतिदिनं प्रेषणीय इति वैशंपायनं प्रत्युक्तवान्। तथैव भवत्विति तद्वाक्यमंगीकृत्य। वैशंपायनो याज्ञवल्क्यमाहूय प्रतिदिनं मेवमेव कुर्विति अनुज्ञां दत्तवान्॥ याज्ञवल्क्यस्तु॥ पूर्वं कृतप्रकारेण मम नियतदिन एव गमिष्यामि॥ अन्यस्मिन्दिने न गमिष्यामीत्युक्तवान्॥ वैशंपायनः कुपि तस्सन् चंडालो भूत्वा गच्छेति शापं दत्तवान्। इत्याख्यायिकावर्तत इति कैश्चिदुक्तं वाक्यमस्माभिः श्रुतं॥ तत्तु स्तकं न दृष्टं॥ एतच्छ्रुतार्थस्य तव कालिकाखंडवाक्यार्थस्य च अत्यंतविरुद्धत्वेन प्रतीयमानत्वात्॥ एकार्थ प्रतिपादक एकरूपग्रंथे वाक्यविरोधः। अर्थादिविरोधश्च प्रतीयत इति कृत्वा। पूर्वोक्तन्यायेन कालिकाखंड वाक्यस्यैव अप्रामाण्यमेव वक्तव्यं भवेत्॥ अत एव ब्रह्मसूत्रकृता व्यासेन तद्भाष्यकृता शंकरभगवत्पादाचा र्येण च उत्तरमीमांसाख्य वेदांतशास्त्रमूलभूत ब्रह्मसूत्रेषु द्वितीयाध्याये तर्कपादाख्य द्वितीयपादे बौद्धमतनि

ब्रश्ण
२२५

एकरणभस्तावेसमुदायउभयहेतुकेपितदप्राप्तिः॥ इतिवैशेषिकदेशिसौत्रांतिकवैभाषिकयोस्सर्वसत्यत्वसर्वक्ष्ण
णिकत्ववादनिराकरणार्थं इदमधिकरणसूत्रं प्रवृत्तं॥ इत्यधिकरणगुणसूत्रेषु मध्ये। आकाशेचाविशेषात्। इ
तिगुणसूत्रभाष्येचायंन्यायः प्रदर्शितः॥ तथाचशंकरभगवत्पादीयभाष्यं॥ यच्चतेषामेवाभिप्रेतं। निरोधद्वय
माकाशंच॥ निरुपाख्यमिति। तत्रनिरोधद्वयस्य। निरुपाख्यत्वं। पुरस्तान्निराकृतं॥ आकाशस्येदानींनिरा
क्रियते। आकाशेचाप्ययुक्तो। निरुपाख्यत्वाभ्युपगमः॥ प्रतिसंख्याप्रतिसंख्या। निरोधयोरिव। वस्तुत्वप्रतिपत्ते
रविशेषात्॥ आगमप्रामाण्यात्तावत्। आत्मनआकाशस्संभूतइत्यादिश्रुतिभ्यआकाशस्यच। वस्तुत्वप्रसि
द्धिः। विप्रतिपन्नानपिप्रतिशब्दगुणानुमेयत्वंवक्तव्यं। गंधादीनांगुणानां। पृथिव्यादिवस्त्वाश्रयत्वदर्शनात्
॥ अपिचावरणाभावमात्रमाकाशमिच्छतस्तवएकस्मिन्सुपर्णेपतत्यावरणस्यविद्यमानत्वात्॥ सुपर्णांत
रस्योत्पित्सतोऽनवकाशत्वप्रसंगः॥ यत्रावरणाभावस्तत्रपतिष्यतीतिचेत्॥ येनावरणाभावोविशिष्यते। त
त्तर्हिवस्तुभूतमेवाकाशंस्यान्नावरणाभावमात्रं। अपिचावरणाभावमात्रमाकाशं॥ मन्यमानस्यसौगतस्य

राम
२२५

स्वाभ्युपगमविरोधः प्रसज्येत। सौगतेहि समये पृथिवी भगवन्। किंसंनिःश्रयेत्यस्मिन् प्रश्नप्रतिवचनप्रवादे।
पृथिव्यादीनामंते वायुः। किंसंनिश्रय इत्यस्य प्रश्नस्य प्रतिवचनं भवति। वायुराकाशसंनिःश्रय इति तदाकाशस्य
वस्तुत्वेन समंजसं स्यात्। तस्मात्स्य पक्षमाकाशस्यावस्तुत्वं। अपिच निरोधद्वयमाकाशं च त्रयमप्येतन्निरुपा
ख्यमवस्तु। नित्यं चेति विप्रतिपिद्धं निःस्ववस्तुनो नित्यत्वं अनित्यत्वं वा संभवति॥ वस्त्वाश्रयत्वात्॥ धर्मधर्मिव्यवहार
स्य। धर्मधर्मिभावेहि। घटादिवद्वस्तुत्वमेव स्यान्न निरुपाख्यत्वं॥ इत्येवं सूत्रकृता भाष्यकृता व्याख्यानकृता च
बौद्धमतनिराकरणविषये का क्यत र्थानां परस्परविरुद्धत्वात्॥ एतन्मतमप्रमाणमिति निराकृतं॥ इत्यय
मर्थोऽत्रद्योत्यते॥ तद्यथा॥ पूर्वं बौद्धेन स्वशास्त्रवाक्यतः। स्वयुक्त्या च। आकाशमवस्तु निरुपाख्यं। केनापि प्र
माणेन अविषय इत्यर्थः॥ इत्युक्तं॥ तस्मिन्नेव बुद्धागमे शास्त्रे गुरुशिष्यप्रश्नोत्तरप्रवाहपाठे॥ पृथिव्याः को
वाश्रय इत्यभिप्रायेण शिष्येन पृष्टः गुरुः॥ पृथिव्याः आश्रयः जलात्मकः पदार्थः। इति क्रमेण वायोराश्रयः क
इति प्रश्ने कृते आकाशमाश्रय इति गुरुरुक्तवान्। तथा च। वाय्वाश्रयत्वेनाकाशस्य वस्तुत्वं बलात्सिद्धं॥ अवस्तु

नः आकाशस्यवाप्याश्रयत्वंनसंभवति। लोकेयत्रकुत्राप्यवस्तुनः वंध्यापुत्रादेः शशविषाणादेश्चकिंचिद्गुणाश्र
यत्वं धर्माश्रयत्वं द्रव्याश्रयत्वंवानसंभवति। इतिसर्वानुभवसिद्धः॥ निरुपाख्यत्वंनाम। यत्किंचिच्छब्दप्रत्ययविष
त्वाभावः। इतिबुद्धसिद्धांतस्यनिराकृतत्वात्। बुद्धेनैवस्वशास्त्रे पूर्वं आकाशस्यावस्तुत्वंप्रतिपाद्य। सर्वपदार्था
नांअन्याश्रयत्वान्याश्रयत्वविचारे। शिष्यप्रश्नस्यप्रतिवचनत्वेनवाप्याश्रयत्वरूपवस्तुत्वं आकाशस्यप्रतिपादि
तवानिति॥ स्वोक्तिविरोधात्॥ स्वाभ्युपगमविरोधाच्च। तन्मतशास्त्रमप्रमाणभूतमितिसिद्धंभवति॥ तस्मात्तद्धुत्का
लिकाखंडः। स्कांदपुराणस्थइतिब्रह्मांडपुराणस्थइतिचतव पक्षस्थैरेवउच्यमानवाक्ययोः। तदवांतरवाक्यानां
तदर्थतदवांतरवाक्यसमुदायात्मकमहातात्पर्यार्थप्रतिपादकमहावाक्यादीनांपरस्परात्यंतविरुद्धत्वात्। त
वाभिमतार्थसाधकत्वेनसर्वेषामेकग्रंथरूपतयातवाभिमतमूलस्यापिपरस्परात्यंतविरोधानेकाश्रयत्वेन। असं
तानादरणीयतया अप्रामाण्यंस्वतएवसिद्धंभवति॥ ननु॥ परस्परविरोधेसत्यपिकल्पभेदेनमन्निकटस्थकालिकाखं
डवाक्यस्यत्वयाश्रुतमिति। परोक्षस्थितकालिकाखंडवाक्यस्यविष्णुपुराण। भागवत। भारत बृहदारण्यश्रुत्या

दिप्रमाणानोच्च कल्पभेदेन व्यवस्थांगीकारद्वाराकालिकाखंडस्यापिप्रामाण्यमस्तु ॥ किमर्थमप्रामाण्यमापाद्यते।
पुराणत्वाविशेषात् ॥ अप्रामाण्यापादनंनोचितमितिचेत् ॥ कल्पभेदेनउपपत्तिः क्रियतइत्यपि असंगतं ॥ कल्पभे
देनमुख्यव्यवहारोभिन्नोनभवतीतिशास्त्रसिद्धांतः ॥ वक्ष्यमाणग्रंथे अस्माभिः प्रदर्शयिष्यते ॥ अपिचत्तवकालि
काखंडस्य अत्यंता प्रामाण्यंतवानिष्टं भवति यदि। तथासतिअर्थवादवाक्यत्वेनविधिवाक्यप्रामाण्यव्याप्यप्रामा
ण्यंभवतुनाम ॥ तद्यथा ॥ पूर्वमीमांसायां ॥ जैमिनिसूत्रेषु ॥ अथातोधर्मजिज्ञासा ॥ चोदनालक्षणोर्थोधर्मः ॥ क्रिया
याःप्रवर्तकंवचनंचोदना ॥ औत्पत्तिकस्तुशब्देनार्थस्यसंबंधः ॥ दृश्येहि। तस्यार्थःकर्मावबोधनंनाम ॥ इत्यादिसू
त्रेषुसत्सु ॥ आम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानां ॥ तस्मादनित्यमुच्यते ॥ इतिसूत्रे। आम्नायस्यवेदमा
त्रस्य क्रियार्थत्वात् ॥ कर्मपरत्वात् ॥ प्रवृत्तिनिवृत्यात्मकक्रियाप्रवर्त्तकत्वेन निवर्तकत्वेनवा। लिङ्लोट्तव्यप्रत्य
यरूपविधिवाक्यस्यैवमुख्यंप्रामाण्यंतद्विलक्षणत्वेनक्रियाप्रवर्तकत्वाभाववद्वाक्यानांअनित्यत्वमुच्यतइति
अप्रामाण्यमुच्यतइत्यर्थः ॥ ननुमंत्रार्थवादइतिहासादिरूपवेदवाक्यानांप्रामाण्यंसंभवतीति ॥ एवंसूत्रार्थे

प्रतीयमाने वेदैकदेशरूपविधिवाक्यानामेव प्रामाण्यस्वीकारे। तदन्यार्थवादादिवाक्यानामप्रामाण्यस्वीकारे च॥
वेदवाक्यत्वाविशेषाद्धेतोः॥ विधिवाक्यानामपि अप्रामाण्यापत्तिर्दुर्वारैवेति पूर्वपक्षे प्राप्ते इदं सूत्रं प्रवृत्तं॥ विधि
नात्वेकवाक्यत्वात्॥ स्तुत्यर्थेन विधीनां स्युरिति॥ अस्यार्थः॥ अर्थवादादिवाक्यानामत्यंता प्रामाण्यमस्माभिर्नो
गीक्रियते॥ किंतु॥ विधिना सह विधिवाक्येन सह अर्थवादमंत्रादिवाक्यानामेकवाक्यत्वात्। एकार्थप्रतिपादकत्वा
दित्यर्थः। एतेषां वाक्यानां स्तुत्यर्थेन विधेयार्थस्तावकत्वेन विधीनां स्युः॥ विधीनां विधिवाक्यानां अर्थवादादिवा
क्यानि अंगानि स्युरिति लिङ्‍लोट् तव्यप्रत्ययरूपविधिवाक्यशेषत्वेन अर्थवादवाक्यानां तत्प्रामाण्यव्याप्यप्रा
माण्यं सिद्ध्यतीति तात्पर्यार्थः। अतः अर्थवादवाक्यस्यापि गौण प्रामाण्यसंभवात्॥ तवकालिकाखंडवाक्यस्य
स्वगुर्वभिमतार्थानुरूपाचरणनिषेधार्थवादत्वमेव भवतु। अतिश्रमेण मुख्यप्रामाण्यसाधने तव किं प्रयोजनं भ
वति॥ ननु॥ कल्पभेदेन पूर्वोक्तरीत्या कालिकाखंडस्य विष्णुपुराणादेश्च सर्वेषां तत्तद्दर्शनानां सत्यत्वांगीकारेण त
त्प्रतिपादकग्रंथानामपि कल्पभेदेन व्यवस्थांगीकारे कस्य चिद्वाक्यस्यापि अप्रामाण्याभावेन मुख्यं प्रामाण्यमेवासि

ध्यति। इतिचेत्। कल्पभेदेन। एतादृश महावाक्यार्थानांव्यवस्थाकरणं नोचितं। महच्छास्त्ररूपमहाप्रमाणसिद्धांतवि
रोधप्रसंगः। दुरुत्तरोभवति॥ तथाहि॥ वेदांतमीमांसासूत्रेप्रथमाध्यायेत्तृतीयपादेदेवताधिकरणेगुणसूत्रेषुसमान
नामरूपत्वाच्चावृत्तावप्यविरोधोदर्शनात्स्मृतेश्च॥ इतिसूत्रे। एतस्यभाष्येच। कल्पभेदेन। श्रुत्याद्युक्तविशेषितार्थाः
नांनामरूपक्रियादिभेदेनाभ्युपगतः। तद्वदत्रापिकालिकाखंडादिबहुविषयेषुकल्पभेदेनअर्थानांविरुद्धभेदकल्पना
दिव्यवस्था अयुक्ता॥ तथाहि॥ समाननामरूपत्वाच्चेत्यस्यसूत्रस्यशंकरभागवत्पादीयंभाष्यं। अथापिस्यात्। य
दिपश्वादिव्यक्तिवत्। देवादिव्यक्तयोपि। संतत्यैवोत्पद्येरन्। निरुध्येरंश्च॥ ततोभिदानाभिदेयाभिधातृव्यवहारा
विच्छेदात्॥ संबंधनित्यत्वेनविरोधः शब्देपरिह्रियेत। यदातुखलु। सकलंत्रैलोक्यंपरित्यक्तनामरूपंनिर्लेपंप्र
लीयते। प्रभवतिचाभिनवमिति। श्रुतिस्मृतिवादा वदंतितदाकथमविरोधइति। तत्रेदमभिधीयते। समाननामरूपत्वा
दिति। तदापिसंसारस्याऽनादित्वं। तावदभ्युपगंतव्यं। प्रतिपादयिष्यतिचाचार्यः। संसारस्यानादित्वंउपपद्यते चाप्यु
पलभ्यतेचेतिसूत्रेण अनादौचसंसारे। यथास्वापप्रबोधयोःप्रलयप्रभव श्रवणेऽपि। पूर्वप्रबोधवदुत्तरप्रबोधेपिव्य

वहारान्न कश्चिद्विरोधः। एवं कल्पांतरप्रभवप्रलययोरपीति द्रष्टव्यं स्वापप्रबोधयोश्च प्रलयप्रभवौ श्रूयेते॥ यदा सुप्तः
स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति। तदैनं वाक् सर्वैर्नामभिः सहाप्येति। चक्षुस्सर्वै रूपैस्सहाप्ये
ति। श्रोत्रं सर्वैश्शब्दैस्सहाप्येति। मनस्सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते। यथाग्नेर्ज्वलतः। सर्वा दिशो विस्फु
लिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोका इति। स्यादेतत्।
स्वापे पुरुषांतरव्यवहाराविच्छेदात्। च सुषुप्तप्रबुद्धस्य पूर्वप्रबोधव्यवहारानुसंधानसंभवादविरुद्धं॥ महाप्र
लये तु। सर्वव्यवहारोच्छेदाज्जन्मांतरव्यवहारवच्च। कल्पांतरव्यवहारस्यानुसंधातुमशक्यत्वात् वैषम्यं इति। नैष
दोषः। सत्यपि सर्वव्यवहारोच्छेदिनि महाप्रलये परमेश्वरानुग्रहादीश्वराणां हिरण्यगर्भादीनां कल्पांतरव्यवहारानु
संधानोपपत्तेः। यद्यपि प्राकृता प्राणिनो न जन्मांतरव्यवहारमनुसंदधाना दृश्यंते इति न तत्प्राकृतवदीश्वराणां भवित
व्यं। यथा हि। प्राणित्वाविशेषेपि मनुष्यादिस्तंबपर्यंतेषु ज्ञानैश्वर्यादिप्रतिबंधः परेण परेण भूयान्भवन्दृश्यते तथा म
नुष्यादिष्वेव हिरण्यगर्भपर्यंतेषु ज्ञानैश्वर्याद्यभिव्यक्तिरपि। परेण परेण भूयसी भवतीत्येतच्छ्रुतिस्मृतिवादेष्वसकृदव

कल्पादौप्रादुर्भवतांपारमैश्वर्यंश्रूयमाणंनशक्यंनास्तीतिवदितुं। ततश्चातीतकल्पानुष्ठितप्रकृष्टज्ञानकर्मणामीश्वराणां
हिरण्यगर्भादीनांवर्तमानकल्पादौप्रादुर्भवतांपरमेश्वरानुगृहीतानांसुप्तप्रतिबुद्धवत् कल्पांतरव्यवहारानुसंधानोप
पत्तिः॥तथाचश्रुतिः॥योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै। तंहदेवमात्मबुद्धिप्रकाशं मुमुक्षुर्वैशरणमहं
प्रपद्ये। इतिस्मरंतिच। शौवकादयोमधुच्छंदःप्रभृतिभिर्ऋषिभिर्दाशतय्यो दृष्टाइति। प्रतिवेदंचैवमेव कांडऋष्यादयः स्म
र्यंते। श्रुतिरप्युर्षिज्ञानपूर्वकमेवमंत्रेणानुष्ठानंदर्शयति॥ योहवाअविदितार्षेयच्छंदोदैवतब्राह्मणेनमंत्रेणयाजयतिवा
ध्यापयतिवास्थाणुंवर्छति। गर्तंवाप्रपद्यते। प्रवामीयंते। पापीयान्भवति। तस्मादेतानि मंत्रेमंत्रेविद्यादितिप्राणिनांचसु
खप्राप्तयेधर्मोविधीयते। दुःखपरिहारायचाधर्मः प्रतिषिध्यते॥ दृष्टानुश्रविकसुखदुःखविषयौचरागद्वेषौभवतोनवि
लक्षणविषयावित्यतोधर्माधर्मफलभूतोत्तरोत्तरासृष्टिर्निष्पद्यमाना। पूर्वसृष्टिसदृश्येव निष्पद्यते। स्मृतिश्चभवति॥ तेषां
येयानिकर्माणिप्राक्सृष्ट्यांप्रतिपेदिरे तान्येवतेप्रपद्यंतेसृज्यमानाःपुनःपुनः। हिंस्राहिंस्रेमृदुःक्रूरे। धर्माधर्मावृतानृतेत
द्भाविताःप्रपद्यंते। तस्मात्तत्तस्यरोचते इतिप्रलीयमानमपि। चेदंजगच्छक्त्यवशेषमेवप्रलीयते। शक्तिमूलमेवचप्रभवति।

प्रशा॰ तरयो। आकस्मिकत्वप्रसंगात्॥ नचानेकाकाराः शक्तयः शक्याः कल्पयितुं नतश्चविच्छिद्यविच्छिद्याप्युद्भवतां भूरादिलोकप्रवाहा

२३७॰ णां देवतिर्यङ्मनुष्यलक्षणानांच। प्राणिनिकायप्रवाहाणां वर्णाश्रमधर्मफलव्यवस्थानांचादौ। संसारेनियतत्वमिंद्रियविष

यसंबंधनियतत्ववत् प्रत्येतव्यं। नहींद्रियविषयसंबंधादेर्व्यवहारस्यप्रतिसर्गमन्यथात्वं। षष्ठेंद्रियविषयकल्पंशक्यमुत्प्रे

क्षितुं। अतश्चसर्वकल्पानांतुल्यव्यवहारत्वात्। कल्पांतरव्यवहारानुसंधानक्षमत्वाच्चेश्वराणां। समाननामरूपाएवप्र

तिसर्गविशेषाः प्रादुर्भवंतिसमाननामरूपत्वाच्च। वृत्तावपिमहासर्गमहाप्रलयलक्षणायांजगतोऽभ्युपगम्यमानायां

नकश्चिच्छब्दप्रामाण्यादिविरोधः। समाननामरूपतांचश्रुतिस्मृती दर्शयतः। सूर्याचंद्रमसौधातायथापूर्वमकल्पयत्।

दिवंचपृथिवींचांतरिक्षमथोस्वइति। यथापूर्वस्मिन् कल्पेसूर्याचंद्रमप्रभृतिजगत्क्लृप्तं। तथाऽस्मिन्नपिकल्पेपरमेश्वरोऽकल्प

यदित्यर्थः। तथाऽग्निर्वा। अकामयत। अन्नादोदेवानां। स्यामिति। सएतमग्नयेकृत्तिकाभ्यः पुरोडाशमष्टाकपालंनिरवपदिति। न

क्षत्रेष्टिविधायोऽग्निर्निरवपत्। यस्मैवाऽग्नयेनिरवपत्। तयोः। समाननामरूपतांदर्शयतीत्येवंजातीयकाश्रुतिरिहोदाहर्तव्या। स्मृतिर

पि। ऋषीणांनामधेयानियाश्चवेदेषुदृष्टयः। शर्वर्यंतेप्रसूतानांतान्येवैभ्योददात्यजः। यथर्तावृतुलिंगानिनानारूपाणिपर्यये। दृश्यंतेतानि

तान्येव। तथाभावायुगादिषु। यथाभिमानिनोऽतीतातुल्यास्तेसांप्रतैरिह। देवादेवैरतीतैर्हिरूपैर्नामभिरेवच। इत्येवंजातीयकाद्रष्टव्या।

पूर्वोत्तरलेखनेनत्रिंशदुत्तरद्विशततमसंख्याकंपत्रंन्यूनंजातं तस्मादत्रग्रंथपातोनास्ति। अग्रिमपत्रं एकत्रिंशदुत्तरद्विशतसंख्याकं॥

पराशरमाधवीये आचारकांडे द्वितीयाध्याये प्रथमश्लोकः॥ पराशरम्॥ अतःपरं गृहस्थस्य कर्माचारं क
लौ युगे॥ कर्मसाधारणं शक्त्या चातुर्वर्ण्याश्रमागतं॥१॥ तं प्रवक्ष्याम्यहं पूर्वं पराशरवचो यथा॥२॥ अस्य
माधवीयव्याख्यानं॥ प्रथमाध्याये व्यासेन पृष्टयोर्वर्णचतुष्टयसाधारणासाधारणधर्मयोर्मध्ये साधारण
धर्मं संक्षिप्यासाधारणधर्मः प्रपंचितः॥ अथेदानीं संक्षिप्तसाधारणधर्मो द्वितीयाध्याये प्रतिपाद्यते॥ अथवा
पूर्वाध्याय आमुष्मिकधर्मप्राधान्येन प्रवृत्तः॥ अयं तु ऐहिकजीवनहेतुप्राधान्येन प्रपंच्यते॥ तत्रादावध्यायप्र
तिपाद्यमर्थं प्रतिजानीते॥ अतःपरमिति ॥ अतःपरं चातुर्वर्ण्योसाधारणधर्मसंक्षेपणादुत्तरस्मिन् काले
स एव विस्तारकथनस्योचितोवसरः॥ बहुग्रंथपाठशक्तिरहितान् मंदप्रज्ञान्प्रति संक्षेपेणाभिहिते सति सम
र्थानामुत्तमप्रज्ञानां बुद्धिस्थ तत्वान्प्रति विस्तरेण कथ इत्युचितत्वात्॥ अतएवाहुराचार्याः॥ संक्षेपवि
स्तराभ्यां हि मंदोत्तमधियां नृणां॥ वस्तूच्यमानमप्यंतःकरणं तेन तृप्यत इति॥ यद्वा आमुष्मिकप्रधानधर्मकथना

प्र०भा०

नंतरं षट्कर्माभिरतः संध्यास्नानमित्यादिना त्वामुष्मिकफलधर्मैर्विहितेसत्यैहिकफलस्य कृष्यादिधर्मस्य बुद्धि
स्थत्वात्॥ तदभिधानस्य युक्तो वसरः॥ वक्ष्यमाणस्य कृष्यादिधर्मस्य ब्रह्मचारीगृही वनस्थयतिषु संभवमभिप्रेत्य
तद्योग्यमाश्रमिणं दर्शयति॥ गृहस्थस्येति॥ कृतत्रेताद्वापरेषु वैश्यस्यैव कृष्यादावधिकारो न तु गृहस्थमा
त्रस्य॥ विप्रादेरतो विशिनष्टि॥ कलौ युग इति॥ कर्मशब्दो लोके व्यापारमात्रे प्रयुज्यते॥ आचारशब्दश्च धर्म
रूपे शास्त्रीयव्यापारे कृष्यादेस्तु युगांतरेषु कर्मत्वं कलावाचारत्वमित्युभयरूपता तथैवाश्रमांतरेषु कर्मत्वं
गार्हस्थ्ये त्वाचारत्वमित्युभयमित्युभयरूपतया तद्विवक्षया कर्माचारमित्युक्तं॥ एवं प्रकारेण कल्पभेदेन
पदार्थभेदस्य शास्त्रसिद्धांतविरुद्धत्वात्॥ कालिकाखंडार्थानां विष्णुपुराणाद्यर्थानां च विरुद्धत्वेन कल्पभे
देन व्यवस्थानुरूपेण समन्वयः क्रियत इति॥ त्वयोक्तं अत्यंतासंगतमेव॥ न च क्वचित्॥ धर्मशास्त्रनिबंधन
ग्रंथेषु तिथिनिर्णयादौ पुराणभेदेन अर्थभेदे प्राप्ते कल्पभेदेन अर्थभेद इति॥ कैश्चिदुच्यत इति वाच्यं॥ महा

निबंधनग्रंथेषु माधवीयादिषु तं तथा न दृश्यते॥ अपि तु पूर्वोत्तरमीमांसाशास्त्रानभिज्ञैः आधुनिकैः अल्पज्ञैः
पंडितंमन्यैः स्वयं नष्टः परान्नाशयतीति न्यायानुकारिभिः तथा लिखितमपि व्यासाद्यभिप्रायज्ञैः भाष्यकारमा
धवाचार्यादिभिः यदा कदापि तथा नोच्यते॥ नाभ्युपगम्यते च॥ अत एव॥ मनुस्मृतौ षष्ठाध्याये नत्त्वनध्या
त्मवित्कश्चित्क्रियाफलमुपाश्नुते॥८२॥ इति अनध्यात्मवित् पूर्वमीमांसापूर्वक धर्मशास्त्रज्ञानविशिष्ट उत्त
रमीमांसात्मक वेदांतशास्त्रानभिज्ञः॥ कश्चिदपि पुरुषः किंचिदपि क्रियाफलं॥ कायिक वाचिक रूप यज्ञादि
क्रियाफलं॥ उपासना योग ध्यान निदिध्यासन शब्द वाच्य मानसिक क्रियाफलं न प्राप्नोतीत्यर्थः॥ केवल पूर्वमी
मांसाशास्त्रज्ञाने सर्वज्ञेश्वरस्य जगत्कारणत्व कर्मफलदातृत्वादि ज्ञानाभावात्॥ कर्मणैव मोक्ष इति॥ कर्मव्यति
रेकेण ईश्वरो नास्तीति विपरीतज्ञानवत्त्वात्॥ कर्तुः यजमानस्य॥ स्वस्वरूपभूतात्मज्ञानाभावात्॥ स्वर्गदेवतादि
वास्तवस्वरूपज्ञानाभावात्॥ वेदांतवाक्यस्थ उपासना परमात्मज्ञानाद्यसंभवात्॥ सर्वशास्त्रैकवाक्यताज्ञा

२२५
प्र॰शा॰
२३२

४

नाभावाच्च॥ धर्मशास्त्रज्ञानाभावे स्मृत्यैकवाक्यताद्वारा स्मार्तकर्मव्यवहारप्रायश्चित्तादिनिर्णायकज्ञानाभावा
त्॥ वेदांतशास्त्रोक्तरीत्या कर्मशास्त्रप्रतिपाद्यसर्वकर्मणां यज्ञेन दानेन तपसेतिश्रुत्युक्तप्रकारेण योगशास्त्रउ
पासनाशास्त्रप्रतिपाद्यसमाध्यादीनां ज्ञानोत्पादकत्वेन तर्कव्याकरणादीनां वेदांतवाक्यार्थज्ञानप्रयोजकत्वे
न॥ सर्वशास्त्रैकवाक्यताज्ञानाभावाच्च मुख्यशास्त्रसिद्धांतज्ञानाभावाद्देवयत्किंचित्क्रियाफलं न प्राप्नोतीति
तात्पर्यार्थः॥ तस्मात्कालिकाखंडस्य प्रसिद्धप्रमाणविरोधः कल्पभेदेन करणीयोपपत्त्या निवर्त्यत इति भ्रांति
मात्रमेव॥ अपिच॥ तुष्यतु॥ दुर्जनः इति न्यायेन तव मनःसंतोषार्थं कल्पभेदेन विरोधाभावस्यांगीकृतत्वेपि या
ज्ञवल्क्यकण्वादीनां चतुर्णामपि॥ शापः प्राप्तः इति तव कालिकाखंडवाक्यप्रतिपाद्यार्थस्य कल्पांतरीययाज्ञवल्क्या
द्यंतराणां तच्छापः प्राप्त इति वक्तुं शक्यते॥ तथा ॥तवाभिमतानुसारेण कल्पभेदेन व्यवस्थाकरणविषयेऽपि एत-
त्कल्पस्थितयाज्ञवल्क्यकण्वादीनां तादृशशापप्राप्तिः नाभूत्॥ इत्यपि वक्तुं शक्यते॥ इति कृत्वा एतत्कल्पीययाज्ञव

५

ल्क्य कण्वादीनांशापप्राप्त्यभावात्॥ तेषां तच्छिष्याणां तच्छाखिब्राह्मणानां च दोषाभावात्॥ एवं दंशोक्ताच्छिकाखं

डस्य॥ अप्रामाण्यतुल्यत्वं प्राप्तमेवेति हेतोः त्वदभिमतार्थसिद्धिः न प्राप्यत एव विनिगमकहेत्वभावात्॥

न च खंडुक्तरीत्यापि एतत्कल्पगतयाज्ञवल्क्यादीनां शापो नास्ति तत्रापि विनिगमकाभावात्॥ एतेषामेव या

ज्ञवल्क्यादीनां शापोभवत्॥ इत्यपि वक्तुं शक्यमेवेति वाच्यं॥ तथात्वे पुनः संदेहः प्राप्तः॥ कथंचिदपि आवयोः उभ

योः अन्यतरव्यवस्था भवितव्या॥ तद्विषयेन्यायविचारे कृते पूर्वोक्तसूत्रभाष्यपराशरमाधवीयादिसिद्धांत

प्रकारेण कल्पभेदेन व्यवस्था न संभवति॥ तव प्रार्थनानुरोधेन कल्पभेदेन व्यवस्थायाः अस्माभिरंगीकृतेपि अ

स्मत्पक्षसाधने एतत्कल्पगतयाज्ञवल्क्यादीनामेव माहात्म्यप्रतिपादकसूत्रभाष्यपराशरमाधवीयादिकं विनि

गमकमित्युच्यते॥ एतत्कल्पीयसूत्रस्मृतिभाष्यव्याख्यानादिषु एतत्कल्पीययाज्ञवल्क्यादीनां माहात्म्यप्रतिपादन

मेव युक्तं॥ अतीतकल्पगतयाज्ञवल्क्यादीनां माहात्म्यप्रतिपादने निमित्ताभावात् तेषामेव अयोग्यतासिद्धिः प्राप्त

तं॥पूर्वोक्तरीत्यासिद्धांतानुसारेणकल्पभेदेनभेदस्यानंगीकारात्॥अन्यथाकल्पकल्पभेदेनप्राणिरूपनामक्रिया
श आयुःप्रभृतीनांसूर्यग्रहनक्षत्रादिचाराणांएवंव्याघ्रसर्पवृश्चिकादिमृगकीटादीनांवसंतवर्षाहेमंता
दिऋतूनांतत्तद्धर्माणांपापपुण्यादिधर्माधर्माणांतत्फलरूपसुखदुःखजातिकुलदेहावयवदारिद्र्यसंप
दादिधर्माधर्मफलानांमिथ्यादिसर्वजगत्पदार्थानामपिभिन्नभिन्नतयाअव्यवस्थितत्वेनतद्दर्शनमूलक
प्रवृत्तिनिवृत्त्यादिसर्वव्यवहारोच्छेदप्रसंगः॥तद्यथा॥कल्पांतरेयत्सत्यादेः धर्मत्वेअन्यस्मिन्कल्पेतस्यैव
अधर्मत्वं॥कल्पांतरेधर्मफलस्यसुखरूपत्वेअन्यस्मिन्कल्पेतत्फलस्य दुःखरूपत्वं॥कल्पांतरेमनुष्य
स्यशतायुष्मत्वेअन्यस्मिन्कल्पेदशवर्षायुष्मत्वं॥कल्पांतरेव्याघ्रस्यमनुष्यभक्षकत्वेअन्यस्मिन्कल्पेमनु
ष्यस्यैवव्याघ्रभक्षकत्वं कल्पांतरेसर्पस्यविषप्रदत्वे॥अन्यस्मिन्कल्पेसर्पस्यविषपरिहारकत्वं॥कल्पांतरे
वसंतऋतौसंतापत्वे॥अन्यस्मिन्कल्पेहिमप्राबल्यवत्वं॥कल्पांतरेसूर्यादीनांपूर्वोदयपश्चिमास्तम

यवत्वे॥अन्यस्मिन्कल्पे दक्षिणोदयउत्तरास्तमयवत्वं पवं सर्वेषां सर्वपदार्थानां वैपरीत्येन अव्यवस्थि
ततया पदार्थस्वभावे जातिधर्मगुणक्रियातत्फलादिव्यत्यासदर्शनापत्तिः॥तद्द्वारा सर्वप्रवृत्तिनिवृत्ति
फलदर्शनाभावप्रसंगः॥क्वचित्क्वचित् यत्रकुत्र वा पुराणेतिहासस्मृत्यादिषु कल्पभेदानुसारि
व्यवस्थावचनानां॥सत्वेपि॥तद्वाक्यपूर्वापरसंगत्यनुसारेण अर्थवादादिरूपेण वा॥कल्पशब्दस्य
युगादिकालविशेषपरत्वेन वा॥वस्तुविशेषाभिप्रायेण वा॥तात्पर्यवत्वेन व्यवस्थोपपादनीया भव
ति॥श्रुतिब्रह्मसूत्रपराशरस्मृतिभारतभाष्यादिप्रमाणग्रंथतात्पर्यविरोधपरिहाराय तथा वक्तव्यो भ
वेत्॥स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः॥इति विज्ञानेश्वरीयोक्तरीत्या आदित्यपुराणादिपक्षे
श्रुतितदनुरोधिपुराणेतिहासाद्यभिप्रायबलन्यायादिविशिष्टास्मत्पक्षस्यैव गरीयस्त्वात्॥तत्र कालि
काखंडवाक्यस्यात्यंतप्रामाण्यमेव सिध्यति॥प्रस्तुत॥लोके॥एकं संदिग्धं विषयमुद्दिश्य वहूनां विवदे

मानानां वादिप्रतिवादिपक्षकोटिद्वयप्रविष्टानां मध्ये वादिकोटिप्रविष्टेषु वा ॥ प्रतिवादिकोटिप्रविष्टेषु वा परस्परविरुद्धार्थप्रतिपादकत्वे तेषां वाक्यानां अप्रामाण्यमेव सिध्यति ॥ तद्द्वारा तत्पक्षस्य निराकरणीयत्वमेव भवति ॥ सर्वेष्वपि जनेषु एकरूपतया परस्पराविरुद्धार्थप्रतिपादकत्वे तेषां वाक्यानां प्रामाण्यं सिध्यति ॥ तत्पक्षस्य ग्राह्यत्वं भवतीति सर्वजनसंमतं ॥ एवमेव शास्त्रेष्वपि ॥ अयं न्यायः प्रदर्शितः तथाहि ॥ वेदांतमीमांसाशास्त्रे द्वितीयाध्याये द्वितीयपादे ॥ रचनानुपपत्तेश्च नानुमानमिति ॥ सांख्यमतनिराकरणाधिकरणेगुणसूत्रे ॥ विप्रतिषेधाच्चासमंजसं ॥ १० ॥ इति सूत्रभाष्ये ॥ तथा च भगवत्पादीयं भाष्यं ॥ परस्परविरुद्धश्चायं ॥ सांख्यानामभ्युपगमः ॥ क्वचित् सप्तेंद्रियाण्यनुक्रामंति ॥ क्वचिदेकादशतथा क्वचिन्महतस्तन्मात्रसर्गमुपदिशंति ॥ क्वचिदहंकारात् ॥ तथा क्वचित् त्रीण्यंतःकरणानि वर्णयंति ॥ क्वचिदेकमिति ॥ प्रसिद्ध एव तु ॥ श्रुत्येश्वरकारणवादिन्यायविरोधः ॥ तदनुवर्तिन्या च

स्मृत्स्यात्तस्मादप्यसमं[illegible]सं॥सांख्यानां दर्शनमिति॥अत्राह॥नन्वौपनिषदानामप्यसमंजसमेव दर्शनं॥
तप्यतापकयोर्जात्यंतरभावानभ्युपगमात्॥एवं हि ब्रह्म सर्वात्मकं सर्वस्य प्रपंचस्य कारणमभ्युपगच्छतां
एकस्यैवात्मनो विशेषौ तप्यतापकौ॥न जात्यंतरभूतौ॥इत्यभ्युपगंतव्यं स्यात्॥यदि चैतौ तप्यतापकौ ए-
कस्यात्मनो विशेषौ स्यातां॥सताभ्यां तप्यतापकाभ्यां न निर्मुच्येत इति तापोपशांतये सम्यग्दर्शनमुपदि-
शत्॥शास्त्रमनर्थकं स्यात्॥नह्यौष्ण्यप्रकाशधर्मकस्य प्रदीपस्य तदवस्थस्यैव ताभ्यां निर्मोक्ष उपपद्य-
ते॥यो२पि जलवीचीतरंगफेनाद्युपन्यासस्तत्रापि जलात्मन एकस्य वीच्यादयो विशेषा आविर्भावतिरो-
भावरूपेण नित्या एवेति समानो वीच्यादिभिरनिर्मोक्षः॥प्रसिद्धश्चायं॥तप्यतापकयोर्जात्यंतरभावो लो-
के॥तथा हि॥अर्थी चार्थश्चान्योन्यभिन्नौ लक्ष्येते॥यद्यर्थिनः स्वतो न्यो२र्थो न स्यात्॥यस्यार्थिनो यद्विष-
यमर्थित्वं स तस्यार्थो नित्यसिद्ध एवेति॥तस्य तद्विषयमर्थित्वं न स्यात्॥यथा प्रकाशात्मनः प्रदीपस्य प्रका-

शाख्यो अर्थौनित्यसिद्धएवेति॥ नतस्यतद्विषयमर्थित्वंभवति॥ अप्राप्तेत्वर्थेऽर्थिनोर्थित्वंस्यादिति॥
तथार्थस्याप्यर्थत्वंनस्यात्॥ यदिस्यात्॥ स्वार्थत्वमेवस्यात्॥ नचैतदस्ति॥ संबंधिसब्दौ ह्येतौ अर्थीचा
र्थश्चेति॥ द्वयोश्चसंबंधिनोः संबंधः स्यान्नैकस्यैव॥ तस्माद्भिन्नावेतौ अर्थार्थिनौ तथानर्थानर्थिनावपि
अर्थिनोऽनुकूलोऽर्थः॥ प्रतिकूलोअनर्थः ताभ्यामेकः पर्यायेणोभाभ्यांसंबध्यते॥ तत्रार्थस्याल्पीयस्त्वा
त्॥ भूयस्त्वाच्चानर्थस्यउभावपि॥ अर्थावनर्थाएवेतितापकः सउच्यते॥ तप्यस्तुपुरुषोयएकः पर्याये-
णोभाभ्यांसंबध्यते इति॥ तयोस्तप्यतापकयोरेकात्मतायांमोक्षानुपपत्तिः॥ जात्यंतरभावेतु॥ तत्संयो
गहेतुपरिहारात्॥ स्यादपि॥ कदाचिन्मोक्षोपपत्तिरिति॥ अत्रोच्यते॥ नेकत्वादेवतप्यतापकभावानुपप
त्तेः॥ भवेदेषदोषोयद्येकात्मतायां॥ तप्यतापकावन्योन्यस्यविषयविषयीभावं॥ प्रतिपद्येयातां॥ नत्वे
तदस्तिएकत्वादेव॥ नत्व ग्निरेकः सन् आत्मानंदहतिप्रकाशयतिवा॥ सत्यप्योष्ण्यप्रकाशादिधर्मभेदे
परिणामित्वेचकि॥ मुकूटस्थेब्रम्हण्येकस्मिन्तप्यतापकभावः॥ संभवेत्॥ क्वपुनरयंतप्यतापकभाव

स्यादिति॥उच्यते॥किंनपश्यसि॥कर्मभूतोजीवदेहस्तप्यस्तापकःसवितेति॥ननु॥तर्हिर्नामदुःखंसाचे
तपितुर्नचेतनस्यदेवस्ययदिहिदेहस्यैवतप्तिःस्यात्॥सादेहनाशेस्वयमेवनश्यतीतितन्नाशायसाध
नंनैषितव्यंस्यादितिउच्यते॥देहाभावेहिकेवलस्यचेतनस्यतप्तिर्नदृष्टा॥नचत्वयापितप्तिर्नामवि
क्रियाचेतयितुःकेवलस्येष्यते॥नापिदेहचेतनयोःसंहतत्वअशुद्ध्यादिदोषप्रसंगात्॥नचतप्तेरेवत
प्तिमभ्युपगच्छसीति॥कथंतवापि॥तप्यतापकभावः॥सत्त्वंतप्यंतापकंरजइतिचेत्॥नताभ्यांचेतन
स्यसंहतत्वानुपपत्तेःसत्त्वानुरोधित्वाच्चेतनोऽपि॥तप्यतइवेतिचेत्॥परमार्थतस्तर्हि॥नैवतप्यतइत्या
पतति॥इवशब्दप्रयोगात्॥नचेत्॥तप्यते॥नेवशब्दोदोषाय॥नहिडुंडुभःसर्पइत्येतावता सविषोभव
ति॥सर्पोवाडुंडुभः॥इवेत्येतावतानिर्विषोभवति॥अतश्चाविद्याकृतोयं॥तप्यतापकभावो॥नपार
मार्थिकइत्यभ्युपगंतव्यमिति॥नैवं॥सति॥ममापि॥किंचिद्दूष्यति॥अथपारमार्थिकमेव॥चेतनस्य
तप्यत्वमभ्युपगच्छसि॥तवैवसुतरामनिर्मोक्षः॥प्रसज्येत॥नित्यत्वाभ्युपगमाच्च॥तापकस्य॥तप्यता

पकशक्त्योर्नित्यत्वेपिसनिमित्तसंयोगापेक्षत्वात्॥तच्छेः संयोगादर्शननिवृत्त्यावास्तंतिकः॥संयोगोपरमस्त
तश्चात्यंतिकोमोक्षउपपन्नइतिचेत्॥नादर्शनस्य॥तमसोनित्यत्वाभ्युपगमात्॥गुणानांचोद्भवाभिभव
योरनियतत्वादनियतः॥संयोगानिमित्तोपरमइति॥वियोगस्याप्यनियतत्वात्॥सांख्यस्यैवानिर्मोक्षोऽप
रिहार्यः॥स्यात्॥चौपनिषदस्यत्वात्मैकत्वाभ्युपगमादेकस्यचविषयविषयीभावानुपपत्तेः॥विकारभेद
स्यच॥वाचारंभणमात्रत्वश्रवणादनिर्मोक्ष शंकास्वप्नेपिनोपजायते॥व्यवहारेतु॥यत्रयथादृष्टस्तप्य
तापकभावस्तत्रतथैवसइति॥नचोदयितव्यः॥परिहर्तव्योवाभवति॥प्रधानकारणवादोनिराकृतः
परमाणुकारणवादइदानींनिराकर्तव्यः॥तत्रादौ॥तावद्योऽणुकारणवादिनाब्रह्मवादिनिदोषउत्प्रेक्ष्य
ते॥संप्रतिसमाधीयते॥तत्रायंवैशेषिकाणामभ्युपगमः॥कारणद्रव्यसमवायिनोगुणाः॥कार्यद्रव्ये
समानजातीयं॥गुणांतरमारभंते॥शुक्लेभ्यःतंतुभ्यः॥शुक्लस्यपटस्यप्रसवदर्शनात्॥तद्विपर्ययादर्शना
च्च॥तस्माच्चेतनस्यब्रह्मणोजगत्कारणत्वेअभ्युपगम्यमानेकार्येऽपिजगतिचैतन्यंसमवेयात्॥तददर्शे

नात्तन्नचेतनं॥ब्रह्मजगत्कारणंभवितुमर्हतीति॥इममभ्युपगमं॥तदीययैवक्रियया व्यभिचारयति॥
एवंलौकिकशास्त्रन्याययोःप्रदर्शितप्रकारेण॥तवकालिकाखंडप्रतिपाद्यार्थस्य॥अन्यप्रदेशस्थितत्वेन
अस्माभिःश्रुतकालिकाखंडप्रतिपाद्यार्थस्य॥त्वत्कालिकाखंडाश्रयीभूतपुराणस्य॥तत्कालिकाखंडा
आश्रयीभूतपुराणस्यतत्सत्क्रियायाःरातशुक्रियायाश्च॥अत्यंतबहुसंख्याकविरोधस्यसत्वेनकालिका
खंडद्वयस्यापिअप्रामाण्यमेवसिद्धंभवति॥ननु॥मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः॥यमाप
स्तंबसंवर्ताःइत्यादिधर्मशास्त्रकर्तृकोटौविष्णोःयमस्यचप्रतीयमानत्वेपि॥तन्नामकऋष्योरेवस्मृतिक
र्तृत्वप्रतीतेः॥नतुईश्वरकोटिप्रविष्टविष्णोःदिक्पालकयमस्यच॥तदप्रतीतेश्च॥ आदित्यानामहंविष्णुः
ज्योतिषांरविरंशुमान्॥इत्यादिभगवद्गीतावचनोक्तविष्णोरपि॥सूर्यविग्रहविशेषविशिष्टस्यैवप्रतिपादि
तत्वाच्च॥तद्वत्॥अत्रापि॥बृहदारण्यश्रुतिस्मृतिभागवतविष्णुपुराणआदित्यपुराणादिषुब्रह्मज्ञानादि
माहात्म्यविशिष्टयाज्ञवल्क्यादेःअन्यत्वंप्रसिद्धंवाजसनेयिशाखाप्रवर्तकअस्मत्कालिकाखंडोक्तशापग्र

स्तयाज्ञवल्क्यादेः अन्यत्वमितिहेतोः॥ वाजसनेयिशाखाप्रवर्तकयाज्ञवल्क्यादेरेवशापग्रस्तत्वं इति किं
न स्यात्॥ यथा॥ तत्र॥ वेदांतमीमांसासूत्रभाष्येषु ईक्षतेर्नाशब्दमित्यादिसांख्यसूत्रनिराकरणप्रवृत्ते
षु भाष्यकारैरेवसांख्यमतप्रवर्तकः॥ कपिलः॥ अन्यः॥ विष्णववतारविशिष्टदेवभूतीपुत्रः श्वेताश्वतरो
पनिषत्प्रतिपाद्यः॥ कपिलः॥ अन्यः॥ इतिप्रतिपादितं तद्वत्॥ अस्माभिरपि॥ अयं याज्ञवल्क्यः वाजसने
यिशाखाप्रवर्तकः॥ अन्यः॥ श्रुत्यादिप्रतिपादितो अन्यः॥ इतिवक्तुं शक्यत एव॥ इति चेन्न॥ कल्पभेदेन
अर्थभेदाक्षेपस्य अस्माभिर्दत्तोत्तरेणैव अस्यापि दत्तोत्तरप्रायत्वात्॥ एतयोः तुल्यन्यायत्वसंभवाच्च॥ तवा
भिमतयाज्ञवल्क्यादेरेवशापग्रस्तत्वं अस्तु॥ तद्भिन्नश्रुत्यादिप्रसिद्ध अस्मदभिमतवाजसनेयिशाखाप्रव
र्तकयाज्ञवल्क्यादेरेवशुद्धत्वंभवत्॥ अनयोः पक्षयोः विनिगमकाभावेन अन्यतरनिश्चयप्राप्तेः॥ अस्मत्पक्षे
आदित्यपुराणादेः न्यायबलादिकं पूर्वमेव असकृदुक्तं॥ उत्तरत्रापि वक्ष्यते॥ तद्बलाबलविचारसहकृतअ
स्मत्पक्षस्यैव बलीयस्त्वेन तवकालिकाखंडस्यैव अप्रामाण्यसिद्धेः॥ दुर्वारत्वात्॥ अपि च तव कालिकाखं

इस्यपुराणत्वेनश्रुतिमूलत्वात्॥ प्रामाण्यंवक्तव्यमिति॥तवाभिमतानुसारेण॥अस्माभिरंगीकारेपिपूर्वमी
मांसायां॥छंदोगप्रत्ययेसामशाखाब्राम्हणरूपश्रुतेः॥तछाखागतसोमयागप्रयोगरूपकल्पसूत्रात्सकस
तेश्च॥उद्गातृकर्तृकस्तोत्रादिगानवेलायांऔदुंबरीशाखांस्पृष्ट्वोद्गायेदिति॥औदुंवरीशाखावेष्टयितव्य
इतिचवाक्ययोःविरोधेप्राप्तेतन्निर्णयार्थंजैमिनिनासूत्रितं॥ विरोधेत्वनपेक्षंस्याद्सतित्यनुमानमिति
अस्यार्थस्तु॥प्रत्यक्षश्रुत्यासहस्मृतेःविरोधेसति॥अनुमानंस्मृतिः॥अनपेक्षंस्यात्॥अप्रमाणंभवतीत्यर्थः॥
अनुमानस्यस्मृतेःप्रत्यक्षश्रुत्यासहविरोधेअसतिसति॥अनुमानंस्मृतिः॥प्रमाणमेवभवतीत्यभिप्रायः॥शाबर
स्वामीभाष्यप्रभृतिभाट्टदीपिकांतग्रंथेषु॥श्रुतिस्मृत्योःविरोधे॥स्मृतेःतदंशेअप्रामाण्यमेवेतिसिद्धांतः॥ य
द्यपिस्मृतीनांस्मर्यते॥मूलभूताश्रुतिः॥अनयेति॥स्मृतिरिति॥स्मृतीनांशब्दव्युत्पत्यनुसारेण॥श्रुतिमूलकत्वं
सिध्यति॥तथापि॥अनुमितपरोक्षश्रुतिमूलकत्वापेक्षया प्रत्यक्षश्रुतेः॥न्यायबलोपेतत्वात्॥तदंशे॥स्मृतेर
प्रामाण्यमितिप्रदर्शितः॥सूत्रस्थअनुमानपदस्यापि॥अनुमीयते॥मूलभूताश्रुतिः॥अनेनस्मृतिरूपप्रमाणे

न इति॥ अनुमानं स्मृतिरिति॥ तद्ग्रंथेष्वेव व्युत्पत्तिः कृता॥ अस्यैव औदुंबराधिकरणस्य वेदांतमीमांसायां॥
भाष्यकारशंकरभगवत्पादाचार्यैरपि॥ एतन्न्यायप्रदर्शनार्थं॥ उदाहृतत्वं वर्तते॥ तस्मात् उभयमीमांसा
न्यायानुसारेण॥ प्रत्यक्ष बृहदारण्यजाबालरामतापनीयादिश्रुति॥ तदनुसारी विष्णुपुराणभारतभागव
तादिप्रतिपादितमाहात्म्यविशिष्टयाज्ञवल्क्यस्यैव॥ श्रैष्ठ्यविरोधिशापग्रस्तत्वे प्रतिपादककाह्लिकाखंडस्ये
व॥ अप्रामाण्यं बलात्कारेणापि सिध्यति॥ लोकेपि किंचित्कार्यं प्रति॥ राजनाम्ना उत्पन्नपुत्रस्य॥ एकग्रामा
धिपतिनाम्ना उत्पन्नपुत्रस्य च प्रमेयार्थविरोधे प्राप्ते॥ राजपुत्रस्यैव प्राधान्येन तत्कार्यप्रवर्तकत्वं॥ ग्रामाधिप
तिपुत्रस्य निराकरणीयत्वमिति॥ सर्वव्यवहारानुभवसिद्धत्वेश्च॥ त्वयापि अंगीकरणीयत्वाच्च॥ तदविरोधे स
ति॥ ग्रामाधिपतिपुत्रस्यापि प्रामाण्यं सिध्यतीत्यत्र को पि विवादो नास्ति॥ एवं तव काह्लिकाखंडस्य प्रत्यक्ष
श्रुतिविरुद्धत्वेन अप्रामाण्यं संभवत्येव॥ किंच श्रुत्यनुगृहीतस्मृतिपुराणइतिहासादेः विरुद्धस्मृतिपुराण
दीनां अप्रामाण्यमेवेति॥ वैदिकसिद्धांतः॥ तथा पूर्वोत्तरमीमांसयोः बहुशो दर्शनात्॥ तथाहि॥ उत्तरमीमां

सायां॥ ब्रम्हसूत्रेषु॥ द्वितीयाध्याये॥ प्रथमपादे॥ प्रथमाधिकरणे॥ प्रथमंसूत्रं॥ स्मृत्यनवकाशदोषप्रसंगइ
तिचेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्॥ तथाचशंकरभगवत्पादीयंभाष्यं॥ प्रथमाध्याये॥ सर्वज्ञः॥ सर्वे
श्वरो॥ जगतोत्पत्तिकारणं॥ मृत्सुवर्णादयइव॥ घटरुचकादीनां॥ उत्पन्नस्यजगतोनियंतृत्वेनस्थितिकारणं
मायावीव॥ मायया प्रसारितस्य॥ जगतःपुनः॥ स्वात्मन्येवोपसंहारकारणमवनिरिव॥ चतुर्विधस्य॥ भूतग्रा
मस्य॥ सएवच॥ सर्वेषां॥ नः॥ आत्मेत्येतद्वेदांतवाक्यसमन्वयप्रतिपादनेन॥ प्रतिपादितं॥ प्रधानादिवादा
श्चाशब्दत्वेननिराकृताः॥ इदानीं॥ स्वपक्षेस्मृतिन्यायविरोधपरिहारः॥ प्रधानादिवादानांच॥ न्यायाभासो
पबृंहितत्वं॥ प्रतिवेदांतंच॥ सृष्ट्यादिप्रक्रियाया अविगीतत्वमित्यस्यार्थजातस्य प्रतिपादनाय द्वितीयोध्या
य॥ आरभ्यते॥ तत्रप्रथमंतावत्॥ स्मृतिविरोधमुपन्यस्य परिहरति॥ यदुक्तं॥ ब्रम्हैवसर्वज्ञंजगतः कारण
मिति॥ तदयुक्तं॥ कुतः॥ स्मृत्यनवकाशदोषप्रसंगात्॥ स्मृतिश्च॥ तंत्राख्या॥ परमर्षिप्रणीता॥ शिष्टपरि
ग्रहीता॥ अन्याश्च॥ तदनुसारिण्यःस्मृतयः॥ एवंसत्यनवकाशाः॥ प्रसज्येरन्॥ तासुह्य चेतनं॥ प्रधानं

स्वतंत्रंजगतःकारणमुपनिबध्यते॥मन्वादिस्मृतयस्तावच्चोदनालक्षणेनाग्निहोत्रादिनाधर्मजातेनापे
क्षितमर्थंसमर्पयंत्यः॥सावकाशाभवंति॥अस्यवर्णस्यास्मिन्कालेऽनेनविधानेनोपनयनमीदृश
श्चाचारइत्थं॥वेदाध्ययनमित्थंसमावर्तनमित्थंसहधर्मचारिणीसंयोगइति॥तथा॥पुरुषार्थांश्चलु
वर्णाश्रमधर्मान्नानाविधान्विदधति॥नैवंकापिलादिस्मृतीनामनुष्ठेयेविषयेऽवकाशोस्ति॥मोक्षसाध
नमेवहिसम्यग्दर्शनमधिकृत्यताःप्रणीताः॥यदितत्राप्यनवकाशाःस्युः॥आनर्थक्यमेवासांप्रसज्येत
तस्मात्तदविरोधेनवेदांताः॥व्याख्यातव्याः॥कथंपुनःईक्षत्यादिभ्योहेतुभ्योब्रह्मैवसर्वज्ञंजगतः॥
कारणमित्यवधारितः॥श्रुत्यर्थः॥स्मृत्यनवकाशदोषप्रसंगेनपुनराक्षिप्यते॥भवेदयमनाक्षेपःस्वत
त्रप्रज्ञानां॥परतंत्रप्रज्ञास्तुप्रायेणजनाःस्वातंत्र्येणश्रुत्यर्थंअवधारइतुमशक्नुवंतः॥प्रख्यातप्रणेतृ
कासुस्मृतिष्ववलंबेरन्॥तद्बलेनचश्रुत्यर्थंप्रतिपित्सेरन्॥अस्मत्कृतेच॥व्याख्यानेनविश्वस्युर्बहुमा
नात्॥स्मृतीनांप्रणेतृषु॥कपिलप्रभृतीनांचार्षं॥ज्ञानमप्रतिहतंस्मर्यते॥श्रुतिश्चभवति॥ ऋषिंप्रसूतं

कपिलंयस्तमग्रेज्ञानैर्बिभर्त्तिजायमानंचपश्येत्॥इति॥तस्मान्नैषांमतमयथार्थं॥शक्यं॥संभावयितुं॥
तर्कावष्टंभेनचतेऽर्थे॥प्रतिष्ठापयंति॥तस्माद्पिस्मृतिबलेन॥वेदांताव्याख्येया॥इति॥पुनराक्षेपः॥त
स्यसमाधिर्नान्यस्मृत्यनवकाशदोषप्रसंगादिति॥यदिस्मृत्यनवकाशदोषप्रसंगेनेश्वरकारणवादआ
क्षिप्येतैवमप्यन्याईश्वरकारणवादिन्यः॥स्मृतयोऽनवकाशाःप्रसज्येरन्॥ताउदाहरिष्यामः॥एतत्सू
त्त्ममविज्ञेयं॥इतिपरब्रह्मप्रकृत्यससृंतरात्माभूतानांक्षेत्रज्ञश्चेतिकथ्यतइति॥चोक्ता॥ तस्मादव्यक्त
मुत्पन्नंत्रिगुणंद्विजसत्तम॥इत्याह॥तथान्यत्रापि॥अव्यक्तंपुरुषेब्रह्मन्निर्गुणेसंप्रलीयतेइत्याह॥अतश्च
संक्षेपमिमंशृणुध्वंनारायणःसर्वमिदंपुराणःससर्गकालेचकरोतिसर्गंसंहारकालेचतदत्तिभूयः॥इति
पुराणेभगवद्गीतासुच॥अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथा॥इतिपरमात्मानमेवच॥प्रकृत्यापस्तंबः
पठतितस्मात्तुकायाः॥प्रभवंतिसर्वेसमूलं॥शाश्वतिकः॥सनित्यः॥इति॥एवमनेकशः॥स्मृतिष्वपीश्वरः
कारणत्वेनोपादानत्वेनचप्रकाश्यते॥स्मृतिबलेनप्रत्यवतिष्ठमानस्य॥स्मृतिबलेनैवोत्तरंप्रवक्ष्यामि॥इत्य

तोऽयमन्यस्मृत्यनवकाशदोषोपन्यासः॥दर्शनंतु॥श्रुतीनामीश्वरकारणवादंप्रतितात्पर्यै॥विप्रतिपत्तौ
च॥स्मृतीनामवश्यंकर्तव्येऽन्यतरपरिगृहेअन्यतरस्यपरित्यागेचश्रुत्यनुसारिण्यः॥स्मृतयःप्रमाणं॥अ
नपेक्ष्याइतराःतदुक्तं॥प्रमाणलक्षणेविरोधेत्वनपेक्षंस्यादसतिह्यनुमानं॥इति॥नचातीन्द्रियानर्थान्श्रु
तिमंतरेणकश्चिदुपलभतइतिशक्यं॥संभावयितुंनिमित्ताभावात्॥शक्यंकपिलादीनां॥सिद्धानामप्र
तिहतज्ञानत्वादितिचेत्॥नसिद्धेरपि॥सापेक्षत्वात्॥धर्मानुष्ठानापेक्षाहिसिद्धिः॥सचधर्मश्चोदनालक्ष
णः॥ततश्च॥पूर्वसिद्धायाश्चोदनायाः॥अर्थोनपश्चिमसिद्धपुरुषवचनवशेनातिशंकितुंशक्यते॥सिद्धव्य
पाश्रयकल्पनायामपि॥बहुत्वात्॥सिद्धानांप्रदर्शितेनप्रकारेणस्मृतिविप्रतिपत्तौसत्यांनश्रुतिव्यपाश्र
यादन्यत्॥निर्णयकारणमस्तिपरतंत्रप्रज्ञस्यापिनाकस्मात्॥स्मृतिविशेषविषयः॥पक्षपातोयुक्तःकस्य
चित्क्वचित्पक्षपातेसतिपुरुषमतिवैश्वरूप्येणतत्त्वाव्यवस्थानप्रसंगात्॥तस्मात्॥तस्यापि॥स्मृतिविप्र
तिपत्त्युपन्यासेनश्रुत्यनुसारानुसारविवेचनेनचसन्मार्गेप्रज्ञासंग्रहणीया॥यातु॥श्रुतिः॥कपिलस्यज्ञाना

तिशयं प्रदर्शयती प्रदर्शिता॥ न तया श्रुतिविरुद्धमपि कापिलं मतं॥ श्रद्धातुं शक्यं कपिलमिति श्रुतिसामा
न्यमात्रत्वात्॥ अन्यस्य च॥ कपिलस्य॥ सगरपुत्राणां प्रतप्तुर्वासुदेवनाम्नः स्मरणात्॥ अन्यार्थदर्शनस्य
च॥ प्राप्तिरहितस्यासाधकत्वात्॥ भवति॥ चान्या मनोर्माहात्म्यं प्रख्यापयंती श्रुतिः यद्वै किंच मनुरवदत्
तद्भेषजं इति मनुना च॥ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि॥ समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति
इति॥ सर्वात्मत्वदर्शनं॥ प्रशंसता कापिलं मतं निंदितमिति गम्यते॥ कपिलो हि न सर्वात्मत्वदर्शनमनुम
न्यते॥ आत्मभेदाभ्युपगमात्॥ महाभारतेपि च॥ बहवः॥ पुरुषा ब्रह्मन्नुताहो एक एव तु॥ इति विचार्य॥
बहवः पुरुषा राजन् सांख्यायोगविचारिणां॥ इति परपक्षमुपन्यस्य तद्व्युदासेन॥ बहूनां पुरुषाणां हि य
थैका योनिरुच्यते॥ तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकं॥ इत्युपक्रम्य ममांतरात्मा तव च ये चान्ये
देहिसंस्थिताः॥ सर्वेषां साक्षिभूतोसौ न ग्राह्यः केनचित् क्वचित्॥ विश्वमूर्धा विश्वभुजो विश्वपादाक्षिना
सिकः॥ एकश्चरति भूतेषु स्वैरचारी यथासुखं॥ इति॥ सर्वात्मतैव निर्धारिता॥ स्मृतिश्च सर्वात्मतायां भव

ति॥ यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः॥ तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥ इति एवं
विधाअ तश्चात्मभेदकल्पनयापि कापिलस्य तंत्रस्य वेदविरुद्धं वेदानुसारिमनुवचनविरुद्धत्वं चतकेव
लं स्वतंत्रप्रकृतिपरिकल्पनयैवेति सिद्धं॥ वेदस्य हि निरपेक्षं स्वार्थे प्रामाण्यं रवेरिव रूपविषये पुरुषवच
सां तु मूलांतरापेक्षं स्वार्थे प्रामाण्यं॥ वक्तृस्मृतिव्यवहितं चेति विप्रकर्षः॥ तस्माद्वेदविरुद्धे विषये स्मृत्य
नवकाशप्रसंगो न दोषः॥ कुतश्च स्मृत्यनवकाशप्रसंगो न दोषः॥ एवं रीत्या श्रुत्यनुगृहीतस्मृतिपुरा
णादिना सह विरुद्धार्थप्रतिपादकस्मृतिपुराणादीनां अप्रामाण्यमेव भवतीति शास्त्रसिद्धांतः॥ तद्यथा॥ पूर्वो
व्यवहितानंतरग्रंथरूपसांख्यमतनिराकरणार्थप्रवृत्तस्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनव
काशदोषप्रसंगात्॥ इत्यधिकरणसूत्रभाष्ययोः॥ कपिलकणादगौतमपतंजलिदेवलादिप्रणीतसूत्रस्मृ
त्यादीनां महर्षिप्रणीतानां केवलआत्मज्ञानद्वारा मोक्षप्रापकाणां अनवकाशदोषप्राप्तिः॥ प्रसज्येत॥ तद्धि
यं॥ महतां मोक्षैकोद्देश्यत्वेन प्रवृत्तानां स्मृतीनां प्रकारांतरेण विषयाभावात्॥ निर्विषयत्वेन वैयर्थ्यापत्तेः

निर्विषयत्वरूपअनवकाशत्वलक्षणदोषप्राप्तिर्भवेत्॥सातुमाभूत्॥इत्यभिप्रायेणकपिलादिपूर्वपक्षेप्राप्तेसूत्र
शेषेणअन्यस्मृत्यनवकाशदोषप्रसंगादिति॥कपिलादिस्मृतीनांप्रामाण्यांगीकारेवेदानुगृहीतमन्वापस्तंबा
दिस्मृतीनांअनवकाशदोषप्रसक्तिर्भवेत्वेदतात्पर्यबोधकमन्वादिस्मृतीनां॥अप्रामाण्येवेदस्यैवाप्रामाण्य
प्रसक्तिर्दुर्वारैवभवति॥तथाचमनुस्मृतौद्वितीयाध्यायेसप्तसंख्याकश्लोके॥ यःकश्चित्कस्यचिद्धर्मोम
नुनापरिकीर्तितः॥ससर्वोभिहितोवेदेसर्वज्ञानमयोहिसः॥इति॥मनुनोक्तस्यापिसर्वस्यकेवलवेदार्थरू
पत्वात्॥यद्वैकिंचमनुरवद तद्भेषजंभेषजमेवास्मैकरोतीति॥तैत्तिरीयसंहितायांछंदोगब्राम्हणेच॥
यच्छंचयोश्चमनुरायजेपितातदश्यामतवरुद्रप्रणीताविति॥ तैत्तिरीयसंहितायांश्रीरुद्रे ॥ऋग्वेद
संहितायांरुद्रसूक्तेच॥ यामथर्वामनुष्पितादध्यङ्धियमत्नत॥इत्युपक्रम्य॥स्वराज्यमित्संतयाऋचा
च॥मनुमाहात्म्यं॥मनुवाक्यमात्रस्यप्रामाण्यंअभिहितं॥भारतेच॥पुराणंमानवोधर्मःसांगोवेदश्चिकि
त्सकं॥आज्ञासिद्धानिचत्वारिनहंतव्यानिहेतुभिः॥इति॥बृहस्पतिस्मृतावपि॥ तावद्देवप्रमाणानि

तर्कं व्याकरणानि च॥धर्मार्थमोक्षोपदेशामनुर्यो वन्न दृश्यते॥इति पुनर्बृहस्पतिः॥ वेदार्थोपनिबंधत्वा
त्प्राधान्यं हि मनोः स्मृतं॥मन्वर्थविपरीता या सा स्मृतिर्न प्रशस्यते॥ इति च॥इत्यादिश्रुतिस्मृतिवादाः॥म
नूक्तस्य वेदतुल्यत्वं वदंति॥तस्मात्॥तदनुसारिण्यः॥आपस्तंबयाज्ञवल्क्यादिस्मृतयः॥ब्रम्हकारणवा
दिन्यः॥सर्वा ऽपि प्रमाणभूताः॥तद्विरुद्धाः प्रधानपरमाण्वादिकारणवादिन्यः॥कपिलपतंजलिकणाद
गौतमदेवलादिप्रणीतस्मृतयः॥वेदप्रतिपाद्यार्थविरुद्धार्थप्रतिपादकाः॥वेदबाह्यतंत्रागमादितुल्याः
इति निरसनीया एव॥सूत्रकारव्यासस्य॥भाष्यकारशंकरभगवत्पादाचार्यस्य च॥श्रुत्यर्थविरुद्धश्रुत्यनु
सारिस्मृतीतिहासपुराणविरुद्धार्थप्रतिपादकस्मृतिपुराणादीनां अत्यंताप्रामाण्यप्रतिपादनं॥इष्टमेवे
ति॥अभिप्रायः॥स्पष्टमेव प्रतीयते॥तस्मात्बृहदारण्यादिश्रुतिस्मृतिभारतविष्णुपुराणभागवतआदि
त्यपुराणादिप्रामाणिकग्रंथविरुद्धार्थप्रतिपादकस्सतत्त्वअप्रसिद्धकालिकाखंडस्य कल्पितसद्दशशतसदशसंख्या
काध्यायात्मकवाक्यस्य अत्यंताप्रमाण्यसाधनं श्रुत्यनुसारिसूत्रभाष्यव्याख्यानवेदांताधिकरणपूर्वमी-

मांसाधिकरणरत्नमालाचतुर्वेदभाष्यपराशरस्मृतिव्याख्यानादिकर्तृविद्यारण्यादीनामपिइष्टमेव
अपिच॥नरसिंहप्रयोगपारिजातेश्रुत्यादिप्रमाणबलाबलनिर्णयप्रकरणे॥लोगाक्षिः॥श्रुतिस्मृति
विरोधेतुश्रुतिरेवगरीयसी॥अविरोधेततःकार्यंस्मार्तंवैदिकवत्सदा॥श्रुतिस्मृतिपुराणेषुविरोधेतु
परस्परं॥पूर्वंपूर्वंबलीयःस्यादितिन्यायविदोविदुः॥ चतुर्विंशन्मते॥स्मृतेर्वेदविरोधेतुपरित्या
गोविधीयते॥तथैवलौकिकंवाक्यंस्मृतिबाधेपरित्यजेत्॥ व्यासश्च ॥धर्मंयोबाधतेधर्मोनसधर्मःकु
ताचन॥अविरोधेतुयोधर्मःसधर्मःसद्भिरुच्यते॥तस्माद्विरोधेधर्मस्यनिश्चित्यगुरुलाघवं॥तयोर्भूयस्त
मंविद्वान्कुर्याद्धर्मविनिर्णयं॥ इत्यादिवचनानांपूर्वमेवतत्प्रकरणेअर्थोवर्णितएव॥तदनुसारेणअ
त्रापि॥श्रुतिस्मृतिविरोधेतुइतिवाक्यरीत्याबृहदारण्यलघुजाबालरामतापनीयमुक्तिकादिबहुशा
खोपनिषद्श्रुतिविरोधेनभारतादिबहुस्मृतिविरोधेनविष्णुपुराणादिबहुपुराणविरोधेन॥श्रुतिस्मृते
पुराणेषु इत्युक्तरीत्यास्मृतेर्वेदविरोधेतुइतिवाक्यरीत्या॥ धर्मंयोबाधतेइतिवाक्यरीत्या॥तस्माद्विरो

धेधर्मस्य इति वाक्यरीत्यात स्मादिति वाक्यरीत्या च गौरवलाघवविचारणेन॥ भूयस्त्वं प्रमाणन्यायबाहु
ल्यं च॥ आलोच्य तदनुसारेण धर्मनिर्णयः कर्तव्य इति॥ उक्तप्रकारेण आदित्यपुराणस्यैव श्रुतिन्याया
दिबलोपेतत्वात्॥ प्रामाण्यं अंगीकर्तव्यं॥ एतत्सर्वविरुद्धस्य॥ कालिकाखंडस्य॥ अत्यंताप्रामाण्यमेव
अंगीकर्तव्यं॥ इति निश्चयो भवति॥ प्रस्तुत हेमाद्रौ नरसिंहप्रयोगपारिजाते च॥ इतरस्मृत्यपेक्षया कल्प
सूत्रस्य मुख्यं प्रामाण्यमित्युक्तं॥ कुत इति चेत्॥ सामान्यतः स्मृतीनां तु आनुमितश्रुतिमूलकत्वेन प्रामा
ण्यसंभवेपि॥ प्रत्यक्षश्रुतिमूलकत्वात्॥ कल्पसूत्रस्य मुख्यं प्रामाण्यं संभवति॥ तद्यथा॥ इषे त्वोर्जे त्वेत्याह
इषमेवोर्जं यजमाने दधाति॥ इति प्रत्यक्षश्रुत्या प्रतिपादितार्थमेव॥ इषे त्वोर्जे त्वेति शाखामाछिनत्तीति
कल्पसूत्रमपि प्रतिपादयति॥ इति हेतोः कल्पसूत्रस्य प्रत्यक्षश्रुतिमूलकत्वं सिद्धं भवति॥ अतः अनुमितश्रु
तिमूलककालिकाखंडपुराणापेक्षया बृहदारण्यजाबालादिबहुप्रत्यक्षश्रुतिभारतादिस्मृतिमूलक आदि
त्यपुराणस्य मुख्यप्रामाण्यसंभवेनापि अप्रसिद्धसंदिग्धप्रामाण्यक कालिकाखंड वाक्यस्य अप्रामाण्यं व

र्तुं उचितमेव भवति॥ तस्मात् आदित्यपुराणस्य कालिकाखंडस्य च परस्परप्रामाण्यविप्रतिपत्तौ॥ अन्य
तरनिश्चये॥ कर्तव्ये प्राप्ते॥ पूर्वोक्तशास्त्रन्यायादिप्रदर्शितरीत्या साक्षिवाक्यरूपप्रमाणेनापि प्रदर्शितव्य
इति॥ साक्षिस्वरूपं प्रदर्श्य इष्यते॥ तथाहि ॥ साक्षित्वं नाम वादिप्रतिवाद्युभयकोट्यप्रविष्टत्वे सति
तटस्थत्वं॥ तटस्थत्वं नाम समीपवर्तित्वं॥ अत एव साक्षाद्द्रष्टृत्वं साक्षित्वमित्यपि॥ पर्यवसितं भवति॥ त
था॥ वादिनः प्रतिवादिनो वा यत्फलं प्राप्यं भवति॥ तत्फलभागित्वाभावेन उदासीनतया॥ मार्गगंता॥
लोके व्यवहारसाक्षी भवति॥ यथा वा॥ शिवोत्कर्षविष्णूत्कर्षविवादे प्राप्ते॥ शिवोत्कर्षनिर्णयाया प्पय्य
दीक्षितवर्यैः साक्षित्वेन भरतशास्त्रोक्तनाट्यप्रक्रियायां॥ हस्ताभिनयप्रदर्शनप्रकरणे॥ शिवस्य॥ शिरस्यं
जलिनिक्षेपरूपो भिनयः॥ विष्णोः स्तुभुजसमीपे॥ शंखचक्रधारणरूपहस्ताभिनयः इति॥ भरतेन उक्तत्वात्
शिरस्यंजल्यभिनयः शिवस्योत्कृष्टत्वं ज्ञापयति॥ सर्वांगानां मध्ये शिरसः उत्कृष्टत्वेन प्राधान्यात्॥ तज्ज्ञाप
नेन शिवोत्कृष्टत्वं साक्षिरूपभरतऋषिणा ज्ञापितं॥ इति हेतोः अप्पयदीक्षितैः शिवोत्कर्षनिर्णयः कृतः॥

प्र-श्रा-
२४४

यथावा॥व्यासतात्पर्यनिर्णायकग्रंथे॥अथातोब्रम्हजिज्ञासेति॥व्याससूत्रात्मकवेदांतशास्त्रमूलभूत
स्यअध्यायचतुष्टयात्मकग्रंथस्यभाष्यकर्तारः॥भट्टभास्करशंकराचार्ययादवप्रकाशनीलकंठाराध्य
रामानुजाचार्यमध्वाचार्याःषट्पुरुषाः॥ तत्रतावत्॥भट्टभास्करस्यब्रम्हणएवजगद्रूपेणजीवरूपे
णचपरिणामांगीकारः॥शंकराचार्यस्यतु॥ब्रम्हविवर्तवादः॥ब्रम्हणएवस्वशक्त्यात्मकमाययासर्वरू
पेणप्रतीयमानत्वंइत्यभ्युपगमः॥यादवप्रकाशस्यच॥भेदाभेदवादः॥तद्यथा॥मुक्तिपर्यंतं॥जीवः॥
ब्रम्हणोत्यंतभिन्नएवसन्॥ज्ञानध्यानादिसाधनवशात्॥ब्रम्हत्वंप्राप्य॥मोक्षदशायांब्रम्हणोत्यंता
भिन्नोभवति॥इतिपांचरात्रवैखानससिद्धांतसदृशः॥इत्यभ्युपगमः॥नीतकंठाराध्यस्यशिवविशिष्टा
द्वैतमिति॥तद्यथाशिवस्यब्रम्हणःचिदचिदात्मकप्रकृतिद्वयंशरीरं॥तदेवविशेषणं॥शिवस्तुविशेष्यः॥शा
रीरी॥तादृशविशेषणरूपप्रकृतिद्वयात्मकजगच्छरीरविशिष्टःशिवः॥सएवविशिष्टत्वेनरूपेणविशिष्टंअ
द्वैतंब्रम्हेतिविशिष्टाद्वैतसिद्धांतः॥एवंरामानुजाचार्यस्यापिविष्णुविशिष्टाद्वैतमिति॥अभ्युपगमः॥

नि-
२४४

शिवस्थाने विष्णुं॥ अभिवदति॥ शेषं सर्वं समानं॥ मध्वाचार्यस्य पाशुपतमतवत्॥ शिवस्थाने विष्णुः॥ शि
वसंबंधिपदार्थस्थाने विष्णुसंबंधिपदार्थाः॥ शिवस्य सर्वोत्तमत्वप्रतिपादनवत्॥ विष्णोः सर्वोत्तमत्वप्रतिपाद
नं॥ शिवापेक्षया विष्ण्वादिसर्वदेवानां तारतम्येन॥ उत्कृष्टत्वापकृष्टत्ववत्॥ विष्ण्वपेक्षया शिवादिसर्वदेवानां उत्कृ
ष्टत्वापकृष्टत्वं॥ जीवस्याणुत्वं॥ प्रपंचसत्यत्वं॥ मुक्तौ अत्यंतभेदः॥ इत्यादिकं सर्वं पाशुपततंत्रसिद्धांतवदेवाभ्युपग
मः॥ एतेषु भाष्येषु षट्सु मध्ये तन्मूलसूत्रकर्तुः व्यासस्य कस्मिन् भाष्ये तात्पर्यमिति जिज्ञासायां तत्तात्पर्यनिर्णयवि
धायकव्यासतात्पर्यनिर्णयाख्यग्रंथे॥ केनापि प्रमाणेन निष्कृष्टतया निर्णयो न संभवतीति॥ तद्ग्रंथकर्त्रा॥ साक्षिखे
न व्याससमानानां प्रत्येकशास्त्रकर्तॄणां कपिलकणादपतंजलिगोतमजैमिनिविष्णुशिवबुद्धजिनबृहस्पतीनां सा
क्षित्वं प्रतिपादितं॥ तद्यथा॥ सांख्यवैशेषिक॥ योगन्यायमीमांसापांचरात्रपाशुपतबौद्धागमजैनागमचार्वाकाग
मकर्तॄणां स्वस्वमतसिद्धांतस्थापकस्वस्वग्रंथेषु॥ यावत्परमतं॥ न निराक्रियते॥ तावत्स्वमतमप्रतिष्ठितं भवतीति
न्यायेन स्वप्रतिवादिमतत्वेन॥ व्यासमतानुवादस्य सर्वैरवश्यकरणीयत्वेन प्रसक्तत्वात् व्यासमतानुवादवेलायां एतैः

प्र-शा०
२४५

सर्वैः प्रत्येकं स्वस्वमतविधायकसूत्रागमात्मकग्रंथेषु विस्तारतया अनूदितत्वात् ॥ तत्र व्यासाभिप्रायः ॥ स्प
ष्टतया सर्वैः एतैः एकरूपेणैव अनूदितत्वेन व्यासाभिप्रायः ॥ शुद्धाद्वैत एवेति ॥ स्पष्टतया गम्यते ॥ तद्विस्ता
रस्तु ॥ व्यासतात्पर्यनिर्णयाख्यग्रंथे ॥ वैदिकविजयध्वजीयाख्यग्रंथे च ॥ दृश्यते । तत्र यथा ॥ व्याससूत्रभाष्य
काराणां षण्णां परस्परविरोधे तन्निर्णयार्थं ॥ यद्यपि ॥ कपिलकणादादिदशशास्त्रकर्तृणां ॥ प्रवृत्तिः ॥ न जाता ॥
किंतु ॥ स्वस्वमतस्थापनार्थं ॥ व्यासमतार्थानुवादे प्रवृत्तिर्जाता ॥ तथापि ॥ अर्थात् ॥ व्यासतात्पर्यनिर्णयविष
ये एते साक्षिणो अभवन् ॥ तथैव अत्रापि ॥ कालिकाखंड आदित्यपुराणयोर्मध्ये ॥ अन्यतरस्य प्रामाण्यनि
श्चयविषये ॥ अष्टोत्तरशतोपनिषत्सु उक्तो ॥ काश्चन ॥ बृहदारण्य ॥ रामतापनीय ॥ जाबालाद्याः ॥ अनेकाः ॥
उपनिषदः ॥ स्वभावत एव ॥ स्वर्गापवर्गादि ॥ महाफल ॥ तत्साधन ॥ तत्साधनादि ॥ ज्ञापनेन प्राणिनः ॥ उद्धर्तुं
लोकानुग्रहेच्छया ॥ प्रवृत्ताः ॥ इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति ॥ मनूक्तरीत्या स्वयमेव ॥ स्वभावतः ॥
वेदार्थप्रकाशनार्थं ॥ स्वयमेव प्रवृत्ताः ॥ सर्वदेश ॥ सर्वकाल ॥ सर्वजनसंमतप्रमाणरूपाः ॥ भारतस्मृतिविष्णु

२४५

पुराण॥भागवतस्कांदपुराणादि॥प्रमाणरूपग्रंथाः॥अर्थात्॥अनयोः॥आदित्यपुराणकालिकाखंडयोः
अन्यतरपक्षपातअनापन्नाअपि॥उदासीनतयापाक्षिणोभवंति॥तथाच॥गौतमधर्मसूत्रे॥द्वितीया
ध्यायेत्रयोदशसंख्याकखंडे॥ विप्रतिपत्तौसाक्षिनिमित्तासत्यवस्याबहवस्युरनिंदिताः॥स्वकर्मसु
प्रात्ययिका॥ इत्युक्तप्रकारेणात्रबहवःसाक्षिणोभवंति॥तेतुसाक्षिणः॥पूर्वोक्तरीत्याश्रुतिस्मृतिपुरा
णादिग्रंथाः॥तेषांसाक्षित्वंतदुदाहरणपूर्वकंउत्तरत्रप्रदर्शइष्यते॥तेसाक्षिणः॥अनिंदिताः॥स्वकर्म
सुप्रात्यइकाइति॥गौतमोक्तरीत्यामनुष्यसाक्षित्वेतेषांमनुष्याणांलोकनिंदारहितत्वंस्ववर्णाश्रमादि॥
धर्माधर्मविषये॥प्रात्यायिकत्वंशुचीत्वःसत्यवादिनः॥इतिप्रसिद्धत्वंइत्यादिगुणापेक्षावर्तते॥अत्रतु॥ग्रं
थरूपाःसाक्षिणोभवंतीति॥एतेषांबहुसंख्यावत्वेसतिसर्वदेशसर्वकालसर्वजनसर्वग्रंथैः॥प्रमाणत्वेनप
रिग्रहीततयाप्रसिद्धत्वंअपेक्षितं॥तथैवात्रउक्तवक्ष्यमाणश्रुत्यादिप्रमाणानां॥कालिकाखंडादित्यपुराण
योः॥अन्यतरप्रामाण्यनिश्चयेसाक्षिभूतानांश्रुत्यादीनांमध्ये॥इदानींवेचनग्रंथाःसाक्षित्वेनउदाह्रीयंते॥

तथाहि॥बृहदारण्यश्रुतिस्तु॥पूर्वमेव॥पंचमाध्याये षष्ठाध्यायेच॥याज्ञवल्क्यमाहात्म्यादि॥प्रतिपाद-
नार्थंप्रवृत्तेतिविस्तारतया।अस्माभिःप्रदर्शितः॥उत्तरत्र॥जाबालरामतापनीयादिव्यव्स्थाः उपनिषदः इम-
मेवार्थंसूचयंतीति॥प्रदर्शयिष्यामः॥एवंस्मृतीतिहासपुराणसूत्रमहानिबंधनादिवहुग्रंथेष्वपि प्रत्येकं प्रत्ये-
कं॥इममेवार्थंप्रदर्शयिष्यामः॥अर्थात्॥तेपि॥सर्वेपि॥ग्रंथाः॥अस्मदभिमतार्थे॥साक्षिणोभवंतीति
त्वयैव अभ्युपगम्यते॥इदानींतावत्॥प्रकृते॥लोकव्यवहारानुरोधेन प्रवलतमसाक्षिद्वयं॥प्रदर्शयिष्यामः
तदनंतरं॥बहवः साक्षिणः॥अस्माभिरेव॥तदुपोद्बलकत्वेन प्रदर्शयिष्यंते॥ तथाच ॥ विष्णुपुराणं
विष्णुपुराणे तृतीयांशे चतुर्थाध्याये ॥ श्रीपराशरः ॥आद्यो वेदश्चतुष्पादः शतसाहस्रसंमितः॥ततो
दशगुणः कृत्स्नो यज्ञोयं सर्वकामधुक्॥१॥ततोत्र मत्सुतो व्यास अष्टाविंशतिमेंतरे॥वेदमेकं चतुष्पादं चतु-
र्धा व्यभजत्प्रभुः॥२॥यथाच तेन ते व्यस्ता वेदव्यासेन धीमता॥वेदास्तथा समस्तैस्तैर्व्यस्ता व्यासैस्तथा मया॥३॥
तदनेनैव वेदानां शाखाभेदान् द्विजोत्तम॥चतुर्युगेषु रचितान् समस्तेष्ववधारय॥४॥कृष्णद्वैपायनं व्यासं

विस्विनारायणंप्रभुं।।कोन्योहिभुविमैत्रेयमहाभारतकृद्भवेत्।।५।।तेनव्यस्तायथावेदामत्पुत्रेणमहात्म
ना।।द्वापरेत्व्यत्रमैत्रेयतन्मेश्रुणुयथार्थतः।।६।।ब्रम्हणाचोदितोव्यासोवेदान्व्यस्तुंप्रचक्रमे।।अथशिष्या
न्सजग्राहचतुरोवेदपारगान्।। ७।।ऋग्वेदग्राहकंपैलंजग्राहसुमहामतिः।।वैशंपायननामानंयजुर्वेदस्य
चाग्रहीत्।।८।।जैमिनिंसामवेदस्यतथैवाथर्ववेदवित्।।सुमंतुस्तस्यशिष्योभूद्वेदव्यासस्यधीमतः।।९।।
रोमहर्षणनामानंमहाबुद्धिंमहामुनिं।।सूतंजग्राहशिष्यंसइतिहासपुराणयोः।।१०।।एकआसीद्यजुर्वेद
स्तंचतुर्धाव्यकल्पयत्।।चातुर्होत्रमभूद्यस्मिंस्तेनयज्ञमथाकरोत्।।११।।अध्वर्यवंयजुर्भिस्तुऋग्भिर्हौत्रंतथा
मुनिः।।औद्गात्रंसामभिश्चक्रेब्रम्हत्वंचाप्यथर्वभिः।।१२।।ततःसऋचउद्धृत्यऋग्वेदंकृतवान्मुनिः।।यजूंषि
चयजुर्वेदंसामवेदंचसामभिः।।१३।।राज्ञांस्त्वथर्ववेदेनसर्वकर्माणिसप्रभुः।।कारयामाससमैत्रेयब्रम्हत्वंच
यथास्थिति।।१४।।सोयमेकोमहावेदतरुस्तेनपृथक्कृतः।।चतुर्धाचततोजातंवेदपादपकाननं।।१५।।
बिभेदप्रथमंविप्रपैलोऋग्वेदपादपं।।इंद्रप्रमितयेप्रादाद्बाष्कलायचसंहिते।।१६।।चतुर्धासबिभेदाथबाष्क

प्र॰ सा॰
३५५
२४७

लोद्विजसंहितां॥बोध्यादिभ्योददौतास्तुशिष्येभ्यःसुमहामतिः॥१७॥बोध्याग्निमाढकौतद्वद्याज्ञवल्क्यप
राशरौ॥प्रतिशाखास्तुशाखायास्तस्यास्तेजगृहुर्मुने॥१८॥ अस्यव्याख्यानं ॥बोध्याग्निमूढकाविति॥
तस्याःबाष्कलशाखायाःप्रतिशाखाअवांतरशाखाः॥बोध्याग्निमाढराविति च पाठः॥१९॥इंद्रप्रमितिरेकां
तुसंहितांस्तत्सुतंततः॥मांडूकेयंमहाभागंमैत्रेयाध्यापयत्तदा॥१९॥तस्यशिष्यप्रशिष्येभ्यःपुत्रशिष्यक्र
माद्ययौ॥वेदमित्रस्तुशाकल्यःसंहितांसमधीतवान्॥२०॥चकारसंहिताःपंचशिष्येभ्यःप्रददौचताः॥तस्य
शिष्याश्चयेपंचतेषांनामानिमेशृणु॥२१॥मुद्गलोगोमुखश्चैववात्स्यःशालीयएवच॥शैशिरःपंचमश्चासी
न्मैत्रेयःसुमहामतिः॥२२॥संहितात्रितयंचक्रेशाकपूणिस्तथेतरः॥निरुक्तमकरोत्तद्वच्चतुर्थंमुनिसत्तम॥२३
क्रौंचोवैतालिकस्तद्वद्बलाकश्चमहामुनिः॥निरुक्तश्चचतुर्थोभूद्वेदवेदांगपारगः॥२४॥इत्येताःप्रतिशाखा
भ्योप्यनुशाखाद्विजोत्तम॥बाष्कलश्चापरास्तिस्रःसंहिताःकृतवान्द्विजः॥२५॥शिष्यःकालायनिर्गार्ग्यःस्तृ
तीयश्चतथाजपः॥इत्येतेबह्वृचाःप्रोक्ताःसंहितायैःप्रकीर्तिताः॥२६॥इतिश्रीविष्णुपुराणेतृतीयांशेचतुर्थो

नि॰

ध्यायः॥ विष्णुपुराणेतृतीयांशेपंचमाध्याये ॥श्रीपराशरः॥ यजुर्वेदतरोःशाखाःसप्तविंशन्महामुनिः
वैशंपायननामासौव्यासशिष्यश्चकारवै॥१॥ अस्यश्रीधरीयव्याख्यानं ॥यजुर्वेदतरोरिति॥सप्त
विंशत्सप्तविंशतिः॥१॥ मूलं ॥शिष्येभ्यःप्रददौताश्चजगृहुस्तेप्यनुक्रमात्॥श्रीधरीयव्याख्यानंनास्ति
मूलं ॥याज्ञवल्क्यश्चतस्याभूद्ब्रम्हरातसुतोद्विज॥शिष्यःपरमधर्मज्ञोगुरुवृत्तिपरःसदा॥३॥ श्रीधरीय
व्याख्यानं॥तैत्तिरीयशाखोत्पत्तिहेतुंतस्यान्यंशिष्यमाह॥याज्ञवल्क्यश्चेति॥३॥ऋषिर्योद्यमहामेरोःसमाजे
नागमिष्यति॥तस्यवैसप्तरात्रात्तुब्रम्हहत्याभविष्यति॥४॥ श्रीधरीयव्याख्यानं ॥तेनकृदितैर्यजुर्भिस्तै
त्तिरीयशाखाबभूवेत्याख्यानपूर्वकमाह॥ऋषिरित्यादिना॥तैत्तिरीयास्तुतेततइत्यतेन॥४॥पूर्वमेवंमुनिगणैः
समयोयःकृतोद्विज॥वैशंपायनएकस्तुतंव्यतिक्रांतवांस्तदा॥५॥ अस्यव्याख्याननास्ति॥स्वस्रीयंबालकं
सोथपादस्पृष्टमताडयत्॥अस्यव्याख्यानं ॥स्वस्रीयमिति॥स्वस्रीयंस्वसुःसुतंपदास्पृष्टमताडयत्॥अ
घातयदितिचपाठः॥प्रमादात्पादेनस्पृष्टमात्रादेवासौममारेत्यर्थः॥६॥शिष्यानाहचभोःशिष्याब्रम्हहत्यापहंव्रतं

प्र॰ शा॰
५४
२४८

चरव्यं मत्कृते सर्वैन विचार्यमिदं तथा॥७॥ अस्य व्याख्यानं ॥शिष्यनिति॥ प्रमादाद्बाले मृते ब्रह्महत्याव्रतं कु-
र्योः॥ नोपनीतेति न विचार्यं॥ किंतु साक्षाद्ब्रह्मवधेय यातथैव तद्व्रतं सदर्थ्यं चरंत्वित्यर्थः॥८॥ अथाह याज्ञवल्क्य-
स्तं किमेभिर्भगवन् द्विजैः॥ क्लेशितैरल्पतेजोभिश्चरिष्येहमिदं व्रतं॥२॥ अस्य व्याख्यानं नास्ति ॥ततः क्रुद्धो गु-
रुः प्राह॥ याज्ञवल्क्यं महामुनिं॥ मुच्यतां यत्त्वयाधीतं मत्तो विप्रावमानक।९॥ अस्य व्याख्यानं ॥तत इति वि-
प्रावमानक विप्रावमंतः॥९॥ निस्तेजसो वदस्येतान् यस्त्वं ब्राह्मणपुंगवान्॥ तेन शिष्येण नार्थोस्ति ममा-
ज्ञाभंगकारिणा॥१०॥ अस्य व्याख्यानं नास्ति ॥याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितं॥ ममाप्यलं त्व-
याधीतं यन्मया तदिदं द्विज॥११॥ अस्य व्याख्यानं ॥याज्ञवल्क्य इति॥ ममापि॥ त्वया गुरुणा॥ अलं॥ त्व-
त्तो मया यदधीतं तदिदमिति॥ मुखेंगुलिप्रक्षेपेण वमनमनुकरोति॥११॥ श्रीपराशरः ॥इत्युक्त्वा रुधि-
राक्तानि सरूपाणि यजूंषि सः॥ छर्दइत्वा ददौ तस्मै ययौ च स्वेछया मुनिः॥१२॥ अस्य व्याख्यानं नास्ति
यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज॥ जगृहुस्तित्तिरा भूत्वा तेत्तिरीयास्तु ते ततः॥१३॥ अस्य व्याख्या

नि॰

नं॥ यजूंषीति॥ छर्दितानां यजुषां विप्ररूपेण ग्रहणस्यायुक्तत्वात्तित्तिराः पक्षिणो भूत्वा मुनयस्तानि जगृ-
हुः॥ ततो हेतोस्ते मुनयस्तैत्तिरीयाः प्रसिद्धाः॥ १३॥ ब्रह्महत्याव्रतं चीर्णं गुरुणा चोदितैस्तु यैः॥ चरकाध्व-
र्यवस्ते तु चरणान्मुनिसत्तम॥ १४॥ अस्य व्याख्यानं ॥ब्रह्महत्येति॥ ततोऽन्येषां चरणाध्वर्यु समा-
ख्यां निर्वक्ति ब्रह्महत्याव्रतमिति॥ ब्रह्महत्यानिहत्यर्थं व्रतं यैः चरणात्॥ कर्माचरणात्॥ चीर्णं यजुःशा-
खाध्यायित्वात्तेषां चरणाध्वर्युसमाख्या॥ चरणाध्वर्यवस्ते त्विति च पाठः॥ १५॥ याज्ञवल्क्योऽपि मैत्रे-
य प्राणायामपरायणः॥ तुष्टाव प्रणतः सूर्यं यजूंष्यभिलषंस्ततः॥ १६॥ अस्य व्याख्यानं ॥ततोऽसौ सू-
र्यं स्तुत्वा तस्मात्सादलब्धैर्यजुर्भिः काण्वादिशाखाः कृतवानिति दर्शयन्नाह॥ याज्ञवल्क्योऽपीत्यादि याव-
त्समाप्ति॥ १६॥ याज्ञवल्क्यः ॥नमः सवित्रे द्वाराय मुक्तेरमिततेजसे॥ ऋग्यजुःसामभूताय त्रयीधाम्ने च तेज-
से॥ १६॥ अस्य व्याख्यानं ॥नम इति॥ त्रयी वै वेदत्रयात्मकदीप्तियुक्ताय॥ श्रु॥ सैषा त्रय्येव विद्या तपतीति श्रु-
तेः॥ १६॥ नमोऽग्नीषोमभूताय जगतः कारणात्मने॥ भास्कराय परं तेजः सौषुम्णरुचिबिभ्रते॥ १७॥ अस्य व्याख्यानं

प्र-श्रा॰
२४९

नमइति॥अग्नीषोमभूताय॥अतोजगतःकारणात्मनेअग्नीषोमात्मकत्वाज्जगतःतदेवाह्भास्करायेति॥तापक
रत्वादग्निरूपांगत्वंसौषुम्णंसोमाप्यायकंतेजोबिभ्रतइतिच॥सोमरूपत्वमुक्तं॥उक्तंच॥श्लोके॥सूर्यरश्मिःसु
षुम्णोयःस्तर्पितस्तेनचंद्रमाइति॥१७॥कलाकाष्ठनिमेषादिकालज्ञानात्मनेनमः॥ध्येयायविश्वरूपायपरमा
क्षररूपिणे॥१८॥बिभर्तियःसुरगणानाप्यायेंदुंस्वरश्मिभिः॥स्वधामृतेनचपितॄंस्तस्मैतृप्त्यात्मनेनमः॥१९॥हि
मांवुघर्मवृष्टीनांकर्ताहर्ताचयःप्रभुः॥तस्मैत्रिकालभूतायनमःसूर्यायवेधसे॥२०॥अपहंतितमोयश्चजगतोस्य
जगत्पतिः॥सत्वधामधरोदेवोनमस्तस्मैदिवस्पते॥२१॥सत्कर्मयोग्योनजनोनैवावाशौचकारणं॥यस्मि
न्ननुदितेतस्मैनमोदेवायभास्वते॥२२॥स्पृष्टोयदंशुभिर्लोकःक्रियायोग्योभिजायते॥पवित्रकारणार्थाय
तस्मैशुध्यात्मनेनमः॥२३॥नमःसवित्रेसूर्यायभास्करायविवस्वते॥आदित्यायादिभूतायदेवादीनांनमो
नमः॥२४॥हिरण्मयंरथंयस्यकेतवोमृतवाजिनः॥वहंतिभुवनालोकचक्षुष्मंतनमाम्यहं॥२५॥ श्रीप
राशरः॥इत्येवमादिभिस्तेनस्तूयमानस्तवैरविः॥वाजिरूपधरःप्राहव्रीयतामितिवांछितं॥२६॥याज्ञवल्क

स्तदाप्राहप्रणिपत्यदिवाकरं॥यजूंषितानिमेदेहियानिसंतिनमेगुरौ॥२७॥श्रीपराशरः॥एवमुक्तोददौत
स्मैयजूंषिभगवान्रविः॥अयातयामसंज्ञानियानिवेत्तिनतद्गुरुः॥२८ असः॥धरीयव्याख्यानः॥वैशंपायनोया
निसस्सेद्रूनवेत्ति॥व्यासेनानुपदिष्टत्वात्सयजूंषियैरधीतानितानिविप्रैर्द्विजोत्तम॥वाजिनस्तेसमाख्यायाःसूर्योश्व
सोभवद्यतः॥२९॥शाखाभेदास्तुतेषांवैदशपंचचवाजिनां॥कण्वाद्यास्तुमहाभागायाज्ञवल्क्याःप्रकीर्तिताः
॥३०॥इतिश्रीविष्णुपुराणेतृतीयांशेपंचमोध्यायः॥ ॥महाभागवतेद्वादशस्कंधेषष्ठाध्यायेमूलग्रंथाः
श्रीसूतः॥एवंनिशम्यमुनिनाभिहितंपरीक्ष्य व्यासात्मजेननिखिलात्मदृशासमेन॥तत्पादमूलमुपसृत्यनतेन
मूर्ध्नाबध्यांजलिस्तमिदमाहसविष्णुरातः॥१॥सिद्धोस्म्यनुगृहीतोस्मिभवताकरुणात्मना॥श्राविंतोयश्चमे
साक्षादनादिनिधनोहरिः॥२॥नात्यद्भुतमिदंमन्येभवतामच्युतात्म ॥श्रावितोयच्चमेसाक्षाद्भू तेषुयदनु
ग्रहः॥३॥पुराणसंहितामेतामश्रौष्मभवतोवयं॥यस्यांखलूत्तमश्लोकोभगवाननुवर्ण्यते॥४॥भगवंस्तक्षकादि
भ्योमृत्युभ्योनबिभेम्यहं॥प्रविष्टोब्रम्हनिर्वाणमभयंदर्शितंत्वया॥५॥अनुजानीहिमांब्रम्हन्वाचंयच्छाम्यधोक्षजे।

मुक्तकामाशयंचेतः प्रवेश्यविसृजाम्यसून्॥६॥अनुजानीहिमांब्रम्हन्वाचंमुंचतमांतकं॥ ...

मुक्तकामाशयंचेतःप्रवेश्यविसृजाम्यसून्॥६॥अज्ञानंचनिरस्तंमेज्ञानविज्ञाननिष्ठया॥भवतादर्शितंक्षेमंपरंभगवतःपरं॥७॥सूतः॥इत्युक्तस्तदनुज्ञायभगवान्बादरायणिः॥जगामभिक्षुभिःसाकंनरदेवेनपूजितः॥८॥परीक्षदपिराजर्षिरात्मन्यात्मानमात्मना॥समाधायपरंदध्यादस्पंदासुर्यथातरुः॥९॥प्राक्कूलेबर्हिष्यासीनोगंगाकूलउदङ्मुखः॥ब्रम्हभूतोमहायोगीनिःसंगाच्छिन्नसंशयः॥१०॥तक्षकःप्रहितोविप्राःक्रुद्धेनब्रम्हसूनुना॥हंतुकामोनृपंगच्छन्ददर्शपथिकाश्यपं॥११॥तंतर्पइत्वाद्रविणैर्निवर्त्यविषहारिणं॥द्विजरूपप्रतिच्छन्नःकामरूप्यदशंनृपं॥१२॥ब्रम्हभूतस्यराजर्षेर्देहोहिगरलाग्निना॥बभूवभस्मसात्सद्यःपश्यतांसर्वदेहिनां॥१३॥हाहाकारोमहानासीद्भुविखेदिक्षुसर्वतः॥विस्मिताअभवंसर्वेदेवासुरनरादयः॥१४॥देवदुंदुभयोनेदुर्गंधर्वाप्सरसोजगुः॥ववृषुःपुष्पवर्षाणिविबुधाःसाधुवादिनः॥१५॥जनमेजयस्यपितरंश्रुत्वातक्षकभक्षितं॥यथाजुहावसंक्रुद्धोनागान्सत्रेसहद्विजैः॥१६॥सर्पसत्रेसमिद्धेग्नौदह्यमानान्महोरगान्॥दृष्ट्वेंद्रंसर्पउद्विग्नस्तक्षकःशरणंययौ॥१७॥नागतंतक्षकंतत्रदृष्ट्वापारीक्षितोद्विजान्॥उवाचतक्षकःकस्मान्नदह्येतोरगाधमः॥१८॥तंगोपायति

राजेंद्रशक्रःशरणमागतं॥तेनसंस्तंभितःसर्पस्तस्मान्नाग्नौपतत्यसौ॥१९॥इतिपारीक्षितःश्रुत्वाप्राहर्त्वि
जउदारधीः॥सहेंद्रस्तक्षकोविप्राःनाग्नौकिमितिपात्यते॥२०॥तच्छ्रुत्वाजुहुवुर्विप्राःसहेंद्रंतक्षकंमखे॥त
क्षकाशुपतस्वेहसहेंद्रेणमरुत्वता॥२१॥इतिब्रह्मोदिताक्षेपैःस्थानादिंद्रःप्रचालितः॥बभूवसंभ्रांतमतिः
सविमानःसतक्षकः॥२२॥तंपतंतंविमानेनसहतक्षकमंबरात्॥विलोक्यांगिरसःप्राहराजानंतंबृहस्प
तिः॥२३॥नैषत्वयामनुष्येंद्रवधमर्हतिसर्पराट्॥अनेनपीतममृतमतोयमजरामरः॥२४॥जीवितंमरणंजं
तोर्गतिःस्वेनैवकर्मणा॥राजंस्ततोन्योनास्त्यस्यप्रदातासुखदुःखयोः॥२५॥सर्पचोरादिवन्ह्यंबुक्षुत्तृड्व्या-
ध्यादिभिर्नृप॥पंचत्वमृच्छतेजंतुर्भुंक्तेह्यारब्धकर्मच॥२६॥तस्मात्सत्रमिदंराजन्संस्थीयेताभिचारिकं॥
सर्पाअनागसोदग्धाजनैर्दिष्टंहिभुज्यते॥२७॥इत्युक्तःसतथेत्याहमहर्षेर्मानयन्वचः॥सर्पसत्रादुपरतःपूज
यामासवाक्पतिं॥२८॥नैषाविष्णोर्महामायाबाध्ययाचाप्यलक्षणा॥ययामुह्यंत्यात्मभूताःभूतेषुगुणवृ
त्तिभिः॥२९॥नयत्रदंभीत्यभयाविराजतामायात्मवादेसकृदात्मवादिभिः॥नयद्विवादोविविधास्तदाश्र-

योमनश्चसंकल्पविकल्पवृत्तियत्॥३०॥नयत्रसज्ज्यं सृजतोभवोःपरंश्रेयश्चजीवस्त्रिभिरन्वितस्ययत्॥तदेतदुत्सादितबाध्यबाधकंनिषिध्यचोर्मीन्विरमेततन्मुनिः॥३१॥परंपदंवैष्णवमामनंतितद्यन्नेतिनेतीत्यतदुत्सिसृक्षवः॥विसृज्यदौरात्म्यमनन्यसौहृदाहृदोपगुह्यावसितंसमाहितैः॥३२॥तयेतदधिगछंतिविष्णोर्यत्परमंपदं॥अहंममेतिदौर्जन्यंनयेषांदेहगेहजं॥३३॥अतिवादांस्तितीक्षेतनावमन्येतकंचन॥नचेमंदेहमाश्रित्यवैरंकुर्वीतकेनचित्॥३४॥नमोभगवतेतस्मैकृष्णायाकुंठमेधसे॥यत्पादांबुरुहध्यानात्संहितामध्यगामिमां॥३५॥श्रीशौनकः॥पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः॥वेदाश्चकतिधाव्यस्ताएतत्सौम्याभिदेहिनः॥३६॥सूतः॥समाहितात्मनोब्रह्मन्ब्रह्मणःपरमेष्ठिनः॥हृदाकाशादभून्नादोवृत्तिरोधात्विभाव्यते॥३७॥यदुपासनयाब्रह्मन्योगिनोमलमात्मनः॥द्रव्यक्रियाकारकाख्यंहित्वायांत्यपुनर्भवं॥३८॥ततोभूत्त्रिवृदोंकारोयोव्यक्तप्रभवःस्वराट्॥यत्तल्लिंगंभगवतोब्रह्मणःपरमात्मनः॥३९॥शृणोतियइमंस्फोटंसुप्तश्रोत्रेपिशून्यदृक्॥येनवाग्व्यज्यतेयस्यव्यक्तिराकाशआत्म

नः ॥३९॥ शृणोति य इमं स्फोटं सुप्तः श्रोत्रेपि शून्यधृक् येन वाग्व्यज्यते । यस्य व्यक्तिराकाश आत्मनः ॥४०॥ स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः स सर्वमंत्रोपनिषद्वेदबीजं सनातनं ॥४१॥ तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह । धार्यंते यैस्त्रयो भावा गुणसामर्थ्यवृत्तयः ॥४२॥ ततोक्षरसमाम्नायमसृजद्भगवानजः ॥ अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं ॥४३॥ ततोसौ चतुरो वेदान्चतुर्भिर्वदनैर्विभुः सव्याहृतीः सोंकारांश्चातुर्होत्रविवक्षया ॥४४॥ पुत्रानध्यापयामास तान्ऋषीन् ब्रह्मकोविदान् । ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥४५॥ ते परंपरया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥४६॥ क्षीणायुषः क्षीणसत्वान् दुर्मेधान्वीक्ष्य कालतः ॥ वेदान्ब्रह्मर्षयो व्यस्यन् हृदिस्थाच्युतचोदिताः ॥४७॥ अस्मिन्नप्यंतरे ब्रह्मन् भगवान् लोकभावनः ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥४८॥ पराशरात्सत्यवत्यामंशांशकलया विभुः ॥ अवतीर्णो महाभागो वेदंचक्रे चतुर्विधं ॥४९॥ ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः । चतस्रः संहिताश्चक्रे सूत्रे मणिगणा इव ॥५०॥ तासां स चतुरः शिष्यानुपहूय महामतिः ॥ एकैकां संहितां ब्र

ह्यन्नैकैकस्मैददौविभुः ॥५१॥ पैलायसंहितामाद्यांबह्वृचाख्यामुवाचह। वैशंपायनसंज्ञायनिगदाख्यंयजु
र्गणं ॥५२॥ साम्नांजैमिनयेप्राह तथाछंदोगसंहितां ॥अथर्वांगिरसंनामस्वशिष्यायसुमंतवे॥५३॥ पै
लस्स्वसंहितामूचइंद्रप्रमितयेमुनिः ॥बाष्कलायचसोप्याहशिष्येभ्यस्संहितांस्वकां॥५४॥ चतुर्धाव्यस्य
बोध्याययाज्ञवल्क्यायभार्गव॥पराशराग्निमित्राभ्यामिंद्रप्रमितिरात्मवान् ॥५५॥ अध्यापयत्संहितांस्वां
मांडकेयमृषिंकविं॥ तस्यशिष्योदेवमित्रस्सौभर्यादिभ्यऊचिवान् ॥ ५६॥शाकल्यस्तत्सुतस्स्वांतुपंचधाव्य
स्यसंहितां॥ वात्स्यमौद्गल्यशालीयगोखिल्यशिशिरेष्वधात् ॥५७॥ जातूकर्ण्यस्तुतच्छिष्यसनिरुक्तांस्व
संहितां॥ बलाकपैंगवैतालविरजेभ्योददौमुनिः॥५८॥ बाष्कलःप्रतिशाखाभ्योवालखिल्याख्यसंहितां
चक्रेबालायनिर्गार्ग्यःकासारश्चैवतांदधुः ॥५९॥ बह्वृचांस्संहिताह्येताएभिर्ब्रह्मर्षिभिर्धृताः ॥श्रुत्वैतच्छंद
सांव्यासंसर्वपापैःप्रमुच्यते॥६०॥ वैशंपायनशिष्यावैचरकाध्वर्यवोभवन् ॥ यच्चेरुर्ब्रह्महत्यांहःक्षप
णंस्वगुरोर्व्रतं॥६१॥ अस्यश्रीधरीयव्याख्यानं॥ यजुर्वेदेतैत्तिरीयशाखोत्पत्तिप्रस्तावमाह॥ वैशंपायनेति॥ २५२

चरकनाम्नः निरुक्तिमाह ॥ यद्यस्माद्धेतोः ॥ चेरुरिति ॥ ब्रह्महत्यारूपंमहः । क्षपयतीति ॥ तर्ह्यांतस्त्वगुरो
रनुष्ठेयंव्रतंतद्व्रताचरणाच्चरकाइत्यर्थः ॥ ६१ ॥ याज्ञवल्क्यस्तुतच्छिष्यस्सआह भगवन् कियत् ॥ च
रि तेनाल्पसाराणांचरिष्येहंसुदुश्चरं ॥ ६२ ॥ अस्यव्याख्यानं ॥ याज्ञवल्क्य इति ॥ तच्छिष्यः वैशंपाय
नशिष्यः अल्पसाराणा मे तेषांचरितेनकियत्सुदुश्चरं अहंचरिष्यामीति ॥ ६२ ॥ इत्युक्तोगुरुरप्याह
कुपितोयमलंत्वया ॥ विप्रावमंत्रा शिष्येणमदधीतंत्यजाश्विति ॥ ६३ ॥ अस्यव्याख्यानं ॥ इतीति विप्रा
णामवमंत्रा ॥ अवज्ञाकर्त्री ॥ मत्तोधीतमाशुत्यजेति ॥ ६३ ॥ देवरातसुतस्सोपिछर्दित्वायजुषांगणं ॥ त
तोगतेथमुनयोददृशुस्तान्यजुर्गणान् ॥ ६४ ॥ अस्यव्याख्यानं ॥ देवरातेति ॥ देवरातसुतोयाज्ञवल्क्यः
॥ ६४ ॥ भूत्वातित्तिरयोब्रह्मन् तल्लोलुपतयाददुः तैत्तिरीया इति यजुश्शाखा आसन् सुपेशलाः ॥ ६५ ॥ अ
स्यव्याख्यानं ॥ भूत्वेति ॥ छर्दितस्यादानंविप्ररूपेणानुचितमितिमत्वातित्तिरयः पक्षिविशेषाः भूत्वा आद
धुः ॥ ततश्चतैत्तिरीयाः इतिप्रसिद्धाः ॥ सुपेशलाः ॥ अतिरम्याः ॥ वहुवचनमवांतरभेदविवक्षया ॥ ६५ ॥ याज्ञ

वल्क्यस्ततो ब्रह्मन्छंदांस्यधिगवेषयन्॥ गुरोरविद्यमानानि सूपतस्थेर्कमीश्वरं॥६६॥ अस्यव्याख्या
ख्यानं॥ काण्वमाध्यंदिनादिशाखाप्रसंगमाह॥ याज्ञवल्क्यइति॥ गुरोः वैशंपायनस्य व्यासेनविभज्या
नुक्तत्वादविद्यमानानिअधिकानिगवेषयन् मृगयन् सूपतस्थे सम्यक् तुष्टाववेदानामीश्वरं तथाच
श्रुतिः ऋग्भिः पूर्वाण्हे दिविदेवईयते यजुर्वेदेतिष्ठति मध्येन्हः सामवेदेनास्तमये महीयतेवेदैरशून्यस्त्रि
भिरेति सूर्यः॥६६॥ याज्ञवल्क्यः ॐ नमोभगवते आदित्यायाखिलजगतामात्मस्वरूपेणकालस्वरूपेणच
तुर्विधभूतनिकायानांब्रह्मादिस्तंबपर्यंतानामंतर्हृदयेषुबहिरप्याकाशइवोपाधिनाव्यवधीयमानो भवाने
कएवक्षणलवनिमेषाद्यवयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति॥६७॥
यदुतहवावविबुधर्षभसवितरदस्तपत्यनुसवनमहरहराम्नायविधिनाउपतिष्ठमानानामखिलदुरितवृजि
नबीजावभर्जनभगवतस्समभिधीमहितपनतवमंडलं॥६८॥ यइहवावस्थिरचरनिकराणांनिजनिके
तनानांमनइंद्रियासुगणाननात्मनस्स्वयमात्मांतर्यामीप्रचोदयति॥६९॥ यएकएवेमंलोकमतिकरालं

वद्नांधकारसंज्ञाजगरयह्गृहीत व्या मृतकमिव विचेतनमवलोक्यानुकंपया परमकारुणिक ईस्य य

वोत्थाप्याहारहस्तुसमवनंश्रेयसिस्वधर्माख्यस्थाने प्रवर्तयत्यवनिपतिरिवासाधूनां भयमुदीरयन्न टतिपरित

आशापालैस्तत्रतत्रकमलकोशांजलिभिरुपहृतार्हणः॥७०॥ अथतः भगवंस्तवचरणनलिनयुगलंत्रि

भुवनगुरुभिरभिवंदितमहमयातयामयजुष्काम उपसरामीति ॥७१॥ श्रीसूतः ॥ एवंस्तुतस्सभगवान् वा

जिरूपधरोरविः॥ यजूंष्ययातयामानि मुनयेदात्प्रसादितः॥७२॥ यजुर्भिरकरोच्छाखादशपंचशतैर्विभुः

जगृहुर्वाजसन्यस्ताः काण्वमाध्यंदिनादयः॥७३॥ जैमिनेस्सामगस्यासीत्सुमंतुस्तनयोमुने॥ सुकर्मा त

त्सुतस्ताभ्यामेकैकांप्राह संहितां ॥७४॥ सुकर्माचापि तच्छिष्यस्साम वेदधरोमहान् ॥ सहस्रसंहिताभेदंच

क्रेसाम्नांततस्तुसं॥ ७५॥ हिरण्यनाभः कौसल्यः पौष्यिंजिश्चसुकर्मणः॥शिष्यौजगृहतुश्चान्य आवंत्यो

ब्रह्मवित्तमः॥७६॥ उदीच्यास्सामगाशिष्या आसन् पंचशतानि वै॥ पौष्यिंजावंत्ययोश्चापितांश्चप्राचीयान्प्रचक्ष

ते॥७७॥ लोकाक्षिर्लांगलिः कुल्यः कुसीदः कुक्षिरेवच॥ पौष्यिंजशिष्याजगृहुस्संहितानां शतं शतं॥७८॥ कृतो

प्र·शा
२५४

हिरण्यनाभस्य चतुर्विंशतिसंहिताः शिष्यऊचेस्वशिष्येभ्यश्शेषा आवंत्य अत्मवान्॥ ७९॥ इतिश्रीमद्भागव
तेद्वादशस्कंधेषष्ठोध्यायः॥ ॥ ॥ एवंस्मृत्योर्विरोधेन्यायस्तुबलवान्व्यवहारतइति॥ विज्ञानेश्वरीयेव्यव
हारकांडेविंशतिसंख्याकश्लोकव्याख्याने॥ मूलस्मृतिवचनमुदाहृत्यव्याख्यातं। तद्यथाकस्मिंश्चदेकस्मिन्
पुरुषेअन्यः कश्चित्पुरुषः स्वकार्यार्थे अन्यग्रामंगमिष्यन् दशसंख्याकान्स्वपदार्थान् तस्मिन्निक्षिप्यग्रामां

ख

तरंगत्वापुनरागत्यपदार्थान् तन्निकटेनिक्षिप्तान् भवान् ददात्विति प्रश्नेकृतेसति तान् पदार्थान् त्वंनिक्षिप्तव
नेवनभवसि॥ मिथ्यावदसि॥ इतिउक्तवान्॥ तदानींपदार्थनिक्षिप्तवान्राजसभांगत्वाएतद्वृत्तांतं आवेदयामास
तदानींबुद्धिमंतः मिलित्वाविचारेकृतेसाक्ष्यादिभिर्हेतुभिः तेषांपदार्थानांमध्येएकः पदार्थः निक्षिप्तइतिनिश्चयोजातः। तदानीं
धर्मशास्त्रेषु। एकस्यांस्मृतौ॥ तेषुनिक्षिप्तेषुपदार्थेषुएकस्मिन्पदार्थेनिक्षिप्तत्वेननिश्चितेसतिसर्वेपदार्थाः दापयितव्याइति
न्यायनिर्णयः प्रदर्शितः। स्मृत्यंतरेतु। यः पदार्थः साक्षिवाक्यादिप्रमाणैर्निश्चितोभवेत्तुसएकः पदार्थएवदापयितव्य
इतिन्यायःप्रदर्शितःएवंपरस्परस्मृत्योर्विरोधेप्राप्तेकथंनिर्णयःकर्तव्यइत्याकांक्षायांतद्देशतत्कालकृतदृष्टुतत्पुरुषानुसारि

पि

तत्प्रतिपाद्यार्थयोश्च याज्ञवल्क्यादीनां शापग्रस्तत्वादिना तच्छास्त्रविनामयोग्यत्वं श्रुतिविष्णुपुराणभागवतादि
सहकृत आदित्यपुराणोक्तरीत्या तेषां योग्यत्वं इत्यनयोः अर्थयोः विरोधे प्राप्ते पूर्वोक्तस्मृत्योर्विरोधे न्यायस्तु इ
तिस्मृतिवचनविज्ञानेश्वरीयाद्युक्तरीत्या च अन्वयव्यतिरेकादिहेतुसहकृतन्यायबलविशिष्टस्य आदित्यपु
राणस्यैव प्रामाण्यनिश्चयः कर्तव्यः॥ बहुप्रमाणविरुद्धस्य कालिकाखंडस्य अप्रामाण्यनिश्चयः कर्त
व्यः॥ उचितइतिसर्वेषां प्रतिभाति॥ तद्यथा लोके कश्चन मनुष्यः अन्यस्य कस्यचित् मनुष्यस्य ऋणरूपेण शत
निष्कं दत्वा तज्ज्ञापनार्थं तेन पत्रं लेखयित्वा स्वनिकटे तत्पत्रं स्थापयितवान्॥ कालांतरे तदृणगृहीताएतन्निष्कं
तद्वृद्ध्यंशं च ऋणदातुः पुनः दत्तवान्॥ तदानीं स्वेन लिखितपत्रं पुनः प्राप्तुं धनदातारं प्रति ऋणगृहीता याचितवान्
स तु धनदाता तत्पत्रं इदानीं मम निकटे नास्ति ग्रामांतरे वर्तते आनयित्वा कालांतरे दास्यामि इत्युक्त्वा एतदर्थज्ञा
पनार्थं इमं सर्वार्थमपि दर्शयित्वा ससाक्षिकं एकं पत्रं लिखित्वा तस्मै दत्तवान्॥ अनंतरं धनदातृमरणात्पश्चात् पू
र्वस्मिन्काले ऋणगृहीत्रा लिखितं पत्रमवाप्य स तत्पत्रसंबंधि सवृद्धिकं निष्कशतं त्वया दातव्यमिति तेन सह विवा

दंकृत्वाधनदातुः द्वौपुत्रौराजसभांगत्वाआवेदितवंतौ। तत्सभायांविचारकालेअनयोर्मध्येएकःपुत्रःऋणगृहीतापंचाशंन्निष्कंसवृद्धिकंदत्तवान्॥ अवशिष्टमनेनदातव्यं॥ इत्युक्तवान्॥ अन्यः पुत्रः किमपिनदत्तवान्सवृद्धिकंशतनिष्कमनेनदातव्यमित्युक्तवान्॥ सभास्थाः॥ अनयोर्भ्रात्रोर्वचनभेदंश्रुत्वाभवत्पक्षद्वयोः विचारपूर्वकं अन्यतरपक्षनिश्चयानंतरंअस्माभिर्विचारः क्रियतेइत्युक्तवंतः॥ एतस्मिन्नवसरेऋणगृहीतामनुष्यः ऋणापकरणनिमित्तकऋणदात्रालिखितपत्रं स्वनिकटस्थितंगृहीत्वासाक्षिद्वयसुक्तस्सन्सभांप्रत्यागत्यसाक्षिद्वयसहितंतत्पत्रंदर्शयितवान्सभास्थाः तद्दर्शनपूर्वकसाक्षिद्वयविचारणानंतरंऋणदातृपुत्रपक्षौद्वावपिनिराकृतवंतः॥ एवमत्रापिआदित्यपुराणकालिकाखंडयोः याज्ञवल्क्यादितच्छाखीयानांयोग्यताऽयोग्यताविषयेआदित्यपुराणपक्षेयाज्ञवल्क्यादीनांशापाद्ययोग्यताभावविशिष्टतन्माहात्म्यप्रतिपादनं॥ कालिकाखंडेतुयाज्ञवल्क्यादीनांशापादिपूर्वकायोग्यताप्राप्तिप्रतिपादनंचदृश्यते। अनयोर्विवादेप्राप्तेकथंनिर्णयः कर्तव्यः॥ इतिबुद्धिमंतः विचारंकृत्वापूर्वोक्तप्रकारेणयथादृष्टांते

ऋणदातृपुत्रयोः पंचाशन्निष्कं सवृद्धिकं धनगृहीत्रा दातव्यमिति ॥ धनगृहीत्रा शतनिष्कं सवृद्धिकं दातः
व्यमितिच ॥ परस्परविरुद्धवचनश्रवणानंतरं धनगृहीत्रा स्वेन ऋणापकरणप्रयुक्तधनदातृलिखितपत्रपूर्व
कसाक्षिद्वयप्रापणेन किमपि ऋणं नदातव्यमिति कृतवंतः ॥ इतियथा तथा कालिकाखंडवादिनां मध्ये कश्चि
दयं कालिकाखंडः स्कांदपुराणस्थ इति याज्ञवल्क्य कण्व कात्यायन माध्यंदिनानां वैशंपायननिकटे सह्या
ध्यायत्वं चतुर्णामेव वैशंपायननिकटे अध्ययनं वैशंपायनगुरु कौंडिक पुत्रहनन प्रयुक्त वैशंपायनप्रा
सब्रह्महत्याव्रताकरणेन याज्ञवल्क्यादि चतुर्णां वैशंपायनदत्तशापप्राप्तिः॥ इत्याद्याख्यायिका प्रतिपाद्यते
तेषां वादिनां मध्य एव अन्यैः कश्चित् कंचिद्राजानं प्रति प्रतिदिनं वैशंपायनेन आशीर्वाद मंत्राक्षत
प्रेषण विषये याज्ञवल्क्यस्य वैशंपायनस्यच विवादप्राप्तौ ॥ याज्ञवल्क्यस्यैकस्यैव वैशंपायनः शापं
दत्तवान् इत्याद्याख्यायिकापूर्वकः अयं कालिकाखंडः ब्रह्मांडपुराणस्थ इतिच प्रतिपाद्यते ॥ तथा
च एकस्मिन्नेव व्यूहे परस्परविरुद्धप्रतिपादनं ॥ पूर्वोक्तऋणदातृपुत्रद्वयप्रतिपादनवत् ॥ अत्यंतविरुद्धं अ

नयोः पक्षयोः तैःसर्वैर्वादिभिः एकवाक्यतामापाद्य अन्यतरपक्षनिश्चयानंतरं याज्ञवल्क्यादियोग्यतायो
ग्यताविचारः कर्तव्यः इतिनिश्चयकाले दृष्टांते धनदात्राधनगृहीत्रे तद्दृणापकरणनिमित्तकलिखित
पत्रवत्॥ तत्स्थानापन्न बृहदारण्य लघुजाबालरामतापनीयमुक्तिकादिउपनिषत्पराशरादिस्मृतिबो
धायनगौतमादिसूत्रहेमाद्रिमाधवीयादिधर्मशास्त्रनिबंधनग्रंथैः साक्षिस्थानापन्नमहाभारत विष्णु
पुराणश्री भागवतस्कांदादि पुराणादि भिः उपसाक्षिस्थानापन्न आपस्तंबगौतमाश्वलायनादिसूत्रभा
ष्य व्याख्यान प्रयोगहेमाद्रिविज्ञानेश्वरीयमाधवीयनरसिंह पारिजातधर्मप्रवृत्तिनिर्णयसिंध्वादिग्रंथै
श्चकालिकाखंड वादिसमूहगतपक्षद्वयप्रविष्टप्रक्रियाद्वयप्रतिपादककालिकाखंडयोः असूयाप्रयुक्त
आधुनिकजनकल्पितनिश्चयैः अत्यंताप्रामाण्यंसिद्धमेवभवति॥ ननुपुराणत्वाविशेषात्॥ त्वयाआदि
त्यपुराणस्यप्रामाण्यंयथांगीक्रियते तथैवइदमपिपुराणमितिप्रामाण्यं अंगीकर्तव्यमेव॥ तद्विहायत्वयाप
क्षपातोनकर्तव्यः॥ इतिचेत्सत्यं॥ तथापि॥ केवलपुराणत्वाविशेषात्॥ प्रामाण्यं अभ्युपगंतुं नशक्यते। य

स्यामनुष्यत्वाविशेषात् ॥ भृत्योपि राजसमान इति वक्तुं न शक्यते ॥ तच्छक्तेरभावात् ॥ इति सर्वैरभ्युपगंतव्यः ।
एवं आदित्यपुराणोक्तार्थस्य श्रुतिविष्णुपुराणभागवताद्यर्थानुसारि आदित्यपुराणार्थस्य अन्वयव्यतिरेकादि
न्यायबलभूयस्त्वात् कालिकाखंडार्थस्य तत्समानताभावः ॥ सर्वैरनुभूयत एव ॥ अत्र अन्वयव्यतिरेकः
न्यायस्त ॥ तथा तव कालिकाखंडोक्तरीत्या याज्ञवल्क्यादीनां चंडालकत्वसत्त्वे ॥ बृहदारण्यादि अनेको
पनिषच्छ्रुतिप्रतिपाद्य तन्माहात्म्यं न स्यात् ॥ तस्य माहात्म्यस्य श्रुत्यनुसारि विष्णुपुराण भारत भागवतादि
प्रतिपाद्यत्वं न स्यात् यत्र यत्र माहात्म्यं वर्तते तत्र तत्र अयोग्यता नास्ति यत्र यत्र अयोग्यता वर्तते तत्र तत्र
श्रुत्यप्रतिपादितमाहात्म्यं न संभवति ॥ यथा बौद्धचार्वाकादिमतप्रक्रियायां वैदिकयोग्यतापि नास्ति ॥ श्रु
त्यादिप्रतिपाद्य माहात्म्यमपि नास्ति ॥ यथा वा ॥ वसिष्ठादिषु शास्त्रीययोग्यता नास्ति ॥ तत्र वेदप्रतिपाद्य माहा
त्म्यं वर्तते ॥ प्रत्युत बौद्धचार्वाकादिमतप्रक्रियायां वैदिकशास्त्रप्रतिपाद्यनिंदितत्वमेव वर्तते ॥ विष्णुपुरा
णस्य तु ॥ आपस्तंबधर्मसूत्रे ॥ अथ पुराणे श्लोका भवंति ॥ इति विष्णुपुराणश्लोकानामेव ॥ आपस्तंबे [illegible]

त्दृतत्वात् ॥ श्रीमद्भाष्यकारशंकरभगवत्पादाचार्यैरपि गीताभाष्य विष्णुसहस्रनाम भाष्यसूत्र भाष्यादिषुस
र्वपुराणानि विहायविष्णु पुराणस्यैकस्यैव बहुशोउदाहृतत्वात् ॥ विष्णुपुराणभागवतयोश्च ॥ पुराणसा॰
त्विकराजस तामसत्वादि विभागवादिभिरपि ॥ सर्वैः जनैः सात्विकत्वेन महाप्रमाणत्वेनच अंगीकृतत्वा
त् ॥ भागवतस्य तु सर्वदेशेषु सर्वजनैः महाप्रमाणत्वेन अंगीकृत्य ॥ एतद्विकृतित्वेन तत्तद्देशेषु द्राविड
कर्नाटकआंध्रमहाराष्ट्रादि सर्वदेशभाषया रचितस्यापि भागवतस्य महाप्रमाणत्वेन अंगीकार द्वारा नित्य
पूजापारायणादिना पूज्यमानत्वाच्च ॥ अनयोः पुराणयोः सर्वस्मार्त संमत श्रीधराचार्येणैव व्याख्यात
त्वात् इतिहासपुराणाभ्यां वेदं समुपबृंहयेदिति मनुवचनानुसारेण अनयोः पुराणयोः वेदार्थ प्रकाश
कत्वेन वेदोपबृंहकत्वाच्च ॥ बृहदारण्ये जाबाल रामतापनीय मुक्तिकोपनिषदादि बहूपनिषदर्थानुसा
रित्वेन वेदतुल्यत्वेन प्रामाण्यं सिद्धं भवति ॥ महाभारतस्य तु ॥ भारतः पंचमो वेद इति वेदतुल्यत्वं स
र्वशास्त्र लोक प्रसिद्धमेव ॥ प्रत्युत ब्रह्मसूत्रेषु व्यासेनैव श्रुतेश्च स्मृतेश्चेति तत्र तत्र श्रुतितुल्य प्रमाणत्वेन उदाहृत

त्वात्॥ भगवद्गीताया अपि भारतांतर्भूतत्वाच्च॥ तत्प्रामाण्यसंदेहः वेदांगीकर्तॄणां सर्वेषामपि यदा कदावा
न जायते॥ एतादृशावष्टोपेतत्वेन आदिपुराणस्यैव प्रामाण्यं यथा सिद्धं॥ न तथा तव कालिकाखंडस्य वाक्य
स्य बहुप्रमाणविरुद्धत्वेन संदिग्धप्रामाण्यवत्त्वेन त्वया न्यायतः॥ तस्य असाधितप्रामाण्यवत्त्वेन च॥ अप्रामा
ण्यं युक्ततरमेव भवति॥ यदि तु॥ हेतुरस्तु साध्यं मास्तु इत्यप्रयोजकशंकावत्॥ याज्ञवल्क्यस्य श्रुत्यादिप्रति
पाद्यमाहात्म्यमस्तु॥ शापग्रस्तत्वेनायोग्यताभावो मास्तु॥ इति त्वया आपाद्येत॥ यथा धूमरूपो हेतुरस्तु
साध्यलक्षणो वह्निर्मास्तु॥ इत्यापादने कृते॥ यदि वह्निर्न स्यात्॥ तर्हि धूमोपि न स्यात्॥ इत्यनुकूलतर्करूपवि
पक्षे बाधकापादनमिव याज्ञवल्क्यस्यापि शास्त्रप्रतिपाद्यमाहात्म्यवत्त्वे पि शापप्रयुक्तयोग्यताभावोप्यस्त्वि
ति यद्युच्येत॥ तदा योग्यताप्रयुक्तशास्त्रप्रतिपाद्यमाहात्म्यं न स्यात्॥ यत्र यत्र शास्त्रप्रतिपाद्यमाहात्म्यं व
र्तते॥ तत्र तत्र योग्यतायाः सत्वं वर्तत एव॥ यथा वसिष्ठादिषु यत्र यत्र योग्यताभावः तत्र तत्र शास्त्रप्रतिपा
द्यमाहात्म्याभावः॥ यथा बौद्धचार्वाकादिषु इति अन्वयव्याप्तेः व्यतिरेकव्याप्तेश्च सर्वैर्दृष्टत्वात्॥ तथैव॥

शास्त्रेपिन्यायस्यदर्शनात्॥तथाहि॥उत्तरमीमांसात्मकवेदांतसूत्रभाष्येसूत्रकृताव्यासेनभाष्यकृता
शंकराचार्येणचप्रथमाध्यायेतृतीयपादेअपशूद्राधिकरणे॥ सूत्रं ॥शुगस्यतदनादरश्रवणात्तदाद्र
वणात्सूच्यतेहि॥३४॥अस्यशंकरभगवत्पादीयभाष्यं॥यथामनुष्याधिकारनियममपोह्यदेवादीनामपि
विद्यास्वधिकारउक्तस्तथैवद्विजात्यधिकारनियमापवादेनशूद्रस्याप्यधिकारःस्यादित्येतामाशंकांनिव-
र्तयितुमिदमधिकरणमारभ्यते॥तत्रशूद्रस्याप्यधिकारःस्यादितितावत्॥प्राप्तंअर्थित्वसामर्थ्ययोःसंभावा
त्॥तस्माच्छूद्रोयज्ञेऽनवक्लृप्तइतिवत्॥शूद्रोविद्यायामनवक्लृप्तइतिनिषेधाऽश्रवणात्॥यच्चकर्मस्वनधि
कारकारणंशूद्रस्यानग्नित्वंनतद्विद्यास्वधिकारस्यापवादकंनह्याहवनीयादिरहितेनविद्यावेदितुंनश-
क्यते॥भवतिचलिंगंशूद्राधिकारस्योपोद्बलकंसंवर्गविद्यायांहिजानश्रुतिंपौत्रायणंशुश्रूषुंशूद्रशब्देनपरा
मृशति॥अहहारेत्वाशूद्रतवैवसहगोभिरस्तुइतिविदुरप्रभृतयश्चशूद्रयोनिप्रभवाअपिविशिष्टविज्ञान
संपन्नाःस्मर्यंतेतस्मादधिक्रियतेशूद्रोविद्यास्वित्येवंप्राप्तेब्रूमः॥नशूद्रस्याधिकारोवेदाध्ययनाभावात्॥

अधीतवेदो हि विदितवेदार्थो वेदार्थेष्वधिक्रियते॥ न च शूद्रस्य वेदाध्ययनमस्ति उपनयनपूर्वकत्वाद्वे
दाध्ययनस्य उपनयनस्य च वर्णत्रयविषयत्वात् यत्त्वर्थित्वं न तदसति सामर्थ्ये अधिकारकारणं भवति साम
र्थ्यमपि न लौकिकं केवलमधिकारकारणं भवति॥ शास्त्रीये अर्थे शास्त्रीयस्य सामर्थ्यस्यापेक्षितत्वा
त्॥ शास्त्रीयस्य च सामर्थ्यस्याध्ययननिराकरणेन निराकृतत्वात्॥ यच्चेदं शूद्रो यज्ञेऽनवक्लृप्त इति त
न्न्यायपूर्वकत्वाद्विद्यायामप्यनवक्लृप्तत्वं द्योतयति॥ तत् न्यायस्य साधारणत्वात्॥ यत्पुनः संवर्गविद्या
यां शूद्रशब्दश्रवणं लिंगमन्यसेन तल्लिंगं न्यायाभावात्॥ न्यायोक्ते हि लिंगदर्शनं द्योतकं भवति॥ न चात्र
न्यायोऽस्ति कामं चायं शूद्रशब्दः संवर्गविद्यायामेवैकस्यां शूद्रमधिकुर्यात्तद्विषयत्वात् न सर्वासु विद्यासु अ
र्थवादस्थत्वात् न तु क्वचिदप्ययं शूद्रमधिकर्तुमुत्सहते शक्यते चायं शूद्रशब्दोऽधिकृतविषये योजयितुं क
थमिति उच्यते कं वर एनमेतत्॥ संतं सयुग्वानमिव रैक्वमात्थेत्यस्माद्धंसवाक्यादात्मनोऽनादरं॥ श्रुत
वतो जानश्रुतेः पौत्रायणस्य शुगुत्पेदे तामृषिरैक्वः शूद्रशब्देनानेन सूचयांबभूवात्मनः परोक्षज्ञानता

ख्यापनायेतिगम्यते॥जातिशूद्रस्यानधिकारात्॥कथंपुनःशूद्रशब्देनशुगुत्पन्नास्यूच्यतेइतिउच्यते तदाद्रवणूक्छुचमभिदुद्रावशुचावाभिदुद्रवे॥शुचावारैक्कमभिदुद्रावेति॥शूद्रावयवार्थसंभवात्॥ रूढार्थस्यचासंभवात्दृश्यतेचायमर्थोस्यामाख्यायिकायां॥ सूत्रं ॥क्षत्रियत्वगतेश्चोत्तरत्रचैत्ररथे नलिंगात्॥३५॥ अस्यभगवत्पादीयंभाष्यं ॥एतच्चनजातिशूद्रोजानश्रुतिः॥यत्कारणंप्रकरण निरूपणेनक्षत्रियत्वमस्योत्तरत्रचैत्ररथेनाभिप्रतारिणाक्षत्रियेणसमभिव्याहारात्॥लिंगात्गम्य ते॥उत्तरत्रहिसंवर्गविद्यावाक्यशेषेचैत्ररथिरभिप्रतारीक्षत्रियःसंकीर्त्यते॥अथहशौनकंच॥कापेय मभिप्रतारिणंच। काक्षसेनिंसूदेनपरिविष्यमाणौब्रम्हचारीविभिक्षइति॥चैत्ररथित्वंचाभिप्रतारि णःकापेययोगादवगंतव्यं॥कापेययोगोहिचैत्ररथस्यावगतःएतेनवैचैत्ररथंकापेयाअयाजयन्नि ति॥समानान्वययाजिनांचप्रायेणसमानान्वययाजिकाभवंति॥तस्माच्चैत्ररथनामैकःक्षत्रपतिरजा यतइतिचक्षत्रजातित्वावगमात्॥क्षत्रियत्वमस्यावगंतव्यं॥तेनक्षत्रियेणाभिप्रतारिणासह॥समाना

यांविद्यायांसंकीर्तनंजानश्रुतेरपिक्षत्रियत्वंसूचयति॥समानानामेवहिप्रायेणसमभिव्याहारोभवति
क्षत्तप्रेषणाद्यैश्वर्ययोगाच्चजानश्रुतेः॥क्षत्रियत्वावगतिः॥अतोनशूद्रस्याधिकारः॥ अस्मिन्नेवाधि
करणेअन्यस्मिन्गुणसूत्रभाष्येपि॥तदभावनिर्धारणेचप्रवृत्तेः॥३७॥ इतिसूत्रस्यशंकरभगवत्पादी
यंभाष्यं॥ इतश्चनशूद्रस्याधिकारोयत्सत्यवचनेनशूद्रत्वाभावेनिर्धारितेजाबालंगौतमउपनेतुमनु
शासितुंचप्रवर्तते॥नैतदब्राह्मणोविवक्तुमर्हतिसमिधंसोम्याहरोपत्वानेष्येनसत्यादगाः इतिश्रुतिलिंगा
त्॥इत्यादिना॥उपनयनअध्ययनपूर्वकविद्याधिकाररूपयोग्यताभावःनिर्धारितः॥एवंप्रकारेणलौकि
कंन्यायमहत्कृतशास्त्रीयन्यायस्यैवसंदिग्धविषयेप्रमेयनिश्चायकत्वात्॥अस्मिन्अधिकरणेतावत्॥
जानश्रुतेःपौत्रायणस्यवस्तुतःक्षत्रियत्वेपिसंवर्गविद्यावाक्यशेषेशूद्रशब्दस्यरैक्केणतंप्रतिप्रयुक्तत्वेसतिइतरे
षांजनानांअयंजानश्रुतिःशूद्रएवशूद्रशब्दस्यरूढ्याप्रयोगदर्शनबलात्॥जानश्रुतिःपौत्रायणोपि॥शूद्र [illegible]
ति॥भ्रांतिरज्ञानमुत्पद्यते॥तद्यथा॥आदित्यमुपतिष्ठेत॥इत्यत्र॥अदितेःअपत्यंपुमान्आदित्यःइति॥व्युत्प

त्वात्सर्व ।देवानामपियौगिकत्वेन आदित्यत्वं॥ आदित्याऋभवोऽस्वमा इत्यादिनिघंटुनाच॥ सर्वदेवानामपि
आदित्यशब्दवाच्यत्वात् आदित्यमुपतिष्ठेतेत्यत्र संशये प्राप्ते योगाद्रूढेः बलीयस्त्वमिति न्यायेन आदित्यशब्दस्य
लोकशास्त्रयोः सूर्ये रूढत्वात्॥ सूर्यस्यैव आदित्यशब्देन ग्रहणं भवतीति॥ वसंते ब्राम्हणोऽग्नीनादधीत ग्रीष्मे राज
न्यः॥ शरदि वैश्यः॥ वर्षासु रथकारः॥ इत्यादिना अग्न्याधानाधिकारिणो प्रतिपादिताः॥ रथकारशब्देन कस्याधि
कारिणोऽग्न्याधानाधारकालो विधीयते॥ इति संशये प्राप्ते रथं करोतीति रथकारः॥ इति व्युत्पत्त्या कस्यचित्॥ रथक
र्तुः अधिकार इति॥ पूर्वपक्षे प्राप्ते चंडालादीनामपि रथकारित्वसंभवात्॥ अव्यवस्थितत्वप्राप्त्या शास्त्रानर्थ
क्यप्राप्तिः॥ भवेदिति कृत्वा॥ करण्यां माहिष्याज्जातः इति अनुलोमजातिविशेषविशिष्टस्य रथकारशब्दा
भिधेयत्वसंभवात्॥ रूढ्या तस्यैव वर्षर्तु कालविधानमिति च सिद्धांतः कृतः॥ तस्मात् रूढ्या शूद्रश
ब्दः जानश्रुतेः शूद्रत्वं साधयति॥ इति पूर्वपक्षे प्राप्ते प्रकारांतरेण बहुविधेन जानश्रुतेः॥ क्षत्रियत्वावगतेः
सत्वात् अत्रस्थ शूद्रशब्दः यौगिकत्वेन क्षत्रियमेव जानश्रुतिं प्रतिपादयति॥ अन्यथा सर्वान्वयासंभवात्॥

इतिभगवान्बादरायणःशुगस्यतदनादरश्रवणादिति॥क्षत्रियत्वगतेश्चोत्तरत्रचैत्ररथेनलिंगात्॥इति
सूत्राभ्यां॥तस्यशूद्रत्वाभावसाधनविषयेअभिप्रतारिनामकस्यक्षत्रियस्यक्षत्रियत्वसाधनेशौनककापे
यनामकस्यब्राम्हणवंशस्यचित्ररथनामकक्षत्रियवंशपुरोहितत्वेनयाजकत्वंप्रमाणभूतशास्त्ररूपग्रंथांत
रेचित्ररथवंशस्यशौनककापेयवंशस्यायाजयन्इतिप्रतिपादकप्रमाणबलेनप्रसाध्य॥सःकाक्षसेनेः
चित्ररथवंशोत्पन्नस्यअभिप्रतारिणः॥पङ्क्तौभुक्तवान्तयोर्भोजनसमयेसूदेनपरिवेष्यमाणातौप्रतिब्रम्ह
वारीबिभिक्षेइतिछांदोग्येचतुर्थाध्यायेसंवर्गविद्यावाक्यशेषेप्रतिपादितत्वेनहेतुनातस्यकाक्षसेनेःअभि
प्रतारिणःक्षत्रियत्वंप्रसाध्य॥तेनचैत्ररथेनअभिप्रतारिणासहएकस्यांविद्यायांजानश्रुतेःपौत्रायणस्यस
मभिव्याहारात्॥सहाधिकारित्वात्॥तस्यजानश्रुतेःक्षत्रियत्वंप्रसाधितवान्तदुपोद्बलकत्वेनतु॥रैक्वंप्र
ति॥जानश्रुतिः॥गोश्वरथधनादिपदार्थान्दत्वाक्षत्तारंप्रेषयामास॥इतिजानश्रुतिपौत्रायणःनिसंबहु
ब्राम्हणेभ्यःबव्हन्नबहुगवादिदानंकृतवानितिप्रसिद्धेश्च॥इत्यपिहेतोःजानश्रुतिःक्षत्रियएव॥इत्यपि

चप्रवृत्तेः इत्याकारकेण सूत्रेण च शूद्रस्य वेदविद्याधिकारो नास्तीति साधने प्रवृत्ते अपि ... तस्मिन्नधिकरणे अन्येन गुणसूत्रेण तन्निर्धारणे
भूते एतद्गुणसूत्रस्याप्यर्थः उपनयनादिसंस्कारविषये शूद्रत्वाभावनिश्चयः प्रवृत्तोऽपशूद्राधिकरणे अत
स्वशरणागतं उपनयनार्थमागतं सत्यकामं जाबालं परीक्ष्य नैतद्ब्राम्हणो विवक्तुमर्हति ॥ समिधं सोम्याहरोप
स्त्वानेष्ये ॥ न सत्यादगा इति ॥ अयं अब्राम्हणश्चेत् ॥ सत्यं वदितुं नार्हति ॥ अयं तु सत्यमुक्तवान् ॥ अतः अयम
ब्राम्हणो न भवति ॥ इति गौतमः ॥ मनसा आलोच्य ॥ अस्मिन् जाबाले शूद्रत्वाभावं निश्चित्य ॥ हे सोम्य ॥ समिध
माहरत्वं ॥ उपनेष्यामि ॥ यस्मात् ॥ त्वं ॥ न सत्यादगा इति ॥ उक्तवान् ॥ तस्मात् ॥ सत्यवदनलिंगेन ॥ शूद्रत्वा
भावनिश्चयं कृतवान् ॥ एतावता ॥ सूत्रत्रयेणापि ॥ शूद्रस्य वेदाधिकाराभावसाधने ॥ जानश्रुतेः ॥ शूद्रशब्द
वाच्यत्वं श्रुतिप्रतिपादितमपि ॥ परंपरया शूद्रत्वाभावसाधकलिंगानां मध्ये ॥ एकेन लिंगेन ॥ अन्यं प्रसाध्य ॥
तल्लिंगेनान्यं ॥ तल्लिंगेनान्यं ॥ तल्लिंगेनान्यमिति पारंपर्यक्रमेण ॥ जानश्रुतेः क्षत्रियत्वं प्रसाध्य ॥ प्रकारांतरे

शूद्रस्य वेदाधिकाराभावप्रयोजकं यच्छूद्रत्वं॥ तदभावं प्रसा
णापितस्य क्षत्रियत्वं प्रसाध्य तृतीयेन सूत्रेण च॥ शूद्रस्य वेदाधिकाराभावप्रयोजकं यच्छूद्रत्वं॥ तदभावं प्रसा
धितवानिति॥ हेतोरपि एकं साध्यं प्रति परंपरया बहुलिंगेनापि साधनसंपत्तिः संपादनीयेति गम्यते॥ अ
तः अस्मदभिमतयाज्ञवल्क्यादेः शापतस्त्वयुक्तयोग्यत्वाभावनिराकरणेन॥ तच्छाखिनां योग्यत्व साध
नि बहूनि लिंगानि साक्षात्साध्यसाधकानि॥ श्रुतियुक्तिअनुभवादिप्रबलप्रमाणसहितानि पूर्वमुक्तानि॥ उत्तर
त्रवक्ष्यमाणानि च क्रमेण प्रदर्शइष्यंते॥ तथाहि॥ बृहदारण्यश्रुतिः॥ याज्ञवल्क्यपक्षपातमनुसृत्य याज्ञव
ल्क्यकांडमिति॥ शतपथब्राम्हणैकदेशस्य॥ अध्यायषट्कस्य॥ तन्नामसंबंधित्वपूर्वकं याज्ञवल्क्यमाहात्म्य
प्रकटनार्थमेव॥ प्रवृत्तेति॥ बुधिमद्भिर्निश्चीयते॥ तथाहि॥ यद्यपि बृहदारण्यपंचमाध्यायस्थ द्वितीयखंडे
भाष्यव्याख्यानाभ्यां श्रुतितात्पर्यार्थः॥ याज्ञवल्क्यपक्षपातीति॥ स्पष्टीकृतं तथापि॥ तत्रत्वावत्सामश्रवादि
शब्दनिर्वचनेन याज्ञवल्क्यस्य चतुर्वेदाध्येतृत्वमात्रं॥ प्रकटीकृतं॥ अत्र तु विशेषाकारेण तन्माहात्म्यं प्रकटी
क्रियत इति न पुनरुक्तता दोषप्राप्तिः॥ किंच स्वभावतः ऋग्वेदादिसर्ववेदेषु आख्यायिकां विनैव प्रायशः क

र्मोपासनाज्ञानाद्यर्थे श्रुतिरेव प्रतिपादयति॥ क्वचित्कंचित् ब्रम्हवादिनो वदंति॥ इत्यादिना सामान्यत
व प्रश्नप्रतिवचनाभ्यां स्वयमेव आक्षेपसमाधानादि रूपेण प्रतिपादयति॥ क्वचित्तु सामान्यनामग्रहणं विना पिशु
खं किमस्य कौ बाहू का ऊरू पादा उच्येते॥ ब्राम्हणोस्य मुखमासीद्बाहू राजन्यः कृतः॥ ऊरू तदस्य यद्वैश्यः॥ इत्या
दिरूपेण वक्ति॥ क्वचित्॥ इति शुश्रुम धीराणां येनस्तद्विचचक्षिरे॥ इत्यादिरूपेण च वक्ति॥ एवं स्थिते वाजस
नेयिशाखायां॥ चत्वारिंशत्संख्याकांताध्यायेषु शतपथब्राम्हणेषु च॥ बहुशः मनुष्यादेर्नामग्रहणं वि
नैव सर्वार्थान्प्रतिपादयति॥ अत्र तावत् बृहदारण्ये पंचमषष्ठाध्याययोरेव॥ जनकयज्ञप्रशंसा॥ तत्र
तेन कृतब्रम्हविसरीक्षा तत्र बहूनां ब्राम्हणानां मध्ये याज्ञवल्क्यस्यैव ब्रम्हवित्वं आश्वलादिविदग्धशा
कल्यांतैः सह याज्ञवल्क्यस्य कर्मोपासनब्रम्हज्ञानादिविषयकपरीक्षाविचारः तेषां सर्वेषां पराजयः या
ज्ञवल्क्यस्य विजयः याज्ञवल्क्यशापेन विदग्धः शाकल्यः मृतोपि ब्रम्हवित्वेन याज्ञवल्क्यस्य ब्रम्हहत्या
पातकाप्राप्तिः॥ प्रस्तुत॥ ब्रम्हविदा याज्ञवल्क्येन सह विवदमानस्य विदग्धः शाकल्यस्यैव मरणप्राप्तिः

तदस्थामपिसंस्काराभावप्राप्तिः॥इत्यादिशाकल्यस्यानिष्टसंयोगः॥कहोलकौषीतकब्राम्हणयोःयत्सा
क्षादपरोक्षाद्ब्रम्हयआत्मासर्वांतरः इत्यादि नायाज्ञवल्क्यस्य॥अप्रतिबद्धापरोक्षसाक्षात्कारव
प्रदर्शनंशाकल्यमरणानंतरंसर्वान्ब्राम्हणान्प्रतियाज्ञवल्क्येनकृतप्रश्नस्यब्राम्हणैरुत्तराभावः॥
षष्ठाध्यायेजनकंप्रतिसंक्षेपविस्तराभ्यांब्रम्होपदेशद्वारा॥अभयंवैजनकप्राप्तोसीतिब्रम्हप्रापकत्वं॥
इमेविदेहाअयमहमस्मिविदेहांददामिमांचापिसहदास्यायेतिजनकोक्तलिंगेन॥जनकस्यसंपूर्णब्र
साक्षात्कारप्राप्तिज्ञापनं॥मैत्रेय्याअपिब्रम्होपदेशद्वारातामपिमुक्तिंप्रापय्यएतावदरेखल्वमृतत्वमि
होक्तायाज्ञवल्क्योविजहारेतियाज्ञवल्क्यस्यसन्यासप्रदर्शनद्वारातस्यपरमविरक्तिप्रदर्शनं॥इत्यादयो
हवोप्यर्थाः॥श्रुत्याप्रतिपादिताः॥इतिहेतोः॥श्रुतेःयाज्ञवल्क्यपक्षपातवत्वेनयाज्ञवल्क्यमाहात्म्यप्रदर्श
र्थमेव॥बृहदारण्यप्रवृत्तिः॥इतिनिश्चीयते॥अतःभगवत्पादाचार्यैःभाष्यकारैःवार्तिककारैःसुरेश्वरा
र्यैःव्याख्यानकारैःआनंदगिरीयाचार्यैःचतुर्वेदभाष्योभयमीमांसाधिकरणरत्नमालापराशरस्मृ

प्र॰शा॰
२६३

व्याख्यानादिबहुप्रमाणग्रंथकारैः माधवाचार्यनामकैः सर्वज्ञविद्यारण्यगुरुभिश्च उपनिषद्गीतासूत्र-
भाष्यतव्याख्यानवेदभाष्यपराशरमाधवीयपंचदशीप्रकरणजीवन्मुक्तिप्रकरणबृहदारण्यवार्त्ति-
कादिषुबहुप्रामाणिकग्रंथेषुयाज्ञवल्क्यमाहात्म्यंबहुशोवर्णितं॥अतएव॥सर्वैरपियाज्ञवल्क्यस्यवंदनी-
यत्वमेव॥ननुश्रुतेः महाप्रमाणभूतायाः ईश्वरसमानायाः याज्ञवल्क्यपक्षपातोनयुक्तः ईश्वरस्यसर्वपक्ष
र्थैसमदृष्टित्वात्॥श्रुतेरपितथादृष्टिर्युक्ता॥नतुमनुष्यादिवत्कस्मिंश्चिद्विषयेपक्षपातोयुक्तः॥इतिचेत्॥न
श्रुतेः ब्रम्हविसक्षपातोयुक्तः॥ब्रम्हविदः ब्रम्हाभिन्नत्वात्॥ब्रम्हणाविपश्चिताइति॥नजायतेम्रियतेवावि
पश्चित्इति॥सयोन्यमप्रियंब्रुवाणंब्रूयात्॥प्रियंरोत्स्यतीतिईश्वरोहवैतत्तथैवभवति॥इत्यादितैत्तिरीय
कठवल्लिबृहदारण्यादिश्रुतिभ्यः श्रुतेस्तुब्रम्हप्रतिपादनेएवमुख्यंतात्पर्यं॥ऋचोअक्षरेपरमेव्योमन्॥य
स्मिन्देवाअधिविश्वेनिषेदुः॥यस्तन्नवेदकिमृचाकरिष्यतियइत्तद्विदुस्तइमेसमासतेइति॥नावेदविन्म-
नुतेतंबृहंतमिति॥सर्वैवेदायत्पदमामनंति॥तंत्वौपनिषदंपुरुषंपृच्छामि॥वेदैरनेकैरहमेववेद्यः॥इत्यादि

नि॰

श्रुतिभ्यः॥ श्रुतेः ब्रम्हप्रतिपादनार्थमेव मुख्यतया प्रवृत्तत्वात्॥ ब्रम्हज्ञानायतत्साधनत्वेन उपास
नाकर्मकांडयोः श्रुत्या प्रतिपादितत्वात्॥ अत एव ब्रम्हप्रतिपादकत्वेनैव श्रुतेः ब्रम्हशब्दवाच्यत्वं॥
ब्रम्हवादिनो वदंति इत्यत्र इदं ब्रम्हेदं क्षत्रमित्यत्र ब्रम्हचारी इत्यादिषु वेदस्य ब्रम्हशब्दवाच्यत्वं दृश्यते अतः
सर्ववेदानां ब्रम्हप्रतिपादने मुख्यतात्पर्यवत्त्वात्॥ श्रुतेः ब्रम्हविसक्षपातो युक्त एव॥ ननु श्रुतेः कस्मिंश्चि
त्पुरुषे पक्षपातो न युक्त एव॥ इति वाच्यं॥ लोकेपि॥ यथार्थवक्तरि पुरुषे सर्वेषामपि पक्षपातो दृश्यते यथा
र्थवक्ता तु सत्यवादीति प्रसिद्धेः वचनस्य सत्यत्वं नाम यथास्थितवस्तुविषयकज्ञानजनकत्वं॥ तादृशयथा
र्थज्ञानजनकस्वरूपसत्यत्वस्य वेदेपि सत्त्वात्॥ वेदस्य प्रमाकरणत्वेनैव प्रामाण्यं॥ पूर्वग्रंथेषु अस्माभिः प्रद
र्शितं॥ अत एव श्रुतावपि॥ आचार्यो वेदमनूच्यान्तेवासिनमनुशास्ति॥ सत्यं वद॥ धर्मं चरेति॥ तथैव ऋग्वेदगतऐतरेयो
पनिषदि॥ एष पंथा एतत्कर्म॥ एतद्ब्रम्ह एतत्सत्यमिति॥ ब्रम्हज्ञानस्यैव सत्यब्रम्हविषयकत्वेन सत्यत्वं॥ तज्जन
कवाक्यानामपि सत्यत्वं इति॥ लोकशास्त्रयोः सत्यवचनेतद्वति पुरुषे च॥ सर्वेषां पक्षपातो युक्ततर एव॥ स

स्मात् ब्रम्हविदः सत्यवादित्वात् मसंब्रम्ह॥ ससंज्ञानमनंतं ब्रम्हेतिश्रुतेः सत्यभूतब्रम्हवदनशीलत्वात्॥ ब्रम्हविदोपि सत्यवादित्वं॥ वेदस्यापि सत्यवादित्वात्॥ तस्माजास्यादपि॥ वेदस्य ब्रम्हविदि पक्षपातो युक्ततमएव॥ श्रुत्यादिसर्वैर्महद्भिः॥ याज्ञवल्क्यमाहात्म्यप्रतिपादनात्॥ तद्विरुद्धार्थप्रतिपादककालिकाखंडवाक्यस्याप्रामाण्यद्वारा मूढलोकव्यवहारस्यास्तं तासंगतत्वमेव॥ अयमर्थः सर्वोपि विद्यारण्यगुरुभिः तत्कृतजीवन्मुक्तिप्रकरणे संक्षेपेण प्रदर्शितः॥ तथाच॥ जीवन्मुक्तिप्रकरणे॥ बृहदारण्यषष्ठाध्यायेपि किं प्रजया करिष्यामो येषान्नोयमात्मा अयंलोक इति॥ सम्यगनुष्ठितेः॥ श्रवणमनननिदिध्यासनैः परंतत्वं विदितवद्भिः संपाद्यमानो विद्वत्सन्यासः॥ तं च याज्ञवल्क्यः संपादयामास॥ तथाहि विद्वच्छिरोमणिर्भगवान्याज्ञवल्क्यः विजगीषुकथायां बहुविधेन तत्वनिरूपणेन आश्वलप्रभृतीन् प्रविजित्य वीतरागकथायां संक्षेपविस्तराभ्यां अनेकधा जनकं बोधयित्वा मैत्रेयीं बोधयिषुस्तस्यास्त्वरयातत्वाभिमुख्याय अस्याः कर्तव्यं सन्यासं प्रतिजज्ञे॥ ततस्तां बोधयित्वा स्वयं सन्यासं चकार॥ तदुभयं मैत्रेयि

ब्राम्हणस्याद्यंतयोराम्नायते॥अथह्या॥याज्ञवल्क्योन्यद्वृत्तमुपाकरिष्यन्मैत्रेयीतिहोवाचप्रव्रजिष्यन्वाअरेअह
मस्मात्स्थानादस्मीतिएतावदरेखल्वमृतत्वमितिहोक्त्वायाज्ञवल्क्यःप्रवव्राजेतिच॥कहोलब्राम्हणेपिविद्वत्स
न्यासआम्नायते॥एतंवैतमात्मानंविदित्वाब्राम्हणाःपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थाया
थभिक्षाचर्यंचरंतीति॥ पूर्वोक्तयोरुभयोःसन्यासयोःपरमहंसत्वंजाबालश्रुतावेवगम्यते॥तत्रहिजनकेन
सन्यासेपृष्टेसतियाज्ञवल्क्यःअधिकारविशेषविधानेनोत्तरकालानुष्ठेयेनचसहितंविविदिषासन्यासमभि
धायपश्चादत्रिणायज्ञोपवीतरहितस्याक्षिप्तेब्राम्हण्येसतिपश्चादात्मज्ञानमेवयज्ञोपवीतमितिसमादधौ
सत्वं अतःबाह्ययज्ञोपवीताभावात्परमहंनिश्चीयते॥तस्माद्धाविदेहरा॥हित्स्वलक्षणविदेहमुक्तिर्ज्ञानसमकालीना॥तथाचयाज्ञव
ल्क्यवचनंश्रूयते॥अभयंवैजनकप्राप्तोसीति॥एतावदरेखल्वमृतत्वमितिचेति॥ ननुब्रम्हविषयत्वेपिते
षामापातज्ञानमेव॥नतुसम्यग्वेदनमितिचेन्न॥तथ सत्यस्माकमपितदीयवाक्येहत्सन्नायाविद्यायाःअ
सम्यक्त्वप्रसंगात्॥सम्यक्त्वेपिपरोक्षज्ञानमेवेतिचेन्न॥यत्साक्षादपरोक्षाद्ब्रम्हेतिमुख्यापरोक्षविषयत

प्र॰ शा॰
२६५

येव विशेषतः प्रश्नोत्तरोपलंभात्॥ इयमेव त्वस्मदभिमतजीवन्मुक्तिः याज्ञवल्क्यस्य विजिगीषुदशायां। नत्वा
दृशबाधितचित्तविश्रांतयेविद्वत्संन्यासस्य तेन करिष्यमाणत्वात्॥ न केवलमस्य विजिगीषा किंतु धनतृष्णापि म
हती॥ यत बहूनां ब्रम्हविदां पुरतः स्थापितं॥ सालंकारं गोसहस्रं अपहृत्य स्वयमेव॥ इदमाह॥ नमो वयं ब्र
म्हिष्ठाय कुर्मो गोकामा एव वयं स्म इति इतरान् ब्रम्हविदो अवज्ञातुमियं काचिद्वचोभंगीति चेदयमपि तर्ह्यप
रो दोषः॥ इतरे च ब्रम्हविदः स्वकीयं धनमनेन अपहृतमिति मत्वा चुकुधुः॥ स्वयं च क्रोधपरवशः शाकल्यं शापेन
मारयामास॥ न चास्य ब्रम्हघ्नः मोक्षाभावः शंकनीयः॥ कौषीतकिनः समामनंति॥ नास्य केन च कर्मणा लोको
मीयते॥ न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्ययेति॥ शेषोपि स्वकृतायामर्यां यां पंचाशीत्यामिदमा
ह॥ हयमेधशतसहस्राण्यथ कुरुते ब्रम्हघातलक्षकाणि परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते॥ विमल इति॥
जनकस्यापि समाधिव्युत्थितस्य ईदृशमेवाचरणं पठ्यते॥ तूष्णीमथ चिरं स्थित्वा॥ जनकोज्ञानजीवितः
व्युत्थितश्चिंतयामास मनसा शमशालिना॥ किमुपादेयमस्तीह यत्नात्संसाधयामि किं। स्वतस्थितस्य शु

त्स्य चित्तेः कामे स्ति कल्पना॥ नाभिवां । छाम्य संप्राप्तं संप्राप्तं न त्यजाम्यहं॥ स्वस्थ आस्म निति ष्ठामि यत्नमा

तद्स्तुमे॥ इति संचिंत्य जनकोयं यात्राप्तक्रियामसौ॥ अ सक्तः कर्तुमुत्तस्थौ दिनं दिन पतिर्यथा॥ भविष्यं न

संधत्ते नातीतं चिंतयत्यसौ॥ वर्तमानं निमेषं तु हसन्नेवानुवर्तत इति॥ तदेवं यथोक्तेन वासनाक्षयेन च॥ य

क्तः जीवन्मुक्तिर्भविष्यतीति तेसु स्थितं॥ इत्यादिनापि जनकस्यापीति॥ अपि शब्देन जनकस्येव॥ एतादृश

वन्मुक्तिसिद्धौ॥ तद्गुरोः या ज्ञवल्क्यस्य ब्रम्हविद्वरिष्ठत्वमिति॥ किमु वक्तव्यं॥ इत्यभिप्रायः॥ प्राप्य प्राप्तौ श्रूयते

अभयं वै जनक प्राप्तोसीति त स्मात्तत्सर्वमभवदिति॥ ब्रम्ह वेद ब्रम्हैव भवतीति च॥ इत्येवं श्रुति भाष्य व्याख्या

न विद्यारण्यादिभिश्च याज्ञ वल्क्य माहात्म्यं प्रकटीकृतमिति तद्विरुद्ध कालिकाखंड वाक्यस्याप्रामाण्यं॥

तद्विरुद्धादिस्य पुराण वाक्यस्य प्रामाण्यमिति स्थापितं भवति॥ अपि च॥ वैशंपायनेन मत्तः स्वाधीतं य

जुर्गणं दीयतामिति प्र ष्टः सन्॥ याज्ञवल्क्यः छर्दिं कृत्वा तदेदं विसृज्य पुनर्वेदाध्ययनार्थं सूर्यं प्रति गत्वा॥ तत्स

काशात् वैशं पायनानधीत यजुर्वेद भागाध्ययनं कृतवानिति॥ तद्भागस्य शुद्धत्वमिति॥ अत एव॥ अय

यामास निर्छंदांसीति॥अयोग्यताव्यावृत्त्यर्थं अयातयामत्वविशेषणं दत्वातं वेदभागं॥सूर्योध्यापयामासेतिच
विष्णुपुराणभागवतादिप्रमाणग्रंथेषु प्रतिपादितं वर्तते॥तथा काशिकाखंडवाक्य रीत्यायाज्ञवल्क्यस्यशा
पेन चंडालत्वप्राप्तौ सत्यां कथं सूर्य अध्यापयितवानितिपुराणादयः ब्रूयुः॥सूर्योपि अनधिकारिणे चंडालायक
थं वेदं दद्यात्॥सूर्यादहं अधीतवानिति॥याज्ञवल्क्यस्य स्मृतौ प्रायश्चित्तकांडे ज्ञेयंचारण्यकमहंयदादित्या
दवाप्तवान्॥योगशास्त्रंचमत्प्रोक्तं ज्ञेयं योगमभीप्सता॥११०॥इतिश्लोकेन सूर्यस्य सकाशात्॥शुक्लयजुर्वेदा
ध्ययनं कृतवानिति विज्ञानेश्वरीयादिभिश्च स्पष्टतया प्रतीयते॥तथा वा कथं संभाव्येत॥शूद्रं प्रत्येवश्रवणाध्य
यननिषेधस्य प्रतीयमानत्वात्॥तथाचतस्यश्रवणेजतुत्रपुभ्यां श्रोत्रं पूरयेत्॥उच्चारणे जिव्हाछेदः॥धारणे
ह्रृदयभेद इति॥गौतमादिस्मरणात्॥कपिलाक्षीरपानेन ब्राम्हणीगमनेनच॥वेदार्थस्यविचारेण शूद्रश्चं
डालतामियादिति॥मनुस्मृतेः संस्कारपरामर्शात्तदभावाभिलापाच्च॥३६॥तदभावनिर्धारणेच प्रवृत्तेः श्रवणाध्ययन
प्रतिषेधात्स्मृतेश्च॥३७॥इत्यादिमत्वापस्तंबगौतमबोधायनादिस्मृतिषु॥व्यासकृतब्रम्हसूत्रादिषुच॥श्रवणा

ध्ययन अर्थविचार धारणादिषु देहांत प्रायश्चित्तविधानादिना प्रतिषेधे सिद्धे शूद्रस्यैव वेदश्रवणस्य पठण
स्य वार्त्यं तनिषेधे प्राप्ते चंडालस्य अध्ययनं कथं प्राप्येत ॥ तदध्यापइतृत्वं वा ॥ सूर्यस्य कथं प्राप्येत ॥ सूर्यस्य सर्वज्ञ
त्वात् ॥ वैशंपायनेन शापो दत्त इति ॥ ज्ञात्वापि कथं चंडालं अध्यापयेत् ॥ सूर्यस्य देवतात्वेपि ॥ भीषास्माद्वातः पवते
भीषोदेति सूर्यः ॥ भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति ॥ इति श्रुत्या ॥ श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लंघ्य वर्तते ।
आज्ञाछेदी मम द्रोही ... त्यादि ॥ भारते विष्णुवचनाच्च सूर्यादीनामपि ॥ ईश्वराज्ञा नियम्यत्वेन वेदशास्त्रातिक्रमण
स्य असामर्थ्यात् ॥ ईश्वरेणापि रामकृष्णादि क्षत्रियावतारेषु शास्त्रोक्त क्षत्रियधर्म अनुष्ठानस्य अनुल्लं
घ्यत्वप्राप्तौ तन्नियम्यस्य सूर्यादिदेवताजीवस्य शास्त्रविरुद्धानुष्ठानसामर्थ्याभाव इति ॥ किंतु वक्तव्यं ॥ सूर्या
चंद्रमसौ धाता यथापूर्वमकल्पयदिति ॥ श्रुत्या सूर्यादिसृष्टेः तत्संचारादि नियमन कर्तृ परमेश्वरस्य ... सा
मर्थ्यांगीकारे सूर्यादिग्रह तारक नक्षत्रादीनां नियतकाल नियतदेश नियत संचारादि व्यवस्था
लोल्लंघन द्वारा ग्रहण अतिचार वक्रचार दिवारात्रि परिमाणादि ज्योतिःशास्त्रोक्त व्यवस्था विपरीत दर्शन प्रसंग

प्र॰ श॰

२६७

नि॰

स्यात्॥वेदशास्त्रविरुद्धचंडालाध्यापनंवासूर्यः कथंकुर्यात्॥अपिचबृहदारण्येश्रूयमाणयाज्ञवल्क्यकर्तृकजनकोपदे
शादिः याज्ञवल्क्यस्यचंडालत्वप्राप्तेः पूर्वंकृतइत्युच्यतेवा॥तदनंतरंकृतइत्युच्यतेवा॥शापनिवृत्त्यनंतरंकृतइत्युच्यतेवा॥आद्ये
बृहदारण्यस्यैवयाज्ञवल्क्येनअप्राप्तत्वात्॥तत्प्रतिपाद्यार्थोपदेशादिः कथंसंभवेत॥ द्वितीयेचंडालत्वप्राप्त्याअयोग्यत्ववतःज
नकयागप्रवेशआश्वलादिब्राम्हणैः सहवेदवेदांतअर्थविवादादिः कथंघटेत॥तृतीयपक्षेतुशापप्राप्तौतन्निवृत्तौचप्रमा
णाभावात्॥चतुर्थपक्षस्यकेनापिप्रमाणेनाज्ञानत्वाच्च याज्ञवल्क्यादीनांशापतत्प्रयुक्तायोग्यतायाः वंध्यापुत्रवत्॥अत्यंतास
त्वमेवभवति॥तथाचकिंचसूर्यसकाशात्वेदप्राप्त्यनंतरमेवबृहदारण्यपंचमाध्यायोक्तरीत्याजनकाग्निहोत्रारंभकाले
याज्ञवल्क्यंप्रतिकामप्रश्नवरं॥जनकोयाचितवान्॥तस्मैजनकाययाज्ञवल्क्योवरंददौ॥तदनंतरमेवजनकः बहुदक्षिणे
नयज्ञेनेजेतत्रहकुरुपांचालानांब्राम्हणाअभिसमेताबभूवुः॥इत्यादिनातस्मिन्यज्ञेब्रम्हिष्ठपरीक्षार्थंजनकेनगोसहस्रं
उद्दिश्ययाज्ञवल्क्येनतद्गृहीतमिति॥आश्वलादिऋत्विग्भिः क्रोधेनविवादः कृतः॥ तत्कृतप्रश्नानांउत्तरंदत्वातेषां
पराजयंकृत्वास्वयंजितवानित्यर्थस्ततस्मिन्नेवपंचमाध्यायेप्रतिपादितत्वात्॥तदनंतरमेवषष्ठाध्याये

येजनकस्यमैत्रेय्याश्चब्रम्होपदेशंकृतवानिति॥तत्रैवश्रूयते॥तदुपदेशक्रमः॥तद्वाक्यार्थसंदेहविचारश्चब्र
म्हसूत्रादिषुव्यासेन॥तद्भाष्यकारशंकराचार्येणविद्यारण्यादिभिःसर्वैःआपस्तंबसूत्रमनुस्मृतिपराशरस्मृत्या
दिव्याख्याकर्तृभिः॥विद्यारण्यादिभिःतत्तद्ग्रंथभाष्यव्याख्यानादिषुपंचदशीप्रवरणजीवन्मुक्तिप्रकरणादि
षुच॥मुख्यतयात्मबोधकत्वेनउदाहृतः॥एवंस्थितेतस्यचंडालत्वप्राप्तिःकथंसंपद्येत॥तन्माहात्म्यकथनं
वा॥श्रुतिसूत्रस्मृतिभाष्यादिषुवासंभवेत॥तद्वाक्यानामपि॥अन्यान्मुमुक्षून्प्रवि॥ब्रम्हज्ञानजनकप्रमा
णत्वेनव्यासादिभिःमहद्भिःकथंउदाह्रीयेत॥नचजीवन्मुक्तिप्रकरणोदाहरणस्यपुनरुक्ततादोषपरिहारा
यपूर्वसामान्यतःयाज्ञवल्क्यमाहात्म्यप्रतिपादनायएतत्प्रकरणमुदाहृतं॥इदानींविशेषाकारेणप्रति
पादनार्थं॥उदाह्रीयतइति॥त्वयोक्तत्वेपियावत्प्रकरणोदाहरणस्यअत्राप्रकृतत्वात्॥पुनरुक्तता
दोषस्यतादवस्थ्यमेवेतिवाच्यं॥तत्रतन्माहात्म्यख्यापनार्थेश्रुत्यादिपक्षपातप्रदर्शनार्थंचतत्रो
दाहरणंप्रवृत्तंअत्रतुयाज्ञवल्क्यस्यताहशज्ञानमेवनास्तीतिआशंकापरिहारार्थंसर्वज्ञविद्यार

ण्यगुरुभिरेव अप्रतिबद्धापरोक्षात्मसाक्षात्कारत्वं याज्ञवल्क्यस्य सिद्धमिति प्रतिपादितार्थज्ञाप
नार्थं प्रवृत्तमिति हेतोः न पुनरुक्ततादोषप्राप्तिः संभवति॥ बृहस्पतिकृतचार्वाकतंत्रस्य विष्णुकृत
बुद्धागमशास्त्रस्य च॥ अवतारभेदेन कृतत्वादेव हेतोः वैदिकैः तेषां प्रामाण्यानंगीकारे सिद्धे सति
लोकेपि राजादीनामपि बालोन्मादमद्यपानदशायां उक्तवाक्यस्य भृत्यैः प्रमाणत्वेन अंगीकारे सिद्धे च ए
कस्मिन्नेव जन्मनि शापेन चंडालत्वं प्राप्तस्य याज्ञवल्क्यस्य वचनानां कथं प्रामाण्यं भवेत्॥ तद्वाक्यमपि ब्र
ह्मज्ञानजनकं कथं वा भवेत्॥ प्रस्तुत॥ पराशरमाधवीये ॥ प्रथमाध्याये शास्त्रोपोद्घातप्रकरणे च
तुर्विंशतिमतोक्तवचनानि॥ अत्र चार्वाकवाक्यानि बौद्धानि पठितानि तु॥ विप्रलंभकवाक्यानि ता
नि सर्वाणि वर्जयेत्॥ इति बौद्धचार्वाकवचनानामपि अप्रमाणत्वेन वैदिकैः अग्राह्यत्वविधानात्॥ चं
डालत्वप्राप्तयाज्ञवल्क्यस्य वचनानां व्यासादिऋषिभिः शंकराचार्यादिसर्वज्ञैः महद्भिश्च ग्राह्यत्वं कथं
संभवेत॥ मोक्षोपासनकर्मादिज्ञानोत्पादकत्वेन प्रामाण्यं वा कथं संभवेत॥ तस्मात् तच्चंडालत्वपापकथा

शापप्रतिपादककालिकाखंडवाक्यस्यात्यंताप्रामाण्यमेवापतेत्॥प्रस्तुत॥भगवद्गीतायां चतुर्थाध्याये प्र
मस्श्लोके॥इमं विवस्वते योगं प्रोक्तवानहमव्ययं। विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेब्रवीत् १ एवं परंपराप्रा
प्तमिमं राजर्षयो विदुः। स कालेनेह महता योगो नष्टः परंतप॥२॥स एवायं मया तेद्य योगः प्रोक्तः पुरातनः। भ
क्तोसि मे सखा चेति रहस्यं ह्येतदुत्तमं॥३॥इत्यादिवचनैः भगवतोक्तप्रकारेण विवस्वते सूर्याय। अहं प्रोक्तवान्
इत्यत्र। पुरा पूर्वस्मिन्काले कल्पादौ कदाचित्। कस्मिंश्चित्काले परमेश्वररूपेण प्रोक्तवान्। न तु देवकीपुत्रत्वेन रू
पेण। अत एव भक्तोसि मे इति वचनं। स्वस्य परमेश्वरत्वं सूचयति। न हि अर्जुनस्य भक्तत्वं कस्यचिन्मनुष्यनिरूपि
तं भवति॥ अपि तु॥ परमेश्वरनिरूपितं। उत्तरत्र स्वयमेव वक्ष्यति च॥ अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि
सन्॥ विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेब्रवीत्॥ एवं परंपराप्राप्तमिमं राजर्षयो विदुः॥ स कालेनेह महता यो
गो नष्टः परंतप॥ ॥इत्यादिना॥ लोकेस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मया। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनां॥
इत्युक्तप्रकारेण सांख्यशब्दितज्ञानयोगः। कर्मशब्दितचित्तशुद्धिसंपादकयज्ञादिकायिकवाचिकध्यानयोगात्म

कमानसिकरूपकर्माभयात्मकः कर्मयोगः तत्प्रतिपादकः सर्वोऽपि वेदभागः मया प्रोक्तः इत्यन्वयः। स एव वेदः वै
वस्वतमनुः इक्ष्वाक्वादिक्रमेण राजपरंपरया प्राप्तः चिरकालेन इह लोके नष्टं प्राप्त इति इदानीं तुभ्यं मया प्रोक्तः प्रोक्तं
इत्यनेन योगप्रतिपादकवेदराशिरेव लक्ष्यते। कर्मैव योगः। कर्मयोगः। सांख्यमेव योगः सांख्ययोग इति भाष्योक्तेश्च॥
कर्मरूपयोगस्य क्रियारूपत्वात्। सांख्यरूपज्ञानयोगस्य ज्ञानरूपत्वात्। उक्तिविषयत्वासंभवेन तत्स्वरूपफल
साधनादिकलापप्रतिपादकवेद एव लक्ष्यते। अतः ईश्वरेण उपदिष्टः तादृशवेदभागः सूर्येण याज्ञवल्क्याय उप
दिष्ट इति गम्यते। न च सूर्येण मनुइक्ष्वाक्वादिपरंपरया राजर्षिभ्यः उपदिष्ट इति भगवता उक्तं। त्वया तु याज्ञवल्क्या
य सूर्येण दत्त इति उच्यते। कथमेवं भवेदिति वाच्यं। अर्जुनाय राजपरंपराप्राप्तिप्रदर्शनेन त्वयापि सत्तु योगः प्रा
प्य इति ज्ञापनार्थं तथोक्तं। अत एव वक्ष्यति च॥ कर्मणैव हि संसिद्धिमास्थिता जनकादय इति। अर्जुनस्य क्षत्रिय
त्वात्। वसिष्ठादिज्ञानं विशिष्ट ब्राह्मणदृष्टांतं विहाय जनकादिराजान एव भगवता दृष्टांनी कृताः। तथा च भाष्यं।
योऽयं योगः अध्यायद्वयेन उक्तः। ज्ञाननिष्ठालक्षणः संन्यासः। कर्मयोगोपायः यस्मिन् वेदार्थः परिसमाप्तः प्रवृत्ति

लक्षणोनिवृत्तिलक्षणश्च। गीतासुचसर्वासु अयमेवयोगोविवक्षितो भगवता। अतःपरिसमाप्तंवेदार्थंमन्वानः
तंवंशकथनेनस्तौति ॥ श्रीभगवानुवाच । इममिति । इममध्यायद्वयेनोक्तंयोगं । विवस्वते। आदित्याय। स
र्गादौप्रोक्तवानहमव्ययं। जगत्परिपालयितॄणांक्षत्रियाणांबलाधानाय तेनहियोगबलेनयुक्ताःसमर्था भवंति
ब्रह्मक्षत्रेपरिरक्षितुंब्रह्मक्षत्रेपरिपालितेजगत्परिपालयितुं अलं। अव्ययं। अव्ययफलत्वात् नह्यस्ययोग
स्यसम्यग्दर्शननिष्ठालक्षणस्य मोक्षाख्यंफलंव्येति। सच॥ विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेस्वपुत्रायआ
दिराजायाब्रवीत् ॥ १॥ उत्तरश्लोकभाष्ये ॥ मूलं ॥ एवंपरंपराप्राप्तमिमंराजर्षयोविदुः ॥ सकालेनेहं महता
योगोनष्टः परंतपः ॥२॥ भाष्यं। एवमिति। एवंक्षत्रियपरंपराप्राप्तमिमंराजर्षयःराजानश्चतेऋषयश्चेति। तेराजर्षयोविदुः। इ
मंयोगंसयोगः इहलोकेकालेनमहतादीर्घेणनष्टः विच्छिन्नसंप्रदायस्संवृत्तइति॥ भगवतैवक्षत्रियपरंपराप्र
त्तस्ययोगशब्दलक्षणस्यवेदभागस्यनष्टत्वंप्रदर्शितं अपिचइमंविवस्वतेयोगंप्रोक्तवानहमव्ययं। विवस्वा
न्मनवेप्राहमनुरिक्ष्वाकवेब्रवीत्। एवंपरंपराप्राप्तमिमंराजर्षयोविदुः॥ इत्यादि गीतावचनैः पूर्वोक्तविवरण

प्र॰ शा॰
२७०

प्रकारेणशुक्लयजुषस्तस्य सूर्यद्वारेण। मनु इक्ष्वाक्वादिराजपरंपराप्राप्तत्वात् सूर्यवंशोत्पन्नानांसर्वेषांराज्ञांशु
क्लयजुर्वेदाध्येतृत्वमेव शास्त्रंभवति॥ इतरेषामपिप्रायेणशुक्लयजुःशाखावत्वमेव तत्रतत्रभारतपुराणादिषु
लिंगैरवगम्यते। अतएवइक्ष्वाकुवंशोत्पन्नस्यरामस्यशुक्लयजुःशाखावत्त्वंश्रीमद्वाल्मीकरामायणेअयोध्या
कांडेद्वात्रिंशत्संख्याकसर्गेपंचदशसंख्याकश्लोके॥ कौसल्यांचय आशीर्भिः भक्तः पर्युपतिष्ठति आचार्य
स्तैत्तिरीयाणांअभिरूपश्चवेदवित्॥ तस्ययानंचदासीश्चसौमित्रेसंप्रदापय॥ कौशेयानिचवस्त्राणियाव
त्तुष्यतिसद्विजः॥ इतिश्लोकेआचार्यस्तैत्तिरीयाणामित्यनेनवाक्येनरामस्यतैत्तिरीयभिन्नशाखावत्त्वंप्रतीयते
॥तथाचवाजसनेयिशाखित्वंसिद्धंभवति॥ तत्रापितस्मिन्नेवरामायणेअरण्यकांडेअष्टमसर्गे॥ उत्थायतुय
थाकालंराघवस्सहसीतया॥ उपस्पृश्यसुशीतेनजलेनोत्पलगंधिना॥२॥ अथतेग्निंसुरांश्चैववैदेहीरा
मलक्ष्मणौ॥ काल्यंविधिवदभ्यर्च्यतपस्विशरणेवने॥३॥ अथतेग्निंसुरांश्चैववैदेहीरामलक्ष्मणौ सुतीक्ष्णम
भिगम्येदंश्लक्ष्णंवचनमब्रुवन्॥४॥ अस्यव्याख्यानुसारेण इत्यादिश्लोकैश्चसूर्योदयात्पूर्वमेव॥ अथ

राम
२७०

नेग्निंसुरांश्चैववैदेहीरामलक्ष्मणौकाल्यंविधिवदभ्यर्च्येत्यादिपद्यैः स्नापितौपासनक्रियानुष्ठानश्रवणात्राम
स्यअनुदितहोमपक्षमूलभूतवाजसनेयिशाखाप्रविष्टत्वंदृढंभवति ॥ अपिचरामानुजमतप्रविष्टगोविंदराजकृ
तव्याख्यानेपि ॥ अथेति ॥ अग्निमित्येकवचनेनएकाग्नित्वावगमान्नत्रेताग्निरिदानीमितिगम्यते सहपत्न्यावि
शालास्यानारायणमुपागमनदित्यपोध्याकांडोक्तेः । परिवारापेक्षयाबहुवचनंकाल्यं । यथाकालप्राप्तं यथा
तथादेशानुगुणपूजाकथनायतपस्विशरणइत्युक्तं ॥३॥ उदयंतंदिनकरंदृष्ट्वाविगतकल्माषाः सुतीक्ष्णम
भिगम्येदंश्लक्ष्णंवचनमब्रुवन् ॥४॥ उदयंतंउद्यंतं अनेनहोमानंतरमादित्योपस्थानोक्त्या अनुदितहोमपक्षसूच
नात् कात्यायनसूत्रक्रमेणराघवाणामनुष्ठानमितिगम्यते ॥५॥ श्रीकृष्णस्यतुशुक्लयजुश्शाखावत्त्वंप्रतीयते
॥ तथाचश्रीमद्भागवतेदशमस्कंधेसप्ततितमाध्याये ॥ श्रीशुकः ॥ अथाप्लुतोंभस्यमलेयथाविधि । क्रियाकलापं
परिधायवाससीचकारसंध्योपगमादिसत्तमोहुतानलोब्रह्मजजापवाग्यतः ॥ अस्यश्रीधरीयंव्याख्यानं ॥ अ
थअनंतरंउषःकालेश्रीकृष्णः अमलेअत्यंतपावनेअंभसियमुनाजलेआप्लुतः स्नातः सन् संध्यायाः उपगम

उपासनं आदि्र्यथाभवति तथा क्रियाकलापंचकारभगवतः काण्वत्वादुदयात्पूर्वमेवहुतानलः सन् वाग्यतः मौनी सन् ब्रह्मगायत्रींजजाप॥२॥ इत्यनेनकृष्णस्यापिवाजसनेयिशाखाप्रविष्टत्वंप्रतीयते॥ तथाचयदुकुलस्यापिवाजसनेयशाखाप्रविष्टत्वेनसूर्यवंशोत्पन्नराज्ञामिवचंद्रवंशोत्पन्नकेषांचित् राज्ञामपिवाजसनेयिशाखाप्रविष्टत्वंसिद्धंभवति। अतएवहिमाद्रौप्रथमभागेमंगलश्लोकेषुहेमाद्रिरूपमंत्रिणः योराजाप्रतापरुद्रादिवंशमूलभूतः तस्यावयदुवंशोत्पन्नत्वेनचंद्रवंशोत्पन्नत्वान् तद्वंशीय्यानामपिकलियुगराज परिपालकानांवाजसनेयिशाखाप्रविष्टं दृढंभवति इत्यत्रहेमाद्रिश्लोकौभवतः॥ तथाहि॥ वंशोहिमांशोर्जयति प्रसिद्धोयस्मिंन्सराजायदुराविरासीत्। बभूवयस्मिन्नसुरावतारभारापहारायपुरामुरारिः॥ १॥ वंशेतस्मिन्कंसविध्वंसनस्यक्षोणीपालोभिल्लमः प्रादुरासीत्॥निन्येसोशंवैरिभूभृत्सनंगाॅयस्यानेकद्वीपनीप प्रतापः॥२॥ इत्यादिभिःप्रतीयतेच॥ एवंपूर्वग्रंथेअस्माभिः प्रदर्शितमेव॥ एवंपराशरमाधवीयकालमाधवीयादौपूर्वाश्रमीयमाधवाचार्यनामकविद्यारण्यगुरुभिरर्पितग्रंथादौ॥ इंद्रस्यांगिरसो। नलस्यसुमतिः शैव्यस्यमेधातिथिर्धौम्योधर्मसुतस्येत्याद्युपक्रम्य

यहूद्भूत्कुलगुरुर्मैत्रीतथामाधवइत्यत्रस्वस्यापिबुक्कक्ष्मापतेर्मूलगुरुत्वंमंत्रित्वंचप्रतिपादितम्।अनेनापिहे
माद्रीकण्वपुत्रोमेधातिथिऋषिरितिमंत्रद्रष्टृऋषिप्रकरणेमेधातिथेः कण्वपुत्रत्वेनशुक्लयजुश्शाखाप्रवि
ष्टत्वस्यप्रतीयमानत्वात्॥शिबिचक्रवर्तेरपिकाण्वपुरोहितत्वेनशुक्लयजुश्शाखाप्रवेशोनिश्चीयते॥ए
तेनशंकरभगवत्पादाचार्यात्पूर्वकालीनमनुस्मृतिव्याख्यानकर्तृत्वेनापिमेधातिथेः प्राचीनत्वंमनुस्मृतिव्या
ख्याकर्तृत्वंसिद्धमितिकृत्वातदुपलक्षितकाण्वादीनांअयोग्यतानास्तीत्यपिअर्थाद्गम्यतेप्रकृतेतु।रामकृ
ष्णशिबिइक्ष्वाक्वादिमहाराजानामपिशुक्लयजुश्शाखाप्रविष्टत्वेनशुक्लयजुर्वेदस्यराजपरंपराप्राप्तत्वंसूर्येण
याज्ञवल्क्यद्वाराब्राह्मणपरंपराप्राप्तत्वंचस्फुटमेवप्रतीयते।अतोपिहेतोः ब्राह्मणानांक्षत्रियादीनांचशुक्ल
यजुश्शाखाप्रविष्टत्वेनकश्चनदोषोपिनसंभवति॥एतावता॥केषुचिद्ब्राह्मणरूपश्रुतिषुकल्पसूत्रादिषुच अ
श्वमेधयाजिनांक्षत्रियाणामपिब्राह्मणसमानत्वेनयाजकत्वादियोग्यताश्रूयते।वाजसनेयिब्राह्मणानामपिया
ज्ञवल्क्यादीनांशापस्याप्रसिद्धत्वेनतद्द्वारापि अयोग्यतानसंभवतीतिसिद्धं॥ ॥ननुयाज्ञवल्क्यादीनांवा त

दीयशाखावेदभागस्यवाशुक्लयजुःशाखाप्रविष्टइक्ष्वाकुरामकृष्णादि क्षत्रियाणांवा अयोग्यता अस्माभिर्नप्र
तिपाद्यते॥अपितु॥इदानींतनशुक्लयजुश्शाखाप्रविष्टब्राह्मणानामेवायोग्यताप्रतिपाद्यतइतिचेत्॥तथासति॥ए
तेषामयोग्यताकेनहेतुनाप्राप्तेतित्वांप्रतिअस्माभिः पृच्छ्यते॥शुक्लयजु शाखा अध्ये तृत्वेन प्राप्तेतिचेत्॥शुक्ल
यजुर्भागस्यवेदस्याप्यशुद्धताप्राप्तिः अर्थादायाता। तदध्येतृणांसूर्यमनुइक्ष्वाकुरामकृष्णशिबिचक्रवर्त्या
दिक्षत्रियाणांतद्वंशोत्पन्नानांसर्वेषां क्षत्रियाणां अयोग्यताप्राप्तिर्दुर्वारैव॥अपिचमनुवंशोत्पन्नाः मानवाः
इत्यत्र॥यच्छंचयोश्चमनुरायजेपितेति। यामथर्वामनुष्पितेत्यादि तैत्तिरीयऋग्वेदसंहिताश्रुतिभ्यश्च॥सर्वे
षांमनुष्याणामपिमनुवंशोत्पन्नत्वेन अशुद्धताप्राप्तिस्संभवत्येव॥याज्ञवल्क्यादिशापप्राप्तिद्वारातदीयशा
खाअध्येतृणांअयोग्यताप्राप्तिरितिचेत् पूर्वंशुक्लयजुशाखावेदस्यतच्छाखिक्षत्रियाणांचयाज्ञवल्क्यादी
नांच अयोग्यतानोच्यते।अपितुइदानींतनतदीयब्राह्मणानामेवेति। इतित्वयोक्तवाक्यविरोधः प्रसज्येत॥
प्रत्युत॥एतेषांपूर्वोक्तानांमध्ये अन्यतमस्याप्ययोग्यतासिद्धौरामकृष्णशिब्यादिक्षत्रियाणांअश्वमेधा।दि

यागकर्तृकत्वंकथंसंभाव्येत॥याज्ञवल्क्यकण्वतच्छिष्यादिऋषीणां॥अश्वमेधादियाजकत्वं॥सत्र
यागादियष्टृत्वंवा॥शतपथब्राम्हणईशावास्यबृहदारण्याद्युक्तप्रकारेण॥श्रौतकर्मउपास
ना॥ब्रम्हज्ञानादिप्राप्तिः॥ऋगादिसर्वशाखाप्रविष्टब्राम्हणादिभिःकथंसंभाव्येत॥उक्तवक्ष्यमा
णरीत्याच॥तच्छाखिप्रविष्टऋषिक्षत्रियब्राम्हणादीनां॥यजनयाजनाध्ययनाध्यापनादिसर्वशा
स्त्रीयव्यवहारःश्रुतिभारतपुराणआपस्तंबादिसूत्रमन्वादिस्मृतिषुप्रतिपाद्यमानः॥कथंवासं
भाव्येत॥इतोव्यतिरेकेण॥इदानींतनशुक्लयजुःशाखाप्रविष्टब्राम्हणानांअयोग्यताप्राप्तिद्वार
स्यैवकेनाप्यदृश्यमानत्वात्॥कथंअयोग्यतात्वयासाध्यतइतिवयंनपश्यामः॥अपिचयाज्ञव
ल्क्यादिशापादिहेतुंविना॥एतच्छाखाप्रविष्टब्राम्हणानां॥अयोग्यतायामुच्यमानायां॥एतेशु
क्लयजुःशाखिनः॥एतेकाण्वाःमाध्यंदिनाःकात्यायनीयाःवाजसनेयिनःप्रथमशाखिनःअयो
ग्याइतित्वयात्वत्सदृशैःत्वत्सपक्षपातिभिः॥कथमुच्यते॥धनीसुखी॥ज्ञानीश्रेष्ठः॥चोरोनिंद्यःवि

प्र० शा० २७२

द्वान्पूज्यः राजा नियंता ॥ इत्यादिषु सर्वत्र ॥ सुखित्वं प्रति ॥ धनस्य श्रेष्ठत्वं प्रति ॥ स्नानस्य नियामकत्वं प्रति ॥ चौर्यस्य पूज्यत्वं प्रति ॥ विद्वत्तायाः नियंतृत्वं प्रति । राजत्वस्य प्रयोजकत्वं यथा सिद्धवत्वेन प्रतीयते ॥ एवं मन्त्रादि अयोग्यत्वं प्रति प्रथमशाखित्वस्य शुक्लयजुःशाखित्वस वाजसनेयित्वस्य काण्वीयत्वस्य एवमादीनां निमित्तमुख्यप्रयोजकत्वं प्रतीयते ॥ तद्विहाय अन्येन केनचिद्रूपेणाप्ययोग्यत्वं न संभवति ॥ अन्यथा एते प्रथमशाखिनः एते वाजसनेयिनः ॥ एते शुक्लयजुःशाखिनः अयोग्याः इति विशेषणविशिष्टत्वेन व्यवहारो न स्यात् पूर्वोक्तरीत्या क्वचिद्देशे व्यवहारस्यैव ॥ एतत्प्रयोजकत्वमिति चेत् ॥ शास्त्रविरुद्धव्यवहारस्य अप्रामाणिकत्वमिति दत्तोत्तरत्वमेव ॥ किंच ॥ तच्छाखा वेदभागस्य वा ॥ तच्छाखाप्रवर्तकयाज्ञवल्क्यकण्वादीनां वा ॥ अयोग्यता नास्माभिरुच्यते ॥ अपितु इदानींतनवाजसनेयिब्राम्हणानामेव अयोग्यता प्रतिपाद्यते ॥ इति स्वयाउच्येत यदि ॥ तदा तां प्रति अस्माभिः पृच्छ्यते ॥ एतच्छाखिनां अयोग्यता केन रूपेणोच्यते ॥ मनुष्यत्वेनोच्यत इति चेत् ॥ सर्वमनुष्याणामयोग्यतापत्तिः ॥ ब्राम्हणत्वेनेति चेत् ॥ सर्वब्राम्ह

णानामयोग्यतापत्तिः ॥ वेदशाखित्वेनेतिचेत् ॥ सर्ववैदिकानामयोग्यतापत्तिः ॥ याजुषत्वेनेतिचे
त् ॥ तैत्तिरीयाणामप्ययोग्यतापत्तिः ॥ अतः याज्ञवल्कीयत्वशुक्लयजुर्वेदत्वादिकं विहायएतच्छा
खिब्राम्हणानां अयोग्यताप्रयोजकधर्मस्यैवा मायात् ॥ अयोग्यतैव अप्रसिध्धाभवेत् ॥ अ
तएवसूर्यादिद्वारापुत्रपरंपरयाप्राप्तक्षत्रियाधीतवेदभागस्यनष्टत्वेपिशिष्यपरंपरयाब्राम्हणप
रंपराप्राप्तवेदभागस्य अनष्टत्वमितिसूचितंभवति ॥ एतावन्मात्रेणसूर्येणप्राप्तवेदभागः ॥ या
ज्ञवल्क्येनाप्राप्तइतिवक्तुंनशक्यते ॥ लोकेपि ॥ एकः ब्रम्हचारी ॥ आचार्यसन्निधौस्थित्वा
विदाध्ययनंप्राप्तवान्सन् ॥ एकस्मैशिष्यायेववेदंदत्तवानितिनियमोनास्ति ॥ एवं ॥ अत्रापिमनवेवे
दंदत्तवानपिसूर्यः ॥ याज्ञवल्क्यायापिदातुंसमर्थोभवति ॥ यथैकेनप्रदीपेणबहवः प्रदीपाः उत्पद्य
मानाअपिमूलप्रदीपः अन्यंप्रदीपंउत्पादयितुं असमर्थोभवतीति ॥ लोकेकुत्रापिप्रवादोनास्ति ॥ एवं
सूर्यः पुत्रपारंपर्येणक्षत्रियान् अध्यापयितवानपि ॥ याज्ञवल्क्यादिशिष्यपारंपर्येणब्राम्हणान्वेदम-

ध्यापयितुं ॥ असमर्थ इति न शक्यते वक्तुं ॥ ननु इमं विवस्वते योगं इत्यादिभगवद्वचनैः ईश्वररूपेण सर्गादौ
सूर्यस्य दत्तोपि वेदभागः मनु इक्ष्वाक्कादि क्षत्रियपरंपरयैव आगतः ॥ इति गम्यते न तु ॥ याज्ञवल्क्यादि
शिष्यपरंपरया ब्राम्हणानां आगत इति गम्यते ॥ तथा च ॥ इक्ष्वाक्कादि क्षत्रियाणां वाजसनि पुत्र याज्ञवल्क्य
नामक वाजसनेय शिष्यपरंपराप्राप्त वाजसनेयि शाखाप्रविष्टत्वं कथं संभाव्येत ॥ इति चेद्वाढं ॥ तथापि
तद्वेदभागस्य सर्गादौ ईश्वररूपेण सूर्याय उपदिष्टत्वात् ॥ वेदव्यासावतारात्पूर्वमेव प्रवृत्तत्वाच्च ॥ तद्वे
दभागस्य यजुर्वेद प्रथम शाखात्वं सिद्धमेव ॥ अत एव वेदव्यासावतारानंतरं भावि याज्ञवल्क्याध्य
यन निर्गमनद्वाराप्राप्त वेदभागभिन्नत्वात् शुक्ल यजुष्ट्वमपि तद्वेदभागस्य संभवति ॥ तत्क्षत्रि
याणां वाजसनेयि शाखात्वं तु क्षत्रियाणां स्वमावतः अध्यापन याजनाधिकाराभावात् ॥ क्ष
त्रियाणां ब्राम्हणपुरोहितत्वापेक्षितत्वाच्च ईश्वरेणैव वैशंपायन याज्ञवल्क्य विरोघद्वारा वाजस
नेयि शाखोत्पत्ति निमित्तमुत्पाद्य सूर्याय स्वेन दत्त वेदभागस्य सूर्यद्वारा याज्ञवल्क्यस्य उपदेशं-

प्राप्य स्वतच्छिष्यपरंपरया ब्राम्हणानां तद्वेदभागाध्ययने चाध्यापनं च प्रापितं ॥ तस्मात् तत्क्षत्रि
याणामपि वाजसनेयिशाखाप्रविष्टकृष्णादिब्राम्हणा एव पुरोहिताः ॥ याजकाः अध्याप
यितारश्चाभवन् ॥ तत एव च ॥ छांदोग्यबृहदारण्यवंशब्राम्हणे ॥ आश्वलायनब्रह्मयज्ञतर्प
णिच ॥ विद्यापरंपराचार्याणामेव पितृकोटौ प्रवेशप्रतिपादनं दृश्यते ॥ तत्तच्छाखाप्रवर्तनऋ
षिनाम घटितत्वेनैव तत्तच्छाखिजनेषु व्यवहारः प्रवृत्तः ॥ तद्यथा ॥ वयं आपस्तंबीयाः ॥ वयमाश्व
लायनीयाः ॥ वयं बोधायनीयाः ॥ वयं काण्वाः ॥ वयं गौतमीयाः ॥ इत्यादिव्यवहारः दृश्यते ॥ तथा तत्क्ष
वियाणामपि वाजसनेयिनः इत्यपि व्यवहारः संभवः भवत्येव ॥ तत एव ॥ विष्णुपुराणभागवतसौर
संहिताख्यस्कांदपुराणयाज्ञवल्क्यस्मृतिविज्ञानेश्वरीयादौ याज्ञवल्क्यः सूर्यनिकटे ॥ शुक्लयजुर्वे
दाध्ययनं कृतवानिति आख्यायिका प्रवृत्ता ॥ आपस्तंबादिश्रौतधर्मादिसूत्रेषु आपस्तंबादि
ना वाजसनेयिनः समामनंति ॥ अथापि वाजसनेयिब्राम्हण ॥ इत्यादि प्रयोगः कृतः ॥ तथा च ॥

वाजसनेयिशब्दस्य अनादित्वं प्रतीयते॥एवमेव महाभारते॥धर्मराजकृतराजसूययागादौ या-
ज्ञवल्क्यस्य अध्वरवरणदानं वसुदेवकृतअश्वमेधयागे॥याज्ञवल्क्यशिष्यः ब्रम्हदत्तः वाजसने-
यिब्राम्हणः याजकोऽभूत्॥इत्याद्यर्थः भारतभागवतादिषु श्रूयते॥ब्रम्हसूत्रतद्भाष्यतद्व्याख्याना-
दिषु काण्वमाध्यंदिनशाखाभेदेन बृहदारण्याद्युपनिषदांभेदो दृश्यते॥तथा रामकृष्णादिशुक्लय-
जुःशाखाक्षत्रियाणामपि कात्यायनकाण्वपारस्करादिगृह्यसूत्रश्रौतसूत्राद्येवअनुष्ठापकं दृश्य-
ते॥अतएव एतद्ग्रंथोदाहृतभागवतरामायणवचनयोः श्रीरामकृष्णानुष्ठितअनुदितहोमनिमि-
त्तत्वेन अनयोः काण्वीयत्वात्॥अनुदितहोमः प्रवृत्तः॥इतितद्व्याख्यानरूपश्रीधरीयादौ स्पष्टत-
या प्रतिपादितः॥एवं काण्वकात्यायनादिगोत्रादिव्यतिरेकेण केवलसूर्यकृतश्रौतसूत्रादिकं
न दृश्यते॥काण्वमाध्यंदिनादिशाखाव्यतिरेकेण केवलसूर्योक्तसंहिताकब्राम्हणयोः श्रौतगृह्या-
दिसूत्राणां उपनिषदश्च कुत्राप्यनुपलंभात्॥तस्मात् भगवदुक्तरीत्या सर्गादौ ईश्वररूपेण सूर्या-

योक्तवेदभागएवयाज्ञवल्क्यद्वाराशुक्लयजुर्वेदइतिप्रथमशाखेतिचशास्त्रलोकप्रसिद्धतयावर्तते॥
नतुसूर्योक्तवेदभागोअन्यः इतिवक्तुंनशक्यते॥इतिसिद्धं॥ अयमर्थःगीतायांचतुर्थाध्याये
प्रथमश्लोकभाष्ये ॥इमंअध्यायद्वयेनोक्तंयोगंविवस्वतेआदित्याय॥सर्गादौप्रोक्तवानहमव्ययं
इति॥ एवमितिद्वितीयश्लोकव्याख्यानावसरभाष्ये॥एवंक्षत्रियपरंपराप्राप्तमिमंयोगंराजर्षयोविदुरित्यन्वयंदर्शयित्वासयोगइहलोकेमहतादीर्घकालेननष्टः इत्युक्तत्वात्॥क्षत्रियपरंपराप्राप्तएवनष्टः॥नतुब्राम्हणपरंपराप्राप्तयोगःनष्टइत्यर्थात्सूचितोभवति॥ अपिच ॥सएवायंमयातेद्य
योगःप्रोक्तःपुरातनः॥इति॥रहस्यंह्येतदुत्तमंइतिचतृतीयश्लोकेभगवतेवसएवायमितिसूर्योक्तशुक्लयजुर्भागएवगीताशास्त्ररूपेणसांख्ययोगज्ञानयोगात्मकयोगः इत्युक्तः॥इत्यनेनापि॥शुक्लयजुषएवगीताशास्त्रमूलत्वंद्योत्यते॥रहस्यमितिउत्तममितिचविशेषणस्यदत्तत्वाच्च॥
रहस्यशब्दःरूढ्याउपनिषत्परः॥तथाचमनुस्मृतौ॥उपनीयतुयःशिष्यंवेदमध्यापयेत्ततः॥सरह

स्यंसकलत्वंचतमाचार्यंप्रचक्षते॥इतिश्लोकव्याख्यानेसरहस्यशब्दःउपनिषत्परइत्युक्तं॥तथारह
स्यंगोप्यमितिपर्यायात्॥तैत्तिरीयोपनिषदिनारायणप्रश्नेदेवानांगुह्यमिति॥वेदांतव्याख्यानस्यैव
रहस्यवाच्यत्वेनउचितत्वात्प्रायेणबृहदारण्ये॥ज्ञानजनकलिंगानांप्राबल्यात्अस्याःगीतायाः
बृहदारण्यमूलकत्वमेवबहुशोदृश्यते॥एतत्तृतीयश्लोकभाष्येपि॥सएवायं॥मया॥ते॥तुभ्यं॥अ
द्ययोगःप्रोक्तःपुरातनः॥सनातनः॥भक्तोसिमेसखाचासीतिरहस्यंहियस्मात्॥एतदुत्तमं॥
योगज्ञानमित्यर्थः॥एवंगीतायांतद्भाष्येषुच॥तत्रतत्रप्रायेणशुक्लयजुर्मूलकत्वज्ञापनात्॥अ
स्यवेदस्यप्रथमशाखावत्वंशुक्लत्वंचसिद्धंभवति॥प्रस्तुतगीतायांभगवतैवकर्मणैवहिसंसिद्धि
मास्थिताजनकादयःइत्यनेनब्रह्मज्ञानिनांमध्येप्रथमतःजनकस्यैवगृहीतत्वात्॥व्यासेनप्रेषि
तशुकस्यजनकेनज्ञानदानद्वयप्राप्तेःभारतमोक्षधर्मेश्रवणाच्चताद्दशजनकब्रह्मोपदेष्टृगुरुत्वेनया
ज्ञवल्क्यमाहात्म्यस्यबृहदारण्योपनिषत्प्रतिपादितत्वेनतच्छाखायाःसर्गादौईश्वररूपेणसूर्यद्वा

उपदेशःप्राप्त इति अर्थात् सिद्धो भवति॥ अत एव॥ याज्ञवल्क्यस्मृतौ॥
रायाज्ञवल्क्याय उपदेशःप्राप्त इति अर्थात् सिद्धो भवति॥ ...याज्ञवल्क्येनैव विज्ञानेश्वरीये
ज्ञेयं चारण्यकमिदं यदादित्यादवाप्तवान्॥ योगशास्त्रं च इत्यादि वचनैः याज्ञवल्क्येनैव विज्ञानेश्वरीये
ऽप्युक्तं॥ आरण्यकशब्दः बृहदारण्यवाचकः॥ सोपि सर्ववेदोपलक्षकः॥ संहिताशतपथब्राम्हणा
दिवेदभागः कर्मयोगप्रतिपादकः॥ बृहदारण्यभागः ध्यानयोगसांख्ययोगप्रतिपादकः॥ अत
एव गीताभाष्ये॥ तृतीयाध्याये चतुर्थसंख्याकः॥ न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोश्नुत इति॥
श्लोकविवरणावसरे॥ तमेतं वेदानुवचनेन ब्राम्हणा विविदिषंति॥ यज्ञेनेत्यादिना॥ कर्मयोगस्य
ज्ञानोपायोगित्वं प्रतिपादितं॥ एतस्मिन्नेवाध्याये प्रथमसंख्याकः॥ ज्यायसी चेत्कर्मणस्ते इ
तिश्लोकविवरणावसरे॥ पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च॥ व्युत्थायाथ भिक्षाचर्यं च
रंतीति च॥ एतद्बृहदारण्यवचनद्वयं॥ लोकेस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ॥ ज्ञानयोगेन सां
ख्यानां कर्मयोगेन योगिनां॥ इत्यत्रस्थ कर्मयोगज्ञानयोगज्ञापकं पुरा मया प्रोक्तेति॥ पुरा पूर्वस्मिन् स

र्गोदीमयाईश्वरेणप्रोक्तमितिइत्यभिप्रायेणभाष्येप्रकटीकृतत्वात्॥गीतायाःस्मृतित्वेनव्यासादिभिः
स्वसूत्रादिषुउदाहृतत्वेनच॥तन्मूलभूतश्रुत्यपेक्षायांएतद्वचनद्वयोपलक्षितबृहदारण्यशतपथब्रा
ह्मणसंहिताद्युपलक्षितयजुर्वेदस्यैवप्रायशःप्राधान्येनमूलत्वज्ञापनात्॥गीतायास्तुतन्मूलत्वंसिद्धं॥
गीतायांचतुर्थोध्यायप्रथमश्लोकभाष्ये॥योयंयोगोध्यायद्वयेनोक्तोज्ञाननिष्ठालक्षणःसंन्यासः॥कर्मयोगो
पायोयस्मिन्वेदार्थः॥परिसमाप्तः॥प्रवृत्तिलक्षणोनिवृत्तिलक्षणश्च॥गीतासुचसर्वासुअयमेवयोगोविवक्षि
तोभगवतेति॥तत्रैवअतःपरिसमाप्तंवेदार्थंमन्वानःमनुवंशकथनेनस्तौति॥श्रीभगवानुवाचइतिच॥भाष्येप्युक्तं॥य
थागीतायां॥यएनंवेत्तिहंतारमिति॥नजायतेम्रियतेवेतिचमंत्रद्वयंकठवल्ल्यांउपनिषदिपठितमेव॥भ
गवताआनीयनिवेशितत्वेनतच्छ्रुतिमूलकत्वमपि॥गीतास्मृतेःप्रदर्शितंभवति॥एवमेवपूर्वोक्तरीत्या
गीतायाःबहुशःबृहदारण्यमूलकत्वंसंभवति॥भाष्येच॥गीताशास्त्रंनप्रवर्तकमित्येतस्यार्थस्यसाक्षि
भूतेऋचावानिनायभगवानिति॥ तदुत्तरभाष्यवाक्यएव॥ अस्मिन्मंत्रइति॥ तत्रैव॥पूर्वेणमंत्रेणास्य

संबंधः॥ इतियएनंवेत्तिहंतारमित्यनेनमंत्रेणहननक्रियायाःकर्ताकर्मचनभवतीति॥ प्रतिज्ञामुपसंह
रतीतिच॥ मंत्रशब्देनऋक्शब्देनच॥ कठवल्युपनिषद्रूपत्वत्तापनेनगीतास्मृतेःतन्मूलकत्वमपिसिद्धापि
तं॥ तथैवबृहदारण्यमूलकत्वमपिसिद्धंभवति॥ तादृशवेदस्यैवईश्वरेणआदित्योपदेशद्वारायाज्ञव
ल्क्यप्राप्तेःसंभवात्॥ विष्णुपुराणेतृतीयांशेपंचमाध्याये॥ याज्ञवल्क्यस्तदाप्राहप्रणिपत्यदिवाक
रं॥ यजूंषितानिमेदेहियानिसंतिनमेगुराविति॥२७॥ भागवतेद्वादशस्कंधेषष्ठाध्याये ॥याज्ञ
वल्क्यस्ततोब्रह्मन्छंदास्यधिगवेषयन्॥ गुरोरविद्यमानानिसूपतस्थेर्कमीश्वरं॥ इति॥ इत्यादिभिः
प्रमाणैःगुरोरविद्यमानानीति॥ यानिसंतिनमेगुराविति च विशेषणात्॥ वैशंपायनेनवेदव्यासात्॥
अलब्धस्यैववेदभागस्ययोगसामर्थ्यात्याज्ञवल्क्येनसूर्यस्थितत्वेनज्ञातस्यजगन्निर्माणकर्तृपर
मेश्वरात्सूर्यद्वाराप्राप्तस्ययजुर्वेदभागस्यसूर्येणयाज्ञवल्क्यायउप दिष्टत्वेनश्रुत्यत्वात्॥ शुक्लयजु
र्वेदंप्राप्तं॥ तस्मादेवतस्मिन्नेवविष्णुपुराणेभागवतेच॥ श्रीपराशरः ॥एवमुक्तोददौतस्मैयजूं

षिभगवान्रविः॥अयातयामसंज्ञानियानिवेत्तिनतद्गुरुः॥२९॥ श्रीसूतः ॥एवंस्तुतःसभगवान्वा
जिरूपधरोरविः॥यजूंष्ययातयामानिमुनयेदात्प्रसादितः॥७२॥ इति॥यजुषांअयातयामत्वरूप
विशेषणंदत्तं॥यातयामत्वंनाम॥अयोग्यत्वमितिपर्यवसितंभवति॥तथाचगीतायां॥यातयामंगत
रसमित्यत्रगौण्यावृत्त्यामंदपूक्त्वेनभोजनायोग्यत्वंविवक्षितं॥अन्यत्रसर्वत्रकिंचिन्निरूपितायो
ग्यत्वमेवविवक्षितत्वेनप्रयोगोदृश्यते॥तादृशयातयामंनभवतीतिअयातयाममित्युच्यते॥तथा
चपराशरमाधवीये॥हेमाद्रिनरसिंहपारिजातादिषुप्रयोगोदृश्यते॥हेमाद्रौ॥ गृह्यपरिशिष्टे
दर्भाःकृष्णाजिनंमंत्राब्राम्हणाहविरग्नयः॥अयातयामान्येतानिनियोज्यानिपुनःपुनः॥मरीचिः॥
मासेनभस्यमावास्यांतस्यांदर्भोच्चयोमतः॥अयातयामास्तेदर्भाविनियोज्याःपुनःपुनः॥इत्यादिप्र
योगेषुयातयामशब्दःअयोग्यपरःइतिगम्यते॥तद्भिन्नःअयातयामशब्दःश्रुत्यार्थकः॥इतिगम्यते
विष्णुपुराणस्थयाज्ञवल्क्यवचनेयानिसंतिनमेगुराविति खगुरौवैशंपायनेयानियजूंषिनसंति॥

व्यासात्॥नप्राप्तानि यजूंषितानिदेहेति॥ भागवतेपिसूतवचने याज्ञवल्क्यस्ततोब्रह्मन्छंदांस्य
धिगवेषयन्॥गुरोरविद्यमानानीत्यादिना वैशंपायनेव्यासोप्राप्तयजुर्भिन्नानिइतिप्रार्थनया॥तथ
अयातयामानिसूर्योदत्तवानितिवाक्यसंदर्भेणईश्वरादेवआदित्यप्राप्तान्येवयाज्ञवल्क्यःप्राप्तवा
नितिनिश्चीयते॥भागवतेपूर्वोक्ताध्याये॥भूत्वातित्तिर योब्रह्मन्त लोलुपतयाददुः॥तैत्तिरीयाइ
तियजुःशाखाआसन्सुपेशलाः॥६५॥ इतिश्लोकव्याख्यानेश्रीधरीये॥भूत्वेति॥छर्दितस्यादानं
विप्ररूपेणानुचितमितिमत्वातित्तिरीयाः॥पक्षिविशेषाःभूत्वाआददुः॥ततश्चतैत्तिरीयाःइतिप्रसिद्धाःसु
पेशलाः॥अतिरम्याः॥बहुवचनमवांतरभेदविवक्षया॥६६॥ ततःअन्येनाधीतान्यस्पृष्टानि॥नभवंती
तिअयातयामानीत्युच्यंते॥तस्मादेवतेषांशुक्लत्वं॥अतएवशुक्लयजुरितिमुक्तिकोपनिषत्स्थश्रीराम
वाक्यादिप्रभृतिषुपुराणेतिहासादिसर्वप्रमाणग्रंथेषुशुक्लयजुरितिनाम्नाअभिधीयते॥ तथाच
शुक्लशुभ्रशुचिश्वेतइत्यादिनाअमरनिघंटूक्तप्रकारेणापिशुक्लशुद्धपदयोःपर्यायत्वावगमात्॥

नचकृष्णस्यभगवतः ईश्वरत्वे सिद्धे ईश्वरोच्चरितत्वेनगीतायाः श्रुतित्वमेवभवितव्यं॥ तद्विहायस्मृ
तित्वंत्वयोच्यते॥ इतिवाच्यं॥ व्याससूत्रेषु॥ भाष्यादिषुच॥ तथाप्रयोगदर्शनात्॥ अपिचजगत्का
रणत्वादिनापरमेश्वरत्वेनरूपेणउच्चरितस्यवेदस्यश्रुतित्वं॥ देवकीपुत्रादिरूपेणअवतारंविशिष्ट
त्वेनरूपेण॥ उच्चरितस्यस्मृतित्वमिति॥ विभागोउचितएव॥ यथाचविष्णुत्वेनरूपेणतस्यईश्वरत्वं
रामकृष्णादिरूपेण क्षत्रियत्वंइतिसर्वसिद्धांतः॥ तथैव अत्रापि॥ श्रुतित्वस्मृतित्वविभागःसंभव
त्येव॥ अपिचवेदांगरूपनिरुक्तग्रंथे॥ अपश्यंगोपमनिपद्यमानमाचपराचपथिभिश्चरंतमित्येतदृ
चोनिरुक्ते॥ तंविद्याकर्मणीसमन्वारभेते॥ पूर्वप्रज्ञाचेत्येतद्बृहदारण्यवाक्यस्यैवउदाहृतत्वेन॥ नि
रुक्तस्यबृहदारण्यमूलकत्वंगम्यते॥ एवंस्थितेबृहदारण्यशाखाप्रवर्तकस्य॥ याज्ञवल्क्यस्यक
थंअश्रुत्यत्वंसंभवेत्॥ किंच॥ तवकालिकाखंडवाक्यरीत्या॥ याज्ञवल्क्यस्यशापग्रस्तत्वेतदनंतरमे
व॥ सूर्यनिकटेवेदाध्ययनं॥ तदनंतरंस्मृतिकर्तृत्वं॥ योगयाज्ञवल्क्यनामक॥ योगशास्त्रकर्तृत्वं

इत्यादि॥कथंसंभवेत॥तादृशयाज्ञवल्क्यस्मृतेः॥पराशरमूलस्मृतौ॥व्यासवचनेमूलस्मृतिकर्तृको
टौ॥याज्ञवल्क्यस्यापिस्मृतिकर्तृत्वेन॥अभिधानं॥तत्स्मृतेश्च॥प्रमाणत्वेनग्रहणं॥कथंव्यासेनैव
क्रियेत॥एवंनृसिंहपारिजातादिप्रमाणग्रंथेषु॥अन्यासुस्मृतिषु॥स्मृतिकर्तृत्वेनयाज्ञवल्क्यस्यप्र
योगोवाकथंवाघटेत॥विद्यारण्यात्मकमाधवाचार्यात्॥पूर्वकालीनस्य॥विज्ञानेश्वरस्य॥लोक
प्रसिद्धस्य॥याज्ञवल्क्यस्मृतिव्याख्याकर्तृत्वंवाकथंसंभवेत॥विज्ञानेश्वरीयंव्याख्यानं॥सर्वदेशे
षुसर्वकालेषुसर्वजनैरपि॥महाप्रमाणत्वेन॥महासंमतत्वेनपरिग्रहप्रसिद्धिःसर्वत्रवर्तते॥माध
वाचार्येणविद्यारण्यात्मकेनपराशरस्मृतिव्याख्यानावसरे॥मनुस्मृतेःव्याख्यानंकरिष्यामः॥इ
त्यालोचनायां॥मेधातिथ्यादिभिः॥बहुभिःव्याख्यानकृतंवर्तते॥याज्ञवल्क्यस्मृतेःव्याख्यानंकरि
ष्यामः॥इत्यालोचनायां॥विज्ञानेश्वरेणकृतंवर्तते॥अतःकलियुगे॥पराशरस्मृतेःप्राधान्यात्॥
तद्व्याख्यांकरिष्यामः॥इत्युक्तं॥पराशरमाधवीये॥एवंवर्तते॥अयमर्थः॥पराशरमाधवीयात्मक

प्राचीनबहुपुस्तकेषु दृश्यते॥ अन्येष्वपि॥ भारतपुराणआपस्तंबबोधायनादिसूत्रेषु॥ तत्सूत्रव्या-
ख्यानभाष्यमनुपराशरादिस्मृतिव्याख्यानहेमाद्रिमाधवीयनृसिंहपारिजातादिनिबंधनग्रंथेषु च या-
ज्ञवल्क्यकण्वकात्यायनादीनां तद्वाक्यानां च स्मृतिकर्तृत्वेन प्रमाणत्वेन च कथं स्वीकुर्यात्॥ प्रस्तुत
याज्ञवल्क्यस्य बृहदारण्यपंचमाध्याय द्वितीयखंडस्थ॥ सामश्रवशब्दनिर्वचनावसरे॥ श्रुतिभाष्य
व्याख्यान॥ तात्पर्यानुरोधेन॥ चतुर्वेदाध्येतृत्वाध्यापयितृत्वप्रदर्शनानुसारेण॥ विष्णुपुराणभाग
वताद्युक्त ऋग्वेदाध्येतृत्वाध्यापयितृत्वादिप्रकटनेन जीवन्मुक्तिःप्रकरणपंचदशीप्रकरणादिषु॥
वेदांतोपदेशपरंपराचार्यत्वेन विद्यारण्यैरुक्तरीत्या च॥ सर्वेषां वैदिकमतप्रविष्टानां॥ साक्षात्परंपरया
वा॥ वेदवेदांतोपदेष्टृत्वेन सर्वजननिरूपिताचार्यरूपेण वा कथंचित्॥ वेदव्यासवत्॥ गुरुत्वसंभवत्वे
वा॥ अयमर्थः पूर्वोक्तवक्ष्यमाणहेतुभिः॥ सर्वैर्निश्चीयत एव॥ तथा च विद्यारण्यकृतपंचदशीप्रकर-
णे॥ तृप्तिदीपिकायां॥ सुषुप्तिविषया मुक्तिविषया वा श्रुतिस्त्विति॥ उक्तं त्वाप्ययसंपत्त्योरिति सूत्रे ह्यति

स्फुटं॥ ६४॥ अन्यथा याज्ञवल्क्यादेराचार्यत्वं न संभवेत्॥ द्वैतदृष्टाववि द्वत्ताद्वैतादृष्टानवाग्वदेत्॥ ६६।
इति॥ तद्विद्यारण्यकृते च जीवन्मुक्तिप्रकरणे॥ तस्माद्द्वाविदेहराहित्यलक्षणविदेहमुक्तिर्ज्ञानसमकाली
ना॥ तथा च याज्ञवल्क्यवचनं श्रूयते॥ अभयं वै जनक प्राप्तोसीति एतावदरे खल्वमृतत्वमिति चेति॥
ननु॥ ब्रम्हविषयत्वेपि तेषामापातज्ञानं एव॥ न तु॥ सम्यग्वेदनमिति चेन्न॥ तथा सत्यस्माकमपि तदीय
वाक्यैरुत्पन्नायां विद्यायाः असम्यक्त्वप्रसंगात्॥ सम्यक्त्वेपि॥ परोक्षज्ञानमेवेति चेन्न॥ यत्साक्षादपरो
क्षाद्ब्रम्हेति॥ मुख्यापरोक्षविषयतयैव विशेषतः प्रश्नोत्तरोपलंभात्॥ इति॥ अपि च॥ यथा गायत्रीउपदेशः
ब्राम्हण्यसंपादकः॥ वेदाध्ययनादिसर्वकर्माधिकारसंपादकश्च भवति॥ एवं वेदांतशास्त्राध्ययनरूप
श्रवणमननादि अधिकारसंपादकत्वेन संन्यासिनां॥ उपनयनस्थानापन्नं संन्यासस्य॥ वेदाध्ययनस्था
नापन्नश्रवणमननादेः॥ गायत्रीउपदेशस्थानापन्नं॥ चतुर्वेदमहा वाक्यानां चतुर्णामपि मुख्यत
या॥ सर्वोपनिषत्सु शुकरहस्योपनिषदि विद्यारण्यकृतपंचदशीप्रकरणांतर्भूतमहावाक्यविवेकाख्य

प्रकरणे॥भाष्यकारशिष्यसुरेश्वराचार्यैरप्य॥वार्तिककारकृत॥वार्तिकेषु॥जीवन्मुक्त्यादिप्रकरणेषु॥सू
तसंहितादिपुराणादिषुच॥सर्वत्र प्रतिपाद्यमानत्वात्॥एवं॥यावज्जीवनैष्ठिकब्रम्हचारिस्नातकविधुरा
दीनामपि मुख्यतया महावाक्यप्राप्तेः॥आवश्यकत्वात्॥गृहस्थवानप्रस्थानामपि॥मुमुक्षूणांब्रम्हविविदि
षामपि॥यत्किंचिदिति कर्तव्यतान्यूनातिरिक्तभावेनापि॥तेषांआवश्यकतया॥संवादनीयत्वप्राप्तेः॥ किं
च॥आश्वलायनगृह्यसूत्रे॥उपनिषदिगर्भलंभनं॥पुंसवनमनवलोभनंचेत्यादि॥खंडिकायां॥गर्भाधानपुं
सवनसीमंतादिपुरुषसंस्काराणांदेहसंस्काराणांच॥विधानं॥कस्यांचित्॥अन्यशाखोपनिषदिउक्तं॥त
द्वारव्यायाः॥उत्सन्नत्वेनतदुपनिषदंनाधीयाद्यदि॥तदुक्तसंस्काराणांमध्येकांश्चित्संस्कारान्वक्ष्यामः॥
इत्यभिप्रायवर्णनं॥तत्सूत्रव्याख्यानरूपनारायणवृत्तौ सूचितं॥अनवलोभनंचेतिचकारात्॥आत्मज्ञा
नप यैतंविवक्षितं॥अतएवश्रुतिः॥मन्वादिस्मृति॥सूत्रादिषुसर्वेषु॥प्रामाणिकग्रंथेषुसर्वैष्वपि॥
ब्रम्हात्मैक्यज्ञानसंपादनस्यैव॥सर्वाश्रमिभिः॥प्राप्यत्वेनमुख्यतयाप्रतिपाद्यते॥तथाच॥श्रुतयः॥

ऋचो अक्षरे परमे व्योमन्॥ यस्मिन्देवा अधि विश्वे निषेदुः॥ यस्तन्न वेद किमृचा करिष्यति॥ य इत्तद्विदुस्त
इमे समासत इति॥ यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति॥ यदीं शृणोत्यलकं शृणो
ति न हि प्रवेद सुकृतस्य पंथां॥ इति॥ न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव॥ नीहारेण प्रावृ
ता जल्प्याचासुतृप उक्थशासश्चरंति॥ इति॥ तथा च मनुः॥ तपो विद्या च विप्रस्य निश्रेयसकरं परं
तपसा कल्मषं हंति विद्यया च विमुच्यते॥ इति॥ वेदाभ्यासस्तपो ज्ञानं दानमिंद्रियनिग्रहः॥ अहिंसा
गुरुसेवा च निश्रेयसकरं परं॥ सर्वेषामपि चैतेषां शुभानामिह कर्मणां॥ किंचिच्छ्रेयस्करतरं कर्मोक्तं
पुरुषं प्रति॥ सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतं॥ तध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः॥ सर्वभूते
षु चात्मानं सर्वभूतानि चात्मनि॥ समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति॥ यथोक्तान्यपि कर्माणि प-
रिहाय द्विजोत्तमः॥ आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्॥ एतद्धि जन्मसाफल्यं ब्राम्हणस्य वि-
शेषतः॥ प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा॥ यथा जातबलो वन्हिर्दहत्यार्द्रानपि द्रुमान्।

तथादहतिवेदज्ञःकर्मजंदोषमात्मनः॥वेदशास्त्रार्थतत्त्वज्ञोयत्रतत्राश्रमेवसन्॥इहैवलोकेति
ष्ठन्सब्रह्मभूयायकल्पते॥सम्यग्दर्शनसंपन्नःकर्मभिर्ननिबध्यते॥दर्शनेनविहीनस्तुसंसारंप्र
तिपद्यते॥ इत्यादिमनुवचनैः ॥इज्याचारदमाहिंसादानस्वाध्यायकर्मणां॥अयंतुपरमोध
र्मोयद्योगेनात्मदर्शनं॥इत्यादियाज्ञवल्क्यविज्ञानेश्वरीयवचनैः॥ आध्यात्मिकीन्योगाननु
तिष्ठेन्न्यायसंहितानन्नैश्चारिकानात्मलाभान्नपरंविद्यते॥इत्याद्यापस्तंबवचनैः॥ येनसूर्यस्तप
तितेजसेद्धःपितापुत्रेणपितृमान्योनियोनौ॥नावेदविन्मनुतेतंबृहंतंसर्वानुभुमात्मानंसंपराये
एषनित्योमहिमाब्राह्मणस्यनवर्धतेकर्मणानोकनीयान्॥तस्यैवात्मापदवित्तंविदित्वानलिप्यतेक
र्मणापापकेन॥इत्यादिबोधायनसूत्रोदाहृतश्रुतिवाक्यैः॥सदाचारस्यविप्रस्यतथावेदांतवेदिनः
मुक्तात्मनमुच्यतेपापात्अहोरात्रांतरान्नरः॥इत्यादिपराशरस्मृतिवचनैश्च॥सर्वापेक्षाचयज्ञादि
श्रुतेरश्ववत्॥इतिब्रह्मसूत्रेण ॥सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यते॥इत्यादिगीतावचनैश्च॥

सर्वशास्त्राणां आत्मज्ञानस्यैव॥ मुख्यफलत्वेनप्रतिपादनेतात्पर्यमितिगम्यते॥ गृहस्थानामपिआ
त्मज्ञानसंपादनस्यआवश्यकत्वमितिएतैरेववाक्यैः सिद्धोभवति॥ तथापि॥ याज्ञवल्क्यः स्पष्टमेवा
ह॥ न्यायागतधनस्तत्त्वज्ञाननिष्ठोतिथिप्रियः॥ श्राद्धकृत्सत्यवादीचगृहस्थोपिहिमुच्यतइति॥ मनु
रपि॥ वेदशास्त्रार्थतत्त्वज्ञोयत्रतत्राश्रमेवसन्॥ इतिगृहस्थाश्रमिणापि॥ आत्मज्ञानंसंपादनीयमि
ति॥ आपस्तंबबोधायनौतु॥ मुख्यतयागृहस्थानामेवआत्मज्ञानाधिकारंदर्शयतः॥ एतावता॥
आत्मज्ञानस्यसर्वैरपिमुख्यतयासंपादनीयत्वेनचतुर्वेदमहावाक्यार्थविचारद्वारेणैवआत्मज्ञानस्य
लब्धव्यत्वेन॥ सर्वेषामपि॥ महावाक्योपदेश्यत्वप्राप्तेः॥ गौतमोक्तचत्वारिंशत्संस्काराणांदेहसंस्का
रात्मसंस्कारनियतसंस्कारानियतसंस्कारादिविभागेन॥ प्राप्तानांमध्येमुख्यतया॥ आत्मसंस्कारत्वे
न॥ उपनयनस्यप्रथमत्वं॥ तद्द्वारागायत्रीउपदेशस्यापिप्रथमत्वं॥ तदर्थरूपमहावाक्यार्थरूपोपदे
शस्य॥ चरमत्वं॥ अन्येषांसर्वेषां॥ एतयोरंतराले॥ उपनयनांगत्वेनवा॥ परंपरयात्मज्ञानांगत्वेनवा

केषांचित्॥केषांचित्॥यथायोग्यसंस्कारत्वंसंभवतीतिसर्वशास्त्रार्थःसंपद्यते॥तथाचप्रकृते॥उ-
पनयनप्रयुक्तगायत्र्याः॥पर्यवसानरूपमहावाक्यानांचतुर्णां॥मुख्यतयासर्वैर्द्विजैःप्राप्यत्वाव-
श्यंभावित्वात्॥अयमर्थः॥शुकरहस्योपनिषदि।व्यासेनप्रार्थितः॥परमेश्वरःशुकस्यउपनयाख्यं
कर्मकृतवानित्यत्रस्पष्टतयाप्रतीयते॥तत्रैव॥एतानिमहावाक्यानिचतुर्वेदगतानि॥अर्थसहि-
तानि॥शुकायपरमेश्वरेणउपदिष्टानि॥तेषांअर्थश्चश्लोकाष्टकेन॥परमेश्वरेणैवउपदिष्टाः॥तदेव
श्लोकाष्टकंपंचदशीप्रकरणे॥विद्यारण्यैःमहावाक्यविवेकइतिनामकं॥तन्मात्रमेवएकंप्रकरणंकृ-
तं॥सुरेश्वराचार्याख्यभगवत्पादशिष्यवार्तिककारैःसंन्यासिनां॥संध्यावंदनस्थानीयंपंचीकरण
वार्तिकमिति॥कालत्रयानुष्ठेयतयाकृतंवर्तते॥तस्मिन्नपि॥चत्वारएवमहावाक्यानिचतुर्वेदग
तानिनिर्णीतानि॥वर्तते॥तदेवसन्यासिनांमुख्यं॥त्रिकालानुष्ठेयं॥सन्यासोत्तरकालमेवश्रवणमन-
नादिअधिकारसिध्यर्थं॥उपनीतस्य॥गायत्रीउपदेशवत्॥सन्यासिनांतद्गुरुणातत्तच्छाखोपनिष

दतमहावाक्यमेवप्रथमतः॥उपदिश्यते॥तत्रतावत्॥ऋग्वेदिनः॥ऐतरेयाख्य॥तच्छाखोपनिषद्गतंप्रज्ञा
नंब्रम्हेतिमहावाक्यमुपदिश्यते॥यजुर्वेदिनः॥तच्छाखोपनिषद्बृहदारण्यगतं॥अहंब्रम्हास्मीतिमहा
वाक्यमुपदिश्यते॥सामवेदिनः॥तच्छाखोपनिषच्छांदोग्यगतं॥तत्त्वमसीतिमहावाक्यमुपदिश्यते
अथर्वणवेदिनः॥तच्छाखोपनिषन्मांडूक्यगतं॥अयमात्माब्रम्हेति॥महावाक्यं॥उपदिश्यते॥एता
वताचतुर्णांवेदानां॥चत्वारिमहावाक्यानि॥इतिकृत्स्नानि॥तेषांमध्येयजुर्वेदस्य॥अहंब्रम्हास्मीतिइत्ये
व॥महावाक्यमितिसिद्धं॥तत्तु॥वाजसनेयिशाखिनां॥तैत्तिरीयाणांच॥एकमेवप्राप्तं॥तस्मात्॥
यजुष्टुंउभयोरपि॥सामान्यं॥तथापि॥वाजसनेयिशाखागतबृहदारण्योपनिषदि॥तृतीयाध्या
ये॥ब्रम्हवाइदमग्रआसीत्॥तदात्मानमेवावेदहंब्रम्हास्मीतिब्राम्हणानुवाके॥पठितत्वात्॥वा
जसनेयिशाखायाएवप्राधान्येनयजुष्ट्वप्रयोगःसंभवति॥ नतु॥तैत्तिरीयाणामपि॥सयश्चायंपुरु
षे॥यश्चासावादित्ये॥सएकः॥इतिमहावाक्यंपृथक्कृतयावर्ततइति चेन्न॥सय

श्चायंपुरुषइतिवाक्यस्यमहावाक्यत्वेन॥कुत्रचित्॥उपनिषत्भाष्यादिप्रमाणग्रंथेषुप्रयोगोनदृश्यते
प्रस्तुत॥महावाक्यानां॥शुकरहस्योपनिषदि॥चत्वार्यैवमहावाक्यानि॥चतुर्णांवेदानामिति॥ईश्वरेण
शुकाय॥उपदिष्टानि॥तस्य॥अर्थाविष्करणाय॥ईश्वरेणैवएकैकस्यमहावाक्यस्य॥अर्थप्रकाशकौ
द्वौद्वौश्लोकौ॥कृतौ॥एवं॥अष्टौश्लोकाः॥ईश्वरप्रणीताः॥वर्तंते॥तएवश्लोकाः॥विद्यारण्यगुरुभिः
पंचदशीप्रकरणे॥जीवन्मुक्तिप्रकरणेच॥उदाहृतावर्तंते॥तद्यथा॥प्रज्ञानंब्रम्हेतिऋग्वेदवाक्यस्य।
ऐतरेयोपनिषद्गतस्य॥प्रज्ञानंब्रम्हेत्यस्य॥अर्थप्रकाशकौ॥ येनेक्षतेशृणोतीदंजिघ्रतिव्याकरोति
च॥स्वाद्वस्वादुविजानातितत्प्रज्ञानमुदीरितं॥चतुर्मुखेंद्रदेवेषुमनुष्याश्वगवादिषु॥चैतन्यमेकंब्रम्हा
तःप्रज्ञानंब्रम्हमय्यपि॥इतिद्वौश्लोकौभवतः॥अथयजुर्वेदमहावाक्यं॥बृहदारण्योपनिषद्गतं॥अहंब्रम्हा
स्मीतिएतदर्थप्रकाशकौ॥परिपूर्णःपरात्मास्मिन्देहेविद्याधिकारिणि॥बुद्धेःसाक्षितयास्थित्वास्फु
रन्नहमितीर्यते॥स्वतःपूर्णःपरात्मात्रब्रम्हशब्देनवर्णितः॥अस्मीत्यैक्यपरामर्शस्तेनब्रम्हभवाम्यहं॥

इतिद्वौश्लोकौभवतः॥सामवेदमहावाक्यं॥तत्वमसीतिछांदोग्योपनिषद्गतं॥तदर्थप्रकाशकौ
एकमेवाद्वितीयंसन्नामरूपविवर्जितं॥सृष्टेःपुराधुनाप्यस्यतादृक्त्वंतदितीर्यते॥श्रोतुर्देहेंद्रिया
तीतंवस्त्वत्रत्वंपदेरितं॥एकताग्राह्यतेसीतितदैक्यमनुभूयतां॥इति॥एतौद्वौश्लोकौभवतः॥अ
थाथर्वणवेदमहावाक्यं॥अयमात्माब्रम्हेति॥मांडूक्योपनिषद्गतं॥अस्यार्थप्रकाशकौ॥स्वप्रका
शापरोक्षत्वमयमित्युक्तितोमतं॥अहंकारादिदेहांतात्प्रत्यगात्मेतिगीयते॥दृश्यमानस्यसर्वस्यज
गतस्तत्वमीर्यते॥ब्रम्हशब्देनतद्ब्रम्हस्वप्रकाशात्मरूपकमिति॥एतौद्वौश्लोकौभवतः॥ यदि॥पं
चमंमहावाक्यंसिद्धंचेत्॥तदाअस्यामुपनिषदि॥एतन्महावाक्यपंक्तौ॥ तस्यापिपठनीयत्वप्राप्ते
र्दुर्वारत्वात्॥तथानपठितं॥तदर्थप्रकाशकावपि॥अवश्यंद्वौश्लोकौभवितव्यौ॥तावपिअत्रनदृ
ष्टौ॥पंचदशीप्रकरणेजीवन्मुक्तिप्रकरणेपि॥विद्यारण्यैःतौश्लोकौ॥नोदाहृतौ॥चतुर्वेदभाष्यअष्टो
त्तरशतोपनिषद्दीपिकाकर्त्राविद्यारण्येन॥अत्रातःकश्चनपदार्थोनास्ति॥एवंस्थिते॥सयश्चायंपुरु

षे॥यश्चासावादित्यइतिवाक्यस्यमहावाकात्वंकथंभवेत्॥यत्रकुत्रापिमहावाककोटौअस्यवाक्यस्य
प्रवेशोनदृष्टः॥नश्रुतश्चचत्वार्यैवमहावाक्यानीतिसर्वशास्त्रप्रसिद्धेः॥अन्यथाएकैकवेदस्यापिशा
खाभेदेनबहूनिमहावाक्यानिभवितव्यानि॥तथानदृश्यंते॥एकैकवेदस्य॥एकैकमेवमहावाक्यमि
ति॥नियतत्वेनैवऋग्वेदसामवेदअथर्वणवेदेषुदृश्यते॥तथायजुर्वेदस्यापि॥एकमेवभवित
व्यं॥इतिउचितंदृश्यते॥अपिचवेदांतेषुमहावाक्यंनामजीवब्रम्हैक्यबोधकंवाक्यं॥तथाप्रज्ञानं
ब्रम्ह॥तत्वमसि॥अयमात्माब्रम्ह॥इत्यादिषुदर्शनात्॥अत्रतु॥सयश्चायंपुरुषइत्यत्रतथाअदर्श
नात्॥तथाहि॥तत्॥त्वंअसि॥इत्यत्रतत्पदेनजगत्कारणंब्रम्होच्यते॥ त्वं॥इत्यत्र॥देहत्रयादिवि
शिष्टःपुरुषःउच्यते॥अनयोःसामानाधिकरण्येन॥ऐक्यप्रतीतौसत्यां॥वाच्यार्थयोःविशिष्टयोःऐ
क्यासंभवेनविशेषणेविहायउभयानुगतसच्चिन्मात्ररूपत्वेनएकताग्रहणं॥महावाक्यार्थज्ञानं॥
यत्रयत्रपदार्थयोरैक्यंप्रतिपाद्यते॥तत्रतत्रसामानाधिकरण्येनशब्दयोःप्रवृत्तिर्भवति॥ यथा॥

सोयंदेवदत्तः॥इत्यत्रसइतितत्पदार्थवाचकस्यशब्दस्यअयमितिपतत्पदार्थकवाचक॥अयमिति
शब्दस्यच॥एकस्मिन्देवदत्तरूपेअर्थेसामानाधिकरण्यंभवति॥सामानाधिकरण्यंनाम॥एक
स्मिन्नर्थेउभयोःशब्दयोःप्रतिपाद्यतासंबंधेनवृत्तित्वमेव॥तच्च॥एकार्थप्रतिपादकत्वेसति॥ए
कविभक्ति॥एकवचनकत्वमितिपर्यवसीयते॥अत्रसयश्चायंपुरुषइत्यस्मिन्वाक्ये॥तथात्वादर्शा
नात्॥तस्यमहावाक्यत्वंवक्तुंनशक्यते॥लोकेपि॥त्वंराजासि॥त्वंदशमोसि॥त्वंराजपुत्रोसि॥त्वं
ब्राम्हणोसि॥इत्यादिवाक्ये॥राजभिन्नत्वज्ञानवतः॥राजपुत्रभिन्नत्वज्ञानवतःब्राम्हणभिन्नत्वज्ञान
वतः॥दशमभिन्नत्वज्ञानवतः॥पुरुषस्यच॥अहंराजास्मि॥अहंराजपुत्रोस्मि॥अहंब्राम्हणोस्मि॥
अहंदशमोस्मि॥इत्याकारकंज्ञानंजायते॥तद्वाक्यानामेव॥ऐक्यज्ञानजनकत्वंप्रसिद्धं॥एतेषां
वाक्यानां॥मध्येएकैकस्यवाक्यस्यपदद्वययुक्तत्वात्॥तयोःपदयोः॥परस्परसामानाधिकर
ण्यंसंभवतीति॥तयोःएकविभक्तिएकवचनकत्वमपिसिद्धंभवति॥तादृशसामानाधिकरण्य

वद्वाक्यस्यैव॥ऐक्यज्ञानजनकत्वेन॥महावाक्यत्वव्यवहारः॥सयश्चायमितिवाक्येतु॥अस्मि
न्पुरुषेयःवर्तते॥सोयं॥आदित्ये॥यश्चासौ॥सएकः॥इत्यत्रवाक्यद्वयेपि॥अधिकरणसप्तमी
निर्देशात्॥उभयाधिकरणेपि॥एकएव॥वर्ततइति॥बोधःसंभवति॥यथालोके॥व्यवहारः॥
अस्मिन्देशे॥काश्यांच॥एकएवःसूर्यः॥यथावा॥अस्मिन्देशे॥नियंतातस्मिन्देशेनियंताच
एकएव॥इतिवत्॥पुरुषशब्दस्य॥शरीरादिविशिष्ट॥जीववाचकत्वात्॥आदित्यशब्दस्यापि
मंडलादिविशिष्टदेवतावाचकत्वात्॥एतयोःकश्चनवर्ततइति॥अंतर्यामिपरत्वेनापि॥आबालगो
पालसाधारण्येनज्ञानविषयत्वसंभवात्॥वाक्यस्यऐक्यज्ञानजनकत्वंनसंभवति॥पुरुषशब्दस्य
शरीरमात्रपरत्वांगीकारेपि॥आदित्यशब्दस्य॥तथात्वासंभवात्॥एतस्मिन्ग्रामे॥तस्मिन्ग्रामेपि
एकैव॥नदीवर्ततइत्युक्ते॥नद्याःएकत्वमिति॥ज्ञानसंभवेपि॥ग्रामयोःएकत्वज्ञानासंभवः॥एतस्मि
न्ग्रामेतस्मिन्ग्रामेच॥एकएवराजावर्ततइत्युक्ते॥राज्ञःएकत्वंसंभवति॥दशमस्त्वमसी ॥ ॥

स्यादौ॥दशमस्य॥तज्जिज्ञासोश्च॥ऐक्यज्ञानंसंभवति॥एवं॥जीवब्रह्मैक्यज्ञानस्यैव॥अ
त्रविवक्षितत्वात्॥तस्यैवमहावाक्यत्वेन॥सर्ववेदशास्त्रपुराणेतिहासशिष्टाचारादिषु॥बहुशोव्यव
हारदर्शनात्॥सयश्चायमित्यस्यवाक्यस्य॥महावाक्यत्वंनसंभवति॥अन्यथा॥सर्वेषांवाक्यानाम
पि॥महावाक्यत्वप्रसंगोभवत्येव॥अतः॥सयश्चायमितिवाक्यस्य॥अंतर्यामिप्रतिपादकत्वमेव॥
प्रतीयते॥तद्यथा॥बृहदारण्ये॥पंचमाध्याये॥याज्ञवल्क्योद्दालकसंवादे॥अंतर्यामिब्राह्मणे॥स
र्वांतर्यामित्वेनयथापकस्वप्रतिपाद्यते यःपृथिव्यांतिष्ठन्पृथिव्याअंतरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयः
पृथिवीमंतरोयमयतिएषतआत्मांतर्याम्यमृतः॥एवंयोऽप्सुतिष्ठन्योऽग्नौतिष्ठन्यआदित्येतिष्ठ
न्॥यश्चक्षुषितिष्ठन्॥इत्यादिवत्॥सर्वेषुपदार्थेषु॥एकएवांतर्यामित्वेनवर्ततइतिज्ञानंजायते॥
एवमेवबृहदारण्ये॥चतुर्थाध्यायेमधुब्राह्मणे॥ इयंपृथिवीसर्वेषांभूतानांमध्वस्यैपृथिव्यैसर्वा
णिभूतानिमधुयश्चायमस्यांपृथिव्यांतेजोमयोऽमृतमयः॥पुरुषोयश्चायमध्यात्मंशारीरस्तेजो

प्र॰स्था॰
२८७

मयोऽमृतमयः पुरुषोऽयमेव सयोयमात्मेदममृतमिदं ब्रह्मेदं सर्वं ॥ एतादृशवाक्यानां जीवब्रह्मैक्यज्ञा ॥

नजनकमहावाक्योपकारकत्वेन अवांतरवाक्यत्वमेव ॥ नतुमहावाक्यत्वमिति सिद्धांतः अन्यथा ॥

आत्मनआकाशः संभूतः इत्यादिसृष्ट्यादिवाक्यानामपि ॥ महावाक्यत्वप्रसंगोदुर्वारः तेषामपिपर

परया ॥ आराडुपकारकत्वेनमहावाक्यज्ञानजनकत्वात् ॥ तथत्वांगीकारेतु ॥ सर्वेषांश्रुतिवाक्याना ॥ ॥

मपिमहावाक्यत्वप्रसंगोभवेत् ॥ तेषामपि ॥ बहुदूरेणापिपरंपरयोपकारकत्वात् अलमतिवादे ॥ ॥

न ॥ ननुप्रथमशाखिनइति ॥ वाजसनेयिब्राम्हणानां ॥ लोकंप्रवादः ॥ किंनिमित्तकऋग्वेदादि ॥ ॥

बहुशाखाप्रविष्ठानामपिप्रथमशाखिनः द्वितीयशाखिनस्तृतीयशाखिनः चतुर्थशाखिनइति ॥ ॥

कुत्रापिव्यवहारोनास्ति ॥ अपितुद्राविडाः ॥ आंध्राः । कर्नाटकाः ॥ महाराष्ट्राः ॥ घूर्जराः ॥ इत्यादिव्यवहारो ॥

वर्तते ॥ वाजसनेयिनांतु ॥ सर्वदेशेषुप्रथमशाखिनइतिव्यवहारः ॥ बहुशोदृश्यते ॥ किमर्थमयंव्यव ॥

हारः प्रवृत्तः ॥ इसयंविचारःकर्तव्यइत्यवशिष्ट इतिचेत् ॥ सत्यंकर्तव्यएव ॥ तथापिकिमर्थमयंव्य ॥

वहारःप्रवृत्तः इति ॥ तन्मूलं ॥ त्वया दृष्टं वा ॥ श्रुतं वा ॥ ज्ञातं वेति । अस्माभिः पृच्छ्यते ॥ यथा कथंचित्
सामान्यतोपि त्वया ज्ञातं चेत् ॥ वक्तव्यं ॥ अज्ञातं चेत् ॥ अस्माभिर्यथाश्रुतं ॥ यथाज्ञातं तथा वर्ण्य
ते ॥ अवधार्यतां ॥ ॥ ऋग्वेदादिवेदेषु ॥ अवांतरशाखाबहुत्वेपि ॥ मूलभूतस्य वेदस्य ॥ पू
र्वभागोत्तरभागवत् ॥ भागद्वयप्रवृत्तेः अप्राप्तत्वात् ॥ तत्र तादृशविभागो नोत्पन्नः ॥ यजुर्वेदस्य
तु ॥ भागद्वयप्रसक्तेस्तु ॥ प्राप्तत्वात् ॥ तत्र भिन्नव्यवहारो लब्धः ॥ अत एव भागद्वयस्यापि तैत्तिरी
यः ॥ वाजसनेयः इति प्रत्येकं अभिधानं जातं ॥ अन्येषां वेदानां तु भागद्वयविवेकाभावात् ॥ सामान्य
तः ऋग्वेदस्य एताः शाखाः एतावत्संख्याकाः ॥ सामवेदस्य एताः शाखाः एतावत्संख्याकाः ॥ अ
थर्वणवेदस्य एताः शाखाः ॥ एतावत्संख्याकाः ॥ इत्येतावन्मात्रं ॥ श्रुत्यादिषु प्रतिपाद्यते ॥ यजुर्वे
दस्य तु ॥ भागद्वयप्राप्तेः ॥ अथ तैत्तिरीयाणां पंचभेदा भवंति ॥ अथ वाजसनेयिनां सप्तदश भेदा भवं
ति ॥ इत्यादि चरणव्यूहादिग्रंथेषु एकैकस्य भागस्यैव शाखाभेदा उच्यंते ॥ तथा च अष्टोत्तरशतोपनि

षन्मूलभूतमुक्तिकोपनिषदि श्रीरामेण हनुमते चतुर्णामपि वेदानां यावत्यः शाखाः यावत्यः उपनिषदः एकैकस्याः शाखायाः यावत्यः उपनिषदः इत्यादिप्रश्नस्य प्रत्युत्तररूपेण उपदेशकरणदशायां॥ साधु पृष्टं महाबाहो वदामि शृणु तत्त्वतः॥ वेदांते सुप्रतिष्ठोहं वेदांतं समुपाश्रय॥ हनुमानुवाच ॥वेदांताः के रघुश्रेष्ठ वर्तंते कुत्र ते वद॥श्रीराम उवाच॥ हनुमन् शृणु वक्ष्यामि वेदांतस्थितिमंजसा॥ निश्वासभूता मे विष्णोर्वेदा जाताः सुविस्तराः॥ तिलेषु तैलवद्वेदे वेदांतः सुप्रतिष्ठितः॥ हनुमानुवाच॥ राम वेदाः कतिविधास्तेषां शाखाश्च राघव॥ तासूपनिषदः काः स्युः कृपया वद तत्त्वतः॥ श्रीरामः ॥ ऋग्वेदादिविभागेन वेदाश्चत्वार ईरिताः॥ तेषां शाखा ह्यनेकाः स्युः तासूपनिषदस्तथा॥ ऋग्वेदस्य तु शाखाः स्युरेकविंशतिसंख्यया॥ नवाधिकशतं शाखा यजुषो मारुतात्मज॥ सहस्रसंख्यया जाताः शाखाः साम्नः परंतप॥ अथर्वणस्य शाखाः स्युः पंचाशद्भेदतो हरे॥ एकैकस्यास्तु शाखाया एकैकोपनिषन्मता॥ तासामेकामृचं येन पठ्यते भक्तितो मयि॥ समत्सायुज्यपदवीं प्राप्नोति मुनिदुर्लभां॥

इत्युपक्रम्य॥चतुर्विधाश्चयामुक्तिर्मदुपासनयाभवेत्॥इयंकैवल्यमुक्तिस्तुकेनोपायेनसिध्यति।
मांडूक्यमेकमेवालंमुमुक्षूणांविमुक्तये॥तथाप्यसिद्धंचेत्ज्ञानंदशोपनिषदंपठ॥ज्ञानंलब्ध्वाचिरादे
वमामकंधामयास्यसि॥तथापिदृढतानोचेद्विज्ञानस्यांजनासुत॥द्वात्रिंशाख्योपनिषदंसमभ्य
स्यनिवर्तय॥विदेहमुक्ताविच्छाचेदष्टोत्तरशतंपठ॥तासांक्रमंसशांतिंचशृणुवक्ष्यामितत्त्वतः॥ईश
केनइत्युपक्रम्यरहस्यकंचमुक्तिकेत्यंतंअष्टोत्तरशतोपनिषन्नामानिश्लोकरूपेणोपदिश्य॥एवम
ष्टोत्तरशतंभावनात्रयनाशनं॥ज्ञानवैराग्यदंपुंसांवासनात्रयनाशनं॥पूर्वोत्तरेणविहितःत
त्तच्छांतिपुरःसरं॥इत्युक्त्वा॥अस्माइमामुपसन्नायसम्यक्परीक्ष्यदद्याद्वैष्णवीमात्मनिष्ठामिति
॥१॥अथहैनंश्रीरामचंद्रंमारुतिःपप्रच्छ॥ऋग्वेदादिविभागेनपृथक्शांतिमनुब्रूहीति॥सहोवा
चश्रीरामः॥ऐतरेयकौषीतकीनादबिंद्वात्मप्रबोधनिर्वाणमुद्गलाक्षमालिकात्रिपुरासौभाग्यबह्वृ
चानामृग्वेदगतानांदशसंख्याकानामुपनिषदांवाङ्मेमनसीतिशांतिः॥ ईशावास्यबृहदारण्य

कजाबालहंसपरमहंससुबालमंत्रिक निरालंबत्रिशिखीब्राम्हणमंडलब्राम्हणाद्वयतारकपैंगल
भिक्षुतुरीयातीताध्यात्मतारसासारयाज्ञवल्क्यशाट्यायिनीमुक्तिकानांशुक्लयजुर्वेदगतानामेको
नविंशतिसंख्याकानामुपनिषदांपूर्णमद इतिशांतिः॥ कठवल्लीतैत्तिरीयकब्रम्हकैवल्यश्वे
ताश्वतरगर्भनारायणामृतबिंदुमृतनादकालाग्निरुद्रक्षुरिकासर्वसारशुकरहस्यतेजोबिंदु
ध्यानबिंदुब्रम्हविद्यायोगतत्वदक्षिणामूर्तिस्कांदशारीरकयोगशिखैकाक्षराक्ष्यवधूतकठरुद्र
हृदययोगकुंडलिनिपंचब्रम्हप्राणाग्निहोत्रवराहकलिसंतरणसरस्वतीरहस्यानांकृष्णयजुर्वेद
गतानांद्वात्रिंशत्संख्याकानामुपनिषदांसहनाववत्विति शांतिः॥केनछांदोग्यारुणिमैत्रायणिमै
त्रेयीवज्रसूचिकायोगचूडामणिवासुदेवमहत्संन्यासाव्यक्तकुंडिकासावित्रीरुद्राक्षजाबालदर्श
नजाबालीनांसामवेदगतानांषोडशसंख्याकानामुपनिषदांआप्यायंत्विति शांतिः॥प्रश्नमुंडमां
डूक्याथर्वणशिरोथर्वणशिखाबृहज्जाबालनृसिंहतापिनीनारदपरिव्राजकसीताशरभमहाना

रायणरामरहस्यरामतापिनीशांडिल्यपरमहंसपरिव्राजकान्नपूर्णसूर्यात्मपाशुपतपरब्रह्मत्रिपुरता
पनदेवीभावनाभस्मजाबालगणपतिमहावाक्यगोपालतपनकृष्णहयग्रीवदत्तात्रेयगारुडानामथ
र्वणवेदगतानामेकत्रिंशसंख्याकानामुपनिषदांभद्रंकर्णेभिरितिशांतिः॥इत्यादिश्रीरामवचनैरेवयजु
र्वेदस्यभागद्वयंविविच्यतन्मध्येशुक्लयजुषःएताःएकोनविंशतिसंख्याकाःशाखाःतासांएकैकोपनिष
दित्रिःप्रकारेणएकोनविंशतिसंख्याकाः॥उपनिषदःतासांसर्वासांपूर्णमदइतिशांतिः॥एताःशुक्लयजु
र्वेदगताःइत्युक्त्वातदनंतरंकठवल्लितैत्तिरीब्रह्मकैवल्यादीन्युपक्रम्यसरस्वतीरहस्यांतानांकृष्णयजु
र्वेदगतानांद्वात्रिंशत्संख्याकानांउपनिषदांसहनाववत्वितिशांतिः॥इत्युक्तत्वात्॥यजुर्वेदस्यद्वौभागौ
तयोर्मध्येप्रथमभागस्यशुक्लयजुरितिद्वितीयभागस्यतुकृष्णयजुर्वेदइतिविभज्यदर्शितत्वात्॥पूर्णमदइ
तिशांतिविशिष्टत्वेनापिपूर्वभागस्यवाजसनेयशाखात्वं॥उत्तरभागस्यसहनाववत्वितिशांतिविशिष्टत्वेन
तैत्तिरीयशाखात्वंप्रदर्श्यप्रथमतःउक्तत्वात्॥प्रथमभागःप्रथमशाखाइति॥द्वितीयभागःद्वितीयशाखा

तिवक्तुंशक्यते॥ अस्यगमकांतरमपिसूच्यते॥ पूर्वोक्तविवरणप्रकारेणभगवद्गीतायांचतुर्थाध्याये॥
इमंविवस्वतेयोगंप्रोक्तवानहमव्ययं॥ विवस्वान्मनवेप्राह मनुरिक्ष्वाकवेब्रवीत्॥ इतिश्लोकविवर
णेशंकरभगवत्पादकृतभाष्ये॥ योयंयोगोध्यायद्वयेनोक्तः॥ ज्ञाननिष्ठालक्षणःसन्यासः॥ कर्म
योगोपायः॥ यस्मिन्वेदार्थःपरिसमाप्तःप्रवृत्तिलक्षणोनिवृत्तिलक्षणश्च॥ गीतासुचसर्वासुअय
मेवयोगोविवक्षितोभगवता॥ अतःपरिसमाप्तंवेदार्थं॥ मन्वानः॥ तंवंशकथनेनस्तौति॥ श्रीभ
गवानुवाच॥ इममिति॥ इममध्यायद्वयोनोक्तंयोगंविवस्वतेआदित्याय॥ सर्गादौप्रोक्तवानहं॥ अ
व्ययं॥ इत्यादिनाहेतुनापिपरमेश्वररूपेण॥ सर्गादौसृष्ट्यादौकल्पादावित्यर्थः॥ अव्ययं॥ अनादि
रूपेणनाशरहितं॥ अथवा॥ अव्ययंनाशरहितमोक्षसाधनज्ञानजनकत्वात्॥ योगद्वयप्रतिपा
दकवेदभागंसूर्यायदत्तवानितिभगवतेवोक्तत्वात्॥ तादृशवेदभागस्यप्रथमतःअभिव्यक्त
त्वात्॥ प्रथमजत्वं॥ अतएव॥ शुक्लयजुःशाखागतसंहितायांपंचत्रिंशत्संख्याकाध्याये॥ प्रथम

जामृतस्येति॥ यजुर्वेदभागात्मकश्रुतेः प्रथमजत्वं ज्ञापितं॥ अन्यस्य यजुर्वेदभागस्य विष्णुपुराणे
तृतीयांशे चतुर्थाध्याये॥ पराशरः॥ ततोत्र मत्सुतो व्यासः अष्टाविंशतिमेंतरे॥ वेदमेकं चतुष्पादं
चतुर्धा व्यभजत्प्रभुः॥ २॥ इत्युक्तप्रकारेण परमेश्वरस्य विष्णोः अंशांशत्वेन व्यासरूपेण वेदवि
भागः कृतः॥ तथा च भागवते द्वादशस्कंधे षष्ठाध्याये॥ ते परंपरया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः॥ च
तुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः॥ ४६॥ अस्मिन्नप्यंतरे ब्रम्हन् भगवान् लोकभावनः॥ ब्रम्हे
शाद्यैर्लोकपालैर्याचितो धर्मगुप्तये॥ ४८॥ पराशरात्सत्यवत्यामंशांशकलया विभुः॥ अवतीर्णो महा
भागो वेदं चक्रे चतुर्विधं॥ ४९॥ इत्यादिवचनैश्च अवतरन् वैशंपायनोपदेशद्वारा तच्छिष्येभ्यः॥ तित्ति
रिपक्षिरूपधारिभ्यः॥ दत्तवानिति तद्वेदभागस्य बव्हर्वाचीनकाले अवरजत्वं॥ इति हेतोः प्रथमभा
गस्य प्रथमशाखेति अभिधानं बभूव॥ अत एव॥ दर्शितप्रकारेण॥ मुक्तिकोपनिषदि॥ श्रीरामचंद्रे
ण ऋक्साम अथर्वणवेदानां सामान्यतः॥ पंचाशच्छाखाः॥ एकविंशतिशाखा इत्यादिक्रमेण॥ इ

सुक्तं॥भागद्वयविभागस्तुनकृतं॥यजुर्वेदस्यतु॥भागद्वयंकृत्वाप्रथमभागस्यअवांतरशाखाभेदंप्र
थमतएवअभिधाय॥शुक्लयजुर्नामाभिधानेन॥प्रसिद्धेःसूर्यायसाक्षादीश्वररूपेणच॥दत्तत्वाच्च॥प्र
थमभागस्यशुद्धत्वं॥प्रथमत्वंचज्ञापयित्वा॥द्वितीयभागस्यअवांतरभेदंदर्शयित्वा॥कृष्णयजुर्ना
माभिधानेन॥तत्स्वरूपं॥तस्यद्वितीयत्वंचज्ञापयित्वा॥वाजसनेयिशाखातैत्तिरीयशाखाभेदः॥स्पष्ट
तयाप्रदर्शितः॥अतएवप्रथमशाखेतिव्यवहारः॥प्रवृत्तःप्रथमइत्युक्तो॥ज्येष्ठइत्यर्थोलभ्यते॥लोके
प्रथमपुत्रःप्रथमभार्या॥प्रथमतोगणनीयः॥ब्राह्मणानांप्रथमः॥प्रथमवर्णइत्यादौ॥ज्येष्ठत्वप्रतीतेः॥
प्रसिद्धिर्वर्ततेवेदेपि॥सप्रथमः॥संकृकृतिविश्वकर्मा॥सप्रथमोवरुणो॥मित्रोअग्निः॥सप्रथमोबृह
स्पतिश्चीकितवान्॥इत्यादिप्रयोगेषु॥परमेश्वरस्यप्रथमत्वेनज्येष्ठत्वंप्रतिपाद्यते॥एतद्वाक्यं॥पदव्य
त्यासेन॥तैत्तिरीयेवाजसनेयिकेच॥वर्तते॥ज्येष्ठत्वंच॥श्रेष्ठत्वमिति॥पर्यवसितंभवति॥प्रथमः॥
अग्रजः॥ज्येष्ठः॥श्रेष्ठः॥इत्यादिपदानांएकार्थकत्वमेवभवति॥अतएव॥हिरण्यगर्भःसमवर्तताग्रे

भूतस्यजातः पतिरेकआसीदिति॥ श्रुतेः॥ अतएव॥ तैत्तिरीयोपनिषदि ब्रम्हवल्लीभाष्ये॥ भाष्यका
रेण॥ अन्नंह्हिभूतानांज्येष्ठंतस्मात्सर्वौषधमुच्यत इति॥ वाक्यस्यभाष्यं॥ अन्नंहि॥ यस्मात्॥ भूता
नां॥ प्राणिनां॥ ज्येष्ठं॥ श्रेष्ठं॥ प्रथमजं॥ अन्नमयादीनांहीतरेषांभूतानां॥ कारणमन्नमिति॥ म
नुरपि॥ तृतीयाध्याये॥ श्राद्धनिमंत्रणप्रस्तावे॥ मूलं ॥ अश्रोत्रियः पितायस्यपुत्रस्यात्वेदपार
गः॥ अश्रोत्रियोवापुत्रस्यात्पितास्याद्वेदपारगः॥ १३६॥ ज्यायांसमनयोर्विद्याद्यस्यस्याच्छ्रोत्रियः
पिता॥ इतिअस्यव्याख्यानं॥ तयोः कः श्रेष्ठ इत्युपन्यस्यविशेषमाह॥ ज्यायांसमिति॥ अनयोः पूर्व
श्लोकनिर्दिष्टयोर्मध्ये॥ श्रोत्रियपुत्रंस्वयमश्रोत्रियमपि॥ ज्येष्ठंजानीयात्॥ इति॥ श्रेष्ठइत्यर्थः॥ अपि
चछांदोग्योपनिषदि॥ बृहदारण्योपनिषदिच॥ प्राणसंवादादिप्रकरणेषु॥ ज्येष्ठश्चश्रेष्ठश्च इत्यादिना
वेदलोकयोः सर्वत्र॥ प्रथमज्येष्ठश्रेष्ठादिशब्दानां॥ एकार्थत्वेनबहुशोप्रयोगो दृश्यते॥ तस्मात्॥
प्रथमइत्युक्तेज्येष्ठइति॥ अतएवश्रेष्ठइति॥ अर्थः॥ सिद्धोभवति॥ ननुप्रथमशाखाइत्युक्ते॥ श्रेष्ठ

शाखेति॥अर्थः॥सिद्धश्चेत्॥तच्छाखिभिःसह॥इतरशाखाप्रविष्टजनानां॥ऋग्वेदादिशाखिनां॥कं
न्याग्रहण कन्यादान॥यजनयाजनादि॥व्यवहारः किमर्थं न क्रियते॥इति चेत्॥बाढं॥न क्रियते॥अ
तएवन क्रियते॥अतएवइत्युक्ते॥श्रेष्ठत्वाभिमानादेवइत्यर्थः॥यद्यपि॥ब्राम्हणानांसर्वेषांसमखे
पि॥सर्ववेदिनां॥सर्वशाखिनांसंमतेपि॥वाजसनेयिशाखिनः॥आदित्यपुराणोक्तरीत्या॥स्वश्रेष्ठे
नबृहदारण्यजाबालरामतापनीयाद्युपनिषत्सुभाष्यकारशंकराचार्यव्याख्याकारआनंदगिरीया
चार्यविद्यारण्यादिकृतभाष्यव्याख्यानप्रकरणादिषुयाज्ञवल्क्यमाहात्म्यदर्शनेनशंकरभगवत्पाद
प्रथमशिष्यवार्तिककारसुरेश्वराचार्यस्यकण्वशाखाप्रविष्टत्वेनयाज्ञवल्क्यस्य॥श्रेष्ठ्यद्वारा॥तच्छाखि
नामपिश्रेष्ठत्वप्राप्त्या॥गौतमधर्मसूत्रभाष्यरूपमस्करीयोक्तवसिष्ठस्मृतिप्रतिपाद्यश्राद्धनिमंत्रणयो
ग्यपंङ्क्तिपावनब्राम्हणकोटौप्रविष्टत्वेनच॥अव्यवहितोक्तप्रकारेणप्रथमत्वरूपश्रेष्ठत्वप्राप्त्याच॥वय
मेववाजसनेयिनः॥प्रथमशाखिनः॥ज्येष्ठाः॥श्रेष्ठाः॥इति॥मन्यमानाः॥पंडितंमन्याइव॥सर्वेपि॥

इतरशाखिनः स्वापेक्षया ॥ न्यूनत्वं प्राप्ताः ॥ तैः सह ॥ कन्यादानकन्याग्रहणयजनयाजनादिव्यवहा
रः कथं कर्तव्यः ॥ तादृशव्यवहारकरणे स्वेषां न्यूनताप्राप्तिर्भवतीति ॥ अविवेकिनः स्वश्रेष्ठत्वाना
दुरभिमानवशात् ॥ बहुप्राचीनकाले ॥ संकेतं कृत्वा ॥ इतरैः सह ॥ व्यवहारं न कृतवंतः ॥ तत्परंपरयो
पदेशेन ॥ तद्व्यवहारदर्शनेन च ॥ परंपरया ॥ आधुनिकाधुनिकैः सर्वदेशेषु व्यवहारः ॥ लुप्तो भवतु ॥
तदुरभिमानश्रेष्ठत्वाभिमानं दृष्ट्वा इतरशाखिनः सर्वेपि ॥ ब्राह्मणानां सर्वेषां समानत्वेपि ॥ वेदानां स
र्वेषां समानत्वेपि ॥ वेदशाखिनां सर्वेषां समानत्वेपि ॥ श्रेष्ठत्वाभिमानेन एतैरस्माभिः सह व्यवहारः
न क्रियते ॥ अस्माभिरपि ॥ एतादृशव्यवहारः एतैः सह न कर्तव्यः ॥ इति संकेतं कृत्वा ॥ तैरपि व्यवहारः ॥
परंपरया न कृतः ॥ तत्रापि कथंचित् ॥ अर्वाचीनार्वाचीनकालेषु ॥ केषुचेषु चित्स्वदेशेषु ॥ केषुकेषुचित् ॥
अनुपपत्तिविशिष्टकालविशिष्टकालविशेषेषु च ॥ श्रौतस्मार्तविवाहादिस्मार्तकर्मसु ॥ श्रौतादिकर्मांग
होत्रौद्गात्रादि आर्त्विज्यकर्मसु च ॥ यजनयाजनादि परस्परव्यवहारः ॥ प्रवृत्तः ॥ अद्यापि क्वचित्

क्वचित्प्रदेशविशेषेषु॥प्रवर्तते॥कन्यादान॥कन्याग्रहण॥व्यवहारस्तु॥स्त्रीरत्नंदुष्कुलादपीति
शास्त्ररीत्याकन्याग्रहणस्य॥स्वापेक्षया॥निकृष्टादपि॥ग्रहणस्यअभ्यनुज्ञातत्वेनस्वापेक्षयानिकृ
ष्टायकन्यानदातव्येतिमत्वा॥सुतरांइतरशाखिनेकंन्यानदीयते॥अतएव॥तैरपि॥अन्यशाखि
भिः॥स्वश्रेष्ठ्याभिमानवद्भिः॥किमर्थंकन्यादेयेति॥तैरपिनदीयते॥एवंयजनयाजनश्राद्धनिमं
त्रणादिषुतु॥यथाकन्यातथाहविरितिनियमात्॥यैःसहायोनिसंबंधस्तएवपरशाखीयाइतिव
चनमनुसृत्यतैःसहयजनादिव्यवहारंनकृतवंतः॥अध्ययनाध्यापनंतुवेदांतश्रवणार्थेअवश्यकर्त
व्यासंपादनीयमिति॥कृत्वावाजसनेयिब्राम्हणनिकटेइतरशाखिनःसर्वेपि॥ईशावास्यबृहदारण्य
जाबालादिउपनिषदध्ययनंयथेष्ठंकुर्वंति॥क्वचित्स्मार्तेकर्मणिजातकर्मादिक्रियाओर्ध्वदेहिक
क्रियाश्राद्धादिकंचबहुशोकारयंति॥स्वयमपि॥तैःसहकुर्वंति॥श्रौतेकर्मणितु॥अत्यल्पत्वात्संख्य
याव्यवहारोभवत्येव॥एतेपि॥वाजसनेयिनः॥तेषांनिकटेऋक्सामाथर्वादिशाखागतकांडोद्योग्यमु

डक ऐतरेयाद्युपनिषदध्ययनतैत्तिरीयगतश्रीरुद्राध्ययनंचकुर्वंति॥ एवंपरस्परस्पर्धावत्त्वेनद्वौ
भागौजातौ॥प्रथमशाखिनएवएकोभागः‍अन्येऋक्शाखिनःतैत्तिरीयाःसामगाश्चएकोभागइ
तिहेतोः॥परंस्परस्पर्धाविशिष्टत्वेनयजनयाजनकंन्यादानकन्याप्रतिग्रहादिव्यवहारःक्रमेणन
ष्टोभवत्॥एतावदेव॥कारणं॥अन्यत्॥शास्त्रलौकिकादिकारणंनज्ञायते॥अन्यत्कारणमस्तीतिचे
त्॥तद्येवोच्यतां॥अपिच॥एतेद्राविडाः॥महाराष्ट्राः॥कर्नाटकाः॥आंध्राः॥एतेद्राविडानांमध्ये॥व
डमाः॥बृहच्चरणाः॥आंध्राणांमध्येएते॥तेलुघाण्याः॥मुरकनाटाः॥कर्नाटकानांमध्येबडगनाटक
र्नाटकाः॥व्हसळनाटकर्नाटकाः॥महाराष्ट्राणांमध्ये॥एतेदेशस्थाः॥एतेकराडाः॥इत्यादिवत्॥एता
दृशप्राकृतलौकिकसांकेतिकसंज्ञाविशिष्टव्यवहारंविहाय॥सर्वदेशेषुएतेकेइति॥पृष्टे॥एतेप्रथम
शाखिनः॥इत्येवमात्रमेववदंति॥ननु॥पूर्वोक्तवत्॥अन्यसांकेतिकजातिविशिष्टत्वेनवदंति॥एतत्
किंकारणं॥लोकरूढत्वं॥इतित्वयापृष्टंखलु॥एतादृशव्यवहारःपूर्वोक्तप्रकारेणप्रथमशाखिनांस्वोत्कृष्ट

त्वनिमित्तकः प्रवृत्तः॥ इत्यवगम्यते॥ अत एव॥ लोकवैलक्षण्यज्ञापनार्थं॥ एते प्रथमशाखिनः॥ इत्युक्ते
स्तेषां सर्वश्रेष्ठत्वाभिमानिनः॥ एते इति॥ ज्ञापनार्थं॥ अन्यैः सर्वशाखिभिः परिहासाभिप्रायसूचकत्वेन प्र
वृत्तरीत्या प्रथमशाखिभागभिन्नभागप्रविष्टैः ऋगादिसर्वशाखिभिरपि अभिल ष्यते॥ किंच प्रथम
शाखाप्रविष्टजनाः लोके सर्वत्र स्वल्पसंख्याका वर्तते॥ तदितरऋगादिशाखाप्रविष्टाः॥ जनाः बहु
संख्याका वर्तते॥ एतेषां स्वश्रेष्ठत्वाभिमानं दृष्ट्वा अन्ये सर्वेपि शाखिनः एकपक्षमाश्रित्य एतेषां श्रेष्ठ
त्वाभिमानभंगः कर्तव्य इति असूयादिना सर्वेपि संघीभूय एतेषामेव निकृष्टत्वं आपादनीयमिति॥ प्र
थमशाखिनः इति स्वव्यूहात्॥ बहिष्कृत्य निराकरणार्थं दूषितुं प्रवृत्ताः॥ एतत्पक्षे अल्पसंख्याका अपि
विद्वत्तादिकं कर्मानुष्ठानं चेत्यादियोग्यतासंपादनं अर्वाचीनार्वाचीनकालेषु बहुदेशेषु क्षीणत्वं प्रा
प्य उत्सन्नमभूत्॥ इतरपक्षे तु॥ अधिकसंख्याकाः जनाः आसन्॥ ततः॥ विद्वत्ताकर्मानुष्ठानादियो
ग्यताप्रापकं च साधनं दिनदिनेषु अधिकतयाधिकतया वृद्धिं प्राप्तं॥ तस्मात्॥ बहुजनविरोधेन श्रे

ष्ठत्वाभिमानेनच॥ प्रायेणयोग्यताक्षयेनच॥ स्वेषांश्रेष्ठत्वं॥ अपहायनिकृष्टत्वमेवप्राप्तवंतः॥ यथालो
केअधिकद्रव्यसंपादनार्थंदेशांतरंगतः॥ स्वनिकटस्थितद्रव्याणिचोरादिभ्योदत्वा॥ तैःताडितःस
न्॥ अंगहीनत्वंप्राप्तः इतिवत्॥ वस्तुतःसर्वेषांब्राम्हणानां॥ सर्वेषांवेदानां॥ सर्वासांशाखानांसमा
नत्वमेवशास्त्रेःप्रतिपाद्यते॥ तद्विहायस्ववेदस्वस्वशाखायाःस्वशाखीयब्राम्हणानांचसर्वेभ्यःस्वेषां
श्रेष्ठत्वं॥ प्राप्तुंप्रवृत्ताः॥ निकृष्टत्वंप्राप्ताः॥ सर्वसमताबुध्धिःएतेषांस्थिताचेत्ईदृशीअवस्थांनप्राप्नु
युः॥ अतएवआदित्यपुराणादिप्रथमशाखामाहात्म्यंप्रतिपादकग्रंथविरोधित्वेनकैश्चित्प्रतिपक्षि
भिःकालिकाखंडाख्यग्रंथस्थवाक्यंकल्पितमिति॥ केचिद्वदंति॥ ननु॥ एतद्वृत्तांतंसर्वंत्वयाकथंज्ञातं
इतिचेत्॥ उच्यते॥ काशीरामेश्वरपर्यंतंबङ्गदेशेषु॥ अस्माभिश्चद्विवारंसंचारःकृतः॥ तदानींतत्र
तत्रग्रंथादिकंदृष्ट्वासर्वशाखाप्रविष्टजनैःसह॥ व्यवहारंकृत्वातत्रतत्रदर्शनेनप्राचीनपरंपरयाप्रा
प्तआख्यानश्रवणेनतर्कादिनाच॥ किंचित्किंचित्ज्ञातंवर्तते॥ शास्त्रेलोकेपिकस्मिन्श्चित्विषयेप्रमा

णांतरैः अनिश्चिते इतरशास्त्र इतरलौकिक व्यवहाराविरोधेन लिंगादिसंभावनाविषयत्वेन च॥ यद्यत्कृ
तंतद्ग्राह्यमेवेति॥ सर्वैरंगीक्रियते॥ यथा लोके देशांतरात्॥ देशांतरं आगतः कश्चित् ब्राम्हणः तं प्रति॥
एतद्देशीय ब्राम्हणः त्वं क इति प्रश्नं करोति॥ स तु ब्राम्हणः एतादृशदेशस्थः ऋग्वेदी काश्यपगोत्रः इत्या
द्युत्तरं ददाति॥ तत्र तदर्थे किं प्रमाणं वक्तव्यं प्रत्यक्षादीनां॥ असंभवात्॥ तत्र तद्वाक्यमेव प्रमाणमिति प
रिगृह्य॥ तत्संभावना विचारेण पूर्वापरसंगत्या च॥ तर्करूप ऊहेन च चिन्हादिभिश्च संभावनां संपाद्य॥ अ
यं ब्राम्हण एवेति निश्चयः॥ क्रियते॥ अन्यथा॥ देशांतरस्थस्य देशांतरादागत ब्राम्हणविषयक ब्राम्हण
त्वनिश्चयरूप ज्ञानं कथं जायेत॥ तस्मात्॥ शाब्दप्रमाणानुरोधेन॥ युक्त्यादिना चालोच्य॥ शब्दैकगम्योऽर्थः॥
निश्चितो भवेत्॥ तद्वत्॥ अत्रापि॥ बहुकाल व्यवधानेन॥ बहुदेशस्थितानादिव्यवहारस्य॥ शाब्दज्ञा
नविषयत्वं विना॥ प्रत्यक्षज्ञानासंभवात्॥ शाब्दमेव प्रमाणत्वेन गृहीत्वा॥ लिंगाद्यनुसारेण॥ अर्थनिश्च
यः॥ कर्तव्यः स्यात्॥ एतादृशास्मत्कृताख्यायिकानुरोधेन॥ संभावनादिकं आलोच्य॥ कृतनिश्चयस्य॥

अन्यप्रमाणबाधासंभवात्॥ अयमेवार्थः निश्चेतव्यः स्यात्॥ अन्यथा॥ अन्येन॥ वादिना॥ अस्मदु
क्तविरोधित्वेन॥ पदार्थनिश्चयं॥ प्रतिप्रमाणानां सर्वसंमतानां॥ बलीयस्त्वं त्वया साधनीयं भवेत्॥
तत्साधनविषये॥ आख्यायिकालिंगादिहेतुभिः निश्चयो भवितव्यः॥ तत्रापि अस्मदुक्त सजातीयत
येवत्वया वक्तव्यं भवेद्यदि॥ तथासति तव मम च एतद्विषये समः समाचार इति आवयोः तुल्यन्याय
एव आपतेत्॥ वेदांतमीमांसाकर्तृव्यासेन ब्रम्हसूत्रेषु तत्र तत्र सांख्यकणादादिप्रतिपक्षमत
निराकरणप्रस्तावेषु स्वपक्षदोषाश्च॥ इति सूत्रैः॥ परवादिनं प्रति॥ मम मतो परि यादृशदोषः त्व
या उद्भाव्यते॥ तादृशदोषः तव मतपक्षेपि सिध्य एव इति॥ सूत्रितस्य भाष्यकारभगवत्पादैः॥ तत्त
न्मतदोषः सर्वोपि॥ तत्तत्सूत्रभाष्येषु समीचीनतया प्रकटीकृतः॥ एवमत्रापि॥ अस्मदुक्त अख्यायि
कादिषु त्वया ये ये दोषाः उद्भाव्यंते॥ तादृशदोषान् त्वत्पक्षेपि प्रदर्शयिष्यामः॥ एतदपेक्षया अधिकत
याख्यायिकालिंगादिप्रमाणैः॥ अनादिकालप्राप्त बहुव्यवहितादृष्ट बहुदेशस्थित व्यवहारस्य

त्वयाप्रदर्शनीयत्वप्रसंगः॥ द्वयोरएवभवति॥ तथा॥ असंदिग्धतयान्याययुक्तत्वेनसर्वजनसंमतत्वे
नच॥ त्वयासाधितंचेत्॥ तदा॥ त्वयोक्तमेवाभ्युपगच्छामः॥ ननु॥ प्रथमशाखायोःज्येष्ठत्वेनउत्कृ
ष्टत्वं इतिज्ञात्वातेषांउत्कृष्टत्वाभिमानेन॥ एवंसर्वजातमितित्वयाप्रतिपादितं॥ यजुर्वेदांतर्गत
अवांतरभागयोः॥ मध्ये द्वितीयभागापेक्षया अन्यभागात्मकशाखायाः॥ प्रथमत्वेनज्येष्ठत्वंश्रेष्ठत्वं
आगतमितिकृत्वातेषांश्रेष्ठत्वाभिमानेनइतरैःसहद्वेषोलब्धः॥ इतिवक्तुंशक्यते॥ तद्विहाय॥ ऋक्
सामादिशाखापेक्षया॥ वाजसनेयिनांप्रथमत्वंश्रेष्ठत्वंचनायातं॥ तैःसहविरोधःकिमर्थंप्राप्तः॥ तेषां
सर्वेषांसंघीभूयएतद्द्वेषंकर्तुंकोवाहेतुः॥ इत्यस्माभिःपृच्छ्यते॥ एतस्यउत्तरंत्वयादातव्यं॥ इतिचेत्सत्यं
यद्यपित्वयोक्तप्रकारेणयजुर्वेदगतभागद्वयरूपशाखयोर्मध्येएवप्रथमशाखित्वं॥ ज्येष्ठत्वंश्रेष्ठत्वंच
एतेषांसंभवति॥ तथापि॥ याज्ञवल्क्यस्य॥ बृहदारण्यतद्भाष्यतव्याख्यानपंचदशीप्रकरणादिकर्तृ
भिः॥ श्रुतिशंकराचार्यविद्यारण्यादिभिः॥ पुराणभारतादिप्रमाणग्रंथैश्च॥ ज्येष्ठत्वंश्रेष्ठत्वं॥ ब्रह्म वि

द्वरिष्ठत्वं॥इत्यादिकं॥माहात्म्यंप्रतिपादितं॥तच्छिष्यपरंपरया॥तत्पुत्रयोत्रादिवत्॥स्वेषामपिश्रे
ष्ठत्वमायातं॥नास्याब्रम्हविद्कुलेभवतीत्यादिश्रुतिभ्यः॥शिष्याणामपिविद्यातस्तंजनयति॥तच्छ्रेष्ठंजन्म
शरीरमेवमातापितरौजनयतः॥इति॥आपस्तंबस्मृत्या वंशब्राम्हणोक्तरीत्याच॥पुत्रपरंपरायाः॥शिष्यप
रंपरायाश्च॥तद्वंशजत्वेन॥शंकराचार्यशिष्यपरंपरायाः॥शृंगेरीपीठक्रमगतायाइवश्रेष्ठत्वंतन्माहा
त्म्यसंबंधित्वं॥स्वेषामपि॥क्रमादागतं॥एथक्तयाच॥ऐदंपर्येणस्वशाखिब्राम्हणानांआदित्यपुराणो
क्तश्रेष्ठत्वंच॥स्वेषामागतमितिभ्रांत्यातेत्तिरीयापेक्षयाश्रेष्ठत्वंविनापि॥ऋगादिसर्वशाखिभ्योपि
सोपनिषद्रक्तरीत्याब्रम्हज्ञानसाधनवत्वेनब्रम्हविद्वरिष्ठयाज्ञवल्क्यवंशीयत्वेनचश्रेष्ठत्वमागतमितिकृ
त्वासर्वश्रेष्ठत्वाभिमानेन॥सर्वब्राम्हणसंबंधिद्वेषप्राप्तवंतः॥अतोपिहेतोः॥सर्वेतरशाखिब्राम्हणद्वे
षद्वारा॥ईदृशीअवस्थाप्राप्ता॥वस्तुतःसर्वेषांब्राम्हणानांसमत्वज्ञानमात्रेस्थितेतोएतादृशव्यवहारः॥
अलभ्यएवभवेत्॥यत्तुद्राविडानांमध्येअयंवडमः॥अयंकृष्टहत्वरणः॥महाराष्ट्राणांमध्येअयंदेशस्थ

अयंकराडः॥इत्यादिवत्॥प्रथमशाखिनां अवांतरजातिभेदाः न संतीतित्वयोक्तं॥तत्र॥तत्र अनेकदे
शसंचाराभावप्रयुक्त अज्ञानविजृंभितंभ्रांतिज्ञानमेव॥अस्माभिस्तु॥प्रायेण॥काशीरामेश्वरादिसंचारः
द्विराष्ट्रस्याकृतः॥बहुशो लोकव्यवहारो दृष्टः॥सर्वदेशेष्वपि प्रथमशाखिब्राम्हणेषु॥तत्तद्देशस्थिते
षु॥अयंद्राविडः॥अयंकर्नाटकः॥अयंमहाराष्ट्रः॥अयमुत्कलः॥अयंगौडः॥अयंघूर्जरः॥अयमांध्रः॥इ
त्यादिबहवो अवांतरभेदाः संति॥तेषामपि अवांतरभिन्नानां परस्परकन्याग्रहण॥कन्यादानभोजन
प्रतिभोजनश्राद्धनिमंत्रण॥यजनयाजनादिकं च प्रायेण नास्त्येव॥अपिच॥देशभाषाद्याचारादिकं च।
भिन्नभिन्नतया वर्तते॥अतः प्रथमशाखिनामपि त्वदुक्तदृष्टांतेन समतया प्रथमशाखिनामपि॥अ
वांतरजात्यादिभेदाः वर्तत एव॥ किंच॥यथावा॥बंगाल नामक वंगदेशब्राम्हणानां मध्ये॥कुलीनाइ
ति॥तेभ्य एव सर्वब्राम्हणकन्याः दातव्या इति॥मलयालाख्य केरलदेशे नंबूरीब्राम्हणा इति त एव श्रे
ष्ठाः तेषामेव कन्या दातव्याः॥इति संकेतानुसारेण तेषां सर्वश्रेष्ठत्वानं भवति॥एवं कर्नाटकदेशे॥द्रा

विडविशेषाःसंकेतिब्राम्हणाइतिस्वस्वसंकेतानुसारेणस्वव्यूहएव॥कन्यादानग्रहणश्राद्धनिमंत्रण
यजनयाजनादिबहून्व्यवहारान्कुर्वंति।।एवमेवतत्रतत्रक्वचित्क्वचित्देशेषु।।महाराष्ट्रदेशे
कोंकणस्थकरहाडाद्यपेक्षया॥देशस्थाश्रेष्ठाइति॥आंध्रदेशेनियोगिव्यापारि।।ब्राम्हणापेक्षया
वेलनाडादिसांकेतिकवैदिकब्राम्हणाःश्रेष्ठाइति॥द्राविडदेशेबृहच्चरणाद्यपेक्षयावडमाश्रेष्ठाइ
ति॥कर्नाटकदेशेइतरापेक्षयाव्हैसलकर्नाटकाःश्रेष्ठाइति॥मन्यमानाः॥स्वस्वव्यूहएव॥कन्या
दानग्रहणादिबहून्व्यवहारान्कुर्वंति॥एतावन्मात्रेणकेषांचिद्ब्राम्हणानांन्यूनता॥केषांचित्॥श्रै
ष्ठ्यमितिवक्तुंनशक्यते॥असूयाभिमानादिदोषेणपरस्परंनिंदंति॥श्रुतिस्मृतिइतिहासपुराणादि
षुब्राम्हणाःसर्वेपिपूज्याःतेषांमध्येश्रोत्रियाःतेषामपिज्ञातारःतेषामपिअनुष्ठातारःश्रुतिस्मृतीतिहासपुराणादि
थासंभवंयथायोग्यं।कन्या॥भू॥गो॥हिरण्यादिकंदेयं॥अन्येभ्यःनदेयं॥तेभ्योदानेप्रत्यवायाप
त्तिः॥इतिप्रतिपाद्यते॥तथाचमनुः॥प्रथमाध्याये॥भूतानांप्राणिनःश्रेष्ठाःप्राणिनांबुद्धिजीविनः॥

बुध्दिमत्सु नराश्रेष्ठा नरेषु ब्राम्हणाः स्मृता इति ॥ ९६ ॥ कन्यादाने तु ॥ प्रवरगोत्रादि प्रवरखंडोक्तानु
सारेण विरोधाविरोधं दृष्ट्वा दातव्यमिति प्रतिपाद्यते ॥ नतु कर्नाटक द्राविड महाराष्ट्र घूर्जर आंध्रादि भेद
क्रमं दृष्ट्वा दातव्यमिति चोच्यते ॥ तत्कारणं विहाय प्राकृतलोकिकसंकेतं कृत्वा ॥ वयं श्रेष्ठाः ॥ यूयं निकृष्टा
इत्यादिना विवदमानाः स्वव्यूह एव व्यवहारं कुर्वंतः वर्तते ॥ अपि च ॥ पंचगौडानां ॥ सारस्वताः कान्य
कुब्जाः गौडा मैथिल उत्कलाः ॥ पंचगौडा इति ख्याता विंध्यस्योत्तरवासिनः ॥ आंध्र द्राविड कर्नाटाः म
हाराष्ट्राश्च घूर्जराः ॥ द्राविडाः पंच एवैते विंध्यदक्षिणवासिनः ॥ इत्युक्त प्रकारेण ॥ पंचद्राविडानां पंच
गौडानां च परस्पर भोजन प्रतिभोजन कन्यादान ग्रहण यजन याजनादिकं न भवति ॥ प्रस्तुत पंचद्राविडांतर्भूत घू
र्जराणां इतर द्राविडानां च भोजन प्रतिभोजनादिकं किमपि नास्तीति प्रसिध्दिरस्ति ॥ एतावन्मात्रेण के
षांचिद्ब्राम्हणानां न्यूनता ॥ केषांचिद्ब्राम्हणानां श्रेष्ठमिति ॥ ब्रम्हणा ॥ विष्णुना ॥ ईश्वरेण वा ॥ वक्तुं नि
श्चेतुं वा न शक्यते ॥ ब्राम्हणो वै सर्वा देवता इति ॥ यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राम्हणे वसंतीति

ऋग्वेदोयजुर्वेदःसामवेदअथर्ववेदाइति॥सर्वेषांवेदानांसमत्वमेवश्रुत्याप्रतिपाद्यते॥नूच॥याज्ञ
वल्क्यस्यब्रम्हविल्वेसर्वश्रेष्ठेचपरंपरयातच्छाखोपशाखिनांइदानींतनानांब्राम्हणानांकर्मानुष्ठान
ज्ञानरहितानांश्रेष्ठ्यंकथमायास्यतीतिवाच्यं॥लोकेशास्त्रेचसद्वंशोत्पन्नानांसद्गुरुशिष्याणांच॥त
त्प्रयुक्तश्रेष्ठ्यमायास्यत्येवशास्त्रेलोकेच॥एतेकुलीनाः॥एतेअनूचानाः॥एतेसद्वंशोत्पन्नाः॥एतेश्रोत्रि
योत्पन्नाः॥एतेशास्त्रिणः॥पुत्राः॥इयंराजभार्या॥श्रोत्रियपत्नीइत्यादिव्यवहारानुसारेणतेषांश्रेष्ठ्यं
दृश्यतएव॥मनुयाज्ञवल्क्यपराशरादिस्मृतिषु॥आपस्तंबादिसूत्रेषुतद्व्याख्यानुरूपमेधातिथीयवि
ज्ञानेश्वरीयमाधवीयादिषुच॥श्राद्धनिमंत्रणादिकेषुचित्॥श्रेष्ठकर्मसुश्रोत्रियपुत्रस्यस्वयमश्रोत्रिय
स्यैवग्राह्यत्वं॥अश्रोत्रियपुत्रस्यस्वयंश्रोत्रियस्यापित्याज्यत्वमित्यर्थः॥प्रतीयते॥ तथाचमनुमूलं
तृतीयाध्याये॥अश्रोत्रियःपितायस्यपुत्रस्याद्वेदपारगः॥अश्रोत्रियोवापुत्रस्यात्पितास्याद्वेदपारगः॥
॥१३६॥ अस्यव्याख्यानं ॥अश्रोत्रियइतिस्वयमश्रोत्रियःमपित्कः॥स्वयंतुश्रोत्रियः॥यःश्रोत्रियपि

तृकः स्वयंवा अश्रोत्रियः ॥१३६॥ तृतीयाध्यायेमूलं ॥ज्यायांसमनयोर्विद्याद्यस्यस्याच्छ्रोत्रियः
पिता ॥मंत्रसंपूजनार्थंतु सत्कारमितरोर्हति ॥१३७॥ अस्यव्याख्यानं ॥तयोःकश्रेष्ठइत्युपन्यस्या
विशेषमाह ॥ज्यायांसमिति ॥अनयोःपूर्वश्लोकनिर्दिष्टयोर्मध्ये श्रोत्रियपुत्रंस्वयमश्रोत्रियमपिज्येष्ठं
जानीयादिति ॥श्रेष्ठमित्यर्थः ॥१३७॥तस्मात्श्रेष्ठसंबंधेन श्रेष्ठत्वं ॥आयास्यत्येव ॥यथावा ॥गंगोद
कसंबंधात् ॥रथ्योदकस्यापि ॥गंगात्वप्राप्तिर्भवति ॥अग्निसंयोगात्लोहस्यापि ॥दाहकत्वप्रका
शत्वप्राप्तिः ॥पुष्पसंयोगात् ॥तैलस्यगंधवत्वप्राप्तिः ॥स्वर्णसंयोगात्ताम्ररजतादेरपिस्वर्णप्रतीति
विषयत्वप्राप्तिः ॥एवंयाज्ञवल्क्यादिमहानुभावशिष्यप्रशिष्यपरंपरयायथासंभवश्रेष्ठत्वप्राप्तिः ॥वक्त
व्यं ॥अन्यथा ॥तवकालिकाखंडवाक्यबलात् ॥याज्ञवल्क्यादीनांशापप्रयुक्तचंडालत्वप्राप्त्यात्तच्छा
खिनांसर्वेषामपि ॥अत्यंतायोग्यत्वंयथा ॥त्वयोच्यते ॥तथैव ॥याज्ञवल्क्यश्रेष्ठत्वद्वारा तच्छाखिनांश्रे
ष्ठत्वं ॥नायास्यतीत्यत्रकोवान्यायः ॥लोकेकस्यचित्पुरुषस्य ॥पितृकृतऋणापकरणअधिकारःसंभवति

पितृसंपादितद्रव्यभोगे॥ अधिकारोनास्तीति॥ कश्चनन्यायोभवतिकिं॥ तथैवयाज्ञवल्क्यश्रेष्ठद्वारा तद्वारिवनामपिसर्वेषांयथासंभवंश्रेष्ठंआयास्यत्येवेतिन्यायतः॥ अंगीकरणीयंभवेदेव॥ लोकेपिअ स्मिन्कालेसर्वैरपिसर्वजातिषु॥ सर्वदेशेषु॥ सर्वमनुष्यमात्रेषु॥ परस्परंदूषणादिकंक्रियतएव॥ त थाचविद्यारण्यकृतजीवन्मुक्तिप्रकरणे॥ विद्यारण्याचार्यैरेव॥ अयमर्थःप्रदर्शितः॥ तथाहि॥ जीवन्मु क्तिप्रकरणे॥ प्राप्तप्राप्तैश्रूयते॥ अभयंवैजनकप्राप्तोसीति॥ तस्मात्तत्सर्वमभवदिति॥ ब्रह्मवेदब्रह्मैवभ वतीतिच॥ तथादेशविशेषेण॥ परस्परनिंदाबाहुल्यमुपलभ्यते॥ दाक्षिणात्यैर्विप्रैरौत्तरीया॥ अवेदवि दोमांसभक्षिणोविप्रानिंद्यंते॥ औत्तरीयैश्च॥ मातुलसुतोद्वाहिनोयात्रासुमृद्भांडवाहिनो॥ दाक्षिणात्या निंद्यंते॥ बह्वृचाःआश्वलायनशाखीयाकाण्वशाखीयानप्रशस्तान्॥ मन्यंते॥ वाजसनेयिनस्तुवैपरीत्ये न एवंस्वस्वकुलगोत्रबंधुवर्गेषुस्वशाखास्वकीयदेवतादिप्रशंसा॥ परकीयनिंदाच॥ आविद्वदंगनागोपा लंसर्वत्रप्रसिद्धा॥ एतदेवाभिप्रेत्योक्तं॥ शुचिःपिशाचोविचलोविलक्षणःक्षमीप्यशक्तोबलवांश्चदुष्टः॥

निश्चिंतचोरः सुभगोपि कामी कोलोकमाराधयितुं समर्थः॥ इति विद्यते॥ न खलु कश्चिदुपायः सर्वलोक
परितोषकरो यः॥ सर्वथा स्वहितमाचरणीयं॥ किं करिष्यति जनो बहुजाल्पः इति चेत्युक्तं॥ इतः सहस्र
संवत्सरात्प्रागेव कलेः अल्पकाले विद्यारण्यैरेव सद्भाव दशायां एवं परस्परनिंदा सर्वत्र वर्तत इति॥ उक्तो
सत्यां॥ कलेः॥ बहुकालानंतरमावि॥ एतस्मिन्काले सर्वदेशेषु॥ सर्वजनेषु॥ परस्परं सर्वैः॥ स्वस्वाभिमा
नेन॥ अन्योन्यदूषणंउपलभ्यत इति किमुवक्तव्यं॥ ननु॥ जीवन्मुक्तिप्रकरणे॥ उदाहृत विद्यारण्यवाक्यैः
बह्वृचाः आश्वलायनाः॥ काण्वशाखीयान्प्रशस्तान्मन्यंते॥ इत्युक्तं॥ तत्र न्यायतः॥ विचार्यमाणे तैत्तिरी
याः काण्वशाखीयान्दूषयंतीति वक्तुं शक्यते॥ प्रथमशाखा द्वितीयशाखादिन्यायेन परस्परज्येष्ठकनिष्ठ
भावेन एकवेदप्रभवत्वात्॥ सपत्नीन्यायेन च दूषणं संभवति॥ परस्परासूयादिमत्त्वात्॥ तयोः तद्विहाय
आश्वलायनशाखीयाः काण्वशाखीयान्दूषयंतीत्यत्र को वा हेतुः॥ अथवा आश्वलायनाः आपस्तंबबोधाय
नसामग अथर्वणिकान्दूषयंतीत्यपि वक्तुं संभाव्यते॥ तद्विहाय एतानेव प्रथमशाखिनः बह्वृचाः दूषयंतीति

केनाभिप्रायेणोक्तं॥ इति चेद्यदि॥ एकवेदप्रविष्टत्वेन प्रथमशाखाद्वितीयशाखाभिधानेन॥ प्रथमशा-
खिनः उत्कृष्टत्वं॥ तैत्तिरीयशाखिनः द्वितीयत्वेन कनिष्ठत्वात्॥ निकृष्टत्वं प्राप्यत इत्यभिप्रायेण इदं दूषण
प्रवृत्तं चेत्॥ तदानीं त्वयोक्तप्रकारेण॥ तैत्तिरीयवाजसनेयिनोरेव परस्परदूषणं प्रवर्तयितव्यं भवेत्॥
अथवा सामाथर्वणशाखिनां॥ ऋक्शाखिनां च परस्परं॥ एकधर्मावच्छेदेन समानत्वप्राप्यतायां॥
परस्परासूयादिना॥ परस्परदूषणं भवितव्यं न तथाभिप्रायेण॥ पूर्वोक्तमिदं दूषणं प्रवृत्तं॥ किंतु पू-
र्वोक्तन्यायप्रकारेण प्रथमशाखायाः अन्वर्थनामधेयवत्त्वेन प्रथमत्वं॥ साधितं॥ तद्रीत्या लोकेपि॥ सा-
मान्यतयैव प्रथमशाखिन इति॥ सर्वदेशेषु॥ प्रथमशाखिन इत्येव किमर्थं व्यवहारः क्रियत इ-
ति॥ अस्मात्प्रति त्वया कृतप्रश्नानुरूपेणापि॥ योगरूढ्युभयप्रयोगबलादपि॥ आदित्यपंकजश-
ब्दवत्॥ वाजसनेयिनः॥ वयमेव प्रथमशाखिनः॥ पूर्वोक्तरीत्या प्रथमशब्दस्य॥ ज्येष्ठ श्रेष्ठः परत्वे-
न॥ निश्चितत्वात्॥ वयमेव श्रेष्ठशाखिनः॥ अत एव जीवन्मुक्तिप्रकरणे॥ अस्मन्मूलशाखाप्रवर्ती

कस्ययाज्ञवल्क्यस्यमाहात्म्यं॥बृहदारण्यश्रुत्युक्तमेव॥विद्यारण्यगुरुभिःप्रकटीकृतं॥तथाहि॥जी
वन्मुक्तिप्रकरणे॥नन्विसुपक्रम्यकांश्चिदर्थान्॥उपन्यस्य॥तदनंतरं॥स्वयंचक्रोधपरवशः॥शाक
ल्यं॥शापेनमारयामास॥नचास्यब्रम्हघ्नः॥मोक्षाभावःशंकनीयः॥कौषीतकिनःसमामनंति॥
नास्यकेनचकर्मणालोकोमीयते॥नामातृवधेन॥नपितृवधेन॥नस्तेयेन॥नभ्रूणहत्ययेति॥ मु
हाशेषोपि॥स्वकृतायां॥आर्यायां॥पंचाशीत्यामिदमाह॥हयमेधशतसहस्राण्यथकुरुते॥ब्र
म्हघातलक्षाणि॥परमार्थविन्नपुण्यैर्नचपापैःस्पृश्यतेविमलइति॥ याज्ञवल्क्यस्य॥शाकल्यह
नप्रयुक्तब्रम्हहत्यादोषोनास्तीत्युक्तं॥ततःब्रम्हहत्यादिकमेवनास्ति॥वैशंपायनेनदत्तशापस्य
ब्रम्हविदंयाज्ञवल्क्यंप्रतिआगमनशक्तिर्नास्तीतिकिमुवक्तव्यं॥तादृशब्रम्हविच्छाखाप्रविष्टानं
परंपरयातच्छिष्याणांतन्माहात्म्यात्॥अस्माकमपिश्रेष्ठ्यंसंभवत्येव॥तस्मात्॥वयमेवश्रेष्ठाइ
वदंति॥आश्वलायनानांतु॥वेदत्वजातिविशिष्टवेदमात्रस्यविष्णुपुराणोक्तआद्योवेदश्चतुष्पाद

इति॥भागवतोक्तपराशरात्सत्यवत्यामंशांशकलया विभुः॥अवतीर्णो महाभागो वेदं चक्रे चतुर्विध
मिति॥प्रमाणरीत्या च॥एकस्यैव वेदतरोः चतुर्भागरूपचतुःशाखानां मध्ये ऋग्वेदस्य प्रथमशाख
त्वात्॥वयं प्रथमशाखिनः॥इति तेषां अभिमानः॥तत एव प्रथमशब्दस्य ज्येष्ठत्व श्रेष्ठत्व विशिष्टप
रत्वात्॥वयं ज्येष्ठशाखिनः॥मनुनाप्युक्तं॥इत्वा लोकानपीमांस्त्रीनश्नंनपि यतस्ततः॥ऋग्वेदं धार
यन्विप्रो नैनः प्राप्नोति किंचन॥२६१॥ अत एव वयं श्रेष्ठा इति श्रेष्ठत्वाभिमानेन च॥परस्परासूया
दिना स्पर्धया परस्परदूषणं प्रवृत्तमिति वक्तुं उचितमेव भवति॥वस्तुतस्तु पूर्वोक्तरीत्या सर्वेपि केन
चित्प्रमाणेन कया वियुक्त्या केनचिद्दृष्टांतेन॥केनचित्स्वधर्मसामान्येन वा॥वयं श्रेष्ठा वयं श्रेष्ठा इति॥
परस्परं॥स्वमहात्म्यप्रकटनपूर्वकं अन्याननिंदयंतीति॥सर्वलोकानुभवः सिद्ध एव॥न्यायतः वि
चार्यमाणे सर्वे ब्राम्हणाः समाना एव॥सर्वापि शाखाः समाना एव॥अतः प्रथमशाखिनः इत्युक्ते॥
पूर्वोक्तरीत्या यजुर्वेद॥रूपवृक्षस्य॥द्वे शाखे॥तयोः प्रथमशाखा॥वाजसनेयिभिः प्राप्ता॥अन्या तु॥

तैत्तिरीयैः प्राप्ता॥ततः पूर्वोक्तरीत्या॥तस्याः प्रथमत्वं प्राप्तं॥यौगिकेनैव शब्देन॥प्रथमतः प्राप्तत्व
हेतुना च॥प्रथमशाखेति रूढिरपि॥सर्वत्र वर्तते॥पंकजादित्यादिशब्दवत्॥योगरूढयैव॥वाज
सनेयिनामेव॥वर्तते॥तथा लोके॥सर्वत्र व्यवह्रीयते च॥न च तथासति॥यजुः प्रथमशाखेति व्यव
हारः॥किमर्थं न प्रवृत्तः॥इति वाच्यं॥लोके सर्वेषामपि शब्दानां किमर्थमेव प्रवृत्तिः॥जातेति विचार्य
माणे॥भिन्नभिन्नपदार्थबोधनायेति॥निश्चीयते॥लक्षणया वा॥शक्त्या वा गौण्या वा वृत्त्या॥परस्य अर्थ
ज्ञाने जाते॥तस्य युक्तप्रवृत्तिः निवृत्तिश्च भवत्येव॥इति हेतोः अर्थज्ञापकत्वमेव॥शब्दस्य प्रयोजनं॥
यत्किंचिच्छब्दश्रवणमात्रेण॥वक्तृतात्पर्यार्थज्ञानं श्रोतुः॥उत्पन्नं चेत्॥तावन्मात्रशब्दस्यैव तज्ज्ञाने
पर्यवसानं भवति॥तद्यथा॥सिंह इति शब्दस्य॥शक्त्या केसरादिवन्मुख्यसिंहे॥सिंहज्ञानं जायते
सिंहो देवदत्त इति शब्दस्य॥गौण्या वृत्त्या॥देवदत्ते क्रौर्यशौर्यादिगुणयत्त्वज्ञानं जायते॥गंगायां
घोष इत्यत्र गंगाशब्देन लक्षणावृत्त्या गंगातीरे तज्ज्ञानं जायते॥शब्दश्रवणं विनापि हस्तनेत्रादि

सांकेतिकाभिनयज्ञानेनैव॥ विदव्यभिचारिण्योःसूकेतरयोश्च परस्परं॥ उभयविवक्षितार्थ
ज्ञानंजायते॥ इतिलोकानुभवरीक्षा॥ यजुर्वेदादिविशेषणंविनैवप्रथमशाखशब्दश्रवणमात्रेण
बहुकालबहुदेशबहुजनव्यवहारवासनादार्ढ्यबलादेव॥ तत्संकेतज्ञानवतां॥ सर्वेषामपि
वाजसनेयिनामेवप्रथमशाखित्वमित्याकारकज्ञानंजायतएवेति॥ किमाश्चर्यं॥ लोकेनामैक
देशग्रहणेनापिवक्तृविवक्षानुरोधेनतन्नामवदर्थज्ञानंजायतएवतद्यथा॥ भीमसेनःयमधर्म
राजःसुरगुरुःइत्यादिषु॥ भीमःयमःधर्मराजः॥ गुरुः॥ इत्यादि॥ नामैकदेशग्रहणेनापितन्नामा
भिधेयार्थज्ञानंजायतइत्यभिप्रायेणएकदेशशब्दप्रयोगोदृश्यते॥ शास्त्रेपि॥ ब्रम्हमीमांसा
यां॥ व्यासेनैवपाशुपतमतनिराकरणप्रस्तावे॥ पशुपतेःइतिवक्तव्ये॥ तद्विहायपत्युरसामंजस्या
दिति॥ सूत्रेणपशुपतिशब्दैकदेशस्यैवग्रहणंकृतं॥ तथालोकेपि॥ ग्रामाधिपतेः॥ एतद्ग्रामाधिप
तिरितिप्रयोगेकर्तव्यप्राप्ते॥ नामैकदेशस्य॥ अधिपतिरित्येवप्रयोगः॥ क्रियते॥ एतद्देशराजइति॥

शब्दप्रयोगे कर्तव्ये तन्नामैकदेशस्य अयं राजेति प्रयोगः क्रियते॥ यद्यपि॥ अनयोः शब्दयोः॥ सापेक्षकत्वं वर्तते॥ राजेत्युक्ते कस्य राजेति॥ आकांक्षा जायते अधिपतिरिति प्रयोगे कृते कस्याधिपतिरित्याकांक्षा जायते॥ तदनंतरं अस्य देशस्य राजा॥ अस्य ग्रामस्याधिपतिः॥ इति वक्तव्यं भवेत्॥ तथापि वक्तृश्रोतॄणां परस्परविवक्षाज्ञानस्य बहुव्यवहारवासनादार्ढ्येन रूढिवत्॥ शब्दैकदेशप्रयोगेणापि तदर्थबोधो जायते॥ तद्वदत्रापि प्रथमशाखिशब्दस्य सापेक्षत्वेन यजुर्वेदसंबंधिप्रथमशाखीति वक्तव्येपि तद्विहाय संबंधिशब्दप्रयोगं विनापि एकदेशभूतशब्दप्रयोगेणापि व्यवहाराभ्यासबलादेवमेवार्थः क्रोशंति॥ शोणो धावति॥ इत्यादि अजहल्लक्षणाप्रयोजकशब्दवत्॥ विवक्षितार्थज्ञानजनकसामर्थ्यं प्रथमशाखाशब्देपि वर्तत इति वक्तव्यं॥ भवेत्॥ यथा वैयाकरणैः॥ शब्दनिष्ठसामर्थ्यविशेष एव॥ शक्तिरित्युच्यते॥ तद्वदत्रापि॥ बहुव्यवहारवासनावासितसांकेतिकज्ञानप्रयोज्यतच्छब्द निष्ठतदर्थबोधकसामर्थ्यविशेषो वर्तत इत्यपि वक्तुं शक्यते॥ तस्मात्॥ न्यायतः॥ विचार्यमाणे॥ स

र्वेवेदसर्वब्राम्हणसर्वशाखानांसमानत्वेन॥सर्वशास्त्रप्रतिपाद्यमानत्वात्॥प्रथमशाखिनः॥इ
त्येतावन्मात्रशब्दप्रयोगेनापि॥यजुर्वेदगतप्रथमभागात्मकप्रथमशाखिनः॥इत्येवमर्थोबुध्यतए
व॥ अपिच॥याज्ञवल्क्यादीनांशापग्रस्तत्वेनचंडालत्वप्राप्तौ॥तच्छाखागतशतपथब्राम्हण॥तच्छा
खागतश्रौतसूत्रादिषुतेषामपिअग्न्याधानप्रभृतिसत्रयागांतसर्वश्रौतकर्मानुष्ठानस्य॥विधाना
त्॥तद्वेदभागस्यापिईशावास्यबृहदारण्यजाबालोपनिषदादितत्संहिताब्राम्हणानांइतरसर्वशा
खिभिःअवश्यकतयाअध्ययनस्यकर्तव्यत्वात्॥तद्भागस्यतदीयकल्पसूत्रगृह्यसूत्रादेःप्रमाण
त्वेनगृह्यमाणत्वाच्च॥तत्कर्मानुष्ठातारः॥केइति॥अस्माभिः॥उच्यते॥वाजसनेयिनः॥एवइतिचेत्
ऋग्भिःशंसंति॥यजुर्भिर्यजंति॥सामभिस्तुवंति॥ऋग्वेदेनहोताकरोति॥यजुर्वेदेनाध्वर्युः॥सामवे
देनोद्गाता॥सर्वैर्ब्रम्हा॥इतिविधानात्॥तेषांअध्वरभागस्य॥कर्मणःतद्वेदेनैवनिर्वाहेपि॥औद्गा
त्रभागहोतृभागादिकर्मणः॥ऋक्सामशाखादिब्राम्हणैर्विना॥कर्मनिर्वाहाभावात्॥तैःसह॥

अन्यशाखिभिः सोमपानादेः प्राप्यत्वात्॥ तेषामपि॥ एतद्याजकत्वेन॥ याजनाध्यापनाद्योध्ययनात् नि
सद्यः पतति नान्यथा॥ इति मनुस्मृतिवचनानुरोधेन॥ अयाज्ययाजयित्वात्तु॥ विप्रा[illegible]यां जायते किं
भिः॥ आसनाच्छयनाद्यानात्संभाषात्सहभोजनात्॥ संक्रामंतीह पापानि तैलबिंदुरिवांभसी॥
दि॥ पराशरमाधवीयादिवचनानुरोधेन च॥ तद्याजकानां॥ ऋत्विजां॥ अन्यशाखीयानां॥ ब्राम्हणा
नां चंडालसदृशत्वप्राप्तिप्रसंगः॥ क्वचिद्देशे क्वचित्काले वा॥ इतरशाखिनां संबंधियागप्रसक्तौ॥ तदा
नीं तैत्तिरीयशाखिनां॥ तत्रासत्वे ऋग्भिः॥ शंसति॥ यजुर्भिर्यजंति॥ इत्यादिसामान्यतः॥ यजुःशा
ब्देन आध्वरकर्मणः विधानात्॥ तदानीं प्रथमशाखिनां॥ वाजसनेयि ब्राम्हणानां॥ तत्रसत्वे॥ त
द्देदेन तत्कर्मनिर्वाहः॥ तैरेव कर्तव्यो वा॥ तद्याग एव॥ अनारंभणीयो वेति॥ त्वांप्रति वयं एव्कामः॥
तच्छाखिभिरेव निर्वाहः॥ कर्तव्य इति चेत्॥ पूर्वोक्तस्मृत्युक्तप्रकारेण तत्संपर्कात्॥ अन्यशाखिनाम
पि॥ तत्सदृशत्वप्राप्तिप्रसंगः॥ तद्यागः तदानीं॥ अनारंभणीय एवेति चेत्॥ यजुर्भिर्यजंतीति॥ यजुर्वे

दिनाध्वर्युरित्यादिप्रमाणेषुसामान्यतःयजुःशब्दप्रयोगात्॥ तैत्तिरीयाणामेव आध्वर्यवात्मकआर्त्विज्यं।
दातव्यमितिनियमः॥ कुत्रवर्तते॥ तथानियमांगीकारेतेषांवाजसनेयिनां॥ ब्राम्हणत्वमास्तु॥ तथा
त्वांगीकारेपितद्वेदोक्ततत्सूत्रोक्तकर्मणांअनुष्ठानं॥ केःकर्तव्यंभवेत्॥ तेषामेव वाजसनेयिनांम
ध्येपरस्परंहौत्रभागस्यऔद्गात्रभागस्यचाध्ययनंकृत्वायाज्ययाज्यकभावस्तैरेवसंपादनीयोभ
वतीतिचेत्॥ तदापिवाजसनेयब्राम्हणैःऋक्शाखिनांसामशाखिनांनिकटेहौत्रभागाध्ययनं
औद्गातृभागाध्ययनंचकर्तव्यंप्राप्तं॥ तथा॥ तच्छाखिनांएतदध्यापकत्वेतेषांपूर्वोक्तयाजनाध्या
पनादित्यादिमनुवचनाद्यनुसारेण॥ पुनः॥ ऋगादिशाखिनांचंडालसदृशत्वंप्राप्तमेवभवति॥ परं
परयातेष्वेवपरस्पराध्येतृत्वाध्यापकत्वांगीकारेपितत्परंपरायाःमूलभूतप्रथमाध्यापकानांपू
र्वोक्तदोषोदुर्वारएवभवति॥ अथचसर्वेषामपिचतुर्वेदाध्ययनविधानात्तैरपिऋग्वेदसामवेदा
ध्ययनस्यअनादिपरंपरयाप्राप्तत्वमस्तीतिचेत्सर्वब्राम्हणानामपिसर्वेशाखित्वेनसर्वशाखाध्य

॥

यनप्रयुक्तगुणदोषाःसर्वेषांसमानाएवभवंति॥तथासति वाजसनेयिनां॥दोषइतिवक्तुंनशक्य
ते॥अनुष्ठातारःकेपिनसंतीतिचेत्॥तद्वेदस्यतत्सूत्रस्यचाप्रामाण्यापत्त्यातेषांग्रंथानांमंत्रब्राम्ह
णकल्पसूत्रादीनांवेदत्वकल्पसूत्रत्वाद्यभावप्रसंगः॥तथात्वांगीकारेच॥तन्मंत्राणांशतपथास्
क॥तद्ब्राम्हणानांतच्छ्रौतसूत्रगृह्यसूत्रएतत्कृतस्मृत्यादीनांच॥आपस्तंबबोधायनगोतमपरा
शरव्यासमेधातिथ्यादिभिःऋषिभिःमन्वादिस्मृतिकर्तृभिः॥तत्तत्सूत्रव्याख्यातृभिः॥
प्राचीनउभयमीमांसासूत्रभाष्यवार्तिककारव्याख्याकारादिभिः॥धर्मशास्त्रनिबंधनकर्तृप्राचीन
मेधातिथिऋषिभट्टभास्करकुल्लूकभट्ट॥धूर्तस्वामिकपर्दिस्वामिशबरस्वामिहेमाद्रिविज्ञानेश्वर
माधवहरदत्तमिश्रादि॥बहुभिरभियुक्तैश्च॥स्वस्वश्रुतिसूत्रस्मृतिभाष्यादिग्रंथेषु॥सर्वकर्मसुप्रमा
णत्वेनउदाहृतत्वं॥अद्यापिप्रतीयमानंकथंसंभाव्येत॥तेषांअप्रामाण्यांगीकारेएतैःपूर्वोक्तैःश्रु
तिसूत्रभाष्यादिग्रंथैःवाजसनेयिग्रंथानांप्रमाणत्वेनकथंतद्ग्रंथजातंउदाह्रीयेत॥तदुदाहरण

नि

जातंउत्तरग्रंथेषु विस्तारतया प्रपंच्यते ॥ किंच ॥ कथंचित् ॥ यजुःशब्दस्य तैत्तिरीयपरत्वनयने प्र
माणाभावेपि तुष्यतु दुर्जन इति न्यायेन तवसंतोषार्थं अंगीकृतत्वेपि ॥ क्वचित् बोधायनीय क्वचित्
हिरण्यकेशीय क्वचित्सत्याषाडीय क्वचिदापस्तंबीयसूत्रप्रकारेणाध्वरप्रयोगः क्रियते ॥ तत्र अ
न्यतमसूत्रेण कृतेपि चारिताध्वर्योगीकारे तेषां तैत्तिरीयत्वसामान्यवत् ॥ वाजसनेयि शाखायाम
पि ॥ यजुर्वेदत्वसामान्यस्य विद्यमानत्वात् ॥ किमिति तेन वेदेनाध्वरकार्यनिर्वाहः न क्रियते ॥ अ
तः दोषाभावात् ॥ तथैव कर्तुमपि उचितं भवति ॥ शक्यते च ॥ अपिच ॥ तमेतं वेदानुवचनेन ब्राह्मणा
विविदिषंति ॥ यज्ञेन दानेन तपसानाशिकेनेत्यादि श्रुत्या ॥ तपो विद्या च विप्रस्य निश्रेयसकरं परं
तपसा कल्मषं हंति विद्ययामृतमश्नुते ॥ इति मनुवचनेन अत्र तपःशब्दः कर्मोपासनादिपरः ॥
वेदाभ्यासस्तपो ज्ञानं दानमिंद्रियसंयमः ॥ अहिंसा गुरुसेवा च निश्रेयसकरं परं ॥ सर्वेषामपि चैतेषां
आत्मज्ञानं परं स्मृतं ॥ इति मनुवचनेन ॥ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां ॥ अयं तु परमो

धर्मोयद्योगेनात्मदर्शनं॥ इति याज्ञवल्क्यस्मृत्या तदर्थमेतत्तपयेत॥ दिज्या ताभ्यामसौ पुण्य मुपैति विद्वान्॥ पुण्येन पापं विनिहत्य पश्चात्संजायते ज्ञानविदीपितात्मा॥ इति शंकराचार्यभाष्यसहितेन भारतसनत्सुजातीयवचनेन॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्॥ इति व्यासकृतब्रम्हसूत्रेण॥ सर्वंकर्माखिलं पार्थज्ञाने परिसमाप्यते॥ इति गीतावचनेन च॥ सर्ववेदतदंगतदुपांगशास्त्रस्मृतीतिहासपुराणादिसर्वशास्त्रग्रंथानां तदुक्तश्रौतस्मार्तस्नानदानादिसर्वकर्मणां सर्वोपासनाध्यानयोगादीनां च॥ आत्मज्ञानोत्पत्तौ पर्यवसानकथने तात्पर्यवत्वं इति निश्चीयते आतस्सर्वशास्त्रतात्पर्यविषयस्य॥ आत्मज्ञानस्य सर्वशास्त्रप्रवृत्तिमुख्यफलत्वेन॥ तज्ज्ञानसाधनीभूतश्रवणमनननिदध्यासनप्रयोजकउपनिषद्रूपवेदांतवाक्यानां सर्ववेदशाखोपनिषत्स्थितानामेव मुख्यतया विचारणीयत्वेन मन्वादिस्मृतिषु भारतपुराणादिषु॥ भगवद्गीता व्यासकृतब्रम्हमीमांसा॥ सूत्रादिषु च॥ सर्वत्र सर्वशास्त्रेषु वाक्यरूपेणार्थरूपेण वा उदाहृतत्वात्॥ तेष्वपि॥ ब्रम्हसूत्रादिषु सर्वेष

नि॰

पिवाजसनेयशाखारूपशुक्लयजुश्शाखागत॰ बहुपनिषदांमुख्यतया ईशावास्यबृहदारण्यमुक्ति
कोपनिषत्सर्यतानांअन्यासांउत्सन्नशाखागतानामुपनिषदामपि महाप्रमाणत्वेनविचारणीय
त्वावश्यंभावित्वात् तासांप्रथमशाखाप्रविष्टत्वेनशापग्रस्तयाज्ञवल्क्योपदेशक्रमेणकाण्वमाध्यं
दिनादितच्छिष्यशाखप्रशाखादिअवांतरक्रमेणागतानां दुष्टत्वप्राप्तातासांप्रामाण्यवाकथं
भवेत्॥ तासांजैमिनिव्यासमनुपराशरापस्तंबबोधायनादि ऋषिभिः तद्भाष्यव्याख्यानादिकर्तृ
भिः श्रीमच्छंकराचार्यआनंदगिरीयाचार्यसुरेश्वराचार्यविद्यारण्यादिभिः उज्वलाकार विज्ञा
नेश्वरधूर्तस्वामिमेधातिथिभट्टभास्करहेमाद्रिप्रभृतिव्याख्याकारादिभिः महद्भिः कथंवाप्रमाण
त्वेनसर्वमनुष्यकर्मानुष्ठापकत्वेनज्ञानसाधनत्वेनमहापातकादिनिवारकप्रायश्चित्तत्वेनबहुपुण्य
जनकत्वेनच॥ स्वीयस्वीयग्रंथेषु॥ कथंउदाहरणं॥ क्रियेत॥ तदुदाहरणाभावेवेदांतविचारः कथं
वाभवेत्॥ तदुदाहरणस्थलानितु॥ उत्तरत्रप्रदर्शयिष्यंते॥ तस्मादपिशुक्लयजुःशाखायाः अश्रुतं

त्वं वा॥ तच्छाखागतानां ब्राम्हणानामश्रुतत्वं वा न संभवतीति ईश्वरेणापि वक्तुं न शक्यते॥ अश्रुतत्वां
गीकारे तु कर्मोपासनज्ञानप्रतिपादकसंहिताब्राम्हणोपनिषत्सूत्रस्मृतीतिहासपुराणादीनां वैदि
कशास्त्रोक्तसर्वप्रमाणग्रंथानां॥ अश्रुतताप्राप्त्या प्रामाण्यद्वारा वैदिकमतं॥ विहाय चार्वाकबौद्धा
दिवेदबाह्यमतप्रवेशापत्तिः॥ अनिवार्या भवति॥ प्रस्तुत॥ श्रोतव्यो मंतव्यो निदिध्यासितव्यः॥ सो
न्वेष्टव्यः॥ स विज्ञासितव्यः॥ इति॥ अथातो ब्रम्हजिज्ञासा कर्तव्येत्यध्याहारः॥ यथोक्तान्यपि कर्माणि
परिहाय द्विजोत्तमः॥ आत्मज्ञाने शमे चस्यात् वेदाभ्यासे च यत्नवान्॥ सम्यग्दर्शनसंपन्नः कर्मभिर्न निब
ध्यते॥ दर्शनेन विहीनस्तु संसारं प्रतिपद्यते॥ इत्यादिश्रुतिमन्वादिप्रोक्तविधितुल्यवचनादिभिः वेदां
तश्रवणस्य अवश्यकर्तव्यताभ्यनुज्ञानात्॥ तच्छ्रवणे प्रवृत्तस्य प्रथमतएव ईशावास्यबृहदारण्यादि
जुगुप्सुकृत्यशाखागतोपनिषदध्ययनार्थं तच्छाखिब्राम्हणानां सन्निधिं प्राप्य सर्वैः शाखिभिः ब्राम्हणैः अध्य
यनं कर्तव्यमिति आवश्यकत्वं उपदिश्यते॥ तच्छाखिब्राम्हणनिकटे तच्छाखागतसंहितारूप ईशोपनिषदः

तद्ब्राम्हणरूपबृहदारण्योपनिषदः ब्रम्हसूत्रविषयवाक्यरूपलघुजाबालोपनिषदः काशीमरण
माहात्म्यसन्यासविधानादिज्ञानोत्पादकसाधन ज्ञानार्थं तस्याएवजाबालोपनिषदः हंसपरमहं
सगोपालतापनीयमुक्तिकोपनिषदादिबहवः शुक्लयजुर्गताः॥ वर्तंते॥ तासां आवश्यकतया अध्य
यनकर्तव्यत्वेनतदध्ययने पुरुषः नियुज्यत इव वेद वेदांत वाक्यानि बोधयंति॥ तस्मात् सर्वे पिशा
खिनः गृहस्थाः विशेषतया नैष्ठिकब्रम्हचारियावज्जीवस्नातकविधुरसन्यासिनश्च वेदांतज्ञान
संपादनार्थं पूर्वोक्तरीत्या आश्वलायनगृह्यसूत्रप्रतिपादितप्रकारेण आत्मसंस्कारार्थंच उपनिषद
ध्ययनं तेषां निकटे कुर्युः॥ तदध्ययने कृते तद्ग्रंथस्य स्वल्पपरिमाणत्वेपि॥ इतरशाखिनां सर्वेषाम
पितच्छाखाध्येतृत्वेन तच्छाखाप्रवेशं प्रसंगो दुर्वारः॥ अन्यथा ब्रम्हात्मविषयका प्रतिबध्धापरोक्षज्ञान
जनक बृहदारण्यस्थ तयत्साक्षादपरोक्षाद्ब्रम्ह य आत्मा सर्वांतरः इदꣳ सर्वं॥ यदयमात्मा सर्वं
तं परादाद्योन्यत्रात्मनः सर्वं वेद॥ अस्थूलमनण्वह्रस्वं॥ अयमात्मा ब्रम्ह विज्ञानमयो मनोमयः॥

न दृष्टेर्द्रष्टारं पश्येः॥ अथात आदेशो नेति नेति॥ यत्र त्वस्य सर्वमात्मैवाभूत्॥ नेह नानास्ति किंचन
सलिल एको द्रष्टाद्वैतो भवति इत्यादि बहुवाक्यैः॥ प्रतिपाद्यार्थस्यैव भाष्यकार व्याख्याकार
वार्तिककारविद्यारण्यादिभिः सर्वैरपि ज्ञानोत्पादकत्वेन मुख्यतया भाष्यादि सर्वग्रंथेषु बहु
शोदाहृतत्वात्॥ श्रोतव्यो मंतव्यो निदध्यासितव्य इति॥ आत्मसाक्षात्कारमुद्दिश्य श्रवणादीनां मु
ख्यप्रयोजकसाधनत्वप्रतिपादकवाक्यस्यापि बृहदारण्योपनिषत्स्थितत्वेन प्रतिपादनाच्च॥
सर्वासामपि अन्यासामुपनिषदां स्वस्वोपदिष्टब्रम्हज्ञानोत्पत्तौ बृहदारण्यवाक्योक्तार्थनिरपेक्षतया
निर्वाहकत्वासामर्थ्यात्॥ मुख्यतया श्रवणादिसाधनबोधकवाक्यजातस्य बृहदारण्य एव सत्वा
च्च॥ बृहदारण्यं विनास्वातंत्र्येण स्वस्वोक्तब्रम्हज्ञानतत्फलतत्साधनादिसाधकत्वासंभवात्॥ बृहदारण्या
दि वाजसनेयिशाखा वेदभागस्याप्रामाण्यस्वीकारे वेदांतजन्यज्ञानसाधनश्रवणादिप्रवृत्युच्छेदाप
त्तेः॥ तत्साधनभागस्य उपासनाकर्मप्रतिपादकतद्वेदभागस्यापि अप्रामाण्यसिध्या सर्ववेदोक्तप्र

ष्ट्रसुच्छेदापत्तेश्च॥ अपिच॥ अष्टाचत्वारिंशद्वर्षाणिप्रतिवेदं द्वादशवर्षाणिब्रह्मचर्यं॥ चरेदितिआश्वला
यनापस्तंबादिसूत्रेषुमन्वादिस्मृतिषुच॥ सर्वशाखिनांचतुर्वेदाध्ययनविधानात्॥ तदंतर्गतसामान्य
निर्दिष्टयजुर्वेदभागद्वयाध्ययनविधानस्यापिकरणीयत्वेनतच्छाखाध्येतृत्ववशात्॥ तच्छाखाप्रवेशान्य
निवारिणीयोभवति॥ एवमेवएतादृशविधिनियम्यत्वेनसर्वशाखिनामपिवाजसनेयिवेदा
ध्ययनस्यअवश्यंभावित्वात्॥ एवंवाजसनेयिनामपिसर्ववेदरूपऋगादिसर्वशाखाध्येतृत्वेन
तच्छाखाप्रवेशोपिननिराकरणीयोभवति॥ एवंसर्वशाखिनां॥ सर्ववेदाध्येतृत्वेनसर्वशाखित्व
प्राप्त्यासर्वसमानत्वेनउत्कृष्टनिकृष्टभावाभिधानंअज्ञानप्रयुक्तभ्रांतिज्ञानविजृंभितमेवेतिसिध्य
ति॥ ननुशुक्लकृष्णनामविभागेनयजुषःद्वैविध्यंमुक्तिकोपनिषदि॥ श्रीरामचंद्रेणउक्तमिति॥ त्वयाद
र्शितं॥ तत्रप्रामाण्यसंदेहोकेषांचिज्जायते॥ तस्याःमुक्तिकोपनिषदःअप्रसिद्धत्वात्॥ दशोपनिष
त्सु॥ अनंतर्भूतत्वात्॥ द्वात्रिंशदुपनिषत्स्वपि॥ तदुपनिषदः॥ अपठितत्वात्॥ शंकरमेगच्छ्यादा

प्र-शा॰
३०९

चार्यैः॥ दशोपनिषदामेवभाष्यंकृतं॥ शंकरानंदैस्तुद्वात्रिंशदुपनिषदः॥ व्याख्याताः॥ तदुपरि
केनापिव्याख्यानंनकृतं॥ अतःप्रामाण्यसंदेहोभवत्येवेतिचेत्॥ शंकरभगवत्पादाचार्यैः द्वा
त्रिंशदुपनिषदामपि॥ भाष्यंनकृतं॥ इतिकृत्वा तासामपि॥ अप्रामाण्यापत्तिप्रसंगः॥ अपिच॥
शंकराचार्यपरमगुरुणा॥ गौडपादाचार्येण॥ मांडूक्योपनिषन्मात्रस्यभाष्यंकृतं॥ तत्कालेशंक
राचार्यैः॥ भाष्यकरणात्पूर्वंदशोपनिषदामपि॥ अप्रामाण्यापत्तिप्रसंगः॥ भवेदेव॥ अपिच॥ तत्रद
शोपनिषदां वा॥ द्वात्रिंशदुपनिषदां वा॥ केनप्रमाणेनप्रामाण्यंसिध्यति॥ तत्संख्यातत्क्रमतःशा
खाभेदतत्कांतितन्नामादीनांज्ञापकं॥ वाक्यंकुत्रवर्तते॥ वाक्यंवाकीदृशंत्वयाप्रदर्शनीयंभवेत्॥
त्वया॥ तद्वाक्यस्या॥ अप्रदर्शितत्वेसर्वासामप्युपनिषदांत्वयाभ्युपगतानां॥ द्वात्रिंशदुपनिषदांदशो
पनिषदांच॥ अप्रामाण्यापत्तिप्रसंगः॥ दुर्वारएवभवति॥ त्वदुक्तन्यायस्यैवतत्रापिप्रयोक्तुंशक्यत्वा
त्॥ किंच॥ दसोपनिषदः॥ इत्युक्तेद्वात्रिंशदुपनिषदं तर्भूतावा॥ बहिर्भूतावा॥ कल्पद्वयेपि॥ प्रमा

णंप्रदर्शयितव्यं॥द्वात्रिंशदुपनिषदः॥अष्टोत्तरशतोपनिषन्मध्यवर्तिन्योवा॥नवा॥उभयथापि॥
पक्षयोःप्रमाणंदर्शयितव्यं॥दशोपनिषदःभगवत्पादकृतभाष्यमेवप्रमाणमितिचेत्॥द्वात्रिं
शदुपनिषदांतद्भाष्याभावात्॥अप्रामाण्यमेवस्यात्॥तासांशंकरानंदकृतदीपिकावर्तते॥सैव
प्रमाणमितिचेत्॥अष्टोत्तरशतोपनिषदामपि॥विद्यारण्यकृतदीपिकावर्ततइति॥महावाक्य
रत्नावलीसंयोजकउपनिषद्ब्रह्मारव्यस्वामिभिःमहावाक्यरत्नावल्यांलिखितमेववर्तते॥अपि
चकाश्यादिरामेश्वरपर्यंतस्थितब्राह्मणेषु॥तत्रतत्रयथासंभवंअष्टोत्तरशतोपनिषदोपिबहुका
लपरंपरयालिखितपुस्तकेषुदृश्यंते॥किंच॥प्राचीनद्विशतत्रिशतसंवत्सरात्प्राक्कालेद्राविड
डदेशेउत्पन्नव्यासतात्पर्यनिर्णयारव्यग्रंथेप्रयिणअष्टोत्तरशतोपनिषद्वाक्यानिउदाहृतानिवर्तं
ते॥किंचशंकरभगवत्पादाचार्यैः॥दशोपनिषदएवव्यारव्याताअपि॥तद्वहिर्भूतश्वेताश्वतरकौ
घुजाबालकौषीतकीब्राह्मणोपनिषद्वाक्यानि॥बहूनि॥भाष्यादिषु॥भाष्यकारैरेवउदाहृतानि

वर्त्तते॥व्यासेनापिसकृतब्रम्हसूत्रेषुचमसवद्विशेषात्॥इत्यधिकरणे॥श्वेताश्वतरोपनिषद्वाक्यं॥विषयीकृत्यसूत्रितमिति॥प्राणस्तथानुगमात्॥इत्यधिकरणे॥कौषीतक्युपनिषद्वाक्यं॥विषयीकृत्यसूत्रितमिति॥वैश्वानरःसाधारणशब्दविशेषादित्यधिकरणे॥आमनंतिचैनमस्मिन्नितिगुणसूत्रेलघुजाबालोपनिषदेव॥व्यासेनविषयीकृतत्वमितिभाष्यादिषुप्रतिपाद्यते॥तासांउपनिषदांभाष्याकरणमात्रेणअप्रामाण्यापत्तिःसंभवतिवा॥तथैवअष्टोत्तरशतोपनिषदामपि॥सर्वदेशसर्वकालेष्वपिव्यवह्रीयमाणत्वात्॥प्रामाण्यमंगीकर्तव्यं॥प्रस्तुतअष्टोत्तरशतोपनिषद्वाक्यानांभगवद्गीतासूतसंहिताविष्णुपुराणभागवतवासिष्ठरामायणविद्यारण्यकृतपंचदशीप्रकरणजीवन्मुक्तिप्रकरणविष्णुपठितत्वेनतद्ग्रंथमूलत्वं एतासामस्तित्वनवात्॥तवपक्षेदशोपनिषदांवाद्वात्रिंशदुपनिषदांवातन्नामानुक्रमणिकवाक्यंइदानींत्वयापठनीयं॥भवेत्॥ईशकेनकठप्रश्नमुंडमांडूक्यतित्तिरितारेतरेयंचछांदोग्यंबृहदारण्यकंदशेति॥एतासांभाष्यस्यसत्वात्॥

एता एव प्रमाणभूताः इति चेत्॥ पूर्वोक्तप्रकारेण जाबालश्वेताश्वतरकौषीतक्युपनिषदां व्याससूत्र
विषयत्वेन भाष्यकारैरेवउदाहृतत्वात्॥ दशोपनिषद्बहिर्भूतत्वेन द्वात्रिंशदुपनिषदंतर्गतत्वेन
च तत्साहचर्यो द्वात्रिंशदुपनिषदां प्रामाण्यमायातं॥ तथा च सति ब्रम्हवैवल्यजाबालश्वेताश्वोह
स आरुणिः॥ गर्भो नारायणो हंसो बिंदुनीदशिरः शिखा॥ मैत्रायणी कौषीतकी बृहज्जाबालतापि
नी॥ कालाग्निरुद्रमैत्रेयी सुबालक्षुरिमंत्रिकेति॥ द्वात्रिंशदुपनिषदां प्रामाण्यमस्तु॥ इति चेत्॥ एव
याज्ञाता एव प्रमाणभूताः इत्यत्र कोयं नियामको हेतुः स्वयाकाशी न ज्ञातेति काशी नास्ति इति वक्तु
न शक्यते॥ अपि च द्वात्रिंशदुपनिषद्बहिर्भूतानां व-्हीनामुपनिषदां सूत्रकृता व्यासेन भाष्यकृतां क
राचार्येण विद्यारण्यकालात्॥ प्राक्कालीन विज्ञानेश्वरेण आपस्तंबऋषिणा विद्यारण्यस्वामिना॥
सूत्रभाष्यव्याख्यान धर्मसूत्र मनुयाज्ञवल्क्यादिस्मृतिन्व्याख्यान पंचदशीप्रकरणजीवन्मुक्तिप्रकरणा
दिषु॥ बहुषु प्रामाणिकग्रंथेषु प्रमाणत्वेनउदाहृतत्वात्॥ द्वात्रिंशदुपनिषद एव प्रमाणभूता इति वक्तुं

प्र॰शा॰
३११

नराकृतं॥ज्ञतः इतोपिअधिकसंख्याकाः॥त्वयाज्ञाताश्चेत्॥उच्यंतांनोचेत्॥वयंवक्ष्यामः श्रुणु॥ सर्व
सारंनिरालंबरहस्यंवज्रसूचिकं॥तेजोनादध्यानविद्यायोगतत्वात्मबोधकं॥परिव्राट्त्रिशिखीसीता
चूडानिर्वाणमंडलं॥दक्षिणाशरभंस्कंदंमहानारायणाद्वयं॥रहस्यंरामतपनंवासुदेवंचमुद्गलं॥
शांडिल्यंपैंगलंभिक्षुमहच्छारीरकंशिखा॥तुर्यातीतंचसन्यासपरिव्राजाक्षमालिका॥अव्यक्तैकाक्ष
रंपूर्णासूर्याक्ष्यध्यात्मकुंडिका॥सावित्र्यात्मापाशुपतंपरंब्रम्हावधूतकं॥त्रिपुरातपनंदेवीत्रिपुराक
ठभावना॥हृदयंकुंडलीभस्मरुद्राक्षगणदर्शनं॥तारसारमहावाक्यपंचब्रम्हाग्निहोत्रकं॥गोपा
लतपनंकृष्णंयाज्ञवल्क्यंवराहकं॥शाट्यायनीहयग्रीवंदत्तात्रेयंचगारुडं॥कलिजाबालसौभाग्य
रहस्यरुंचमुक्तिकेति॥एतैःश्लोकैरेवृतवदशोपनिषदः॥द्वात्रिंशदुपनिषदश्चसिद्धायदिएतेनैव
वाक्येनअष्टोत्तरशतोपनिषदःनसिध्यंतीत्यत्रकाप्रमा॥एकस्मिन्नेववाक्येघटितानांअर्थानां॥म
ध्येकेचनार्थाःसिध्यंतिकेचनार्थाःनसिध्यंतिइत्यत्रकोवान्यायः॥प्रवर्तते॥अथवाएतद्वाक्यं॥द्वात्रिंश

डुपनिषत्प्रतिपादकमेव तद्दूर्ध्वोपनिषत्प्रतिपादकं न भवतीत्यत्र किं प्रमाणं॥ तथासति एतद्वाक्यस्यैवा
प्रामाण्ये सिद्धे॥ दशोपनिषदामपि अप्रामाण्यमेव सिद्धं भवति॥ तस्मात् एकस्मिन् वाक्ये प्रतिपा
दितानामर्थानां मध्ये केषांचिदर्थानां सिद्धिः। केषांचिदर्थानां॥ असिद्धिं चाभ्युपगंतॄणां अर्धजरतीयन्या
यानुकरणद्वारा तद्वाक्यस्य सर्वस्यापि अप्रामाण्यप्रसंगः॥ बलादागच्छति॥ तस्मात्॥ इदमेव वाक्यं
अष्टोत्तरशतोपनिषन्नामप्रतिपादकं॥ वाक्यं मुक्तिकोपनिषस्थं इत्येवं निश्चित्य तदुक्तरीत्या अष्टोत्त
रशतोपनिषदां प्रामाण्यं अंगीकरणीयमेव भवेत्॥ तथाच ब्रम्हसूत्रभाष्ये व्यासेनैव प्रथमाध्याये
द्वितीयपादे वैश्वानरः साधारणशब्दविशेषात्॥ इत्यधिकरणे स्मर्यमाणमनुमानं स्यादिति गुणसू
त्रे स्मृतीनां सर्वासां श्रुतिमूलकत्वनियमात्॥ प्रत्यक्षश्रुतिमूलकत्वे सिद्धे॥ तद्विहाय परोक्षश्रुतिमू
लकत्वकल्पना याः अन्याय्यत्वादित्यर्थः प्रतिपादितः॥ तथाच सूत्रभाष्यं॥ स्मर्यमाणमनुमानं स्या
दिति॥ २९॥ इतश्च परमेश्वर एव वैश्वानरः यस्मात्॥ परमेश्वरस्यैवाग्निरहस्यं॥ द्यौर्मूर्धैवेतीदृशं॥ त्रै

लोकयात्मकं रूपं स्मर्यते॥ यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः॥ सूर्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नमः॥ इति तत्॥ स्मर्यमाणं रूपं मूलभूतां श्रुतिमनुरूपयदस्य॥ वैश्वानरशब्दस्य परमेश्वरपरत्वेनानुमानं लिंगं गमकं स्यादित्यर्थः॥ इति शब्दो हेत्वर्थः॥ यस्मादिदं गमकं तस्मादपि वैश्वानरः परमात्मैवेत्यर्थः॥ यद्यपि स्तुतिरियं तस्मै लोकात्मने नम इति स्तुतित्वमपि नासति मूलभूते वेदवाक्ये सम्यगीदृशेन रूपेण संभवति॥ द्योर्मूर्धानं यस्य विप्रा वदंति खं वै नाभिं चंद्रसूर्यौ च नेत्रे॥ दिशः श्रोत्रे विद्धि पादौ क्षितिश्चैव सो चिंत्यात्मा सर्वभूतप्रणेता॥ इत्येवंजातीयका च स्मृतिरिहोदाहर्तव्या॥ एवं काशीखंडात्मकस्कांदपुराणरूपस्मृतेः मूलत्वेन काशीमाहात्म्यप्रतिपादकतया संन्यासविधिप्रतिपादकमनुयाज्ञवल्क्यादिस्मृतिमूलतया वैश्वानरोपासनाविषयविराट्स्वरूपप्रतिपादकतया च॥ लघुजाबालोपनिषदः रामायणाख्यस्मृतेः मूलतया काशीमाहात्म्यप्रतिपादकपुराणादिमूलतया च रामतापनीयोपनिषदः॥ श्रीमद्भागवतरूपस्मृतेः॥ मूलतया कृष्णोपनिषदः॥ मनुस्मृतिषष्ठाध्याये॥

नि

प्रतिपादितसन्यासधर्मप्रतिपादकस्मृतेः॥ मूलतया नारदपरिव्राजकोपनिषदः कांश्यां ब्रम्हनालअं
तर्गृह पंचक्रोशादिस्थानविशेषमरणेषु॥ सालोक्यसामीप्यसारूप्यसायुज्यकैवल्यादिमुक्तिप्रभेद
प्रयोजकभेदप्रतिपादकानां पुराणादीनां॥ मूलत्वेन च॥ मुक्तिकोपनिषद आरावंगणपतिसरस्वतिद
क्षिणामूर्त्यादि॥ मंत्राणां मूलत्वेन दंक्षिणामूर्त्याद्युपनिषदां च॥ प्रामाण्यस्यावश्यकतया अंगीकरणी
यत्वापत्तेश्च॥ दुर्वारित्वात्तस्मात्॥ मुक्तिकोपनिषदादिअष्टोत्तरशतोपनिषदां प्रामाण्यं सुस्थि
तं॥ अपिच महापुरातन॥ सहस्रसंवत्सरात्प्राक्कालीनविज्ञानेश्वरेण याज्ञवल्क्यस्मृतिव्या
ख्याने शारीरोपनिषत्॥ प्रमाणत्वेन उदाहृता॥ विद्यारण्याचार्यैः॥ पंचदशीप्रकरणे॥ महावाक्य
विवेकाख्यप्रकरणे॥ शुकरहस्योपनिषद्वाक्यानि॥ उदाहृतानि अन्यानि च॥ अवधूतोपनिषदादीनां॥
बहूनि वाक्यानि तृप्तिदीपादिषु प्रकरणेषु उदाहृतानि॥ एवं शंकरभगवत्पादाचार्यकृतापरोक्षानु
भूत्यादिकेषु चित्प्रकरणेषु॥ अष्टोत्तरतोपनिषद्वाक्यानि कानिचित् क्षिप्तानि ज्ञानवासिष्ठसूतसंहि

प्र॰ शा॰
२१२

तावि ष्णुपुराणभारतभागवतभगवद्गीतादिआदिसपुराणमनुस्मृतियाज्ञवल्क्यास्मृत्यादिसर्वप्रम
णग्रंथेषु॥अष्टोत्तरशतोपनिषद्वाक्यानामेवउदाहृतत्वाच्च॥अष्टोत्तरशतोपनिषदांअप्रामाण्यंव
क्तुंकेनापिनशक्यते॥किंच॥तेषांअष्टोत्तरशतोपनिषदांप्रामाण्यज्ञापकंअनुभवानुमि।तंलिंगंवर्त
ते॥तथाहि॥मुक्तिकोपनिषदि॥हनुमतापृष्टःश्रीरामचंद्रः॥प्रत्युत्तरमाह॥ चतुर्विधाश्रया ।मु
क्तिर्मदुपासनयाभवेत्॥इयंकैवल्यमुक्तिस्तुकेनोपायेनसिध्यति॥मांडूक्यमेकमेवालंमुमुक्षू
णांविमुक्तये॥तथाप्यसिद्धंचेज्ज्ञानंदशोपनिषदंपठ॥ज्ञानंलब्ध्वाचिरादेवमामकंधामयास्यति॥तथा
पिदृढतानोचेद्विज्ञानस्यांजनासुत॥द्वात्रिंशाख्योपनिषदंसमभ्यस्यनिवर्तय॥विदेहमुक्ताविच्छाचेद
ष्टोत्तरशतंपठ॥तासांक्रमंसशांतिंचशृणुवक्ष्यामितत्वतः॥ इत्यादिक्रमेणरामेणोक्तरीत्याकलियुग
स्यप्रथमप्रथमसमीपकालेब्राम्हणानांपापभूयिष्टत्वाभावेनश्रद्धाभक्तिचित्तशुद्धिस्वधर्मानुष्ठानेश्वरोपा
सनादिबलेनसंशयासंभावनाविपरीतभावनादिप्राबल्याभावेनचमुमुक्षूणांअधिकारसंपत्तेःसम्य

नि॰

कृतस्त्यितत्वात्॥तदानीशुकमहर्षेः साक्षाच्छिष्यः॥शंकरभगवत्पादपरमगुरुःगौडपादाचार्यःअवतरन्श्रीरामोक्तप्रकारेण॥मांडूक्यमेकमेवालंमुमुक्षूणांविमुक्तये॥इत्यर्थानुसारेणमांडूक्यस्याःएकस्याःउपनिषदः॥भाष्यरूपकारिकांकृत्वातज्ज्ञानप्रतिबंधकनिवर्तकत्वेनवैतथ्यप्रकरणं॥अद्वैतप्रकरणं॥अलातशांतिप्रकरणंइत्येवंप्रकरणचतुष्टयेनयुक्तिध्यानपरस्परशास्त्रैकवाक्यता॥ज्ञानानुभवपर्यवसानदर्शकंभाष्यस्थानापन्नंग्रंथंकृतवान्ततश्चकालवृध्याकलेःप्राबल्यवशात्॥आधुनिकआधुनिकजनानांपापाभिवृध्यास्वधर्मानुष्ठानईश्वरोपासनश्रद्धाभक्त्यादिन्यूनतान्यूनताप्राप्त्याअधिकारह्रासेनचचित्तदोषप्राबल्यात्॥गौडपदाचार्यकृतग्रंथेनज्ञानोत्पत्तौअसंभवशंकायांशंकराचार्यः॥अवतरन्॥ तथाप्यसिसंचेज्ज्ञानंदशोपनिषदंपठ॥ज्ञानंलब्ध्वाचिरादेवमामकंधामयास्यसि। इत्येतद्रामवचनानुसारेणशंकराचार्यःभाष्यंकृतवान्॥ततःपरं॥कलेःकालवृध्याअधिकारह्रासेनपापप्राबल्येनश्रद्धाभक्तिचित्तशुध्यादिक्षयेनच॥दशोपनिषद्भाष्येणज्ञानोत्पत्तिअसंभवदार्ढ्येन॥

प्र-शा०
३१४

तयापि दृढता नो चेद्विस्तानुस्यां जनासुत ॥ द्वात्रिंशाख्योपनिषदं समभ्यस्य निवर्तयेति ॥ रामचंद्रवा-
क्यानुसारेणैव शंकरानंदैः द्वात्रिंशदुपनिषदः ॥ व्याख्याताः ॥ ततोपि भूयसा कालेन जगद्व्यापारेपा-
पाधिक्येन पुण्यह्रासेन वेदशास्त्रादिषु अप्रामाण्यबुद्धिरूपनास्तिक्यप्राबल्येन चित्तशुद्धिराहित्य-
श्रद्धामत्यादिरहितत्वेन च ब्राह्मणानां अत्यंताधिकारसंकोचवत्वात् ॥ द्वात्रिंशदुपनिषत्स्वपि ज्ञानो-
त्पत्त्यसंभवं दृष्ट्वा विष्णववतारवद्भिः विद्यारण्याचार्यैः ॥ विदेहमुक्ताविच्छा चेदष्टोत्तरशतं पठ ॥ इति राम-
चंद्राज्ञानुसारेणैव अष्टोत्तरशतोपनिषदः व्याख्याताः एतद्विस्तारस्तु महावाक्यरत्नावल्याख्यग्रंथप्र-
योक्तृभिः ॥ उपनिषद्ब्रह्माख्यस्वामिभिः ॥ महावाक्यरत्नावल्यां तद्व्याख्याने च प्रपंचितो वर्तते ॥ अत एव रामचं-
द्रोक्तिप्रकारेणैव क्रमशः गौडपदाचार्यशंकराचार्यशंकरानंदाचार्यविद्यारण्याचार्यैः क्रमेण भाष्यादीनां कृ-
तत्वात् ॥ अष्टोत्तरशतोपनिषन्नामप्रतिपादकश्लोकानां एकरूपतया स्थितत्वाच्च ॥ तच्छ्लोकमूलकत्वेनै-
व एतासां उपनिषदां आनुपूर्वीक्रमस्यापि सर्वदेशसर्वकालव्यवहारविषयत्वेन सर्वैर्दृश्यमानत्वाच्च ॥ मु

नि०

क्तिकोपनिषन्मूलकत्वमेव दशद्वात्रिंशदष्टोत्तरशतानामपि सिद्धमेव भवति ॥ अन्यथा मुक्तिकोपनि
षत्स्थश्लोकरूपवाक्योक्तआनुपूर्वीक्रमादिव्यत्यासो दशोपनिषद्भाष्यद्वात्रिंशदुपनिषद्व्याख्यानादि
षु ॥ संख्यासमत्वेपि उपनिषन्नामव्यत्यासतत्तन्नामाभिधेयउपनिषदाख्यपदार्थव्यत्यासो वा भवित
व्यः तथा न दृश्यते । अथवा दशोपनिषत्प्रतिपादकाः द्वात्रिंशदुपनिषत्प्रतिपादकाश्च श्लोकाः अस्मदुक्तमुक्तिकोप
निषत्स्थश्लोकविलक्षणाः अस्मदुक्तदशोपनिषद्द्वात्रिंशदुपनिषद्भिन्ननामभिन्नार्थकभिन्नानुपूर्वीक्रमविशिष्टाः त्वया
वक्तव्याः ॥ तेषां प्रमाणमपि वक्तव्यं भवेत् ॥ तथा वक्तुं असमर्थश्चेत् । अस्मदुक्तमेव सर्वैस्त्वयांगीकरणीयं नेवेत्
मुक्तिकोपनिषत्स्थश्लोके या या उपनिषद्गा दशोपनिषदंतर्गतत्वेनउक्ताः द्वात्रिंशदंतर्गतत्वेनउक्ता
स्तास्ता एव भाष्यकारेण व्याख्यानकारेण च तत्संख्या अंतर्भूतत्वेन च भाष्यव्याख्यानादिना व्याख्या
ताः ॥ अतोपि बलवत्तरेण अनुभवानुसारिणा युक्तिबलेन च मुक्तिकोपनिषत्स्थवाक्यानुसारेणैव अ
ष्टोत्तरशतोपनिषदां प्रामाण्यं सिद्धं भवति ॥ तत्प्रामाण्यबलेन तु मुक्तिकोपनिषदुक्तरीत्या शुक्लकृष्ण

यजुर्भेदेन विभागप्राप्त्या वाजसनेयि शाखानां शुक्लयजुष्ट्वं सिद्धमेव भवतीत्यत्र न कोपि संशयो लभ्यते॥ प्रस्तुतबृहदारण्य पंचमाध्याये कहोलब्राम्हणे षष्ठाध्याये च॥ अथ ब्राम्हण इति॥ अथ ब्राम्हणो भवतीति च॥ ब्रम्हसाक्षात्कारप्राप्त्यनंतरमेव मुख्यं ब्राम्हणत्वं ब्रम्हविदो भवतीति प्रतिपादनात्॥ याज्ञवल्क्यस्य जन्मतः ब्राम्हणत्वात्॥ आगंतुकत्वेन शापग्रस्तत्वांगीकारेपि॥ याज्ञवल्क्यस्मृत्युक्तरीत्या सूर्यात्॥ बृहदारण्यप्राप्त्यनंतरमेव आत्मज्ञानप्राप्त्या मुख्यब्राम्हणत्वलाभात्॥ तच्छापविमोचनं जातमित्यपि वक्तुं शक्यते॥ अथवा ब्रम्हहत्यादिमहापातकप्राप्त्या कस्यचित्पतितत्वे प्राप्तेपि॥ आपस्तंबादिस्मृतिरीत्या ब्रम्हज्ञानस्य समस्तपापहरत्वेन महाप्रायश्चित्तत्वात्॥ ब्रम्हज्ञानेन शापोपि निवर्त्यत॥ इत्यपि वक्तुं शक्यते॥ तथा च स्मृतयः॥ सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते॥ इति॥ यथा जातबलो वन्हिर्दहत्यार्द्रानपि द्रुमान्॥ तथा दहति वेदज्ञो कर्मजं दोषमात्मनः॥ इत्यादिमनुवचनाभ्यां॥ आत्मलाभान्न परं विद्यते॥ इति आपस्तंबस्मृत्या ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति॥ गीतावचनेन तदधिगमउत्तरपूर्वाघ

योरश्लेषविनाशौ तद्व्यपदेशात्॥इत्यादिब्रम्हसूत्रेभ्यः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥इत्या
दिश्रुतिभ्यः परोक्षं ब्रम्हविज्ञानं शाब्दं देशिकपूर्वकं॥बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वन्हिवत्॥अप
रोक्षात्मविज्ञानं शाब्दं देशिकपूर्वकं॥संसारकारणाज्ञानतमसश्चंड भास्करः॥इति सूतसंहितावच
नात्॥शापांगीकारेपि तन्नाशसंभावनायाः गमकं लिंगं उत्तरग्रंथेषु अस्य याज्ञवल्क्यस्य स्मृतिकर्तृत्वजनकादीनां
ब्रम्होपदेष्टृत्वं इतरैः सर्वैः ऋषिभिः तद्वाक्यानां प्रमाणत्वेन स्वस्व सूत्रेषु उदाहरणादिकं प्रदर्शयिष्यते एवं श्रुतिस्मृतिपुरा
णब्रम्हसूत्रादिभ्यः ब्रम्हविदः सकलकमसकलपापनिवृत्तिद्वारा भिन्नदेहप्राप्तिवत्॥शापलब्धस्य
चंडालत्वादेरपि॥अपगमः संभवत्येव॥अपि च विश्वामित्रस्य तपःप्रभावात् तस्मिन्नेव जन्मनि क्षत्र
त्रियत्वनिवृत्त्या ब्रम्हऋषित्वप्राप्तिरभवत्॥त्रिशंकोः वसिष्ठेन दत्तशापात् प्राप्तचंडालत्वस्यापि विश्वा
मित्रतपोमहात्म्यबलात्॥चंडालत्वापनयेन द्वाराइंद्रसदृशत्वप्राप्तेः प्रसिद्धत्वात्॥नंदिकेश्वरस्य
तस्मिन्नेव जन्मनि देवत्वं प्राप्य रुद्रसहचर्यत्वेन रुद्रगणत्वप्राप्तिरभवत्॥इति योगशास्त्रादिषु॥

श्रवणात् एवंसाक्षाद्ब्रह्मविदः महायोगिनः॥महाश्रौतकर्मानुष्ठातुःतपस्विनः॥याज्ञवल्क्यस्ययोग
प्रभावाद्वाब्रह्मज्ञानेनवा॥कर्मबलाद्वातपोबलाद्वाशापमपनेतुं॥चंडालत्वमपनेतुंतस्मिन्नेवदेहेदे
हांतरत्वंप्राप्तुं॥अथवाशापग्रस्तदेहंविहायशुद्धदेहंगृहीतुंचशक्तत्वात्॥कथंचित्तवकाह्निकाखं
डोक्तरीत्याशापस्याचंडालत्वस्यवांगीकृतत्वेपितन्निवृत्तिद्वारासंतशुध्यत्वप्राप्तेःसंभवात्॥सतुशुद्ध
एवेतिनिश्चेतुंशक्यते॥पूर्वोक्तरीत्याविश्वामित्रनंदिकेश्वरत्रिशंकुप्रभृतीनांप्राप्तनिकृष्टत्वापनयन
द्वाराउत्कृष्टत्वप्राप्तिवत्॥अस्यापिउत्कृष्टत्वमेववक्तव्यं॥मुक्तिकोपनिषदिरामोक्तरीत्यालोकानुभव
रीत्याच॥भागवतेशुकोक्तरीत्याच॥भेजेभ्रमरकीटवत्॥इतिभगवत्पादवचनानुसारेणभ्रमरकीट
स्यभ्रमरध्यानबलादेवकीटदेहसद्भावकालएवतद्देहस्यैवभ्रमरदेह त्वप्राप्तिःसर्वैर्दृश्यतएव॥
तथासतिकीटस्येवलौकिककीटांतरध्यानबलेनतत्कीटांतरत्वप्राप्तौपूर्वोक्तविशेषणविशिष्टस्य
याज्ञवल्क्यस्यमहानुभावस्यअशुद्धतानिवृत्तिपूर्वकशुद्धतासंपादनसामर्थ्यंअस्तीतिकिमुवक्तव्यं

अपिच॥भ्रमरकीटस्येव स्वविजातीयकीटांतरमादाय स्वशक्तिबलात्॥तस्य स्वशरीरसजातीय-
त्वस्वशक्तिसजातीयशक्तिमत्वादिउत्पादनसामर्थ्यसत्वेसति याज्ञवल्क्यस्य मंत्रौषधितपःसमा-
धिजाःसिद्धयः॥इत्यादियोगसूत्रतात्पर्यानुसारेण याज्ञवल्क्यस्य समाधिसिद्धित्वबलात्॥अन्य-
स्यापिउत्तमदेहादिप्रदानयोग्यतायांसत्यां स्वस्य शापतत्संयुक्त चंडालत्वतदाश्रितदेहाद्यपनोदन
द्वारा शुद्धदेहसंपादनसामर्थ्यस्य संभव इति किमु वक्तव्यं तथात्वेनापि अस्य शापादिरहितत्वेन-
शुद्धत्वं वक्तुं शक्यत एव॥अस्य शुद्धत्वज्ञापकानि लिंगानिउत्तरत्र बहूनि प्रदर्शयिष्यंते॥तस्य शुद्धता
यां प्राप्तायां तच्छारिवनां शुद्धताप्राप्तिः अर्थसिद्धैव॥किंच बृहदारण्यषष्ठाध्याये ब्रह्मविदः॥सा
क्षात्कारावस्थानिरूपणप्रस्तावे॥ अत्रपिताऽपिताभवति मातामाता लोकालोका देवादेवावे
दावेदा अत्रस्तेनोस्तेनोभवति भ्रूणहाभ्रूणहा चांडालोचांडालः श्रमणोश्रमणः तापसोतापसः॥
अनन्वागतंपुण्येनान्वागतंपापेनतीर्णोहि तदा सर्वाञ्छोकान्हृदयस्य भवतीत्यादिवाक्यैः ब्रह्मवि

दः चंडालत्वादिकमपि नास्तीति प्रतिपाद्यते॥ न च इदं वाक्यं सुषुप्त्यवस्थाप्रतिपादकं॥ न तु ब्रम्हज्ञा
नावस्थाप्रतिपादकं इति वाच्यं॥ स्वाप्ययसंपत्त्योरन्यतरमाविष्कृतं हीति ब्रम्हसूत्रे व्यासेनैव सुषु
प्तिज्ञानावस्थोभयपरत्वेन एतद्वाक्यस्य यत्रत्वस्य सर्वमात्मैवाभूदिति वाक्यस्य च॥ तात्पर्यनिर्णयः
कृतः॥ तस्मात् ब्रम्हविदः शापो वा चंडालत्वं वा पुण्यपापकर्मपापवत्त्वं वा॥ ब्रम्हहत्यादिपतितत्वं वा
न संभवतीति॥ वेदशास्त्रसिद्धांतः॥ अत एव बृहदारण्योपनिषदि पंचमाध्याये विदग्धशाकल्यं या
ज्ञवल्क्यः शापेन मारयामास॥ इत्यर्थं दर्शयित्वा तस्य ब्रम्हहत्या नास्तीत्यर्थसूचिकत्वेन ब्रम्हविदं प्रति विव
दमानस्य शाकल्यस्य स्वमरणप्राप्तिपूर्वकं तदस्थ्नां संस्कारोपि न लब्धः इति प्रतिपादितः॥ अयमर्थः
भाष्यव्याख्यान विद्यारण्यकृत जीवन्मुक्तिप्रकरणादिषु स्पष्टीकृतः॥ कौषीतक्युपनिषदि महाशेषकृ
त आर्यापंचाशीत्यां च स्पष्टतया ब्रम्हविदः ब्रम्हहत्यादिकश्च न पातकः न संभवतीति स्पष्टं प्रतीयते
अतोपि याज्ञवल्क्यस्य न काचनाशुद्धता संभवति॥ अपि च॥ योगिनः योगशास्त्रे कायव्यूहसिद्धिप्र

भावेन॥एककालावच्छेदेनस्वेच्छयाबहुशरीरग्रहणेनकैश्चित्शरीरैःस्त्रीराज्यादिभोगः॥कैश्चित्श
रीरैःतपश्चर्य्याकैश्चित्शरीरैःरोगानुभवः॥कैश्चित्शरीरैःपापानुभवः॥अनुभूयतइतिप्रतिपाद्यते॥
अस्यदृष्टांतत्वेनसौभरिऋष्यादयः॥भारतादिषुअनेकशरीरग्रहणपूर्वकअनेकशरीरव्यापारःएके
नैवयोगिनाकृतइतिबहुशःप्रतिपाद्यते॥अपिच॥विरोधिःकर्मणीतिचेन्नानेकप्रतिपत्तेर्दर्शनात्॥
इतिब्रम्हसूत्रभाष्यादौअयमर्थःस्पष्टः॥तदृष्टांतेनापियाज्ञवल्क्येनयोगिना॥तदुक्तरीत्याशापा
द्यंगीकारेपिकेनचित्देहावच्छेदेनशापानुभवःकृतः॥स्वाभाविकशुद्धस्यदेहावच्छेदेनसूर्यात्वेदं
प्राप्यआश्वलादीन्जिह्वाजनकादीन्ब्रम्हज्ञानंप्रापय्यकण्वमाध्यंदिनकात्यायनादीन्स्वशाखावे
दभागमध्याप्यवाजसनेयिशाखाप्रवर्तकःसन्शुद्धदेहविशिष्टरूपेणवर्ततइत्यपिवक्तुंशक्यते॥
अपिच॥मृत्तोयैःशुध्यतेशोध्यंनदीवेगेनशुध्यति॥रजसास्त्रीमनोदुष्टासन्यासेनद्विजोत्तमः॥इति
मनुस्मृत्यासन्यासस्यसर्वदोषहरत्वंप्रतिपादितं॥तद्रीत्यायाज्ञवल्क्यःपुत्रेषणायाश्चवित्तेषणा

याश्चलोकेषणायाश्चव्युत्थाया थभिक्षाचर्यंचरंतीतिबृहदारण्यश्रुत्यनुसारेणमैत्रेय्येतावदरेख
ल्वमृतत्वमितिहोक्त्वापात्रावल्क्योविजहारइति॥मधुकांडेप्रवव्राजेतिच॥मैत्रेय्यैब्रम्होपदेशंकृ
त्वाईषणात्रयत्यागपूर्वकंसन्यासंकृतवानिति॥श्रुत्यावगम्यमानत्वात्॥देहाभिमानराहित्यंतत्त्य
ज्योत्यते॥देहाभिमानत्यागएवदेहत्यागः॥इतिशास्त्रसिद्धांतः॥अतएवब्रम्हसूत्रभाष्यकारेणैव
अविद्यावद्विषयाणिशास्त्राणि॥तदुक्तकर्माणिलौकिकानिविविधानि॥प्रतिपादितं॥तद्यथा॥अहं
ब्राम्हणःइत्यभिमानेनबृहस्पतिसवादौअधिक्रियते॥अहंक्षत्रियः॥इत्यभिमानेनराजसूयादौ
इच्छाजायते॥अहंसार्वभौमोराजाइत्यभिमानेनअश्वमेधेच्छाजायते॥एवंअहंपुमानित्यभिमाने
नस्त्रीविषयकेच्छाजायते॥अहंस्त्रीइत्यभिमानेनपुरुषेच्छाजायते॥अहंभोक्ताकर्तेत्यभिमानेनध
नेच्छाजायते॥अहंमनुष्यःइत्यभिमानेनव्याघ्रादेःसकाशाद्भयंजायते॥अहंचंडालःइत्यभिमा
नेनसर्वमनुष्यापेक्षयानीचत्वज्ञानंजायते॥अहंब्राम्हणःइत्यभिमानेनसर्वमनुष्यश्रेष्ठत्वज्ञानं

जायते॥एवंसर्वत्रदेहेअहमित्याकारकदेहतादात्म्याभिमानेनैववशास्त्रीयलौकिककर्मपापपुण्य
संतोषविषादभयगर्वासूयादिइहलोकपरलोकवर्तमानागामिदेहप्रयुक्तप्रयोजकादिसर्वव्य
वहाराणांप्रवृत्तिःनिवृत्तिश्च॥उत्कृष्टापकृष्टभावश्चेतिसंभवति॥देहाभिमानाभावेपापपुण्यउत्कृ
ष्टनिकृष्टत्वादिभावोनसंभवतीतिकृत्वातस्याशुद्धताकथंचिदपिनसंभवति॥ननुसन्यासेनसक
लपापनिवारणपूर्वकविरक्तिप्राप्त्यादेहाभिमानराहित्येननीचोच्चभावादिशापचंडालत्वादेः॥अ
संबंधइत्यभिप्रायेणसन्यासानंतरंशापचंडालत्वादेरप्राप्तिरितित्वयासूचितं॥तथापियाज्ञव
ल्क्यस्यसन्यासानंतरंतथात्वसंभवेपि॥तच्छाखिनांवाजसनेयिब्राम्हणानां॥कण्वमाध्यंदिना
दितच्छिष्यपरंपरयावेदाध्ययनस्यसन्यासात्पूर्वमेवगृहस्थाश्रमस्थितकालीनकण्वाद्यध्ययन
प्राप्तपरंपरया॥तच्छाखावेदस्यप्राप्तेःतदानीयाज्ञवल्क्यस्यअशुद्धतावलेनतत्सुखोद्गतवेदस्य
अशुद्धताप्राप्त्यातच्छाखाध्येतॄणांअयोग्यतास्यात्तदानीमपि॥अशुद्धत्वंवक्तव्यमेवंभवेत्॥

इति चेन्न॥ याज्ञवल्क्येन विद्वत्संन्यासः कृतः॥ संन्यासो द्विविधः॥ विविदिषासंन्यासो विद्वत्संन्यास
श्चेति॥ एतमेव लोकमिच्छंतः प्रव्रजंतीति बृहदारण्यश्रुतेः॥ संन्यस्य श्रवणं कुर्यादिति स्मृतेश्च वि
विदिषासंन्यासः॥ तथा च व्यासः॥ असारमेव संसारं दृष्ट्वा सारदिदृक्षया॥ प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिता
इति॥ तमेव विदित्वा मुनिर्भवतीति बृहदारण्यश्रुतेश्च विद्वत्संन्यासश्चोक्तः॥ सोपि प्रत्येकं द्विविधः॥ काषायक
मंडलादिधारणादिविशिष्टाश्रमरूपः काम्यकर्मत्यागपूर्वकदृढवैराग्यविशिष्टस्वरूपः॥ एतत् विरक्तिविशिष्ट
रूपसंन्यासस्य मैत्रेयीजनकविदुर धनव्याधादीनामपि अनधिकारिणां स्त्रीराजन्यशूद्रादीनां सत्वात्
गृहस्थाश्रमेपि॥ याज्ञवल्क्यस्य तादृशसंन्याससत्वं संभावितमेव वैराग्यस्यैव संन्यासप्रयोजकत्वा
त्॥ यदहरेव विरजेत्॥ तदहरेव प्रव्रजेदिति श्रुतेः॥ विविदिषासंन्यासिनोपि॥ अज्ञानदशायामे
व देहाभिमानादिसकलसंसारित्वेपि ज्ञानेच्छावलेनैव सर्वकर्मत्यागपूर्वकसर्वपापक्षयद्वारा॥ स
र्वश्रेष्ठत्वप्राप्तेः सत्वांजनकमैत्रेयिकहोलादिब्रम्होपदेष्टुः॥ याज्ञवल्क्यस्य गृहस्थाश्रम एव ब्रम्हसा

क्षात्कारज्ञानवत्वंतस्यमुक्तवैराग्यादिविशिष्टत्वरूपसंन्यासश्चस्थितएवेतिनिश्चयात्। तद्दशायामपि अध्याप्ययपरंपरयाप्र
त्तवेदव्रतोवाजसनेयिब्राह्मणानांदोषाभावःसिद्धएव। एतत्संन्यासप्रभेदविभागादिकंसर्वंपराशरेमाधवीयेजीवन्मुक्तिप्रकरणे
चविद्यारण्यगुरुभिरेवप्रपंचितंवर्त्तते॥ जीवन्मुक्तिप्रकरणेन्द्र॥ अयंचवेदनहेतुःसन्यासोद्विविधः॥ जन्मापादककर्मादित्या
गमात्ररूपः॥ प्रैषोच्चारणपूर्वकदंडधारणाद्याश्रमरूपश्चेति। त्यागश्चतैत्तिरीयादौश्रूयते। नकर्मणानप्रजया धनेनत्यागेनैके
अमृतत्वमानशुरिति। अस्मिंश्चत्यागेस्त्रियोप्यधिक्रियंते। अतएवमैत्रेयीवाक्यंयेनाहंनामृतास्यांकिमहंतेनकुर्यांयदेव
भगवान्वेत्थतदेवमेब्रूहीतिब्रह्मचारिगृहस्थवानप्रस्थानांकेनचिन्निमित्तेनसन्यासाश्रमस्वीकारेप्रतिबंधेसतिस्वाश्रमध
र्मेषुअनुष्ठीयमानेष्वपिवेदनार्थमानसः। कर्मादित्यागोनविरुध्यते। श्रुतिस्मृतीतिहासपुराणेषुनादृशांनत्वविद्यांबहूना
मुपलंभादिति॥ अपिचमनुस्मृतौद्वितीयाध्याये। श्रुतिद्वैधंतुयत्रस्यात्तत्रधर्मावुभौस्मृतौ॥ उभावपिहितौधर्मौसम्यगु
क्तौमनीषिभिः॥१४॥ अस्यव्याख्यानं॥ श्रुतिद्वैधंत्विति। यत्रपुनःश्रुत्योरेवद्वैधंपरस्परविरुद्धार्थप्रतिपादनंतत्रद्वाव
पिधर्मौमनुनास्मृतौ। तुल्यबलतयाविकल्पानुष्ठानविधानेनचविरोधाभावः। यस्मान्मन्वादिभ्यःपूर्वतरैरपिविद्वद्भिः
सम्यक्समानौद्वावपितौधर्मावुक्तौ। समानन्यायतयास्मृत्योरपिविरोधेविकल्पइतिप्रकृतोपयोगः तुल्यबलत्वाविशेषा
त्। तथाहगौतमः तुल्यबलविरोधेविकल्पः॥३४॥ मूलं। उदितेनुदितेचैवसमयाध्युषितेतथा॥ सर्वथावर्ततेयज्ञइतीयंवै

होमः प्रवर्त्तते॥ देवतोद्देशेन द्रव्यत्यागगुणयोगात्। यज्ञशब्दोत्र गौणः। उदिते होतव्य इत्यादिका श्रुतिरिति॥१५॥ श्रुतावपि
परस्परविरुद्धतया प्रतिपादने सति श्रुतेः विकल्पाभिप्रायेण प्रवृत्तत्वात्। उभावप्यर्थौ प्रामाणिकौ। इत्युक्त्वा उदाहरणार्थं मनुना उ
दितेनुदिते चैवेति श्रुतिद्वैधस्थलं ज्ञापितं। तथा च श्रुतौ उदिते होतव्य इति उदिते सूर्ये प्रातर्जुहुयात्। अनुदिते सूर्ये प्रातर्जुहोतीति
समयाध्युषिते जुहुयादिति च कालत्रयस्याग्निहोत्रहोमकर्मणि विधानात्। एतत्प्रतिपादकवेदवाक्यानां प्रामाण्यमंगीकृत्य
परस्परविरोधे सत्यपि श्रुतित्वाविशेषात्। न्यायबलस्यापि तुल्यत्वात्। पक्षत्रयस्यापि ग्राह्यत्वमित्युक्तं तत्र तावत् विकल्पस्या
पि विशेषपर्यवसानं कर्त्तव्यं। तुल्यविकल्पो वा। व्यवस्थाविकल्पो वा अनेकल्पो वेति विचार्यमाणे तुल्यविकल्पस्यासंभवः प्रती
यते। अनुदितहोमपक्षेपि उदयानंतरहोमे प्रायश्चित्तश्रवणात्। उदितपक्षेपि। अनुदितहोमे प्रायश्चित्तश्रवणाच्च। व्यवस्था
विकल्प एव वक्तव्यः। अनुदितपक्षे उदितहोमे प्रायश्चित्तस्योपपत्तिः। उदितहोमपक्षे अनुदितहोमस्य प्रायश्चित्तोपपत्तिः। इति
कृत्वा व्यवस्थाविकल्पस्वीकारे उभयपक्षप्रायश्चित्तोपपत्तिर्भवति। अन्यथा न भवति। एवं समयाध्युषितकालस्यापि विधानं क
र्मविशेषे संभवतीति कृत्वा परस्परविरुद्धत्वेपि व्यवस्थया श्रुतिविधानस्य सार्थक्यद्वारा विनियोगानुसारेण प्रामाण्यं संभवत्येव।
एवं स्थिते शास्त्रार्थप्रवृत्ते उदितहोमः कस्य पक्षः। अनुदितहोमः कस्य पक्षः। इति निर्धारयितव्यो भवति। तदा कस्य सूत्रे कस्य ब्राह्मणे
अनुदितहोमः प्रतिपादितः। कस्य सूत्रे कस्य ब्राह्मणे उदितहोमः प्रतिपादितः। इति विचार्यमाणे। वाजसनेयिनामेवानुदितहोमः इतरे

रिवनांच उदितहोमःसामगानांतु आरंभकाले उदितपक्षानुकरणे सर्वदा उदितपक्षएव॥ आ
रंभकाले अनुदितपक्षस्वीकारे सर्वदा अनुदितपक्षएवइति व्यवस्था सर्वत्र दृश्यते॥ तथाच॥ पराश
रमाधवीये॥ होमप्रकरणे॥ अथवा॥ सर्वएवैते कालविशेषाः॥ यथाशाखं सुख्यतयैव व्यवतिष्ठंते॥ उ
दितानुदितहोमवत्॥ तथैव ब्रम्हसूत्रभाष्ये॥ जन्माद्यस्ययतः इति प्रथमाध्यायप्रथमपाद द्वितीयसूत्र
भाष्यावसरे॥ भगवत्पादाचार्यैः॥ उदिते जुहोति अनुदिते जुहोति॥ इति विधिप्रतिषेधाश्चात्रार्थवंतस्यु
रिति॥ तस्मात् वाजसनेयिनां इतरेषांच श्रुतिसूत्राणां तुल्यमेव प्रामाण्यं॥ तच्छाखेतरशाखिब्राम्ह
णानां एतेषांच तुल्यं योग्यत्वं इति श्रुतिमनुश्रुत्यादीनां तात्पर्यं दृश्यते॥ एवं स्थिते वाजसनेयि ब्राम्हणाः वयं श्रेष्ठाइ
ति ऋगादि इतरशाखिनः ब्राम्हणाः वयं श्रेष्ठाइति॥ विवादस्य कश्चनमार्गो न दृश्यते किंतु॥ भ्रांतिमूलकइत्येव दृ
श्यते॥ अपिच॥ याज्ञवल्क्यस्य चंडालत्वे सिद्धे याजनाध्यापनादिनातत्संबंधः यत्ततिनान्यथेति॥ संवत्सरेण पतति
पतति तेन समाचरन्नित्यादि मन्वादिवाक्यैः याज्ञवल्क्यसंपर्कवशात्॥ इतरेषां ऋषीणां याज्ञवल्क्य सदृशत्वेन चंडा

प्र॰श्चा॰
२२१

नि॰

लत्वप्राप्तिः॥दुर्वारैवभवति॥तथा याज्ञवल्क्यस्य अध्यापयितॄणां परंपरया बाष्कलादीनां॥याज्ञवल्क्ये
नउपदिष्टानां सामश्रवजनकादीनां अन्येषां भारतपुराणाद्युक्तरीत्या अनेकेषां ऋष्यादीनां राजादीनां
याज्ञवल्क्यकण्वमाध्यंदिनकात्यायनादीनां च परस्परं अध्येतृ अध्यापकभावः॥याज्ययाजकभावः इत्यादिप
रस्परंसंबंधवत्वेन तेषां सर्वेषां याज्ञवल्क्यकण्वादिसमत्वप्राप्त्यानीचत्वप्राप्तिरपि दुर्वारैवभवति·
एतेषां ऋषिराजादीनां याज्ञवल्क्यतच्छिष्यकाण्वमाध्यंदिनादीनां च॥यजनयाजनादिसंपर्के वि
चारः तत्र तत्र क्रमेण प्रपंचयिष्यते॥प्रकृते तु याज्ञवल्क्यस्य॥अध्यात्मवित्त्वेन धर्मशास्त्रप्रणेतृत्वेन
चतुर्वेदाध्येतृत्वेन च॥महायोगिनः धर्मशास्त्ररीत्या॥अन्येषां महापातकिनां॥प्रायश्चित्तविधाने
एको वाध्यात्मवित्तमः॥इति वचनबलेन च॥महापातकिनां विषये स्वस्यैव धर्मनिर्णायकत्वसंभवे·
स्वस्य शापनिवृत्तकसाधनसंपादकसामर्थ्यमस्तीति।किमु वक्तव्यं॥तथा साधनसंपादनद्वारा शा
पनिवृत्तिरपि॥याज्ञवल्क्येन संपादितैवेति॥ऊहितुं शक्यते॥न च याज्ञवल्क्यादीनां कण्वमाध्यंदिन

कात्यायनमंतानां॥संबंधिशाखारूपवेदभागानांशुद्रत्वात्॥एतेषांअयोग्यत्वेपिसालिग्रामसुव
र्णरत्नादिवत्॥सर्वैःग्राह्यत्वेनशुद्धत्वमेवइतिवाच्यं॥तथासति॥विष्णु॥बृहस्पति॥ब्रह्मादिभिः॥
बुद्धागमचार्वाकागमजैनागमाश्चकृताइति॥सर्वशास्त्रेषुउद्धुष्यते॥तैःईश्वरावताररूपैःप्रणीत
शास्त्राणामपिभगवद्गीतादिवत्॥वेदतुल्यत्वसंभवात्॥तेषामपिआगमानांशास्त्रत्वेनउदाहर
णीयत्वापत्तिप्रसंगः॥प्रस्तुत॥पराशरमाधवीये॥उपोद्घातात्मकप्रथमप्रकरणे॥एतदेवाभिप्रेत्य
चतुर्विंशतिमते॥शाक्यादिवाक्यानामनादरणीयत्वमुक्तं॥श्लो॥अत्रचार्वाकवाक्यानिबौद्धानिप
ठितानितु॥विप्रलंभकवाक्यानितानिसर्वाणिवर्जयेत्॥ इत्युक्तत्वात् ॥विष्ण्वादीनामपिअव
तारांतरेणउक्तवाक्यानांअप्रमाणत्वेसंभवतिसति॥चंडालत्वप्राप्तानांयाज्ञवल्क्यादीनांनिक
टेअध्ययनंयोग्यानांब्राम्हणादीनांकथंसंभवति॥तेरुच्चरितस्यवेदभागस्यवस्तुतोशुद्धत्वेपि
शूद्राद्युच्चरितवेदवाक्यापेक्षयाअसंतदुष्टत्वात्॥तादृशायोग्यमुखनिःसृतवेदवाक्याध्येतृत्वे

पतितत्वप्राप्तेः॥ यथाच मीमांसायां॥विद्यारण्यकृतजैमिनीयन्यायमालायांतद्व्याख्यानेच॥भाष्यका
रमतेनवर्णकौतरमारचयति॥शाक्योक्ताहिंसनंधर्मोनवाधर्मश्रुतत्वतः॥नधर्मोनहि दृतंस्यान्क्षे
क्षीरंश्वधृतौधृतं॥अस्यार्थः॥अहिंसापरमोधर्मः॥इतिशाक्यस्मृत्युक्तं॥अहिंसाधर्मसाधनत्वाद्ध
र्मः॥वेदबाह्यशाक्यस्मृत्युक्तत्वेनधर्मसाधनत्वाभावात्॥धर्मोनभवति॥इतिवा॥इतिसंदेहः॥ब्र
म्हचर्यमहिंसांचयत्नेनरक्षयेदिति॥उपनिषद्युक्ताहिंसैवशाक्येनोच्यतइति॥धर्मसाधनमितिप्रा
प्तेसिद्धांतः॥उपनिषदुक्ताहिंसायाअपिशाक्यवाक्यस्थातत्वात्॥धर्मोनभवति॥यथालोकेगोक्षीरं
स्वयंपवित्रमपिश्वचर्मस्थितंचेत्अधिकरणदोषदुष्टत्वेनापवित्रंभवति॥तद्वदित्यर्थः॥ मनुः॥
याजनाध्यापनाद्योनात्सद्यःपततिनान्यथेति॥पतितनिकटाध्ययनेअध्यापनेवा॥पतितत्वप्राप्ते
र्दुर्वारत्वात्॥अत्रएतद्वाक्यस्थितअध्यापनशब्दःअध्ययनमपिलक्षयति॥ तथाचपराशरमाध
वीये॥उपनयनप्रकरणे॥उपनयनकालातिक्रमणेब्राम्हणादीनां॥व्रात्यत्वप्राप्त्यासावित्रीपतित

नि॰

त्वात्॥तैरपि॥अध्ययनअध्यापनादिनिषेधश्रवणात्॥किमुतचंडालसन्निधौअध्येतृत्वंतदधीतवेदस्यशुध्धत्वंवाकथंसंभवेत्॥ तथाचमाधवीयेतत्रमनुःअतऊर्ध्वंत्रयोप्येते॥यथाकालमसंस्कृताः॥सावित्रीपतिताव्रात्याभवंत्यार्यविगर्हिताः॥एतैरपूतैर्विधिवदापद्यपिहिकर्हिचित्॥ब्राम्हान्यौनांश्चसंबंधान्नाचरेद्ब्राम्हणैःसहेति॥ अत्रवाक्येब्राम्हान्ब्रम्हवेदः॥तत्संबंधान्॥अध्ययनअध्यापनादीनित्यर्थः॥तथैवआश्वलायनगृह्यसूत्रे॥आषोडशाद्ब्राम्हणस्यानतीतःकालः॥अतऊर्ध्वंपतितसावित्रिकाभवंतिनैनानुपनयेयुः॥नाध्यापयेयुः॥नविवहेयुः॥नयाजयेयुः॥नैभिर्व्यवहारेयुः॥इत्यत्रापिउपनयनाभावमात्रेणाध्ययनाध्यापनादिनिषेधेसिद्धेचंडालनिकटेब्राम्हणानामध्ययनस्यतंप्रतिसूर्यादेःअध्यापनस्यचकथंशास्त्रतःसंभवोस्ति॥तथाच॥आपस्तंबधर्मसूत्रउज्वलायांदशमपटलेअष्टाविंशतिसंख्याकखंडिकायां॥सूत्रंनपतितमाचार्यंज्ञातिंवादर्शनार्थोगच्छेत्॥अस्यउज्वलाख्यांख्यानं॥ नपतितेसंव्यवहारोविद्यतइत्युक्तेपिपुनरुच्यते॥आचार्यादिष्वविशेषंवक्ष्या

मीति॥नचास्माद्भोगानुपयुंजीत॥तस्मात्पतिताचार्याज्ज्ञातेर्वा॥पित्रादेर्वाभोगान्॥भोगसाधनानि॥
दायप्राप्तान्यपिनोपयुंजीत॥नगृण्हीयात्॥ सूत्रं ॥यदृच्छासन्निपातउपसंगृह्यतूष्णींव्यतिव्रजे
त्॥ व्याख्यानं ॥यदितैराचार्यादिभिर्यदृच्छयासंगतिस्यात्॥तदाअविधिनोपसंगृह्यतूष्णीं
तैःसहकिंचिदप्यसंभाष्यव्यतिव्रजेत्॥नक्षणमपिसहतिष्ठेत्॥इत्यादिनाशास्त्रसंदर्भेणउत्कृष्टाना
मपि॥जात्यंतरमनुष्यसंबंधेकर्मांतरसंबंधेनानिकृष्टत्वेप्राप्तेतन्मुखनिःसृतवेदादिवाक्यानामपि
निकृष्टत्वंअशुद्धत्वंअप्रामाण्यंचयथासंभवंभवत्येव।अतएवभारतसनत्सुजातीये॥यमांशावतारत्व
तोपिविदुरस्यशूद्रयोनिजत्वेनब्रह्मोपदेशानधिकारः॥तेनैवदर्शितः॥ शूद्रयोनावहंजातोनातो
न्यद्वक्तुमुत्सहइति॥तस्यशंकराचार्यभाष्यंचवर्तते॥ तस्मात्याज्ञवल्क्यकात्यायनादीनांशापग्र
स्तत्वेनिश्चितेसति॥तन्मुखद्वारानिर्गतवेदधर्मशास्त्रादिवाक्यानां॥अप्रामाण्यंअशुद्धत्वंचबलात
संभवत्येवेतिअंगीकरणीयत्वावश्यंभावेनयाज्ञवल्क्यादीनांशापग्रस्तत्वमेवासिद्धमितिनिश्चीयते

अतएव॥ महाभारते॥ हरिवंशांतर्गतविष्णुपर्वणि षट्पुरवधप्रकरणे द्विचत्वारिंशदधिकशततमाध्याये॥ वैशंपायन उवाच ॥ एतस्मिन्नेव काले तु चतुर्वेदः षडंगवित्॥ ब्राम्हणो याज्ञवल्क्यस्य शिष्यो धर्मगुणान्वितः॥१॥ ब्रम्हदत्तेति विख्यातो विप्रो वाजसनेयिनां॥ अश्वमेधक्रतुस्तेन वसुदेवस्य धीमतः॥२॥ ससांवत्सरदीक्षायां दीक्षितः षट्पुरालये॥ आवर्तायाः शुभे तीरे सुनद्या मुनिसंमतः॥३॥ सखा च वसुदेवस्य सहाध्यायी द्विजोत्तमः॥ उपाध्यायश्च कौरव्य क्षीरहेतोर्महात्मनः॥४॥ वसुदेवस्तत्र यातो देवक्या सहितः प्रभो॥ यजमानं षट्पुरस्थं यथा शक्रो बृहस्पतिं॥५॥ तस्य सत्रं ब्रम्हदत्तस्य बहूनं बहुदक्षिणं॥ उपासंत मुनिश्रेष्ठा महात्मानो दृढव्रताः॥६॥ व्यासोहं याज्ञवल्क्यश्च सुमंतुर्जैमिनिस्तथा॥ धृतिमान्जाबलिश्चैव देवलाद्याश्च भारत॥७॥ बुध्यानुरूपया युक्तं वसुदेवस्य धीमतः॥ यक्षेप्सितान्ददौ कामान्देवकी धर्मचारिणी॥८॥ वासुदेवप्रभावेन जगत्सर्वं महीतले॥ तस्मिन्सत्रे वर्तमाने दैत्याः षट्पुरवासिनः॥९॥ निकुंभाद्याः समागत्य तमूचुर्वरदर्पिताः॥ कार्यतां यज्ञभागो नः सोमंपास्यामहे वयं॥१०

कन्याश्च ब्रम्हदत्तो नो यजमानः प्रयच्छतु ॥ ब्रम्हः संसस्य कन्याश्च रूपवत्यो महात्मनः ॥ ११ ॥ आहूयता
प्रदातव्याः सर्वथैव हि नः श्रुतं ॥ रत्नानि च ब्रम्हदत्तो विशिष्टानि ददातु नः ॥ १२ ॥ अन्यथा न तु यष्टव्यं वय
माज्ञापयामहे ॥ एतच्छ्रुत्वा ब्रम्हदत्तस्तानुवाच महासुरान् ॥ १३ ॥ यज्ञभागो न विहितः पुराणे सुरसत्त
माः ॥ कथं सत्रे सोमपानं शक्यं दातुं मया हि वः ॥ १४ ॥ दृश्यते ह्यु मुनिश्रेष्ठान् वेदभाष्यार्थ को विदान् ॥
कन्या हि मम यादेया स्ताश्च संकल्पिता मया ॥ १५ ॥ अंतर्वेद्यां प्रदातव्याः सदृशानामसंशयं ॥ रत्नानि तु
प्रयच्छामि सांत्वेनाहं विचिंत्यतां ॥ १६ ॥ बलान्नैव प्रदास्यामि देवकीपुत्रमाश्रितः ॥ निकुंभाद्यास्तु रुषि
ताः पापाः षट्पुरवासिनः ॥ १७ ॥ यज्ञवाटं विलुलुपुर्जह्नुः कन्याश्च तास्तथा ॥ तं दृष्ट्वा सत्वं हृत्तं तु दध्या
वानकदुंदुभिः ॥ १८ ॥ वासुदेवं महात्मानं बलभद्रं मदं तथा ॥ विदित्वाथ ततः कृष्णः प्रद्युम्नमिदमब्र
वीत् ॥ १९ ॥ गच्छ कन्यापरित्राणं कुरु पुत्राशु मायया ॥ यावद्यादवसैन्येन षट्पुरं याम्यहं प्रभो ॥ २० ॥ स
ययो षट्पुरं वीरः पितुराज्ञाकरस्तदा ॥ निमेषांतरमात्रेण गत्वा कामो महाबलः ॥ २१ ॥ कन्यास्ता माय

याधीमानाजह्रे समहाबलः॥ मायामयीश्चकृत्वान्यान्यस्तवान् रुक्मिणीसुतः॥ २२॥ माभैरितिचध-
र्मात्मा देवकीमुक्तवान् तथा॥ मायामयीस्तुताहृत्वासुतास्तस्यदुरास्तदा॥ २३॥ षट्पुरंविविशुर्दैत्याःप-
रितुष्टानराधिप॥ कर्मचासाद्यतेतत्रविधिदृष्टेनकर्मणा॥ २४॥ यद्विशिष्टंबहुगुणंतदभूच्चनराधिप॥ ए-
तस्मिन्नंतरेप्राप्ताराजानस्तत्रभारत॥ २५॥ सत्रेनिमंत्रितापूर्वंब्रम्हदत्तेनधीमता॥ जरासंधोदंतवक्रः
शिशुपालस्तथैवच॥ २६॥ पांडवाधार्तराष्ट्राश्चमालवास्तंगणास्तथा॥ रुक्मीचैवाह्वतिश्चैवनीलोनार्म-
दएवच॥ २७॥ विंदानुविंदावावंत्यौशल्यःशकुनिरेवच॥ राजानश्चापरेवीरामहात्मानोदृढायुधाः॥ २८॥
आवासितानातिदूरेषट्पुरस्यचभारत॥ तान्दृष्ट्वानारदःश्रीमानचिंतयदनिंदितः॥ २९॥ क्षत्रस्ययाद-
वानांचभविष्यतिसमागमः॥ अत्रहेतुरयंयुस्थेतस्माच्चक्षयतामहं॥ ३०॥ एवंसंचिंतयित्वातुनिकुंभभु-
वनंगतः॥ पूजितःसनिकुंभेनदानवैश्चतथापरैः॥ ३१॥ उपविष्टःसधर्मात्मानिकुंभमिदमब्रवीत्॥ कथं
विरोधंयदुभिःकृत्वास्वस्थैरिहास्यसे॥ ३२॥ योब्रम्हदत्तःसकृष्णःसहितस्यविभोःसखा॥ शतानिपंच

भार्याणां ब्रह्मदत्तस्य धीमतः ॥३३॥ आनीता वसुदेवस्य सुतस्य प्रियकाम्यया ॥ शतद्वयं ब्राम्हणीनां
राजन्यानां तथा शतं ॥३४॥ वैश्यानां शतमेकं च शूद्राणां शतमेव च ॥ ताभिः शुश्रूषितो धीमान् दुर्वासा ध
र्मवित्तमः ॥३५॥ तेन तासां वरो दत्तो मुनिना पुण्यकर्मणा ॥ एकैकस्तनयो राजन्नेकैका दुहिता तथा ॥
॥३६॥ रूपेणानुपमाः सर्वा वरदानेन धीमतः ॥ कन्या भवंति तनयास्तस्याः सुरप्रुनः पुनः ॥३७॥ संगमे सं
गमे वीर भर्तृभिः शयने सह ॥ सर्वपुष्पमयं गंधं स्रवंति च वरांगनाः ॥३८॥ सर्वदा यौवनेन्यस्ताः सर्वाश्चै
व पतिव्रताः ॥ सर्वा गुणैरप्सरसां गीतनृत्यगुणोदयं ॥३९॥ जानंति सर्वदैते य वरदानेन धीमतः ॥ पुत्रा
श्च रूपसंपन्नाः शास्त्रार्थकुशलास्तथा ॥४०॥ स्वे स्वे स्थिता वर्णधर्मे यथावदनुपूर्वशः ॥ ताः कन्या भैमसु
ख्यानां दत्ताः प्रायेण धीमता ॥४१॥ अवशेषं शतं त्वेकं यदानीतं किल त्वया ॥ तदर्थं यादवा वीर योधयि
ष्यंति सर्वथा ॥४२॥ सहायार्थं तु राज्ञानो नियंतां हेतुपूर्वकं ॥ ब्रम्हदत्तसुतार्थं च रत्नानि विविधानि च ॥
॥४३॥ दीयंतां भूमिपालानां साह्यार्थं महात्मनां ॥ आतिथ्यं क्रियतां चैव ये समेष्यंति वै नृपाः ॥४४॥

एवमुक्ते तथा चक्रुरसुरास्ते तिहृष्टवत्॥ लब्धा पंचशतं कन्यारत्नानि विविधानि च॥४५॥ यथा ईंण नरेंद्रै
स्ता विभक्ता भक्तवत्सलाः॥ ततेपांडुसुतान्वीरान्वारिताना रदेन ते॥४६॥ निमेषांतरमात्रेण तत्र गत्वा
महात्मना॥ तुष्टैस्तैरसुरास्युक्ता राजन्भूमिप सत्तमैः॥४७॥ सर्वकामसमृद्धार्थैर्भवद्भिः स्वगमैः स्वयं॥ अ
र्चितास्म यथान्यायं क्षत्रं किं वः प्रयछतु॥४८॥ क्षात्रं नार्चितपूर्वं हि दिव्यैर्वीरैर्भवद्विधैः॥ निकुंभोथाब्रवी
त्हृष्टः क्षत्रं सुररिपुस्तदा॥४९॥ संवर्तयित्वा क्षत्रस्य माहात्म्यं सत्यमेव च॥ युत्स्यं नो रिपुभिः सार्धं भवि
ष्यति नृपोत्तमाः॥५०॥ साहाय्यं दातुमिछामो भवद्भिस्तत्र सर्वथा॥ एवमस्त्विति तानूचुः क्षत्रियाः क्षीण
कल्मषाः॥५१॥ पांडवेयान्तेवीरान्श्रुतार्थान्नारदाद्विभो॥ क्षत्रियाः सन्निविष्टास्ते युत्स्यार्थं कुरुनंदन।
॥५२॥ षट्यस्तु ब्रम्हदत्तस्य यत्र वाटं गता अपि॥ कृष्णोपि सेनया सार्धं माययौ षट्पुरं विभुः॥५३॥ महा
देवस्य वचनं सुहृद्हन्मनसा नृप॥ स्थापयित्वा द्वारवत्यामाहुकं पार्थिवं तथा॥५४॥ स तया सेनया
सार्धं पौराणां हितकाम्यया॥ यत्र वाटस्या विदूरे देवो निविविशे विभुः॥५५॥ देशप्रवरकल्याणे वसु

देवप्रचोदितः॥दत्तगुल्मा प्रतिसरं कृत्वा तं विधिवत्प्रभुः॥९६॥प्रद्युम्नमटने श्रीमानूरक्षार्थं विनियु
ज्यवै॥९७॥ इतिविष्णुपर्वणिषट्पुरवधेद्विचत्वारिंशदधिकशततमोध्यायः॥ ॥वैशंपाय
नः॥मुहूर्ताभ्युदिते सूर्ये जनचाक्षुषि निर्मले॥बलः कृष्णः सात्यकिश्च तार्क्ष्यमारुरुहुर्मुदा॥१॥बद्ध
गोधांगुलित्राणा दंशिता युद्धकांक्षिणः॥बिल्वोदकेश्वरं देवं नमस्कृत्य सुरोत्तमं॥२॥आवर्तायाजले
स्नात्वा रुद्रवाक्यमनुस्मरन्॥कर्तव्यमेवमिति स निश्चयं परमं गतः॥३॥प्रद्युम्नमग्रे सैन्यस्य वियति
स्थाप्यमानदः॥रक्षार्थं यज्ञवाटस्य पांडवान्विनियुज्य च॥४॥शेषां सेनां गुहाद्वारि भगवान्विनियु-
ज्य च॥जयंतमथ सस्मार प्रवरं च सतां गतिः॥५॥तावापेततुरेवाथ स्वयं चापस्य तं तदा॥वियत्स्येव नि
युक्तौ तौ प्रद्युम्न इव भारत॥६॥ततः कृष्णस्य वचनादाहतो रणदुंदुभिः॥जलजा मुरजाश्चैव वा
द्यान्यप्यपराणि च॥७॥मकरो रचिते व्यूहः सांबेन च गदेन च॥सारणश्चोद्धवश्चैव भोजो वैतरण
स्तथा॥८॥अनाधृष्टिश्च धर्मात्मा विपृथुः पृथुरेव च॥कृतवर्मा सुदंष्ट्रोथ विचक्षुररिमर्दनः॥ ९॥

सनत्कुमारोधर्मात्माचारुदेष्णश्चभारत।।अनिरुद्धसहायोतेतोष्टष्ठानीकंरक्षतु।।१०।।शेषायादव
सेनातुव्यूहमध्येव्यवस्थिता।।रथैरश्वैर्नरैर्नागैराकुलाकुलवर्धन।।११।।षट्पुरादपिनिष्क्रांतादानवा
युत्सुदुर्मदाः।।आरुह्यमेघनादांश्चगर्दभानपिहस्तिनः।।१२।।मकरान्शिंशुमारांश्चहयानपिचभार
त।।महिषानथखड्गांश्चउष्ट्रानपिचकच्छपान्।।१३।।एतेरेवरथैर्युक्ताविविधायुधपाणयः।।किरी
टपीठमकुटैरंगदैरपिमंडिताः।।१४।।नानर्दमानैर्विविधैस्तूर्यैर्नेमिस्वनाकुलैः।।प्रध्मायमानैःशंखैश्च
महांबुदसमस्वनैः।।१५।।तासामसुरसेनानांयुज्यतीनांजनेश्वर।।निकुंभोनिर्ययावग्रेदेवानामिववासः
वः।।१६।।भूमिंद्यांचववृधिरेदानवास्तेबलोत्कटाः।।नदंतोविविधान्नादान्क्ष्वेलांश्चपुनःपुनः।।१७।।रा
जसेनापिसंयत्ताचेदिराजपुरोगमा।।असुराणांसहायार्थंनिश्चिताजनमेजय।।१।।दुर्योधनभ्रातृशतं
चेदिराजानुगाग्रजं।।स्थितंरथैर्नरव्याघ्रगंधर्वनगरोपमैः।।१९।।कठिनानादिनोवीरद्रुपदस्यंदना
स्तथा।।रुक्मीचैवात्द्दतिश्चैवतस्थतुर्निश्चितोरणे।।२०।।तालवृक्षप्रतीकाशेद्ध्मानेधनुषीशुभे।।रा

ल्यश्चशकुनिश्चोभौमभगदत्तश्चपार्थिवः॥२१॥जरासंधस्त्रिगर्तश्चविराटश्चसहोत्तरः॥युद्धार्थमुद्यता
वीरानिकुंभाद्याजयैषिणः॥२२॥युयुत्समानायदुभिर्दैवैरिवमहासुराः॥ततोनिकुंभःसमरेशरैराशीवि
षोपमैः॥२३॥ततर्दसमरेसेनां..भैमानांभीमदर्शनं॥सेनापतिरनादृष्टिर्ममृषेतन्नयादवः॥२४॥तत
र्दघोरैर्बाणौघैश्चित्रपुंखैःशिलाशितैःसत थोसुरपख्यस्यददृशेनचवाजिनः॥२५॥नध्वजोननिकुं
भश्चसर्वबाणाभिसंवृतंसपरी स्यततोवीरोनिकुंभोमायिनांवरः॥२६॥अस्तंभयदनादृष्टिंमायया
भैमसत्तमंस्तंभयित्वानयद्वीरंगु हाषट्पुरसंस्थितं॥२७॥रुक्माचाभ्यगमद्वीरंमाययाबलमाश्रितः
पुनरेवनिकुंभस्तुकृतवर्माणमाहवे॥२८॥अनयच्चारुदेष्णंश्चभोजंवैतरणंतथा॥सनत्कुमारमा
र्ष्टिंचतथैवनिशठोल्मुकौ॥२९॥बहूंश्चैवापरान्भोजान्मायाबलसमाश्रितः॥नतस्यददृशेदेहोमाया
छन्नोजनेश्वर॥३०॥नयतोयादवान्घोरां गुहांषट्पुरसंस्थितां॥तद्दृष्ट्वाकदनंघोरंभैमानांभैमवर्ध
नं॥३१॥चुकोपभगवान्कृष्णोबलःसात्यकएवच॥सविशेषंतथाकामःसांबश्चपरवीरहा॥३२॥

अनिरुद्धश्च दुर्धर्षो भैमाश्च बहवोपरे॥ ततः शार्ङ्गायुधः शार्ङ्गं कृत्वा सज्यं नरेश्वर॥३३॥ दानवेषु प्रदृ-
प्तेषु तृणेष्विव हुताशनः॥ तं दृष्ट्वा दानवा देवमभिदुद्रुः पुरीश्वरं॥३४॥ शलभाः कालपाशातीः प्रदीप्त-
मिव पावकं॥ समुद्धिताः शतघ्नीश्च परमांश्च सहस्रशः॥३५॥ शूलानि चाग्नितुल्यानि प्रदीप्तांश्च परश्व-
धान्॥ पर्वताग्राणि वृक्षांश्च घोराश्च विपुलाः शिलाः॥३६॥ उत्क्षिप्य च गजान्मत्तान्तथा नपि हयानपि॥
नारायणायिस्तान्सर्वान्ददाह प्रहसन्निव॥३७॥ बाणार्चिषा महातेजा जगत्क्षितकरो हरिः॥ शारद
वर्षणं यद्वद्दहेद्वीरगवां पतिः॥३८॥ तद्वद्घदुवृषः सेहे बाणवर्षमरिंदमः॥ न सेहिरे सुराः बाणान्ना-
रायणधनुश्च्युतान्॥३९॥ वर्षं पर्जन्यविहितं वालुकासेतवो यथा॥ न शेकुः प्रमुखे स्थातुं कृष्णस्यासु-
रसत्तमाः॥४०॥ व्यादितास्यस्य सिंहस्य वृषभा इव भारत॥ ते वध्यमानाः कृष्णेन दिवमाचक्रमुस्तदा
॥४१॥ जीविताशां वहंतस्तु नारायणभयार्दिताः॥ तानाकाशगतानैंद्रिर्जयंतः प्रवरस्तदा॥४२॥ निजघ्ने
तु शरैर्घोरैर्ज्वलनार्चिसमैः प्रभो॥ निपेतुरसुराणां तु शिरांसि धरणीतले॥४३॥ तृणराजफलानीव सु-

क्तानि शिखरात्तरोः॥ निपेतुर्बाहवश्छिन्ना देस्यानां वसुधातले ॥४४॥ कालेनोपहता वीर पंचवक्त्रा
इवोरगाः॥ रौक्मिणेयस्ततः सृष्टां घोरां मायामयीं गुहां॥४५॥ अहं स्थनिष्क्रम द्वीरः क्षत्रं प्रक्षेप्तुमु
द्यतः॥ गदेन सह धर्मात्मा सारणेन शठेन च॥४६॥ सांबेन चापरैश्चापि पूर्वं येन प्रवेशिताः॥ प्रमथ्य
तरसाकर्णं यतंतं रणमूर्धनि॥४७॥ जग्राम बलवान् कार्ष्णिः प्रस्फुरंतं ततस्ततः॥ विनद्य च गुहां वीरो
घोरां मायामयीं नृप॥४८॥ दुर्योधनं च राजानं राटहुपदावपि॥ शकुनिं चैव शल्यं च नीलं चापि न-
दीसुतं॥४९॥ विंद विंदावावंत्यो जरासंधं च भारत॥ त्रिगर्तान्मालवांश्चैव वासत्यांश्च महाबलान्॥
॥५०॥ दृष्टद्युम्नादयश्चैव पांचालानस्त्र कोविदान्॥ तथा प्रहतिमुवाचेदं मातुलं रुक्मिमेव च॥५१॥ शि
शुपालं च राजानं भगदत्तं च भारत॥ संबंधं च गुरुत्वं च मानयामि नराधिपाः॥५२॥ गुहामिमां घोररू
पां येन प्रक्षेपयामि वः॥ बिल्वोदकेश्वरेणाहमाज्ञप्तः शूलपाणिना॥५३॥ प्रक्षेप्तव्या नरेंद्रास्ते गुहायामि
ति धीमता॥ आभिरस्य शांबरी मायां निकुंभेन महात्मना॥५४॥ प्रक्षिप्तान् यादवांश्चैव मोक्षइष्यामि सर्व

था॥इत्युक्तः शिशुपालस्तु राजसेनापतिस्तथा॥५५॥शरैस्तर्दतान्भैमान्प्रद्युम्नस्तद्विशेषतः॥बिल्वो
दकेश्वरंदेवंरौक्मिणीयोनमस्यच॥५६॥आरभन्नृपतिंबद्धुंशिशुपालंमहाबलं॥ततःपाशसहस्राणि
गृह्यायप्रवरोत्तमः॥५७॥शैलादिरब्रवीद्वीरंरौक्मिणेयंमहाबलं॥बिल्वोदकेश्वरोदेवःप्राहत्वांयदुनंदन
॥५८॥सर्वंकुरु त[illegible]रात्राबुक्तस्त्वंभोयथामया॥कन्यार्थंरवलुबध्वांस्तुबद्धानेमान्नराधिपान्॥५९॥पा
शैस्त्वमेवमोक्तुंचन्नमाणंयदुनंदन॥असुरांस्तुमहाबाहोनिःशेषान्कर्तुमर्हसि॥६०॥एवमेवचवक्तव्य
स्त्वयावीरजनार्दनः॥ततःसभगदत्तंचशिशुपालंचभूमिपं॥६१॥आहृतिंचैवरुक्मिंचशेषांश्चान्यान्न
राधिपान्॥बबंधहरदत्तैस्तैःपाशैरुत्तमवीर्यधृत्॥६२॥मायामयींगुहांचैनांननयत्कुरुवर्धन॥बद्ध्वा
रौक्मिणीयोथनिश्वसंतइवोरगान्॥६३॥अनिरुद्धंचकाराथरक्षितारंस्वमात्मजं॥तेषांनिरवशेषेणबं
धयद्दुवर्धनः॥६४॥सेनापतीन्क्षत्रियांश्चकोशाध्यक्षांश्चभारत॥हस्त्यश्वरथवृंदांश्चचकारसततथात्मसु
त॥६५॥अव्यग्रःसतदाहंतुमसुरानुद्यतःप्रभो॥सन्नत्स्वएववचोवाचब्रम्हदत्तंद्विजोत्तमं॥६६॥विस्र

वर्त्ततां कर्म माभैः पश्य धनंजय॥ न देवेभ्यो नासुरेभ्यो नान्येभ्यो द्विजसत्तम॥ ६७॥ भयं हि विद्यते तस्य गोप्तारो यस्य पांडवाः॥ न चासुरैस्तु वसुताः स्पृष्टाः खल्वपि तेजसा॥ ६८॥ यज्ञवाटे निरीक्षेथ मायया निहताम् मया॥ ६९॥ इति विष्णुपर्वणि षट्पुरवधे त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ वैशंपायनः ॥ वस्थेषु भूमिपालेषु सानुगेषु विशांपते॥ आविवेश सुरांश्चैव कश्मलं जनमेजय॥ १॥ दिशः प्रतस्थुस्ते वीरा वध्यमानाः समंततः॥ कृष्णानंतप्रभृतिभिर्यदुभिर्युद्धदुर्मदैः॥ २॥ निकुंभस्तान थोवाच रुष्टो दानवरोत्तमः॥ भित्वा प्रतिज्ञां किं मोहाद्गच्छता त्तीयात विह्वलाः॥ ३॥ हीनः प्रतिज्ञाः का न्रलोका न्प्रयास्यथ पलायिताः॥ अगत्वा वचितं युद्धे ज्ञातीनां कृतनिश्चयः॥ ४॥ फलं जिह्वे हभोक्तव्यं रिपून्समरकर्कशान्॥ हतेन चापि शूरेण वस्तव्यं त्रिदिवे सुखं॥ ५॥ पलायित्वा गृहं गत्वा कस्य द्रक्ष्यथ हे सुरं॥ दाराश्च क्ष्यत किं चापि धिग्धिक् किं किं न लज्जथ ॥ ६॥ एवमुक्ता निवृत्तास्ते लज्जमाना नृपासुराः॥ द्विगुणेन च वेगेन युयुधुर्यदुभिः सह॥ ७॥ उत्सवे युद्धशौंडानां नानाप्रहरणैर्नृप॥ ये यांति यज्ञवाटं तु तान्निहंति धनंजयः॥ ८॥

यमो भीमश्च राजा च धर्मपुत्रो युधिष्ठिरः ॥ द्यां प्रयातान्जयानैंद्रिः प्रवरश्च द्विजोत्तमः ॥ ९ ॥ अथासुरा-
सुतोयाढ्या केशशैवलशाड्वला ॥ चक्रकूर्मरथावर्ता गजशैलानुशोभिनी ॥ १० ॥ ध्वजकुंततरुछन्नतनि-
तोत्कृष्टशब्दिनी ॥ गोविंदशैलप्रभवा भीरुचित्तप्रमाथिनी ॥ ११ ॥ असृग्बुद्बुदफेनाढ्या असिमत्स्यतरं-
गिणी ॥ सुस्राव शोणितनदी नदीव जलदागमे ॥ १२ ॥ तान्दृष्ट्वैव निकुंभस्तु वर्धमानांश्च शात्रवान् ॥ ह-
तान्सर्वान्सहायांश्च वीर्यादेवोत्पपात ह ॥ १३ ॥ स वारितो जयंतेन प्रवरेण च भारत ॥ शरैः कुलिशसं-
काशैर्निकुंभो रणकर्कशः ॥ १४ ॥ सन्निहत्य च दष्टोष्ठः परिघेण दुरासदः ॥ प्रवरं ताडयामास स पपात
महीतले ॥ १५ ॥ ऐंद्रिस्तं पतितं भूमौ बाहुभ्यां परिषस्वजे ॥ विदित्वा चैव सप्राणं हित्वासुरमभिद्रुतः ॥ १६
अभिद्रुत्य निकुंभं च निस्त्रिंशेन जघान ह ॥ परिघेणापि दैतेयो जयंतं समताडयत् ॥ १७ ॥ तत्क्षतं चाच-
लन्मात्रं निकुंभस्यैंद्रिणा हवे ॥ स चिंतयामास तदा वध्यमानो महासुरः ॥ १८ ॥ कृष्णेन सह योद्धव्यं वैरिणा तातिघाति-
ना ॥ श्रामयामि किमात्मानं महवे शक्रसूनुना ॥ १९ ॥ एवं स निश्चयं कृत्वा तत्रैवांतरधीयत ॥ जगाम चैव युद्धार्थं यत्र कृष्णो

महाबलः॥ ०॥ तं दृष्ट्वा रावणस्कंधमास्थितो बलनाशनः॥ हृष्टमभ्यागतो युद्धं जगृहे सह दैवतैः॥ २१
साधुसाध्विति पुत्रं च परितुष्टश्च सस्वजे॥ प्रवरं चापि धर्मात्मा सस्वजे मोहवर्जितं॥ २२॥ देवदुंदुभयश्चापि
प्रणेदुर्वासवाज्ञया॥ जयमानं रणे दृष्ट्वा जयंतं रणदुर्जयं॥ २३॥ ददर्शोथ निकुंभस्तु केशवं रणदुर्जयं॥
अर्जुनेनस्थितं सार्धं यज्ञवाटाविदूरतः॥ २४॥ सनादं सुमहत्कृत्वा पक्षिराजमताडयत्॥ परिघेण
सुघोरेण बलं सात्यकमेव च॥ २५॥ नारायणं चार्जुनं च भीमं चाथ युधिष्ठिरं॥ यमौ च वसुदेवं च सांबं कामं
च वीर्यवान्॥ २६॥ युयुधे माययादैत्यः शीघ्रकारी च भारत॥ न चैनं ददृशुः सर्वे सर्वशस्त्रविशारदाः॥ २७
यदा तु नैवापश्यत्तं तदा बिल्वोदकेश्वरं॥ दध्यौ देवं हृषीकेशः प्रमथानां गणेश्वरं॥ २८॥ ततस्ते ददृशुः सर्वे
प्रभावाददितेजसः॥ बिल्वोदकेश्वरस्याशु निकुंभं मायिनां वरं॥ २९॥ कैलासशिखराकारं ग्रसंतमिव
धिष्ठितं॥ आहूयं तं रणे कृष्णं वैरिणं ज्ञानिनाशनं॥ ३०॥ सज्यगांडीव एवाथ पार्थस्तस्य रथेषुभिः॥ परिघं
चैव गात्रेषु विव्याध नमथासकृत्॥ ३१॥ ते बाणास्तस्य गात्रेषु परिघे च जनाधिप॥ भग्नाः शीलास्थिताः सर्व

निषेतुः कुंचिताः क्षितौ ॥३२॥ विफलानस्त्रयुक्तांस्तान् हष्ट्वा बाणान् धनंजयः ॥ पप्रच्छ केशवं वीरः किमेत-
दिति भारत ॥३३॥ पर्वतानपि भिंदंति मम वज्रोपमाः शराः ॥ किमिदं देवकीपुत्र विस्मयोत्र महान्मम ॥
॥३४॥ तमुवाच ततः कृष्णः प्रहसन्निव भारत ॥ महद्भूतं निकुंभोयं कौंतेय शृणु विस्तरं ॥३५॥ पुरा गत्वोत्त-
रकुरूंस्तपश्चक्रे महाबलः ॥ शतं वर्षसहस्राणां देवशत्रुर्दुरासदः ॥३६॥ अथैनं छंदयामास वरेण भगवा-
न्हरः ॥ स वव्रे त्रीणि रूपाणि नवध्यानि सुरासुरैः ॥३७॥ तमुवाच महादेवो भगवान्वृषभध्वजः ॥ मम वा
ब्राम्हणानां वा विष्णोर्वा प्रियमाचरन् ॥३८॥ भविष्यसि हरेर्वध्यो नत्वन्यस्य महासुर ॥ ब्रम्हण्योहं च विष्णु-
श्च विप्राणां परमा गतिः ॥३९॥ स एष सर्वशस्त्राणामवध्यः पांडुनंदन ॥ त्रिदेहो विप्रमाथी च वरमत्तश्च दान-
वः ॥४०॥ भानुमत्यापहरणे देहोस्यैको हतो मया ॥ अवध्यं षट्पुरं देहमिदमस्य दुरात्मनः ॥४१॥ दितिं-
शिश्रूषति त्वेको देहोस्य तपसान्वितः ॥ अन्यस्तु देहो घोरोस्य येनावसति षट्पुरं ॥४२॥ एतत्ते सर्वमाख्या-
तं निकुंभचरितं मया ॥ त्वरयास्य वधे वीर कथा पश्चाद्भविष्यति ॥४३॥ तयोः कथयतोरेवं कृष्णयोर-

सुरस्तदा॥ गुहां षट्पुरसंज्ञां तां विवेश रणदुर्जयः॥ ४४॥ अन्विष्य तस्य भगवान् विवेश मधुसूदनः॥ तां
षट्पुर गुहां घोरां दुर्धर्षां कुरुनंदन॥ ४५॥ चंद्रसूर्यप्रभाहीनां ज्वलंतीं स्वेन तेजसा॥ सुखदुःखोष्णशी
तानि प्रयच्छंतीं यथेप्सितं॥ ४६॥ तत्र प्रविश्य भगवान पश्यत्तान् जनाधिपान्॥ युयुधे स ह घोरेण निकुं
भेन जनाधिप॥ ४७॥ कृष्णस्यानुप्रविष्टास्तु बलाद्यायादवास्तथा॥ प्रविष्टाश्च तथा सर्वे पांडवाश्च म
हात्मनः॥ ४८॥ समेतास्तु प्रविष्टास्ते कृष्णस्यानुमतेन वै॥ युयुधे स तु कृष्णेन रौक्मिणेयं प्रचोदितः॥ ४९
व आनयद्यादवान् सर्वोन्यान् यै बांधवान् पुरा॥ ते मुक्ता रौक्मिणेयेन प्राप्ता यत्र जनार्दनः॥ ५०॥ प्रहृष्टम
नसः सर्वे निकुंभवधकांक्षिणः॥ राजानो वीर मुंचेति पुनः काममथाब्रवीत्॥ ५१॥ मुमोच चाथ तान् वी
रान् रौक्मिणेयः प्रतापवान्॥ अयो मुखमुखाः सर्वे बद्धमौना नराधिपाः॥ ५२॥ लज्जयाभिप्लुता वीरा
स्तस्थुर्नष्टः श्रियस्तथा॥ निकुंभमपि गोविंदः प्रयतं तं च यं प्रति॥ ५३॥ योधयामास भगवान् घोरमा स्व
रिपुं हरिः॥ परिघेणाहतः कृष्णो निकुंभेन भृशं विभो॥ ५४॥ गदया चापि कृष्णेन निकुंभस्ताडितो भृ

शं॥ तावुभौ मोहमापन्नौ सुप्रहारहतौ तदा॥ ५५॥ ततः प्रव्यथितान्दृष्ट्वा पांडवांश्चाथ यादवान्॥
जेपुर्मुनिगणास्तत्र कृष्णस्य हितकाम्यया॥ ५६॥ तुष्टुवुश्च महात्मानं वेदप्रोक्तैः स्तवैस्तथा॥ ततः प्रत्या
गतप्राणो भगवान्केशवस्तदा॥ ५७॥ दानवश्च पुनर्वीरावुद्यतौ समरं प्रति॥ वृषभाविव नर्दंतौ गजा
विव च भारत॥ ५८॥ सालावृक्षाविव क्रुद्धौ प्रहरंतौ रणोत्कटौ॥ अथ कृष्णं तदोवाच नृपरागशरी-
रिणी॥ ५९॥ चक्रेण शमयस्वैनं देवब्राह्मणकंटकं॥ इतिहोवाच भगवान्देवो बिल्वोदकेश्वरः॥ ६
धर्मं यशश्च विपुलं प्राप्नुहि त्वं महाबल॥ तथेत्युक्त्वा नमस्कृत्वा लोकनाथं सतां गतिः॥ ६१॥ सुदर्शनं
मुमोचाथ चक्रं दैत्यकुलांतकं॥ तन्निकुंभस्य विच्छेद शिरः प्रवरकुंडले॥ ६२॥ नारायणभुजोत्सृष्टं
सूर्यकुंडलवर्चसं॥ तत्सपात शिरस्तस्य भूमौ ज्वलितकुंडलं॥ ६३॥ मेघमत्तो गिरेः शृंगान्मयूर इव
भूतले। निकुंभे निहते तस्मिन्देवो बिल्वोदकेश्वरः॥ ६४॥ तुतोष च नरव्याघ्र जगत्त्रासकरे निभौ
पपात पुष्पवृष्टिश्च शक्रः स्तुष्टानमस्तलात्॥ ६५॥ देवदुंदुभयश्चैव प्रणेदुररिनाशन॥ ननंद च जग

कृत्स्नं मुनयश्च विशेषतः ॥६६॥ दैत्यकन्याश्च भगवान् यदुभ्यः शतशो ददौ ॥ क्षत्रियाणां च भगवान् संतर्पयित्वा पुनः पुनः ॥६७॥ रत्नानि च विचित्राणि वासांसि प्रवराणि च ॥ रथानां वाजियुक्तानां षट्सहस्राणि केशवः ॥६८॥ अददत्सांडवेयेभ्यः प्रीतात्मा गतपूर्वजः ॥ तदेवं चाथ प्रवरं षट्पुरं सुरवर्धनः ॥६९॥ द्विजाय ब्रह्मदत्ताय ददौ तार्क्ष्यवरध्वजः ॥ सत्रे समाप्ते च तदा शंखचक्रगदाधरः ॥७०॥ विसर्जयित्वा तत्क्षत्रं पांडवांश्च महाबलः ॥ बिल्वोदकेश्वरस्याथ समाजमकरोत्प्रभुः ॥७१॥ मांससूपशताकीर्णं बह्वन्नं व्यंजनाकुलं ॥ नियुद्धकुशलान्मल्लान्देवो मल्लप्रियस्तदा ॥७२॥ योधयित्वा ददौ भूरि वित्तं वस्त्राणि चात्मवान् ॥ मातापितृभ्यां सहितो यदुभिश्च महाबलः ॥७३॥ अभिवाद्य ब्रह्मदत्तं ययौ द्वारवतीं पुरीं ॥ स विवेश पुरीं रम्यां हृष्टपुष्टजनाकुलां ॥७४॥ पुष्पचित्रपथां वीरो वंद्यमानो नरैः पथि ॥ इमं यः षट्पुरवधं विजयं चक्रपाणिनः ॥७५॥ शृणुयाद्वा पठेद्वापि स युद्धे जयमाप्नुयात् ॥ अपुत्रो लभते पुत्रं अधनो लभते धनं ॥७६॥ व्याधितो मुच्यते रोगाद्बद्धश्चाप्यथ बंधनात् ॥ इदं पुंसवनं प्रोक्तं

गर्भाधानंचभारत॥७७॥शुस्थेषुपठितंसम्यगक्षय्यकरणंस्मृतं॥७८॥ इदममरवरस्यभारतप्र
थितबलस्यजयंमहात्मनः॥सततमिहहियःपठेन्नरोयसुगतिमितोव्रजतेगतज्वरः॥७९॥मणिक
नकविचित्रपाणिपादोनिरतिशयार्कगुणोरिहादिमध्यः॥चतुरुदधिशयश्चतुर्विधात्माजयति
जगद्गुरुषःसहस्रनामा॥८०॥ इतिश्रीमहाभारतेहरिवंशांतर्गतविष्णुपर्वणिषट्पुरवधेचतु
श्चत्वारिंशदधिकशततमोध्यायः॥ ॥एवंभारतेपियःज्ञवल्क्यशिष्यस्यब्रह्मदत्तस्यसत्रया
गकर्तुःवसुदेवयाजकत्वादिबहूनिलिंगानियाज्ञवल्क्यस्यशापप्रयुक्तअयोग्यताभावसूचका
निभवंति॥ तथाहि॥हरिवंशेद्विचत्वारिंशदधिकशततमाध्याये॥ वैशंपायनः ॥एतस्मिन्ने
वकालेतुचतुर्वेदःषडंगवित्॥ब्राम्हणोयाज्ञवल्क्यस्यशिष्योधर्मगुणान्वितः॥१॥इतिबृहदार
ण्यपंचमाध्यायगतद्वितीयखंडस्यशंकरभगवत्पादकृतभाष्येयाज्ञवल्क्यशिष्यसामश्रवशब्द
निर्वचनेनयाज्ञवल्क्यस्यचतुर्वेदाध्येतृत्वंप्रदर्शितं॥ तथैवतद्भाष्यव्याख्यांव्याख्याकारैःआनंद

गिरीयाचार्यैः॥ तदेव साधितं॥ तदनुरोधेन भागवतविष्णुपुराणस्थलिंगेश्वतुर्वेदाध्येतृत्वरूपः
पूर्वं एतस्मिन्नेव ग्रंथे अस्माभिः प्रकटीकृतो योअर्थः स एवार्थः अत्र स्फुटतया प्रतीतः॥ तद्यथा
एतस्मिन्नेव काले तु चतुर्वेदः षडंगवित्॥ ब्राम्हणो याज्ञवल्क्यस्य शिष्यो धर्मगुणान्वितः॥ इति स्पष्ट
तया याज्ञवल्क्यशिष्यस्य ब्रम्हदत्तस्य चतुर्वेदाध्येतृत्वं षडंगवित्वं च शब्दत एव प्रतिपादितं॥ याज्ञ
वल्क्यशिष्य इति विशेषणात्॥ याज्ञवल्क्यमुखेनैव ब्रम्हदत्तस्य चतुर्वेदाध्येतृत्वं प्राप्तमिति गम्यते॥
ब्रम्हदत्तेति विख्यातो विप्रो वाजसनेयिनां॥ इति च प्रथमशाखावानिति च प्रतिपादितः॥ अश्वमे
धः कृतस्तेन वसुदेवस्य धीमतः॥ इत्यत्र नीलकंठीयव्याख्याने कृतः॥ कारितः संपादित इत्यर्थः॥
इति व्याख्यानं॥ औत्तरीयकाश्मीरीयप्राचीनव्याख्यानानुसारेण तु॥ क्रतुस्तेन वसुदेवस्य धीमतः
इति वसुदेवस्य संबंधितत्कर्तृकः अश्वमेधक्रतुः कारित इति अध्याहारः कर्तव्यः॥ कृत इति पाठेपि
कारितः इत्यर्थस्य वक्तव्यत्वापेक्षया क्रतुः कारित इति अध्याहारः युक्ततरः ब्रम्हदत्तस्य ब्राम्हणस्य

अश्वमेधयागाधिकाराभावात्॥ राजा सार्वभौमो अश्वमेधेन यजेतेति श्रुतिविधानाच्च॥ सर्वराज्यरूपदेशविजयकर्तुरेव तदधिकारश्रवणात्॥ ब्राम्हणस्य एतादृशशक्त्यभावाच्च॥ वसुदेवस्येति अश्वमेधकर्तोः वसुदेवसंबंधित्वश्रवणाच्च॥ प्रस्तुत॥ वक्ष्यमाणे अस्मिन्नेव हरिवंशग्रंथे अध्यायत्रयपर्यंतं ब्रम्हदत्तस्य सत्रयागयष्टृत्वं बहुशो श्रूयते॥ ततश्च वसुदेवस्य अश्वमेधादियागेषु ब्रम्हदत्तस्य ब्राम्हत्वार्त्विज्यं लब्धमिति प्रतीयते॥ अत एव वसुदेवस्य याज्ञवल्क्यशाखाप्रविष्टत्वं सूचितं भवति॥ तत्रैव॥ ससांवत्सरदीक्षायां दीक्षितः षट्पुरालये॥ आवर्तायाः शुभे तीरे सुनद्या मुनिसंमतः॥ ३॥ सखा च वसुदेवस्य सहाध्यायी द्विजोत्तमः॥ उपाध्यायश्च कौरव्य क्षीरहेतोर्महात्मनः॥ ४॥ इति वाक्ये॥ सखा च वसुदेवस्य सहाध्यायी द्विजोत्तमः॥ इत्यनेन शब्दादिना च ब्रम्हदत्तस्य वसुदेवस्य च॥ सहाध्यायित्वेनैव सखात्वं निश्चीयते॥ अतो पि॥ अनयोः वाजसनेयिशाखावत्वं सिद्धं भवति॥ ब्रम्हदत्तस्य वसुदेवः सखेति॥ सहाध्यायीति चोक्तत्वात्॥ वसुदेवस्य वाजसनेयिशाखित्वेन च॥ याज्ञवल्क्य

निकटएव॥अनयोर्वसुदेवब्रम्हदत्तयोः॥वाजसनेयशाखाध्ययनंजातं॥इत्यपिसूच्यते॥अपिच॥भागव
तेदशमस्कंधेसप्ततितमोध्यायेषट्संख्याकश्लोके॥ मू ॥अथाप्लुतोंभस्यमलेयथाविधिक्रियाकलापंप
रिधायवाससी॥चकारसंध्योपगमादिसत्तमो हुतानलोब्रम्हजजापवाग्यतः॥६॥ अस्यश्रीधरीयव्याख्या
नं ॥अथेति॥अप्लुतःस्नातःसंध्यायाःउपगमःउपासनंआदिर्यथाभवतितथाक्रियाकलापंचकार॥का
ण्वत्वाउदयात्पूर्वमेवहुतानलः॥ब्रम्हगायत्रींजजाप॥बसुदेवस्तत्रयातोदेवक्यासहितंप्रभो॥यज
मानंषट्पुरस्थंयथाशक्रोबृहस्पतिं॥इत्यादिवाक्यैः॥इंद्रबृहस्पतिदृष्टांतेनच॥ब्रम्हदत्तस्यवसुदेववंश
पुरोहितकोदेप्रवेशोपिज्ञाप्यते॥किंचपूर्वोक्तरीत्यावसुदेवकर्तृकअश्वमेधयागेयाजकत्वेनापिब्रम्हद
त्तस्यतत्पुरोहितवंश्यत्वंसिद्धंभवति॥इत्यनेनापिवसुदेवस्यवाजसनेयित्वंसिद्धंभवतिप्रकृतप्रवृत्तंतु
तथैवब्रम्हसूत्रभाष्येप्रथमाध्यायेतृतीयपादेअपशूद्राधिकरणेक्षत्रियत्वगतेरुत्तरत्रचैत्ररथेनलिं
गात्इतिगुणसूत्रभाष्यव्याख्यानयोःराजवंश्यानांहिप्रायेणपुरोहितवंश्याःयाजकाभवंतीत्यर्थः

केंच॥ससांवत्सरदी
क्षायांदीक्षितःषट्पुराख्ये॥आवर्त्यायाःशुभेतीरेसुनयाभुनिसंमतः॥इति॥सइत्यनेनब्रम्हदत्तोगृ
ह्यते॥मुनिसंमतइत्यनेनचसर्वमुनिभिःसत्रयागाधिकारित्वेनसर्वैःपरिगृहीतइत्यर्थः॥ तत्सत्रंब्र
म्हदत्तस्यबहून्नंबहुदक्षिणं॥उपासंतमुनिश्रेष्ठामहात्मानोदृढव्रताः॥इत्यनेनतत्कर्तृकंसत्रयागास्य
कंकर्म॥बहून्नदक्षिणादिभिर्युक्तं॥इतिख्याप्यते॥तादृशंसत्रंमुनिश्रेष्ठाःमहात्मानःदृढव्रताःसर्वेपिउ
पासंतसेवंतइत्यर्थः॥अनेनवाक्येनएतादृशाःसर्वेपिऋषयःसंमतत्वेनयाजकादिभावंगताःसंतः
तत्कर्मप्रतिष्ठाइतिप्रतीयते॥ व्यासोहंयाज्ञवल्क्यश्चसुमंतुर्जैमिनिस्तथा॥धृतिमान्जाबलिश्चै
वदेवलाद्याश्चभारत॥ के॥ते॥ऋषयः॥इत्याकांक्षायामाह॥ वैशंपायनः ॥व्यासोहंयाज्ञव
ल्क्यश्चसुमंतुर्जैमिनिस्तथा॥धृतिमान्जाबलिश्चैवदेवलाद्याश्चभारतेति॥ अहमित्युक्तेवैशंपा
यनः॥व्यासः॥तस्यगुरुः॥याज्ञवल्क्यः॥यजमानब्रम्हदत्तगुरुः॥ सुमंतुःव्यासशिष्यः॥अथर्वण

वेदप्रवर्तकः॥जैमिनिः॥सोपिव्यासशिष्यः॥सामवेदप्रवर्तकः॥देवलाद्याःस्मृतिकर्तारः॥अन्ये
पिबहवोऋषयः॥अस्मिन्सत्रयागे॥याजकादिभावंगताः॥ रुच्यानुरूपयायुक्तंवसुदेवस्यधी
मतः॥तत्रेप्सितान्ददौकामान्देवकीधर्मचारिणी॥ वसुदेवस्यपत्नीदेवकीईप्सितान्॥काम्यं
तइति॥कामाःपदार्थाः॥पदार्थान्॥सत्रयागार्थं॥समागतेभ्यःब्रम्हदत्तायचददाविति॥ अनेन
दानपात्रता॥तस्यब्रम्हदत्तस्यसिद्धाभवति॥यद्दिशिष्टंवङ्गुणंतदभूच्चनराधिप॥एतस्मिन्नंत
रेप्राप्ताराजानस्तत्रभारत॥सत्रेनिमंत्रितापूर्वंब्रम्हदत्तेनधीमता॥जरासंघोदंतवक्रःशिशुपाल-
स्तथैवच॥पांडवाधार्तराष्ट्राश्चमालवास्तंगणास्तथा॥रुक्मीचैवाहृतिश्चैवनीलोनार्मदएवच॥-
विंदानुविंदावावंत्यौशल्यःशकुनिरेवच॥राजानश्चापरेवीरामहात्मानोदृढायुधाः॥आवासिता
नातिदूरेषट्पुरस्यचभारत॥ एतैःश्लोकैरपिपूर्वमेवब्रम्हदत्तेनसत्रार्थंनिमंत्रिताः॥सर्वैराजानःआ
गताः॥इत्यनेनयाज्ञवल्क्यशिष्यत्वेपिवाजसनेयिशाखाब्राम्हणत्वेपि॥सर्वैःऋषिभिःमहाराजेश्च

समागमः॥अस्य निमंत्रणमात्रेण भीताः॥उत्साहवंतश्च स्वयमेव आगताः॥इत्यर्थज्ञापनात्॥ब्र
म्हदत्तस्यायोग्यता॥शंकापि नोद्यते॥ योब्रम्हदत्तः स कृष्णः स हि तस्य विभुः सखा॥इत्यनेन
निकुंभं प्रत्युक्तनारदवचनेन ब्राम्हणाभिमानिनः कृष्णस्य ब्रम्हदत्ते योग्यताविशिष्टत्वेनाभिमानः
तस्य विभुः सखेति॥तस्य॥कृष्णस्य॥विभुः स्वामी॥ब्रम्हदत्तः नियंतेत्यर्थः॥सखा मित्रं च पितुः स-
खेति॥ पाठे वसुदेवस्य मित्रं॥ब्रम्हदत्त इति स्पष्टार्थः॥वसुदेवस्य अयं सखा अयं सहाध्यायी इत्य-
भिमानः॥वसुदेवाश्वमेधयाजकत्वेन तत्पुरोहितवंशकोटौ प्रविष्टत्वेन चाभिमानश्च॥कृष्णाश्रितत
या वर्तते॥अयमर्थः ब्रम्हदत्तेनैव निकुंभं प्रति॥बलान्नैव प्रदास्यामि देवकीपुत्रमाश्रितः॥इति कं
ठत एव कृष्णाभिमानवत्वं प्रतिपादितं॥हि यस्मात् ब्रम्हदत्ते एवं कृष्णाभिमानो वर्तते॥तस्मात्
योब्रम्हदत्तः स कृष्ण इति निकुंभं प्रति नारदेनोक्तं॥शतानि पंच भार्याणां ब्रम्हदत्तस्य धीमतः॥आनी
ता वसुदेवस्य सुतस्य प्रियकाम्यया॥शतद्वयं ब्राम्हणीनां राजन्यानां तथा शतं॥वैश्यानां शतमेकं च

शूद्राणां शतमेव च ॥ ताभिः शुश्रूषितो धीमान् दुर्वासा धर्मवित्तमः ॥ इत्यादिश्लोकेषु वसुदेवस्येति षष्ठीविभक्तेः तृतीयार्थकत्वात् वसुदेवेन आनीता इत्य
र्थ धीमतः ज्ञानवतः ॥ बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ॥ इति प्रमाणेन ज्ञानशब्देन आत्मज्ञा
नं विवक्ष्यते ॥ तस्मात्मज्ञानवतः ॥ ब्रम्हदत्तस्य समर्पणार्थं भार्याणां शतानि आनीतानीति लिंगव्यत्यासः
अभिप्रेतो लक्ष्यते ॥ भार्याशब्देन भविष्यत्कालप्राप्यभार्यात्वविवक्षा लक्ष्यते ॥ अन्यथा शब्दार्थानुपपत्तिः
संभवति ॥ तस्मात् ब्रम्हदत्ताय आत्मज्ञानवते ॥ दानयोग्याय कर्माधिकारिणे ॥ भार्यार्थं पंचशत कन्याः
वसुदेवेन दत्ता इति तात्पर्यार्थः ॥ सूचितो भवति ॥ अत एव सुतस्य प्रियकाम्यया इत्युक्तं ॥ किमर्थं वसुदे
वेन ब्रम्हदत्ताय एताः कन्याः दत्ताः ॥ इत्याकांक्षायां ॥ सुतस्य कृष्णस्य परमेश्वरस्य प्रियकाम्यया ॥ परमे
श्वरप्रीत्यर्थमिति तात्पर्यार्थः ॥ अपि च ॥ परमेश्वरस्य कृष्णस्य ब्राम्हणेषु कर्माधिकारिषु ॥ ज्ञानवत्सु प्रीतिः
स्वत एव वर्तते ॥ तथा च ॥ प्रियो हि ज्ञानिनोत्यर्थं अहं स च मम प्रिय इति गीतावचनात् ॥ तस्मात् ॥ तस्त्री

त्रय
स्यर्थं वसुदेवः॥ पंचशतानि कन्याः॥ पात्रे ब्रम्हदत्ताय दत्तवानिति युक्तं भवति॥ शतद्वयं ब्राम्हणीनां रा
ज न्यानां तथा शतं॥ इत्यनेन वसुदेवकुलोत्पन्नाः अपि कन्याः काश्चन॥ दत्ता इत्यपि॥ संभाव्यते।
एतावता॥ ब्रम्हदत्तस्य॥ कन्याग्रहणादियोग्यतापि समीचीनतया वक्तुं शक्यते॥ निकुंभादिसंहा
रानंतरं॥ एतस्मिन्नेव हरिवंशे षट्पुरवधे विष्णुपर्वणि चतुश्चत्वारिंशदधिकशततमाध्याये॥ अ
ददत्सांडवेयेभ्यः प्रीतात्मा गदपूर्वजः॥ तदेव चाथ ?वरं षट्पुरं पुरवर्धनः॥१००॥ द्विजाय ब्रम्हदत्ता
य ददौ तार्क्ष्यवरध्वजः॥ सत्रे समाप्ते च तदा शंखचक्रगदाधरः॥१०१॥ इत्यादिना॥ योधयित्वा ददौ
भूरिवित्तं वस्त्राणि चात्मवान्॥ मातापितृभ्यां सहितो यदुभिश्च महाबलः॥१०४॥ अभिवाद्य ब्रम्हद
त्तं ययौ द्वारवतीं पुरीं॥ सविवेश पुरीं रम्यां हृष्टपुष्टजनाकुलां॥१०५॥ इत्येतैः वचनैः ब्रम्हदत्ताय प्रवरं श्रे
ष्ठं॥ षट्पुरं तन्नामवद्देशविशेषं॥ ससीमा भूम्यादिकं अग्निहोत्रादिकर्मनिर्वर्तनार्थं कृष्णः दत्तवान्॥
इति प्रतिपादनेन ब्रम्हदत्तस्य भूदानपात्रत्वं प्रतीयते॥ एतावता भारतस्थ हरिवंशग्रंथे विशेषे

णापियाज्ञवल्क्यस्यतच्छिष्यस्यवाजसनेयिशाखाब्राम्हणस्यब्रम्हदत्तस्यचकन्याग्रहणयोग्यता॥
याजकत्वाध्यापकत्वसर्वदानपात्रत्व॥याज्यत्वाध्याप्यत्व॥दातृत्वप्रतिग्राहकत्वादि॥ब्राम्हणयो
ग्यतायाःसत्वात्॥अतएव॥बह्वन्नंबहुदक्षिणमितिसत्रस्य॥विशेषणोपपादनेनसर्वेपिऋषयःसर्वे
पि॥ब्राम्हणाःसर्वेपिक्षत्रियाः॥तत्सत्रयागेनित्यंभोजनंकृतवंतइत्युक्तेनापि॥वाजसनेयिब्राम्हणगृ
हेभोजनंनकर्तव्यमिति॥इदानीतनमूढव्यवहारोपि॥असूयानिमित्तकइतिनिश्चितोभवति॥एवंस
तिव्यासादिमहर्षिभिः॥श्रीकृष्णवसुदेवधर्मराजप्रभृतिभिर्महाराजैः॥अन्यैश्चबहुब्राम्हणैःसह॥
याज्ञवल्क्यब्रम्हदत्तादीनांचंडालत्वेसति॥यजनयाजनदानप्रतिग्रहाध्ययनाध्यापनकन्यादानप्र
तिग्रहादियोनिसंबंधभोजनप्रतिभोजनादिसर्वव्यवहारोपिकथंघटेत॥अपिच॥पूर्वस्मिन्ग्रंथे॥एक
तेहमुनिश्रेष्ठान्वेदभाष्यार्थकोविदान्॥कन्याहिममयादेयात्ताश्चसंकल्पितामया॥१८॥अंतर्वेद्यांप्र
दातव्याःसदृशानामसंशयं॥रत्नानितुप्रयच्छामिसांत्वेनाहंविचिंत्यतां॥१९॥इत्यादिश्लोकैःनिकुंभंप्र

ति ममकन्याः पूर्वमेव देयत्वेन संकल्पिताः॥ तास्तु॥ अंतर्वेद्यां सहस्राणां गोत्रप्रवरादिशास्त्रोक्तगु
णयुक्तानां॥ सत्रयागदक्षिणात्वेन॥ ऋत्विजां देयाः॥ देयत्वेन पूर्वमेव संकल्पिता इत्यभिप्रायः॥ ब्र
म्हदत्तेनैव॥ कंठत एवमुक्ताः॥ ततः कन्यादानं॥ महर्षिभ्यः॥ ऋत्विग्भ्यः॥ कृतमिति प्रतीयते॥ अयम
र्थः॥ उत्तरत्र नारदेन निकुंभं प्रति उक्तवचनेस्पष्टतया दृढीकृतो भवति॥ तथा च निकुंभं प्रति नारदव
चनं॥ स्वेस्वे स्थिता वर्णधर्मे यथावदनुपूर्वशः॥ ताः कन्याभ्रैमसुख्यानां दत्ताः प्रायेण धीमता॥ ५१॥
इत्यादिश्लोकैश्च॥ ब्रम्हदत्तेन ताः कन्याः भ्रैमसुख्यानां ऋत्विजां दत्ता इति निश्चयो भवति॥ एतावता
ऋत्विग्भ्यो ऋषिभ्यः॥ कन्यादानं कृतमिति॥ ब्रम्हदत्तेन वसुदेवात्॥ कन्याप्रतिग्रहः॥ कृत इति च प्र
तीयमानत्वात्॥ कन्यादानप्रतिग्रहरूपयोनिसंबंधो विश्वस्तैः ब्राम्हणराजन्यादिभिश्च सह॥ कृत इ
त्यनेनापि॥ याजनाध्यापनाद्यौनात्॥ सद्यः पतति नान्यथेति॥ मनुवचनानुसारेण॥ याज्ञवल्क्यतत्कि
ष्यादीनां॥ महर्षिमहाराजादिभिः॥ यजनयाजनाध्ययनाध्यापन॥ कन्यादानप्रतिग्रहरूपयोनिसं

बंधादि॥ व्यवहारः सर्वैर्योग्यैः सर्वसंमतत्वेन प्रवृत्त इति प्रतीयमानत्वात्॥ याज्ञवल्क्यादेः शापः तद्
युक्तायोग्यता च नास्तीति निश्चयः संभवति॥ किंच॥ तादृशायोग्यतासत्वे सर्वज्ञस्य परमेश्वरस्य॥ श्री
कृष्णस्य व्यासस्य वा॥ शापप्रदातुः वैशंपायनस्य वा॥ एतादृशशापज्ञानसत्वे सर्वसंमतत्वेन याज्ञ
वल्क्यतच्छिष्यादिभिः॥ पूर्वोक्तस्य व्यवहारं॥ वैशंपायनव्यासकृष्णादयः कथं कुर्युः॥ तस्मात् शापग्र
स्तत्वेन॥ चंडालत्वादिप्रतिपादककालिकाखंडवाक्यं॥ केनचित् कल्पितमेवेति सिद्धांतः क्रियते॥
अन्यथा ब्रम्हदत्ते ति विख्यात इति॥ विशेषेण ख्यातः विख्यातः॥ विशेषेणेति सर्वदेशेषु॥ सर्वकालेषु॥
याज्ञवल्क्यशिष्यत्वेन अश्वमेधयाजकत्वेन श्रीकृष्णपुरोहितवंशकोटिप्रविष्टत्वेन॥ वसुदेवेन दत्तक
न्याप्रतिगृहीतृत्वेन आत्मज्ञानवत्वेन स्वयं सत्रयागानुष्ठातृत्वेन॥ श्रीकृष्णनमस्कार्यत्वेन॥ कृष्णेन द
त्तभूदानप्राप्तत्वेन बहुसद्गुणैः विशिष्टत्वेन च॥ लोके विख्यातः॥ प्रसिद्ध इति॥ वेदतुल्यमहाभारतादि
षु॥ ऐदंपर्येण ब्रम्हदत्तमाहात्म्यप्रतिपादनेन॥ याज्ञवल्क्यस्यापि॥ शापप्रयुक्तायोग्यताभावपूर्वक-

सर्वश्रेष्ठत्वंयाजकत्वंअध्यापकत्वंसर्वमहर्षिभिः यजनयाजनादिसव्यवहारयोग्यत्वं॥ इत्यादिसर्व
श्रेष्ठ्यंप्रतिपादितंयत्॥ तत्॥ अत्यंतासंगतंभवेत्॥ अपिचवैशंपायनस्तु॥ ब्रम्हदत्तसत्रयागार्थंस्तेम
हर्षयः॥ संमतत्वेनागताः संतः॥ सत्रंसेवितवंतः॥ इत्यभिप्रायेणउक्तवाक्येषु॥ अहमितिस्वयंवैशंपा
यनः॥ व्यासजैमिन्यादयः॥ आगताइतिस्वयमेवउक्तवान्॥ यदि॥ याज्ञवल्क्यस्यवैशंपायनेनैवशापोद
त्तश्चेत्॥ तादृशवैशंपायनः॥ अन्येचमहर्षयः॥ सर्वेपि॥ याज्ञवल्क्येनसह॥ तच्छिष्यसत्रयागंप्रति॥ आग
त्यबहून्नंबहुदक्षिणमिति॥ वाक्यानुसारेणयाजकत्वं॥ प्राप्य॥ अन्नभोजनादिकंकृत्वा॥ कथंवा॥ तैः
याज्ञवल्क्यब्रम्हदत्तादिभिः॥ तस्मिन्श्रौतेकर्मणिसव्यवहारंप्राप्नुयुः॥ किंचब्रम्हज्ञानिनो॥ वसिष्ठ स्या
पि॥ विश्वामित्रेणसहविरोधात्॥ विश्वामित्रस्यब्रम्हऋषित्वंवक्तव्यमिति॥ ब्रम्हादिभिःप्रार्थितोपि॥ ब
हुकालं॥ असूयया॥ तथानोक्तवान्॥ इतिशास्त्रीयाद्यारव्यायिकावर्तते॥ एवंस्थितेवैशंपायनेन॥ श
प्तःयाज्ञवल्क्यः॥ आगतश्चेत्॥ तेनसह वैशंपायनः॥ कथंवात स्कर्मणिप्रविष्टःस्यात्॥ किंच॥ तच्छि

प्र॰श्रा॰
११९

ष्ययागेवा कथं स्वयं प्रवर्तेत॥ किंच॥ तस्यगुरोः॥ व्यासस्य तच्छिष्याणां सुमंतुजैमिन्यादीनां वा॥ ताहृश-
शस्य चंडालरूपया ज्ञवल्क्य तच्छिष्य ब्रम्हदत्तादिभिः सह॥ कथं वा सत्रयाग कर्मणि॥ प्रवर्तेरन्॥ अन्येवा-
स्मृतिकर्तारः॥ देवलादयः महर्षयः॥ महात्मानः॥ दृढव्रताः॥ इत्यादि विशेषण विशिष्टाः॥ तद्यागे॥ प्रवर्ते-
रन्॥ किंच॥ जगदीश्वरः॥ कृष्णः॥ एतद्याग संरक्षणं कृत्वा तन्निमित्तमेव राक्षसान् हत्वा॥ तस्द्गुरभू-
म्यादिकं॥ ब्रम्हदत्ताय दत्वा स्वमातापितृद्वारा॥ ब्रम्हदत्ताय॥ यागार्थापेक्षित पदार्थान् कन्याश्च दापयि-
त्वा॥ सत्रसमाप्त्यनंतरं॥ मातापितृभ्यां सहितो यदुभिश्च महाबलः॥ अभिवाद्य ब्रम्हदत्तमिति॥ ब्रम्हदत्तं
नत्वा॥ द्वारकां प्रतिगतवानित्यादि॥ वैशंपायन वचनरूप भारतं वा॥ कथं संगच्छेत॥ किंच पूर्वमेव॥ ब्र-
म्हदत्तेन॥ यागार्थं निमंत्रिताः॥ सर्वदेश राजानः॥ कौरवाः पांडवाः शिशुपाल दंतवक्र शल्य शकुनि भगद-
त्तादयः॥ प्रसिद्धा राजानः॥ स्वयमेव यागार्थं आगता इत्यपि॥ याज्ञवल्क्य तच्छिष्ययोः शापग्रस्तत्वेनाये-
ष्यत्वे कथं संभवेत॥ प्रस्तुत॥ महाभारते॥ हरिवंशे त्रिषष्ट्यधिक शततमाध्याये॥ कश्चिद्धर्म निरूपणप्र-

त्तावे ॥१३॥ सर्वे ब्रम्ह वदिष्यंति सर्वे वाजसनेयिनः ॥ इत्यत्र ॥ नीलकंठीयव्याख्यानं ॥ सर्वे ब्रम्हवादकु
लेन कर्मभ्रष्टा भविष्यंतीत्यर्थः ॥ सर्वे वाजसनेयिनः इति ॥ शाखांतरलोपात् ॥ तेन वेदत्रयसाध्यो
यज्ञ उच्छिन्नो भविष्यतीति भावः ॥ इदानीमेव पश्चिमदेशे तथा दर्शनात् ॥ इत्युक्तं ॥ औत्तरीयकाश्मीरी
य प्राचीनव्याख्याने तु ॥ सर्वेषां ब्रम्हज्ञानाभावेपि ॥ सर्वे जनाः ब्रम्ह वदिष्यंति ब्रम्हज्ञानिवत् ॥ वाचा ब्र
म्ह वदिष्यंति ॥ एवं सर्वेपि ब्राम्हणाः ॥ वयं वाजसनेयिनः ॥ याज्ञवल्क्यशिष्याः ॥ तच्छाखाप्रविष्टाः ॥ वयं वे
दांतिनः ॥ अस्मच्छाखाप्रविष्टबृहदारण्योपनिषत्प्रतिपादितार्थस्यैव वेदांतज्ञानजनकत्वेन तस्यां उप
निषदि स्पष्टतया प्रतीयमानत्वात् ॥ तदर्थस्याविष्करणाय ॥ व्यासेन स्वसूत्रैः सूत्रितं ॥ भगवत्पा
दाचार्येण भाष्ये विशदीकृतं ॥ व्याख्याकर्तृभिः ॥ आनंदगिरीयाचार्यैः ॥ स्फुटं व्याख्यातं ॥ विद्यारण्य
गुरुभिः पंचदशीप्रकरणे जीवन्मुक्तिप्रकरणे च ॥ ब्रम्हज्ञानं प्रति ॥ बृहदारण्योक्तरीत्या ॥ याज्ञवल्क्येन
जनकायोपदिष्टक्रमेणैव श्रवणमनननादिहेतुबलेन च ॥ वाजसनेयिशाखायाः मुख्यप्रयोजकत्वेन श्रे

षां॥अतः॥भगवत्पादाचार्यस्य साक्षाच्छिष्यभूतसुरेश्वराचार्यनामकवार्तिककारैः॥बृहदारण्यवार्ति
काख्यग्रंथः॥बहुसहस्रसंख्याकः कृतः॥तस्य व्याख्यानं भाष्यव्याख्याकर्त्रानंदगिरीयाचार्यैः॥वा
र्तिकस्य द्वादशसहस्रसंख्याकग्रंथात्मकव्याख्यानं कृतं॥विद्यारण्यगुरुभिरपि अयमर्थः बृहदार
ण्यवार्तिकसाराख्यग्रंथे प्रतिपादितः॥इति सर्वैः ब्राम्हणैः अयमर्थो ज्ञायत एव॥याज्ञवल्क्यस्य सर्व
श्रेष्ठत्वं तदुपनिषदः ब्रम्हज्ञानजनकत्वेन तच्छाखायाः सर्वापेक्षया श्रेष्ठत्वं अर्थात् सर्वशास्त्रेषु सूच्यते।
इत्यादिभिः हेतुभिः सर्वेपि ब्राम्हणाः॥वयं वाजसनेयिनः ब्रम्हज्ञानिनः इत्यादिवादैः वस्तुतो अज्ञानिनोपि
वयं ज्ञानवंत इति विवदंति इत्यभिप्रायेण सर्वे वाजसनेयिन इत्युक्तं॥पूर्वार्थे सर्वे ब्रम्ह वदिष्यंतीति ब्रम्ह
ज्ञानाभावेपि॥यथा ब्रम्ह वदिष्यंति॥तथैव ज्ञानाधिकाराभावेपि॥ब्रम्हज्ञानजनकसंनिहित॥साध
नभूतबृहदारण्यरूपवाजसनेयिब्राम्हणात्मकवेदाध्ययनतदर्थविचारसंपादितब्रम्हज्ञानिनः वयमि
ति॥स्वेषु अभिमानं॥कुर्वंतीति तात्पर्यार्थः॥पूर्वपादगतब्रम्ह वदिष्यंतीति सन्निभिव्याहारसामर्थ्यात्

अवगम्यते॥द्वितीयपादेक्रियापदाभावात्॥पूर्वपादगतस्यैववदिष्यंतीतिक्रियापदस्यदेहलीदीपन्या
येनअत्रापिप्रयोज्यमानत्वात्॥वयंवाजसनेयिनः॥इतिवदिष्यंतीत्यन्वयः॥वदिष्यंतीत्यनेन॥यथाअभि
वदनमात्रमेवनतु॥तादृशज्ञानमस्ति॥एवंवाजसनेयात्मकशतपथब्राम्हणांतर्गतबृहदारण्याध्ययन
तदर्थश्रवणमनननिदिध्यासनादिना॥परोक्षज्ञानमात्राभावेपिवयंवाजसनेयिनः॥इत्यभिवदनेनब्र
म्हसाक्षात्कारंप्राप्तवंतइति॥अभिमानंप्रदर्शयंति॥बृहदारण्येतावत्॥यत्साक्षादपरोक्षाद्ब्रम्हयआत्मा
सर्वांतरः॥सर्वंतंपरादाद्योन्यत्रात्मनोसर्ववेद॥आत्मनिखल्वरेदृष्टेश्रुतेमतेविज्ञातेइदंसर्वंविदितं
भवति॥ अस्थूलमनण्वह्रस्वं॥अथातआदेशोनेतिनेतीत्यादिब्रम्हसाक्षात्कारजनकसन्निहित
हेतुलिंगादिप्रतिपादकत्वात्॥एतच्छाखावेदस्यैवमुख्यतयाब्रम्हज्ञानजनकत्वेनसूतसंहितावि
ष्णुपुराणब्रम्हसूत्रादिप्रस्थानत्रयभाष्यव्याख्यानवाचस्पत्यवार्तिकपंचदशीप्रकरणजीवन्मु
क्तिप्रकरणादिषु॥साक्षात्कारजनकत्वेनएतेषांवाक्यानांमुख्यतयापरिगृहीतत्वात्॥अतएव

विष्णुपुराणेएतत्समानप्रकरणेकलिधर्मप्रतिपादनप्रस्तावे॥सर्वेब्रम्हवदिष्यंतिसंमासेतुकलौयुगे॥न
नुतिष्ठंतिमैत्रेयशिश्नोदरपरायणाइति॥ननुसर्वेब्रम्हवदिष्यंतिसर्वेवाजसनेयिनइति॥वाक्यस्यएवं
प्रकारेणत्वया॥अर्थःकृतःसतु॥समीचीनार्थोनभवति॥वाजसनेयिनइतिकर्तृपदपेक्षितकर्मक्रिया
पदयोः॥असत्वात्॥सर्वेवाजसनेयिनः॥ब्रम्हवदिष्यंतीतिअन्वयःकिंनस्यात्॥इतिचेन्न॥सर्वेब्रम्हवदि
ष्यंतीतिपूर्वपादेसर्वेवाजसनेयिनइति॥उत्तरपादेच॥सर्वशब्दयोःमध्ये॥एकस्यसर्वशब्दस्यआनर्थ
क्यंदुर्वारोभवति॥कर्मक्रिययोश्चअध्याहारत्वंउभयपक्षेप्यपेक्षितंभवति॥तत्रपक्षेएकस्यसर्वशब्द
स्यआनर्थक्यपरिहारः॥कथमितिचेत्॥पूर्वपादेतुसर्वइतिशब्देनसर्वेजनाः॥मनुष्यमात्राःविवक्ष्यं
ते॥उत्तरपादेतुब्राम्हणाआगताः।परिव्राजकाः॥आगताः॥ऋषयः॥आगताः॥वसिष्ठोप्यागतइ-
तिवत्॥ब्राम्हणपरिव्राजकन्यायादिदृष्टांतेनवाजसनेयिनइति॥वाजसनेयिशब्दस्य॥वेदांतश्रा
नवत्वगुणयोगात्॥गौण्यावृत्त्यासर्वब्राम्हणलक्षकत्वंपूर्वपादेच॥सर्वेजनाः॥मनुष्याः॥कलौब्र

म्हवदिष्यंति।।इत्यन्वयस्य।।लब्धत्वात्।।उत्तरपादात्मकवाक्यस्यवाजसनेयिनइत्युक्ते।।सर्वेब्राम्हणाः
वयंवाजसनेयिनइति।।वाजसनेयिशब्दस्य।।वेदांतज्ञानिलक्षकत्वाभिप्रायंकृत्वा।।वयंवाजसनेयिन
इति।।वयंवेदांतिनइत्यभिप्रायेणवदिष्यंतियथाअब्रम्हवेदिनोपि।।वयंब्रम्हवेदिनइति।।सर्वेमनुष्याः
ःब्रम्हविद्याभिमानेन।।ब्रम्हवदिष्यंति।।तथासर्वेब्राम्हणाअपि।।वाजसनेयिशब्दलक्ष्यवेदांतिनः
वयमितिवदिष्यंति।।अत्रक्रियापदस्य।।पृथक्तया।।असत्वात्।।देहलीदीपन्यायेन।।पूर्वपादस्थ।।
वदिष्यंतीतिपदस्यअध्याहार्यत्वंभवति।।अत्रतुवयंवाजसनेयिनइति।।अध्याहृतइतिशब्दार्थएव
कर्मस्थानापन्नोभवति।।एतावता।।वाजसनेयिशब्दस्य।।श्रेष्ठाइति।।तेषामभिप्रेतोत्वर्थःपर्यवसि
तोभवति।।एवमालोच्यविचारेकृतेएतदुक्तंभवति।। कलियुगेसर्वेपिब्राम्हणाःश्रौतस्मार्तादिक
र्मानुष्ठानंकर्तुंशास्त्रीयदानोपासनादिकर्म।।निषिद्धवर्जनादिमनोनिग्रहादिकंकर्तुंच।।आलस्यादि
ना।।अश्रद्धया।।नास्तिक्यबुध्याच।।अशक्ताःसंतः।।सत्पुरुषैःस्वेषांनियत्वापनोदनार्थंवयंवेदांतिनइति

वेषपरिग्रहेण॥तद्विडंबनार्थंदशोपनिषदध्ययनं कृत्वाआपादतोतदर्थान् अन्यैः अल्पज्ञैर्वाख्याभ्यस्थ
यत्किंचित्॥काव्यादिज्ञानेनवा॥ज्ञात्वाभ्रांतिरूपअन्यथाज्ञानमेव॥सम्यज्ज्ञानमितिमन्वानाःतासांउ
पनिषदांमध्येबृहदारण्योपनिषदमेवप्रधानतयाश्रेष्ठांज्ञात्वातदध्ययनबलादेववयंवेदांतिनःइति
गौण्यावृत्त्यावेदांतिशब्दस्यवाजसनेयिलक्षकत्वेन वयंवाजसनेयिनइतिअभिमानेनकर्मत्यागंकृत्वा॥श
ब्दमात्रेणब्रम्हवदिष्यंतीतितात्पर्यमिति॥ अतएव॥यथालोकेराज्ञःमनुष्यश्रेष्ठत्वं॥सिद्धमितिसर्वैः
ज्ञातत्वेनश्रैष्ठ्यप्रतिपादनविषये॥अहंराजा॥त्वंराजावा॥अयंराजा इत्यादिश्रैष्ठ्यप्रतिपादनाभिप्रायेण
व्यवहारःप्रवर्तते॥तथावाजसनेयिशाखायाः वेदांतज्ञानसाक्षात्साधनत्वेनपूर्वोक्तरीत्यासिद्धत्वज्ञाना
त्॥तद्गुणमादायप्राकृतआंध्रकर्णाटकादिभाषयारचितवेदांतपदार्थप्रतिपादकवाक्यपठनादेववयं
वेदांतिनइतिअभिप्रायेणवयंवाजसनेयिनइतिवदंति॥इतोपिहेतोः॥वाजसनेयिनांश्रेष्ठत्वप्राप्त्या
नन्यूनतासिद्धिर्भवति॥तस्मात्वाजसनेयिब्राम्हणानांयाज्ञवल्क्यादिकात्यायनांतानांऋषीणां॥वे
पं॰२वेदांतिनइतिप्राकृताःयथाभिमन्यंतेतथैवबृहदारण्यादिवाक्यश्रवणमात्रादेववयं यहपगत्ति २

शंपायनदत्तशापप्राप्त्या चंडालस्वरूपायोग्यत्वप्रयुक्त॥तद्वारिविनां वाजसनेयिब्राम्हणानांच॥अयोग्यत्व
मितिकेनापिप्रमाणेनकथंचिदपिनसंभवति॥अपितु॥कालिकाखंडीयकल्पित॥वाक्यानुसारिकचिन्मू
ढजनकृतव्यवहारस्यापिअज्ञानविजृंभितभ्रांतिज्ञानसहकृतकालिकाखंडवाक्यव्याजकअसूयैवमहा
कारणमितिनिश्चयःकर्तव्यः॥अपिच॥यजुर्वेदशब्दस्यसामान्यतः॥तैत्तिरीयवाजसनेयिनोः॥उभया
नुगतत्वेनएकार्थकत्वेपि॥प्राचीनबहुग्रंथेषुवाजसनेयिनामेवयजुर्वेदित्वेनइतरशाखायाःतैत्तिरीय
त्वेनच॥प्रायेणमहाग्रंथेषुप्रयोगदर्शनात्॥यजुर्वेदत्वमेवयुक्तंप्रतीयते॥तथापि॥उभयोःशाखयोःयजु
र्वेदत्वेसमानेपि॥नःपक्षस्य॥नकाचिदनुपपत्तिःप्राप्यते॥तथाहि॥अतएव॥बृहदारण्यपंचमाध्याये
द्वितीयखंडभाष्यव्याख्यानावसरेआनंदगिरीये॥यतोयाज्ञवल्क्याद्यजुर्वेदविदःसकाशाद्ब्रम्हचारीसा
मविधिंश्रुणोतिऋक्षुचाध्यारूढंसामगीयते॥त्रिष्वेवच॥वेदेष्वंतर्भूतोथर्वावेदः॥तस्मादर्थात्यजुर्वेदिनो
मुनेः॥शिष्यस्यसामवेदाध्ययनानुपपत्तेर्वेदचतुष्टयविशिष्टेमुनिरित्याह॥इत्यादिनाआनंदगिरीयाचा

र्यैः॥याज्ञवल्क्यस्यद्विराहृत्यायजुर्वेदित्वेननिर्देशःकृतः॥अतःसर्वत्रग्रंथेषु॥प्रायेणशुक्लयजुषएवयजुर्वे
दत्वव्यवहारोदृश्यते॥अतएवशंकराचार्यावतारकालपूर्वकालीनमनुस्मृतिव्याख्यातृमेधातिथिकृ
षिगोविंदराजभट्टभास्करपुत्रकुल्लूकभट्टजयादित्य॥विश्वरूपधरणीधरादिभिः॥मनुस्मृतिव्याख्यानेषु
तत्रतत्रएवं॥यजुर्वेदत्वेन॥शुक्लयजुषएवगृहीतत्वंदृश्यते॥तथाचमनुस्मृतौद्वादशाध्याये॥ मू ॥सर्वे
भूतेषुचात्मानंसर्वभूतानिचात्मनि॥समंपश्यन्नात्मयाजीस्वाराज्यमधिगच्छति॥१॥ अस्यव्याख्यानं
सर्वेति॥सर्वभूतेषुस्थावरजंगमात्मकेषुअहमेवात्मरूपेणास्मिसर्वाणिभूतानिपरमाणुपरिमाणसिद्धा
निमय्येवपरमात्मन्यासतइतिसामान्येनयोयावज्जीवंब्रम्हार्पणन्यायेनज्योतिष्टोमादिकुर्वन्स्वेनराज
ते॥प्रकाशतइतिस्वराट्॥ब्रम्हतस्यभावःस्वाराज्यं॥ब्रम्हत्वंलभते॥मोक्षमाप्नोतीत्यर्थः॥तथाच॥श्रुतिः
सर्वंखल्विदंब्रम्हयजनादिभिःशांतउपासीत॥तथाच॥यजुर्वेदमंत्रः॥ श्लोकः ॥यस्तुसर्वाणिभूतानिआ
त्मन्नेवानुपश्यति॥सर्वभूतेषुचात्मानंततोनविजुगुप्सतइति॥ यद्यपि॥यजुःशब्दःतैत्तिरीयवाजसनेयो

प्रायेणप्राचीनधर्मशास्त्रादिबहुग्रंथेषु॥यजुःशब्दःवाजसनेयिशाखा
भयशाखानुगतएवतथापि॥प्रायेणप्राचीनधर्मशास्त्रादिबहुग्रंथेषु।यजुःशब्दःवाजसनेयिशाखा
यामेवप्रयुक्तःतथा॥उत्तरदेशेपि॥बहुशोलोकव्यवहारोपिदृश्यते॥अतएवविद्यारण्यन्नामकपूर्वाश्र
मविशिष्टचतुर्वेदभाष्यकर्तुःमाधवाचार्यात्।विज्ञानेश्वरादपिप्राचीनकालीनहेमाद्रिधर्मनिबंधनकृ
ता॥ऋग्वेदादिचतुर्णांवेदानांप्रत्येकंसंक्षेपेणऋषिदेवताछंदोविनियोगादिज्ञापकप्रकरणे॥यजुःशब्दे
नवाजसनेयिशाखामंत्राणामेवगृहीतत्वात्॥प्रायेणअत्रैवयजुःशब्दप्रयोगोदृश्यते॥तैत्तिरीयशा
खायाः॥तैत्तिरीयत्वेनबहुशोप्रयोगोदृश्यते॥यद्यपिएतावन्मात्रेण॥वाजसनेयिशाखायाः॥आ
धिक्यमितिनोच्यते॥अपितु॥समानमेव॥तथापिबहुप्रयोगदर्शनात्॥वाजसनेयिशाखायान्न्यू
नतानास्तीतिज्ञाप्यते॥तथाचहेमाद्रौ॥एवंपंचविधंयोगंजपकालेत्वनुस्मरेत्॥होमेचांतजीलेया
गेस्वाध्यायेयाजनेतथेति॥तत्रऋग्वेदमंत्राणां॥अग्निमीळेतिसूक्तस्य॥मधुछंदविश्वामित्रोगायत्री।
इत्युपक्रम्य॥सार्पिरग्निःसर्पागायत्री॥नमोब्रम्हणे॥६४॥४९॥वामदेवोलिंगोक्तास्त्रिष्टुप्॥

क्य

श्री

इत्युक्तं तउत्का॥अथ॥यजुर्वेदमंत्राणां॥इषेत्वा॥१॥१॥प्रजापतिःशाखानुष्टुप्॥धूरसि॥१॥३॥४॥
प्रजापतिर्वाक्॥कुक्कुटोसि॥१॥५॥५॥प्रजापतिर्वाक्॥प्रत्युष्टंरक्षः।१०॥१॥प्रजापतिरक्षः॥अनि
सितोसि॥१॥१०॥१ ॥प्रजापतिस्तुवः॥सवितुर्वः॥१॥२॥३॥प्रजापतिरापः॥उरुविष्णो॥२॥६॥२॥ इ
हतीविष्णुश्चित्रावसोः॥३॥३॥१०॥ऋषयोरात्रिः॥एषतेरुद्रभागः॥३॥६॥१॥प्रजापतीरुद्रः॥इमा
आपः॥४॥१॥२॥प्रजापतीरापः॥अभित्यंदेवं॥४॥६॥३॥प्रजापतिःसविता॥वरुणस्योत्तंभनमसि
॥४॥१०॥७॥प्रजापतिर्वरुणः॥विष्णोरराटं ॥५॥५॥९॥प्रजापतिर्विष्णुः॥उद्दिवंस्तभान ५॥७॥२॥प्र
जापतिरौदुंबरीअयंनोअग्निः॥५॥९॥३॥प्रजापतिरग्निस्त्रिष्टुप्॥देवस्यत्वा॥६॥१॥१॥प्रजापतिर्लिं
गोक्ता॥सुमित्रियान॥६॥५॥४॥प्रजापतिरापः॥कार्षीरसि॥६॥७॥६॥प्रजापतिरापोनुष्टुप्॥नमोसु-
सर्पेभ्यः॥१४॥१॥६॥अश्विनौनरुक्माकृतिः॥ब्रम्हजज्ञानं॥१४॥१॥२॥अश्विनावादित्यस्त्रिष्टुप् शुक्र
ज्योतिः॥१२॥७॥१॥परमेष्टिमरुतउष्णिक्॥सूर्यस्य प्रजापतिः॥परमेष्ठिसूर्यः॥व्याहृतीनांपरमे-

नि॰

ष्ठी प्रजापतिः अग्निर्वायुः सूर्यः प्रजापतयः ॥ उपप्रयंतो बृहद्देवाग्निर्गायत्री ॥ तनूपाअग्ने बृहद्देवाग्निर्गायत्री ॥ एव ते रुद्र भाग इति द्वयोः ॥ यजुषी प्रजापती रुद्रः ॥ प्रथमस्य बृहती साम पङ्क्तिर्वा द्वितीयस्य यजुर्बृहती ॥ अदब्धेन त्वा परमेष्ठि प्रजापति राज्यं ॥ भेषजमसि प्रजापती रुद्रः ककुप् ॥ त्र्यंबकमिति द्वयोः ॥ प्रथमायाः वसिष्ठः ॥ द्वितीयायाः प्रजापतिरुभयोः ॥ रुद्रोऽनुष्टुप् ॥ आकूत्यै प्रयुजे मेधायै दीक्षायै ॥ सरस्वत्यै इत्येषां चतुर्णां मौञ्जभरणानां ॥ प्रजापतिरग्निरासुरी ॥ त्रिष्टुप् यजुः पङ्क्तिर्वा ॥ चिदसि मनासि प्रजापतिः साम क्रयणी गौ ब्राह्मि पङ्क्तिरतिशक्करी वा ॥ अग्नेस्तनूपपरमेष्ठी प्रजापतिर्हविः ॥ दिवो वा विष्णो प्रजापतिर्विष्णुरनुष्टुप् ॥ विष्णो नुकं दिवो वा ॥ प्रतद्विष्णुः ॥ इति तिसृणां प्रजापतेर्विष्णुस्त्रिष्टुभ आद्ये यजुरंते ॥ विष्णो ररा टमिति पंच यजुषां प्रजापतिर्विष्णुराद्यस्य देवी जगती ॥ ततश्चतुर्णां देवी पङ्क्तिः ॥ अग्ने व्रतया प्रजापतिरग्निर्ब्राम्हि त्रिष्टुप् ॥ अयंनः ॥ प्रजापतिरग्निर्ब्राम्हि त्रिष्टुप् ॥ इदमापः ॥ प्रजापतिरापो महापङ्क्तिस्त्रिष्टुव्वसानापवमानसो स्वःपादः देवास्त्वा शुक्रपादे वास्त्वा मंथिपा इत्सनयोः प्रजा

प्र·शा·
२५६

पतिः॥प्रजापतिरापोमहापङ्क्तिस्त्रिष्टुबवसाना पवमानश्वांसः॥ पादः देवास्त्वां शुक्रपां देवास्त्वामंथिपा
इत्सनयोः॥प्रजापतिः क्रमेण शुक्रमंथिनो॥हविर्विधानोग्निर्यजुः पङ्क्तिआदिव्याकुवत्तैमनुःसतौबृह
तियुक्ष्वाहिकेशिनातिमधुछंदाइंद्रोनुष्टुप्॥अग्नेपवस्ववैखानसोग्निर्गायत्री॥उदुसंज्जातवेदसमि
तिदेवासूर्योगायत्री॥उदुसंप्रस्कण्वः॥सूर्योगायत्री॥चित्रंदेवानांकुत्सआंगिर सः सूर्यस्त्रिष्टुप्॥च
त्वारिशृंगापरमेष्ठियज्ञपुरुषस्त्रिष्टुप्॥देवायज्ञंप्रजापतिः॥सरस्वत्यलिंगोक्तानुष्टुप्॥पितृभ्यःप्रजापत्य
सरस्वत्यःपितरः॥वसंतेनऋतुनाप्रजापतिरग्निर्गायत्री॥सुपर्णोसिगरुत्मानित्यस्यप्रजापतिर्गरुत्मान्स्तु
तिः॥द्रप्सदिवेति कोकिलोराजपुत्रोवा॥द्रुपदोवाआपोनुष्टुप्॥शतवंतः॥अथर्वणओषधीनुष्टुप्॥याओ
षधीरित्याद्यानांयेअस्मांअभिदासतीत्यंतानांसप्तविंशतीनांअथर्वणपुत्रोभिषग्ओषधीरापोनुष्टुप्॥अ
श्वावतीर्गोमतीःवसिष्ठःपात्रिष्टुप्॥सीरायुंजंतिभ्यःप्रजापतिसार्पिरग्निः॥प्रजापतिरनुष्टुप्॥कृणुष्व
पाजइतिपंचानांदेवानांवामदेवाग्निस्त्रिष्टुप्॥कांडात्कांडादितिद्वयोरग्निरिष्टिकानुष्टुप्॥अपांगर्भं

न प्रजापतिर्वरुणः पङ्क्तिः॥ इमं मे हिंसीरिति पंचर्चो प्रजापतिरग्निस्त्रिष्टुप्॥ अपां त्वा ओषधयापो यिरनुष्टुप्
नमस्ते रुद्र मन्यव इति रुद्राध्यायस्य प्रजापतिर्वा देवा वा ऋषयः॥ आद्योनुवाकः षोडशर्चो रुद्रो देवतः प्र
थमा गायत्री॥ ततो या ते रुद्र इत्यादि तिस्रोनुष्टुभः॥ असौ यस्ताम्र इत्याद्यास्तिस्रः पङ्क्तयः॥ नमो नीलग्रीवाये
त्याद्याः॥ सप्तानुष्टुभः॥ ततोन्ये द्वे जगती॥ मा नो महांतं मा नस्तोके इति द्वयोः कुत्सोन्यत्पूर्ववत्॥ द्रापे अंधस
स्पत इत्यंतानुवाकानां सप्तऋचः॥ तत्राद्या उपरिष्टाद्बृहती॥ द्वितीया कुत्सर्षेद्दृष्टा जगती तृतीयानुष्टुप्॥ परि णो हेती
रुद्रस्य मील्हुष्टमेति द्वे त्रिष्टुभौ॥ ततो द्वेनुष्टुभौ॥ असंख्याताः सहस्राणीत्याद्याः य एतावंत इत्यंताः॥ दशावता
नासंज्ञकामंत्राः बहुरुद्रा देवत्याः॥ अनुष्टुप्छंदस्काः॥ ततो सानि नमोस्तु रुद्रेभ्यो ये दिवीति त्रीणि यजूंषि
प्रस्वरोहसंज्ञिकानि॥ बहुरुद्रदेवतानि धृतिछंदस्कानि॥ आद्यांत्यानुवाकयोर्मध्ये नमो हिरण्यबाहव इ
त्यादीनि॥ नम आनिर्हतइत्यंतंसर्वाणि यजूंषि तेषां सर्वेषां तिस्रोशीतयो देवताः॥ तेषां मध्ये हिरण्यबाहवे
सेनान्ये दिशां च पतये नम इत्यादि॥ नमः श्वभ्यः श्वपतिभ्यश्च वो नम इत्यंताः मंत्राः॥ उभयतो नमस्काराः॥

प्र॰शा॰
२४६

नमो भवाये त्यादयो॥नमआखिदते प्रखिदते चेत्यंतः॥अन्यतरतो नमस्काराः॥नमः सभाभ्य इत्यादयो जात
संज्ञिकां रुद्राः॥नमो वः किरिकेभ्य इत्याद्याश्चं तस्रो व्याहृति संज्ञिकाः बहु रुद्र देवताः॥अग्निबाहुसूर्यहृदय
भूताः आशुः शिशान इति पंचानां देवा वैश्वानरो अग्निर्जगती पांक्ते ने न प्रजापतिः॥सरस्वत्यो ग्निर्गायत्री॥अ
ग्निश्च पृथिवी च आदित्यो ग्निः॥ब्रम्ह जज्ञानं प्रजापतिरादित्यस्त्रिष्टुप्॥कया नश्चित्र वामदेव इंद्रो जगति सं
वत्सरो सि॥प्रजापतिः प्रजापतिर्गायत्री॥अहिरिव भोगैः प्रजापतिर्हि विस्त्रिष्टुप्॥वहीनां प्रजापतिर्लिंगो
क्तास्त्रिष्टुप्॥युंजति ब्रध्नं मधुछंद आदित्यो गायत्री॥यमेन दत्तं भार्गवो जमदग्नि दीर्घतमस्व स्त्रिष्टुप्॥आ
कृष्णेन हिरण्यस्तूपः सविता स्त्रिष्टुप्॥आ नो मित्रावरुणा गृत्समदो मित्रावरुणो गायत्री॥यज्जाग्रत इति पं
चानां मंत्राणां शिवसंकल्पो मनस्त्रिष्टुप्॥पंच नद्यो गृत्समदो मित्रावरुणो गायत्री॥उं तापिबंतः प्रस्कण्वो—
श्विनो गायत्री॥यदाबध्नो दक्षो हिरण्यंस्त्रिष्टुप्॥इमं देवेभ्यः संकुशिको मृत्युस्त्रिष्टुप्॥फनीमो भारद्वाजः शि
प्रिर्पवरिंद्रस्त्रिष्टुप्॥शंनो मित्रो दध्यंङाथर्वणो लिंगोक्तानुष्टुप्॥मनसः कामं दध्यङाथर्वणः श्रीरनुष्टुप्॥

नि॰

गणानांत्वेतिचतुर्णांयजुषांप्रजापतिर्लिंगोक्तानुष्टुप्॥समास्त्वाअग्निरनुष्टुप्॥शंनोदेविदध्यंङ्ङथर्वण-
गायत्री॥एकाचमेदेवाअग्निर्जगती॥उदुत्तमंशुनःशेपोवरुणस्त्रिष्टुप्॥वनस्पतेवीड्वंगोप्रजापतिर्वनस्प-
तिस्त्रिष्टुप्॥भद्रंकर्णेभिस्तिस्रूणांगोतमोविश्वेदेवास्त्रिष्टुप्॥शंनोमित्रःदीर्घतमइंद्राग्निस्त्रिष्टुप्॥देवकृत-
स्येतिषंप्रजापतिरग्निस्तृष्टुप्॥मानस्तोकेसंकुशिकोरुद्रोजगती॥तद्विष्णोर्मेधातिथिर्विष्णुर्गायत्री॥का-
लेप्रजापतिःकामस्त्रिष्टुप्॥नमःशंभवइत्यादीनांनमोवःकिरिकेभ्यइत्यस्मातत्प्रजापतिःपरमेष्ठीरुद्रस्त्रि-
ष्टुप्॥आनोनियुद्भिःस्त्रियोरुद्रस्त्रिष्टुप्॥त्रातारमिंद्रंप्रजापतिरिंद्रस्त्रिष्टुप्॥बृहस्पतेअप्रतिरथइंद्रस्त्रिष्टुप्॥
वयंसोमबंधुःसोमोगायत्रीतमीशानंगोतमोविश्वेदेवागायत्री॥स्योनापृथिवीमेधातिथिःपृथिवीगाय-
त्री॥वरुणस्योत्तंभनमसि॥प्रजापतिर्वरुणः॥समुद्रायत्वदध्यंङ्ङथर्वणोवाताः॥पुनंतुमादेवाःप्रजापति-
अदितिर्द्यौःगोतमोविश्वेदेवास्त्रिष्टुप्॥पितुंनुस्तोषंअगस्त्योन्नमुष्णिक्॥सनःपितेवंविश्वामित्रोमधुछं-
दाग्निर्गायत्री॥विश्वेदेवासआगतःगृत्समदोविश्वेदेवागायत्री॥विश्वतश्चक्षुर्विश्वकर्माभौवनोविश्व-

प्र॰ शा॰
३५७

कर्मस्त्रिष्टुप्॥यवोसिप्रजापतिर्यवसामोष्णिक्॥तेजोसि परमेष्ठिप्रजापतिः॥देवानाप्रजापति र्वा॥आज्यं
वा॥ ये देवाः मनोजाताः॥वाक्प्राणापानौ॥आयुष्यं वर्चस्यमितितिसृणांदक्षो हिरण्यं क्रमे णोष्णिक्॥
शक्करीस्त्रिष्टुप्॥तंयज्ञंनारायणपुरुषाः पुरुषोनुष्टुप्॥सप्तर्षयोध्यात्मवादीनिजगती॥उपह्वरे गिरीणां व–
त्सोग्निर्गायत्री॥शन्नइंद्राग्निदध्यंङाथर्वणलिंगोक्तात्रिष्टुप्॥इंद्रंविश्वामधुछंदइंद्रोनुष्टुप्॥अभित्वा देवं
प्रजापतिःसविताअष्टिरग्निर्गायत्री॥ध्रुवासि प्रजापतिरौदुंबरीअग्निर्दूतंविरूपोग्निर्गायत्री॥ऋचं वाचं
दध्यंङाथर्वणःलिंगोक्ताः॥ईशावास्यंदध्यंङाथर्वणः आत्मानुष्टुप्॥सप्तते अग्ने सप्तर्षयोग्निस्त्रिष्टुप्॥यद
क्रंद इतित्रयोदशानांभार्गवोजमदग्निरश्वस्त्रिष्टुप्॥आब्रह्मन्प्रजापतिर्ब्रह्मायजुः॥सजोषसइंद्र विश्वामित्रइंद्र
त्रिष्टुप्॥कार्षिरसि अधर्वाज्योतीरस्तुप्॥विश्वावसोः स्वस्तितइतिऋषयोरात्रिः॥उद्दिवंप्रजापति रौदुंबरी॥शंयु
वा. हस्यइंद्रोनुष्टुप्॥आयंगौःसर्पिरग्निपरापररूपेणसर्पागायत्री॥सुमित्रियानःप्रजापतिरापः॥दुर्मित्रि
यानस्तथा॥पृथिविदेवयजनं परमेष्ठीप्रजापतिः॥ देवावाप्रजापतिर्वा वेदिं विश्वकर्मा विमाना॥विश्वकर्मा

सा॥

त्रिष्टुप्॥ सुत्रामाणं गयस्नानअदितिस्त्रिष्टुप्। आहं पितॄन् शंखः परमेष्ठोत्रिष्टुप्॥ नमोस्तु नीलग्रीवाय परमेष्ठी
रुद्रोनुष्टुप्॥ परिणोरुद्रस्यपरमेष्ठोत्रिष्टुप्॥ विकिरिद्रविलोहितऽपरमेष्ठीरुद्रोनुष्टुप्॥ उपप्रागाद्दीर्घंतम
सस्त्रिष्टुप्॥ इंद्रसुत्रामा॥ प्राजापत्यअश्विनोसरस्वती युंजत इत्यनुवाकस्यवाष्कः सावित्री वायुर्जगती
॥इदंविष्णुर्मेधातिथिर्वैष्णवीगायत्री॥इरावतीवाशिष्ठोविष्णुस्त्रिष्टुप्॥देवश्रुता॥ विश्वदत्ताप्राचीस्थंमै
ष्टमत्रीहविस्थाने॥विष्णोर्नुकमितितिस्रोवैष्णव्यस्त्रिष्टुभः॥अथ कूश्मांडमंत्राः॥ यद्देवायदिवायदि
जाग्रदिति। तिसृणांप्रजापति ऋषिः। क्रमेणाग्निवायुसूर्यादेवताः॥ सर्वासामनुष्टुप्॥ यद्वानोइत्येत
द्यजुर्लिंगोक्तादेवता॥ समुद्रेनेद्विपदाविराड्देवी दिवि॥ द्रुपदादिवं प्रजापतिरापोनुष्टुप्॥ उद्वयमितिप्र
स्कण्वः सूर्योनुष्टुप्॥ ये अघान्वचारुषमिति॥ प्रजापतिरश्विः पंक्तिः॥एधोसिसमिदसीत्येतेसमिद्देवते
यजुषि॥ समावववर्तीत्यस्याः अग्निरनिरुक्तागायत्री॥वैश्वानरज्योतिरितिवैश्वानरःपञ्जुःअभ्याददामीति

ऋचस्यआश्वतराश्विरग्निरनुष्टुप्आशुना इत्यस्यसूर्यौनुष्टुप्॥ सिंचंतिपरिषिंचंतीत्यस्याः सूर्यइंद्रो
वानुष्टुप्॥ धनावंतमित्यस्याः विश्वामित्रइंद्रोगायत्री॥ ॥बृहदिंद्रायन्नृमेधपुरुमेधासाविंद्रोबृहस्प
तीतयेमापावकानः सरस्वतीत्यस्यऋचस्यमधुच्छंदाः सरस्वतीगायत्री॥ आविंद्रोर्विश्वामित्रइंद्रो
बृहती॥ ॥प्रसेनानीः सकुशस्कंधः॥ स्कंदस्त्रिष्टुप्॥ ॥पवित्रंतइतिद्वयोरर्कपृष्ठस्कंधोजगतीए
वास्कंदसंहितायायद्वाउपविषन्तिअगस्त्योग्निर्गायत्रीमनादग्नेशृणितिर्यात।धानोगायत्री॥ अस्मन्नमीम
दंतः पमरद्दः पंचपदापङ्क्तिः अविवृष्टः शसुर्वरुणस्त्रिष्टुप्॥ अक्रान्त्समुद्रः वैखानसः सोमस्त्रिष्टुप्॥
कनिक्रंतइतिद्वयोः सोमस्वधास्त्रिष्टुप्॥ एषापिच्यानामसंहतस्तेपंथाअजितस्यजितंधागायत्रीस
तोन्विंद्रश्रुत्स्वियइंद्रोविराट्शुक्रंतेअन्यनुष्टुप्साग्निस्त्रिष्टुप्॥ महतिसोमवसिष्ठः पवमानस्त्रिष्टुप्॥ अग्नि
स्तिग्मेनेतिवामदेवोअग्निर्गायत्री॥ परितोषिंचतसुतमच्छीद्रः॥ ॥सोमोबृहस्पतिपरस्वसोमेति॥ ध

मिंद्रोक्षरपंक्तिः चर्मंमदस्यभारद्वाजइंद्रोबृहती॥घृतवतीतिवरुणोद्यावापृथिव्याश्च निर्जगती॥अ द्यानोदेवसवितः॥
सवृत्सवितागायत्री॥त्रातारमिंद्रमेत्रइंद्रोबृहती॥महित्रीणांवरुणोस्वाहाकृतयइत्येतादेवता॥अग्निरूमधाःप्रथमानेइंद्रोगमत्री
विश्वामित्रस्यबृहदिंद्रायबृहती॥ योभूतानामित्यस्याः नारायणीयकौंडिन्यऋषिः॥ गृह्णमाणा
ग्रहोदेवतापंक्तिश्छंदः॥ आत्माप्रवादरूपायप्राणायामे॥ अश्विनकृतस्येतिद्वे॥अनुष्टुप्उपरिष्टद्
बृहत्यतिलिंगोक्तदैवत्ये॥ समीहइंद्रइत्येकादशानामाप्रीसंज्ञकानामांगिरसऋषिः॥ ऋमे।
णइधासुनूनपात्॥ ॥नाराशं॥ सदृढेहिर्द्वारउषसानक्तदैव्याहोतारत्तिस्रोदेवित्वष्टावनस्पतिः
॥सुवीरावीरंद्वादशकः॥ अछिन्नंद्वादशकः॥इतियजुर्विधानं॥ ॥अथसाम्नामृषिदैवतछंदां
सि॥॥ इदंविष्णुःश्छकस्यविष्णोःप्रकाश्यशुभ्रेनेवभूत्राणइतिवागहनं॥पुरुषव्रतेचैषवैष्णवी॥
नामत्रइदंविष्णुःप्रजापतिर्गायत्रीइत्युपकम्यआनिषंगेतिआनिषंगदंद्वः॥नानाछंदांसि॥ बृहत्सा

मनिभारद्वाजइंद्रोजगतीइत्यंतं ॥ ॥इतिसामविधानं ॥ अथर्वणमृषिर्दैवतछंदांसि ॥ शांतातीतगण॥

स्यशांतातीतयाग्वइंद्रस्सर्वाणिछंदांसि ॥ भैषज्यमाणस्यभैषज्यआयुर्विष्णिकु ॥ ॥रौद्रगणस्यब्र

ह्मारौद्रः सर्वाणिछंदांसि ॥ इत्युपक्रम्यमुंचामित्वाइतिसूक्तस्ययक्ष्मनाशनइंद्राग्निस्त्रिष्टुप् ॥ अ

थर्वशिरांसि ॥अग्निरितिभस्म॥ वायुरितिभस्म॥ जलमितिभस्म॥ स्थलमितिभस्म ॥ सर्वंहवाभ

स्मेतिइत्यंतं ॥ अथर्वणविधानं ॥ मचवाजसनेपिशाखायाएवयजुर्वेदत्वं॥ इतरस्यनसंभवतीत्यलिंक ॥ यजुश्शब्दस्यउभयसाधारणत्वादिनिवाच्यं॥अस्मिन्विषयेनःआग्रहोनास्ति॥ किंतुम

नुस्मृतिव्याख्यानवेदांतभाष्यमीमांसाभाष्यधूर्तस्वामिकृतबोधायनसूत्रभाष्यादौप्रायेणतयाद

र्शनात् महाराष्ट्रघूर्जरगौडदेशादिषुचबहुशः यूयंकेइतिविचार्यमाणे ॥ वयंयजुर्वेदिनः ॥ ए

तैत्तरीयाइतिचबहुब्राह्मणानांव्यवहारस्यदृष्टत्वात् तैत्तरीयाःवयंश्रेष्ठाइतिचबहुब्राह्मणानां

एते वाजसनेयिन इति व्य
व्यवहारस्य दृष्टत्वात् तैत्तरीयाः वयं श्रेष्ठा इति मन्यमानाः वयमेव यजुर्वेदिनः
वहारं कुर्वंति ॥ इति हेतोश्च अस्माभिः प्रायः व्यवहारः प्रदर्शितः ॥ वस्तुतस्तु शाखाद्वयस्यापि यजुर्वेद
त्वं समानतया अनुगतमेव ॥ शिष्टानां मन्वादीनां आपस्तंबबोधायनादि ऋषीणां च तद्भाष्यव्याख्यान
कर्तॄणां मेधातिथि कल्लूक भट्ट धूर्तस्वामि शबरस्वामि कपर्दिस्वामि हरदत्तमिश्र माधवाचार्यादीना
मपि सर्ववेदसमताज्ञानं सर्वब्राह्मणसमताज्ञानं वर्तत एवेति उत्तरोत्तरग्रंथेषु भानि स्वकरूपेण तत्तद्व
क्तित्वेन प्रदर्शयिष्यामः ॥ अत्रैव आपस्तंबधर्मसूत्रे द्वितीयप्रश्ने पंचमखंडे सर्वभूतपरिवादान्॥
क्रोशांश्च ॥ इति सूत्रं ॥ अस्य उज्वलाख्यं व्याख्यानं सर्वेषामपि भूतानामपि तिरश्चां परिवादान दोष
वादान् ॥ आक्रोशान् ॥ अश्लीलवादांश्च वर्जयेत् ॥ परिवादस्य पुनर्वचनं ॥ अतिशयेन वर्जनार्थं ॥ वि
द्यया च विद्यानामिति सूत्रं ॥ अस्य उज्वलाख्यं व्याख्यानं ॥ परिवादान्क्रोशान् वर्जयेत् ॥ ऋग्वेद एव श्रोत्रसु
खः ॥ अन्ये श्रवणकटुकाः इति ॥ परीवादः तैत्तरीयकमुच्छिष्ट शाखाः 'याज्ञवल्कीयादीनि ब्राह्मणा,

निइदानीतनानीतिइत्यादिपआकाशः ॥ तानूवजयादीति आपस्तंबनावीक्तत्वात् ॥ तद्व्याख्यायाउज्व
लायामपितथैवव्याख्यातत्वाच्च ॥ अविवेकिनांमनुष्याणामेवपरस्परनिंदोत्कृष्टभावः ॥ वेदनिंदा
शास्त्रानिंदा ॥ ब्रह्माणनिंदास्वोत्कृष्टत्वान्यनिकृष्टत्वादिअभिमानवत्वंसंभवति ॥ ननुदेवानांऋषी
णांमहतांमनुष्याणामपिविवेकिनांविद्यावतांसंभवतिइतिशास्त्रलोकयोः सिद्धएव ॥ अन्यथाश
याज्ञवल्कीयब्राह्मणानांइदानींतनत्वेस्वीकृतेमंत्रब्राह्मणयोर्वेदनामधेयंइतिआपस्तंब
सूत्रोक्तरीत्यातद्ब्राह्मणस्यापिवेदत्वात् ॥ वाचाविरूपनित्ययेतितैत्तिरीय
श्रुत्युक्तरीत्यावेदस्यअनादित्वसिद्धांतविरोधः स्यात् किंचतद्ब्राह्मणस्यआधुनिकत्वेआपस्तंबेन
तद्धर्मसूत्रेब्रह्मयज्ञप्रकरणे ॥ अथापिवाजसनेयिब्राह्मणंभवति ॥ इत्यादिवाक्यैः तद्धर्मसूत्रतच्छौ
तसूत्रतद्गृह्यसूत्रादिषुततद्भाष्यव्याख्यानादिचतत्तद्ग्रंथकर्तृभिश्चबहुशोप्रमाणत्वेनउदाहरणविरोधप्र
संगोदुर्वारः तद्गतबृहदारण्यादिउपनिषद्गतव्यब्रह्मज्ञानेनात्मनः मोक्षाभावप्रसंगः ॥ तद्ब्राह्मणकर्तृ
सत्वेप्रमाणाभावाच्चतैत्तरीयशाखायाउच्छित्वेचतद्वेदेनयागादिकर्मणः ॥ गढुपनिषदुक्तरीत्या

ब्रह्मज्ञानेनमोक्षस्य चासंभवः॥अपिच वेदस्यककारादिअक्षररूपत्वेनतदक्षरात्मकवर्णसमुदायलक्ष
णस्य वेदस्यवमनासंभवात् रक्तात्क्तादिरूपेण वमन विषयत्वप्रतिपादकपुराणादिवचनानां तैत्तरीयश
खोत्पत्तिप्रकारप्रतिपादनेतात्पर्यवत्वेनसोरोदीत् ।यदिरोदीत्॥गावोवाएतत्सत्रमासताइत्याद्यर्थवादवत्
स्वार्थेतात्पर्याभावात्॥अक्षरात्मकवर्णसमुदायस्यरक्तरूपेणपरिणामाअसंभवाच्चएतेषांवाक्यानांस्वा
र्थेतात्पर्याभावेनयत्किंचिद्ज्ञानविशेषज्ञापकत्वविषयेपर्यवसानात् अर्थवादवाक्यतुल्यत्वंएतावन्ता॥
तैत्तरीयशाखावेदस्यवाजसनेयिशाखावेदस्यवा तच्छाखाध्येतृब्राह्मणानांवावाजसनेयिशाखाध्येतृब्रा
ह्मणानांवा उत्कृष्टनिकृष्टभावोवावस्तुतोनसंभवति।परस्परदूषणंतुअनादिकाल प्रवृत्तत्वेनलोकस्वभा
वइतिएतस्मिन्नेवपूर्वग्रंथेजीवन्मुक्तिप्रकरणस्थविद्यारण्योक्तवचनैःप्रदर्शितः।अविवेकिनांतुबालत्वा
त्तद्व्यवहारस्यअनादरणीयत्वमेव॥यथाहगौतमादिधर्मशास्त्रेषुक्रीडाकर्मैवबालानामितिउपनयना
त्प्राक्कामवादकामचारकामभक्ष्याइत्यादिनाबालानांआचरणस्यशास्त्रीयफलसाधनत्वाद्यभावात्॥अ

प्र॰ श॰ २५१

नादरणीयत्वमेवेत्यभिप्रायेणक्रीडाकर्मैवबालानामित्युक्तं॥अतएवश्रुतिरप्याह॥तथाचकठवल्ल्युपनि- नि

षदि॥पराचःकामाननुयंतिबालाः इतितर्कसंग्रहकारेणअन्नंभट्टेनाप्युक्तं॥बालानामुपकारायेति॥बा-

लाः अविवेकिनः नत्रुस्तनंधयइतितेनैवव्याख्यातं अतः अविवेकिव्यवहारस्यअनादरणीयत्वमेव अपि

चकेचित्॥शंकराचार्यैःविद्यारण्याचार्यैःआनंदगिरियाचार्यैःवार्तिकारसुरेश्वराचार्यैः॥विष्णुपुराणभा-

गवतव्याख्यानकर्ताश्रीधराचार्यश्च।एतेसर्वेपिक ण्वशाखाप्रविष्टाःवाजसनेयिनइतिवदंति॥अतएव

शंकराचार्येणबृहदारण्योपनिषदःनवसहस्रसंख्याकग्रंथरूपंभाष्यंकृतं॥वार्तिककारेणसुरेश्वराचार्येण

बृहदारण्यवार्तिकंबहुग्रंथरूपंकृतं॥तथाआनंदगिरियाचार्येणबृहदारण्योपनिषद्भाष्यव्याख्यानमपि

बहुग्रंथंरूपंकृतं।अतएवबृहदारण्यवार्तिकव्याख्यानमपिअतिविस्तृततयाआनंदगिरीयाचार्येणकृतं

अपिच॥आनंदगिरीयाचार्यैःशंकरभगवत्पादकृतप्रस्थानत्रयभाष्यमात्रस्यैवव्याख्यानंकृतमपिवार्तिकस्यभा- २५

ष्यसदृशत्वेनज्ञात्वावार्तिकस्यापिव्याख्यानंकृतं॥विद्यारण्यैरपिवार्तिकसारःकृतः।पंचदशीप्रकरणेजीव

२५.

न्मुक्तिप्रकरणेचविद्यारण्याचार्यैःयाज्ञवल्क्यं स्यमाहात्म्यंप्रतिपादितं भागवतविष्णुपुराणव्याख्यानेषु
चश्रीधरीयाचार्येणयाज्ञवल्क्यकण्वकात्यायनादिमाहात्म्यंबहुशोउपवर्ण्यते अतोपिहेतोः शंकराचार्य
दीनांकण्वशाखाप्रविष्टत्वंप्रतीयतइतिवदंति॥अन्येतुतैत्तिरीयशाखाप्रविष्टाःइतिवदंति॥उभयपक्षेपि
विनिगमकप्रमाणंनपश्यामः॥तथापितेषांशंकराचार्यादीनांकाण्वशाखाप्रविष्टत्वेतेषांवेदशास्त्रार्थ
प्रकाशकत्वात्॥जगद्गुरुत्वेनप्रसिद्धत्वात्॥अस्माकंसर्वेषांतन्नियम्यत्वेनतदभिमतार्थस्यैवअस्मत्संम
तत्वेन॥अस्मत्कीयप्रमाणेतद्ग्रन्थार्थस्यअनुकूलत्वेनअस्मदभिमतार्थसिद्धिरेवभवति॥तेषांतदन्यतैत्तिरी
यादिशाखाप्रविष्टत्वेचअन्यशाखाप्रविष्टैःसर्वज्ञैःसर्वशास्त्रार्थप्रकाशकैऋषियाज्ञवल्क्यादिमाहात्म्य
स्यप्रकाशितत्वात्॥याज्ञवल्क्यादेःउत्कृष्टत्वमर्थसिद्धमितिउभयथापिअस्मदभिमतसिद्धेःनन्यूनताभवति
वस्तुतस्तुविचारेकृतेशंकराचार्यस्यतैत्तिरीयशाखावत्वं॥वार्त्तिककारसुरेश्वराचार्यस्यकण्वशाखावत्वे वि
द्यारण्याचार्यस्यबोधायनशाखावत्वं॥इत्यादिकंप्रतीयते तथाचमाधवनामकविद्यारण्याचार्यकृतकाव्य

प्र० शा

३५२

पषोडशस्वर्गात्मकशंकरविजयेत्रयोदशसंख्याकसर्गेततःकदाचित्प्रणिपत्यभक्तत्यासुरेश्वराचार्योगुरुमात्मदेशंशारीरके
संतगंभीरभावेवृत्तिस्फुटंकर्तुमनाजगादभाष्यमुपक्रम्य भावानुकारिमृदुवाक्यनिवेशितार्थैःस्वीयैःपदैःसहनिराकृत
पूर्वपक्षंसिद्धांतयुक्तिविनिवेशिततत्त्वरूपंदृष्ट्वाभिनंद्यपरितोषवशाद्वोचान्नू६४अस्यव्याख्यानंभावानुसारिभिर्मृदुभिर्वा
क्यैर्विनिवेशितोर्थोयत्रस्वीयैःपदैर्निराकृतःपूर्वपक्षोयत्रसिद्धांतयुक्तिभिर्विनिवेशितंतस्यसिद्धांतस्यस्वरूपंयत्रतंत
दीयग्रंथंदृष्ट्वाभिनंद्यसश्रीशंकरःपरितोषवशाद्वोचत्६४मूलंसत्यपदार्थविनयिन्ममयाजुषीयाशाखातदंतर्गतभाष्य
निबंधइष्टःतद्वार्तिकंममकृतेभवताप्रणेयंसच्चेष्टितंपरहितैकफलंप्रसिद्धं६५अस्यव्याख्यानेन दाहहेविनयिन्त्वंयदु
क्तवान सितत्सर्वंसत्यमतोममयाजुषीनैत्तिरेयीशाखातस्यांतर्गतोयोभाष्यलक्षणोममेष्टोनिबंधस्तस्यवार्तिकंमदर्थंभवताप्र
णेयंयतःसतांचेष्टितंपरहितैकफलंप्रसिद्धं६६मूलंतद्वत्त्वदीयाखलुकाण्वशाखामामापितत्रास्तितदंतभाष्यंतद्वार्तिकंचापिवि
धेयमिष्टंपरोपकारायसतांप्रवृत्तिः६६अस्यव्याख्यानंतद्वत्त्वदीयाखलुयाकाण्वशाखातत्रापिममतदंतभाष्यमस्तितस्यवार्ति
कमपीष्टंविधेयंयतःसतांप्रवृत्तिःपरोपकारायेत्यर्थः६६मूलंतत्रोभयत्रकुरुवार्तिकमार्तिहारिकीर्तिंचयाहिजितकार्तिकचंद्रि

नि

३५

काभां मा शंकि पूर्वमिव दुःशङ्कावाक्यरोधं महावाक्यमेव शरणं व्रज मा विचारीः ६७ अस्य व्याख्याने आवश्यकताबोधनाय पुनराह
नत्रो भयत्रतापत्रयनिबर्हिणं वार्तिकं कुरु जिता कार्तिकचंद्रिकायाः आभाय यानतया भूतोकीर्तिं च प्राप्नुहि ननु पूर्ववदधुना
प्यविनयिवाक्यैरोधस्यावश्यंभावित्वात्किमर्थं तत्करणे मया दीक्षा स्वीकार्येति शंकात्वया न कर्तव्येत्याह माशंकीति कुत इ
ति चेत्तत्राह। महावाक्यमेव शरणमतस्तत्करणार्थं गच्छ विचारं मा कुरु।६७ इत्यादिबहुवाक्यैः सर्वज्ञमाधवाचार्याख्यविद्यारण्य
प्रणीतकाव्यरूपशंकरविजये शंकरभगवत्पादाचार्यस्य तैत्तिरीयशाखाइति सुरेश्वराचार्याख्यवार्तिककारस्य कण्वशाखाइ
ति पराशरस्मृतिव्याख्यानवेदभाष्यकारमाधवीयादिषु विद्यारण्याचार्यस्य बोधायनशाखेति स्पष्टतया प्रतीयते अपि च
शंकराचार्यस्य चत्वारः शिष्यास्तेषां पश्चिमसमुद्रतीरस्थद्वारावत्यामेकः शिष्यः पूर्वसमुद्रतीरस्थजगंनाथे एकः शिष्यः उत्तर
देशे हिमवत्पर्वतसमीपस्थहरिद्वाराख्यमायापुर्यामेकः शिष्यः श्रीशृंगेरीमठे एकः शिष्यः स्थातव्य इति नियमनं भगवत्पादाचा
र्यैः कृतं तथैव तस्मिन्नेव ग्रंथे शृंगेरीमठस्य नियंतृत्वेन सुरेश्वराचार्याख्यवार्तिककारस्यैव नियमितत्वं प्रतीयते तस्य का
ण्वशाखावत्त्वेन वाजसनेयित्वेपि तच्छिष्यपरंपराकोटौ विद्यारण्याचार्यस्य शंकरानंदस्य तच्छिष्यपरंपराशिष्यकोटि
प्रविष्टानां एतत्काले नपीठस्थस्वामिनां सर्वेषामपि तत्प्रविष्टत्वेन च कण्वयाज्ञवल्क्यकात्यायनादीनामपि सर्वस्मा

प्र॰श्रा॰

३५३

र्त्तगुरुत्वंकथंचित्संभवत्येव एवंस्थितेकण्वशाखाप्रविष्टब्राह्मणानां। अयोग्यतांगीकारेसर्वेस्मार्त्तगुरुत्वंवार्त्तिकका
रस्यकथंसंभवेत। प्रत्युतसाक्षात्कैलासस्थितशंकररूपपरमेश्वरस्य वेदवेदांतार्थनिर्णयाय शंकराचार्यरूपेणअवत
रन्‌कण्वशाखाप्रविष्टमंडलमिश्राख्यपूर्वमीमांसकं उद्दिश्यगत्वातद्गृहेश्राद्धदिनेजैमिनिव्याससयोः निमंत्रितत्वेनउप
वेशनसमयेअंतःप्रविश्यतयोर्निकटएववेदांतंप्रतिपाद्यसन्यासपूर्वकआत्मैक्यज्ञानादेवमोक्षइतिवादेननिश्चयं
कृत्वा॥ तस्मिन्श्राद्धेस्वयमपिविष्णुस्थानेभोजनमपिकृत्वा पूर्वसमयबंधानुसारेणतस्यसन्यासंदत्वा स्वशिष्यंकृत्वा
तदनंतरंतत्सहायार्थमागतांतद्भार्यरूपसरस्वतींचवादेनजित्वातामपिश्रृंगेरींप्रतिआनीयतांदेवतात्वेनस्थापयि
त्वातस्यैवब्रह्मावतारत्वात्सुरेश्वरइतिनामधेयंदत्वातैत्तिरीयशाखागतउपनिषद्भाष्यस्यवार्त्तिकंकण्वशाखाग
तबृहदारण्योपनिषद्भाष्यस्यवार्त्तिकंचकुर्वित्याज्ञांदत्वा॥ अन्येषांसर्वेषांसन्यासिनामपिनिकालसंध्यावंदन
स्थानापन्नपंचीकरणवार्त्तिकमपिकुर्वीत्याज्ञांदत्वा तंश्रृंगेर्यांस्वसंनिधानस्वव्याख्यानसिंहासनेस्थापितवा
निन्यादिआख्यापिकाअन्यशंकरविजयादिषुशंकरभगवत्पादकृतआम्नायस्तोत्रेचप्रतीयतेनतयाहिचतुर्दिक्षुप्रसिद्धासुमठे

र्थस्वनामतः ॥ चतुरोथमता न्कृत्वा शिष्यानस्थापयद्विभुः ॥ चकार संज्ञामाचार्यश्चतुर्णां नामभेदतः ॥ क्षेत्रं च देवतां चैव शक्तितीर्थं पृथक् पृथक् संप्रदायं तथाम्नायभेदं च ब्रह्मचारिणां ॥ एवं प्रकल्पयामास लोकोपकरणाय वै ॥ दिग्भागे पश्चिमे क्षेत्रं द्वारका शारदा पठः कालिका मठ इति पाठांतरं ॥ कीटवाकस्संप्रदायस्तीर्थाश्रमपदे उभे ॥ देवस्सिद्धेश्वरश्शक्तिर्भद्रकाकीर्तिविश्रुता ॥ स्वरूपब्रह्मचार्याख्य आचार्यः पद्मपादकः विख्यातं गोमती तीर्थं ॥ सामवेदस्य तद्गतं ॥ जीवात्मा परमात्मैक्यबोधो यत्र भविष्यति ॥ विख्यातं तन्महावाक्यं वाक्यं तत्त्वमसीति च ॥ द्वितीयः पूर्वदिग्भागे गोवर्धनमठः कृतः ॥ भोगवालसंप्रदायस्तत्रारण्यवने पदे ॥ तस्मिन्देवो जगन्नाथः पुरुषोत्तमसंज्ञितं ॥ क्षेत्रं च विमला देवी सर्वलोकेषु विश्रुता प्रकाशब्रह्मचारीति हस्तामलकसंज्ञितः ॥ आचार्यः कथितस्तत्र नाम्ना लोकेषु विश्रुतः ॥ ख्यातं महोदधिस्तीर्थं ऋग्वेदस्समुदाहृतः ॥ महावाक्यं च तत्रोक्तं प्रज्ञानं ब्रह्म चोच्यते ॥ उत्तरस्यां श्रीमठस्यात्क्षेत्रं बदरिकाश्रमे ॥ देवो नारायणो नाम शक्तिः पूर्णगिरीति च संप्रदायो नंदवालः तीर्थं चालकनंदिका ॥ आनंदब्रह्मचारीति गिरिपर्वतसागराः ॥ नामानि त्रोटकाचार्यो वेदोऽथर्वणसंज्ञितः महावाक्यं ।

चतत्रायमाम्नायवह्मेतिकीर्त्यते ॥ तुरीयोदक्षिणस्यांचशृंगेर्यांशारदामठः ॥ मलहानिकरंलिंगंविभांडकसुपू नि
जितं ॥ तत्रास्तेऋष्यशृंगस्यमहर्षेराश्रमोमहान् ॥ वराहोदेवतातत्ररामक्षेत्रमुदाहृतं ॥ तीर्थंचतुंगभद्राख्यंश ॥
क्तिःश्रीशारदापिच ॥ आचार्यस्तत्रचैतन्यब्रह्म चारीतिविश्रुतः ॥ वार्त्तिकादिब्रह्मविद्याकर्तायोमुनिपूजितः ॥
श्व सुरैराचार्य इतिसाक्षाद्ब्रह्मावतारकः सरस्वतीपुरीचेतिभारत्यारण्यतीर्थकौ ॥ गिर्याश्रममुखानिस्युस्सर्वना
मानिसर्वदा ॥ संप्रदायोभूरिवाळोयजुर्वेदउदाहृतः अहंब्रह्मास्मीतितत्रमहावाक्यमुदीरितं ॥ चतुर्णांदेव
ताशक्तिक्षेत्रनामान्यनुक्रमात् ॥ महावाक्यानिवेदांश्चसर्वमुक्तंव्यवस्थया ॥ उक्तं श्रीशंकराचार्यशिष्यास्तेन
वतेजसा ॥ आचार्यास्त्रिषुलोकेषुविख्याताऋषिपूजिताः ॥ पद्मपादस्सुरेशश्चहस्तामलकत्रोटकौ ॥ शंकरा
चार्यवर्यस्यशिष्याभाष्य कृतस्स्मृताः ॥ गुरुभक्तिसमायुक्तोगु
रुवंदनतत्परः पुत्रपौत्रादिसंयुक्तस्सुखमाप्नोतिवांछितं ॥ देहांतेमुक्तिमाप्नोतिलब्ध्वा ज्ञानमनुत्तमं ॥ इतिश्री
मच्छंकराचार्यविरचितं ॥ आम्नायस्तवंसंपूर्णं ॥ इत्यादिशंकराचार्यविद्यारण्यादिकृतग्रंथेष्वपिसुरेश्वराच

उपनिषद्भाष्यवार्त्तिकं कुर्विति नियमनं वा कथं संभाव्येत तत्कर्तृकवार्त्ति २ पंक्तिं
योख्यवार्त्तिककारस्य श्रृंगेरीमठमूलगुरुत्वे॥ कण्वशाखित्वे च सिद्धे सति वाजसनेयिब्राह्मणानां अयोग्यत्वे क
थं संभवेत। तच्छाखिनामयोग्यत्वे॥ अयोग्यतावत्सुरेश्वराचार्यप्रतिकृतस्यापि आचार्यसंमतत्वेन भाष्यानु
सारेण विद्यारण्यादिप्रभृतिभिः प्रमाणत्वेन कथं संगृह्येत॥ इति हेतोरपि॥ याज्ञवल्क्यादीनां शापप्रसक्ति
रेव न संभवतीति असूयारहितैः निश्चीयत एव। किंच॥ याज्ञवल्क्यस्य ब्रह्मवित्वेन बहुजन्मार्जित परो॥
क्षापरोक्षज्ञानसत्वावश्यंभावित्वेन जन्मप्रभृति॥ तस्य ज्ञानित्वादेव शापसंस्पर्शो न संभवति अतः शापा
भावादेव शुद्धत्वात्॥ बृहदारण्याध्येतृत्वस्मृतिकर्तृत्वादेः न काचिदनुपपत्तिः॥ न कश्चन दृष्टादृष्टदोषः
संभवति॥ ननु जन्मनः प्रागेव अपरोक्षज्ञानसत्वे पुनर्जन्मप्राप्तिरेव नास्ति॥ तस्य तावदेव चिरं॥ यावन्न
विमोक्ष्येऽथ संपत्स्यत॥ इति श्रुतेः ज्ञानप्राप्तशरीरेण एव मोक्षः श्रूयते कथं त्वया एतज्जन्मोत्पत्तेः॥ प्रागपि
अपरोक्षज्ञानसत्वमित्युच्यते॥ इति चेत् सत्यं॥ अपरोक्षज्ञानमपि हि द्विविधं॥ प्रतिबद्धापरोक्षमप्रति बद्धाप

प्र.शा.

२५५

रोक्षमिति ॥ प्रतिबंधकविशिष्टं प्रतिबद्धं । तद्रहितं अप्रतिबद्धं प्रतिबंधकं च ॥ द्विविधं दृष्टमदृष्टं चेति दृष्टं ।
संशयभावना असंभावना ॥ विपरीतभावनारूपं ॥ पापरूपं ॥ अदृष्टं प्रतिबंधकं अनयोः स्वरूपं तन्निवर्त
कं च क्रमेण व्यासेनैव दर्शितं ॥ तद्यथा ॥ ऐहिकमप्रस्तुतप्रतिबंधे न दर्शनादिति ॥ पापरूपअदृष्टप्रतिबंध
कं ॥ दर्शयित्वा ॥ अर्थात् ॥ नित्यकर्मोपासनादिईश्वराराधनं तन्निवर्तकमिति सूचितं ॥ तदूर्ध्वं दृष्टप्रति
बंयिधकस्वरूपं । आर्थात्सूचयित्वा ॥ तं निवर्तकत्वेन श्रवणमनननिदिध्यासनानां । आवृत्तिकर्तव्यतायां । आवृ
त्तिरसकृदुपदेशादिति सूत्रेण तन्निवर्तकमपि सूत्रितं ॥ अनयोः सूत्रयोरर्थः भाष्ये भगवत्पादैः प्रपंचितः । गीताभाष्ये
पि भाष्यकारैः बृहस्पत्यादिस्मृतिवचनान्युदाहृतानि ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इति कषायेकर्मभिः प
क्वेन तो ज्ञानं प्रजायते इत्यादिना । अपरोक्षज्ञानस्य प्रतिबंधकं पापरूपमिति अदृष्टप्रतिबंधकं ज्ञापितं एवं । असंभावना
देः दृष्टप्रतिबंधकत्वं ॥ शास्त्रेषु दृश्यते ॥ तादृशप्रतिबंधकसामान्याभावविशिष्टपरोक्षज्ञानस्यैव उत्तरजन्मोत्पत्ति
निवर्तकत्वात् । जडभरतवामदेवादिवत् यत्किंचित्प्रतिबंधकसत्वे परोक्षापरोक्षज्ञानसत्वेपि । जन्मोत्पत्तिसंभवः । उप

२५४

त् ॥ याज्ञवल्क्यस्यापि ॥ यत्किंचित्प्रतिबंधकसत्वेन ॥ जन्ममात्रावपि ॥ अनेकजन्मार्जितपरोक्षा
परोक्षज्ञानयो ॥ सिद्धि सामर्थ्येन च शापसंस्पर्शाभावः उपपद्यत एव ॥ ज्ञानं विज्ञानसहितमिति ॥ गीता
वाक्यभाष्ये परोक्षज्ञानमपरोक्षज्ञानमितिच ॥ ज्ञानद्वैविध्यं भगवत्पादैरुक्तं ॥ तल्लक्षणंतु ॥ पंच
दशीप्रकरणे ॥ अस्तिब्रह्मेति चेद्वेद परोक्षज्ञानमेवतत् ॥ अहंब्रह्मेति चेद्वेद साक्षात्कारस्स उच्यते
॥ ॥ इति ॥ तस्यैव साक्षात्कारस्यापरोक्षज्ञानत्वात् ॥ तत्र ॥ प्रतिबद्धाप्रतिबद्धमिति द्वैविध्यं वर्तते ॥
अपिच ॥ परोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकं ॥ बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवदिति ॥ सू
तसंहितायां ॥ विद्यारण्यकृतपंचदशीप्रकरणे च ॥ परोक्षज्ञानस्यैव ॥ कृत्स्नं दहति वह्निवदित्यनेन ॥
प्रायश्चित्तरहितबुद्धिपूर्वककृतमहापातकस्यापि ॥ परोक्षज्ञाननिवर्त्यत्वज्ञापनात् ॥ सर्वपापरहित
त्वे सति अपरोक्षज्ञानस्य ॥ अप्रतिबद्धापरोक्षज्ञानोत्पत्यनंतरमपि ॥ प्रारब्धकर्मानुभवस्य ॥ अनिव
र्त्यत्ववत् यत्किंचित्प्रतिबंधकवशात् ॥ एकजन्ममात्रप्राप्तावपि ॥ परोक्षापरोक्षज्ञानसत्वस्य ॥ न

व

मत्रापि॥ महानुभावस्य बहुजन्मार्जितब्रह्मज्ञानप्रभावस्य॥ महायोगिनस्तव ६ पंक्ति
कान्चित्तुपपत्तिः॥ संभवति॥ अत्रैव॥ भगवद्गीतायां॥ अनेकजन्मसंसिद्धः॥ ततोयातिपरांगतिं॥ ति
बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते॥ इत्यादिभगवतोक्तेश्चज्ञानंविज्ञानादिसामर्थ्यात्॥ शापस्य
र्शाभावः॥ उपपद्यतएव॥ यथा॥ वसिष्टस्य॥ नारायणवंशत्वेन॥ स्वतएवब्रह्मज्ञानित्वेनच॥ सर्वश्रे
ष्टत्वेपि॥ उर्वशीपुत्रत्वव्यपदेशः कथंचित्॥ संभाव्यते व्यासस्य चतुर्वेदप्रवर्तकत्वेपि॥ कथंच
त् सत्यवतीसुतत्वव्यपदेशः॥ यथावा॥ परमेश्वरस्य कृष्णस्य॥ कथंचित् देवकीसुतत्वव्यपदेश
स्संभवति॥ सर्वंकालिकाखंडकल्पितवाक्यानुरोधेन॥ तवसंतोषार्थं॥ याज्ञवल्क्यस्य॥ शापप्राप्तिस्वी
कारेपि॥ वस्तुतः॥ माहात्म्यवशात्॥ याज्ञवल्क्यस्य॥ शापसंस्पर्शोनभवेदेवेति॥ निश्चेतुंशक्य
तएव॥ यत्तुतच्छापादिकंचंडालत्वादिकंच॥ स्थूलदेहप्रयुक्तमेव॥ नदेहाभिमानिनस्संभवति॥
अस्यदेहमात्राभिमानशून्यस्यब्रह्मविदः॥ कथंसंभाव्येत॥ तस्मात्॥ शापसंस्पर्शोपिनास्ति॥ तत्प्र
युक्तचंडालत्वाद्ययोग्यतापिनास्ति॥ तद्व्यवहारप्रयुक्तन्यूनतापिनास्ति॥ इत्ययंनिश्चयसिद्धान्तः क्रि

यते ॥ अतराव ॥ तच्छाखामविष्टब्राह्मणानांयत्किंचिदपिन्यूनतानसंभवति ॥ अपितु ॥ वस्तुतः ॥ शा
खालोकन्यायादिवलैः तस्मिन्विचार्यमाणे ॥ अयोग्यताव्याः ॥ असंभवेपि ॥ परंपराप्राप्तअसूयानि
मित्तक ॥ अयोग्यताव्यवहारस्य ॥ क्वचित्प्रदेशव्याप्तत्वेपि ॥ सर्वत्रसर्वप्रदेशेषु ॥ वाजसनेयिब्राह्म
णानां इतरशाखिभिः ब्राह्मणैस्सहसकपंङ्क्तौभोजनादेः ॥ फलहारइति ॥ व्यवहृतसांकेतिकनाम
विशिष्टतंडुलादिपिष्टविकारभूतयत्किंचित्तेहासंबंधतद्दत्तपक्कपदार्थभक्षणजलग्रहणादेः ॥
तद्ब्राह्मणोच्छिष्टसंस्पर्शनादेः ॥ तन्निरसनादेः ॥ तैःस्पृष्टवस्त्रपात्रादेः ग्रहणस्यच ॥ सर्वदेशसर्वका
लेषु ॥ इतरसर्वशाखिब्राह्मणेष्व ॥ गृहीतत्वेन ॥ एतेषु ॥ व्यवहारेषु ॥ निश्शंकतया विवादाभावः ॥ ॥
सर्वत्रअनुभूतएव ॥ ॥ अन्यथा ॥ केवलमूढव्यवहारानुसारेण ॥ याज्ञवल्क्यकण्वादिद्वारा ॥ वाज
सनेयिब्रह्माणानां सर्वेषां चंडालत्वादिअयोग्यतासत्वेवातादृशमूढव्यवहारेकदेशव्यवहारानुसारेण
तेषांमध्याह्नकाले ॥ घटिकात्रयसार्धघटिकैकावधिकालअयोग्यतासत्वेवा ॥ पूर्वोक्तरीत्याएतैर्ब्राह्म

प्र॰शा

२५७

णैस्सह॥ तादृशायोग्यकालेपंङ्क्तिभोजनजलग्रहाणादेः॥ कथंवाइतरशास्विब्राह्मणैस्सह॥ सम्व्यवहारउ नि॰

पपद्येत॥ तथात्वंगीकारेचशूद्रचंडालादिभिस्सह॥ सर्वंपंङ्क्तिभोजनादिसर्वव्यवहारोपिकर्त्तव्यइतिप्रसं

गोदुर्वारोभवेत्॥ अपिच॥ पांचरात्राणांअनादिसिद्धवैष्णवमतमूलभूतशास्त्रैकवेद्यानां॥ विष्णुनैवनि

यमिताचारवतो॥ विष्णुनैवदत्तभागवतशब्दसंज्ञावतां॥ मुख्यतयैव॥ वैष्णवशब्दवाच्यानां॥ विष्णुनैव॥

निर्मित॥ अशीत्यधिक॥ संख्याकसंहितात्मकपांचरात्रागमैकनिष्ठानां॥ विष्णुसेवैकपरायणानां॥

वैष्णवशिरोमणिप्रायाणां॥ भेसदृशायां विष्णुभेदवतां जगदभिन्ननिमित्तोपादानकारणरूपविष्णुसि

द्धांतानुयायिनां॥ वैष्णवोत्तमानामपि याज्ञवल्कीयकाण्वमाध्यंदिनकात्यायनादिशाखाप्रविष्टत्वेन॥ त्रयो

रुपित्यानवकालिकाखंडकल्पितवाक्यानुसारेणयाज्ञवल्क्यादिशापद्वाराप्राप्तायोग्यतायाः एतेषुपांचरात्रम

तप्रविष्टब्राह्मणेषुच॥ विद्यमानत्वावश्यंभावित्वात्॥ तथात्वांगीकारेतु-श्रीरंग॥ श्रीकांच्यां॥ यदुगिरि प्र

भृति॥ बहुवैष्णवक्षेत्रेषुनित्योत्सवमासोत्सवसंवत्सरोत्सवादिषु भगवदर्चकानां तथाअयोग्यतासत्वे कथमाराधनं॥

२५८

तीर्थप्रसादादिकं सर्वैः ब्राह्मणादिभिः कथं परिगृह्येत॥ परिगृह्यते हि॥ सर्वैः सर्वदेशस्थैः॥ वेदप्रमाणकैः ब्राह्मण
दिभिः तादृशव्यवहारो न स्यात्॥ अपि च॥ तेषामपि॥ वाजसनेयिब्राह्मणत्वेनतदितरशाखाव्यूहैकदेशिभिः उ
क्तप्रकारेण॥ मध्यान्हकाले घटिकात्रयसार्धघटिकादिकालविशेषावच्छिन्न॥ अयोग्यतापाः सत्वे॥ तावत्का
लेपि॥ तैः ब्राह्मणैः॥ भगवदर्चनादिकं॥ कथं क्रियेत॥ तत्काले वा॥ रथोत्सवाहिषु च॥ सर्वदिनेषु॥ तीर्थप्रसाद
दिकं वा॥ सर्वैः तत्कालकथं वा॥ परिगृह्येत॥ महाक्षेत्रेषु॥ स्थिताः॥ ब्राह्मणश्रेष्ठाः शिष्टाश्च तादृशायोग्यकाले॥
तान्॥ तन्मात्रस्थान्॥ सर्वानपि॥ किमर्थं देवसंनिधानात्॥ न वैहिः कुर्वंति॥ देवतासांनिध्यवशात्॥ तेषां दोषो ना॥
स्तीति चेत्॥ चंडालादिभिः शूद्रैस्तैः॥ महाक्षेत्रेषु॥ पुराणप्रसिद्धेषु॥ सर्वब्राह्मणसेव्येषु॥ विष्ण्वर्चनादि कार्यं कि
मर्थं न क्रियते॥ तत्स्वरेनापि॥ पूजादिकं निवर्त्येत॥ ननु शूद्रचंडालादीनां विष्ण्वर्चनादिषु शास्त्रविधानं॥ ना
स्तीति चेत् पांचरात्रब्राह्मणार्चनविधाने किं शास्त्रमस्ति पांचरात्रमेव शास्त्रमिति चेत् पांचरात्रे तेषामेव सर्व
श्रैष्ठ्यं प्रतिपाद्यते तत्र तेषां शापग्रस्तत्वेन चंडालत्वप्रतिपादनस्य प्रसक्तिरेव नास्ति अपि च॥ तेषां वाजसनेयत्वे

पिदेवार्चनकालेतद्दोषोनास्तीतित्वदभिमतायोग्यतायास्सिद्धौवक्तव्यं तत्रतथानोक्तंपुराणध॥ ० ॥ः॥ ॥ ०॥
॥ मेशास्त्रादिषुरजकक्षौरकनाविकादीनांतत्कर्तृककर्मेसमवायकालेतेषा ॥ः॥ ॥ ० अयोग्यतानास्ती
ति॥ प्रतिपाद्यते॥ एवमत्रापि॥ मध्यान्हकालेशापप्रयुक्तायोग्यतावत्वेपिदेवतार्चनादिकर्मणिअयोग्यताना
स्तीति॥ ऊच्यतइतिचेत् योग्यतायोग्यताविचारेमनुष्यबुद्धिप्रभुवपुरुषतंत्ररूपऊहादेःप्रमाणत्वासंभवात्॥ शास्त्रमेव
प्रमाणंवक्तव्यं॥ अन्यथा॥ परोपकारःपुण्यायपापायपरपीडनमिति॥ सामान्यधर्मलक्षणप्रतिपादकवचना
नुरोधेनात्यंतविरहितसपत्नीमातृगमनेपि॥ दोषाभावप्रसक्तिः॥ तस्याअत्यंतसुखजनकत्वेनपुरुषसंयोग॥
स्यउपकारज्ञानविषयत्वात्॥ तथैवमनुष्यास्थिशुद्धंप्राण्यंगत्वात्॥ शंखादिवत्॥ इत्यादिजहरूपअनुमान
स्यापि॥ प्रमाणत्वापतेश्च॥ क्वचित्॥ पुराणादिषुब्राह्मणानां मेवार्चकत्वंसूच्यते॥ इतिचेत्॥ केवलवैदिक
ब्राह्मणानां॥ वैखानसब्राह्मणानां॥ पांचरात्रब्राह्मणानांसामान्यतोअर्चकत्वंसूच्यते तत्रापि॥ पांचरात्राणां
वाजनेयिशाखाप्रविष्टत्वेनशापप्रयुक्तचंडालत्वादयोग्यताकालविशेषवर्तते॥ तथापि॥ अर्चनाकालेदेवता

संनिधानेतत्कर्मणिदोषोनास्ति॥तैः तीर्थप्रसादनिवेदितान्नादिग्रहणेपिनदोषः॥इतिविशेषशास्त्रंकुत्र नि·
वर्तते॥सामान्यतः॥वाजसनेयिनांवा॥मध्यान्हकालेएतावंतंकालं॥चंडालत्वंवर्तते॥तत्पूर्वापरकाले·
तन्नास्ति॥इतिवा॥प्रामाणिकंशास्त्रंकुत्रवर्तते॥तद्वयमपि॥प्रमाणंत्वयाप्रदर्शयितव्यं॥यावत्कालंत
त्प्रमाणद्वयं॥त्वयानप्रदर्शिष्यते॥तावंतंकालंतत्वकालिकाखंडवाक्यादिसर्वंवाक्यमपि॥अप्रमा॥
णमेवेतिनिश्चयः क्रियते॥यत्तुत्वयोक्तं॥रजकक्षौरकनाविकादिकर्तृककर्मकालेतेषां॥अयोग्यतानास्ति॥
तद्वदितितत् द्भगवदर्चनादिविषये भागवतपांचरात्रब्राह्मणादियोग्यताविचारेरजकादीनांदृष्टं
तत्वेनतेषांग्रहणंनशक्यते॥अन्यथाशूद्रसंकरादिचंडालांतानां॥नशूद्राभगवद्भक्ताःविप्राभागवताः
स्मृताः सर्ववर्णेषुतेशूद्रायेह्यभक्ताजनार्दन॥इतिभारतवचनाद्यनुसारेणविष्णुभक्तानांसर्वोत्तमत्वे
नवैष्णवत्वात्॥स्वल्पग्रासादिषु॥विष्णुर्चकनीचजात्यादिभिरपिविष्णुसन्निधानेतीर्थप्रसादनिवे॥
दितान्नग्रहणस्यापितत्कालेदोषाभावप्रसक्तिःदुर्वारैवभवति॥अपिचशापादिनाचंडालत्वप्राप्तानांदे

प्र०श्रा०
:
३५९

वतार्चनादिकर्मणि दोषो नास्तीत्युक्ते जातिचंडालस्यापि॥ देवतार्चनादिकाले योग्यता नास्तीत्यत्र को वा नि
हेतुः तेषां चंडालत्वाविशेषात्॥ स्वतः ब्रह्महत्यादिना पतितस्य संयोगात्॥ संवत्सरेण पतति॥ पतितेन
समाचरन्निति तस्य पतित त्वप्राप्तिवत्॥ शापेनापि प्राप्त चंडालत्वं तत्समानमेव॥ विशेषाभावात्॥
इत्यलं अप्रामाणिकवाक्यवदनशीलेन सह विवादजातेन॥ अत एव पराशरस्मृतिपुराणादिषु च॥ प्रथ
मेहनि॥ चंडाली द्वितीये ब्रह्मघातकी॥ तृतीये रजकी प्रोक्ता चतुर्थेहनि शुध्यति॥ = ॥ इत्यादिवचनैः चं
डाली शब्देन तत्स्पर्शन तत्स्पृष्टान्नादिभक्षणसंभाषणादिविषयेषु॥ चंडालतुल्यत्वमिति प्रतिपाद्यते॥
यथा॥ जातिचंडालादेः अन्नादिव्यवहारस्य प्रायश्चित्तं कर्तव्यं तथा एतदन्नादिग्रहणेपि तत्प्रायश्चित्तं कर्त
व्यमिति सूच्यते॥ तस्मात्॥ जातिचंडालस्य केनचिदुपाधिना प्राप्तचंडालत्वस्य च तत्काले विशेषो न दृ
श्यते॥ अतः॥ जातिचंडालशूद्रादपि देवतासेवाकाले तीर्थप्रसादान्नादिग्रहणप्रसंगो दुर्वारो भवेत्॥
तथा॥ शूद्रादि चंडालांतानां पुराणप्रसिद्धविष्णुक्षेत्रेषु अर्चकत्वं यत्र कुत्रापि॥ न दृश्यते॥ यदा कदावान॥

श्रूयते॥ शास्त्रादिना न संभवति च॥ प्रत्युत॥ चंडालादि स्पृष्टांतैः॥ देवतासान्निध्यमात्र॥ स्पर्शादिक्रियायो नि
वा॥ संप्रोक्षणादि महत्प्रायश्चित्तादिकं प्रवर्तते॥ इति महाक्षेत्रेषु॥ व्यवहारो दृश्यते॥ अस्मादपि हेतोः वा
जसनेयिनां॥ शापतत्प्रयुक्त अयोग्यताव्यवहारश्च॥ असूयाप्रयुक्त कल्पित प्रमाणक इत्येव निश्चयः
कर्तव्यः॥ ॥ ॥ अपि च वाजसनेयिनां॥ मूढलोककृत अयोग्यताव्यवहारः॥ यजुर्वेद प्रथम शाखाअ
ध्ययन प्रयुक्तः॥ इति प्रतीयते एते प्रथमशाखिन इति॥ यजुः प्रथमशाखाध्येतृत्वेनायोग्यता प्रतीयते
॥ धनी सुखी यत्र धनवत्तायाः सुखप्रयोजकत्ववत्॥ अयं निस्सार्यः॥ ब्रह्महा॥ इत्यत्र निस्सार्यत्वे ब्रह्म
हत्यायाः प्रयोजकत्ववच्च॥ अयमवेदवित्॥ श्राद्धे॥ अभोजनीयः॥ इत्यत्र॥ अवेदवित्वं श्राद्धाभोजने
प्रयोजकं भवति॥ तथैवात्रापि॥ एते प्रथमशाखिनः॥ अयोग्याः॥ इत्यत्रापि॥ अयोग्यत्वे तच्छाखाप्र
विष्टत्वमेव प्रयोजकं भवति॥ शाखाप्रविष्टत्वमित्युक्ते॥ तच्छाखावेदाध्येतृत्वमित्यर्थो लभ्यते॥ तथा
च सति॥ अन्येषामपि॥ शाखिनां सर्वेषां॥ चतुर्वेदाध्ययनविधिनियोज्यत्वेन॥ सर्वैरपि॥ तदध्ययनक

ध्या॥ र्तव्यतायाः आवश्यकत्वप्राप्तेर्दुर्वारत्वात्॥ तेषामपिप्रथमशाखित्वापत्त्याअयोग्यत्वसिद्धिरनिवार्याभवति नि

३६०

प्रत्युत॥ मुमुक्षूणांगृहस्थाद्याश्रमवत्त्वयवतांज्येष्ठाश्रमिणांसन्यासिनांतु॥ अत्यावश्यकत्वेनच वेदांतविचा
रार्थेउपनिषदध्ययनस्यमुख्यकार्यत्वात्॥ तदध्ययनाभावे॥ वेदांतविचारासंभवात्॥ सन्यासिनोतु॥ सत्र
स्यश्रवणंकुर्यादितिमुख्यविधिप्राप्तत्वाच्चअवश्यं॥ सर्वैरपि॥ प्रथमोपाकर्मकालएव॥ वेदारंभणदशायां
॥ अथातोधर्मजिज्ञासाइति॥ पूर्वमीमांसावत्॥ अथातोब्रह्मजिज्ञासेति॥ उत्तरमीमांसात्मकवेदांतशास्त्र॥
स्यापि॥ आरब्धत्वात्॥ नित्यब्रह्मयज्ञेच॥ तथापठनीयत्वाच्चअवश्यंसर्वैरपिब्राह्मणैः॥ उपनिषदभ्या
सस्य॥ अनिवार्यत्वेन॥ ईशबृहदारण्य॥ लघुजाबालादिमुक्तिकोपनिषदंतानां॥ उपनिषदां॥ अवश्या
ध्ययनप्रसक्तौ॥ मुक्तिकोपनिषदुक्तरीत्या॥ शुक्लयजुःशाखानामक॥ वाजसनेयिशाखात्मकप्रथमशाखा
प्रविष्टउपनिषदध्ययनेन॥ इतरेषांशाखिनामपि॥ प्रथमशाखाध्येतृत्वेनप्रथमशाखित्वप्राप्त्यातत्प्रयोज्या

३५९

योग्यतायाअपि॥ प्राप्तिप्रसंगोदुर्वारएवभवति॥ ननु॥ चतुर्वेदाध्ययनविधिवाक्येषु॥ ऋग्वेदोयजुर्वेदस्स

मवेदोथर्ववेदश्चेति॥ वेदसंख्याप्रकरणे॥ यजुर्वेद इतिसामान्यनिर्देशात्॥ तैत्तिरीयशाखाध्ययनेकृतेपि॥ च
तुर्वेदाध्ययनविधिप्राप्ताध्ययनस्यकृतत्वेन चरितार्थत्वात्॥ वाजसनेयिशाखाध्ययनस्य॥ विधेयत्वाभावे
न॥ अनावश्यकत्वमेवेतिचेन्न॥ यजुर्वेदत्वस्य॥ उभयानुगतत्वात्॥ उभयशाखाध्ययनस्यापिविधेय
त्वेन॥ आवश्यकत्वोपपत्तेः॥ अथवा॥ अन्यतरशाखाध्ययनेपिचरितार्थत्वात् तैत्तरीयशाखाया स्व॥
अध्ययने विशेषविधेरदर्शनात्॥ वेदांतविचारेतु॥ आवश्यकतया॥ ईशावास्य॥ बृहदारण्यादि॥ वा
जसनेयिशाखाध्ययनस्य॥ कर्त्तव्यत्वप्राप्ते॥ ॥ अहंब्रह्मास्मीतिवाजसनयिशाखागतमहावाक्यस्यमु
ख्यतया॥ उपदेशरूपत्वेनसर्वैरपि॥ परिगृहीतव्यत्वावश्यंभावाच्च॥ सर्वशाखीनामपि॥ प्रथमशाखित्व
प्राप्त्याअयोग्यताप्राप्तेरनिवार्यत्वात्॥ न चतथासत्तितैत्तिरीयशाखायाः अनावश्यकत्वेनाध्ययनाभावप्र
सक्त्यातस्याःयजुर्वेदत्वाभावप्रसंगः स्यादितिवाच्यं॥ तस्मात्स्वाध्यायोध्येतव्य इतिसर्ववेदाध्ययनविधेः
॥ तैत्तिरीयशाखायामेवसत्वात्॥ कर्मभागंप्रति वेदांतभागंप्रतिच॥ अनुष्ठानार्थंतदनुष्ठापनत्वेनआ॥

वश्यकतयासर्वैः गृहीतव्यत्वस्य॥ अनिवार्यत्वात्॥ उभयशाखयोरपि कर्मोपासनाज्ञानादिषु॥ प्रमाण
त्वेन॥ यत्तु वेदत्वं अंगीकरणीयं भवेत्॥ अन्यथा उभयशाखानिष्टपंचकोशव्यतिरिक्तात्मज्ञानमहावा
क्यजन्यात्मज्ञानकर्मविधिविधानतत्फलरूपविविदिषादिप्रतिपादकप्रमाणाभावेन॥ कर्मोपासना
ज्ञानादिसंपादकवैदिकप्रवृत्तिमात्रोच्छेदप्रसंगः॥ = ॥ तथाच॥ तच्छाखाध्येतृत्वेनप्रथमशाखिनांनिं
द्यत्वेप्राप्ते॥ तन्निंद्यत्वप्रयोजकशाखायाः॥ वेदभागस्यापिनिंद्यत्वेनाशुद्धताप्राप्तिप्रसंगः॥ तथात्वां
गीकारेतु॥ क्वचित्कर्मभागे॥ क्वचिदुपासनाभागे॥ ज्ञानभागेच॥ ऋषिभिः॥ परिगृहीतत्वात्॥ तथाच
॥ कर्मभागे आहिताग्निसंस्कारविषये॥ श्रौताग्नीनांमुखेनैवधमनीयत्वविधाने च उपासनाभागे॥ वै
श्वानरादिविद्यासु ज्ञानभागे॥ अहंब्रह्मास्मीतिमहावाक्य ईशावास्य॥ बृहदारण्याद्यर्थविचारेषु॥
च॥ सर्वैर्गृहीतत्वात्॥ अन्यथा॥ आश्वलायन॥ आपस्तंब॥ बोधायन॥ व्यास॥ जैमिनि॥ प्रभृतिभिः॥
स्वस्वकृत श्रौत॥ गृह्य॥ मीमांसा॥ वेदांतसूत्रादिषु॥ प्रमाणत्वेन॥ उदाहरणस्य॥ विरुद्धत्वापत्तिप्रसं

गः ॥ अन्यथा ॥ तदनंगीकारे ॥ बौद्धचार्वाकादिशास्त्राध्येतॄणामयोग्यत्वेपि ॥ तच्छास्त्राणांप्रमाणत्वेन ॥
वैदिकमतप्रविष्टरुद्राद्यादिभिःस्मृतिकारैश्च ॥ उदाहरणीयत्वप्रसंगस्य ॥ दुर्वारत्वात् ॥ यजुर्वेदइतिस
मान्यतएव ॥ सूत्रस्मृतिभाष्यव्याख्यानादिषु ॥ सर्वत्रायोगस्यदृष्टत्वात् ॥ यजुर्वेदशब्दः ॥ तैत्तिरीय वा
जसनेयशाखोभयगत ॥ वेदभागवाचकएव ॥ ननु ॥ अन्यतरवेदभागवाचकः ॥ तथैव ॥ वेदशास्त्रादि
षु ॥ सर्वत्रप्रयोगोदृश्यते ॥ तथाहि ॥ ऋग्वेदोयजुर्वेदःसामवेदोथर्ववेदइत्यादि ॥ बृहदारण्य ॥ छांदो
ग्यमुंडक ॥ तैत्तिरीयोपनिषत्सु ॥ भूरितिवाऋचः ॥ भुवइतिसामानि ॥ सुवरितियजूंषि ॥ इति ॥ तस्य
यजुरेवशिरः ॥ ऋग्दक्षिणःपक्षः ॥ सामोत्तरःपक्षःइति ॥ यद्दचोधीते ॥ यत्सामानिते ॥ यद्यजूंषिइ
ति ॥ तैत्तिरीयारण्यके ॥ ब्रह्मयज्ञप्रकरणे ॥ प्रत्येकवेदाध्ययन ॥ फलप्रतिपादकार्थवादेषुच ॥ श्रुतिषु
आश्वलायन ॥ गृह्यसूत्रेब्रह्मयज्ञप्रकरणे ॥ एकां ॥ वाऋचं ॥ यजुस्सामवेतिमंत्रेव ॥ तैत्तिरीयारण्य
केब्रह्मयज्ञप्रकरणे ॥ मनुस्मृतौ ॥ ब्रह्मयज्ञप्रकरणेच ॥ एकांवाऋचंयजुस्सामवेत्युक्ताऋग्भिःशंसं

ति ॥ यजुर्भिर्यजंति साम भिस्तुवंतीति ॥ ऋग्वेदेन होता करोति ॥ यजुर्वेदे नाध्वर्युः ॥ सामवेदेनोद्गाता ॥ नि
सर्वैर्ब्रह्मा ॥ इत्यादि श्रौत विधायक ॥ सूत्रब्राह्मणादिषु ॥ सामान्यप्रयोगस्य ॥ यजुर्वेदविषयकस्य ॥
बहुशो दृष्टत्वात् ॥ यजुर्वेदशब्दः ॥ तैत्तिरीयवाजसनेयोभयशाखासामान्यवाचक एव ॥ = ॥ एवं मनुप
राशरादिस्मृतितद्व्याख्यानादिषु च प्रतीयते ॥ = ॥ तथाहि ॥ पराशरमाधवीये परिषत्प्रकरणे ॥ = ॥ परा
शरमूलश्लोकः ॥ = ॥ चातुर्वैद्यो विकल्पी च अंगविद्धर्मपाठकः ॥ त्रयस्चाश्रमिणो मुख्याः पर्षदेषा
दशावरा २८ अस्य माधवीयव्याख्याने ॥ इहं योग्यायोग्ये परिषदौ विविच्य तत्र योग्यायाः ॥ परिषद अपे
क्षितं विशेषणजातं दर्शयति ॥ चातुर्वैद्य इति ॥ = ॥ तत्र चातुर्वैद्यादिशब्दार्थान्दीनं गिरा विवृणोति ॥ च
तुर्णामपि वेदानां पारगा ये द्विजोत्तमाः ॥ स्वैस्वैरंगैर्विना प्येते चातुर्वैद्या इति स्मृताः ॥ इति ॥ = ॥ मनुस्मृ
तौ द्वादशाध्याये ॥ = ॥ मनुमूलं ॥ त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्मपाठकः ॥ त्रयश्चाश्रमिणः ॥ पूर्वे परि
षत्स्याद्दशावरा ॥ १११ ॥ अस्य व्याख्यानं ॥ त्रैविध्य इति ॥ वेदत्रयसंबंधशाखात्रयाध्येतारः । श्रु तिस्मृत्य

विरुद्धन्यायशास्त्रज्ञोमीमांसात्मकतर्कवित् ॥ निरुक्तज्ञोमानवादिशास्त्रवेदीब्रह्मचारी ॥ गृहस्थवानप्रस्थाद्
त्येषांदशावरापरिषत्स्यात् ॥१११॥ मनुमूलं ॥ ॥ ऋग्वेदविद्यजुर्विच्चसामवेदविदेवच ॥ त्र्यवरापरिषत्ज्ञेया
धर्मसंशयनिर्णये ॥११२॥ अस्यव्याख्यानं ॥ ऋग्वेदविदिति ॥ = ॥ ऋग्यजुस्सामवेदशाखानांयेअध्येतारः
तदर्थज्ञाश्चत्रयःसाधर्मप्रश्नसंदेहनिरासार्थंत्र्यवरापरिषद्बोद्धव्यातदभावे ॥११२॥ ननु ॥ सर्वेषांब्राह्मण
नां ॥ चतुर्वेदाध्ययनविधिवत्वात् ॥ सर्ववेदाध्येतृत्वांगीकारे ॥ त्र्ययंऋग्वेदी ॥ अयंयजुर्वेदी ॥ अयंसामवेदी
॥ अयंअथर्वणवेदीत्यादिव्यवहारस्य ॥ तत्तच्छाखोक्तश्रौतादिकर्मानुष्ठानस्यच ॥ कथंविभागज्ञानजनन ॥
द्वारा ॥ शाखाभेदप्रयुक्त ॥ भिन्नभिन्नव्यवहारोपपत्तिर्भवेदिति चेत्सत्यं ॥ एतदंश ः ॥ अस्माभिर्नज्ञातः ॥ त्वा
मेववयं ॥ एतदंशमुद्दिश्य ॥ ज्ञातुमिच्छामः ॥ यद्यपि ॥ सर्ववेदेषु ॥ सर्वगृह्यधर्मसूत्रेषु ॥ सर्वस्मृतिषुच ॥ सर्वब्रा
ह्मणानां ॥ चतुर्वेदाध्येतृत्वविधानेषु ॥ सत्सुसर्वैरपि ॥ सर्ववेदाध्ययनं ॥ कर्तव्यमेवप्राप्तं ॥ तथासति ॥ सर्ववे
दाध्येतृत्वेन ॥ सर्वशाखित्वं ॥ सर्वेषांआपाते ॥ तथासति ॥ सर्वेषां सर्वशाखित्वेन ॥ परस्परवैलक्षिण्याभाव

प्र॰ शा॰

तस्यैव वाजसनेयिनः॥ = इमे = वह्वृचेदिनः इति॥ विभागः कथमिति॥ विभागोपपत्तिर्भवितव्या भवेत्॥ नि

अस्योपपत्तिः त्वयैव वक्तव्येति॥ अस्माभिरेवमुच्यते॥ =॥ स्वस्वगृह्यसूत्रेण॥ उपनयनादिसंस्कारस्य प्राप्त

त्वात्॥ तादृशगृह्यसूत्रानुसारेण तत्तच्छाखिन इति व्यवहारः संभवतीति चेत्॥ =॥ तावन्मात्रेणापि॥ तादृश

व्यवहारस्य मुख्यत्वं न संभवति॥ =॥ याज्ञवल्कीयानां॥ वाजसनेयिसामान्यानां॥ वाजसनेयरूप॥ याज्ञव

ल्क्यस्य गृह्यसूत्रकर्तृत्वाभावेन॥ तत्कृतगृह्यसूत्रस्य॥ तत्सूत्रानुयायिनां ब्राह्मणानां च॥ यत्र कुत्रापि॥ अदृ

ष्टत्वात्॥ वाजसनेयिब्राह्मण इति व्यवहारो न स्यात्॥ प्रत्युत॥ वाजसनेयिशाखाप्रविष्टानां॥ काण्वमाध्यं

दिनादीनां ब्राह्मणानां॥ कण्वकृतगृह्यसूत्रस्य माध्यंदिनकृतगृह्यसूत्रस्य वा यत्र कुत्राप्यदृष्टत्वात्॥ इदानीं

तनानां सर्ववाजसनेयिब्राह्मणानां॥ काण्वमाध्यंदिनशाखारूपमंत्रप्रविष्टत्वेपि॥ तेषां संस्कारादि॥ कर्मा

नुष्ठापककात्यायनसूत्रस्यैव सर्वदेशेषु॥ दृष्टत्वात्॥ काण्वमाध्यंदिनसूत्रयोः कुत्राप्यदृष्टत्वाच्च त्वयोक्त

नियमो भग्नस्स्व॥ प्रत्युत॥ कात्यायनपरिशिष्टात्मकचरणव्यूहाख्यग्रंथे वाजसनेयादिसर्वशाखवेदपरिमाण॥

३६३

३६३

शाखासूत्रादिस्वरूपसंख्यादिज्ञापके॥ तत्रवाजसनेयानांसप्तदशभेदाभवंतिजाबाला॥ बौधेया॥काण्वा॥
माध्यंदिनाः शापेयास्तापायनीयाः कापालाः॥पौंड्रवत्सा॥आवटिकाः परमावटिकाः॥पाराशर्य्याः वैधेयाः॥
वैनेयाः॥वैजवाश्चेति॥ १७॥ सप्तदशावांतरशाखा उक्ताः तासांसर्वासामपि॥ तत्रैवचरणव्यूहे॥पारस्करंगृ
ह्यसूत्रंसूत्रंकात्यायनंस्मृतं॥इतिगृह्यसूत्रद्वयं॥ मेवसप्तदशशाखाप्रविष्टब्राह्मणानां॥कात्यायनंपारस्करश्चे
तिगृह्यसूत्रद्वयस्यैवप्रतिपादितत्वात्॥ केवलकात्यायनशाखाप्रविष्टजनानामेव॥ कुत्राप्यभावेनतेषां अद
र्शनात्॥प्रत्युतकाण्वमाध्यंदिनानामेवअन्यैः कात्यायनीयत्वेनव्यवह्रीयमाणत्वाच्च॥ यद्यपि॥सप्तदशशा
खानांमध्ये॥कात्यायनानामपि॥काण्वमाध्यंदिनादिवत्॥प्रत्येकशाखाप्रतिष्ठत्वमुक्तं॥ तथापि॥ केवलकात्या
यनशाखीयानांब्राह्मणानांकुत्रापि असत्वमेव अतः॥काण्वादिसप्तदशशाखीयानामपि॥ पारस्करंकात्यायनंच
॥गृह्यसूत्रद्वयं॥अनुष्ठापकं॥तयोर्मध्ये पारस्करंनष्टमेव॥ कात्यायनंतु॥ काण्वमाध्यंदिनादि॥ इदानींतनानां
सर्वेषामपिअनुष्ठापकं॥काण्वमाध्यंदिनकृतगृह्यसूत्रस्यकुत्राप्यदर्शनाच्च॥काण्वमाध्याद्नव्य
औधेयाःगालवाः कात्यायनीयाः

तिरेकेण अन्यपंचदशावांतरवाजसनेयिशाखिब्राह्मणानां अभावराव॥ किंच॥ चतुर्वेदाध्ययन विधाना
नुसारेण तत्तच्छाखाध्ययनकरणविषये। केषुचित्॥ धर्मशास्त्रनिबंधनग्रंथेषु॥ तत्तच्छाखागृह्यसूत्रोक्त।
विधानेन उपनयनपूर्वकमेव॥ तच्छाखाध्ययनं कर्तव्यमिति॥ अथर्वणवेदस्यतु तच्छाखाध्ययने॥ निय
मेन अथर्वणगृह्योक्तविधिना॥ उपनयनपूर्वकमेव तदध्ययनं कर्तव्यमिति॥ प्रतिपादनं वर्तते॥ तथैव पा
राशरमाथर्वीये॥ ऋगादिशाखावेदाध्ययनेन तत्तच्छाखोक्तवेदवृतानुष्ठानस्यावश्यं कर्तव्यत्वप्रतीतेः॥ प्रति
दिने चतुर्वेदाध्येतुः॥ तत्तद्वेदगतमंत्राणामपिप्रत्येकं॥ प्रत्येकं॥ यत्किंचिद्यत्किंचित्संख्यायाब्रह्मयज्ञे॥
पठनीयत्वविधानात्॥ प्रतिवर्षं तत्तच्छाखाध्ययन॥ प्रयुक्त उपाकर्मोत्सर्जनादिकं प्रत्येकं प्रत्येकं कार्यमती
॥ मधुपर्केतदुद्देश्यपुरुषगृह्यसूत्रानुसारेण॥ मधुपर्कः कर्तव्य इति विशेषविधानात्॥ पुत्रिकापुत्रआ
सुरादिविवाहोढादिनिमित्तकविवाहितस्त्रीणां तत्पुत्राणां च॥ तत्स्त्रीपितृगृह्यसूत्रविधिनैव तदौर्ध्वदेहि
ककर्मविधानात्॥ कस्मिंश्चित्प्रदेशे स्वशाखोक्तगृह्यसूत्रालाभे जातकर्मादिउपनयनविवाहादिसर्व

संस्काराणांअन्यशाखोक्तगृह्यसूत्रानुसारेण अनुष्ठानस्य अवश्यंभावित्वेन॥ तथा वहुस्थलेषु॥ इदानीमपिसर्व
शाखिब्राह्मणानां अनुष्ठानस्य दृश्यमानत्वात्॥ तदभ्यनुज्ञारूपशास्त्रवचनानामपिक्वचित्क्वचित्॥ तदनु
ष्ठानमूलत्वेन उपलभ्यमानत्वात्॥ अपिच॥ सूत्रकारैरेवक्वचित्क्वचित्॥ स्वैरनुक्तस्थले॥ स्वेषांअनुमत॥
स्थलेविकल्पस्थले॥ चअन्यगृह्योक्तानुष्ठानस्य॥ अभ्यनुज्ञत्वात्॥ तथाहि॥ आश्वलायनगृह्येयदितूप
शाम्येत्युपवसतीत्येकेइति अभ्यनुगतस्थले॥ आपस्तंवगृह्योक्तमेवप्रायश्चित्तंगृहीतं॥ तद्गृह्यसूत्रएव
सर्वबलिप्रकरणेप्रसंख्याहैकेतावतोबलीन्तद्हरेवोपहरंतीतिअन्यगृह्यसूत्रोक्तंअभ्यनुज्ञातं॥ एवंसा
मशाखागृह्यसूत्रेउदगयनपूर्वपक्षः॥ पुण्याह्वेषुप्रागावर्तनात्॥ अन्हःकालअनादेश इतिसूत्रेअनादेशइति
स्वेनानुक्तेकर्मणा अन्यगृह्योक्तस्यापिसंग्रहणाभ्यनुज्ञायाः॥ दत्तत्वात्॥ तत्रैवपत्नीजुहुयादित्येकेइति॥
औपासनहोमकर्तृविधाने॥ आश्वलायनमतमेवगृहीतं॥ तदपिस्वमतमेव॥ एवंश्रौतकर्मणिऋग्वेदे
नहोताकरोति॥ इत्यादिवाक्यैः॥ ऋग्वेदादिशाखात्रयोक्तानामपिसर्वशाखिभिः॥ ग्रहणस्यसर्वश्रौतादिषुप्र

प्र.शा. तोयमानत्वात्॥आश्वलायनापस्तंबादिसर्वश्रौतसूत्रेषु उक्तानां गृह्यकर्मण्यपि॥तदुक्तं पुरस्तादिति॥तस्मा त्रि.
ग्निहोत्रेण॥प्रादुष्करणहोमकालौ व्याख्याता वित्यादि अतिदेशवाक्यदर्शनात्॥तत्तत्सूत्रव्याख्यानादिषु॥
३६५. उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः॥इति आश्वलायनगृह्यसूत्रे॥अथ कर्माणि आचार्योद्यानि गृह्यन्ते
॥इति आपस्तंबसूत्रे॥एवं सर्वत्र तद्व्याख्यातृभिः गृह्यकर्मण्यपि श्रौतातिदेशसूचनेन यथासंभवं श्रौतोक्त
नामपि गृह्यकर्मणि नयनं प्राप्यत इति॥अभिप्रायस्य सूचितत्वात्॥उदिते सूर्ये प्रातर्जुहोति॥अनुदिते
सूर्ये प्रातर्जुहुयात्॥इत्यादि विकल्पश्रुत्यनुसारेण वाजसनेयिनां अनुदितहोमः इतरशाखिनां॥उदित
होमः॥सामशाखिनां तु उदिते नुदिते वेति आरंभकालीनव्यवस्था विकल्पश्च॥तत्तद्गृह्यसूत्रेषु नियमितः
॥किंच॥आपस्तंबबोधायनगौतमादीनां धर्मसूत्रेषु उक्तार्थानां सर्वशाखिभिरविशेषेण ग्रहणस्य धर्मशा
स्त्रसिद्धत्वात्॥यस्य कस्य चित्॥ब्राह्मणस्य यस्मिन्कस्मिंश्चित्॥काले देशे कर्मणि वा॥स्वगृह्योक्तानु ३६
ष्ठानानुष्ठानानुपपत्तौ॥अन्यशाखोक्त॥अनुष्ठानेनैव मुख्यतया वा॥अनुकल्पेन वा॥तदनुष्ठानमात्रे।

णचारितार्थ्यसंभवप्रतीतेः॥स्वजन्यपुत्रस्यअन्यशाखिब्राह्मणंप्रतिदानेपुत्रीकायाः॥अन्यशाखिवि ॥ ॥ ॥
वाहेचनयोः॥पूर्वशाखागृह्यसूत्रभिन्नअन्यशाखागृह्यसूत्रानुष्ठातृत्वस्यसिद्धत्वात्॥अन्यैःबहु ॥ ॥ ॥
भिर्हेतुभिः॥चतुर्वेदाध्येतॄणांनियमेनसकगृह्यसूत्रोक्तानुष्ठातृत्वमेवेतिनिर्बंधोनसंभवति॥स्व ॥ ॥ ॥
गृह्यान्तव्यवहारःपितृपरंपराप्राप्तअधीतशाखानिमित्तिकःस्वशाखाध्ययनंविहायपरशाखाध्यय ॥०॥१
ने॥शाखारंडत्वमितिदोषापनयनायप्रायश्चित्तंचतैत्तिरीयशाखाउपनिषद्गतनारायणप्रश्नविषयकविद्यारण्य
कृतभाष्योक्तरीत्यापितृपितामहपरंपरयाप्राप्तशाखाव्यवहारप्रयोजकस्वशाखित्वअभिप्रायकं॥इत्यदोषः
॥पुराणादिप्रामाणिकग्रंथेषुस्वगृह्योक्तविधिनेतिप्रतिपादनेतुपित्रादिपरंपराप्राप्तशाखित्वनिरूपितस्व
गृह्यसूत्रोक्ते॥अन्यगृह्यसूत्रोक्तेश्चएकस्मिन्विषयेविरोधेप्राप्तेसतिश्रुतिस्मृतिपुराणशिष्टाचाराणांवि
रोधस्थलेएकस्मिन्नेवप्रदेशे॥सर्वकर्मानुष्ठानप्रयोजककालनिर्णायकतिथिवारादिज्ञापकत्वेनउक्तं
नपंचांगादिषु॥परस्परविरोधस्थले॥धर्मशास्त्रवाक्यैः॥परस्परविरुद्धैः॥स्वतकाद्यनुष्ठानश्राद्धाद्यनुष्ठान

प्रशा

३६६

विप्रतिपत्तौ च यथाबलाबलन्यायेन व्यवस्था ॥ आवश्यकतया संपादनीया भवति ॥ तद्बलाबलविचारे च मीमांसालौ किं कन्यापादिरित्यान्यतरपक्षस्य निर्धारयितव्यत्वं भवति ॥ तथा परस्परगृह्यसूत्रयोर्विरोधे अन्यतरपक्षनिर्धारणाय पित्रादि परंपराप्राप्तस्व शाखित्वानुरोधेन स्वगृह्यत्व व्यवहारस्यापि उपपत्तिर्भवति ॥ वस्तुतः शास्त्रतात्पर्यं तु चतुर्वेदाध्ययनविधानेन बहुकालसाध्यत्व बहुश्रमसाध्यत्वादिभिः ॥ सामान्यतया वेदाध्ययनमात्रोच्छेद शंकया एकवेदाध्ययनं वा कुर्यादिति तात्पर्यसूचने सति चतुर्णां वेदानां मध्ये कस्य वेदस्य अध्ययनं कर्तव्यमिति संशये ॥ प्राप्ते सर्वेषां तुल्यत्वात् ॥ अन्यतम वेदस्य अध्ययने विनिगमकत्वेन स्वपित्रादि परंपराधीत शाखाध्ययनस्य विवक्षितत्वात् तदेव कर्तव्यं इति विशेषनिर्धारणार्थं स्वशाखेति व्यवहारः प्राप्तः ॥ तथा च ॥ मनुस्मृतौ चतुर्थाध्याये ॥ येनास्य पितरो याताः येन याताः पितामहाः ॥ तेन यायात्सतां मार्गं तेन गच्छन्न रिष्यते ॥ १७८ ॥ अस्य मेधातिथ्यादि कुल्लूकभाद्यं तव्याख्याने ॥ ॥ येनेति ॥ बहुविधशास्त्रार्थ संभवे पितृपितामहाद्यनुष्ठित एव शास्त्रार्थो अनुष्ठितव्यः ॥ तेन गच्छन्न

नि०

३६५

रिष्यते ॥ नाधर्म्येण हिंस्यात् ॥ १८ ॥ इति ॥ तुल्यबलविरोधे विकल्पः ॥ इति गौतम
धर्मसूत्र ॥ ॥ स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः ॥ इति याज्ञवल्क्यस्मृतेः विज्ञानेश्वरीये च ॥ इत्याद्यु
क्तरीत्या समानतया अनुष्ठेयत्वेन बहुशास्त्रार्थे प्राप्ते यत्किंचित्न्यायमत्र सत्यप्यवस्थार्थे स्वपित्रादिपरंप
रा प्राप्त वेदाध्ययनस्य स्वगृह्यसूत्रादेश्च प्राबल्यद्योतनाय स्वगृह्यमिति व्यवहारः ॥ अत एव सर्वे तैत्तिरीयाः शाखि
नः सर्वे ऋक्शाखिनः सर्वे प्रथमशाखिनः ॥ इति रूढिः जाता शाखापरत्वेनैव गृह्यसूत्रप्रवृत्तं ॥ अत ए
व ऋक्शाखिनां एकविंशत्यवांतरशाखाब्राह्मणानां आश्वलायनगृह्यसूत्रमेकमेवानुष्ठापकं तत्तत्स
व ॥ इदानींतन आश्वलायनानां अधीयमानवेदे अवांतरशाखाभेदभिन्नशाकलसंहिता बाष्कलब्राह्मण
ऐतरेयारण्योपनिषदादिसमुदायस्यैव घटितो वर्तते ॥ तथा ॥ साम शाखाप्रभेदेषु कासांचित्शाखानामपि ए
कमेव गृह्यसूत्रं एकमेव श्रौतसूत्रं एकमेव धर्मसूत्रं इत्यपि ॥ भिन्नभिन्नऋषिकृतमेव अनुष्ठापकं भव
ति ॥ इत्यलं अतिप्रलापेन ग्रंथविस्तरभिया ॥ अधिकविचारो परत्र भ्यन्ने तस्मादेव ऋग्वेदादि

द्विवचवेदारंभणप्रभृतिसर्ववेदमंत्राणामपिस्वल्पसंख्ययापिसर्वदेशेषुप्रति॥ •२ पंक्ति

प्र॰शा॰ चतुर्वेदअनुयायिनः प्रत्येकं प्रत्येकं आश्वलायन = अपस्तंबद्राह्यायन कात्यायनअथर्वणशाखि

३६७ नश्चसर्वेपिउपाकरण = नित्यब्रह्मयज्ञांदिनं पठंतिसर्वशाखाप्रवर्तकऋषीणामयंयथासूत्रं॥ यथासं

भवंप्रतिदिनंजलतर्पणंकुर्वंतितथाचबोधायनगृह्यसूत्रे = नित्यब्रह्मयज्ञांगतर्पणे॥प्रजापतिंकांडऋ

षिंतर्पयामि॥सोमंकांडऋषिंत॥ अग्निंकांड ऋषिंतं॥सस्पतिंकांडऋषिंत।॥स्वयंभुवंकांडऋषिंत॥वि

श्वान्देवानृत॥छंदोग्यंत॥कण्वंबोधायनंत॥आपस्तंबं सूत्रकारंत॥सत्याषाढहिरण्यकेशीत

॥=॥याज्ञवल्क्यंतर्पयामि॥वसिष्ठं व्यासं॥प्रणवंत॥व्याहृतीं॥सावित्रीं = सरस्वतीं = ऋग्वेदं॥यजुर्वेदं

सामवेदं॥अथर्वणवेदंअथर्वांगिरसं॥इतिहासपुराणानि॥सर्वदेवजनानि = सर्वभूतानि॥सर्वतीर्था

नितर्पयामि॥=॥सामशाखागृह्यसूत्रेवेदोत्सर्जनकर्मांगऋषितर्पणकोटौ॥याज्ञवल्क्यं तर्पयामीति

चवर्ततेएतावताखगृह्यसूत्रस्यतत्तच्छाखिव्यवहारनियामकत्वासंभवात्॥सर्वेषांब्राह्मणानां॥सर्वा ३६८

शाखित्वसंभवेपि॥ तत्तच्छाखित्वव्यवहारस्यगृह्यसूत्रनियम्यत्वासंभवः॥एवंआपस्तंबीयेगृह्यसूत्रे

ऽनुक्तानां ॥ ब्रह्मयज्ञकांडोपाकरण ॥ पुनस्संधानादीनां ॥ बोधायनसूत्रोक्तानामेव आपस्तंब शाखिजनैर्ग्राह्य
त्वात् ॥ एवं ॥ आश्वलायनद्राह्यायनादीनां ॥ गृह्यसूत्रेष्वनुक्तानां कर्मणां ॥ परस्परं इतरेतरसूत्रोक्तस्य ग्राह्य
त्वं ॥ तत्तत्सूत्रकारैरेव ज्ञापितं ॥ एवं ॥ श्रौतसूत्रेषु ॥ वेदत्रयसूत्रस्यापि ॥ सर्वशाखिनां ॥ अध्वर्युप्रत्ययहौत्र
प्रत्यय ॥ छंदोगप्रत्ययाख्य ॥ कर्मभागेषु ॥ परस्परग्राह्यत्वं ॥ आवश्यकमेव ॥ एवं ॥ वेदांतविचारेषु ॥ सर्वशा
खिनामपि ॥ सर्वोपनिषत्सु ॥ प्रतिपाद्यर्थानां सर्वैर्ग्राह्यत्वमावश्यकमेव ॥ अयमर्थः पूर्वमीमांसोत्तरमीमांस
योर्गुणोपसंहारपादयोः शाखांतरोक्तक्रियाफलांगादीनां ॥ अन्यशाखोक्तकर्मण्युपसंहारः ॥
शाखांतरोक्त उपास्यगुणादीनां ॥ अन्येशाखो
क्त उपासनादिषु गुणोपसंहारश्च कर्तव्यः इत्याद्यर्थः स्पष्टमवप्रतीयते ॥ अपिच ॥ एवं ॥ तैत्तिरीयादिशाखोक्तक
र्मणि संशयप्राप्तौ ॥ वाजसनेयशाखोक्तवाक्यार्थानुसारेण ॥ अनुष्ठाननिश्चयः जैमिनिनाकृतः पूर्वमीमां
सायामपि ॥ शुक्लयजुषात्मक ॥ वाजसनेयिशाखावेदवाक्यान्यपि ॥ केषुचिदधिकरणेषु अनुष्ठाननिश्चय

प्रश्ना

३६८

र्थं ॥ विषयवाक्यतयाऽगृहीत्वा सूत्रकृञ्जैमिन्यादिभिः भाष्यवार्तिकादिकृद्भिश्च ॥ तत्तत्प्रकरणेषु ॥ विचारिता

निरूप्यंते ॥ तथाहि ॥ २ ॥ पूर्वमीमांसायां प्रथमाध्यायस्य द्वितीये ॥ भूत अर्थवादपादे औडुंबराधिकरणे ॥ वि

षयवाक्यं ॥ औडुंबरो यूपो भवति ऊर्ग्वा उदुंबर ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोवरुध्यै अत्र संशयबीजं

तु ॥ अवरुध्या इति वाजसनेयिशाखायां श्रूयते ॥ अवरुधे इति तैत्तिरीयशाखायां श्रूयते ॥ तस्मात् ॥ वाजस

नेयशाखावाक्यमेव अत्र विषयवाक्यं ॥ ऊर्जोवरुध्या इत्येतत् ॥ फलबोधकत्वात् ॥ विधिवाक्यं वा ॥ अ

र्थवादवाक्यं वेति संशयः ऊर्जोवरुध्या इति चतुर्थ्या फलश्रुति पादनेन धनलाभाय राजसेवेत्यादौ चतुर्थ्याः फ

लबोधकत्वदर्शनात् ॥ विधिरेवेति पूर्वः पक्षः ॥ ऊर्जोवरुध्या इत्येतस्य ऊर्ग्वा उदुंबर इत्यादिनाव्यवहितत्वा

त् ॥ फलबोधकत्वेन विधित्वं न संभवति ॥ ऊर्ग्वा उदुंबर इत्यादिना यूपविधाने ॥ वाक्यभेदापत्तेः ॥ औडुंबरो

यूपो भवतीत्येव विधिः ॥ ऊर्ग्वा उदुंबर इत्यादि ऊर्जोवरुध्या इत्यंतः ॥ तस्य अर्थवाद एवेति सिद्धांतः ॥ २ ॥ प्र

थमाध्यायस्य चतुर्थपादे वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्म

नि

३६७

वर्चसेनपुनाति॥यन्नवकपालः त्रिवृतैवास्मिनतेजोदधाति।।यद्दशकपालो विराजैवास्मिन्नन्नाद्यंदधाति
।।यदेकादशाकपालस्त्रिष्टुभैवास्मिन्निंद्रियंदधाति॥यद्द्वादशकपालोजगत्येवास्मिन्पशून्दधाति ।।यस्मिन्
जातयेनामिष्टिंनिर्वपति॥ पूतएवसतेजस्व्यन्नादइंद्रियावीपशुमान्भवतीति विषयवाक्यंश्रूयते।।वा
जसनेयिशाखायांतुपूतएवसतेजस्वीति विशेषः श्रूयते॥ तत्र संशयः ।।अष्टाकपालोभवतीत्यादिवाक्य
पंचकंतत्तद्द्रव्ययुक्तप्रत्येकंयागविधायकानिवा॥वैश्वानरंद्वादशाकपालं निर्वपेदिति ।।एकमेववाक्यंवि
धायकं॥अन्यानितस्यैवअर्थवादवाक्यानिवेति संशयः॥तत्रअष्टाकपालोभवतीत्युक्त्वागायत्र्यैवेनंब्रह्म
वर्चसेनपुनातीति ॥ तत्तद्वाक्योत्तरंविजातीयविजातीयफलप्रतिपादनात्॥पंचवाक्यान्यपितत्तद्याग।
विधायकानीतिपूर्वः पक्षः॥=॥यस्मिन्जातएतामिष्टिंनिर्वपतीतिप्रथमोपात्तवैश्वानरनामकयिष्टि
रेष॥ एतामिष्टिमितिएकवचनेन॥अनूद्य यस्मिन्पुत्रेजातेद्वादशाकपालद्रव्यकवैश्वानरेष्टौकृतायांस
तांसजातः॥पुत्रः ब्रह्मवर्चसेतेजस्वीअंनादः इंद्रियावी॥पशुमांश्च॥भ वतीत्यनेनशातेपंचाशदिति

प्र० भा० ८

३६९

न्यायेनद्वादशसंख्यायां॥अष्टत्वनवत्वदशत्वएकादशत्वादीनामंतर्भूतत्वात्॥प्रधानभूतद्वादशसंख्याकद्रव्य
कवैश्वानरेष्टिनामकजातेष्टिसाधकत्वेनद्वादशसंख्या॥अवयवअष्टत्वादिजनितब्रह्मवर्चसादिफलजनक
त्वं॥द्वादशकपालपुरोडाशयागस्यैकस्यैवेतिसिद्धांतः॥ =॥प्रथमाध्यायस्यचतुर्थपादे॥हस्तेनावद्यतिस्रु
वेणावद्यति॥स्वधितिनावद्यति॥इति॥अग्निष्टोमप्रकरणेवाक्यानिश्रूयते॥ तत्र॥हस्तस्रुवस्वधितयः॥
करणभूतपदार्थाः पुरोडाशआज्यमांसेषु॥अनियमेनभवंतिवा॥व्यवस्थिताभवंतिवा॥इतिसंशयः॥
तत्रवाक्यशेषाद्यभावेनपूर्वोक्तपुरोडाशाज्यमांसेषु॥अनियताभवंतीतिपूर्वःपक्षः॥योग्यतावशात्पृथग्योग्यक
रणपदार्थाः स्वयोग्येष्वेवसाधनत्वेनक्रियानिर्वर्तकत्वात्॥अवदानकर्मीभूतपदार्थबोधकंद्वितीयांतपदंज्ञापयति
हस्तेनपुरोडाशंअवद्यति॥स्रुवेण॥आज्यं॥स्वधितिनामांसं॥इतिहस्तस्रुवस्वधितिरूपकरणानांव्यवस्थायोग्यता
॥पुरोडाशंआज्यंमांसमिति॥ द्वितीयांतश्रुतिरूपप्रमाणज्ञापिकाभवतीतिसिद्धांतः॥ =॥ एवंसहस्रेष्वधि
यिकरणेषुमध्येप्रापशः॥बाहुष्वधिकरणेषुशुक्लयजुःशाखागतवाक्यान्येवशास्त्रकृताजैमिनिनाविषय।

३६८

वाक्यत्वेनउदाहृतानि ॥ तत्तदधिकरणेषु ॥ तथैव भाष्यकारवार्तिककार ॥ वृत्तिकार ॥ पार्थसारथि ॥ खंडदेव कृत भाष्यवार्त्तिकवृत्ति शास्त्रदीपिका ॥ भाट्टदीपिकाकंस्तुभादिआकरग्रंथेषु ॥ स्पष्टतया प्रतीयते ॥ ८ ॥ इत्येवंप्रकारेण ॥ गृह्यसूत्रमात्रस्य तत्तच्छाखित्वव्यवहारं प्रतिनियामकत्वासंभवात् ॥ परिशेषात् ॥ काश्यपगोत्रत्वभारद्वाजगोत्रत्वादिव्यवहारस्य ॥ पितृपितामह वंशपारंपर्य प्राप्तव्यवहारप्रयोज्यत्ववत् ॥ तत्तच्छाखित्वव्यवहारस्यापि ॥ वंशपारंपर्यप्राप्तव्यवहारप्रयोज्यत्वमेव ॥ ननु ॥ प्रसिद्धहेतुविशेषनियतप्रयोज्यत्वं ॥ ९ ॥ अतएव ॥ वाजसनेयिशाखाभेदेषु कात्यायनपरिशिष्टांतर्गतेन ॥ चरणव्यूहे ॥ जाबाला ॥ बौधेया ॥ काण्वा ॥ माध्यंदिनाः ॥ शापेया ॥ इत्यादिषु ॥ शाखाबांतरभेदेषु जाबालानां तच्छाखा पवेशः श्रूयते तज्जाबालानामेव अथर्वणशाखाभेदेष्वपि प्र वेशः ॥ अन्यत्र श्रूयते ॥ एवं गोतमस्यापि सामशाखाः प्रविष्टत्वेन तच्छाखाधर्मसूत्रकर्तृत्वं तस्यैव गोतमस्य ॥ आश्वलायनशाखावेदाचार्यकोटौ प्रवेशः ॥ तद्ब्रह्मयज्ञतर्पणेषु ॥ गार्गिं तर्पयामि ॥ गोतमं तर्पयामि ॥ सुजातवक्त्रं तर्पयामि ॥ इत्यादिना ॥ ऋग्वेद आचार्य

प्रश्ना २७०

त्वेनगौनमः॥प्रविश्यते॥एवं॥आस्वलायनवेदशाखोपदेष्टाचार्यतर्पणप्रवाहे॥सुमंतुजैमिनिवैशंपायन॥ नि

पैलसूत्रभाष्यभारतमहाभारत॥धर्माचार्यास्तृप्यंतु॥इत्यारभ्य शौनकंतर्पयामि॥आश्वलायनंतर्पयामि

येचान्येआचार्याःतेसर्वेतृप्यंतु॥ इत्यंतेनवाक्येनसामवेदप्रवर्तका॥जैमिनेः॥तत्सुतस्यअथर्वणप्रवर्तका॥

सुमंतोः॥यजुर्वेदप्रवर्तकवैशंपायनस्यस्वशाखाऋग्वेदप्रवर्तकपैलस्य॥अन्येषांगार्ग्यादीनांअन्यशा

खाप्रविष्टानांऋषीणांच॥ऋकशाखावेदाचार्यकोटिप्रविष्टत्वेनच॥सर्वेशाखिनांसर्वशाखाप्रवेशः॥

सर्वसूत्रस्मृत्यादिषुस्पष्टतयाप्रतीयते॥अतोपिहेतोः॥गृह्यसूत्रप्रयुक्तशाखित्वव्यवहारनियमाभावा

त्॥सर्वेशाखिनांसर्वशाखित्वसंभवेनसर्वेषांब्राह्मणानांसर्वासांशाखानांचसमत्वमेवसिद्धंभवति॥८॥

इत्यलमतिप्रसंगेन॥तस्मात्॥तवे ब्राह्मणानां॥सर्वशाखिनांसर्ववेदिनांसमानत्वेन॥सर्ववेदोक्तसर्व

शाखासूत्रोक्त॥कर्मोपासनाज्ञानादीनांतत्साधनानां॥तद्रूपादीनांच॥यथासंभवं॥परस्परं॥सर्वशा २६१

खिभिरपि॥ग्राह्यत्वंसिद्धमेवभवति॥अतः॥ब्राह्मणानांमध्येएतच्छाखिनःश्रेष्ठाः॥एतच्छाखिनःनिकृ

षः॥इत्यादिव्यवहारः॥अज्ञान॥भ्रांतिमूलकराव॥अपिच॥यथावाजसनेयशाखायाःप्रायेण॥प्राचीनग्रंधे
षु॥यजुर्वेदत्वेन।प्रयोगः॥एवंकृष्णयजुषः॥तैत्तिरीयत्वप्रयोगोदृश्यते॥=॥तथाहि॥पराशरमाथवीये अ
ष्टमाध्याय परिषत्प्रकरणे॥=॥ एकविंशतिसंख्याकश्लोकव्याख्याने॥पराशरमूलं।=॥चत्वेप ठतिद्विजा
वेदं पंचयज्ञरताश्चये।त्रैलोक्यंतारयंत्येते पंचेंद्रियरताअपीति॥२१॥=॥अस्यव्याख्यानं॥ननुसंस्मृता
नांबहूनांमपिगृहिणांकथंपरिषत्त्वंस्यान्नामधारकवत्तेषामिंद्रियरतत्वादित्याशंकायामाहयइति॥=॥वेदो
हिनिखिलपापापनपनेसमर्थः॥तथाचतैत्तिरियब्राह्मणेवह्म्यादिपरंपरयाप्राप्तपापस्वाध्यायोयहंतीतिश्रूयते
इति॥मनुस्मृतौद्वितीयाध्याये॥मनुमूलं॥ ॥वेदोखिलोधर्ममूलंस्मृतिशीलेचतद्विदां॥आचारश्चैवसाधूना
मात्मनस्तुष्टिरेवच॥६॥अस्यव्याख्यानं॥इदानींधर्मप्रमाणान्याह॥वेदोखिलोधर्ममूलमिति॥=॥वेदः
ऋग्यजुस्सामाथर्वलक्षणः॥इति॥ ॥धर्मसिंधौउपाकरणप्रकरणे॥=॥सर्वयाजुषाणामुत्तरैवेति॥ननु॥ब
हुकालप्रभृतिबहुप्रदेशेषु॥वाजसनेयिब्राह्मणेस्सह॥इतरशाखीयब्राह्मणानां॥संकुचितनया॥सव्या

प्र॰ श॰

३७१

वहारोवर्त्तते॥अस्यमूलभूतत्वेनकालिकाखंडवाक्यमपिवर्त्तते। एवंस्थिते॥त्वया॥सर्वैपिब्राह्मणाःस
मानाएव॥इतिउच्यते॥ननु॥पक्ष पाताश्रयवाक्यमिवदृश्यते॥इतिचेत्॥बाढं॥बहुश्रुतिस्मृतिइति
हासपुराणादिप्रमाणैः पूर्वोत्तरमीमांसाद्यन्यायैः॥लौकिकन्यायैश्चबहुविधैस्सर्वप्रमाणविरुद्धत्वेन
कालिकाखंडवाक्यस्याप्रामाण्यंसाधितमपित्वयापूर्ववासनाबलात्॥असूया॥अपरित्यागेनच॥
पूर्ववदेववदसि॥परस्परप्रमाणयोः॥तन्मूलकव्यवहारयोश्च॥ विरोधेसति॥ लौकिके॥न्याये॥
प्रत्यक्षप्रमाणमूलकव्यवहारस्यतन्मूलभूतप्रत्यक्षप्रमाणस्य॥चप्राबल्यात्॥ तदितरप्रमाणस्य
तन्मूल व्यवहारस्यचदौर्बल्यमितिनिश्चयोवर्त्तते शास्त्रीयेतुप्रमाणेप्रत्यक्षस्यानापन्नश्रुतिप्रमाणस्य
तन्मूलकव्यवहारस्यच प्राबल्यं।तदितरप्रमाणस्यतन्मूलकव्यवहारस्यच॥दौर्बल्यंइतिन्यायनिर्णयः
पूर्वोत्तरमीमांसयोः निश्चितोवर्त्तते एतन्न्यायेनअत्रापि।श्रुतिमूलकपुराणादेः तन्मूलकव्यवहारस्यच प्राब
ल्यं तदितरप्रमाणस्यतन्मूलकव्यवहारस्यच दौर्बल्यं तत्रापिप्रत्यक्षश्रुतिमूलकस्यपुराणादेः तन्मूलकव्यवहा

कव्यवहारस्य च दौर्बल्यं॥ इति न्यायः॥ मीमांसाधर्मशास्त्रादिषु सिद्धतया दृश्यते॥=॥ तथाहि॥ नृसिंहप्रयोगपारि
जाते॥=॥ श्रुत्यादिबलाबलविचारप्रकरणे॥=॥ अत्र कल्पसूत्रस्मृत्योर्विरोधे प्रत्यक्षश्रुतिमूलत्वेन कल्पसूत्रं
प्रबलमित्याह॥ हेमाद्रौ॥=॥ श्रौतानां कर्मणां क्लृप्तिः कल्पसूत्रं तदुच्यते॥ तथैव गृह्यकल्पानां स्मार्तानामुप
संग्रहः॥=॥ शाखानां विप्रकीर्णत्वात् पुरुषाणां प्रमादतः॥ नानाप्रकरणस्थत्वात् स्मृतेर्मूलं न लक्ष्यत इति॥=॥
याज्ञवल्क्योपि॥ उत्सन्नाः शाखायाः काश्चित्तासां वेदान्तराणि च॥ अंतर्धानं गतानीह स्मृत्वा नाऽस्मृतयः कृताः॥
इति एवमेव॥ अत्रापि त्वयोक्ताकालिकाखंडवाक्यस्य पूर्वोक्तप्रमाणादिबलैः॥ अप्रामाण्यसाधनेपि॥ पुनः
तव मनः समाधानार्थं शास्त्रन्यायः॥ प्रदर्शइष्यते॥=॥ एवं नृसिंहपारिजाते उदाहृते हेमाद्रिवचनानुरोधेन
पूर्वमीमांसान्यायबलेन॥ तव कालिकाखंडवाक्यस्य अनुमितपरोक्षश्रुतिस्मृतिमूलत्वेन दौर्बल्यं॥ बृहदा
रण्यजाबालरामतापनीयश्रुत्यादिप्रत्यक्षश्रुतिमूलक आदित्यपुराणादेः प्राबल्यं॥ इति हेतोः॥ तन्मू
लकव्यवहारस्य अप्रामाणिकत्वं॥ एतन्मूलकव्यवहारस्य प्रामाणिकत्वं॥ इति॥ सिद्धांतः क्रियते॥=॥ अ

पिच॥ ८ ॥ मनुस्मृतौप्रथमाध्याये॥ ८ ॥ मनुमूलं॥ ८ ॥ भूतानांप्राणिनः श्रेष्ठाः प्राणिनांबुद्धिजीविनः॥ बुद्धिमत्सु नि॰
नराःश्रेष्ठानरेषुब्राह्मणास्मृताः॥ ९६॥ मनुमूलं॥ ब्राह्मणेषुचविद्वांसोविद्वत्सुकृतबुद्धयः॥ कृतबुद्धिषुकर्ता
रःकर्तृषुब्रह्मवेदिनः॥ ९७॥ एवंप्रकारेणउत्तरोत्तरोपदिष्टानांश्रेष्ठ्यंइतिक्रमप्रवाहेकृतबुद्धिषुकर्तारइतिके
वलशास्त्रतज्ञंनवत्तामात्रेण॥ श्रेष्ठ्यनसंभवति॥ ८ ॥ अपितु॥ तदुक्तार्थानुष्ठानवतएवश्रेष्ठ्यंसंभवति॥ इ
त्युक्तप्रकारेणैव॥ केवलमूढानांमध्येकेचनयत्किंचिच्छास्त्रतज्ञानवत्वेनमूढैःशिष्टत्वेनगृहिता अपि
तेषांतदर्थानुष्ठानाभावात्॥ तेषांशास्त्रेषुमीमांसादिन्यायेनपरस्परएकवाक्यताज्ञानद्वाराशास्त्रतात्पर्य
निश्चयाभावादेवतेषांव्यवहारोपि अप्रामाणिकएव॥ अन्यथा॥ तेषांसर्वशास्त्राणांपरस्परैकवाक्यताज्ञा
नद्वाराशास्त्रतात्पर्यनिश्चयवत्वेन॥ तदर्थानुष्ठानमेवसंभवेत्॥ तदनुष्ठानादर्शनात्॥ तेषांशास्त्रतात्पर्यनि
श्चयोनास्तीतिगम्यते॥ अतः॥ तेषांव्यवहारोपि॥ अप्रामाणिकएव॥ तस्मात्॥ तद्व्यवहारबलेनब्राह्मणेषु
ब्राह्मणानां॥ अयोग्यताव्यवहारोनसंभवत्येव॥ ८ ॥ अपिचआपस्तंबआश्वलायनबोधायनशाखा

द्यनुयायिवत्॥एतेषांवाजसनेयिनामपिपा र्धक्येनआर्षत्वंगणप्रविष्टत्वं॥काण्यपादिगोत्रप्रविष्टत्वंचस
भवति॥तथाच॥आश्वलायनप्रयोगरूपस्मार्तप्रदीपिकायां॥प्रवरखंडप्रकरणे॥अथकुत्सानांत्र्यार्षेय॥आंगी
रसमांधात्रकौत्सेति॥कुत्सवन्माधातृवदंगिरोवदित्यथाजमीढाःकण्वास्तेषांत्र्यार्षेयआंगीरसाजमीढकाण्वे
तिकण्ववदजमीढवदंगिरोवदित्यथविरूपारथीतरास्तेषांत्र्यार्षेयआंगिरसवैरूपपार्षदश्वेतिपृषदश्ववद्विरूपवदं
गिरोवदित्यष्टादंष्ट्रोमोहेकेंगिरसस्थानअष्टादंष्ट्रेवैरूपपार्षदश्वेतिएषदश्ववद्विरूपवदष्टादंष्ट्रवदित्यथमुद्गलानां
त्र्यार्षेय॥आंगिरसभार्म्यश्वमौद्गल्येतिमुद्गलवद्भर्म्यश्ववदंगिरोवदितित्रिसुमोहेकेंगिरसस्थानेतार्क्ष्यभार्म्यश्वमौद्गल्ये
तिमुद्गलवद्भर्म्यश्ववत्रिसुवदित्यथबिसुरुद्दह्नानांत्र्यार्षेयआंगिरसपौरुकुत्स्यत्रासदस्येतित्रसदस्युवत्पुरुकुत्स्य॥वदंगि
मद्दिण
रोवदित्येषएवाविकृतःशठमर्षणवादरायणोपमित्यैोपगविसात्यकिसात्यकामारुणि नितुंदिनामथात्रीणांत्र्यार्षेय॥
आत्रेयार्चेननसश्यावाश्वेतिशावाश्ववदर्चेनानसवदत्रिवदित्यथागविष्ठिराणांत्र्यार्षेयआत्रेयार्चेनानसगाविष्ठिरेतिग
विष्ठिरवदर्चेनानसवदत्रिवदित्येषएवाविकृतोवामरथ्यसुमं ॥

प्र॰ शा॰

३७२

गलबीजवापिन्यं ॥४॥ अथ विश्वामित्राणां देवरातचिकितमनुतंतुकौलकिवातकियाज्ञवल्क्योलूकबभ्रुहद नि॰
ग्निबभ्रुशालविशालावतशालंकायनकालबवास्तेषांत्र्यार्षेयो वैश्वामित्रदेवरातौदलेत्युदलवद्देवरातव
द्विश्वामित्रवदित्यथ श्रौमत कामकायनानांत्र्यार्षेयो वैश्वामित्रदेवश्रवसदेवतरसेति देवरसवो
वदेवश्रवोवविश्वामित्रवदित्यथाज्यानांत्र्यार्षेयो वैश्वामित्र माधुच्छंदसाज्येत्यजवन्मधुः छंदोवद्वि
श्वामित्रवदित्यथ माधुच्छंदसास्वधानंजयास्तेषांत्र्यार्षेयो वैश्वामित्र॥ माधुच्छंदसधानंजयेति धनंज
यवन्मधुःछंदोवद्विश्वामित्रवदित्यथ पुराणाः ॥ परिधापकास्तेषांद्व्यार्षेयो वैश्वामित्र पौरणे
ति पूर्णवद्विश्वामित्रवदित्यथाष्टकालोहितास्तेषांद्व्यार्षेयो वैश्वामित्र कौत्यष्टकवद्विश्वामित्रवदित्यथा
घमर्षणाः कुशिकास्तेषांत्र्यार्षेयो वैश्वामित्राघमर्षणकौशिकेति कुशिकवदघमर्षणवद्विश्वामित्रवदि
त्यथ कश्यपानांत्र्यार्षेयः काश्यपावत्सारनैध्रुवेनिध्रुववदवत्सारवत्कश्यपवदित्यथ रेभाणांत्र्यार्षेयः का १२
श्यपावत्साररैभेति रेभवदवत्सारवत्कश्यपवदिति ॥ ८॥ धर्मप्रवृत्तावपि ॥ अथांगीरसगणः ॥ गौतमस्य

भरद्वाजिः कपिः कण्वोथमुद्गलः ॥ इति ॥ = ॥ अथ भरद्वाजगणः ॥ = ॥ भरद्वाजोथकण्वाग्निरिति ॥ = ॥ अ
थकण्वगणः ॥ = ॥ आंगीरसश्चाजामीढकण्वाश्चापिअयोह्यमे ॥ मिथो विवाहं ॥ नार्हंते ॥ समानप्रवरा
यतः ॥ आंगीरसाथोकण्वइति ॥ = ॥ इत्यादिषुकण्वादीनांवाजसनेयिशाखिनामपि ॥ आंगीरसभारद्वा
जगणेष्वपिप्रवेशः ॥ कण्वादीनामपि ॥ पृथग्गणत्वमित्यादिषु सर्वत्रऋषिसमानत्वेनैव सर्वशास्त्रेषुव्यव
हारदर्शनात् ॥ शाखाभेदेनवावेदभेदेनवा ॥ ब्राह्मणभेदेनवा ॥ ब्राह्मणादीनांमध्येन्यूनाधिकभावोनसं
भवत्येव ॥ = ॥ किंच ॥ श्रुतिष्वपिपरस्परविरोधेश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानांसमवायेपार
दौर्बल्यमर्थ विप्रकर्षादितिजैमिनिसूत्रात्प्रकरणप्रमाणार्थवादसाधनफलन्यायपतारतम्यादिन्यायब
लविचारेणशास्त्रार्थनिर्णयः पूर्वोत्तरमीमांसयोः निर्णीतोवर्तते ॥ तन्यायेन ॥ अत्रापिकालिकाखंडवाक्य
स्य ॥ आदित्यपुराणादेः ॥ न्यायविचारेणबलाबलनिर्णयेनार्थः ॥ कर्त्तव्योभवति ॥ तद्यथा ॥ श्रुतौ ॥ कर्म
कांडे ॥ अपामसोममम्रृताअभूम इति ॥ = ॥ नसुवर्गोह्योकाच्यवंतेकदाचनेति ॥ = ॥ अक्षय्यंहवैचातु

प्र शा:

३७४

मीस्यया जिनः ।। सुकृतं भवति ।। प्रजाभिरग्ने अमृतत्वमित्यादिवाक्यैः ।। कर्मप्रजादिसाधनेन ।। मोक्षप्राप्तिश्रव नि:
णेपि ।। तथा ।। ज्ञानकांडे ।। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।। = ।। न्यास इति ब्रह्मा ब्रह्मा हि
परः परो हि ब्रह्मा तानि वा ।। एतान्यवराणि परांसि न्यास एवात्यरेचयद्य एवं वेदेत्युपनिषत् ।। इत्यादिवा
क्यैः ।। सर्वकर्मत्यागपूर्वकज्ञानादेव मोक्ष इति प्रतिपाद्यते ।। तयोर्विरोधे बलाबलविचारेण कर्मकांडश्रुतीनां
।। तमेतं वेदानुवचनेन ।। ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेत्यादिश्रुत्यंतरात् ।। कर्मणां ।।
ज्ञानसाधनत्वावगमात् ।। मुमुक्षुविषयत्वं ।। तमेव विदित्वाति मृत्युमेति नान्यः ।। पंथा विद्यतेयनाये
दित्यादिश्रुतिभ्यः ।। ज्ञानं विना मोक्षाभावावधारणात् ।। कर्मकांडश्रुत्यपेक्षया ।। ज्ञानकांडश्रुतेः ।। बलीय
स्त्वमिति ।। वैदिकसिद्धांतः ।। संप्रतिपन्नः ।। तद्वदत्रापि ।। बहुश्रुत्यादिप्रमाणविरोधात् ।। आदित्यपुराणादि
पक्षस्य ।। बहुन्यायबलादिसहकृतत्वाच्च ।। कालिकाखंडवाक्यस्याप्रामाण्यमुचितमेव ।। = ।। एवमेव स्नान
दानादिना मोक्षो भवतीति प्रतिपादकपुराणापेक्षया ।। ज्ञानं विना मोक्षो नास्तीति प्रतिपादकपुराणस्मृतिश्रु

१७३

तीनां बलीयस्त्वेन स्नानादिप्रतिपादकपुराणस्य स्नानाद्यर्थवादत्ववत्॥ कालिकाखंडवाक्यस्य गुर्वभिमतानानुसरण निंदार्थवादत्वमेवेति निश्चेतुं उचितं भवति॥ अपिच॥ वाजसनेयिनां॥ तैत्तिरीय ऋग्वेद साम गाथर्वणिकानामपि॥ काश्यप भारद्वाजादि॥ एकगोत्रोत्पन्नत्वेन सर्वशाखिब्राह्मणेषु॥ सर्वगोत्राणामपि॥ इदानींतनेषु॥ दृश्यमानत्वात्॥ वाजसनेयिशाखिनां॥ शापग्रस्तत्वेन॥ अयोग्यत्वं कथं॥ संभाव्येत॥ शापात्पूर्वानुवृत्त गोत्रमेव इदानीमपि॥ अनुवर्तत इति चेत्॥ यदा शापग्रासनंतरमेव॥ चंडालत्वप्राप्ता पूर्वगोत्रानुवृत्तिः कथं वर्तेत कश्चित् ब्राह्मणः स्वजातिभ्रष्टस्सन् शूद्रजातौ प्रविष्टो वा॥ ब्रह्महत्यादि महापातकतत्संसर्गात्पतितभूतो वा॥ चंडालम्लेच्छादिसंपर्कवशात्॥ तज्जातिं प्राप्तो वा भवेत्॥ तस्य गोत्रानुवृत्तिः॥ कुत्रापि न दृश्यते॥ एवं॥ तव कालिकाखंडवाक्यरीत्या॥ चंडालत्वप्राप्तश्चेत्॥ गोत्रानुवृत्तिः॥ कथं भवेत्॥ सर्वब्राह्मणानां समानत्वाभावेव॥ चतुर्वेदाध्येतृत्वेन॥ एककाश्यपादिऋषिवंशोत्पन्नत्वेन॥ तद्गोत्रप्राप्तानामध्ये॥ एकस्य ऋक्शाखित्वं॥ एकस्य सामशाखित्वं॥ एकस्याथर्वणशाखित्वं॥ एकस्य तैत्तिरीयत्वं॥ एकस्य वाजसनेयित्वं वा॥ कथं प्राप्येत॥ तस्मात्॥ एकगोत्रोत्पन्नानामपि॥ सर्वशाखाध्येतृत्वेन॥ सर्वशाखासंभवत्वेव॥ अयं ऋग्वेदी॥ अयं यजुर्वेदीत्यादि विशेषव्यवहारोपपत्तिस्तु पूर्वमेव व्याख्याता॥ अपिच॥ कण्वादीनां शापग्रस्तत्वेनायोग्यत्वे॥ गयायां धर्मशिलायां॥ ईशानविष्णुकमलासनकार्त्तिकेयवह्नित्रयार्करजनीशगणे

प्र॰ शा॰

३७५

श्वराणां॥सभ्यावसथ्यदधिकण्वमतंगजानां॥क्रौंचामरेंद्रकलशोद्भवकश्यपानांपादानमामिसततंपितृमुक्तिहेतू
न्॥इति॥गयामाहात्म्यप्रतिपादकपुराणवचनानुसारेण॥ब्रह्मविष्ण्वीश्वरेन्द्रकस्यपादिऋषिदेवतापादपङ्क्तौ॥कण्व
पादस्यापि।स्थितित्वंकथंसंभाव्येत॥कण्वस्यापि॥तवकालिकाखंडोक्तरीत्या॥चंडालत्वप्राप्तेः॥त्वयाउच्यमानत्वा
त्॥ अन्यथा॥ निषिद्धस्यापि॥ईशानादिपादकोटौप्रवेशांगीकारे॥इदानींतनस्य॥कस्यचिच्चं डालपादस्यापि॥तत्र
स्थितित्वप्रसंगः।तस्मात्।याज्ञवल्क्यकण्वादीनां॥शापग्रस्तत्वासंभवेन॥तत्प्रतिपादककालिकाखंडवाक्यस्याप्रा
माण्यं॥सिद्धंभवति॥किंच॥गौतमधर्मसूत्रेतद्भाष्याख्यमस्कर्यां॥त्यजेत्पितरंराजघातकमिति॥राजहननादिदोषग्र
स्तंपितरंवक्ष्यमाणघटस्फोटनादिक्रियया॥त्यजेदित्युक्तं॥मनुस्मृतौतृतीयाध्याये॥१५७॥एतत्संख्याकश्लोके॥अ
कारणपरित्यक्तामातापित्रोर्गुरोस्तथा॥इति॥तस्यव्याख्यानंकुल्लुकभट्टीयं॥अकारणेति॥मातुःपितुःगुरूणांचपरि
त्यागकारणंविनापरित्यक्ता॥शुश्रूषादेरकर्त्तेति॥शास्त्रीयत्यागकारणविशेषंविना।यःपरित्यजतितमितिउत्तरेणसं
बन्धः॥एवंवदतामनुना॥शास्त्रीयदोषसत्वे तेषामपित्यागः॥शास्त्रसंमतइतिज्ञापितंभवति॥मनुस्मृतौतृतीयाध्या
ये॥१७७॥एतत्संख्याकश्लोके॥वीक्ष्यांधोनवतेःकाणःषष्टेःश्वित्रीशतस्यतु॥पापरोगीसहस्रस्यदातुर्नाशयतेफ
लं॥१७७॥अस्यव्याख्यानं॥वीक्ष्येति अंधस्यवीक्षणासंभवाद्वीक्षणयोग्यदेशसन्निहितोसौअपाङ्क्तेयानांनवते

नि

३७५

र्भोजनफलंनाशयति॥ एवंकाणः॥षष्ठेःश्वेतकुष्ठिशतस्यपापरोगिरोगराजोपहतः॥सहस्रस्यइत्यंधादिसंनिधि
निरासार्थंवचनं॥गुरुलघुसंख्याभिधानंचेह संख्योपचये दोषगौरवं॥तत्रचप्रायश्चित्तगौरवमिति दर्शयितुं॥१७७॥
इत्यादिवाक्यैः शास्त्रीयंदोषग्रस्तत्वेमातापितृगुर्वादीनामपित्यागस्यशास्त्रविहितत्वात्।अन्नदानकर्तुः अंधक
काणकुष्ठ्यादिसंपर्केणतद्दर्शनयोग्यप्रदेशपङ्क्त्युपविष्टब्राह्मणान्नदानलाभावश्यप्रतिपादकाच्च॥कस्यचित्॥
ब्राह्मणादेः।तादृशदोषग्रस्तत्वे तेनसहसर्वव्यवहारलोपस्य सर्वशास्त्रविहितत्वेसिद्धे सति। तवकालिकाखंडोक्त
रीत्यायाज्ञवल्क्यकण्वमाध्यंदिन कात्यायन ब्रह्मदत्तादीनांशापग्रस्तत्वेनचंडालत्वप्राप्तौसत्यांपूर्वोक्तरीत्यातेषां॥
तत्र।तत्र। श्रुतिर्महाभारतविष्णुपुराणभागवत आदित्यपुराणस्मृतिसूत्र॥भाष्यव्याख्यानादिषुतेषांऋषिराज
न्यब्राह्मणादिभिस्सहपरस्परंयजनयाजनाध्ययनाध्यापनदानप्रतिग्रहकन्यादान।ग्रहणादिसर्वव्यवहारस्यप्रदर्शि
तत्वेनवक्ष्यमाणप्रमाणग्रंथ स्यैस्तादृशव्यवहारप्रदर्शनेनच॥एषांमाहात्म्ये॥कथंसंभवेत्।तद्विस्तारस्तु॥उत्त
रग्रंथेषुविस्तारतयाप्रदर्शइष्यामः॥श्राद्धेभोजनार्थेब्राह्मणयोग्यतायोग्यताविचारः॥तथाचधर्मसिंधौ॥तृतीयप
रिच्छेदेउत्तरार्धे॥अथश्राद्धेब्राह्मणाः। तत्रजातकर्मादिसंस्कारैः।संस्कृतः।सत्यवाक्शुचिः।वेदाध्ययनसंपन्नः॥
षट्कर्मस्ववस्थितः।पुरुषत्रयविख्यातः।सवैब्राह्मणउच्यते।इतिब्राह्मणसामान्यलक्षणं॥तत्रोत्तममध्यमा

धर्मभेदेनत्रिविधाः॥ब्राह्मणाः॥ तत्रोत्तमाः॥वेदाध्ययनसंपन्ना वेदांगाध्यायिनोपिच॥येवैयाकरणायेचमीमांसा
ध्ययनेरताः॥पौराणिकाश्चवेदांतीधर्मशास्त्ररतोपिच॥एतेषामपियेपुत्राब्रह्मवेत्तातथैवच॥वेदार्थज्ञःकर्मनिष्ठा
स्तपोनिष्ठाश्चयोगिनः॥पितृमातृपराश्चैवस्वधर्मनिरतस्तथा॥ शिष्टुरप्यग्निहोत्रीचसोमादिश्रौतकर्मवित्॥शिव
भक्तोविष्णुभक्तोभार्यायामृतकालगः॥गुरुभक्तोज्ञाननिष्ठःसोमयाजीचसत्यवाक्॥सुशीलःस्नातकयतीब्र
ह्मचारिणउत्तमाः॥एतेसर्वेसपत्नीकायुवत्वादिगुणान्विताः॥सापिंड्ययोनिशिष्यत्वसंबन्धैश्चविवर्जिताः॥कु
ष्ठापस्माररोगादिदोषैर्हीनाश्चेदुत्तमास्मृताः॥तत्रदशाहादिसूतकादिप्रयोजकसापिंड्यसगोत्रसोदकरूपः
संबंधः।सापिंड्यपदाभिधेयः॥योनिसंबंधोमातुलत्वश्वशुरत्वशालकत्वादिः॥आदिनागुरुसहाध्यायित्वमित्र
त्वादयः॥तथाचसपत्नीकत्वादि॥गुणयुक्ताः॥उक्तसंबंधहीनाः॥अपस्मारांधत्वादिदोषहीनाः।वेदाध्यायित्वा
दिसप्तविंशतिप्रकाराविप्राउत्तमाइतिसिद्धं॥तत्रविशेषः॥ श्लोकः॥ यद्येकंभोजयेच्छ्राद्धेछंदोगंतत्रभोजयेत्॥
ऋचोयजूंषिसामानित्रितयंतत्रविद्यते॥ऋग्वेदिनंचपित्र्यर्थेयाजुषंचपितामहे॥प्रपितामहेसामगंचभोज
येच्छ्राद्धकर्मणि॥अथर्ववेदिनंवैश्वदेवेपित्र्येचभोजयेत्॥एतेनस्वशाखीयद्विजाभावेद्विजानन्यान्निमंत्रयेदिति
निरस्तं।केचित्।यथाकन्यातथाहविरितिनियमाद्यैःसह॥योनिसंबंधस्तुएवपरशाखीयाः॥श्राद्धार्हाइत्याहुस्ते।

निर्मूलं ॥ केचिच्छ्राद्धकर्तुः सगोत्रप्रवरा वर्ज्याः ॥ पितृपुत्रौ भ्रातरौ द्वौ निरग्निं गुर्विणीपतिं ॥ सगोत्रप्रवरं चैव वर्जयेच्छ्रा
द्धकर्मणीति वचनादित्याहुः ॥ विना मांसेन मधुना विना दक्षिणया शिषा ॥ परिपूर्णं भवेच्छ्राद्धं यतिषु श्राद्धभोजिष्विति
॥ यतिप्रशंसा ॥ अथ मध्यमा विप्राः ॥ मातामहो मातुलो भागिनेयो दौहित्रजामातृगुरुः शिष्यो याज्यः श्वशुरः ऋत्विक्
। शालकः ॥ पितृष्वसृपुत्रो मातुलष्वसृपुत्रो मातुलपुत्रो तिथिः ॥ सगोत्रमित्रमित्येते मध्यमाः ॥ दौहित्र ॥ जामातृ ॥
स्वस्त्रियादीनां विद्यादिगुणवतां श्राद्धे निमंत्रणाभावे दोषः ॥ गुणहीनत्वे तु न दोषः ॥ षड्भ्यस्तु पुरुषेभ्यो र्वाक् ॥ श्राद्धा
र्हा नैव गोत्रिणः ॥ षड्भ्यस्तु परतो भोज्या अलाभे गोत्रजा अपि । अत्र विशेषः ॥ ऋत्विजस्सपिंडाः संबंधिनः शिष्या
श्च विश्वेदेवस्थाने नियोज्याः ॥ न तु पित्र्ये । एवमन्येपि । विगुणा विप्रा दैवस्थाने योज्याः ॥ श्लो० ॥ पिता पितामहो भ्राता
पुत्रो वाथ सपिंडकः ॥ न परस्परमर्घ्याः स्युर्न श्राद्धे ऋत्विजस्तथा ॥ वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः ॥ अथ व
र्ज्याः ॥ क्षयश्वासमूत्रकृच्छ्रभगंधरादिमहारोगी हीनांगोधिकांगः ॥ काणो बधिरः मूकः शठः कितवो भृतकाध्याप
को मित्रद्रोही पिशुनः ॥ कुनखी कृष्णदंतः ॥ क्लीबो मातापितृगुरुत्यागी चोरो नास्तिकः पापकर्मा विहितकर्मत्यागी न
क्षत्रोपजीवी वैद्यो राजभृत्यो गायको लेखकः । कुसीदजीवी । वेदविक्रयी ॥ कवित्वजीवी देवतार्चनजीवी नटो गृह
दाही समुद्रगामी शस्त्रकर्ता सोमविक्रयी पक्षिपोषकः । परिवेत्ता दिधिषूपतिः ॥ कुमाराध्यापकः ॥ पुत्रात्सात्तविद्यो

प्र॰श्रा ६ ३७७

व्यग्रास्यंर्यंवेदघोषकारीग्रामयाजीकेशपशुविक्रयी शिल्पीपित्रादिवादकारीशूद्रयाजकोजटीश्मश्रुहीनोनिर्दयोर
जस्वलापतिः॥गर्भिणीपतिः॥ कुष्ठीवामनोरक्तनेत्रोवाणिज्योपजीवी॥छिन्नोष्ठः छिन्नलिंगोगडुमान् ज्वरीत्तोदैवल
कोविधुरोनिरग्निःशूद्रगुरुः॥शूद्रशिष्योदांभिको गोत्रविक्रयी॥रसविक्रयी॥वेदनिंदकोवृक्षारोपकः॥सदायाचक
॥कदर्यः कृषिजीवीसाधुनिंदितो मेषमहिषपोषकः॥कपिलकेशः॥विस्मृतवेदोनिष्ठुरवानित्यादयोविग्राह्यव्यकव्य
योर्वर्ज्याः॥धर्मार्थमुदरार्थंवौषधकारीविगर्हितः॥श्लो०॥देवार्चनपरोनित्यंवित्तार्थीवत्सरत्रयं॥असौदेवलको
नामदेवस्यग्राह्यकोपिन्न॥वर्ज्यनीयःसविज्ञेयः सर्वकर्मसुसर्वदा॥ इदंमनुष्यस्थापितविषयमितिभाति॥ दाराग्नि
होत्रसंयोगंकुरुते योग्रजेस्थिरे॥परिवेत्तासविज्ञेयःपरिवित्तिस्तुअग्रजः॥ अग्रजानुज्ञादौनदोषइत्युक्तं॥ज्येष्ठायांय
द्यनूढायांकन्यायामुद्वहतेनुजः॥साचाग्रेदिधिषूर्ज्ञेया॥पूर्वातुदिधिषूर्मता॥प्रतिमाविक्रयंयोवैकरोतिपतितस्तु
सः॥जीवनार्थंपरास्थीनिनीयते पतितःसच॥गानेनृत्यादिमुदरार्थंनिषिधं॥नतु॥ भगवदर्थं॥अत्रविप्राणांग्राह्य
त्वोक्त्यैव॥तज्जनानांवर्ज्यत्वेसिद्धेपुनर्वर्ज्यपरिगणनं॥वर्जभिन्नानां॥ निर्गुणानामपि॥ग्राह्यत्वार्थं॥विद्याशी
लादिगुणवत्त्वे॥कुष्ठित्वकाणत्वादिशरीरदोषाणांनदूषकत्वं॥गयायांतुनिर्गुणाअपि॥ तएवभोज्याः॥नवि
चार्यंकुलंशीलं॥विद्याचतपएवच॥पूजितैस्तैस्तुसंतुष्टादेवाःसपितृगुह्यकाइत्युक्तेः॥ब्राह्मणान्नपरीक्षेनतो

र्थे क्षेत्रनिवासिनः ॥ यत्तु ॥ नब्राह्मणं परीक्ष्येत दैवे कर्मणि धर्मवित् ॥ पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः ॥ तदसंभवपर
॥ गायत्रीसारमात्रोपि वरं विप्रः सुयंत्रितः ॥ नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयीति ॥ हेमाद्रौ व्यासः ॥ श्राद्धे काणादयो
भोज्या मिश्रिता वेदपारगैः ॥ विप्रा निमंत्रणात्पूर्वमेव परीक्षणीया । न तु निमंत्रणोत्तरं ॥ इति ब्राह्मणविचारः ॥ आपस्तंबध
र्मसूत्रे ॥ द्वितीयप्रश्ने सप्तदशसंख्याकखंडे ॥ तद्व्याख्यानरूपउज्वलायामपि ॥ प्रयतप्रसन्नमनाः सृष्टाइति भोजये
त् ॥ ब्राह्मणान् ब्रह्मविदः ॥ योनिगोत्रमन्त्रान्तेवास्यसम्बन्धान् ॥ अस्य व्याख्यानं ॥ प्रयतस्थानाचमनादिना शुद्धः प्रस
न्नमनाः ॥ ब्राह्मणेभ्यो अव्याकुलचित्तः ॥ सृष्टउत्साहवान् ॥ सृष्टचेद्ब्राह्मणवधे ॥ अहत्वापीति दर्शनात् ॥ रतिसर्गता
यतनेषु क्रमइत्यत्र च सर्ग उत्साहः ॥ एवंभूतो ब्राह्मणान्भोजयेत । कीदृशान्ब्रह्मविदः ॥ आत्मविदः ॥ योन्यादिभिरसंब
धान् योनिसंबंधा मातुलादयः । गोत्रसंबंधाः वृत्तादिगुणहीनाएवलभ्यंते ॥ तदासमुदेतो वृत्तादिभिर्युक्तस्सोदर्योपि भोज
यितव्यः ॥ किमुशालादयइत्यपिशब्दस्यार्थः ॥ सगोत्राः मंत्रसंबंधाऋत्विजो याज्याश्चांतेवासिसंबंधाशिष्या आचार्या
श्च ॥ गुणहान्यां तु परेषां समुदेतस्सोदर्योपि भोजयितव्यः ॥ यदि परे गोत्रासंबंधा स तेनांतेवासिनो व्याख्याताः ॥ एतेन
सोदर्येणांतेवासिनः बहुवचननिर्देशात् ॥ पूर्वत्र निर्दिष्टा योन्यादिसंबंधास्सर्वेहिते ॥ व्याख्याताः ॥ अन्येषामभावे समु
दितो भोजइतव्य इति ॥ अत्र मनुः ॥ एषवै प्रथमः कल्पः प्रदाने हव्यकव्ययोः । अनुकल्पस्त्वयं ज्ञेयस्सदासद्भिरनुष्ठितः ।

मातामहंमातुलंचस्वस्रीयंश्वशुरंगुरुं॥ दौहित्रंविट्पतिंबंधुमृत्विग्भ्याज्यौचभोजयेदिति॥ अथाप्युदाहरंति॥ संबंधि
नोनभोज्याइत्यस्मिन्नर्थेधर्मज्ञवचनमुदाहरंति॥ संभोजिनीनामपिशाचभिक्षानैषापितृन्गच्छतिनोतदेवान्॥ इहै
वसाचरतिक्षीणपुण्या॥ शालांतरेगौरिवनष्टवत्सा॥ परस्परंसंभुज्यतेस्यामिति॥ संभोजनी अधिकरणेल्युट्॥ नामेदम
स्याः पिशाचभिक्षायाः॥ नैषापितॄन्गच्छतिनापिदेवान्॥ किंतुक्षीणपुण्यापरलोकेप्रयोजनरहितासती॥ इहैवलोकेच
रतीयथामृतवत्सागौःशालांतरएवचरति॥ नबहिर्गच्छति॥ तद्व्याचष्टे॥ इहैवसंभुंजतिदक्षिणाःकुलात्कुलंविनश्यती
ति॥ संभुंजति॥ दक्षिणापरस्परभोजनस्यनिमित्तभूतादक्षिणाश्राद्धदानक्रियग्रहात्॥ ग्रहाइहैवलोकेनश्यतीत्यर्थइ
ति॥ अथबहुषुतुल्यगुणेषूपस्थितेषुकः परिगृह्यः॥ तुल्यइतिगुणेषुवयोवृद्धः श्रेयान् द्रव्यकृशश्चेप्सन्॥ योवयसावृ
द्धस्तावद्ग्राह्यः॥ तत्र॥ योद्रव्येणकृशः आसन्नश्चभवति॥ सग्राह्यः॥ यद्वावयोवृद्धोग्राह्यः॥ अद्रव्यकृशोपिवृद्धोपी
तिद्वयोस्तुसमवाये॥ यथारुचीति॥ पूर्वेद्युर्निवेदनं॥ पूर्वेद्युरेवब्राह्मणेभ्योनिवेदितव्यं॥ श्वःश्राद्धंभवितातत्रभवताः
आहवनीयार्थेप्रसादः कर्त्तव्यइति॥ अपरेद्युर्द्वितीयंतृतीयमामंत्रणं॥ अपरेद्युः श्राद्धदिनेद्वितीयंनिवेदनंकर्त्तव्यं॥ अद्य
श्राद्धमिति॥ तृतीयमामंत्रणमाह्वानेभोजनकालेसिद्धमागम्यतामितितत्तृतीयंभवतीतिप्रायमेकेश्राद्धमुपदिशंतिनकेवलं
निवेदनमेव वात्रिः किंतर्हियज्ञ॥ यावच्चश्राद्धेक्रियतेतत्सर्वंत्रिरावर्त्यमित्येकेमन्यंते॥ तत्रपक्षेहोमभोजनपिंडानाम-

प्यावृत्तिः॥ तस्मिन्नेवापराण्हे॥ यथाप्रथमे बद्वितीयं तृतीयंच॥ येनप्रकारेणप्रथमश्राद्धं तथैवद्वितीयं तृतीयंच कर्त्तव्यं॥ सर्वेषुवृत्तेषुसर्वतस्समवदायशेषस्य ग्रासवरार्थ्यं प्राश्नेयात्॥ यथोक्तं॥ सर्वेषुश्राद्धेषुत्रिष्वपि आवृत्तेषु समाप्तेषु॥ सर्वतस्त्रयाणांश्राद्धानांवोद्दनशेषस्ततस्समवदायग्रासवरार्थ्यं॥ प्राश्नेयाद्यथोक्तं॥ उत्तरेणयजुषाशेषस्यग्रासपरार्ध्यंप्राश्नेयादित्युक्तं गृह्येतत्र प्रयोगः पूर्वेद्युर्वापरेद्युर्निवेदनं॥ तद्दृदपरेद्युः॥ प्रातःभोजनकाले॥ आमंत्रणं॥ ततो॥ होमादिपिंडनिधानांतमैकैकमपवृज्यततस्सर्वतस्समवदाग्रासावयर्थ्यंप्राणेनिविष्टइतिमंत्रेणप्राशनमिति॥ उदीच्यवृत्तिस्त्वासनगतायां॥ हस्तेषूदपात्रानयनं॥ प्राग्रुदंचौविभजतेहंसः॥ क्षीरोदकं॥ यथाविदुषांशब्दसिध्यर्थंसान पर्तुशरावदिति॥ वैध्याकरणा॥ तस्या॥ शारावस्यावुदक्तीस्वासिनः॥ उदीच्याः॥ तेषांवृत्तिराचारः॥ आसनेषूपविष्टानांब्राह्मणानांहस्तेषूदपात्रानयनं॥ उदपात्रादर्घ्यपात्राद्प आदायार्घ्येदानमितिपितरिदं॥ ते॥ पितामहेदंते॥ अर्घ्यंप्रपितामहेदंते॥ अर्घ्यमितिमंत्राः॥ आश्वलायनकेयद्यप्युदीच्यावृत्तिरित्युक्तं॥ तथापि॥ प्रकरणसामर्थ्यात्सर्वेषामपिभवति॥ उद्रियतामग्नेचक्रियतामित्यामंत्रयते॥ होमकालेउद्रियतामग्नेचक्रियतामित्यनेनमंत्रेणब्राह्मणानामंत्रयते॥ यते॥ आसिषिलोट्॥ प्रत्ययः॥ काममुद्रियतां॥ काममग्नेचक्रियतामित्यतिसृष्टउद्धरेज्जुहुयाच्च॥ अथब्राह्मणाः॥ काममुध्रियतांकाममग्नौचाक्रियतामित्यतिसृजेयुरनुजानीयुः॥ तैश्चातिसृष्टउद्धरेज्जुहुयाच्च॥ उद्धरणंनामब्राह्म

णार्थपक्कादन्नादन्यस्मिन् पात्रे पृथक्करणं स्वभिरपपात्रैश्च श्राद्धस्य दर्शनं॥ परिचक्षते॥ अपपात्राणि॥ पतितादयः॥ प्रति
लोमाश्च तैश्श्राद्धस्य दर्शनं परिचक्षते॥ गर्हंते शिष्टाः अयो यथा तेन पश्येयुस्तथा परिश्रिते कर्त्तव्यमिति॥ श्वित्रिः शिपि
विष्टः परतल्पगाम्यायुधियपुत्र शूद्रोत्पन्नब्राह्मण्यामित्येते श्राद्धे भुंजानाः पङ्क्तिदूषणा भवंति॥ श्वित्रः॥ श्वित्रि॥ श्वेत
कुष्ठी॥ शिपिविष्टः॥ खलमतिः॥ विवृतशेफ इत्यन्ये परतल्पगामीयः॥ परतल्पं गत्वा॥ अकृतप्रायश्चितः॥ तस्य ग्रह
णं॥ आयुधीयः पुत्रः॥ क्षत्रियवृत्तिमाश्रितः यः आयुधेन जीवति॥ ब्राह्मणस्तस्य पुत्रः॥ शूद्रात्॥ ब्राह्मण्यामुत्पन्नश्चं
डालः तस्य न प्रसंगः॥ ब्राह्मणान्ब्रह्मविद इत्युक्तत्वात्॥ तस्मादेवं व्याख्येयं क्रमविवाहे शूद्रायामुत्पाद्य पश्चाद्ब्राह्मण्या
मुत्पादयति॥ तस्य पुत्रः॥ शूद्रोत्पन्नो ब्राह्मण्यामिति स हि पिता शूद्रः संपन्नः श्रूयते हि॥ तज्जाया जाया भवति॥ यद
स्यां जायते पुनरिति स्मर्यते च॥ यदुच्यते॥ द्विजातीनां शूद्राद्दारोपसंग्रहः॥ न तन्मम मतं यस्मात्तत्रायं जायते स्वयमि
ति॥ शास्त्रांतरे॥ श्वित्र्यादयः श्राद्धे भुंजानाः॥ पङ्क्तिदूषणा भवंति॥ अतस्तेन भोज्या इति त्रिमधुस्त्रिसुपर्णस्त्रिनाचिके
तश्चतुर्मेधः। पंचाग्निर्ज्येष्ठसामको वेदाध्यायीत्यनूचानपुत्रः श्रोत्रिय इत्येते श्राद्धे भुंजानाः पङ्क्तिपावना भवंति॥ मधु
वाता ऋतायत इत्येष मधु॥ तत्र हि प्रत्यृचं॥ त्रयो मधुशब्दा इह तु तदध्यायी पुरुषस्त्रिमधुस्त्रिसुपर्णः। चतुष्कपर्दौ
युवति स्सुपेशा इत्यादिकस्त्र्यृचं॥ अन्ये तु तैत्तिरीयके ब्रह्ममेतु मामित्यादयस्त्रयोनुवाका इत्याहुः। तत्र हि। यइमं त्रि

सुपर्णमया चितं ब्राह्मणा यद्द्यादिति स्मूयते ॥ पूर्ववत्पुरुषवृत्तिः । त्रिनाचिकेतः । नाचिकेतोग्निर्बह्वृषु शाखासु विधीयते ॥
तैत्तिरीयके ॥ कठवल्ल्यादिषु ॥ शतपथे च तं यो वेद मंत्रब्राह्मणेन सह त्रिनाचिकेतः नाचिकेताग्निस्तु त्रय श्वीयत इति ॥
तेन्यो विरजो नुवाकाध्यायीत्यन्ये प्राणापानेत्यादिषु ॥ अश्वमेधः पुरुषमेधः । सर्वमेधः पितृमेधः ॥ इति चत्वारो मेधाः
तध्यायी चतुर्मेधः ॥ चतुर्णां यज्ञानां आहर्तेत्यन्ये पंचाग्निस्सभ्यावसथ्याभ्यां सह पंचानां कठाग्निनां मध्येतावज्ज्येष्ठ
साम तलवकारमंत्राणां प्रसिद्धं ॥ उदुत्यं चित्रमित्येतयोर्गतं ॥ तद्गायतीति ज्येष्ठसामगः ज्येष्ठसामकेति पाठे व्रीह्यादित्वात् ॥
ठक् ॥ वेदाध्यायी स्वाध्यायपरः । अनूचानपुत्रः त्रैविद्यस्य पुत्रः श्रोत्रियपुत्र इति पठंति । तदादरार्थं द्रष्टव्यम् ॥ एतेश्रा
द्धे भुंजानाः पङ्क्तिं शोधयंति ॥ वेदाध्यायीत्यस्यानंतरं श्रोत्रियशब्दं पठंति ॥ सोपपाठः एतेन पंचाग्नित्यविभक्तिकपाठो
व्याख्यातः ॥ एवं गौतमधर्मसूत्रेपि ॥ तथा च गौतमधर्मसूत्रं ॥ अथ श्राद्धममावास्यायां पितृभ्यो दद्यात्पंचमीप्रभृति वा
परपक्षस्य यथा श्राद्धं सर्वस्मिन्वा द्रव्यदेशब्राह्मणसन्निधाने वा कालनियमः शक्तितः प्रकर्षेद्गुणसंस्कारविहीनं न स्या
न्नवावरान्भोजयेदयुजो यथोत्साहं वा ब्राह्मणाञ्छ्रोत्रियान्वाग्रूपवयःशीलसंपन्नान्युवभ्यो दानं प्रथममेके पितृवन्न
च तेन मित्रकर्म कुर्यात्पुत्राभावे सपिंडा मातृसपिंडाः ॥ शिष्याश्च तदभावे ऋत्विगाचार्यौ तिलमाषव्रीहियवो
दकदानैर्मासं पितरः प्रीणंति मत्स्यहरिणरुरुशशकूर्मवराहमेषमांसैः संवत्सराणि गव्यपयःपायसैर्द्वादशवर्षाणि

वार्ध्रीणसेनमांसेनकालशाकच्छागलोहखड्गमांसैर्मधुमिश्रैश्चानंत्यंनभोजयेत् ते नक्लीबपतितनास्तिकस्त इतिविरहा
ग्न्येदिधिषूपतिस्त्रीग्रामयाजकाजपालोत्सृष्टाग्निमद्यपकुचरकूटसाक्षिप्रातिहारिकानुपपतिर्यस्यचकुंडसोमविक्र
य्यागारदाहिगरदावकीर्णिगणप्रेष्यागम्यागामी ॥ हिंस्रपरिवित्तपरिवेत्तृपर्याहितपर्याधातृत्यक्तात्मदुर्वालकुन
खीश्यावदंतश्वित्रिपौनर्भवकितवाजपराजप्रेष्यशूद्रापतिनिराकृतिकिलासकुसीदवणिक्शिल्पोपजीवीज्यावादित
त्रान्नृत्तगीतशीलान्पित्राचाकामेवविभक्तांछिष्यांश्चैकेसगोत्रांश्चभोजयेदूर्ध्वंत्रिभ्योगुणवंतः॥सद्यः।श्राद्धीशूद्रा
तल्पगस्तत्पुरीषेमासंनयतिपितॄंस्तस्मात्तदहब्रह्मचारीस्याच्छ्वचंडालपतितावेक्षणेदुष्टंतस्मात्परिश्रितेदद्यात्तिलैः
र्वाविकिरेत्पंक्तिपावनोवाशमयेत्पंक्तिपावनाः॥ षडंगविज्ज्येष्ठसामीकस्त्रिनाचिकेतस्त्रिमधुस्त्रिसुपर्णः॥पंचाग्निस्ना
तकोमंत्रब्राह्मणविद्धर्मज्ञोब्रह्मदेयानुसंतानइतिहविष्षुचैवंदुर्वालादींछ्राद्धएवैकेश्राद्धएवैके॥१५॥ अस्यगौतमध
र्मसूत्रस्यभाष्यंमस्करीयंलिख्यते॥द्वितीयप्रपाठके॥पंचदशखंडात्मकपंचदशाध्याये॥ ॥अथश्राद्धममावास्या
यांपितृभ्योदद्यात्॥श्राद्धंपंचविधं॥यथाहव्याघ्रः॥नित्यंनैमित्तिकंकाम्यंवृद्धिश्राद्धंतथापरं॥पार्वणंचेतिविज्ञेयंश्राद्धंपं
चविधंस्मृतमिति॥तत्राहरहः। यत्क्रियते॥तन्नित्यं॥यथाहमनुः॥ दद्यादहरहःश्राद्धमन्नाद्येनोदकेनवा॥पयोमूलफलैर्वा
पिपितृभ्यःप्रीतिमावहन्निति॥तथान्यत्रैवोक्तं॥एकमप्याशयेद्विप्रंपित्र्यर्थेपांचयज्ञिके॥नचैवात्राशयेत्किंचिद्वैश्वदेवंप्रति

द्विजं॥ तथाच स्मृत्यन्तरमपि॥ ब्रह्मचर्यमनध्यायं मुक्त्वा श्राद्धं तु नैमित्तिकमिति॥ यदुक्तं नैमित्तिकमेकोद्दिष्टं॥ एकमे
वोद्दिश्य क्रियमाणत्वादेकोद्दिष्टं॥ यथाह कात्यायनः॥ अथैकोद्दिष्टमेको द्विजः एकपात्रमेकोर्घ्यमेकः पिंडो नावाहनं
नाग्नौकरणमिति॥ तदाशौचानन्तरमारभ्य सपिंडीकरणात्प्राक्कर्त्तव्यं॥ यथाह लौगाक्षिः॥ एकोद्दिष्टं तु कर्त्तव्यं प्रतिमा
सं तु वत्सरं॥ प्रतिसंवत्सरं चैवमाद्यमेकादशेहनि॥ स्मृत्यन्तरेपि॥ एकादशेन्हि कर्त्तव्यं त्रिपक्षे च तथैव च। षण्मासे च
तथा कुर्यादेकोद्दिष्टं प्रयत्नत इति॥ ततः संवत्सरे परिपूर्णे सपिंडीकरणं कर्त्तव्यं॥ तथा च जातूकर्णिः॥ ततः संवत्सरे
पूर्णे त्रिपक्षे वाथ वा पुनः॥ सपिंडीकरणं कुर्यादर्वाग्वृद्धिकरं भवेदिति॥ त्रिपक्ष इत्याहिताग्निविषयं॥ कुतः बृहस्पतिव
चनात्॥ तथाह॥ अनंतरममावास्याद्दशरात्रस्य चेद्भवेत्॥ सपिंडीकरणं॥ तः॥ तदलाभे त्रिपक्षात्तु सपिंडीक
रणं स्मृतं॥ त्रिपक्षात्सपिंडमिति जाबालिश्रुतौ श्रूयते॥ श्रुतिरिति॥ सपिंडीकरणादूर्ध्वं संक्रांत्यादौ पिंडत्रयनिर्वापे-
ण श्राद्धं कर्त्तव्यं॥ एकादशे॥ ह्नस्येकोद्दिष्टं॥ यथाहोशनाः॥ संक्रांत्यामुपरागे हू पर्वोपेन महालये त्रीन्पिंडान्निर्वपेत्तत्र
विपद्येन्हिकमेव त्विति॥ प्रतिसंवत्सरमाग्रहायण्याह। ऊर्ध्वमष्टकाः कर्त्तव्याः॥ तथाह गृह्यपरिशिष्टे त्रयोपरपक्षास्ते
षामेकैकस्मिन्नेकैका भवति॥ शाकाष्टका मांसाष्टका पूपाष्टकेत्यादि तत्र काम्यं कामनया यत्क्रियते॥ अथैकादश्यां पु

त्रकामइत्यादि वृद्धिश्राद्धं नांदीमुखं पार्वणं मासिश्राद्धं॥ ॥अथवा पिंडत्रय निर्वापेण यद्यत्क्रियते॥ अष्टकादिविशे
षेण अर्वैतनैमित्तिकमिति अस्मिन्नर्थे च विधेः स्थिते॥ अथ श्राद्धममावास्यायां पितृभ्यो दद्यात्॥ अथानन्तरं सपिंडीकर
णात्॥ कुतः॥ अमावास्यायां पितृभ्यः श्राद्धं दद्यादित्यारम्भात्॥ इदं मासि मासि श्राद्धमिति ज्ञातुं शक्यत्वात्॥ ॥स्मृ
त्यन्तरे॥ सपिंडीकरणादर्वाक्॥ श्राद्धप्रतिषेधात्॥ यथा बृहस्पतिः॥ सपिंडीकरणादर्वाक्॥ पार्वणं यः प्रयच्छति॥ क्रि
मिभूतश्च विष्ठायां पितृभ्यः सह मज्जतीति॥ एवं तर्हि सपिंडीकरणादर्वाग्यानि श्राद्धानि तान्येव च वक्तव्यानीति चेत्॥
अत्रोच्यते॥ ॥केषांचित्तद्वस्य सूचनार्थमनन्तरं पार्वणमेव कर्त्तव्यमिति॥ ॥तथा च बृहस्पतिः॥ यतीनां तु मृता
नां च क्रिया काचिन्न दृश्यते॥ ॥अहन्येकादशे प्राप्ते पार्वणं तद्विधीयते॥ नैष्ठिकानां वनस्थानां मुक्तानां च तथैव च
॥सपिंडीकरणं नोक्तमेकोद्दिष्टं तथैव चेति॥ ॥श्राद्धं इति कर्मनामधेयं॥ अतिशय श्रद्धासाध्यत्वात्॥ श्रद्धया न एव
हि प्रतिपद्यते॥ यथा पुत्रैर्दत्तेन यत्र तत्र स्थाः पितरस्तदुपभोगेन सुखमासत इत्यर्थः॥ चंद्रादर्शनादमावास्यायां सू
र्यचंद्रमसोः॥ परस्मिन् सन्निकर्षे पितृभ्यः। पितॄनुद्दिश्य बहुवचनात् पितामह प्रपितामहयोरपि देयः। पंचमी प्रभृ
तिवापरपक्षस्य। यथा श्राद्धं पक्षस्य वा॥ पंचम्यां॥ आरभ्य दद्यात्॥ यथा श्राद्धं। यथा श्रद्धास्थितिः ॥तथा च कर्त्तव्य

मितिचेत्यर्थः॥ ॥अष्टकादिश्राद्धं पंचमीप्रभृतिद्द्यादित्यभिप्रायः अपरपक्षग्रहणममावास्याधिकारात्॥पूर्वपक्षेमा
भूदिति॥सर्वस्मिन्वापरपक्षेप्रतिपत्प्रभृतिवाकुर्यादित्यर्थः॥ ॥द्रव्यभूयस्त्वायद्रष्टव्यः॥द्रव्यदेशब्राह्मणसन्निधा
नेनवाद्रव्यस्यरजतादेः॥ ॥तथाचव्याघ्रः॥ ॥रजतंकालशाकंचखड्गमत्स्यामिषंमधु॥ आनंत्यायैवकल्प्यंतेम
न्येनोनिचसर्वशइति॥ ॥देशस्यपुष्करादेः॥ यथाहव्याघ्रः॥ ॥पुष्करेत्वक्षयंश्राद्धमन्यक्षेत्रेतथैवच॥नद्यां
महोदधौचैवह्रदेगोष्ठेगिरौतथेति॥ ॥ब्राह्मणानांयतीनांचपङ्क्तिपावनपावनां॥ ॥यथाचव्याघ्रः॥ ॥स्वधाच
राजतं पात्रंदौहित्रः कुतपः स्तिलाः॥ ॥वस्त्रस्यपावनीयानित्रिदंडीयोगिरेवचेति॥सन्निधानेउपपत्तौपूर्वपक्षे
तुस्यादित्यभिप्रायः॥कालनियमःशक्तितः॥ यदाद्रव्यादेरसंभवोस्यन्तं॥तदा तदूर्ध्वमाग्रहायण्याद्युक्तःका
लनियमोनास्ति॥यस्मिन्मासेत्पंत्तासंभवस्तस्मिन्नेवकर्त्तव्यमित्यभिप्रायः॥द्रव्याद्यसंभवेयथातथापक्षविशेषो
नास्ति॥तथातथामासविशेषोपि॥नास्तीत्यभिप्रायः॥एवंचानेनैवन्यायेनतिथिनियमस्याप्यभावःप्रतिपादित
॥सर्वदातच्छ्राद्धंप्रकर्षेद्गुणसंस्कारविहीनंनस्यात्प्रकर्षेदतिशयेनकुर्यात्॥अन्नस्यभक्ष्यभोज्यादेर्गुणग्रहणाज्जा
तिविशेषाच्छाकस्रूपसंस्कारादिविशेषात्॥सुसिद्धत्वसुरभित्वादीनिदर्भतिलापसव्यादीन्।नवावरान्भोजयेत्

प्र·शा॰ सतिसामर्थ्ये एवमाश्रयते ॥ अयुजोवायथोत्साहं अयुग्मान् यथोत्साहं ॥ यथासामर्थ्यं अर्वाङ्नवभ्यः ॥ नि·

३८२ पूर्वत्रावरग्रहणादूर्ध्वंनवभ्यः ॥ शास्त्रभावात् ॥ ॥ ननुच ॥ अयुजोवेत्येवभोक्तव्यं ततश्चोर्ध्वंनवभ्योप्रा
प्तित्वात् ॥ ऊनमापणार्थ एवारम्भस्यात् ॥ ततश्चासामर्थ्यंकृतएवंविकल्पोभविष्यतइति ॥ यथोत्साहंइत्य
तिरिक्तमुच्यते उत्साहेपि ॥ सति ॥ यद्यविरोधेनभोजयितव्यमिति ॥ ॥ यथाहवसिष्ठः मनुश्च ॥ द्वौदेवेपितृका
र्येत्रीरेकैकमुभयत्रवा ॥ भोजयेत् ॥ सुसमृद्धोपिनप्रसज्येतविस्तरं ॥ सत्क्रियांदेशकालौचशौचंब्राह्मणसंपदः ॥ पं
चैतान्विस्तरोहंतिनस्मात्तंपरिवर्जयेदिति ॥ ॥ देवाः विश्वेदेवाः ॥ तदंगभूताः ॥ ॥ यथाहव्यासः ॥ ॥ दक्ष-
स्यदुहितासाध्वीविश्वानामप्रकीर्तिता ॥ तस्याः पुत्रामहात्मानोविश्वेदेवामहाबलाः ॥ क्रतुर्दक्षोर्वसुः सत्यः का
लकामौधुनीरुचौ ॥ पुरूरवाद्रवश्चेतिविज्ञेयास्तेदशामराः ॥ तुष्टिश्राद्धे क्रतुर्दक्षावष्टक्यांकालकामकौ ॥
नांदीमुखेवसुस्सत्यौकाम्येचापिधुनीरुचौ ॥ पुरुरवाद्रवश्चैवपार्वणेतुनियोजितौ ॥ आवाह्यंनामतस्तेषां
तत्रतत्रनियोगतइति ॥ ॥ तथाचस्मृत्यन्तरं ॥ ॥ दैवाद्यंतंभवेच्छ्राद्धं पित्राद्यंतंनतद्भवेत् ॥ पित्राद्यन्तंयदि
भवेत्तद्धेरक्षांसिभुंजतइति ॥ ॥ तथाभार्गवीयमपि ॥ एकएवसदाविप्रोद्वितीयोनोपपद्यते ॥ ॥ पितृणां ३०१

ब्राह्मणं योऽन्यं दैवं हस्ते नियोजयेदिति॥ ॥ तथा च बृहस्पतिः॥ द्वौ दैवे ऽथर्वणौ विप्रौ प्राङ्मुखौ विनिवेशयेत्॥ त्रीन्सुदङ्मुखान्पित्र्ये ऋग्यजुस्सामगांद्विजानिति कीदृशान्भोजयेदित्याह॥ ॥ श्रोत्रियान्वाग्रूपवयः शीलसंपन्नाः श्रोत्रियाश्छंदोध्यायिनः वाक्संपन्नाः संस्कृतभाषिणः॥ रूपसंपन्नानमनोज्ञवपुषः वयःसंपन्नान् परिणतवयसः॥ शीलसंपन्नान्प्रशान्तमनसः॥ एवं गुणान्ब्राह्मणान्भोजयेत्॥ वयःसंपन्नस्यापवादमाह॥ युवभ्यो दानं प्रथमं यत्प्रथममेकोद्दिष्टं तत्तरुणेभ्यो देयं स केपि तृवत् यद्वयसः पित्रादयः। प्रमीताः तद्वयोभ्य एव दद्यादित्येके मन्यंते॥ सपिंडीकरणे यदेकोद्दिष्टं तद्विषयमिदं वेदितव्यं॥ सपिंडीकरणे त्वेकोद्दिष्टमुक्तमेव स्मृत्यंतरे॥ ॥ तथाह यमः॥ सपिंडीकरणे प्राप्ते कुर्याच्छ्राद्धं द्वयेतथा॥ सपिंडीकरणे विप्रान् भोजयेत्सार्वणे तथा॥ पृथकूशेकल्पयेद्यत्नमेकोद्दिष्टविधानतः इति॥ ॥ अथवा पितृवदिति पितरमुद्दिश्य तरुणं पितामहमुद्दिश्य वृद्धं प्रपितामहमुद्दिश्य वृद्धतरं भोजयेदिति॥ न च तेन मित्रकर्म कुर्यात्॥ तेन श्राद्धेन न मित्रकार्यं कुर्यात्॥ अन्योन्याचारात्॥ मित्रसंपन्नामपि॥ पुत्राभावे सपिंडाः पितृसपिंडा मातृसपिंडाः॥ शिष्याश्च दद्युः अयं तावत्॥ प्रथमकल्पः यस्तु श्राद्धं कुर्वतीति॥ तदभावे तु सपिंडा उक्ताः तदभावे मातृसपिंडाः मातुलादयः॥ तदभावे शिष्याः संबंधिश

त्वात्॥आचार्ययत्रशब्दाद्याज्यश्चऋत्विजइतिएकोद्दिष्टविषयंचैतत्॥मातृसपिंडशिष्ययाज्यानांमातृत्वेनोपदेशात्
नह्येकस्यमातृसपिंडाः॥तस्तित्पुरपिमातृसपिंडोभवतिएवंशिष्ययाज्यावपि॥एवंच॥सपिंडीकरणाद्यावन्यःक्रमोद्रष्ट
व्यः॥ ॥यथाहोशनाः॥पुत्राभावेसपिंडाःसमानोदकास्तद्गोत्राःसमानार्षेयाश्चेत्यादि॥एतैर्नैवैकोद्दिष्टंकार्यं॥॥
नचतत्सवैरितिविसमासः तदभावेऋत्विगाचार्यौऋत्विग्याज्यामआचार्यः शिष्यायतदभावेपूर्वस्याभावेपृथः
करणंश्राद्धंकुर्वतांऋत्विगाचार्याणांप्रायश्चित्ताभावज्ञापनार्थंसर्वत्रापूर्वेषामवश्यं॥प्रायश्चित्तकर्त्तव्यमितिद्रष्ट
व्यं॥ऋत्विगाचार्याणांश्राद्धंकुर्वतामभ्युदयश्चद्रष्टव्यः॥चोदनासामर्थ्यात्॥तदभावग्रहणं॥पूर्वत्रमातृसपिंडाः
शिष्याश्चेत्यत्राधिकारज्ञापनार्थंयोग्यानामेवश्राद्धंद्रष्टव्यं॥कुतः॥स्मृत्यन्तरसामर्थ्यात्॥यथाहप्रजापतिः॥गो
ब्राह्मणहतानांचविद्युतापार्थिवेनच॥स्वात्मनस्त्यागिनांचैवपतितानांतथैवच॥शस्त्रेहतानांविप्राणांचरंतीनां
चकामतः॥पाषंडानांश्रितानांचप्रेतकर्मनविद्यते॥स्नेहकार्यभयादिभ्योयस्तत्कुर्यान्नराधमः॥ ॥
चंडालेनहतस्यापितस्यवश्याम्निनिष्कृतिं॥एषामन्यतमंप्रेतंयोवहेत्तदहेत्तथा॥चरेत्तांतपनंकृच्छ्र
मत्याचेत्तप्तकृच्छ्रकम्॥ ॥तच्छवंकेवलंस्पृष्ट्वापातमित्वाश्रुवातथा॥एकरात्रंनुनाम्नीपावित्रात्रंबुद्धि

पूर्वकि॥ आहूंकृत्वाचरेत्कृच्छ्रंमत्यासांतपनंचरेत्॥ तथाश्राद्धभुजांचैवाद्विगुणंब्रह्मचारिणामितिनिभोजयेत्॥ स्तेनक्लीब
पतितनास्तिकनहृत्तिपरहार्येदिधिषुद्दिधिषूपतिस्त्रीग्रामयाजका॥ जपालोत्सृष्टाग्निमद्यपकुचरकूटसाक्षिप्रतिहारिकान्
॥ श्रोत्रियादिगुणयोगेनैषांप्राप्तौसत्यां॥ प्रतिषिद्ध्यते॥ स्तेनोहिरण्यसामान्यविशिष्टाश्चाश्रमधर्मादुक्ताः॥ स्त्रियः इदानीं
वक्तव्यमित्यतआह॥ अस्वतंत्राधर्मेस्त्री॥ अस्वतंत्रापराधीनधर्मेपारलौकिकेभर्तासहस्याद्धर्मेविकारः॥ नतुपुरुषवत्॥
स्वातंत्र्येण॥ ॥ यथाहमनुः॥ नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोषणं॥ शुश्रूषयेतभर्तारंतेनस्वर्गेमहीयतइति॥ ॥
शंखेनाप्युक्तं॥ नव्रतोपवासनियमेज्यादानधर्मोवानुग्रहकारः॥ स्त्रीणामन्यत्रपतिशुश्रूषायाः कामंतुभर्तुरनुज्ञया॥ व्र
तोपवासनियमादीनामाभ्यासः स्त्रीधर्मइति॥ ननुचश्रौतस्मार्तानांपुरुषोद्देशेनत्वदीयमानत्वात्स्वातंत्र्यमस्तिस्त्रियाः
॥ शास्त्यभावात्। प्रतिषेधानुपपत्तिः अत्रोच्यते॥ अस्वातंत्र्यवचनंसह॥ धर्मक्रियायांस्त्रियाअपि॥ फलंभवतीत्येवमर्थमि
तिनद्युक्तंसहधर्मचारिणत्वादेवस्यार्थस्यलब्धत्वात्॥ अथास्वतंत्रास्त्रीनज्ञायते। किंतयाभवितव्यमितिभर्तुरधीनं
चेतिचेत॥ नदुपरिष्टान्नातिचरेत्॥ भर्तारमिति अनेनवृत्तः॥ परतंत्रस्यवक्ष्यमाणत्वात्तेनाव्यभिचारोलक्ष्यतइतिचेत्॥
नातिचारस्य धर्मार्थकामप्रतिषेधस्यसत्वादिति॥ अत्रोच्यते॥ उपवासदानादेर्धर्मसाधनस्यभर्तुरनुज्ञायांसत्यांस्त्रियः॥
प्रापणार्थमारंभःनाश्रमधर्मस्यभर्तृद्वारेणप्राप्तत्वात् तथाचशंखवचनंप्रदर्शितं॥ कामंतुभर्तुरनुज्ञयेत्यादितयास्तानवि

षयेपि॥ नारदआह॥ स्त्रीकृतान्यप्रमाणानि कार्य्याण्याहुरनापदीति॥ गृहक्षेत्रदोषधर्मन वितियाः॥ एतमेवप्रमाणानि भर्त्तीय नि

घनुमन्यतइत्यादिइदंभर्तृधर्मविषयं॥ स्त्रीधनस्यस्वैरी स्त्रियाहृत्वाचैतदनुत्तणभोक्तुंपालयितुं योग्याभर्तृनाशयतुंनचेति॥ क

ण्ववचनादिति चेत्॥ स्मृत्यंतरदर्शनात्॥ यथाहव्याघ्रः॥ नदातव्यंचदातव्यं॥ स्त्रीधनंजातुकेनचित्॥ पत्यनुज्ञापिपूर्वंचेत्

स्त्रियादातव्यमेवतदिति॥ तथाचलोगाक्षिः॥ ईशास्त्रीस्वधनस्योक्तानाधिदानक्रियेपुच॥ आध्यादियत्कृतंयस्मान्नसिध्य

तिकदाचनेति॥ एवंचकण्ववचनेपिदानधर्मविक्रियं वर्जयंचैवसाम्यंद्रष्टव्यं॥ यत्तूक्तं॥ किंतयाभावितव्यमितिततः॥ पितृ

भर्तृपुत्राधीनमायुयाकालं॥ यथाहमनुः॥ बाल्येपितुर्वशेतिष्ठेत्पाणिग्राहस्ययौवने॥ पुत्रस्यस्थविरेभावेनस्त्रीस्वातं

त्र्यमर्हतीति॥ तथान्यत्रैवचापरमपि॥ बालयावायुवत्यावावृद्धयावापियोषिता॥ अस्वातंत्र्येणकर्त्तव्यंकिंचित्कार्यंगृहेष्व

पीति॥ एवंचधर्मादन्यत्रकामचारेत्राक्षआह॥ नातिचरेद्भर्तारं॥ भर्तुरनुज्ञयापि॥ तत्प्रतिषिद्धावानकश्चिदप्विवतीतेत्यर्थः॥

पतिमितिवक्तव्यं॥ योयोभरणंकरोतिप्रत्येवमितिभर्तृग्रहणंकिंच॥ वाक्चक्षुर्मनस्संयता॥ स्यादितिशेषः॥ यावदर्थसंभा

षणीवाक्॥ संयता॥ अकार्यरुतामीक्षणिकादिनामप्रेक्षणीचक्षुःसंयता॥ गृहव्यापाराभियुक्ताकर्मसंयुता॥ अपतिर

पत्यलिप्सुर्देवरात् अपतिरविद्यमानभर्तृका॥ अयोग्यपतिर्वा॥ तथाचबृहस्पतिः॥ नष्टेमृतेप्रव्रजिते। क्लीबेचपतिते

पतौ॥ पंचस्वापत्सुनारीणांपतिरन्योविधीयतइति॥ अपत्यलिप्सुः॥ यानपत्याअपत्यमिच्छंतिपुनर्देवरादुत्पादयेदि

त्यर्थः॥ देवरोभर्तृजायान्वा॥ यवीयान्वा॥ केनविधिनोत्पादयेदित्यत आह॥ गुरुप्रसूतान्नर्तुमतीयात्॥ गुरुभिरनुज्ञाता
भर्तृपक्षैः पितृपक्षैश्चनियुक्तेत्यर्थः ऋतुंनातीयात्॥ ऋतुकालादन्यत्रनप्रसज्येतेत्यर्थः॥ अत्राप्येकस्मिन्दिवसेयदिग
र्भोत्पत्तिर्भवतितत्रैवभवतिचतस्यान्ततोनभवतीति॥ तथास्तेनादन्यः तस्यपतितत्वादेवप्रतिषेधात्॥ क्लीबः॥ भग्नोत्सा
हः॥ तथाचभगवान्वासुदेवः॥ माक्लैब्यंगच्छकौंतेयेत्यादि॥ नतृतीयाप्रकृतिः॥ तस्यश्रौत्रियत्वाभावेनप्रा स्याभावात्॥
पतितोब्रह्महादिः नास्तिकः परलोकाभावादावस्थितप्रज्ञः सोपिमनोदुष्टः क्रियादुष्टस्यतु॥ निंदितकर्माभ्यासात्॥ पतितत्वोपदे
शात्॥ तद्वृत्तिः तेनैववचनास्तिक्येन यदुपजीवति॥ लोकायतशास्त्रद्वारेणवीरः॥ पुरुषमात्रघातकः॥ अवीरोयाश्चयोषि
तद्दृत्यादौ पुरुषेवीरशब्दःप्रयोगात्॥ तथासोमाभिषवकृत्वावीरहावा॥ एषदेवानां॥ यः॥ सोममभिषुणोतीति॥ श्रुतिद
र्शनात्॥ अग्रेदिधिषूपतः॥ पतिशब्दःप्रत्येकमभिसंबध्यते॥ ज्येष्ठायाःपूर्वंप्रत्तायादिधिषुपुनः प्रत्तासाज्येष्ठादिधिषूः॥ तथा
चमनुः॥ ज्येष्ठायांयद्यनूढायांकन्यायानूह्यतेनुजा॥ साचाग्रेदिधिषूर्ज्ञेयापूर्वातुदिधिषूस्मृतेति॥ तयोर्भर्ता॥ अथवाप
तिशब्दयुक्तःसएवा॥ तथाहप्रजापतिः॥ भ्रातृमृतेयोनुरज्येतकामतः॥ धर्मेणाविनियुक्तायांसज्ञेयोदिधिषूपतिः॥ तथै
वजीवतोभ्रातुः नचाग्रविधिषूस्मृतइति॥ व्याघ्रोक्तोवापरपूर्वापतिंधीरावदंतिदिधीषूपतिः॥ ज्येष्ठयोग्रेदिधिषूर्विप्रः सैव
यस्यकुटुंबिनी॥ यास्तीग्रामयाजकः याजकशब्दः प्रत्येकमभिसंबध्यते॥ स्त्रीणांकामदेवादीन्प्रतियोयाजयतीसस्त्रियाज

गः॥ ग्रामयाजकोब्रह्मयाजकः॥ अजपालः अजरक्षणोपजीवकः॥ उत्सृष्टाग्निः शास्त्रेण विनाय॥ श्रौतस्यत्यागंकरोति॥ नि
सउत्सृष्टाग्निः॥ मद्यपः। नारिकेलादेर्मद्यरक्षणद्वारेणोपजीवकः सुराव्यतिरिक्तेमद्योपभोक्तावाकुचरः॥ कुत्साचारः कुत्सिताचा
रत्वमपिपुत्राचार्यत्वंदेवताभ्यर्चनयाचनशीलत्वादिकूटसाक्षित्वप्रसिद्धः प्रातिहारिकः॥ इन्द्रजालोपजीवकः एतान्नभो
जयेत्॥ पतितानांस्पर्शप्रतिषेधादेवभोजनप्रतिषेधेसिद्धेकृतप्रायश्चित्तानांभोजनप्रतिषेधार्थआरंभः॥ उपपतिर्यस्य
चउपपत्तिः॥ जारः॥ यस्यसइतिवाभिचारिणियस्यभार्येत्यर्थः। एतौनभोजयेत्॥ कुंडाशीसोमविक्रय्यगारदाहीगरदा
विकीर्णिगणप्रेष्यागम्यागामी॥ हिंस्रः परिवित्तपरिवेतृपर्याहितपर्याप्तत्यक्तात्मदुर्वालकुनखीश्यावदंतश्वित्रिचापौनर्भ
वन॥ कितवआजपराजप्रेष्यप्रातिरूपिकशूद्रापतिनिराकृतिकिलासकुसीदिवणिक्॥ शिल्प्योपजीवीवादित्रतालनृ
त्तगीतशीलान्॥ कुंडग्रहणंगोलकस्याप्युपलक्षणंतस्यान्नंयोश्नातिसकुंडाशीप्रतिषेधोचार्तकः कुंडगोलकयोपिप्रतिषे
धः सिद्धः॥ तयोःस्वरूपं॥ स्मृत्यन्तरेज्ञातव्यं॥ यथाहमनुः। परदारेषुजायेतेद्वौसुतौकुंडगोलकौ। पत्यौजीवतिकुंडस्या
न्मृतेभर्त्तरिगोलकइति॥ सोमविक्रयिलतासोमस्यविक्रेता॥ तत्साध्यकर्मवर्ज्जया अगारदाहीविश्मदीपकः॥ विप्रद्रव्य
स्यदातागरदः॥ अवकीर्णिः बुद्धिपूर्वखंडितब्रह्मचर्योब्रह्मचारी॥ यथाहमनुः कामतोरेतसस्सेकंब्रह्मस्थस्यहिजन्मनः। अ
तिक्रमंरतस्याहुः धर्मज्ञोब्रह्मवादिनइति॥ गणप्रेष्यः गणानांप्रेषणकृत्॥ अगम्यागामीकन्यादूषकः॥ समानप्रवरस्त्री

गामीत्येके सखिसयोनिसगोत्रशिष्यभार्यास्नुषायां गवि च तल्पसम इति साम्योपदेशात् ॥ पतितग्रहणे वा गृह्यत इति हिं
सः ॥ प्राणिनां वधे रुचिः परिवेत्तो ज्येष्ठे कृतविवाहे कनीयान्यः करोति ॥ स परिवित्तः ॥ ततो ज्येष्ठः परिवेत्ता ॥ पर्याहितः ॥ यस्मिं
न्न कृताधाने ॥ कनीयो नाधानं करोति यः पर्याहितः ज्येष्ठः ॥ पर्याधाता ॥ ननु च ॥ परिवित्तिपरिवेत्तृशब्दौ क्रमेण पर्याहितप
र्याधात्रोरपि वर्तेते ॥ स्मृत्यंतरे तथा दृष्टत्वात् ॥ यथाह मनुः ॥ दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ॥ परिवेत्ता स विज्ञेयः
परिवित्तिस्तु पूर्वजः ॥ इति ततश्च पर्याहितपर्याधात्रोः ॥ पृथगारंभोनर्थक इति ॥ तत्रोच्यते ॥ यश्च कन्यां ददाति यश्च याजनं
करोति मयोः ॥ परिग्रहणार्थमुभयोरुपादानं ॥ यथाह परिवित्तिः ॥ परिवित्तिः ॥ परिवेत्ता यया च परिविंदते ॥ सर्वे ते नरकं यांति
दातृयाजिकपंचमा इति ॥ अस्यापवादो द्रष्टव्यः ॥ यथाहोशनाः ॥ पितृव्यपुत्राः सापत्न्याः ॥ परदारासुताश्च तथा ॥ दाराग्नि
होत्रसंयोगे न दोषः परिवेदन इति ॥ तदाह वसिष्ठोपि ॥ उन्मत्तकिल्बिषी कुष्ठी पतितः क्लीब एव च ॥ राजयक्ष्मामयावी च
न न्याय्याः स्युः प्रतीक्षितुमिति ॥ शातातपोपि ॥ क्लीबे देशविनष्टे च पतिते प्रव्रजिते तथा ॥ योगशास्त्रनियुक्ते च न दोषः परि
वेदन इति ॥ तथा च कण्वः ॥ व्यसनासक्तचित्तो यो नास्तिको वाथ भवेद्यदि ॥ कनीयसो हि च पतो न दोषः परिवेदन इत्यादि
॥ त्य क्वात्मा साहसिकः शस्त्रपाणिरित्येके दुर्बलः शिपिविष्टः दीनव्रजनन इत्येके स्खलतिमित्येके ॥ कुनखी करणेन विनष्ट
नखिकः ॥ श्यावदंतकः ॥ कृष्णादशनः ॥ रोगेण विना पौनर्भवः स्वैरिणीपुत्रः कितवो द्यूतकृत् ॥ मणयैर्हस्त्यश्वादिव्यव

हारस्याप्युपलक्षणं॥ अजपः उपनीतमात्रो श्रौत्रियः राजप्रेष्योराज्ञः प्रेषणकृत् दूतादिग्रातिरूपिकः। कूटतुलामानादि व्यवहारिकः॥ येनकेनचित्॥ प्रकारेण पंचकोशास्त्रू द्रापनिः॥ सैवभार्यायस्यनिराकृतिः नक्कचिदाश्रमेव्यवस्थितः किलासीकुष्ठी भूमिहर्त्तावाकुसिदो वार्धुषिकः॥ प्रतिषिद्धेनमार्गेणवणिक्॥ सतिसंभवेवैश्यवृत्त्युपजीवी। शिल्प्योपजीवी। नस्तकर्मचित्रकर्माद्युपजीवी॥ तेषांसकाशेतद्विद्यादीक्षकश्चउपशब्द प्रयोगात्॥ ज्याशीलो धनुर्वेदोपजीवीवादित्रशीलो पंडवीणाद्युपजीवितालशीलो भेर्यादिताडनेनोपजीवी नृत्तशीलो नृत्तोपजीवी॥ गीतशीलोगीतोपजीवी॥ तान भोजयेत्॥ एतस्मादेवप्रतिषेधादेते पांनकार्यकारित्वमपिसिद्धं॥ अतसोयादिनकर्त्तव्यं॥ पित्राकामेनविभक्तान्येचपिता अनिच्छताविभक्ताः चशब्दान्मात्राचतांश्चनभोजयेत्। शिष्यांश्चैकेसगोत्रांश्च शब्दादाज्यां श्चद्वितीयात्॥ समानार्षेयांश्च॥ एकेग्रहणात्॥ भोजनीयाः॥ एवेतिगौतमः॥ तत्रयदिगुणी तदाभोजयेत्॥ यदि गुणहीना स्तदानभोजनीया इतिद्रष्टव्यम्॥ तथाचवसिष्ठः॥ शिष्यानपिगुणवंतो भोजयेदिति॥ तत्रापिशब्दात्॥ समानगोत्रामपिग्रहणमिति॥ भोजयेदूर्ध्वंत्रिभ्यः॥ अयुक्तोयथोत्साहमित्यनेनविशेषेप्राप्ते विशेषार्थमिदं॥ अस्वित्युत्साहेत्रिभ्यऊर्ध्वमयुग्मान्भोजयेदिति। गुणवंतमेकमपिभोजयेत्॥ एकवचनप्रयोगात्। तथाचवसिष्ठः॥ अपिवाभोजयेदेकं वेदवेदार्थपारगं॥ श्रुतिवृत्तशीलसंपन्नमवलक्षणवर्जितमितिवाशब्दोपादानेद्वयोरप्यनुज्ञानार्थं॥ तथाहमनुः॥ एकैकमपिविद्वांसंदैवे

पित्र्येच भोजयेत्॥ सपुष्कलमवाप्नोतिनामंत्रज्ञान्बहूनपीति॥ सद्यःश्राद्धीशूद्रतल्पगस्तत्पुरीषेमासंनयतिपितॄन्॥ अनेनभोक्तुर्दातुश्चब्रह्मचर्यमुच्यते॥ तथाचमनुः॥ निमंत्रितोद्विजःपित्र्येनियतात्माभवेत्सदा॥ नच्छंदांस्यधीयीतयस्य श्राद्धंचतद्भवेदिति॥ सद्यइतिक्रियाविशेषणं॥ सद्यएवनियतीतिशूद्राग्रहणंकालपरिमाणार्थंइतरास्वल्पतरंकालमितितल्पेग्रहणंभार्यार्थं॥ ततश्चान्यस्यांविशिष्टतरोदोषः॥ तस्याह्पुरीषेमासंपितॄनधिवास्ययावद्देवस्तावत्तादोषेणसंबध्यतइत्यर्थः। तस्मात्तदहब्रह्मचारीस्यात्॥ यस्मादयंदोषस्तस्मात्तस्मिन्नहनिमैथुनवर्जकस्यान्नतावपिहेतुवचनात्। श्वचंडालपतितावेक्षणेदुष्टश्वादिभिरीक्षितमन्नंश्राद्धंवादोषवद्भवति॥ अन्नपक्षे अभोज्यंश्राद्धपक्षेत्वत्फलंभवतीत्यर्थः। तस्मात्परिश्रितेदद्यात्॥ तस्मादेवंतस्मात् प्रच्छन्नदेशेदद्यात्॥ हेतुवचनाच्छ्राद्धादन्यत्रापिपरिश्रितएवभोक्तव्यमिति॥ तिलैर्वाविकिरेत्॥ अपरिवृत्तदोषशमनं॥ भवतिस्मृत्यंतरसामर्थ्यात्॥ पितॄणांचतृप्तिर्भवति॥ यथाहभृगुः पानीयमपियद्दत्तंतिलैर्मिश्रंद्विजस्यतु॥ पितृभ्यःकामधुक्तत्स्यात्॥ विगृह्यमिदमंततइति॥ पङ्क्तिपावनोहिशमयेत्॥ पङ्क्तिपावनोवक्ष्यमाणः॥ अपरिवृत्तदोषंशमयेत्। पङ्क्तिपावनः। षडंगविज्ज्येष्ठसामस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णःपंचाग्निःस्नातकोमंत्रब्राह्मणविद्धर्मज्ञोब्रह्मदेयानुसंतानइति एकेचसतिश्रोत्रियत्वेधिकगुणयोगात्। पंक्तिंशोधयन्ति॥ निर्दोषांकुर्वन्तीति॥ पङ्क्तिपावनाः॥ षडंगवित्॥ षंणामंगानामन्यतमस्यार्थाभिज्ञः॥ तथापुराणे॥ चतुर्दशानांविद्या

प्र॰शा॰

३८७

नामेकस्यापारगोपियः॥ आत्मकैवल्यविच्चैवसर्वेतेपङ्क्तिपावनाइति॥ ज्येष्ठसामगः ज्येष्ठसामछंदोगानांसामविशेषः वि-
॥तद्ध्यायीज्येष्ठसामगः त्रिणाचिकेतनामाध्वर्युणामृग्विशेषः त्रिमधुबह्वृचानांसूक्तविशेषः त्रिसुपर्णोबह्वृचानां
तैत्तिरीयाणांचपंचाग्निः ऐसभ्यावसभ्यासह॥ स्नातकोविद्याव्रतस्नातकः॥ मंत्रब्राह्मणवित्॥ विनाप्यंगविज्ञात्रन॥ धर्म
ज्ञोधर्मशास्त्रज्ञः॥ ब्रह्मदेयानुसंतानोब्रह्मविवाहोढःपुत्रः॥ संततिःइतिकारः॥ प्रकारवाची॥ यथाहवसिष्ठः॥ त्रिणा
चिकेतःपंचाग्निस्त्रिसुपर्णश्चतुर्मेधावाजसनेयीषडंगविच्छंदोगोज्येष्ठसामिकोमंत्रब्राह्मणविद्यस्वधर्मानधीतेय
स्यचदशपुरुषंमातृपितृवंशश्रितयोविज्ञायतेविद्वांसस्नातकः। चैतेपङ्क्तिपावनाभवंतीत्येवमादीनांस्मृत्यंतरो-
क्तानामप्युपलक्षणार्थेहविष्षुचैवंहविः अभ्युदयकर्मसुबहुवचनंनकेवलंपित्रियंगभूतेषुदैवएवकिंतर्हिसर्वा
भ्युदयेष्वपितिचशब्दादेवसिद्धे॥ एवंशब्दःपरिश्रितपंक्तिपावनार्थः। दुर्बलादिश्राद्धाएवैके॥ श्राद्धएवैकेदुर्बलादी
नत्ययेनुक्रांतास्तान्श्राद्धएवभोजयेत्॥ ननुदैवएकेग्रहणान्ननुगोतमः। संभवासंभवकृतश्चविकल्पः। इतिम-
स्करीयेगौतमभाष्येपंचदशोध्याये॥ एवंसामशाखागतखादिराचार्यकृतगृह्यसूत्रभाष्ये॥ तथाचगृह्यसूत्रभा
ष्यं॥ अथश्राद्धभोक्तॄन्निरूपयति॥ स्नातान्वेतिकृतसमावर्तनस्नातइत्युच्यते॥ प्रतिप्रसवार्थमितीदंवचनं॥ अ
नाश्रमित्वेनप्रतिषेधेप्राप्तेनेनवचनेनप्रतिप्रसूयते॥ एकेयतीनितिसन्यासिनोभोजयितव्यइतिकेचिन्मन्यन्ते॥

केचिदुक्ते वयमित्यर्थः गृहस्थसाधून्वेति गृहस्थश्चासौ साधुश्च गृहस्थसाधुः तान्वेत्यर्थः॥ अथ स्नातकादीनां गुणानाह
श्रोत्रियान्वृद्धाननवद्यान्॥ स्वकर्मस्थानिति॥ एकां शाखामधीत्य श्रोत्रियः। विद्याधिकस्तु वृद्धशब्दवाच्यः अनवद्यः
महापातकरहितः॥ स्वकर्मस्थः वर्णाश्रमधर्मयुक्तः॥ पूर्वोक्तस्नातकादीनां त्रयाणामेकैकस्य श्रोत्रियादीनि चत्वारि वि
शेषणानि॥ संति चेदन्यत्र साधीयः त्रीणि चेत्ततोपि किंचिन्न्यूनं श्रोत्रियत्वानवद्यत्वस्वकर्मस्थत्वानां॥ समुच्चयापवादात्सर्वत्र भोजयोदिति
शेषो द्रष्टव्यः॥ एतदुक्तं भवति श्रोत्रियादिगुणयुक्तान् स्नातान्वा भोजयेत्॥ श्रोत्रियादिगुणयुक्तान् यतीन्वा श्रोत्रियादिगुणयुक्तान्।
॥ गृहस्थसाधून्वेति स्नातादीनां समुच्चयो वा कार्यः। असमुच्चयो वा इति तत्र वाशब्दस्यार्थः कल्पनीयः अभावे शिष्या
न्स्वाचारानिति शिष्योंतेवासी स्वआचारो यस्य स्वाचारः॥ स्वाचारशब्दः शिष्यविशेषणं। स्नातकयति श्रोत्रियादित्वयुक्ता
यदि न लभ्यंते॥ तदा स्वीयाचारयुक्तान्॥ शिष्यान्वा भोजयेत्॥ न च शिष्योपि स्नातादित्रयाणामन्यतम एव भोजनीय इ
ति शंकनीयं॥ एषामन्यतमश्चेत्तन एव सिद्धेरिदं सूत्रं निरर्थकं स्यात्॥ ततश्च वयसा ब्रह्मचार्यपि शिष्यो भोजइतव्य इति
सूचितं भवति॥ अथ वर्ज्यानाह॥ अनग्निः श्मुक्लविक्लश्यावदंतदुश्चर्मविद्धप्रजननव्याधितव्यंगिश्वित्रिकुष्ठीकुनखिवर्जमिति
॥ हिर्नग्नशब्दार्थस्तु प्रसिद्धः श्मुक्लः श्मुक्लवर्णः विक्लः अतिकृष्णः श्यावदंतः स्वभावतः कृष्णदंतः॥ दुश्चर्मा कुत्सितत्व
क्॥ विद्धास्ताडित अप्रजननः पुंस्त्वशक्तिरहितः व्यंगः पादरहितः कुष्ठी प्रसिद्धः॥ कुनखी॥ कुत्सितनखी एतान्वर्ज्ज

येदित्यर्थः॥ अथश्राद्धदिनकृत्यमाह॥ स्नातांछुचीनांचांतान्प्राङ्मुखानुपवेश्य॥ दैवेयुग्मानितिस्नातान्भूतनिर्देशे नावश्यं श्राद्धकालएवस्नाताएवस्नानंकार्यं॥ देवार्थेयुग्मान्ब्राह्मणानामंत्रयेत्॥ अयुग्मान्यथाशक्तिपित्र्य एकैकस्योदङ्मुखानितितेनपित्र्यर्थएकैकस्ययुग्मान्॥ ब्राह्मणान्शक्त्यनुसारेणामंत्रयेत्॥ एतदुक्तंभवति॥ वैश्वदेवार्थे चत्वारः॥षडित्येवमादिसंख्याकोब्राह्मणाभवेयुः पित्र्यर्थेत्रयः पंचेत्यादिकसंख्याकाः॥ एवंपितामहप्रपितामहार्थे॥ एवमेवआश्वलायनगृह्यसूत्रे॥ तद्व्याख्यानरूपनारायणवृत्तौच॥ तथाचसूत्रं॥ ब्राह्मणांछ्रुतशीलवृत्तसंपन्नानेकेनवाकालेज्ञापितान्स्नातान्॥ कृतपच्छौचानाचांतान्॥ अस्यनारायणवृत्तिः॥ ब्रह्मब्रूमः ब्राह्मणग्रहणंक्षत्रियवैश्यनिवृत्त्यर्थं॥ श्रुतंस्वाध्यायः॥ शीलंस्वभावः शमदमादियुक्तत्वंक्रोधरोगादिवर्जितंच तंचवृत्तविहितकरणंनिषिद्धवर्जनंच॥ एतैस्त्रिभिर्गुणैर्युक्तानेकेनवागुणेनयुक्तानुपवेश्येत्यनेनसंबंधः कालेज्ञापितान् स्मृत्युक्तनिमंत्रणकालेनिमंत्रितानित्यर्थः॥ तथैव॥ मनुस्मृतावपि॥ तृतीयाध्याये॥ मनुमूलं॥ पितृणांमासिकंश्राद्धमन्वाहार्यंविदुर्बुधाः॥ तच्चामिषेणकर्त्तव्यंप्रशस्तेनप्रयत्नतः॥१२३॥ अस्यव्याख्यानं॥ इदानींनामनिर्वचनेनोक्तमेव पितृयज्ञानंतर्यंद्रढयति॥ पितृणामिति॥ इदंमासिकंप्रतिमासंभवंश्राद्धंयस्मासितयज्ञंपिंडानामनुपश्चाद्दीयते॥ तेनपिंडान्वाहार्यकमिदंपंडिताजानेति॥ ततोयुक्तंपितृयज्ञानंतर्यमस्य॥ तच्चामिशेषेणवक्ष्यमाणमांसेनप्रश[illegible]नमनोहरेणपूतिगंधादिरहितनप्रय

नि·
द्वि

न्नतः।कर्त्तव्यं॥पिंडानांमासिकंश्राद्धमितिपाठः।पिंडानांपितृयज्ञपिंडानांशेषंतुल्यं॥म[illegible]ं।तत्रयेभोजनीयास्तुयैश्चवर्ज्योद्विजोत्तमाः
यावंतश्चैवयैश्चान्नैस्तान्प्रवक्ष्याम्यशेषतः॥१२४॥तत्रेति।तस्मिन्श्राद्धेयेभोजनीयाः।येचत्याज्याः।यावत्संख्याकाः।यैश्चान्नैः।तत्सर्वं
प्रवक्ष्यामि।१२४।मनुमूलं।द्वौदैवेपितृकार्येत्रीनेकैकमुभयत्रवा॥भोजयेत्सुसमृद्धोपिनप्रसज्जेतविस्तरे॥१२५॥अस्यव्याख्यानं।अ
त्रयद्यप्युद्देशक्रमेणयेभोजनीयाइतिवक्तुमुचितं॥तथाप्यल्पवक्तव्यत्वाद्ब्राह्मणसंख्यामाह।द्वाविति।दैवश्राद्धेद्वौब्राह्मणौपितृपित
महप्रपितामहानांत्रीन्ब्राह्मणान् अथवा।दैवेएकं।पित्रादित्रिकेचैकं।ब्राह्मणंभोजयेत्।उक्तातिरिक्तभोजनसमर्थोपिनाधिकभोज
नेषुप्रवर्तेत।मेधातिथिस्त्वाह।पितृकृत्येत्रीनिति।पितुस्त्रीन्ब्राह्मणान्पितामहस्यत्रीन्ब्राह्मणान्प्रपितामहमुद्दिश्यत्री
न्ब्राह्मणान्भोजयेत्॥एकैकमुभयत्रवेति दैवेएकंपित्रादित्रयस्यचैकैकं॥नत्वेवैकंपित्रादित्रयस्यनत्वेवैकंसर्वेषांपिंडै
र्व्याख्यातमित्याश्वलायनगृह्यविरोधात्॥यथैकःपिंडः।पित्रादित्रयस्यननिरूप्यते।तथैकोब्राह्मणोनभोजयितव्यइत्यर्थः।त
स्मान्नपित्रादित्रयस्यैकब्राह्मणभोजनमिति।तदसत्।गृह्यकारेणैवनत्वेवैकं।सर्वेषांपिंडैर्व्याख्यातमितिपठित्वाकाममनाद्येइत्यभि
हितंअस्यार्थः॥बहुपित्रादिदेवताकश्राद्धानामाद्यं।सपिंडीकरणमभिमतं॥तद्व्यतिरिक्तश्राद्धेकामंमेकः।पित्रादीनांब्राह्मणइत्य
र्थः।अथवा।अनाद्येअदनीयद्रव्याभावेएकोपिभोजयितव्यः।उभयत्रापिव्याख्यानेपार्वणादौपित्रादित्रयस्यैकब्राह्मणभोजनं।गृ
ह्यकृतैवोक्तं।वसिष्ठोपि॥श्लोकं॥यद्येकंभोजयेच्छ्राद्धेदैवंतत्रकथंभवेत्।अन्नंपात्रेसमुद्धृत्यसर्वस्यप्रकृतस्यच॥ ॥देव

नायतनेकृत्वायथाविधिप्रवर्तयेत्॥ प्रास्येदन्नंतदग्नौवादद्याद्वाब्रह्मचारिणइति॥ सर्वेभ्यएकब्राह्मणभोजनमाह
तस्माद्यथोक्तैवव्याख्याप्रथमेवाशब्दइत्यनेन॥ विस्तारइति॥ प्रासेद्धंदस्समानत्वात्॥ स्मृतीनांसर्वैविधयच्छंदसि
विकल्प्यंते॥ इतिविस्तरइतिरूपं॥ १२५॥ मू०॥ सत्क्रियांदेशकालौच शौचंब्राह्मणसंपदः॥ पंचैतान्विस्तरोहंतितस्मा॰
न्नेहेतविस्तरं॥ १२६॥ अस्यव्याख्यानं॥ सदितिसत्क्रियाब्राह्मणस्यपूजा॥ देशंदक्षिणप्रवणात्वादिवक्ष्यमाणं॥ काल
मपराण्हं॥ शौचंश्राद्धकर्तृभोक्तृब्राह्मणप्रेष्यगतंगुणवद्ब्राह्मणलाभंस्वब्राह्मणविस्तारोनाशयति तस्माद्ब्राह्मणविस्ता
रंनकुर्यादिति॥ सत्क्रियादिविरोधतोब्राह्मणविस्तारनिषेधात्सत्क्रियादिसंभवेपित्रादेरेकैकस्यापिब्राह्मणत्रयाभ्यनु
ज्ञानं॥ अतएवगौतमः॥ नवावरान्भोजयेदयुजोवायथोत्साहमिति॥ बह्वृचगृह्यकारोपि॥ अथातः पार्वणश्राद्धेका
म्यअभ्युदयिकएकोद्दिष्टेब्राह्मणान्नित्युपक्रम्य॥ एकैकमेकैकस्यद्वौद्वौत्रींस्त्रीन्वावृद्धौफलभूयस्त्वमित्याहद्वौद्वौ॰
इतिआभ्युदयिकश्राद्धविषयं॥ स्मृत्यन्तरेतथाविधानात्॥ अत्रास्याभ्युदयिकइत्युपक्रमाच्च॥ १२७॥ मूल॥ प्रथि॰
ताप्रेतकृत्यैषापित्र्यंनामविधुक्षये॥ तस्मिन्युक्तस्येतिनित्यंप्रेतकृत्यैवलौकिकी॥ १२७॥ अस्यव्याख्यानं॥ प्रथितेति॥
पदेतत्पित्र्यंनामकर्मश्राद्धरूपं॥ प्रथममियंप्रत्याख्याताप्रेतकृतापित्रूपकाराद्वाक्रियाप्रकर्षेणइतः॥ प्रेतइतिपितृ
लोकस्थएवोच्यते॥ विधुक्षये अमावास्यायांतस्मिन्पित्र्येकर्मणि युक्तस्यतत्परस्य लौकिकी॥ स्मार्त्तकी प्रेतकृत्या

पित्रूपकारार्थक्रिया॥गुणवत्पुत्रपौत्रधनादिफलरूपेण कर्त्तारमुपतिष्ठते॥तस्मादिदं कर्त्तव्यं गोविन्दराजेन तु विधिः क्षय
इति पठितं व्याख्यातं च योयं नाम विधिः पित्र्यं कर्मेति थिक्षये चं द्रक्षये गृहे वेति॥ तदसांप्रदायिकं मेधातिथिप्रभृतिगोविंद
राजात्पिरद्धतरैरनभ्युपेतत्वात्॥ क्षय इति संबंधक्लेशाच्च॥१२७॥ श्लो०॥ श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः।
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलं॥१२८॥ अस्य व्याख्यानं॥ श्रोत्रियायेति॥ छंदोमात्राध्यायी श्रोत्रियः तस्मै देव
पित्र्यंना नि – यत्नतो देयानि अर्हत्तमाय श्रुताचाराभिजनादिभिः पूज्यतमाय विप्राय तस्मै दत्तं महाफलं भवति॥१२८
॥मू०॥ एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्॥ पुष्कलं फलमाप्नोति नामंत्रज्ञान्बहूनपि॥१२९॥ अस्य व्याख्यानं॥ए
कैकमिति दैवपित्र्ययोरेकैकमपि। वेदतत्वविदं ब्राह्मणं भोजयेत्। तथापि विशिष्टं श्राद्धफलं प्राप्नोति॥ नत्वविदुषो बहू
नपि॥ एवं च फलश्रवणात्॥ ब्राह्मणभोजनमेव प्रधानं पिंडदानादिकं त्वंगमिति गोविंदराजः॥ वयं तु पितृद्देशेन द्रव्य
त्यागं ब्राह्मणस्वीकारपर्यंतं श्राद्धशब्दवाच्यं प्रधानं ब्रूमः॥ तदेव मनुना। पिंडान्वाहार्यकं श्राद्धं कुर्यादिति विहितं। आपस्तंबेन
च॥ मन्वर्थ एव व्याख्यातः॥ तथा चापस्तंबः॥ तथैतन्मनुः श्राद्धशब्दं कर्म प्रोवाच॥ प्रजानिश्रेयसार्थं॥ तत्र पितरो देव
ता ब्राह्मणस्त्वाहवनीयार्थे मासि मास्यपरपक्षस्यापराण्हः श्रेयानिति॥ श्राद्धशब्दं॥ श्राद्धमिति शब्दो वाचको यस्य त
तया॥ ब्राह्मणस्त्वाहवनीयार्थे आहवनीयवत्॥ त्यक्तद्रव्यप्रतिपत्तिस्थानत्वात्॥ पितरो देवता इति नियत पितृदेवता

प्र॰शा

३९०

कत्वाच्च ॥ श्राद्धस्य ॥ देवताश्राद्धादौ श्राद्धशब्दस्तु तद्धर्मप्राप्त्यर्थो गौणः ॥ कौंडपायिनामयनइवाग्निहोत्रशब्दः पुष्क
लं फलं प्राप्नोतीति तु पुरुषतरफलार्थिनो गुणफलविधिः सभोजनस्यांगत्वेपि तदाश्रयेण विरुद्धः ॥ श्लो० ॥ आपस्तंबोप्य
द्राश्राद्धं कर्मैतत् पितृदेवतं ॥ मन्वर्थं कथयंस्तस्मान्नेदं ब्राह्मणभोजनं ॥ १२९ ॥ मू० ॥ दूरादेव परीक्षेत ब्राह्मणं वेदपार
गं ॥ तीर्थं तद्धव्यकव्यानां प्रदाने सोतिथिः स्मृतः ॥ १३० ॥ अस्य व्याख्यानं ॥ दूरादिति ॥ दूरादेव पितृपितामहाद्यभिजन
शुद्धिनिरूपणेन कृत्स्नशाखाध्यायिनं ब्राह्मणं परीक्षेत । यस्मात्तथाविधो ब्राह्मणो हव्यादीनां तीर्थं पात्रं ॥ प्रदाने सोति
थिरेव महाफलप्राप्तेर्हेतुत्वात् ॥ १३० ॥ मू० ॥ सहस्रं हि सहस्राणामनृचां यत्र भुंजते ॥ एकस्तान् मंत्रवित्प्रीतः सर्वान
र्हति धर्मतः ॥ १३१ ॥ अस्य व्याख्यानं ॥ सहस्रमिति ॥ यत्र श्राद्धे ब्राह्मणानाम वेदवेदांदशलक्षणानि भुंजते ॥ तत्रैको
वेदवित् भोजनेन परितुष्टो धर्मतो धर्मोत्पादनेन तान् सर्वानर्हति स्वीकर्तुं योग्यो भवति ॥ तद्भोजनजन्यफलं जनयतीत
त्यर्थः छांदसत्वादेकवचनं ॥ अथवा बहुवचनानां ॥ स्थाने सहस्रमिति मनोरभिमतं ॥ गोविंदराजस्त्वाह सहस्रं ग
च्छंतु भूतानीति वेद इति ॥ १३१ ॥ मू० ॥ ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च ॥ नहि हस्तावसृग्दिग्धौ रुधिरेणैव
शुद्ध्यतः ॥ १३२ ॥ अस्य व्याख्यानं ॥ ज्ञानेति विद्यया उत्कृष्टेभ्यो हव्यानि कव्यानि च देयानि ॥ न मूर्खेभ्यः ॥ अर्थान्तर
न्यासो नामालंकारः ॥ नहि रक्तौ हस्तौ रक्तेनैव विशुद्धौ भवतः किंतु ॥ विमलजलेन एवं मूर्खभोजनेन जनितदोषं

नि

३९२

नमूर्खएवभोजितोपहंति॥किंतुविद्वान्॥१३२॥मू॰॥यावतोग्रसतेग्रासान्हव्यकव्येष्वमंत्रवित्॥तावतोग्रसतेप्रेत्यदीप्तशूलर्ष्ट्ययोगुडान्॥१३३॥अस्यव्याख्यानं॥अविद्वन्निंदयाविद्वद्दानमेवोक्तंवक्तोस्त्यास्तौति॥यावतइति॥यावत्सं॰ख्याकान्ग्रासान्हव्यकव्येष्ववेदविद्भुंक्तेतत्संख्याकानेवप्रकृतश्राद्धकर्त्ताज्वलितशूलर्ष्ट्याख्यायुधलोहपिंडान्ग्रसतेश्राद्धकर्त्तुरेवेदमविद्वद्दानफलकथनं॥तथाचव्यासः॥श्लो॰॥ग्रसतेयावतःपिंडान्प्रस्यवैहविषोनरः॥ग्रसनेतावतःशूलान्गत्वावैवोस्वतःक्षयमिति॥१३३॥मू॰॥ज्ञाननिष्ठाद्विजाःकेचित्तपोनिष्ठास्तथापरे॥तपस्वाध्यायनिष्ठाश्चकर्मनिष्ठास्तथापरे॥१३४॥अस्यव्याख्यानं॥ज्ञानेति॥केचिद्ब्रात्मज्ञानपराब्राह्मणाभवंति॥अन्येप्राजापत्यादितपःप्रधानाः॥अपरेतपोध्ययननिरताः इतरेयागादिपराः॥१३४॥मू॰॥ज्ञाननिष्ठेषुकव्यानिप्रतिष्ठाप्यानियत्नतः॥हव्यानितुयथान्यायंसर्वेष्वेवचतुर्ष्वपि॥१३५॥अस्यव्याख्यानं॥तत्किमतआह॥ज्ञानेति॥ज्ञानप्रधानेभ्योपित्रार्थान्नानियत्नाद्दातव्यानि॥देवान्नानिपुनः॥न्यायावद्दतार्थशास्त्रानुसारेणचतुर्भ्योपि॥१३५॥मू॰॥अश्रोत्रियःपितायस्यपुत्रःस्याद्वेदपारगः॥अश्रोत्रियोवापुत्रस्स्यात्पितास्याद्वेदपारगः॥१३६॥अस्यव्याख्यानं॥अश्रोत्रियइति॥योनिश्रोत्रियपितृकःस्वयंतुश्रोत्रियः॥यःश्रोत्रियपितृकःस्वयंवाअश्रोत्रियः॥१३६॥मू॰॥जायांसमनयोर्विद्याद्यस्स्याच्छ्रोत्रियःपिता॥मंत्रसंपूजनार्थंतुसत्कारमितरोर्हति॥१३७॥अस्यव्याख्यानं॥तयोःकःश्रेष्ठइत्युपन्यस्यवि

प्र॰श्रा॰
७
२९१

शेषमाह ॥ ज्यायांसमिति अनयोः ॥ पूर्वश्लोकनिर्दिष्टयोर्मध्ये श्रोत्रियपुत्रं स्वयमश्रोत्रियमपि ज्येष्ठं जानीयात् ॥ पितृविद्याद-
रपरमिदं ॥ यः पुनरश्रोत्रियस्य पुत्रः स्वयं श्रोत्रियः स तदधीतवेदपूजनार्थं पूजामर्हति ॥ वेद एव तद्द्वारेण पूज्यत इति
पुत्रविद्यादरपरमिदं तस्माद्वचनं भंग्या श्रोत्रियपुत्रः स्वयं च श्रोत्रियः ॥ श्राद्धे भोजयितव्य इत्युक्तं न तु श्रोत्रियपुत्रस्य
स्वयमश्रोत्रियस्यैवाभ्यनुज्ञानं ॥ श्रोत्रियायैव देयानीति विरोधात् ॥ एवं च दूरादेव परीक्षेतेति विद्याव्यतिरिक्ताचारा-
दिपरीक्षार्थत्वेनावतिष्ठते ।।१३७॥ मू॰ ॥ न श्राद्धे भोजयेन्मित्रं धनैः कार्योऽस्य संग्रहः ॥ नारिं न मित्रं यं विद्यात्तं श्राद्धे भो-
जयेद्द्विजं ॥१३८॥ अस्य व्याख्यानं ॥ नेति । श्राद्धे मित्रं न भोजयेत् ॥ धनांतरैरस्य मैत्री संपादनीया ॥ न शत्रुं न च मित्रं यं
जानीयात्तं ब्राह्मणं श्राद्धे भोजयेत् ॥१३८॥ यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च ॥ तस्य प्रेत्य फलं नास्ति श्राद्धेषु
च हवींषि च ॥३३९॥ अस्य व्याख्यानं ॥ यस्येति । मित्रशब्दोऽयं भावप्रधानः ॥ यस्य मैत्रीप्रधानानि हव्यकव्यानि तस्य
पारलौकिकं फलं न भवतीति फलाभावकथनपरमिदं प्रेत्येति परलोक इत्यर्थे कशब्दान्तरमव्ययमिदं । न तु क्त्वांतं ॥
तेनासमानकर्तृकत्वे कथं क्त्वा इति नाशंकनीयं ॥१३९॥ मू॰ ॥ यः संगतानि कुरुते मोहाच्छ्राद्धेन मानवः ॥ स स्वर्गाच्च्य-
वते लोकाच्छ्राद्धमित्रो द्विजाधमः ॥१४०॥ अस्य व्याख्यानं ॥ स्वर्गफलं श्राद्धस्य दर्शयितुं पूर्वोक्तफलाभावमेव वि-
शेषेण कथयति ॥ य इति ॥ यो मनुष्यः संगतानि मित्रभावान् शास्त्रानभिज्ञतया श्राद्धेन कुरुते ॥ श्राद्धमेवमित्रला

भद्देतु त्वान्मित्रं यस्य स श्राद्धमित्रो द्विजा पशाद्स्स्वर्गलोकाच्यवते ॥ तेन प्राप्नोतीत्यर्थः ॥ श्राद्धस्यापि स्वर्गफलत्व
माह ॥ याज्ञवल्क्यः ॥ श्लो ॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ॥ प्रयच्छंति तथा राज्यं प्रीता नृणां पितामह
इति ॥१४०॥ मू०॥ संभोजनी साभिहिता पैशाचिर्दक्षिणा द्विजः ॥ इहैवास्ते तु सा लोके सौरंधे वैकवेश्मनि ॥१४१॥ अ
स्य व्याख्यानं ॥ संभोजनीति ॥ सा दक्षिणा दानक्रिया संभोजनी सह भुज्यते ॥ यया सा संभोजनी गोष्ठी वहुपुरुषभोजना
त्मिका पिशाचधर्मत्वात् ॥ पैशाची मन्वादिभिरुक्ता सा च मैत्री प्रयोजनकत्वान्न परलोकफला इहलोक एवास्ते यथां
धा गौरेकस्मिन्नेव गृहे तिष्ठति न गृहांतरगमनक्षमा ॥१४१॥ मू०॥ यथेरिणी बीजमुप्त्वा न वसा लभते फलं ॥ तथानृ
चे हविर्दत्वा न दाता लभते फलं ॥१४२॥ अस्य व्याख्यानं ॥ यथेति ॥ इरिणमूषर देशः यत्र बीजमुप्तं न प्ररोहति ॥ तत्र यथा
बीजमुप्त्वा कर्षको न फलं ॥ प्राप्नोति ॥ एवमविदुषे पित्र्यन्नं दत्वा श्राद्धदानफलं दाता न प्राप्नोति ॥१४२॥ मूलं ॥ दातॄन्
प्रतिग्रहीतॄंश्च कुरुते फलभागिनः ॥ विदुषे दक्षिणां दत्वा विधिवत्प्रेत्य चेह च ॥१४३॥ अस्य व्याख्यानं ॥ दातॄनिति
॥ वेदतत्त्वविदे यथाशास्त्रं दत्तं ऐहिकामुष्मिकफलभागिनो दातॄन् करोति ऐहिकं फलं ॥ यथाशास्त्रानुष्ठानेन लोके
ख्यातिरूपमानुषंगिकमिति ॥ मेधातिथिगोविंदराजौ ॥ वयं त्वायुरादिकमेवैहिकं फलं ब्रूमः ॥ आयुः प्रजां धनं विद्यामि
त्याद्यैहिकादि फलत्वेनापि श्राद्धस्य याज्ञवल्क्यादिभिरुक्तत्वात् ॥ प्रतिग्रहीतॄंश्च श्राद्धलब्धधनानुष्ठितयागादिफ

लेनपरलोकेसफलान्नकुरुते॥ अन्यायार्जितधनानुष्ठितयागादेरफलप्रदत्वात्॥ इहलोकेन्यायार्जितधनारब्धकृष्यादिफ
लातिशयलाभात्सफलान्नकुरुते॥१४३॥ मू०॥ कामंश्राद्धेर्चयेन्मित्रंनाभिरूपमपित्वरिं॥ द्विषताहिहविर्भुक्तंभवतिप्रेत्य
निष्फलं॥१४४॥ अस्यव्याख्यानं॥ काममिति॥ वरंविद्वद्ब्राह्मणाभावेगुणवन्मित्रंभोजयेत्॥ नतुविद्वांसमपिशत्रुं॥ य
तः॥ शत्रुणाश्राद्धंभुक्तंपरलोकेनिष्फलंभवति॥ यथोक्तपात्रासंभवेमित्रप्रतिप्रसवार्थमिदं॥१४४॥ मू०॥ यत्नेनभोज
येच्छ्राद्धेबह्वृचंवेदपारगं॥ शाखांतगमथाध्वर्युंछंदोगंतुसमाप्तिकं॥१४५॥ अस्यव्याख्यानं॥ श्रोत्रियायैवदेयानी
त्यनेनछंदोमात्राध्यायिनिश्रोत्रियशब्दप्रयोगात्तदाश्रयणमावश्यकमुक्तं॥ इदानींत्वधिकफलार्थंमंत्रब्राह्मणा
त्मककृत्स्नशाखाध्यायिनिश्रोत्रियेदानमाह। यत्नेनेति। ऋग्वेदिनं॥ मंत्रब्राह्मणात्मकशाखाध्यायिनंयत्नतोभोज
येत्॥ तथाविधमेवयजुर्वेदिनं। वेदस्यपारंगच्छतीतिवेदपारगः शाखाया अंतंगच्छतीतिशाखांतगः॥ समाप्तिर
स्यास्तीतिसमाप्तिकः॥ सर्वैरेवशब्दैर्मंत्रब्राह्मणात्मककृत्स्नशाखाध्येताभिहितः॥१४५॥ मू०॥ एषामन्यतमोय
स्यभुंजीतश्राद्धमर्चितः॥ पितृणांतस्यतृप्तिस्स्याच्छाश्वती साप्तपौरुषी॥१४६॥ अस्यव्याख्यानं॥ तद्भोजनेअ
धिकफलमाह। एषामिति। एषांसंपूर्णशाखाध्यायिनांबह्वृचादीनांमध्यादन्यतमोयस्यसम्यक्। पूजितस्सन्
श्राद्धेभुङ्क्ते। तस्यपित्रादिसप्तपुरुषाणांशाश्वतीअविच्छिन्नापितृणांतृप्तिस्स्यात्॥ साप्तपौरुषीति॥ अनुशाति

कादित्वादुभयपदवृद्धिः नस्यचाकृतिगणत्वात्॥१४६॥ एषवैप्रथमःकल्पःप्रदानेहव्यकव्ययोः॥ अनुकल्पस्त्वयंज्ञेयःस
दासद्भिरनुष्ठितः॥१४७॥ अस्यव्याख्यानं॥ एषइति॥ हव्यकव्ययोरुभयोरेवप्रधानेपदसंबंधिश्रोत्रियादिभ्योदीयतइति अ
यंमुख्यःकल्पउक्तः॥ अयंतुमुख्याभावेवक्ष्यमाणोनुकल्पोज्ञातव्यः सर्वदासाधुभिरनुष्ठितः॥१४७॥ मू०॥ मातामहं
मातुलंचस्वस्रीयंश्वशुरंगुरुं॥ दौहित्रंविट्पतिंबंधुमृत्विग्याज्यौचभोजयेत्॥१४८॥ अस्यव्याख्यानं॥ मातामहमिति
स्वस्रीयोभागिनेयः गुरुर्विद्यागुरुराचार्यादिः विट्दुहितातस्याःपतिः॥ विट्पतिर्जामाता बंधुर्मातृष्वसृपुत्रादिः एतान्मा
तामहादीन्दश॥ मुख्यश्रोत्रियाद्यसंभवेभोजयेत्॥१४८॥ मू०॥ नब्राह्मणंपरीक्षेतदैवेकर्मणिधर्मवित्॥ पित्र्येकर्म
णितुप्राप्तेपरीक्षेतप्रयत्नतः॥१४९॥ अस्यव्याख्यानं॥ नेतिधर्मज्ञोदेवश्राद्धेभोजनार्थंनब्राह्मणंयत्नतः॥ परीक्षेतलोकप्र
सिद्धमात्रेणासौसाधुतयाभोजयितव्यः॥ पित्र्येपुनःकर्मण्युपस्थिते॥ पितृपितामहाद्यभिजनपरीक्षाकर्त्तव्येतिप्रयत्नश
ब्दस्यार्थः॥१४९॥ मू०॥ यस्तेनपतितक्लीबायेचनास्तिकवृत्तयः॥ तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्॥१५०॥ अ
स्यव्याख्यानं॥ यइति॥ स्तेनश्चोरः सचसुवर्णचोरादन्यः तस्यपतितशब्देनैवग्रहणात्॥ पतितोमहापातकी क्लीबोन
पुंसकः॥ नास्तिकवृत्तिः नास्तिपरलोकइत्येववृत्तिः॥ प्रवर्त्तनंयस्य॥ एतान्दैवपितृकृत्ययोरुभयोरेवायोग्यान्मनुरब्रवी
दिति॥ मनुग्रहणंनिषेधादरार्थं सर्वधर्माणामेवमनुनोक्तत्वात्॥१५०॥ मू०॥ जटिलंचानधीयानंदुर्बलंकितवंतथा॥ या

प्र॰शा॰

३९३

जयंति च ये पूगांस्तांश्च श्राद्धेन भोजयेत् ॥१५१॥ अस्य व्याख्यानं ॥ जटिलमिति ॥ जटिलो ब्रह्मचारी मुंडो वा जटिलो वास्यादि
त्युक्तं ब्रह्मचार्युपलक्षणत्वाज्जटिलस्तस्य मुंडोपि निषिध्यते ॥ अनधीयानं वेदाध्ययनरहितं ॥ यस्योपनयनमात्रं कृतं न वे
दादेशः । तेनाम्बीकृतवेदस्यापि ॥ ब्रह्मचारिणो वेदाध्ययनकर्त्तुरभ्यनुज्ञानार्थोयं निषेधः ॥ अतः श्रोत्रियायैव देयानीति ब्रह्म
चारीतरविषयं दुर्बलो दुश्चर्मा मेधातिथिस्तु दुर्बलशब्दस्य खलतिर्लोहितकेशो वा दुश्चर्मा वेत्यर्थत्रयमुक्तवान् कितवो
द्यूतकृत् ॥ पूगयाजकाः बहुयाजकाः पूगः क्रमुकवृंदयोरित्याभिधानिकाः ॥ अतएव वसिष्ठः ॥ श्लो॰ ॥ यश्चापि बहुयाज्य
स्याद्यश्चोपनयते बहूनिति ॥ तान् श्राद्धेन भोजयेदिति ॥ न दैवे निषेधो मनोरभिमतः तत्र हव्यकव्यग्रहणमुभयत्रेति वा
करोति ॥१५१॥ मू॰ ॥ चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा विपणेन च जीवंतो वर्ज्याः स्युर्हव्यकव्ययोः ॥१५२॥
अस्य व्याख्यानं ॥ चिकित्सकानिति ॥ चिकित्सको भिषक् ॥ देवलः प्रतिमापरिचारकः ॥ वर्तनार्थत्वेनैतत्कर्म कुर्वतो यं नि
षेधः ॥ न तु धर्मार्थं देवकोशोपभोजी च नाम्ना देवलको भवेदिति ॥ देवलवचनात् ॥ मांसविक्रयिणः ॥ सकृदपि सद्यः पत
ति मांसेनेति लिंगात् ॥ विपणेनेति विपणो वाणिज्यं तेन जीवंतः हव्यकव्ययोरित्यभिधानात् ॥ दैवे पित्र्ये चैते त्याज्याः
॥१५२॥ मू॰ ॥ प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदंतकः ॥ प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा ॥१५३॥ अस्य
व्याख्यानं ॥ प्रेष्य इति ॥ भृतिग्रहणपूर्वकं ग्रामाणां राज्ञश्चाज्ञाकारी कुत्सितनखः कृष्णदंतः गुरुप्रतिकूलाचरणशीलस्त्यक्त

श्रौतस्मार्ताग्निरह्युपजीविनश्च ॥ हव्यकव्ययोर्वर्ज्या इति पूर्वस्यैवात्रानुषंगः अन्तरश्चेच ॥ १५३ ॥ मू० ॥ यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः ॥ ब्रह्मद्विट् परिवित्तिश्च गणाभ्यंतर एव च ॥ १५४ ॥ अस्य व्याख्यानं ॥ यक्ष्मीति । यक्ष्मी क्षयरोगी ॥ पशुपालो वृत्त्यर्थतया छागमेषादिपोषकः परिवेत्तृपरिवित्ती वक्ष्यमाणलक्षणौ ॥ निराकृतिः पंचमहायज्ञानुष्ठानरहितः तथा च ॥ छंदोगपरिशिष्टं ॥ श्लो० ॥ निराकर्त्तामरादीनां स विज्ञेयो निराकृतिरिति ॥ ब्रह्मद्विट् ॥ ब्राह्मणादीनां द्वेष्टा ॥ गणाभ्यंतरो गणार्थोपसृष्टसंबंधिधनाद्युपजीवी ॥ १५४ ॥ मू० ॥ कुशीलवोवकीर्णी च वृषलीपतिरेव च ॥ पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥ १५५ ॥ अस्य व्याख्यानं ॥ कुशीलव इति ॥ कुशीलवो नर्त्तनवृत्तिः अवकीर्णिः स्त्रीसंपर्काद्विप्लुतब्रह्मचर्यः प्रथमाश्रमी यतिश्च वृषलीपतिः सवर्णामपरिणीय कृतशूद्राविवाहः पौनर्भवः पुनर्भूपुत्रो वक्ष्यमाणः उपपतिर्यस्य जायाजारो गृहेस्ति ॥ १५५ ॥ मू० ॥ भृतकाध्यापको यश्च भृतकाध्यापितस्तथा ॥ शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुंडगोलकौ ॥ १५६ ॥ अस्य व्याख्यानं ॥ भृतकेति भृतिर्वेतनं तद्ग्राही भृतकः स च सोध्यापकः ॥ स भृतकाध्यापकः ॥ तथैव भृतकाध्यापितः शूद्रशिष्यो व्याकरणादौ गुरुश्च न स एव वा वाग्दुष्टः परुषभाषी अभिशस्त इत्यन्ये कुंडगोलकौ वक्ष्यमाणौ ॥ १५६ ॥ व्याख्यानं नास्ति ॥ मू० ॥ अकारणपरित्यक्ता मातापितृगुरुस्तथा ॥ ब्राह्मैर्यौनैश्च संबंधैः संयोगं पतितैर्गतः ॥ १५७ ॥ अस्य व्याख्यानं ॥ अकारणेति ॥ मातुः पितुर्गुरूणां च परित्यागकारणं विना परित्यक्ता शुश्रूषादेरकर्ता ॥ पतितैस्सह ॥ अध्ययनकन्यादानादिभिस्संबंधैः संपर्क-

गतः॥पतितत्वाद्देवास्यनिषेधइतिचेत्॥संवत्सरात्प्रागिदंभविष्यति॥संवत्सरेणपततीतिवक्ष्यमाणत्वात्॥१५७॥मू॰॥अ
गारदाहीगरदःकुंडाशीसोमविक्रयी॥समुद्रयायीवंदीचतैलिकःकूटकारकः॥१५८॥अस्यव्याख्यानं॥अगारदाहीति।
गृहदाहकः॥मरणहेतुद्रव्यस्यदाताकुंडस्यवक्ष्यमाणस्ययोन्नमश्नातिप्रदर्शनार्थत्वात्कुंडस्यगोलकस्यापिग्रहणं॥अत
एवदेवलः॥श्लो॰॥अमृतेजारजःकुंडोमृतेभर्तरिगोलकः॥यस्तयोरन्नमश्नातिसकुंडाशीतिकथ्यतइति॥सोमलताविक्रेता॥समुद्रेयोवहित्रादिनाद्वीपांतरंगच्छति॥वंदीस्तुतिपाठकः॥तैलार्थंतिलादिवीजानांपेष्टा॥साक्षिवादेकूटस्यमृषा
वादस्यकर्ता॥१५८॥मू॰॥पित्राविवदमानश्चकितवोमद्यपस्तथा॥पापरोग्यभिशस्तश्चदांभिकोरसविक्रयी॥१५९॥
अस्यव्याख्यानं॥पित्रेति॥पित्रासहशास्त्रार्थेलौकिकेवावस्तुनिनिरर्थकोविवदति।कितवोयःस्वयंदेवीतुमनभिज्ञःस्वा
र्थपरान्देवयति॥नतुस्वयंदेवितातस्योक्तत्वात्॥नचसभिकःतस्यद्यूतवृत्तिपदेनाभिधास्यमानत्वात्॥कैकरइति॥पा
ठेतिर्यग्दृष्टिः॥सुराव्यतिरिक्तमद्यपाताकुष्ठीअनिर्णितेपितस्मिन्महापातकादौजाताभिशापः छद्मनोधर्मकारीरस
विक्रीता॥१५९॥मू॰॥धनुःशराणांकर्ताचयश्चाग्रेदिधिषूपतिः॥मित्रध्रुग्द्यूतवृत्तिश्चपुत्राचार्यस्तथैवच॥१६०॥अस्यव्या
ख्यानं॥धनुरिति॥धनूंषिशरांश्चयःकरोति॥ज्येष्ठायांसोदरभगिन्यामनूढायांयाकनिष्ठाविवाहेनदीयतेसाग्रेदिधिषूः
तस्याःपतिः॥तथाचलौगाक्षिः॥श्लो॰॥ज्येष्ठायांयद्यनूढायांकन्यायामुह्यतेनुजा॥साचाग्रेदिधिषूर्ज्ञेयापूर्वातुदिधिषूः

स्मृतेति ॥ गोविन्दराजस्तु भ्रातुर्मृतस्य भार्यायामित्यनेन अग्रेदिधिषूपतिरेव ॥ वृत्तवशादग्रेपदलोपेन दिधिषूपतिरितिम
नुनावक्ष्यते ॥ स इह गृह्यत इत्याह ॥ मित्रध्रुक् ॥ यो मित्रस्यापकारे वर्त्तते द्यूतवृत्तिः ॥ सभिकः पुत्रेणाध्यापितः पिता ॥
पुत्राचार्यत्वासंभवात् ॥ १६० ॥ मू० ॥ भ्रामरी गंडमाली च श्वित्र्यथो पिशुनस्तथा ॥ उन्मत्तोंधश्च वर्ज्याः स्युर्वेदनिंदक एव
च ॥ १६१ ॥ अस्य व्याख्यानं ॥ भ्रामरिति ॥ अपस्मारीगंडमाल्याख्यव्याध्युपेतः ॥ श्वेतकुष्टयुक्तः दुर्जनः ॥ उन्मादवान् अ
चक्षुः वेदनिंदाकरः ॥ १६१ ॥ मू० ॥ स्रोतसां भेदको यश्च तेषां चावरणे रतः ॥ गृहसंवेशको दूतो वृक्षारोपक एव च ॥ १६२ ॥
अस्य व्याख्यानं ॥ स्रोतसामिति प्रवहज्जलानां सेतुभेदादिना देशांतरनेता तेषामेवावरणकर्त्ता निजगतिप्रतिबंधकः
गृहसन्निवेशोपदेशको वास्तुविद्योपजीवी दूतो राजग्रामप्रेष्यव्यतिरिक्तोपि वृक्षरोपयिता वेतनग्रहणेन न तु धर्मार्थी
पंचाम्ररोपी नरकं न यातीति विधानात् ॥ १६२ ॥ मू० ॥ श्वक्रीडी श्येनजीवी च कन्यादूषक एव च ॥ हिंस्रो वृषलवृत्तिश्च ग
णानां चैव याजकः ॥ १६४ ॥ अस्य व्याख्यानं ॥ श्वक्रीडिति ॥ क्रीडार्थं शुनः पोषयिता श्येनैर्जीवति क्रयविक्रयादिना कन्याभि
गंता हिंसारतिः ॥ शूद्रोपकृतवृत्तिर्वृषलपुत्र इति पाठांतरं ॥ वृषला एव केवलाः पुत्रा यस्येत्यर्थः ॥ विनायकादिगणयागक
त् ॥ १६४ ॥ मू० ॥ आचारहीनः क्लीबश्च नित्यं याचनकस्तथा ॥ कृषिजीवी श्लीपदी च सद्भिर्निन्दित एव च ॥ १६५ ॥ अस्य व्या
ख्यानं ॥ आचारेति ॥ गुर्वतिथिप्रत्युत्थानाद्याचारवर्जितः ॥ क्लीबो कृत्यादौ निरुत्साहः नपुंसकस्योक्तत्वात् ॥ नित्यं याचनेनप

रोहेज्ञकः ॥ स्वयंकृतयाकृष्यायोजीवीति ॥ वृत्त्यंतरेपिवा ॥ संभवत्यस्त्वयंकृतयापिश्लीपदीपादीनान्तु लक्षणः केनापिनिमि
त्तेनसाधूनांनिंदाविषयः ॥ १६५ ॥ मू॰ ॥ औरभ्रिकोमाहिषिकः परपूर्वापतिस्तथा ॥ प्रेतनिर्यातकश्चैववर्जनीयाः प्रयत्नतः
॥ १६६ ॥ अस्यव्याख्यानं ॥ औरभ्रिकइति ॥ मेषमहिषजीवनः ॥ परपूर्वापुनर्भूस्तस्याः पतिः प्रेतनिर्हारकोधनग्रहणेन
नतुधर्मार्थं ॥ एतद्वैपरमंतपोयत्प्रेतमरण्यंहरन्तीतिश्रुत्या अवश्यविहितत्वात् ॥ १६६ ॥ मू॰ ॥ एतान्विगर्हिताचारानपांक्तेया
न्द्विजाधमान् ॥ द्विजातिप्रवरोविद्वानुभयत्रविवर्जयेत् ॥ १६७ ॥ अस्यव्याख्यानं ॥ एतानिति ॥ एतान् स्तेनादीन्निंदि
ताचारान्काणादींश्चपूर्वजन्मार्जितनिंदककर्मशेषलब्धकाणादिभावान् साधुभिस्सहैकत्रभोजनाद्यनर्हान् ब्राह्मण
श्रेष्ठः शास्त्रज्ञोदैवेपित्र्येचत्यजेत् ॥ १६७ ॥ मू॰ ॥ ब्राह्मणस्त्वनधीयानस्तृणाग्निरिवशाम्यति ॥ तस्मैहव्यंनदातव्यंनहि
भस्मनिहूयते ॥ १६८ ॥ अस्यव्याख्यानंब्राह्मणइति ॥ तृणाग्निर्यथानहविर्दहनसमर्थोहविषिप्रक्षिप्तेशाम्यतिनिष्फ
लस्तत्रहोमः ॥ एवंवेदाग्निशून्योब्राह्मणस्तृणाग्निसमः तस्मैदेवोद्देशेनत्यक्तंहविर्नदातव्यं ॥ यतोभस्मनिनहूयते
श्रोत्रियायैवदेयानीत्यनेनैव अनधीयानस्यापिप्रतिषेधेसिद्धे स्तेनादिवत्पंक्तिदूषकत्वज्ञापनार्थंपुनर्वचनं अन्ये
तुदैवेअनधीयानएववर्जनीयः ॥ अधीयानस्तुकाणादिरपिशारीरदोषयुक्तोग्राह्यइत्येतदर्थंपुनर्वचनं ॥ अतएवव
सिष्ठश्लोः अथचेन्मंत्रविद्युक्तःशारीरैः पंक्तिदूषणैः ॥ अदूष्यन्तंयमःप्राह पंक्तिपावनएवसइति ॥ शारीरैः काणत्वा

द्भिर्नतुस्वयमुत्पाद्यैःस्तेनत्वादिभिः॥१६८॥अपाङ्क्त्यदानेयोदातुर्भवत्यूर्ध्वंफलोदयः॥दैवेहविषिपित्र्येवातत्सर्वस्याम्य
शेषतः॥१६९॥अस्यव्याख्यानं॥अपाङ्क्त्यदानइति॥पङ्क्तिभोजनानर्हब्राह्मणायदैवेहविषिपित्र्येवादत्तेदातुर्योदाना
दूर्ध्वंफलोदयस्तमशेषमभिधास्यामि॥१६९॥मू॥अव्रतैर्यद्द्विजैर्भुक्तंपरिवेत्रादिभिस्तथा॥अपाङ्क्त्यैर्यदन्यैश्चतद्वैर
क्षांसिभुंजते॥१७०॥अस्यव्याख्यानं॥अव्रतैरिति॥वेदग्रहणार्थव्रतरहितैस्तथापरिवेत्रादिभिरन्यैश्चअपाङ्क्त्यैःस्तेना
दिभिर्यत॥हव्यभुक्तंतद्रक्षांसिभुजंते॥निष्फलंतच्छ्राद्धंभवतीत्यर्थः॥१७०॥मू॥दाराग्निहोत्रसंयोगंकुरुतेयोग्रजेस्थि
ते॥परिवेत्तासविज्ञेयःपरिवित्तिस्तुपूर्वजः॥१७१॥अस्यव्याख्यानं॥अप्रसिद्धत्वात्परिवेत्रादिलक्षणमाह॥दारेति॥
अग्निहोत्रशब्दोयमग्निहोत्राद्याधानपरः॥यस्सहोदरोज्येष्ठेभ्रातरिअनूढेअनग्निकेचदारपरिग्रहंश्रौतस्मार्ताग्निहर
णंचकुरुतेसपरिवेत्ताज्येष्ठश्चपरिवित्तिर्भवति॥१७१॥मू॥परिवित्तिःपरिवेत्ताययाचपरिविद्यते॥सर्वेतेनरकंयांतिदा
तृयाजकपंचमाः॥१७२॥अस्यव्याख्यानं॥प्रसंगात्परिवेदनसंबंधिनामप्यविशिष्टफलमाह॥परीति॥परिवेत्ताच
ययाचकन्ययापरिवेदनं॥क्रियते॥कन्याप्रदातायाजकश्चतद्विवाहहोमकर्त्तासपंचमोयेषांसर्वेतेनरकंव्रजंति॥१७२॥
मू॥भ्रातुर्मृतस्यभार्यायांयोनुरज्येतकामतः॥धर्मेणापिनियुक्तायांसज्ञेयोदिधिषूपतिः॥१७३॥अस्यव्याख्यानं॥भ्रातु
रिति॥मृतस्यभ्रातुर्वक्ष्यमाणनियोगधर्मेणापिनियुक्तायांभार्यायांसकृत्सहकारतावीत्यादिविधिंहित्वा॥कामेनानुरागंभा-

वयेद्वाश्लेषचुंबनादिकंकुर्यात्॥ असकृद्वाप्रवर्त्तेतसदिधिषूपतिर्ज्ञातव्यः॥ अतःश्राद्धनिषिद्धपात्रमध्यपाठादस्यापिहव्य
कव्यपात्रयोर्निषेधःकल्पनीयः॥१७३॥परदारेषुजायेतेद्वौसुतौकुंडगोलकौ॥ पत्यौजीवतिकुंडस्यान्मृतेभर्तरिगोलकः
॥१७४॥ अस्यव्याख्यानं॥ परेति॥ परदारेषुकुंडगोलकाख्यौद्वौसुताउत्पद्येते॥तत्रजीवत्पतिकायासुतउत्पन्नःकुंडोमृतप
तिकायांचगोलकः॥१७४॥ मू॰॥ तौतुजातौपरक्षेत्रेप्राणिनौप्रेत्यचेहच॥दत्तानिहव्यकव्यानिनाशयेतेप्रदायिनां॥१७५
अस्यव्याख्यानं॥ ताविति॥ तेपरभार्यायांजाताःकुंडाद्याः अदृष्टाद्यनुपयोगात्॥प्राणिनइतिव्यपदिष्टाःप्राणिनौब्राह्म
णत्वेपितत्कार्याभावात्।प्रेत्यफलाभावात्परलोकेचानुषंगिककीर्त्यादिफलाभावाद्दत्तानिहव्यकव्यानिनिष्फलानि
कुर्वंति॥१७५॥ मू॰॥अपाङ्क्त्योयावतःपाङ्क्त्यान्भुंजानाननुपश्यति॥ तावतांनफलंप्रेत्यदाताप्राप्नोतिबालिशः॥
१७६॥अस्यव्याख्यानं॥ अपाङ्क्त्याइति॥ सद्भिस्सहैकपङ्क्तौभोजनानर्हःस्तेनादिर्यावत्संख्यान्भोजनार्हान्पश्यति
तावत्संख्यानां॥भोजनस्यफलंतत्रश्राद्धेदातानप्राप्नोति॥बालिशोज्ञः॥अतःस्तेनादिर्यथानपश्यति।तथाकर्त्तव्यं॥
१७६॥मू॰॥वीक्ष्यांधोनवतेःकाणःषष्टेश्वित्रिशतस्यतु॥पापरोगीसहस्रस्यदातुर्नाशयतेफलं॥१७७॥अस्यव्याख्या
नं॥वीक्ष्येति॥अंधस्यवीक्षणासंभवाद्वीक्षणयोग्यदेशसन्निहितोसौपाङ्क्त्यानांनवतेर्भोजनफलंनाशयति॥एवंका
णःषष्टेश्वेतकुष्ठीशतस्य॥पापरोगीरोगराजोपहतः॥सहस्रस्येत्यंधादिसन्निधिनिरासार्थेवचनंगुरुलघुसंख्या

भिधानंचेह संख्योपचयेदोषगौरवंतत्रच प्रायश्चित्तगौरवमिति ॥ दर्शयितुं ॥१७७॥ मू० ॥ यावतःसंस्पृशेदंगैर्ब्राह्मणा
न्शूद्रयाजकः ॥ तावतांनभवेद्दातुःफलंदानस्यपौर्तिकं ॥१७८॥ अस्यव्याख्यानं ॥ यावतइतिशूद्रस्ययज्ञादौऋत्वि
क् ॥ यावत्संख्याकान्ब्राह्मणान्संस्पृशति ॥ आसनेषूपकुश्रेषु इति ॥ आसनभेदस्य वक्ष्यमाणत्वात् ॥ मुख्यस्पर्शोसं
भवेयावतांश्राद्धभोजन पंक्तावुपविशति ॥ तावतांसंबंधिपौर्तिकंफलंश्राद्धीयंदातुर्नभवति ॥ तावतांपौर्तिकंफलं
बहिर्वेदिदानाच्चयत्फलंनभवतीति ॥ मेधातिथिगोविंदराजौ ॥ अतस्तयेवनिन्दयानिषिद्धगणपठितोपिशूद्रयाजक
वाभसि ॥१७९॥ अस्यव्याख्यानं ॥ प्रसंगाच्चशूद्रयाजकप्रतिग्रहंनिषेधयति । लाघवार्थे अन्यत्रनिषेधकरणेशूद्र
याजकशब्दोच्चारणंकर्त्तव्यंस्मात् ॥ वेदेति ॥ वेदज्ञोपिब्राह्मणःशूद्रयाजकस्यलोभात्प्रतिग्रहंकृत्वा । शीघ्रंशरीरा
दिनाविनाशंगच्छतिसुतरामवेदवित् अपक्वमृन्मयशरावादिकमिवोदके ॥१७९॥ मू० ॥ सोमविक्रयिणेविष्टाभि
षजेपूयशोणितं । नष्टंदेवलकेदत्तमप्रतिष्ठंतुवार्धुषौ ॥१८०॥ अस्यव्याख्यानं ॥ सोमविक्रयिण इति ॥ सोमविक्र
यिणेयद्दत्तंतद्दातुर्भोजनार्थंविष्टासंपद्यते ॥ जन्मांतरेविष्टाभोजिनांजातौजायतइत्यर्थः । एवंपूयशोणितेपिव्या
ख्येयंनष्टंनाशभागितयानिष्फलमेवविवक्षितं ॥ अप्रतिष्ठमनाश्रयमतयानिष्फलमेव ॥१८०॥ मू० ॥ यत्तुवाणि

जकेदत्तंनेहनामुत्रतद्भवेत्॥ भस्मनीवहुतंहव्यंतथापौनर्भवेद्विजे॥१८१॥ अस्यव्याख्यानं॥ यत्विति॥ वाणिजकाय यद्दत्तं नि· श्राद्धेतन्नेहानुषंगिककीर्त्यादिफलायनापिपारलौकिकफलायभवति। पुनर्भूसुताय यद्दत्तंतद्भस्महुतहविस्समंनिष्फलमित्यर्थः॥१८१॥ मू·॥ इतरेषुत्वपाङ्क्त्येषु यथोद्दिष्टेष्वसाधुषु॥ मेदोसृङ्मांसमज्जास्थिवदंत्यन्नंमनीषिणः॥१८२॥ अस्यव्याख्यानं॥ इतरेष्विति॥ इतरेभ्योविशेषणानुक्तफलेभ्यः पंक्तिभोजनानर्हेभ्यः॥ स्तेनादिभ्योयथाकीर्तितेभ्योयद्दत्तमन्नंतद्दातुर्भोजनार्थंमेदोरुधिरमांसमज्जास्थिभवतीतिपंडितावदंति अत्रापिजन्यान्तरेमेदश्शोणितादिभुजांजातिषुजायंतेइत्यर्थः॥१८२॥ मू·॥ अपाङ्क्त्योपहतापङ्क्तिःपाव्यतेयैर्द्विजोत्तमैः॥ तान्निबोधतकार्त्स्न्येनद्विजाग्र्यान्पङ्क्तिपावनान्॥१८३॥ अस्यव्याख्यानं॥ अपाङ्क्त्यइति॥ एकपङ्क्त्युपविष्टैस्तेनादिदूषितापङ्क्तिः यैर्ब्राह्मणैःपवित्रीक्रियते तान्पवित्रीकारकान्ब्राह्मणानशेषेणशृणु तन्निषेधादेकपङ्क्तिभोजनासंभवेपिस्नेहात्स्तेनादीनांरहस्यकृताज्ञातदोषविषयत्वेनसार्थकतास्यवचनस्य॥१८३॥ मू·॥ अग्र्याःसर्वेषुवेदेषुसर्वप्रवचनेषुच॥ श्रोत्रियान्वयजाश्चैवविज्ञेयाःपङ्क्तिपावनाः॥१८४॥ अस्यव्याख्यानं॥ अग्र्याइति॥ सर्वेषुवेदेषुचचतुर्ष्वपिअग्र्याःश्रेष्ठाःसम्यग्गृहीतवेदाब्राह्मणाःपङ्क्तिपावनाः अतएवयमःपंक्तिपावनगणनायांचतुर्वेदविदंचैवेतिपठितवान्। तथाभकर्षणेवोच्यते। वेदार्थैरभिरिति प्रवचनान्यंगानितेष्वग्र्याः षडंगनिरुक्तेचचतुर्वेदिनोपिपंक्तिपावनाः न्यायविच्चषडंगविदितिपङ्क्तिपावनाः

मध्येयमेन पृथक्पठितत्वात्॥ तथाछंदसांस्तु दशपुरुषइत्युशनसोवचनाद्दशपुरुषपर्यंतमविच्छिन्नवेदसंप्रदा
यवंशजाः पंक्तिपावनाः॥१८४॥ मू०॥ त्रिणाचिकेतः पंचाग्निस्त्रिसुपर्णः षडंगवित्॥ब्रह्मदेयात्मसंतानोज्येष्ठसामग
एवच॥१८५॥ अस्यव्याख्यानं॥त्रिणाचिकेतइति॥त्रिणाचिकेतः अध्वर्युवेदभागः तदृतंचतद्योगात्पुरुषोपित्रिणा
चिकेतः।पंचाग्निरग्निहोत्री॥ तथाचहारितः॥ श्लो०॥पवनःपावकस्त्रेतायस्यपंचाग्नयोगृहे॥सायंप्रातःप्रदीप्यंतेसवि
प्रःपंक्तिपावनइति॥पवनः आवसथ्याग्निःपावनःसभ्योग्निः सीतापनोदार्थ्यंबहुषुदेशेष्वपिविधीयते॥त्रिसुपर्णो
बह्वृचांवेदभागःतद्व्रतंचतद्योगात्पुरुषोपित्रिसुपर्णःषडंगानिशिक्षादीनियोव्याचष्टेसषडंगवित् सर्वत्रवचनेन
षडंगाध्येतोक्तःब्रह्मदेयाब्राह्मविवाहोढातस्याआत्मसंतानःपुत्रः ज्येष्ठसाम आरण्यकेगीयतेतेषांगाताए तेषट् वि
ज्ञेयापंक्तिपावनाइत्युत्तरश्लोकेनसंबंधः॥१८५॥ मू०॥वेदार्थवित्प्रवक्ताचब्रह्मचारीसहस्रदः॥शतायुश्चैववृविज्ञे
याब्राह्मणाःपंक्तिपावनाः॥१८६॥ अस्यव्याख्यानं॥ वेदेति॥ अनधीत्यापिवेदांगानिगुरूपदेशादिगतवेदार्थः॥
प्रवक्तावेदार्थस्यैवब्रह्मचारीप्रथमाश्रमी॥ सहस्रदइतिदेयविशेषानुपादानेपिगावोवैवज्ञस्यमातर इत्यादिवि
शेषप्रवृत्तश्रुतिदर्शनात्॥गोसहस्रदाता बहुप्रदोवाशतायुश्शतवयाःश्रोत्रियायैवदेयानीतिनियमात्॥सतिश्रो
त्रियत्वेउक्तगुणयोगात्पंक्तिपावनत्व॥१८६॥एवंपराशरमाधवीयेपि॥ आचारकांडेतृतीयाध्याये॥ ॥श्राद्धेभो

जनीयब्राह्मणपरीक्षाकर्त्तव्या॥ तत्रश्राद्धंप्रकृत्ययमः॥ श्लो॰॥ पूर्वमेवपरीक्षेतब्राह्मणान्वेदपारगान्॥ शरीरप्रभवैर्दोषैर्विशुद्धांश्चरितव्रतान्॥ दूरादेवपरीक्षेतब्राह्मणान्वेदपारगान्॥ यिष्टान्वायदिवानिष्टांस्तत्कालेनावमानयेदिति॥ पूर्वमितिनिमंत्रणात्पूर्वमित्यर्थः। शरीरप्रभवादोषाःकुष्ठापस्मारादयः॥ दूरादिति॥ प्रपितामहादारभ्यभोजनीयब्राह्मणपर्यंतं॥ तथाचछागलेयः॥ श्लो॰॥ उक्तलक्षणसंपन्नैर्विद्याशीलगुणान्वितैः॥ पुरुषत्रयविख्यातैस्सर्वंश्राद्धंप्रकल्पयेत् इति॥ सर्वपार्वणैकोद्दिष्टात्मकं॥ अतएवमनुनापितुःश्रोत्रियत्वेनपुत्रस्यश्रैष्ठ्यमुक्तं॥ ॥ श्लो॰॥ अश्रोत्रियःपितायस्यपुत्रस्स्याद्वेदपारगः॥ अश्रोत्रियोयस्यपुत्रःपितास्याद्वेदपारगः॥ ज्यायांसमनयोर्विद्याद्यस्यस्याच्छ्रोत्रियःपितेति॥ श्राद्धेभोजनीयब्राह्मणायाज्ञवल्क्येनदर्शिताः॥ अग्र्यास्सर्वेषुवेदेषुश्रोत्रियोब्रह्मविद्युवा॥ वेदार्थविज्ज्येष्ठसामात्रिमधुस्त्रिसुपर्णिकः॥ कर्मनिष्ठास्तपोनिष्ठाःपंचाग्निर्ब्रह्मचारिणः॥ पितृमातृपराश्चैवब्राह्मणाश्श्राद्धसंपदइति॥ ऋग्वेदादिसर्ववेदेषु अस्खलिताध्ययनस्समाअग्र्याः॥ श्रोत्रियः श्रुताध्ययनसंपन्नः॥ ब्रह्मविद्ब्रह्मज्ञानवान्। युवामध्यवयस्कः। युवत्वंचसर्वविशेषणं॥ वेदार्थवित् धर्मज्ञानवान्॥ ज्येष्ठसामेतिसामभेदः तद्व्रतंतद्व्रताचरणेनयस्तदधीतेसज्ज्येष्ठसामा॥ त्रिमधुः ऋग्वेदैकदेशः तद्व्रतंचतद्व्रताचरणेनयस्तदधीतेस त्रिमधुः। त्रिसुपर्णऋग्यजुषोरेकदेशः। तद्व्रतंचतद्व्रताचरणेनयस्तदधीतेसःत्रिसुपर्णिकः॥ ब्राह्मणानस्त्रिया

दयः उक्तलक्षणलक्षिताब्राह्मणाः श्राद्धस्याक्षयफलसंपादकाइत्यर्थः॥बृहस्पतिरपि॥यद्येकंभोजयेच्छ्राद्धेछंदोगंतत्रभोज
येत्॥ऋचोयजूंषिसामानित्रितयंतत्रविद्यते॥अटेतपृथिवींसर्वांसशैलवनकाननां॥यदिलभ्येतपित्रर्थेसाम्नामक्षरचिं
तकः॥ऋचातुतृप्यतिपितायजुषातुपितामहः॥पितुःपितामहस्साम्नाछंदोगोभ्यधिकस्ततइति॥शातातपोपि॥भोजये
द्यस्त्वथर्वाणंदैवेपित्र्येचकर्मणि॥अनंतमक्षयंचैवफलंतस्येतितेश्रुतिरिति॥ ॥यमोपि॥वेदविद्याव्रतस्नाताश्रोत्रियावेद
पारगाः॥स्वधर्मनिरताश्शांताःक्रियावंतस्तपस्विनः॥तेभ्योहव्यंचकव्यंचप्रपन्नेभ्यःप्रदीयतइति॥मनुरपि॥श्रोत्रियायैवदेया
निहव्यकव्यानिदातृभिः॥अर्हत्तमायविप्रायतस्मैदत्तंमहाफलं॥एकैकमपिविद्वांसंदैवेपित्र्येचभोजयेत्॥पुष्कलंफलमाप्नो
तिनामंत्रज्ञान्बहूनपि॥वसिष्ठोपि॥यतीन्गृहस्थान्साधून्वेति॥भोजयेदितिशेषः॥ब्रह्मांडपुराणे॥शिखिभ्योधातुरक्तेभ्य
स्त्रिदंडिभ्यश्चदापयेदिति॥शिखिनोब्रह्मचारिणः धातुरक्ताःधातुरक्तवस्त्रधारिणोवानप्रस्थः त्रिदंडिनोमनोवाक्काय
दंडैरुपेतायनयः॥अत्रपरस्परःश्रेष्ठः॥अतएवनारदः॥योवैयतीननादृत्यभोजयेदितरान्द्विजान्॥विजानन्वसतोग्रामे
कव्यंतद्यातिराक्षसानिति॥ब्रह्मांडपुराणेपि॥अलाभेमुनिभिक्षूणांभोजयेद्ब्रह्मचारिणं॥तदलाभेप्युदासीनंगृहस्थमपि
भोजयेदिति॥उदासीनोब्रह्मसंबंधः॥अतएवापस्तंबः ब्राह्मणान्भोजयेद्ब्रह्मविदो॥योनिगोत्रमंत्रांतेवास्यसंबंधानिति॥
योनिसंबंधाःमातुलादयः॥गोत्रसंबंधास्सपिंडाः॥मंत्रसंबंधाःवेदाध्यापकादयः॥अंतेवासिसंबंधाशिशिल्पशास्त्रोपा

ध्यायाः॥एवंविधसंबंधव्यतिरिक्तान्ब्राह्मणान् गृहस्थान् भोजयेदित्यर्थः॥श्राद्धेश्रोत्रियादीनांपङ्क्तिपावनत्वेनापिपात्र
विशेषतांस एवाह॥अपाङ्क्त्योपहताःपङ्क्तिःपाव्यतेयैर्द्विजोत्तमैः॥तान्निवोधतकार्त्स्न्येनद्विजाग्र्यान्पङ्क्तिपावनान्॥अग्र्या
स्सर्वेषुवेदेषुसर्वप्रवचनेषुच॥श्रोत्रियान्वयजाश्चैवविज्ञेयाःपङ्क्तिपावनाः॥त्रिनाचिकेतःपंचाग्निस्त्रिसुपर्णःषडंगवित्॥
ब्रह्मदेयानुसंतानश्छंदोगोज्येष्ठसामगः॥वेदार्थवित्प्रवक्ताचब्रह्मचारीसहस्रदः शतायुश्चैवविज्ञेयाब्राह्मणाःपङ्क्तिः
पावनाइति॥ब्रह्मदेयानुसंतानःब्राह्मविवाहोढापुत्रः॥सहस्रदःगवांसुपर्णस्यवा॥यमोपि॥येसोमपाविरजाजाधर्म
ज्ञाश्शांतबुद्धयः।यतिनोनियमस्थाश्चऋतुकालाभिगामिनः॥पंचाग्निरप्यधीयानोयजुर्वेदविदेवच॥बह्वृचश्चत्रि
सौपर्णस्त्रिमधुर्वाथयोभवेत्॥त्रिनाचिकेतोविरजाश्छंदोगोज्येष्ठसामगः॥अथर्वशिरसोध्येतासर्वेतेपंक्तिपावनाः॥
शिष्युरप्यग्निहोत्रीचन्यायविच्चषडंगवित्॥मंत्रब्राह्मणविच्चैवयश्चस्याद्धर्मवाचकः॥ब्रह्मदेयासुतश्चैवभावशुद्ध
स्सहस्रदः॥चांद्रायणव्रतचरःसत्यवादीपुराणवित्॥निष्णातस्सर्वविद्यासुशांतोविगतकल्मषः॥गुरुवेदाग्निपूजासुप्र
सक्तोज्ञानतत्परः॥विमुक्तस्सर्वथाधीरोब्रह्मभूतोद्विजोत्तमः॥अनमित्रोनचामित्रोमैत्रआत्मविदेवच॥स्नातकोजप्य
निरतःसदापुष्पबलिप्रियः।ऋजुर्मृदुःस्समीदांतश्शांतस्सत्यव्रतश्शुचिः।वेदज्ञःसर्वशास्त्रज्ञउपवासपरायणः।गृह
स्थोब्रह्मचारीचचतुर्वेदविदेवच॥वेदविद्याव्रतस्नाताब्राह्मणाःपङ्क्तिपावनाइति॥ ॥पैठीनसिरपि।अथातःपङ्क्तिपा

वनाभवंति॥ त्रिनाचिकेतस्त्रिमधुस्त्रिसुपर्णश्चीर्णव्रतश्छंदोगोज्येष्ठसामगोब्रह्मदेयानुसंतानस्सहस्रदोवेदाध्यायी।च
तुर्वेदषडंगविदथर्वशिरसोध्यायीपंचाग्निर्वेदजापीचेतितेषामेकैकः पुनातिपङ्क्तिं नियुक्तोमूर्धनिसहस्रेरप्युपहतामिति॥
॥ शंखोपि॥ ब्रह्मदेयानुसंतानोब्रह्मदेयाप्रदायकः॥ ब्रह्मदेयापतिश्चैवब्राह्मणाः पङ्क्तिपावनाः॥ यजुषांपारगोयश्चसाम्नां
यश्चापिपारग।अथर्वशिरसोध्येताब्राह्मणाः पङ्क्तिपावनाः॥ नित्यंयोगपरोविद्वान्समलोष्ठाश्मकांचनः॥ ध्यानशीलोयतिर्विद्वा
न्ब्राह्मणाः पंक्तिपावनाइति॥ बोधायनोपि॥ त्रिमधुस्त्रिनाचिकेतस्त्रिसुपर्णः पंचाग्निः षडंगवित्त्रिशीर्षकोज्येष्ठसामगः पङ्क्ति
पावनाइति॥ हारितोपि॥ स्थितिरविच्छिन्नवेदविदितायोनिसंकलितत्वमार्षेयत्वंचेतिकुलगुणः॥ वेदांगानिधर्माध्या
त्मवित्वंविज्ञानंस्मृतिश्चेतिषड्विधंश्रुतं॥ ब्रह्मण्यतादेवपितृभक्ततासमतासौम्यतापरोपतापितानसूयतामृदुतता
पौरुष्यमित्रता। प्रियवादिताकृतज्ञता॥ शरण्यता॥ प्रशांतिश्चेतित्रयोदशशीलं॥ ॥क्षमादमोदयादानमहिंसागुरुपू
जनं॥ शौचंस्नानंजपोहोमतपस्स्वाध्यायएवच॥ सत्यवचनंसंतोषोदृढव्रतत्वमुपव्रतत्वषोडशगुणंहिवृत्तं। तस्मा
त्कुलीनाश्रुतशीलवंतोवृत्तस्थास्सत्यवादिनोग्र्यंगाः पाङ्क्त्याः।द्वादशोभयतश्श्रोत्रियस्त्रिनाचिकेतस्त्रिसुपर्णस्त्रिम
धुस्त्रिशीर्षगोज्येष्ठसामगः।पंचाग्निःषडंगविद्ब्रह्मजाप्यूर्ध्वरेताऋतुकालगामीतत्वविच्चेतिपङ्क्तिपावनाभवंति॥ स्थि
तिरविच्छिन्नसंतानता॥ अविच्छिन्नवेदवेदितेत्यत्रहेषिरासादनार्थदेशविशेषवाचिावेदशब्दोहविस्साध्ययागं

लक्षयति आर्षेयत्वंप्रवरवत्त्र्यर्षिज्ञातत्वं ॥ धर्मोधर्मशास्त्रंविज्ञानंवैषयिकादिपरिज्ञानं ॥ स्मृतिर्वेदशास्त्राद्यविस्मरणं
उपव्रतत्वंदशम्यांद्वावेकभुक्तिनिष्ठाता ॥ अत्रानुकल्पोयाज्ञवल्क्येनदर्शितः ॥ स्वस्रीयऋत्विग्जामातायाज्यश्वशुरमातु
लाः ॥ त्रिनाचिकेतदौहित्रशिष्यसंबंधिबांधवाइति ॥ अतएवमनुः ॥ अनुकल्पस्त्वयंज्ञेयस्सदासद्भिरनुष्ठितः ॥ मातामहं
हंमातुलंचस्वस्रीयंश्वशुरंगुरुं ॥ दौहित्रंविट्पतिंबंधुमृत्विग्याज्यौचभोजयेदिति ॥ विट्पतिर्जामाता ॥ अतिथिर्वा ॥ तदु
क्तंदेवस्वामिना ॥ विट्पतिरतिथिरित्यनेनवदंतीति ॥ आपस्तंबोपि ॥ गुणवल्लाभेसोदर्योपिभोजयितव्यस्तेनांतेवासिनो
व्याख्याताइति ॥ बोधायनोपि ॥ तदभावेरहस्यविद्वचोयजूंषिसामानीतिश्राद्धस्यमहिमातस्मादेवंविधंसपिंडमप्या
शयेदिति ॥ विष्णुपुराणेपि ॥ पितृव्यगुरुदौहित्रानृत्विक्स्वस्रीयमातुलान् ॥ पूजयेद्धव्यकव्येनवृद्धानतिथिबांधवानि
ति ॥ अत्रऋत्विक्पितृव्यसोदर्यसपिंडाविश्वेदेवस्थानेनियोक्तव्याः नपित्रादिस्थानेतथाचात्रिः ॥ पितापितामहोभ्राता
पुत्रोवाथसपिंडकः ॥ नपरस्परमर्घ्याःस्युर्नश्राद्धेऋत्विजस्तथा ॥ ऋत्विक्पुत्रादयोप्येतेसकुल्याब्राह्मणाद्विजाः ॥ वै
श्वदेवेनियोक्तव्यायद्येतेगुणवत्तराइति ॥ शिष्यस्यविश्वेदेवस्थानएवनिवेशः ॥ सोदर्येविहितस्यार्थस्यएतेनांतेवा
सिनोव्याख्याताइत्यापस्तंबेनशिष्येतिदेशात् ॥ यत्तुमनुनाकल्पान्तरमुक्तं ॥ कामंश्राद्धेर्चयेन्मित्रंनाभिरूपमपिद्विषं ॥ द्विषता
हिहविर्भुक्तंभवतिप्रेत्यनिष्फलमिति ॥ तन्न ॥ साक्षादनुकल्पाभिप्रायेणकिंत्वनुकल्पानुकल्पाभिप्रायेणनश्राद्धेभोजये

न्मित्रमितिस्वेनैव निषिद्धस्य मित्रस्य कामममर्चयेदिति सानुशयमेवाभ्यनुज्ञानात्॥ वसिष्ठोप्यनुकल्पानुकल्पमाह। आनृ
शंस्यं परं धर्मो याचते यत्प्रदीयते॥ अयाचतः सीदमानान्सर्वोपायैर्निमंत्रयेदिति॥ आनृशंस्यमुत्कृष्टो धर्मस्तेनायाच
तः अयाचनशीलान्॥ अत एव सीदमानान्निर्गुणानपीति॥ सगुणानामनुकल्पानामलाभे सर्वोपायैर्यत्नात्ते निमंत्रणमं
गीकुर्वंति तादृशैरुपायैर्निमंत्रयेदिति॥ अयाचनशीलानामभावे याचमानाय निर्गुणायापि प्रदीयत इति॥ एतद्यनुकल्पो
भवतीत्यर्थः। संभवति मुख्यकल्पेनानुकल्पो नुष्ठेयः॥ तथाह मनुः॥ प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्तते। न सांपरा
यिकं तस्य दुर्मतेर्विद्यते फलमिति सांपरायिकमुत्तरकालीनं स्वर्गादिकं फलमिति भविष्यत्पुराणेपि॥ ब्राह्मणातिक्रमो नास्ति मूर्खे वे
दविवर्जिते। ज्वलंतमग्निमुत्सृज्य न हि भस्मनि हूयत इति वेदविवर्जित इति निर्गुणमात्रोपलक्षणार्थं॥ अत एवोक्तं तत्रैव व्यतिक्रां
तेर्न दोषोस्ति निर्गुणान्प्रति कर्हिचित्॥ यस्य त्वेकगृहे मूर्खो दूरस्थश्च गुणान्वितः। गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रम इ
ति॥ यत्तु पुराणान्तरेभिहितं। यस्त्वासन्नमतिक्रम्य ब्राह्मणं पतितादृते। दूरस्थं भोजयेन्मूढो गुणाढ्यं नरकं व्रजेत्। तस्मात्संपूजयेदे
नं गुणं तस्य न चिंतयेत्। केवलं चिंतयेज्जातिं न गुणान्विलतो खगसन्निकृष्टं द्विजं यस्तु युक्तजातिं प्रियंवदं॥ मूर्खं वा पंडितं वापि
वृत्तहीनमथापि वा। नातिक्रमेन्नरो विद्वान्दारिद्र्यामिह तं तत्येति। तद्दौहित्रजामात्रादिविषयं। अत एव मनुः। व्रतस्थमपि दौहित्रं श्राद्धे यत्ने
न भोजयेदिति। व्रतस्थं कवलं ब्रह्मदस्था मध्ययनादिरहितमित्यर्थः गुणवत्सन्निकृष्टातिक्रमे तु प्रत्यवायोस्ति। तथा च पुराणे। सम्यक्पूर्वं त्विमप

रान्गुरुषानात्मनासह॥अतिक्रम्यद्विजवरान्नरकेपातयेत्खग॥तस्मान्नातिक्रमेत्प्राज्ञोब्राह्मणान्प्रातिवेशिकान्॥संबंधिनस्तथासर्वान्दौहित्रंविट्पतिंतथा॥भागिनेयंविशेषेणतथाबंधुंखगाधिप॥नातिक्रमेन्नरस्त्वेतान्सुमूर्खानपिगोपते अतिक्रम्यमहारौद्रंरौरवंनरकंव्रजेदिति॥अपिरेवकारार्थः॥अमूर्खानेवातिक्रम्यनरकंव्रजेत्॥नमूर्खानित्यभिप्राय॥श्राद्धेवर्जनीयब्राह्मणाः याज्ञवल्क्येनदर्शिताः॥रोगीहीनातिरिक्तांगःकाणःपौनर्भवस्तथा॥अवकीर्णीकुंडगोलौकुनखीश्यावदंतकः॥भृतकाध्यापकःक्लीबःकन्यादूष्यभिशस्तकः॥मित्रध्रुक्पिशुनःसोमविक्रयीपरिविंदकः॥मातापितृगुरुत्यागीकुंडाशीवृषलात्मजः॥परपूर्वापतिस्तेनःकर्मदुष्टश्चनिंदितइति॥रोगीउन्मादादिरोगवान्॥उन्मादादिरोगाश्चदेवलेनदर्शिताः॥उन्मादस्त्वग्दोषोराजयक्ष्माश्वासोमधुमेहोभगंधरोश्मरीत्वष्टौपापरोगाइति॥हीनंन्यूनमधिकमति रिक्तंअंगंयस्यासौहीनातिरिक्तांगः॥एकेनाप्यक्ष्णायेनपश्यति॥असौकाणः॥तेनचबधिरमूकमूर्खादयोलक्ष्यंते॥द्विरूढापुनर्भूस्तस्यांजातःपौनर्भवः॥अवकीर्णीक्षतव्रतःकुनखीदुष्टनखःश्यावदंतकःस्वाभाविककृष्णदंतःवेतनंगृहीत्वायोध्यापयतिसभृतकाध्यापकः॥असतासतावादोषेणकन्यांदूषयिता॥कन्यादूषी॥महापातकोभिशस्तकः॥परिविंदकः॥परिवेत्ता॥कुंडस्यान्नंयोश्नातिसकुंडाशी॥कुंडशब्दोगोलकस्याप्युपलक्षकः॥विहितकर्मपरित्यागीवृषलःतत्सुतोवृषलात्मजः॥परपूर्वापतिः॥पुनर्भूपतिः॥अदत्तादायीस्तेनः॥॥

कर्मदुष्टाशास्त्रविरुद्धाचारोपेताः। एते श्राद्धे निंदिता वर्ज्या इत्यर्थः॥ मनुरपि॥ यस्तेन पतितक्लीबा ये च नास्तिक
वृत्तयः॥ तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्॥ जटिलं चानधीयानं दुर्वालं कितवं तथा॥ याजयंति च ये पूगान् तां
श्च श्राद्धे न भोजयेत्॥ चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा॥ विपणेन च जीवंतो वर्ज्याः स्युर्हव्यकव्ययो
योः॥ प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदंतकः॥ प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा॥ यक्ष्मी च पशुपालश्च
परिवेत्ता निराकृतिः॥ ब्रह्मद्विट्परिवित्तिश्च गणाभ्यन्तर एव च॥ कुशीलवोवकीर्णी च वृषलीपतिरेव च॥ पौनर्भव
श्च काणश्च यस्य चोपपतिर्गृहे॥ भृतकाध्यापको यश्च भृतकाध्यापितस्तथा॥ शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुंडगो
लकौ॥ अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा॥ ब्राह्मैर्यानैश्च संबंधैः संयोगं पतितैर्गतः॥ अगारदाही गरदः कुं
डाशी सोमविक्रयी॥ समुद्रयायी वंदी च तैलिकः कूटकारकः॥ पित्रा विवदमानश्च केकरो मद्यपस्तथा॥ केकरः तिर्य
क्दृष्टिः॥ पापरोग्यभिशस्तश्च दांभिको रसविक्रयी॥ धनुश्शराणां कर्ता च यश्चाग्रेदिधिषूपतिः॥ मित्रध्रुक् द्यूत
वृत्तिश्च पुत्राचार्यस्तथैव च॥ भ्रामरी गंडमाली च श्वित्र्यथो पिशुनस्तथा॥ उन्मत्तोंधश्च वर्ज्याः स्युर्वेदनिंदक एव च
॥ हस्तिगोश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति॥ पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च। स्रोतसां भेदकश्चैव तेषां चाव
रणे रतः। गृहसंवेशको दूतो वृक्षारोपक एव च। श्वक्रीडश्श्येनजीवी च कन्यादूषक एव च॥ हिंस्रो वृषलवृत्तिश्च गणा

नांश्चैव याजकः॥ आचारहीनः क्लीबश्च नित्यं याचनकस्तथा॥ कृषिजीवी शिल्पिजीवी सद्भिर्निंदित एव च। औरभ्रिको
माहिषिकः परपूर्वापतिस्तथा॥ प्रेतनिर्यातकश्चैव वर्जनीयाः प्रयत्नतः॥ एतान्विगर्हिताचारानपांक्तेयान्द्विजाध
मान्॥ द्विजातिप्रवरो विद्वानुभयत्रापि वर्जयेदिति॥ स्तेनोत्र ब्रह्मस्वव्यतिरिक्तद्रव्यापहारी विवक्षितः। तद्द्रव्या
पहारिणः पतितशब्देनोपात्तत्वात्॥ पारलौकिकफलदं कर्म नास्तीति मन्यमानाः नास्तिकाः। तेभ्यो वृत्तिर्जीवि
कायेषां ते नास्तिकवृत्तयः॥ जटिलो ब्रह्मचारी॥ अनधीयान इति जटिलविशेषणम तश्चानधीयानो ब्रह्मचारी
प्रतिपद्यते॥ न तु ब्रह्मचारिमात्रं॥ तस्य श्राद्धे पंचाग्निब्रह्मचारिण इति पात्रत्वविधानात्॥ न चाध्ययनं हि तस्य ब्रह्म
चारिणः॥ श्रोत्रियत्वेन श्राद्धे प्रसक्त्यभावात्॥ प्रतिषेधोनुपपन्न इति मंतव्यं॥ व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन न
भोजयेदित्यत्र व्रतस्थमपि दौहित्रग्रहणमविवक्षितमिति भ्रांत्याध्ययनरहितोपि ब्रह्मचारी श्राद्धे भोजनीय
तया प्रसक्तः प्रतिषिध्यत इति॥ दुर्वालः खल्वाटकः। कपिलकेशो वा। तदुक्तं संग्रहकारेण। खल्वाटकश्च दुर्वा
लः कपिलश्चंड एव चेति॥ कितवो द्यूतासक्तः पूगयाजकाः गणयाजकाः। श्राद्ध इति विशेषोपादानात्॥ दुर्वाला
दीनां श्राद्ध एव वर्ज्यत्वं न दैव इत्यवगम्यते॥ अन्यथा प्रकरणादेवोभयत्र निषेधावगमाद्विशेषोपादानमनर्थ
कं स्यात्॥ अत एव गौतमः। हविस्सु चैवं दुर्वालादीन् श्राद्ध एवेक इति॥ हविस्सु च दैवेप्येवं पित्र्यवत्परीक्ष्य

दुर्वालादीन्वर्जयेत्॥एकेमन्वादयःश्राद्धएवनान्नभोजयेद्दैवेतुभोजयेदित्याहुरित्यभिप्रायः॥चिकित्सकाः।जीवनार्थमदृष्टार्थे
च भेषजकारिणः।श्रु।तस्माद्ब्राह्मणेनभेषजंनकार्यमपूतोह्येषोमेध्योयोभिषगित्यविशेषेणैवनिंदार्थवाददर्शनात्॥धना
र्थंसंवत्सरत्रयं।देवार्चकोदेवलः।तदुक्तंदेवलेन।देवार्चनपरोनित्यंवित्तार्थीवत्सरत्रयं।असौदेवलकोनामहव्यकव्येषुगर्हितः॥
अपाङ्क्त्यःस्यात्सर्वकर्मसुसर्वथेति।आपद्यपिमांसविक्रयिणः अनापदिविपणजीवित्वेनैवनिषेधसिद्धेः मांसविक्रयिण
इति॥पुनर्विशेषापादानस्यवैयर्थ्यात्॥अनापदिवाणिज्यंनजीवंतोविपणिजीविनः॥नत्वापद्यपि॥अत्रापि
क्षात्रेणकर्मणाजीवेद्विशांवाप्यापदिद्विजइति॥वाणिज्यस्याप्यनुकल्पतयाविहितत्वात्॥विहितस्यागकार
णंविनाश्रौतस्मार्ताग्निपरित्यागीपरित्यक्ताग्निः॥अल्पवृध्याधनंस्वीकृत्यअधिकवृध्याधनप्रयोजकोवार्धुषिकः
॥तथाचस्मृतिः।समार्घंधनमुद्धृत्यमहार्घंयःप्रयच्छति।सवैवार्धुषिकोनामब्रह्मवादिषुगर्हितइति॥यक्ष्मीक्षय
रोगी।अनापदिपशुपालः।अविवाहितेज्येष्ठेअनाहिताग्नौवासतियःकनीयान्कृतदारपरिग्रहः॥आहिता
ग्निर्वाभवेत्।सपरिवेत्ता॥तज्ज्येष्ठस्तुपरिवित्तिः।तथाचमनुः॥दाराग्निहोत्रसंयोगंकुरुतेयोग्रजेस्थिते॥इत्यादि
विज्ञानेश्वरीयेआचारकांडे॥विज्ञानेश्वरीयेपि॥अग्र्याःसर्वेषुवेदेषुश्रोत्रियोब्रह्मविद्युवा।वेदार्थविज्ज्येष्ठसामा
त्रिमधुस्त्रिसुपर्णिकः॥२२०॥अस्यव्याख्यानं॥अहरहःश्राद्धव्यतिरिक्तवक्ष्यमाणचतुर्विधश्राद्धेषुब्राह्मणसं

पङ्क्तिमाह। अग्र्या इति। सर्वेषु वेदेषु ऋग्वेदादिषु अनन्यमनस्कतया॥ अस्खलिताध्ययनक्षमाः अग्र्याः श्रोत्रियः श्रुताध्ययनसंपन्नः। वक्ष्यमाणं ब्रह्म यो वेत्त्यसौ ब्रह्मवित्॥ युवा मध्यमवयस्कः॥ सर्वस्येदं विशेषणं मंत्रब्राह्मणयोरर्थं वेत्तीति वेदार्थवित्॥ ज्येष्ठसामेति सामविशेषः तदध्ययनाङ्गं व्रतं च तद्व्रताचरणेन यस्तदधीते स ज्येष्ठसामा॥ त्रिमधुः ऋग्वेदैकदेशः तद्व्रतं च तद्व्रताचरणेन यस्तदधीते न त्रिमधुः त्रिसुपर्ण ऋग्यजुषोरेकदेशः तद्व्रतं च तदाचरणेन तदध्यायी त्रिसुपर्णिकः एते ब्राह्मणाः श्राद्धसंपद इति वक्ष्यमाणक्रियासंबंधः॥ २२०॥ मू०॥ स्वस्त्रीयऋत्विग्जामातृयाज्यश्वशुरमातुलाः। त्रिणाचिकेतदौहित्रशिष्यसंबंधिबांधवाः॥ २२१॥ अस्य व्याख्यानं। स्वस्त्रीय इति॥ स्वस्त्रीयो भागिनेयः। ऋत्विगुक्तलक्षणः॥ जामाता दुहितृभर्त्ता त्रिणाचिकेतं यजुर्वेदैकदेशस्तद्व्रतं च तद्व्रताचरणेन यस्तदध्यायी स त्रिणाचिकेतः। अन्यत्प्रसिद्धं एते च पूर्वोक्ता अग्र्याः॥ श्रोत्रियाद्यभावे वेदितव्याः। श्लोक॥ एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः॥ अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरगर्हित इत्यभिधाय मनुना स्वस्त्रियादीनामभिहितत्वात्॥ २२१॥ मू०॥ कर्मनिष्ठास्तपोनिष्ठाः पंचाग्निर्ब्रह्मचारिणः॥ पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसंपदः॥ २२२॥ अस्य व्याख्यानं॥ कर्मनिष्ठा इति॥ कर्मनिष्ठाः विहितानुष्ठानतत्पराः॥ तपोनिष्ठास्तपश्शीलाः सभ्यावसथ्यौ त्रेताग्नयश्च यस्य संति स पंचाग्निः॥ पंचाग्निविद्याध्यायी वा॥ ब्रह्मचारी उपकुर्वाणको नैष्ठिकश्च पितृमातृपराः॥ पूजापराः॥ चकाराज्ज्ञाननिष्ठादयः ब्राह्मणाः॥ नक्षत्रियादयः॥

श्राद्धसंपदेश्राद्धेष्वक्षयफलसंपत्तिहेतवः॥२२२॥ मू०॥रोगीहीनातिरिक्तांगः काणःपौनर्भवस्तथा॥अवकीर्णीकुंडगो
लौकुनखीश्यावदंतकः॥२२३॥अस्यव्याख्यानं॥वर्ज्यानाह॥रोगीति॥महारोगोपसृष्टः हीनमतिरिक्तं वांगंयस्यासौ
हीनातिरिक्तांगः।एकेनअक्ष्णायेनपश्यतिसकाणः॥एतस्मादेवांधबधिरविद्धप्रजननखल्वाटदुश्चर्मप्रभृतयोनिरस्ताः
॥पुनर्भूरुक्तलक्षणातस्यांजातः पौनर्भवः॥ अवकीर्णीब्रह्मचार्येवास्खलितब्रह्मचर्यः॥कुंडगोलौ॥परदारेषुजायेते
द्वौसुतौकुंडगोलकौ॥पत्यौजीवतिकुंडस्तुमृतेभर्तरिगोलकइत्येवमुक्तलक्षणौ॥कुनखीसंकुचितनखः। श्यावदंतः
स्वभावात्कृष्णदशनः॥एतेश्राद्धेनिंदिताइतिवक्ष्यमाणेनसंबंधः॥२२३॥ मू०॥ भृतकाध्यापकः क्लीबः कन्यादूष्यभि
शस्तकः॥मित्रध्रुक्पिशुनस्सोमविक्रयीपरिविंदकः॥२२४॥अस्यव्याख्यानं॥ भृतकेतिवेतनग्रहणेनयोध्यापयति॥
सभृतकाध्यापकः॥वेतनदानेनयोधीतेसोपि॥ क्लीबः नपुंसकः॥असद्भिस्सद्भिर्वादोषैर्यः कन्यांदूषयति सकन्यादूषी
सताअसतावाब्रह्महत्यादिनाभियुक्तोभिशस्तकः॥ मित्रध्रुक् मित्रद्रोहीपरदोषसंकीर्तनशीलः।पिशुनःसोमविक्रयी
यज्ञेसोमस्यविक्रेता॥परिविंदकः॥परिवेत्ताज्येष्ठे अकृतदारे अकृताग्निपरिग्रहे वायः कनीयान्दारपरिग्रहमग्निपरिग्र
हंवाकुर्यात्सपरिवेत्ता॥ज्येष्ठस्तुपरिवित्तिः॥ यथाहमनुः॥दाराग्निहोत्रसंयोगंयः करोत्यग्रजेस्थिते॥परिवेत्तासविज्ञे
यः परिवित्तिस्तुपूर्वजइति॥एवंदातृयाजकावपि॥परिवित्तिः परिवेत्ताययाचपरिणीयते॥सर्वेतेनरकंयांतिदातृयाजक

पंचमाइतिस्मरणात्॥२२५॥ मू॰॥ मातापितृगुरुत्यागी कुंडाशीवृषलात्मजः॥ परपूर्वापतिस्तेनः कर्मदुष्टाश्चनिंदिताः॥
॥२२६॥ अस्यव्याख्यानं॥ मातेति॥ विनाकारणेनमातापितृगुरून् यस्त्यजति॥ समातापितृगुरुत्यागी। एवंभार्यासुतत्या
ग्यपि॥ श्लो॰॥ वृद्धौचमातापितरौसाध्वीभार्यासुतशिशुः॥ अप्यकार्यशतंकृत्वाभर्तव्यामनुरब्रवीत् इति॥ समाननि
र्देशात्॥ कुंडस्यान्नंयोश्नात्यसौकुंडाशी। एवंगोळकस्यापि॥ श्लो॰॥ यस्तयोरन्नमश्नातिसकुंडाशीप्रकीर्तितइतिवच
नात् वृषलोनिर्धर्मस्तत्सुतोवृषलात्मजः॥ परपूर्वापुनर्भूः तस्याःपतिः॥ परद्रव्यापहारीस्तेनः॥ कर्मदुष्टाःशास्त्रवि
रुद्धकारिणः॥ चकारात्कितवोदेवलकप्रभृतयः एतेश्राद्धेनिंदिताः॥ अग्न्याःसर्वेषुवेदेष्वित्यादिनाश्राद्धयोग्यब्रा
ह्मणप्रतिपादनेनैवतद्व्यतिरिक्तानामयोग्यत्वेसिद्धे॥ पुनःकेषांचिद्रोग्यादीनांप्रतिषेधवचनमुक्तलक्षणब्राह्मणासंभ
वेप्रतिषेधरहितानांग्राह्यत्वार्थं॥२२५॥ एवंधर्मवृत्तावपि॥ तथाचधर्मप्रवृत्तिः॥ भ्रातरौपितृपुत्रौचतथाश्रोत्रियमेवच॥ द्वि
जमप्यनधीतारंश्राद्धेयत्नेनवर्जयेत्॥ भ्रातरौपितृपुत्रौतुनैकवर्गेनिमंत्रयेत्॥ पृथग्वर्गेथवादैवेचेत्तावपिनियोजयेत्॥
ब्राह्मणान्वेदसंपन्नान्पितृभ्रातृसुतावपि॥ निमंत्रयेत्पृथग्वर्गेनविप्रान्वेदवर्जितान्॥ एवंनिर्णयसिंधावपि॥ ॥ ॥
अथविप्राः॥ तेचोत्तममध्यमाधमभेदेनत्रिविधाः॥ तत्राद्याः॥ अत्रमदीया श्लोकाः॥ ॥ त्रिणाचिकेतस्त्रिमधु
श्चबह्वृचोप्यथर्वणोयाजुषसामगोच॥ ॥ षडंगविच्चत्रिसुपर्णवेत्ताद्यथर्वशीर्षाध्ययनेरतश्च॥ ॥

शता यजुर्वेदार्थविदौ प्रवक्तास्याद्ब्रह्मचारी च तथाग्निविच्च ॥ ॥ सीद इति: सत्यवाक्पूरुषै: स्वैर्मातापित्रो: पं
चभि: ख्यातवंश:॥ पत्नीयुक्तोज्येष्ठसामा पुराणवेत्ता पुत्री चेतिहासेष्वभिज्ञ: योगी भिक्षुस्सामगो ब्रह्मवेत्ता पं
चाग्निश्च श्रोत्रियस्तत्सुतो वा शंभुध्यायी श्रीशपादाब्जसेवी पांथश्चैते तूत्तमा:। संप्रदिष्टा:। भिक्षुर्योगी पांथस्एते ल
लभ्या भाग्याल्लक्ष्याश्चेत्तदा भोजनीया:॥ आस्येविप्रेषूपविष्टेषु पश्चात्संप्राप्ताश्चेद्द्विप्रपङ्क्तौ तु भोज्या:॥ ॥ अत्र मूलं हे
माद्रौ ज्ञेयं॥ ॥ तत्रैव नारद:॥ ॥ यो वै यतीननादृत्य भोजयेदितरान् द्विजान् विजानन्वसतो ग्राममेकव्यंतद्या
तिरासंसान्॥ ॥ दीपकलिकायां दक्ष:॥ ॥ विनामांसेन मधुना विना दक्षिणयाशिषा। परिपूर्णभवेच्छ्राद्धं य
तिषु श्राद्धभोजिषु॥ ॥ एतच्चज्ञानिविषयं॥ ॥ त्रिणाचिकेतस्त्रिसुपर्णेयजुर्वेदैकदेशास्तद्व्रतेन तदध्यायिनो
यस्ससप्तपूर्वे सोमपा: सत्रिसुपर्ण इति भोपदेव:॥ ॥ त्रिमधुर्ऋग्वेदैकदेश: तदध्यायी के चिन्नाचिकेतं च यन्ने
त्रि: कृतवानित्यर्थमाहु:। हेमाद्रौ गौतम:॥ शुचिभ्योदानं प्रथमं पितृभ्यस्तद्वै लोके॥ मात्स्ये मनु:॥ ॥ पञ्चाग्नाकुरु
तेवाचस्यचर्मी मांसत्तेध्वरं॥ सामस्वरविधिज्ञश्च पङ्क्तिपावनपावन:॥ ॥ कौर्मे॥ ॥ असमानप्रवरको ह्यस

त्रस्तथैवच॥ असंबंधीचविज्ञेयाब्राह्मणाः श्राद्धसिद्धये॥ ॥ गारुडे॥ श्राद्धेषुविनियोज्यास्तेब्राह्मणाब्रह्मवित्तमाः। येयोनिगोत्रमंत्रांतेवासिसंबंधवर्जिताः॥ ॥ मनुः॥ नमित्रंभोजयेच्छ्राद्धेधनैः कार्योस्यसंग्रहः॥ नारिंनमित्रंयंविद्यात्तंतुश्राद्धेनिमंत्रयेत्॥ ॥ द्वयोर्भ्रात्रोः श्राद्धेभोजनंनिषिद्धं॥ पितृपुत्रौभ्रातरौद्वौनिरग्निंगुर्विणीपतिं। सगोत्रप्रवरंचैवश्राद्धेषुपरिवर्जयेदिति॥ ॥ श्राद्धदीपकलिकायांजातूकर्ण्योक्तेः॥ अथमध्यमाः॥ हेमाद्रौकौर्मेगार्ग्यः॥ नैकगोत्रेहविर्दद्याद्यथाकन्यातथाहविः। अभावेह्यन्यगोत्राणामेकगोत्रांस्तुभोजयेदिति॥ ॥ अत्रकेचित्स्वशाखीयानमुख्यानाहुः पठंतिच। निमंत्रयीतपूर्वेद्युः स्वशाखीयान्द्विजोत्तमान्स्वशाखीयद्विजाभावेद्विजानन्यान्निमंत्रयेदिति॥ ॥ इदंतुनिर्मूलित्वात्हेमाद्रिणादूषितत्वाच्चोपेक्ष्यं॥ ॥ मनुरपि॥ ॥ यत्नेनभोजयेच्छ्राद्धेब्राह्मणंवेदपारगं। शाखांतगमथाध्वर्युंछंदोगंतुसमाप्तिकं॥ एषामन्यतमोयस्यभुंजीतश्राद्धमर्चितः। पितॄणांतस्यतृप्तिस्याच्छाश्वतीसाप्तपौरुषी॥ ॥ अत्रमामकाश्लोकाः॥ मातामहोमातुलभागिनेयदौहित्रजामातृ

गुरुस्वशिष्याः॥ ऋत्विक्क्याज्यश्वशुरौस्वबंधुः श्यालागुणाढ्यास्त्वनुकल्पभूताः॥ बांधवोमातृष्वसृपितृष्वसृमातुल

पुत्रादिति भोपदेवः॥ ॥अत्र मूलं हेमाद्रौ ज्ञेयं॥ ॥सगुणस्वस्त्रीयाद्यतिक्रमे दोष एव॥ सप्त पूर्वान् सप्त परान्
पुरुषानात्मना सह॥ अतिक्रम्य द्विजानेतान्नरके पातयेत्त्वग॥ संबंधिनस्तथा सर्वान् दौहित्रं विट्पतिं तथा॥
॥भागिनेयं विशेषेण तथा बंधूनृत्खगाधिपेति॥ मदनरत्ने भविष्योक्तेः॥ अत एव याज्ञवल्क्यो ब्राह्मणप्रातिवेश्याना
मेतदेवानिमंत्रणमिति॥ ॥गुण इति गुणवत्यतिक्रमे दशपणं दंडमाह॥ आसन्नमात्रपरमिदं। मूर्खे तु न दोषः॥ ॥
ब्राह्मणातिक्रमो नास्ति मूर्खे वेदविवर्जिते॥ ज्वलंतमग्निमुत्सृज्य न हि भस्मनि हूयते॥ ॥इति कात्यायनोक्तेः॥ वि
प्रस्यापि दोषः॥ ॥अविद्वान् प्रतिगृह्णानो भस्मीभवति दारुवदिति॥ मनूक्तेः॥ ॥अपरार्के अत्रिः॥ ॥षड्भ्यस्तु
पुरुषेभ्योर्वाग्गश्राध्येयास्तु गोत्रिणः। षड्भ्यस्तु परतो भोज्याः श्राध्ये सुगोत्रजा अपि॥ ॥एतच्च ब्राह्मणालाभे अपिशब्दा
त् असंभवे हेमाद्रौ गोतमः॥ ॥श्लोकाः॥ शिष्यांश्चैके सगोत्रांश्च भोजयेदूर्ध्वं त्रिभ्यो गुणावतः॥ ॥आपस्तंबः॥ ब्रह्म
विदो ब्राह्मणान् भोजयेद्योनिगोत्रमंत्रांतेवास्यसंबंधान् गुणहान्यां तु परेषां समुदितः सोदर्योपि भोजयितव्यः। एतेनांते
वासिनो व्याख्याता इति॥ ॥अत्र विशेषमाहात्रिः॥ ॥पिता पितामहो भ्राता पुत्रो वाथ सपिंडकः। न परस्परमर्घ्यास्यु

र्नष्टाध्येकृलिजस्तथा॥कृत्विक्पुत्रादयोप्येते सकुल्याब्राह्मणाः स्मृताः॥वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः। स
गोत्रा न नियोक्तव्याः स्त्रियश्चैव विशेषतइति॥ ॥अथवर्ज्याः॥ ॥अत्रमामकाः॥ ॥श्लोकाः॥ ॥वर्जान्प्रव
क्ष्येह्यथ रोगि वैरी हीनाधिकांगान् कितवान्कृतघ्नान् नक्षत्रशास्त्रेण चजीवमानान्भैषज्यवृत्तापि चराजभृत्यान्॥ सं
गीतकायस्थकुसीदवृत्त्यावेदत्रये पापिकवित्तवृत्त्या। देवार्चनेनापि चजीवमाना स्वाध्यायदाराग्निसुतोज्झकाः
णान्॥ ॥दुर्बालखल्वाटकुनख्यधर्मान्नटांश्चपौनर्भवकृष्णदंतान्। अगारदाही गरदः समुद्रयायी च।कुंडाश्वध
कूटकारी। बालांश्चयोध्यापयते स्वपुत्राद्वाप्तविद्यस्तधकुंडगोलौ। अग्रेदिधिषुः पतिरस्यकर्ता सोमक्रयी तैलिक
के कराख्यौ। गुरुत्याचार्यः। पक्षिणांपोषकश्चस्तोतो भेत्ता वृक्षसंरोपकश्चामेषाणां वामाहिषाणां च पुष्ट्या स्त्री यस्त्री षुप्रहि
तैर्यश्चजारैः। जीवत्सध्येतुश्चदत्तानुयोगाद्रूम्यशास्त्रैर्वेदमुद्घाटयंतः ग्रामयाजी पशुकेशविक्रयी स्तेनः शिल्पीपित
वादकारकान्। अर्थकामरतः शूद्रयाजकश्चम्यहीनजटिमुंडिनिर्घृणान्। यस्यचैव गृहिणीरजस्वला स्वार्थपाककृत
शापदापिकान् क्लीबकुष्ठ्यति विलोहितेक्षणान् कुब्जवामनमृगाभिशापिनः पुत्रहीनमथकूटसाक्षिणं। प्राति

हारिकमयाज्ययाजकं स्वात्मदात् परिवेत्तजाग्रकस्तेनहिंसकमुखान्विवर्जयेत्॥ ॥अत्रमूलंहेमाद्रौ॥ ए
श्चीचंद्रोदयेचज्ञेयंभारते॥ ॥दानधर्मेषुश्राद्धवर्जविप्राधिकारे।कितवोभ्रूणहायक्ष्मीपशुपालोनिराकृतिः
।ग्राम्यप्रेष्योवार्धुषिकोगायकःसर्वविक्रयीसामुद्रिकाग्निराजभृत्यांस्तैलिकःकूटकारकः।पित्राविवदमानश्चय
स्यचोपपतिर्गृहे॥अभिशस्तस्तथास्तेनः।शिल्पंयश्चोपजीवति।पर्वकारश्चसूचीचमित्रध्रक्पारदारिकः।अव्रता
नामुपाध्यायःकांडपृष्ठस्तथैवच॥श्वभिश्चयःपरिक्रामेद्यःशुनादष्टएवच॥परिवित्तिस्तथास्तेनोदुश्चर्मागुरुतल्प
गः।कुशीलकोदेवलकोनक्षत्रैर्यश्चजीवति।ईदृशाब्राह्मणाज्ञेयाअपांक्तेयायुधिष्ठिर।कृणकर्ताचयोराजन्।यश्च
वार्धुषिकोनरः॥कांडपृष्ठःस्वशाखांयस्त्यक्तापरशाखयोपनीतःतदध्यायीच॥क्षत्रियवैश्यवृत्तो॥ ॥नारदस्तु ॥ ॥
तस्यामेवतुयोवृत्तोब्राह्मण्योवसतेरसान्।कांडपृष्ठश्रुतोमार्गात्सोपांक्तेयःप्रकीर्तितइत्याह॥हारीतः॥शूद्रापु
त्राःस्वयंदत्तायेचैतेक्रियकाःसुताः।तेसर्वेमनुनाप्रोक्ताःकांडपृष्ठानसंशयः॥ ॥अन्येपि॥ ॥हेमाद्रौमात्स्ये
॥ ॥त्रिशंकून्बर्बरानांध्रान्चीनद्राविडकोंकणान्।कर्नाटकांस्तथाभीरान्कालिंगांश्चविवर्जयेत्॥ ॥तत्रैवसौ

रपुराणे॥ ॥अंगवंगकलिंगांश्च सौराष्ट्रान् गुर्जरांस्तथा आभीरान् कोंकणांश्चैव द्राविडान् दाक्षिणापथान्। आवंत्यान् मागधांश्चैव ब्राम्हणांस्तु विवर्जयेत्॥ चंद्रिकायां यमः॥ काणाः कुब्जाश्च षंढाश्च रुतघ्ना गुरुतल्पगाः॥ मानकूटास्तुलाकूटाः शिल्पिनो ग्रामयाजकाः। राजभृत्यांधबधिरमूककखल्वाटपंगवः। वणिजो मधुहर्तारो रोगदा वनदाहकाः तथा। समयानां च भेत्तारः प्रदाने ये निवारकाः। प्रव्रज्योपनिवृत्ताश्च तथा प्रव्रजिताश्च ये॥ यश्च प्राव्रजिताज्जातः प्रव्रज्यावसितश्च यः। अपकीर्णी च वीरघ्नो गुरुघ्नः पितृदूषकः॥ ॥श्राद्धकाशिकायां कात्यायनः॥ ॥द्विर्नग्नकीलदुश्चर्माशुक्लो तिकपिलस्तथा॥ छिन्नोष्ठश्छिन्नलिंगश्च नैव केतनमर्हति॥ ॥द्विर्नग्नः॥ ॥पित्रोर्वंशे त्रिपुरुषं विछिन्नवेदाग्निः॥ ॥हेमाद्रौ मरीचिः॥ ॥अविद्धकर्णः कृष्णाश्च लंबकर्णस्तथैव च॥ वर्जनीयाः प्रयत्नेन ब्राह्मणाः श्राद्धकर्मणि॥ ॥ब्राह्मे॥ ॥मूकश्च पूतिनासश्च भिन्नांगश्चाधिकांगुलिः। गलरोगी च गडुमान् स्फुटतांगकुसज्वरः॥ षंढस्तूवरमंदाश्च श्राद्धे ये ते तान्विवर्जयेत्॥ ॥लंबकर्णं चाह तत्रैव गोभिलः॥ ॥हनुमूलादधः कर्णौ लंबौ तु परिकीर्तितौ। व्यंगुलौ त्र्यंगुलौ शस्ताविति शातातपोऽब्रवीत्॥ ॥चंद्रिकायां यमः॥ ॥द्व्यंगुलातीतकर्णौ

स्यभुंजते यितरो न तु। षंडश्चात्र चंद्रिकोक्तः॥ सप्तविधो ग्राह्यः॥ यथा षंडको वातजः षंडः पंडः क्लीबो नपुंसकः क्लीलकश्चेति सप्तैव क्लीबभेदाः प्रकीर्तिताः॥ ॥ पराशरमाधवीये तु चतुर्दश उक्तः॥ ॥ तेषां स्वरूपाणि तत्रैव ज्ञेयानि॥ ॥ चंद्रिकायां शातातपः॥ ॥ अग्निष्टोमादिभिर्यज्ञैर्येयजंत्यल्पदक्षिणैः॥ ते षासवं न भोक्तव्यमपांक्त्यास्ते प्रकीर्तिताः॥ ॥ एतच्च शक्तौ सत्यां॥ ॥ अपरार्के भारते॥ ॥ अप्रतीकितदः स्तेनः प्राणिविक्रयकोपि वा। पश्चाद्वेत्सी तवान्सोमं सोपि केतनमर्हति॥ ॥ श्राद्धदीपकलिकायां यमः॥ ॥ अपत्नीकश्च वर्ज्यः स्यात्सपत्नीकोप्यनग्निकः॥ ॥ तत्रैवाश्वलायनः॥ ॥ प्रतिमाविक्रयं यो वै करोति पतितस्तु सः। जीवनार्थं परान्स्त्रीनिधत्ता तीर्थं प्रयाति यः। मातापित्रोर्विना सोपि पतितः परिकीर्तितः॥ ॥ तत्रैव चातूकर्ण्यः॥ यत्र मातुलजोद्वाहो यत्र वा वृषलीपतिः। श्राद्धं न गच्छेत्तद्विप्रः कृतं यच्च निरामिषं॥ पितृपुत्रौ भ्रातरौ द्वौ निरग्निं गुर्विणीपतिं। सगोत्रप्रवरं चैव श्राद्धेषु परिवर्जयेत्॥ ॥ ब्रह्मनारदीये॥ ॥ शंखं चक्रं मृदा यस्तु कुर्यात्तच्छ्राद्धसेवना। स भूद्रवद्बहिः कार्यः सर्वस्माद्द्विजकर्मणः॥ ॥ शंखचक्राद्यंकनं च गीतनृत्यादिकं तथा॥ एकजातेरयं धर्मो नत्वेतुस्याद्द्विजन्म

नः॥ तेनयेतप्तमुद्रादिविधयस्तेभ्यः दूरविषयाइतिपृथ्वीचंद्रोदयेच॥शिवकेशवयोरंकान्शूलचक्रादिकान्द्वि
जः। नधारयेतमतिमान्वैदिकेवर्त्मनिस्थितः इत्याश्वलायनोक्तेश्च॥ ॥ नृत्यंचोदराद्यर्थंनिषिद्धमितिश्री
धरस्वामीअन्येपिनिषेधानिबंधेषुज्ञेयाइतिदिक्। अत्रविप्राणांग्राह्यत्वोक्तेरेवतद्वर्जानांनिषेधेसिद्धेपुनर्वर्ज्य
परिगणनंनिषिद्धवर्जनिर्गुणप्राशस्त्यार्थमिति॥ ॥विज्ञानेश्वरः॥ ॥कुष्ठिकाणादेरपवादोहेमाद्रौवसिष्ठः॥ ॥अ
पिचेन्मंत्रविद्युक्तः शारीरैःपंक्तिदूषणैः॥ ॥अदूष्यंतंयमःप्राहपंक्तिपावनएवसः॥ ॥क्वचिद्विप्राणांजातिमा
त्रेणग्राह्यत्वमुक्तं॥ ॥चंद्रिकायामाग्नेये॥यदिपुत्रोगयांगच्छेत्कदाचित्कालपर्ययात्।तानेवभोजयेद्विप्रान्
न्ब्राम्हणायेप्रकल्पिताः॥ ॥ब्रह्मणाकृतसंस्थानाविप्राब्रम्हसमाःस्मृताः॥ ॥अमानुषागयाविप्राब्राम्हणा
येप्रकल्पिताः॥ ॥तेषुतुष्टेषुसंतुष्टाःपितृभिःसहदेवताः॥ ॥तत्रैव॥ ॥नविचार्यंकुलंशीलंविद्याचतपए
वच।पूजितैस्तैस्तुसंतुष्टादेवाःसपितृगुह्यकाः॥ ॥गयायांनिर्गुणाअपितएवभोज्याइतिहेमाद्रौ॥ ॥अक्षय्य
वटश्राद्धएवतन्नियमोनान्यत्रेतित्रिस्थलीसेतौपितामहचरणाः॥ ॥पृथ्वीचंद्रोदयेपिपाठे॥तीर्थेषुब्राम्हणंनै

वपरिक्षेतकदाचन। अन्नार्थिनमनुप्राप्तंभोज्यंतंमनुरब्रवीत्॥ ॥स्कांदेपि॥ ब्राम्हणान्नपरिक्षेततीर्थेक्षेत्रनि
वासिनः॥ ॥मनुः॥ ॥नब्राम्हणंपरिक्षेतदैवेकर्मणिधर्मवित्। पित्र्येकर्मणितुप्राप्तेपरीक्षेतप्रयत्नतः॥ ॥असं
भवपरमेतदितिमेधातिथिः॥ ॥हेमाद्रौव्यासः॥ ॥गायत्रीसारमात्रोपिवरंविप्रःसुयंत्रितः॥ ॥नायंत्रितश्चतुर्वे
दीसर्वाशीसर्वविक्रयी॥ ॥काणाकूटाश्चकुब्जाश्चदरिद्रव्याधितास्तथा। सर्वेश्राद्धेनियोक्तव्यामिश्रितावेदपरगैः
॥ ॥अथविप्रनिमंत्रणं॥ ॥एवमेवनरसिंहप्रयोगपारिजातहेमाद्रिवैद्यनाथीयस्मार्तप्रदीपिकादिसर्वग्रंथे
ष्वपि॥ एकरूपतयाप्रतिपाद्यमानत्वात् वाजसनेयिब्राह्मणानां यत्रकुत्रापिश्राद्धनिमंत्रणेवाहव्यकव्यदानादि
षुवामहादानादिषुवाभोजनप्रतिभोजनेषुवाअध्ययनाध्यापनादिषुवायजनयाजनादिषुवानिषेधः यत्रकुत्रा
पिप्रामाणिकग्रंथेषुनलभ्यते॥ ॥नश्रूयतेच॥ ॥प्रस्तुत॥ श्राद्धनिमंत्रणप्रस्तावेक्वचित्क्वचित् पंङ्क्तिपावनको
टौप्रविष्टत्वेनस्मृत्यादिषुप्रतिपाद्यते॥ ॥तदपिउत्तरत्रअस्माभिःवक्ष्यते। एवंस्थितेसर्वेषांब्राह्मणानांसमानत
याएकरूपत्वेनभारतभागवतविष्णुपुराणसूत्रस्मृतिभाष्यव्याख्यानमहानिबंधनादिसर्वप्रामाणिकग्रंथेष्वपिउ

प्र० श्रा०
५
४०९

दुष्यमाणेपिकेचित्। मूढाः शास्त्रानभिज्ञाः। जन्मांतरकृतपापकर्मप्रेरिताः। उत्तरस्मिन्जन्मन्यपिपापयोनिंप्राप्तु
मुद्युक्ताः। ब्रम्हविद्ब्रम्हैवभवतीतिश्रुत्यर्थंअननुसरंतः। ब्रम्हविच्छिखामणिंश्रुतिप्रतिपाद्यंशंकराचार्यवार्त्तिकका
रविद्यारण्यादिभिः महागुरुत्वेनपूज्यमानंयाज्ञवल्क्यंतच्छिष्यान्काण्वकात्यायनादीन्दूषित्वाकेचित्स्वदेशस्थ
अत्यंतप्राकृतमूढजनप्रवादाद्याचारादीन्अनुसरंतः॥ अन्यानपि। स्वनियम्यान्मूढतमान्स्वाचारेषुनियोजयंतः
स्वयंनष्टः परान्नाशयतीतिन्यायमनुसरंतः। यत्रकुत्रापिप्रामाणिकशास्त्रेषुअनुक्तान्। शास्त्रविरुद्धानपिदोषान्
तेष्वारोपयंतः। तच्छाखाप्रविष्टब्राम्हणान्प्रति। असूयांद्वेषंचकुर्वंति। इत्यहोआश्चर्यंदृश्यते॥ ॥ तथाशास्त्रस्य
तात्पर्यवत्त्वेपूर्वोक्तेषुश्राद्धनिमंत्रणयोग्यायोग्यपरिगणनप्रस्तावेषुयत्रकुत्रापि। वाजसनेयिब्राह्मणानांनिषेधः प्र
तिपाद्येत॥ ॥ तथाकुत्रापिनप्रतिपादितंदृश्यते॥ ॥ ततः स्वंवेदशास्त्रानभिज्ञइतिप्रतिभातितथाचमनुः॥
श्रुतिस्मृतीहिविप्राणांचक्षुषीदेवनिर्मिते॥ ॥ काणस्तत्रैकयाहीनः द्वाभ्यामंधः प्रकीर्तितः॥ इतिश्रुतिस्मृतिप
रिज्ञानंतवनास्तीतिनिश्चीयते॥ ॥ ननुविस्तारतयाएवमुक्तत्वेपि। वाजसनेयिब्रह्मणाएवश्राद्धेनिमंत्रयितव्याः॥

इतिनियमोयत्रकुत्रापिनदृष्टः। इतिचेत्सत्यं॥ ॥तथापि॥तवाभिमतरीत्यातैतिरीयादिब्राम्हणाएवश्राद्धेभोज
यितव्याः नवाजसनेयिनः। इतिनियमोनदृश्यते। अपितुऋग्वेदिनः यजुर्वेदिनः। सामवेदिनः। भोजयितव्याः इतितु
प्रतिपाद्यते। तवममचसमस्तसमाचारः॥ ॥नच॥ यजुर्वेदिनइत्युक्तेतैत्तिरीयाएवनतुवाजसनेयिनः॥ प्रायेण
तैत्तिरीयाणांभूयस्त्वात्। तद्वेदभागस्यैव यजुष्ट्वव्यवहारोदृश्यते। इतिवाच्यं। त्वयादेशांतरगमनं। नकृतंशास्त्रतत्त्वा
स्यर्थेनज्ञातंइतिहेतोः। तवतथा। भातिबहुदेशेषुद्राविडकेरल। कर्नाटक। आंध्र। महाराष्ट्र। घूर्जर। उत्कलगौडादि
बहुदेशेषु। प्रायेणवाजसनेयिब्राम्हणानामेवस्थितिः। दृश्यते। सर्वदेशेषुमिलित्वातेषांषोडशांशानांमध्येएकांश
संख्यातातैत्तिरीयशाखाप्रविष्टब्राम्हणावर्त्तंतइति॥ निष्पक्षपाततयासर्वदेशद्रष्टुप्रश्नेनज्ञातव्योभवति। तत्रउत्त
रदेशेतच्छाखिनांगौडानामध्येबाहुल्यंबहुशोअनुभूयते। तान्प्रतियूयंकेइतिप्रश्नेकृतेसतिवयंयजुर्वेदिनः। इ
त्येवसामान्यतःबहुशोव्यवहारोदृश्यते। कथंचित्। लोकव्यवहारमात्रस्यप्रामाणिकत्वासंभवेपिपरस्परस्पर्धया
स्वाधिक्यप्रतिपादनेपियजुर्वेदसामान्यस्यउभयाअनुगतत्वेन। शाखेषुतैत्तिरीयाःवाजसनेयिनश्चसमानाएवेति॥

तात्पर्यंप्रतीयते॥ ॥ननु।तैत्तरीयाणामेवाधिक्यं।वाजसनेयिनामेवाधिक्यं।तएवभोजयितव्याः।एतएवभोजयि
तव्याः।इतिविशेषोनलभ्यते॥ ॥ननु॥उक्तब्राम्हणालाभेस्वदेहसंबंधिनः॥मातुलभागिनेयजामात्रादयःभोज
यितव्याइति।त्वयोक्तशास्त्रेषेववर्तते॥ ॥ननु।उत्तमाभावेअन्येभोजयितव्याइतिनियम्यते॥ ॥ इतिचेत्सत्यं।
तथापि।उक्तयोग्यतासत्वेतेभोजयितव्याः।नोचेत्।अभोजयितव्याइतितात्पर्येणेवतच्छास्त्रप्रवृत्तिः।इतिहेतोःध
नीसुखीतिवत्।धनस्य।सुखप्रयोजकत्ववच्च।शास्त्रोक्तयोग्यतयैवभोजनीयत्वप्रयोजकत्वंयत्रकुत्रापि।शास्त्रीय
योग्यत्वमेवअन्यभोजनीयतावच्छेदकंभवति।ननुदेहादिसंबंधित्वंसंबंधस्तुश्राद्धफलप्रतिबंधकत्वेनदूषित
त्वात्॥ ॥तथाहि॥ ॥तथाचमनुः॥ ॥तृतीयाध्याये॥ ॥ श्लो ॥ संभोजनीसाभिहितापैशाचीदक्षिणाद्विजैः।
इहैवास्तेतुसालोकेगौरंधेवैकवेश्मनी॥ १४१॥ ॥अस्यव्याख्यानं॥ ॥संभोजनीतिसादक्षिणादानक्रियासंभोज
नीसहभुज्यते।ययासासंभोजनीगोष्ठी।बहुपुरुषभोजनात्मिका।पिशाचधर्मत्वात्।पैशाचीमन्वादिभिरुक्ता।साच
मैत्रीप्रयोजकत्वान्नपरलोकफलादिहलोकएवास्तेयथांधागौरेकस्मि न्नेवगृहेतिष्ठतिनगृहांतरगमनक्षमा ॥

॥१४१॥आपस्तंबधर्मसूत्रेद्वितीयप्रश्नेसप्तदशसंख्याकखंडे॥ ॥तद्व्याख्यायामुज्ज्वलायां।अथाप्युदाहरंतिसं
बंधिनोनभोज्याइत्यस्मिन्नर्थेधर्मज्ञवचनमुदाहरति॥ ॥संभोजनीनामपिशाचभिक्षानैषापितॄन्गच्छतिनोतदे
वान्।इहैवसाचरतिक्षीणपुण्याशालांतरेगौरिवनष्टवत्सा॥ ॥परस्परंसंभुंजतेस्यामितिसंभोजनीअधिकरणे
ल्युट्।नामेदमस्याः।पिशाचभिक्षायाः।नैषापितॄन्गच्छतिनोतदेवान्।किंतुक्षीणपुण्यापरलोकप्रयोजनरहितासती
इहैवलोकेचरति।यथामृतवत्सागौःगृहांतरएवचरति।नबहिर्गच्छति।तद्वद्व्याचष्टेइहैवसंभुंजति।दक्षिणाकुल
कुलंविनश्यतीति।संभुंजति।दक्षिणापरस्परभोजनस्यनिमित्तभूतादक्षिणाश्राद्धदानक्रियाग्रहात्।गृहं इहैवलो
केनश्यतीत्यर्थः॥इति ॥तथाचदौहित्रादीनामपि।उक्तगुणलक्षणयोग्यताभावे।अतिक्रमदोषोनास्तीतिउज्ज्वल
त।तेषांनियमेनप्रथमोक्तयोग्याभावेनिमंत्रणंकार्यमितिविधिर्नास्ति॥ ॥तथाचधर्मसिंधौ॥ ॥तृतीयपरिच्छेदे
उत्तरार्धे।श्राद्धभोजनीयब्राम्हणप्रकरणे॥ ॥दौहित्रजामातृस्वस्रियादीनांविद्यादिगुणवतांश्राद्धेनिमंत्रणाभा
वेदोषः॥ ॥गुणहीनत्वेतुनदोषः॥ ॥पराशरमाधवीयेआचारकांडेतृतीयाध्याये॥ ॥श्राद्धेभोजनीयब्राम्हणप्र

करणे॥ ॥भविष्यत्पुराणे॥ ॥ब्राह्मणातिक्रमोनास्तिमूर्खेवेदविवर्जिते॥ ॥ज्वलंतमग्निमुत्सृज्यनहिभ
स्मनिहूयतइति॥ ॥वेदविवर्जितइतिनिर्गुणमात्रोपलक्षणार्थं॥ ॥अतएवोक्तं॥ तत्रैव॥ ॥व्यतिक्रा
तेर्नदोषोस्तिनिर्गुणान्प्रतिकर्हिचित्। यस्यत्वेकगृहेमूर्खोदूरस्थश्चगुणान्वितः। गुणान्वितायदातव्यंनास्तिमू
र्खेव्यतिक्रमइति॥ ॥निर्णयसिंधौतृतीयपरिच्छेदेश्राद्धप्रकरणेश्राद्धभोजनीयब्राम्हणप्रकरणे॥ मूर्खेतु
नदोषः। ब्राम्हणातिक्रमोनास्तिमूर्खेवेदविवर्जिते॥ज्वलंतमग्निमुत्सृज्यनहिभस्मनिहूयतइति॥ ॥का
त्यायनोक्तेः॥ ॥विप्रस्यापिदोषः॥ ॥अविद्वान्प्रतिगृह्णानोभस्मीभवतिदारुवदिति॥मनूक्तेः॥ ॥एतावता
॥मातुलत्वादिसंबंधस्यश्राद्धनिमंत्रणेप्रयोजकत्वंनास्ति॥ ॥किंतुउक्तगुणवत्तायाएवमुख्यंप्रयोजक
त्वंदर्शितं॥ ॥अतएवविद्याशीलत्वादिगुणवत्वेकुष्ठित्वकाणत्वादिदोषाणामप्यनादरणीयत्वं॥ ॥इत्यभिप्रा
येणाहुः॥ ॥तथाचधर्मसिंधौ॥तृतीयपरिच्छेदेउत्तरार्धेश्राद्धभोजनीयब्राह्मणप्रकरणे॥ ॥विद्याशीलादि
गुणवत्वेकुष्ठित्वकाणत्वादिशरीरदोषाणांनदूषकत्वमिति॥ ॥एतस्मादपि॥ योग्यतायाएवभोजनीयत्वप्र

योजकत्वंसूचितंभवति॥ ॥तस्मादेवमनुस्मृतौ॥तृतीयाध्याये॥श्राद्धभोजनीयब्राम्हणप्रकरणे॥श्रोत्रिया
यैवदेयानिहव्यकव्यानिदातृभिः।अर्हत्तमायविप्रायतस्मैदत्तंमहाफलं॥ इति॥ ॥अस्यव्याख्यानं॥श्रोत्रियाये
ति॥छंदोमात्राध्यायीश्रोत्रियः।तस्मैदेवपित्र्याण्यन्नानियत्नतोदेयानि।अर्हत्तमायश्रुताचाराभिजनादिभिः।पूज्यतमा
यविप्रायतस्मैदत्तंमहाफलंभवति॥१२८॥एवंचशास्त्रतात्पर्यंगुणवत्वेसत्येव।ते।भोजनीयाभवंति।ननुदेहसं
बंधमैत्रीसंबंधादि।सत्वेभोजनार्हाभवंतीति॥तथाचमनुः।तृतीयाध्याये॥ ॥श्राद्धप्रकरणे॥ ॥नश्राद्धेभो
जयेन्मित्रंधनैःकार्योस्यसंग्रहः।नारिंनमित्रंयंविद्यात्तंश्राद्धेभोजयेद्द्विजं॥१३८॥अस्यव्याख्यानं॥ ॥नेति॥श्राद्धे
मित्रंनभोजयेत्।धनांतरैरस्यमैत्रीसंपादनीया।नशत्रुं।नचमित्रंयंजानीयात्तं॥ब्राम्हणंश्राद्धेभोजयेत्॥१३८॥
तथाचगौतमधर्मसूत्रभाष्यमस्करीये॥पंचदशखंडात्मकपंचदशाध्याये॥तेनश्राद्धेनमित्रकार्यंकुर्यात्॥अ
न्योन्याचारात्।मित्रसंपन्नामपि॥ ॥तस्मादेवंयत्किंचित्संबंधरहिताएवश्राद्धेनिमंत्रयितव्याः॥ ॥इतिशास्त्र
तात्पर्यार्थः॥तथाचधर्मसिंधौ॥तृतीयपरिच्छेदेउत्तरार्धे॥ ॥श्राद्धेभोजनीयब्राम्हणप्रकरणे॥ ॥सापिंड्ययो

प्र·शा·

५१२

निशिष्यत्वादिसंबंधैश्च वर्जिताः। कुष्टापस्मारादिदोषैर्हीनाश्चेदुत्तमाः स्मृताः॥ ॥ तत्र द्रष्टणहादिसूत्रकादिप्र
योजकसापिंड्यसगोत्रसोदकरूपः॥ संबंधः सापिंड्यपदाभिधेयः। योनिसंबंधो मातुलत्वश्वशुरत्वश्यालक
त्वादिः आदिशब्देन गुरुसहाध्यायीत्वमित्रत्वादयः। तथा च॥ सपत्नीकत्वादिगुणयुक्त उक्तसंबंधिहीनाः॥ ॥
तथा च॥ आपस्तंबधर्मसूत्रभाष्य उज्वलायां॥ ॥ द्वितीयप्रश्ने सप्तदशसंख्याकखंडे॥ ॥ योनिगोत्रमंत्रांतेवा
स्यसंबंधान्॥ अस्य भाष्यं। योन्यादिभिरसंबंधान् योनिसंबंधा मातुलादयः। गोत्रसंबंधाः सपिंडादयः। वृत्तादिगुण
हीना एव लभ्यंते॥ ॥ तदा समुदेतो वृत्तादिभिर्युक्तः। सोदर्योपि भोजयितव्यः। किमुश्यालादयः इत्यपि शब्दस्या
र्थः। समांत्रमंत्रासंबंधा रुत्विजो याज्याश्चांतेवासिसंबंधा शिष्या आचार्याश्च गुणहान्यां तु परेषां समुदेतः सोदर्योपि
भोजयितव्यः॥ ॥ यदि परे गोत्रासंबंधा एतेनांतेवासिनो व्याख्याताः। एतेन सोदर्यांतेवासिनः। बहुवचननिर्देशा
त्॥ पूर्वत्र निर्दिष्टा योन्यादिसंबंधास्सर्वे हि ते व्याख्याताः। अन्येषामभावे समुदेतो भोजयितव्य इति॥ ॥ एतेषामुक्त
गुणयुक्तानां यत्किंचित्संबंधरहितानां अत्यंताभावे संबंधवतामपि कैश्चिद्गुणयुक्तानामपि। भोजनीयत्वे नमध्य

नि·

राम·

८

माः भोजयितव्याः इत्याहुः ॥ धर्मसिंधौ तृतीयपरिच्छेदे उत्तरार्धे ॥ ॥ श्राद्धभोजनीयब्राम्हणप्रकरणे ॥ ॥ मातामहो मातुलो भागिनेयो दौहित्रो जामाता गुरुः शिष्यो याज्यः श्वशुर ऋत्विक् श्यालकः । पितृष्वसृपुत्रो मातृष्वसृपुत्रो मातुलपुत्रो अतिथिः सगोत्रो मित्रमित्येते मध्यमाः ॥ ॥ तत्रैव धर्मसिंधौ ॥ यत्तु । नब्राम्हणं परिक्षेत दैवे कर्मणि धर्मवित् । पित्र्ये कर्मणि तु प्राप्ते परिक्षेत प्रयत्नतः ॥ ॥ तदसंभवपरं ॥ ॥ संभवे दैवे कर्मण्यपि परीक्षेतेत्यभिप्रायः ॥ ॥ आपस्तंबधर्मसूत्रभाष्ये द्वितीयप्रश्ने सप्तदशखंडे ॥ ॥ अत्र मनुः ॥ एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः । अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः इति ॥ ॥ मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुं । दौहित्रं विट्पतिं बंधुमृत्विग्याज्यौ च भोजयेदिति ॥ ॥ मनुस्मृतौ तृतीयाध्याये श्राद्धप्रकरणे ॥ ॥ मूलं ॥ कामं श्राद्धेऽर्चयेन्मित्रं नाभिरूपमपित्वरिं । द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलं ॥ ॥ अस्य व्याख्यानं ॥ ॥ काममिति ॥ वरं विद्वद्ब्राम्हणालाभे गुणवन्मित्रं भोजयेत् ॥ नतु विद्वांसमपि शत्रुं यतः शत्रुणा श्राद्धं भुक्तं परलोके निष्फलं भवति ॥ यथोक्तपात्रासंभवे मित्रं प्रतिप्रसवार्थमिदं ॥ १४४ ॥ पराशरमाधवीये ॥ ॥ आचारकांडे तृतीयाध्याये ॥ ॥ श्राद्धभोजनीयब्राम्हणप्रकर

णे॥ ब्रह्मांडपुराणे॥ ॥अलाभेमुनिमिश्रणांभोजयेद्ब्रह्मचारिणं। तदलाभेप्युदासीनंगृहस्थमपिभोजयेदिति॥ ॥
उदासीनोह्यसंबंधः॥ ॥तत्रैवमाधवीये॥अत्रानुकल्पोयाज्ञवल्क्येनदर्शितः। स्वस्रीयऋत्विग्जामाताघाज्यश्वशुर
मातुलाः त्रिणाचिकेतदौहित्रशिष्यसंबंधिबांधवाइति॥ ॥तत्रैवमाधवीयेमनुः॥अनुकल्पस्त्वयंज्ञेयस्सदासद्भि
रनुष्ठितः। मातामहइत्यादि॥ ॥दौहित्रंषटपतिंबंधुमित्यादिच॥ ॥तत्रैवमाधवीयेआपस्तंबः॥ ॥गुणवद
लाभेसोदर्यौपिभाजयितव्यइत्यंतेवासिनोव्याख्याताइति॥ ॥विज्ञानेश्वरीये। आचारकांडेश्राद्धप्रकरणे। स्व
स्रीयऋत्विग्जामातेत्यादि श्लोकः॥ २२१॥ ॥निर्णयसिंधौ॥तृतीयपरिच्छेदे॥ ॥श्राद्धप्रकरणे॥ ॥एतच्चब्रा
ह्मणालाभेअपिशब्दा द संभवेहेमाद्रौगौतमः॥ ॥श्लो॥ शिष्यांश्चैवसगोत्रांश्चभोजयेदूर्ध्वंत्रिभ्योगुणवतः॥
सामशास्त्रागतगृह्यसूत्रभाष्ये॥ ॥श्राद्धप्रकरणे॥अभावेशिष्यान्स्वाचारानितिशिष्यांतेवासी। स्वआचारोय
स्यस्वाचारः। स्वाचारशब्दः शिष्यविशेषणंस्नातकयतिश्रोत्रियादित्वयुक्तायदिनलभ्यंतेतदास्वीयाचारयुक्तान्
शिष्यान्भोजयेत्। नचशिष्योपिस्नातकादित्रयाणामन्यतमएवभोजनीयइतिशंकनीयं॥एषामन्यतमश्चेत्ततएव

लंविद्याचतपएवच।पूजितैस्तेस्तुसंतुष्टादेवाःसपितृगुह्यकाइत्युक्तेरिति॥ ॥देशविशेषेनियमाभावः॥ब्रम्ह
विदःश्रोत्रियाःतीर्थवासिनः।नपरीक्ष्याइतिब्राम्हणविशेषनियमाभावः॥ ॥तथाचधर्मसिंधौ॥तृतीयपरिछेदे
श्राद्धप्रकरणे॥ब्राम्हणान्नपरिक्षेततीर्थक्षेत्रनिवासिनः॥ इति॥ ॥अपितुमुख्यकल्पोक्तब्राम्हणालाभेअनुक
ल्पानुकल्पादिनादेशकालपात्रादिनावागौणानामपि।ग्राह्यत्वंप्रतिपादितम्।मुख्यानांलाभेतुअन्येषांप्रसक्तिरे
वनास्तिमुख्यास्तु॥ ॥शास्त्रेप्रतिपाद्यंते॥ ॥तथाहि॥ ॥मनुस्मृतौतृतीयाध्यायेश्राद्धप्रकरणे॥ मू ॥यत्नेनभो
जयेच्छ्राद्धेबह्वृचंवेदपारगं॥शाखांगतमुथाध्वर्युंछंदोगंतुसमाप्तिकं॥ १४५॥एषामन्यतमोयस्यभुंजीतश्राद्ध
मर्चितः।पितृणांतस्यतृप्तिःस्याच्छाश्वतीसाप्तपौरुषी॥ १४६॥अस्यव्याख्यानं॥ ॥तद्भोजनेअधिकफलमाह॥ ॥ए
षामिति।एषांसंपूर्णशाखाध्यायिनांबह्वृचादीनांमध्यादन्यतमोयस्यसम्यक्पूजितःसश्राद्धेभुंक्ते।तस्यपित्रादिसप्त
पुरुषाणां।शाश्वतीअविच्छिन्नापितृणांतृप्तिःस्यात्साप्तपौरुषीति।अनुशातिकादित्वादुभयपदवृद्धिः।तस्यचाकृति
गणत्वात्॥ ॥१४६॥ तत्रैवमनुस्मृतौ॥ ॥एषवैप्रथमःकल्पःप्रदानेहव्यकव्ययोः॥अनुकल्पस्त्वयंज्ञेयस्सदासद्भिः

रनुष्ठितः॥ १४७॥ अस्यव्याख्यानं॥ ॥ एषइतिहव्यकव्ययोरुभयोरेवप्रदानेयदसंबंधिश्रोत्रियादिभ्योदीयतइतिअ
यंमुख्यकल्पउक्तः अयंतुमुख्याभावेवक्ष्यमाणोनुकल्पोज्ञातव्यः सर्वदासाधुभिरनुष्ठितः॥ १४७॥ पराशरमाधवीये
तृतीयाध्याये॥ श्राद्धप्रकरणे॥ ॥ श्राद्धेभोजनीयब्राह्मणायाज्ञवल्क्येनदर्शिताः॥ ॥ अग्र्याः सर्वेषुवेदेषुश्रोत्रियो
ब्रह्मविद्युवा॥ वेदार्थविज्ज्येष्ठसामात्रिमधुस्त्रिसुपर्णिकः॥ ॥ कर्मनिष्ठास्तपोनिष्ठापंचाग्निब्रह्मचारिणः॥ पितृ
मातृपराश्चैवब्राम्हणाश्राद्धसंपदइति॥ ॥ ऋग्वेदादिसर्ववेदेषुअस्खलिताध्ययनक्षमाअग्र्याअपि॥ तत्रैवपरा
शरमाधवीयेबोधायनोपि॥ ॥ त्रिमधुस्त्रिनाचिकेतस्त्रिसुपर्णः पंचाग्निः षडंगविच्छीर्षकोज्येष्ठसामगः। पंक्ति
पावनाइति॥ ॥ इत्यादिभिः सर्ववाक्यैः योग्यानामेवसर्वश्राद्धनिमंत्रणे। अधिकारइतिज्ञापयित्वा। तदभावेगौणा
नांभोजनाधिकारः। तदंतर्गतत्वेनैवमातुलादिदेहसंबंधिनोपिगुणयुक्ताश्चेत्। तेपिभोजयितव्याः। इतिप्रतिपादित
त्वात्। देहादिसंबंधादेः अस्मिन्विषयेअप्रावर्तकत्वात्। ब्राम्हणानांसर्वेषामपिसर्वशाखिनांसमानत्वेनसर्ववेदा
ध्ययनवत्वेनैवयोग्यताशालित्वात्॥ शाखाभेदेननिंदितत्वंउत्कृष्टत्वंचाअसत्याप्रयुक्तमेवेतिगम्यते॥ ॥ तथाच

शास्त्रेषु सर्ववेदानां समानतयैव सामान्यशब्द निर्देशः। श्रूयते तद्यथा। धर्मसिंधौ तृतीय परिच्छेदे उत्तरार्धे श्राद्ध
प्रकरणे॥ श्लो॥ यद्येकं भोजयेच्छ्राद्धे छंदोगं तत्र भोजयेत्। ऋचो यजूंषि सामानि त्रितयं तत्र विद्यते॥ ऋग्वेदिनं च
पित्रर्थे याजुषं च पितामहे । प्रपितामहे सामगं च भोजयेच्छ्राद्धकर्मणि॥ ॥ अथर्ववेदिनं वैश्वदेवे पि
त्र्ये च भोजयेत्॥ मनुस्मृतौ। तृतीयाध्याये॥ ॥ मू॥ यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगं। शाखांतगमथाध्वर्युं छंदो
गं तु समाप्तिकं॥ १४५॥ अस्य व्याख्यानं॥ श्रोत्रियायैव देयानीत्यनेन छंदोमात्राध्यायिनि श्रोत्रियशब्दप्रयोगात्तदाश्र
यणमावश्यकमुक्तम्। इदानीं त्वधिक फलार्थं मंत्र ब्रह्मणात्मककृत्स्नशाखाध्यायिनि श्रोत्रिये दानमाह॥ ॥ यत्नेने
ति॥ ऋग्वेदिनं मंत्रब्राम्हणात्मक शाखाध्यायिनं यत्नतो भोजयेत्। तथाविधमेव यजुर्वेदिनं वेदस्य पारं गच्छतीति
वेदपारगः शाखाया अंतं गच्छतीति शाखांतगः। समाप्तिरस्यास्तीति समाप्तिकः सर्वैरेव शब्दैर्मंत्र ब्राम्हणात्मकक्
त्स्न शाखाध्येताभिहितः॥ १४५॥ मू॥ एषामन्यतमो यस्य भुंजीत श्राद्धमर्चितः। पितॄणां तस्य तृप्तिः स्याच्छाश्वती सा
प्तपौरुषीति॥ १४६॥ अस्य व्याख्यानं॥ तद्भोजने अधिक फलमाह॥ एषामिति॥ एषां संपूर्णशाखाध्यायिनां बह्वृचा

दीनां मध्यादन्यतमो यस्य सम्यक् पूजितः सन् श्राद्धे भुंक्ते तस्य पित्रादिसप्तपुरुषाणां शाश्वती अविछिन्ना पितृणां
तृप्तिः स्यात्। साप्तपौरुषीति अनुशतिकादित्वादुभयपदवृद्धिः तस्य चाकृतिगणत्वात्॥ १४६॥ पराशरमाधवी
ये आचारकांडे तृतीयाध्याये॥ यद्येकं भोजयेच्छ्राद्धे छंदोगं तत्र भोजयेत् ऋचो यजूंषि सामानि त्रितयं तत्र वि
द्यते॥ ऋचा हि तृप्यति पिता यजुषा तु पितामहः पितुः पितामहः साम्ना छंदोगोभ्यधिकस्ततः इति॥ ॥शाता
तपोपि॥ भोजयेद्यस्स्वधर्माणं दैवे पित्र्ये च कर्मणि। अनंतमक्षयं चैव फलं तस्येति वै श्रुतिरिति॥ ॥यमोपि॥ ॥
वेदविद्याव्रतस्नाताः श्रोत्रिया वेदपारगाः। स्वधर्मनिरताः शांताः क्रियावंतस्तपस्विनः॥ तेभ्यो हव्यं च कव्यं च
प्रसन्नेभ्यः प्रदीयतां इति॥ ॥मनुरपि श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः अर्हत्तमाय विप्राय तस्मै दत्तं म
हाफलम्॥ एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्। पुष्कलं फलमाप्नोति नामंत्रज्ञान् बहूनपि॥ ॥वसिष्ठोपि
॥ यतीन् गृहस्थान् साधून्वेति भोजयेदिति शेषः॥ ॥तत्रैव पराशरमाधवीये॥ ॥पंचाग्निरप्यधीयानो यजु
र्वेदविदेव च। बह्वृचश्च त्रिसौपर्णस्त्रिमधुर्वाथ यो भवेत्॥ ॥शिशुरप्यग्निहोत्री च न्यायविच्च षडंगवित्। मंत्र

ब्राम्हणविच्चैवयश्चस्यात्स्मर्मवाचकः। तत्रैवपराशरमाधवीये॥ यजुषांपारगोयश्चसाम्नांयश्चापिपारगः। अथ र्वशिरसोध्येताब्राम्हणाः पङ्क्तिपावनाः॥ तत्रैवपराशरमाधवीये। बोधायनोपि॥ रहस्यविद्बृचोयजूंषिसा मानीतिश्रास्थस्यमहिमातस्मादेवंविदंसपिंडमप्याशयेदिति॥ ॥ विज्ञानेश्वरीयेआचारकांडे॥२२२॥ ॥श्लोके॥ मू ॥अग्र्यास्सर्वेषुवेदेषुश्रोत्रियोब्रम्हविद्युवा। वेदार्थविज्ज्येष्ठसामात्रिमधुस्त्रिसुपर्णिकः॥२२१॥ अस्यव्याख्यानं॥अहरहश्रास्थव्यतिरिक्तवक्ष्यमाणचतुर्विधश्रास्थेषुब्राम्हणसंपत्तिमाह॥अग्र्याइति॥स र्वेषुवेदेषुरुग्वेदादिषुइत्यादि॥ ॥एवंप्रकारेणसर्वसूत्रेषु।सर्वस्मृतिषुइतिहासपुराणभारतसोमोत्स त्यादिआर्षग्रंथेषुमाधवीयादिमहानिबंधनग्रंथेषुचसर्वशास्त्रेषु।श्रास्थभोजनेबहुपरीक्षापूर्वकंब्राम्हणा निमंत्रयितव्याः॥ इत्युक्तं॥ ॥तत्रब्राम्हणानांमुख्यकल्पप्रतिपादनप्रस्तावेवेदवित्।श्रोत्रियः।मंत्रब्राम्हणा र्थवित्।ब्रम्हवित्।रहस्यवित्।यतिः।तपोनिष्ठः।कर्मनिष्ठः।त्रिणाचिकेतः।त्रिसुपर्णः। चतुर्वेदवित्।अंगा ध्यायीपंचाग्निवित्।इत्यादिसामान्यशब्देरेवसर्वत्रप्रयोगदर्शनात्।तादृशगुणवतांब्राम्हणानांसर्वेषाम

पिसमानत्वेनश्राद्धभोजनीयत्वादिहव्यकव्यप्रभृतिसर्वदानार्हत्वस्यशास्त्रतात्पर्यविषयत्वेनस्फुटतयाप्रती
यमानत्वात्।तेषपि।यजुर्वेदशब्देन।यजुर्वेदवित्।यजुर्वेदाध्यायीयाजुषः।इत्यादियजुर्वेदवाचकसामान्य
शब्दैरेवसर्वत्रशास्त्रेषुप्रतिपाद्यमानत्वात्।तैत्तिरीयः वाजसनेयीइतिविभाजकविशेषशब्दप्रयोगाभावा
च्च।यजुःशब्देनउभयोरपिसंग्राह्यत्वसमेचशास्त्रतात्पर्यविषयत्वेनप्रतीयमानत्वाच्च।ऋग्वेदितैत्तिरीयवाज
सनेयिसामगआथर्वणिकानामपि।सर्वेषांब्राम्हणानांहव्यकव्ययजनयाजनाध्यापनादि।सर्वव्यवहारस्या
पि।परस्परंसमानतयाकर्तव्यत्वस्यशास्त्रतात्पर्यविरोधाभावात्।वयंश्रेष्टाः तेनिकृष्टाः वयंश्रेष्ठाः।तेनिकृ
ष्टाः।इत्यादिव्यवहारः अविवेककृतएवमूढाश्रितइत्येवनिश्चयः क्रियते।अतएव।अव्यवहितपूर्वोक्तेषु
स्मृत्यादिग्रंथेषुश्राद्धनिमंत्रणयोग्यमुख्यकल्पविषयब्राम्हणानांवेदचतुष्टयप्रयुक्तविशेषलक्षणप्रतिपा
दनंसामान्यतयैवदृश्यते॥ ॥तथाहि॥ ॥पराशरमाधवीये।बोधायनसूत्रेच॥ ॥रहस्यविदिति।रहस्य
उपनिषत्।तद्वित्तदर्थज्ञानवानित्यर्थः।रहस्यशब्दः उपनिषत्परत्वेनमनुस्मृतौप्रयुक्तः॥ ॥तथाचमनुस्मृ

नं।सामान्यतयैवदृश्यते॥ तथाहि॥ ॥पराशरमाधवीये।बोधायनेसूत्रेच॥ ॥रहस्यविदिति।रहस्यमुपनि
षत्।तद्वित् तदर्थज्ञानवानित्यर्थः।रहस्यशब्दःउपनिषत्परत्वेनमनुस्मृतौप्रयुक्तः॥ ॥तथाचमनुस्मृतौ
॥उपनीयतुयःशिष्यंवेदमध्यापयेत्ततः।सरहस्यंसकल्पंचतमाचार्यंप्रचक्षते।इति॥ ॥अस्यव्याख्यानं
॥ ॥उपनीयेति।आचार्यादिशब्दार्थमाह॥ ॥तैशब्दैरिहशास्त्रेप्रायेणव्यवहारात्।योब्राम्हणशिष्य
मुपनीयकल्परहस्यसंहितांवेदाख्यांसर्वांअध्यापयतितमाचार्यंपूर्वेमुनयोवदंति।कल्पोयज्ञविद्यारहस्यमु
पनिषत्।वेदत्वेप्युपनिषदांप्राधान्यविवक्षयापृथङ्गिर्देशः॥१४०॥ ॥इत्युक्तत्वात्रहस्यशब्दवाच्योपनि
षदध्येतारंभोजयेदितिविधेस्सत्वात्।उपनिषच्छब्दवाच्यानांईशावास्यबृहदारण्यमंत्रिकमुक्तिकोपनिष
दां।ईशावास्यमितिप्रथमोपनिषत्।बृहदारण्यमिति दशोपनिषदांअंत्योपनिषत्।मंत्रिकोपनिषदितिद्वा
त्रिंशदुपनिषदां।अंत्योपनिषत्मुक्तिकोपनिषदितिअष्टोत्तरशतोपनिषदांअंत्योपनिषत्।एतासांआदिम
ध्यांतानांदशोपनिषदां।आद्यंतयोःईशावास्यबृहदारण्ययोः।द्वात्रिंशदुपनिषदामाद्यंतयोःईशावास्यमंत्रि

कोपनिषदो:अष्टोत्तरशतोपनिषदांआद्यंतयो:॥ ईशावास्यमुक्तिकोपनिषदोश्च आवश्यकतथा सर्वशा
खिभिरपि॥ ॥अथातोब्रह्मजिज्ञासेति॥वेदांताख्यब्रम्हमीमांसाविचारार्थंअवश्यमध्ययनकर्तव्यतयाविधा
नानुसारेणशक्लयजु:शाखागतउपनिषदांअध्येतव्यत्वेननियमात्।सर्वप्रमखिनामपिवाजसनेयिशाखित्व।
प्राप्तिवत्।वाजसनेयिनामपिअष्टोत्तरशतोपनिषदध्येतृत्वेन कर्म्मेद्रियतैत्तिरीयत्वसामगत्वादिप्राप्त्या।सर्व
समत्वेनापि।श्राद्धभोजनीयत्वप्राप्तिद्वारा श्रेष्ठत्वेन प्रथमकल्पविषयत्वंप्राप्तमेव॥ ॥अपिच॥ ॥रहस्य
विरुद्धेनउपनिषन्मात्राध्येतृत्वविधानात्।वाजसनेयिनामपिस्वशाखोपनिषदाख्यईशावास्य।बृहदार
ण्यादिउपनिषदध्येतृत्वेनरहस्यविरुद्धप्राप्त्याप्रथमकल्पोक्तश्राद्धभोजनीयत्वप्राप्ते:अनिवार्यत्वात्॥ ॥एवं
त्रिणाचिकेतइतिमंत्रविशेषा ध्ययनतद्व्रतानुष्ठानादिविशेषविशिष्टत्वेनप्रथमकल्पोद्दिष्टब्राम्हणानांश्राद्ध
भोजनीयत्वमपिवाजसनेयिनांमुख्यतयासंभवत्येवयथात्रिसुपर्णइतिविशेषणस्यऋग्वेदगतचतुष्कपर्द
इत्यादिसुपर्णं।विप्रा:कवयोवचोभिरित्यन्तंमंत्रत्रयं।तैत्तिरीयेत्रिसुपर्णमयाचितंब्राम्हणायदद्यादिति।मंत्रत्र

यंचविकल्पेनयथाशाखंतदध्ययनतदर्थानुष्ठानकर्त्रोः ब्राम्हणयोः श्राद्धभोजनीयत्वेनपंक्तिपावनत्वेनचम
नुपराशरआपस्तंबगौतमबोधायनयाज्ञवल्क्यादिस्मृतितत्सूत्रभाष्यव्याख्यानकर्तृभिः। व्याख्याततत्त्ववत्। त्रि
णाचिकेतशब्देनलक्षितमंत्रत्रयाणांतदर्थानुष्ठानपूर्वकं। अध्ययनतदर्थानुष्ठानतन्निष्ठत्वादियुक्तानांश्रा
द्धभोजनीयत्वेनपंक्तिपावनत्वेनचप्रथमकल्पोद्दिष्टत्वंपूर्वोक्तस्मृत्यादिवाक्यैः प्रतीयते। तत्तुसुपर्णवाक्यार्थ
वत्। कठवल्ल्युपनिषदितैत्तिरीयब्राम्हणेवाजसनेयिशतपथब्राम्हणेचप्रत्येकंमंत्रत्रयंआम्नायतेतत्त
द्वेतत्तदध्ययनतदर्थानुष्ठानतन्निष्ठावतांसर्वेषामपित्रिणाचिकेतत्वसंभवात् तेषांमध्येवाजसनेयिब्रा
म्हणानामपिशाखाव्यवस्थाविकल्पेनत्रिणाचिकेतत्वंसिद्धमेवभवतिइतिआपस्तंबधर्मसूत्रभाष्यउज्व
लायांनिर्णयसिंधौविज्ञानेश्वरीयादिषु। तन्मंत्रस्यशाखात्रयनिष्ठत्वेनप्रतिपादितत्वात्। इतिहेतोः॥ तेषां
प्रथमकल्पोक्तश्राद्धभोजनीयत्वप्रतिपादनेनैवप्राप्तपंक्तिपावनत्वादिकंनिराकर्तुंकेनशक्यते॥ ॥तथा
च॥ आपस्तंबधर्मसूत्रभाष्यउज्वलायांद्वितीयप्रश्नेसप्तदशसंख्याकखंडे॥ ॥श्राद्धभोजनीयपंक्तिपावन

प्र॰श॰

५१८

ब्राम्हणप्रतिपादनप्रकरणे॥ ॥शास्त्रांतरेप्यविद्याद्यश्राद्धभुंजानाः पंक्तिदूषणाभवंति॥ ॥अतस्तेनभो
ज्याइतित्रिमधुत्रिसुपर्णस्त्रिणाचिकेतश्चतुर्मेधः।पंचाग्निर्ज्येष्ठसामगोवेदाध्यायीत्यनूचानपुत्रश्श्रोत्रियइत्येते
श्राद्धेभुंजानाः पंक्तिपावनाभवंति॥ इतिसूत्रं॥ ॥अस्यभाष्यं॥ मधुवाताऋतायतइत्येषमधुतत्रहिप्रत्युचंत्र
योमधुशब्दाइहतत्तदध्यायीपुरुषस्त्रिमधुस्त्रिसुपर्णः।चतुष्कपर्दीयुवतिस्सुपेशाइत्यादिकंऋचं।अन्येतुतैत्ति
रीयकेब्रह्ममेतुमामित्यादयस्त्रयोनुवाकाइत्याहुः।तत्रहिपद्मंत्रिसुपर्णमयाचितं।ब्राम्हणायदद्यादितिश्रूय
तेपूर्ववत्पुरुषेवृत्तिः त्रिणाचिकेतः नाचिकेतोग्निर्बहुषुशाखासुविधीयते।तैत्तरीयकेकठवल्यादिशतपथेचतं
योवेदमंत्रब्राम्हणेनसहत्रिनाचिकेतइति॥ ॥एवमेव॥ ॥पंचाग्निरितिमनुयाज्ञवल्क्यपराशरआपस्तं
बधर्मसूत्रगौतमधर्मादिषुतद्भाष्यव्याख्यानादिषुचश्राद्धभोजनीयब्राम्हणपंक्तिपावनपंक्तौपरिगणितत्वा
त्।पंचाग्निरितिशब्देनपुरुषविशेषोलक्ष्यते॥तद्व्युत्पत्तिस्तुएतद्भाष्यादिषुक्रियते॥तद्यथा॥विज्ञानेश्व
रीये॥ ॥मूलं॥ ॥कर्मनिष्ठाःतपोनिष्ठाःपंचाग्निब्रह्मचारिणः।पितृमातृपराश्चैवब्राम्हणाःश्राद्धसंपदः

अस्यव्याख्यानं॥ ॥कर्मनिष्ठा इति॥कर्मनिष्ठाविहितानुष्ठानतत्पराः तपोनिष्ठाः तपःशीलाः सभ्यावसथ्यौ
त्रेताग्नयश्च यस्य संति स पंचाग्निः पंचाग्निविद्याध्यायी वा ब्रम्हचारी उपकुर्वाणको इत्यादिषु॥२२२॥ सर्वत्र ध
र्मशास्त्रेषु पंचाग्निशब्देन पंचाग्निविद्यावान् लक्ष्यते॥ ॥तथा च छांदोग्ये॥ ॥पंचमाध्याये॥ ॥वैश्वानरवि
द्यायाः प्राक् पंचाग्निविद्याश्रूयते॥ ॥असौवावलोकोगौतमाग्निः पर्जन्योवावगौतमाग्निः।पुरुषोवावगौ
तमाग्निः।योषावावगौतमाग्निः।इत्यादिषु एवमेव वाजसनेयिशाखिनां शतपथब्राम्हणे अग्निरहस्यकां
डे पंचाग्निविद्याश्रूयते॥ ॥तथा च त्रिसुपर्णत्रिनाचिकेतवत् शाखाभेदेन शाखाध्ययनस्याविकल्पेन च
सामगस्य वाजसनेयिनश्च प्रत्येकं।स्वस्वशाखागतपंचाग्निविद्यायाः उपसनासत्वेन उभयोः सामगवाज
सनेयिनोः पृथक्।पंचाग्नित्वसंभवत्वेन॥ ॥तथा च॥ ॥वाजसनेयिनामपि।पंचाग्नित्वेन रूपेण श्रा
द्धभोजनीयब्राम्हणपङ्क्तिपावनकोटौ प्रतिष्ठत्वेन पङ्क्तिपावनत्वं भोजयितव्यत्वं च शास्त्रबलाल्लब्धं तल्लिवा
रितुं कः समर्थो भवति।इत्येवमेव पूर्वोक्तेषु ग्रंथेषु तत्र तत्र ब्रम्हचारित्वेन यतित्वेन याजुषत्वेन श्रोत्रियत्वेन ब्रम्ह

वित्वेनअन्येनवाकेनचिद्रूपेणसामान्यशब्दप्रयोगवशात्। तैत्तिरीयादिशाखिनामिव। वाजसनेयिशाखिनामपिपंक्तिपावन
त्वेनश्राद्धभोज नीयत्वंबलाल्लभ्यतएव॥ प्रत्युत॥ अव्यवहितपूर्वोक्तश्राद्धनिमंत्रणप्रकरणस्थभोजनीयवर्जनीयब्राह्म
णलक्षणप्रतिपादनप्रस्तावप्रशेषेषुनिर्णयसिंधुधर्मसिंधुविज्ञानेश्वरीयादिबहुस्थलेषु। त्रिमधुस्त्रिसुपर्णादिलक्षणयु
क्तब्राह्मणानामेव। श्राद्धभोजनीयत्वेनप्रतिपादनमात्रेणतदन्येषांसर्वेषामपि। तद्वर्जनीयत्वस्यअर्थसिद्धत्वात्
किमर्थंविशेषाकारेणस्मृतिसूत्रादिषु। अंधः काणः। कुब्जः इत्यादिविशेषशब्दैः वर्जनीयानांनिषेधः कृतः। इतितत्त
द्ग्रंथव्याख्यानादिषु। पूर्वपक्षमाशंक्य भोजनीयत्वेनोक्तब्राह्मणालाभे वर्जनीयब्राह्मणान् विहायअनिषिद्धब्राह्म
णानांभोजनीयत्वेनविधानज्ञापनार्थं। वर्जनीयब्राह्मणाः उक्ताइतिसमाधानंकृतं। तदनुरोधेन। श्राद्धकर्तृणां। अ
नभिमतत्वेपि। वाजसनेयिब्राह्मणानांवर्जनीयत्वाभावनिश्चयेनभोजनीयत्वंबलाल्लभ्यते। मन्वादिस्मृतिष्वपिविहि
तासंभवे। अनिषिद्धस्यग्राह्यत्वमितिसर्वत्रसर्वविषयेषुन्यायःप्रदर्शितोवर्त्तते॥ अन्यथातत्तद्व्यक्तित्वेनवि
शेषाकारेणकस्यचित्। शाखिनोपिविशेषनिर्देशाभावात्। ब्रह्मसूत्रेसांख्यादीन्प्रतिव्यासेनस्वपक्षदोषाभावेनिरस्त

त्रितवत्। स्वसपत्नीं। त्वां। विधवाभवेत्याद्युक्तिवच्चसर्वशाखिनामपिअयंदोषः समएव॥ ॥ एवंस्थितेशास्त्र
तात्पर्येतदनभिज्ञाः श्राद्धभोजनीयत्वेनवाजसनेयिनांशास्त्रप्रतिपाद्यत्वंनास्ति॥ ॥ इतिवदंतितथासति
सामान्यशब्दप्रतिपाद्यत्वेपिविशेषाकारेण। तैत्तिरीयादिसर्वशाखिनामपि। अनुक्तत्वात्। तेषामपिप्रथमक
ल्पोक्तपङ्क्तिपावनत्वाद्यसंभवेनप्रथमकल्पोक्तब्राम्हणाभावेनतत्प्रदिपादकशास्त्राणांअप्रामाण्यप्रसंगः। दु
र्वारोभवति। केचित्तुमुख्यब्राम्हणासंभवेस्वदेहसंबंधिनः मातुलादेः श्राद्धभोजनीयत्वंवदंतितदपिनिराकृ
तमेवतथापिशास्त्रतात्पर्यमुख्यविषयत्वंप्रदर्शयितुंपुनरपिसंक्षेपतोवक्ष्यते॥ ॥ तद्यथा॥ मनुनातु। नमि
त्रंभोजयेच्छ्राद्धे इत्यादिनामित्रादीनांनिमंत्रणंनिंदित्वा। पुनःस्वयमेवअनुकल्पानुकल्पाभिप्रायेणकामंश्राद्धे
र्चयेन्मित्रमित्यादिना। मुख्यगौणब्राम्हणात्यंताभावपक्षे। अनुकल्पानुकल्पत्वेनपूर्वनिषिद्धंमित्रमपिभोजये
त्। नतुश्राद्धंत्यजेदित्यभिप्रायेणाह। तावन्मात्रेणस्वदेहसंबंधिनएवभोजयितव्याइतिमुख्यतात्पर्यंनास्ति
॥ ॥ यद्येतेगुणवत्तराइतिब्राम्हणातिक्रमोनास्तीतिविद्याशीलादिगुणवत्वेकुष्ठित्वकाणत्वादिशरीरदोषा

प्र॰शा॰

४२०

णांनदूषकत्वमिति॥इत्यादिनांगुणानामेवयोग्यताप्रयोजकत्वेनसर्वशास्त्रेषु।असकृत्प्रदर्शितत्वात्॥ ॥
मनुस्मृतौतृतीयाध्यायेमूलं॥अपाङ्क्त्योयावतःपाङ्क्त्यान्भुंजानाननुपश्यति।तावतांन्नफलंप्रेत्यदाताप्राप्नो
तिबालिशः॥ ॥१७६॥विंशत्यांधोनवतेःकाणःषष्टेःश्वित्रिशतस्यतु।पापापरोगीसहस्रस्यदातुर्नाशयतेफलं
॥१७७॥अस्यव्याख्यानं॥ ॥वीक्ष्येतिअंधस्यवीक्षणासंभवाद्वीक्षणयोग्यदेशेसंनिहितोसौपाङ्क्त्यानांनवते
र्भोजनफलंनाशयति॥एवंकाणइत्यादिना॥निषिद्धस्यपङ्क्तिप्राप्तिमात्रेणदोषश्रवणात्॥तथाच॥निर्णय
सिंधौतृतीयपरिच्छेदेश्राद्धप्रकरणे॥ ॥हेमाद्रौव्यासः॥ ॥काणाःकूटाश्चकुब्जाश्चदरिद्रव्याधितास्तथा।
सर्वश्राद्धेनियोक्तव्यामिश्रितावेदपारगैरितिच॥ ॥वेदपारगादिगुणवद्योग्यपङ्क्तिप्राप्तिमात्रेणतुनिषि
द्धानामपि।पाङ्क्तेयत्वप्राप्तिर्भवति॥इत्यनेनापि।गुणवद्योग्यतायाएवश्राद्धनिमंत्रणप्रयोजकत्वंस्पष्टत
याप्रतीयते॥ ॥प्रस्तुत॥ ॥संभोजनीनामपिशाचभिक्षेति॥ ॥आपस्तंबसूत्रेण॥ ॥संभोजनीसाभि
हितापैशाचेतिमनुवचनेनचसंबंधाभिप्रायेणश्राद्धनिमंत्रणेदोषश्रवणात्यत्तु।प्रत्युपकारार्थंफलमुद्दिश्य

नि॰

रामः

१९

वा पुनः। दीयते च परिक्लुष्टं तत्तामसमुदाहृतं इति भगवद्गीतावचनेनापि यत्किंचित्संबंधाभिप्रायेण दानमा
त्रस्य दूषितत्वाच्च। मातुलादिदेहसंबंधिनः मुख्यपक्षोक्तब्राम्हणाभावे भोजयितव्या इत्यभिवदनमज्ञानाभिप्र
युक्तमेवेति निश्चीयते॥ ॥ वस्तुतस्तु सर्वकर्मापेक्षया सर्वदानापेक्षया सर्वयज्ञापेक्षयापितृकर्मात्मकपि
तृयज्ञरूपश्राद्धदानस्य सर्वोत्कृष्टत्वेन सर्वशास्त्रमुख्यतात्पर्यविषयत्वात्॥ ॥ तथा च मनुस्मृतौ तृतीया
ध्याये २०० ॥ श्लोकः॥ ॥ ऋषिभ्यः पितरो जाताः पितृभ्यो देवदानवाः। देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपू
र्वशः॥ ॥२००॥ राजितैर्भाजनैरेषामथो वा राजतान्वितैः। वार्यपि श्रद्धया दत्तमक्षयायोपकल्पते॥२०१॥ दे
वकार्याद्द्विजातीनां पितृकार्यं विशिष्यते॥ दैवं हि पितृकार्यस्य पूर्वमाप्यायनं स्मृतं॥२०२॥ इत्यादिवाक्यैः पि
तृकर्मण एव सर्वोत्कृष्टत्वेन मुख्यत्वात्॥ तथैव॥ मनुस्मृतावेव तृतीयाध्याये श्राद्धप्रकरणे॥ ॥ मू॥ ॥
दूरादेव परिक्षेत॥ ब्राम्हणं वेदपारगं। तीर्थं तद्धव्यकव्यानां प्रदाने सोतिथिः स्मृतः॥१३०॥ इति॥ ॥ अस्य
व्याख्यानं॥ ॥ दूरादिति दूरादेव पितृपितामहाद्यभिजनश्रुति निरूपणेन। कृत्स्नशाखाध्यायिनं। ब्राम्ह

प्र.शा.

४२१

णंपरिक्षेत यस्मात्तथाविधो ब्राम्हणो हव्यकव्यादीनां तीर्थं पात्रं प्रदाने सोतिथिरेव महाफलप्राप्तेः हेतुत्वात् ॥
॥१३०॥ मनुस्मृतौ निर्णयसिंधौ च। न ब्राम्हणं परिक्षेत दैवे कर्मणि धर्मवित्। पित्र्ये कर्मणि तु प्राप्ते परिक्षेत प्र
यत्नतः इत्यादिनापि पितृकर्मणः पितृ पितामह प्रभृति बहुपुरुषपर्यंतं श्रुत्यधत्वविचारस्योक्तत्वात्। देवकर्मणः
। विश्वेदेवस्थान ब्राम्हणस्य च तादृशपरीक्षायाः अनपेक्षत्वश्रवणाच्च श्राद्धस्यैव सर्वप्राधान्यात्। तादृशश्रा
द्धभोजनीयब्राम्हणकोटौ वाजसनेयिब्राम्हणानामपि। पूर्वप्रदर्शितमार्गेण। बहुविधात्मकप्रकारेण प्रवेश
स्य अनपायात्॥ अपि च॥ कथंचित्। असूयया वाजसनेयिब्राम्हणविषये श्राद्धनिमंत्रणरूपकार्यस्य। तव
संमतत्वेपि। पूर्वोक्तमन्वादिवचनेषु। श्रोत्रिय इति। एकशाखाध्येतृत्वेन पंचाग्निरिति आहवनीयादि। स
भ्यावसथ्याग्न्यंत। पंचाग्निमत्वेन रहस्यविदिति। स्वशाखोपनिषदध्येतृत्वेन योगीति चित्तनिरोधकत्वेन।
ज्ञानीति आत्मज्ञानवत्वेन तपस्वीति शास्त्रोक्तकृच्छ्रचांद्रायणादिशास्त्रोक्ततपोनुष्ठातृत्वेन॥ पूर्वोक्तस्मृतिवाक्यो
क्तमुख्यब्राम्हणासंभवे काणकुष्ठ्यादिपूर्वोक्तनिषिद्धब्राम्हणान्विहाय। अनिषिद्धब्राम्हणानपि श्राद्धे भो

जयेदित्यर्थकनिर्णयसिंधुधर्मसिंधुविज्ञानेश्वरादिलघुस्मृतिवाक्येषु। प्रतिपादितत्वेन प्रतीयमानत्वात्॥ न तस्य
पिवाजसनेयिब्राह्मणानां काणकुष्ठ्यादिनिषिद्धकोटावप्रविष्टत्वात् श्राद्धभोजनीयत्वं बलात् प्राप्तं एतदर्थबाधक
स्मृतिवाक्यव्याख्यानेषु मुख्यब्राह्मणप्रतिपादनेनैव तद्व्यतिरिक्तसर्वब्राह्मणानामपि निषेधसिद्धौ पुनः काणः
कुष्ठी रोगीत्यादिवाक्यैः एते पङ्क्तिदूषका इति विशेषाकारेण किमर्थं निषेधः प्रवृत्तः इत्याशंकां कृत्वा मुख्यब्राह्मणा
भावे मुख्यद्रव्याभावे मुख्यकालाभावे निषिद्धब्राह्मणद्रव्यकालादीन् विहाय। अनिषिद्धब्राह्मणद्रव्यकालादीन् गृ
हीत्वा॥ श्राद्धं कुर्यादित्यभिप्रायेण विशेषाकारेण ब्राह्मणादिनिषेधः प्रवृत्तः इति समाधानं कृतं॥ ॥ एतेनापि हेतुना च
वाजसनेयिब्राह्मणानां श्राद्धनिमंत्रणं सिद्धं भवति॥ ॥ अन्यैश्च पूर्वोक्तशास्त्रेषु प्रतिपाद्यगुणैर्विशिष्टत्वेन च। वाजस
नेयब्राह्मणानां श्राद्धनिमंत्रणे शास्त्रतात्पर्यवत्वस्य त्वयात्वत्सदृशैर्बहुभिश्च शास्त्रन्यायेन निराकर्तुं न शक्यते॥
अतः। आवश्यकतया एतेषामपि॥ सर्वशाखिनामिव मुख्यत्वेन। श्राद्धनिमंत्रणस्य शास्त्रतात्पर्यविषयत्वात्॥
श्राद्धापेक्षया भोजनप्रतिभोजनाध्ययनाध्यापन। यजनयाजनादीनां उत्कृष्टत्वाभावात् श्राद्धनिमंत्रणस्य शा॰

स्तत्रगाक्षी अन्येषां अध्ययनाध्यापनादिव्यवहाराणां यत्किंचिन्यूनत्वमपि नास्तीति किंसुवक्तव्यं॥ ॥ ननु त्वया एवं साधिते पि वाजसनेयिब्राह्मणानामपि श्राद्धनिमंत्रणे विशेषेण॥ तद्वाचकशब्देन विधानं कुत्रापि न दृश्यते। इति चेत्॥ सत्यं॥ ॥ तवाभिमतानुसारेण तैत्तिरीयवाचकशब्दस्य ऋग्वेदांतर्गतकौषीतवाक्यादि। शाखीय्य सामवेदांतर्गत। तलवकारादिशाखीय्यब्राह्मणवाचकशब्दस्यापि। एतद्विषये। विधायकत्वेन कुत्राप्यदृष्टत्वात्॥ एवं ऋग्वेदयजुर्वेदसामवेदाथर्वणवेदाद्यांतरशाखाप्रविष्टब्राह्मणवाचकश्राद्धनिमंत्रणविधायकशब्दस्यापि। यत्रकुत्रापि अदृष्टत्वाच्च॥ अयं त्वयोक्तदोषस्तु सर्वशाखिनां समान एव सन् प्रतीयते॥ अपितु॥ यजुर्वेदिनः। ऋग्वेदिनः। सामवेदिनः। अथर्वणवेदिनः। भोजयितव्याः। इतितु। सर्वत्र प्रतीयते। तस्मात्। सर्वैः समानः दोषः। अस्मत्पक्षे त्वया नो द्धाटनीय एव। तथापि। वाजसनेयिब्राह्मणविषयक्कचित्। प्रामाणिकग्रंथे। पङ्क्तिपावनत्वेन श्राद्धीयभोजनविधाने स्फुटतया ग्राह्यत्वं अबाधितत्वेन प्रतीयत एव। तथा च सामशाखाधर्मसूत्रात्मकसर्वशाखिद्विजानुष्ठापक अष्टादशमूलस्मृत्यंतर्गतगौतमधर्मसूत्रभाष्यात्मकमस्करीयाख्यसर्वा

नुगृहीतप्रामाणिकग्रंथे॥ ॥द्वितीयप्रपाठके॥ ॥पंचदशाध्यायात्मकपंचदशखंडे॥ ॥श्राद्धभोजनीयपङ्क्तिः
पावनब्राह्मणलक्षणनिरूपणप्रस्तावे॥ ॥यथाहवसिष्ठ इत्यत्र॥ ॥त्रिनाचिकेतः।पंचाग्निः।त्रिसुपर्णः।चतु
र्मेधाः।वाजसनेयी।षडंगविच्छंदोगोज्येष्ठसामिको मंत्रब्राह्मणविद्यस्त्व धर्मानधीते।यस्यच॥दशपुरुषं।मातृपि
तृवंशश्रित्रितपोविज्ञायते।विद्वांसःस्नातकश्चैते पंक्तिपावनाभवं तीत्येवमादीनांस्मृत्यंतरोक्तानामप्युपलक्षणार्थे
हविषुचैवंहविः॥अभ्युदयकर्मसुबहुवचनंनकेवलंपित्र्यंगभूतेषु दैवएव किंतर्हिसर्वाभ्युदयेष्वपीतिचशब्दादेवसि
द्धएवंशब्दःपरिश्रितपंक्तिपावनार्थः। इति। कंठरवेणापि।वाजसनेयिवाचकशब्दस्यापि।श्राद्धभोजनीयब्राह्म
णपंक्तिपावनकोटौ। निविष्टत्वेन।प्रतिपादनंदृश्यतएव।नचबहुग्रंथेषुएवंनदृश्यते। किंतुएकस्मिन्ग्रंथे [illegible]
निवाच्यं।तत्पक्षेएकस्मिन्ग्रंथेपि।तथातैत्तिरीयादिशाखिब्राह्मणवाचकशब्दस्यश्राद्धभोजनीयविष[illegible]
त्।तदपेक्षयाएकस्मिन्नेव।तद्वाचकशब्दस्यदर्शनमुत्तममितितत्पानगृहीतमितिलोकेकश्चित्[illegible]नस्स
न् अयंएकवस्त्रवानिति।अन्यंपुरुषमुद्दिश्य अपहासंकृतवानितिगाथान्यायमनुकरोति॥ अपिच।[illegible]कस्यचि

प्र·शा

४२३

वा

त्पुरुषस्य अन्यः कस्यचित्पुरुषः गृहभूमिं दत्तवान्। तद्भ्रातुः। मरणानंतरं तत्पुत्रः इदं भूतलं मम पिता। न दत्तवान्
त्वयैव बलात्कारेणापहृतमिति विवदं कुर्वन् स्थितः तदानीं एतौ वादिप्रतिवादिनौ। सभां गत्वा एतद्वृत्तांतं निवेदित
वंतौ लेखनसाक्ष्यादिकं किमपि प्रमाणं नासीत् एवं स्थिते तद्विचारप्रवृत्ते सति। अन्यतरनिश्चायकहेत्वभावेन। सं
दिग्धे सति। अन्यः कश्चित्। तद्गृहभूतलसमीपगृहवान् स्वपुत्रयोः द्वयो ——— स्वगृहस्वपदार्थान् विभागं कृत्वा। व्य
वस्थाकरणदशायां विभागपत्रिकायां पूर्वविवादग्रस्तभूतलसमीपस्थितस्वगृहं स्वज्येष्ठपुत्राय अन्यप्रदेश·
स्थितस्वकीयमन्यगृहं। कनिष्ठपुत्रायेति व्यवस्थां कृत्वा तल्लेखनदशायां पूर्वविवादग्रस्त समीपस्थित
गृहं। ज्येष्ठपुत्रायेति लेखनकरणे देवदत्तेन यज्ञदत्तस्य दानप्राप्तगृहद्वास्यणदेशे स्थितगृहं। ज्येष्ठपुत्राय। तद्भि
न्नान्यगृहं। कनिष्ठपुत्रायेति लेखनेन दर्शितवानासीत्। तयोः। ज्येष्ठकनिष्ठपुत्रयोः। पितृमरणानंतरं एतद्गृहं
ममभागप्राप्तं एतद्गृहं ममभागप्राप्तमिति तयोः एकमेव गृहमुद्दिश्य विवादः प्राप्तः। तावपि
। विवदंतौ। सभां प्राप्य स्वस्वविवादनिवेदनवेलायां ज्येष्ठपुत्रः। स्वभागप्राप्तगृहसाधनार्थं पित्रालिखितविभाग

रर

प्रतिकांसभांप्रतिदर्शयामासतस्यांपत्रिकायांपूर्वंविवादगृहदात्रा। देवदत्तेन। यज्ञदत्तस्य। दत्तगृहसमीपस्थं
तद्दक्षिणदेशेस्थितं। ज्येष्ठपुत्रायेतिलिखितंसभास्थाः। सर्वैर्दृष्ट्वा पूर्वंविवदमानयोःसाक्ष्यादिप्रमाणज्ञाना
भावेपि। अर्थात्। उत्तरविवदमानयोः भ्रा[illegible]ः मृतपित्रालिखितविभागपत्रिकायांदेवदत्तेनयज्ञदत्तस्यदत्तगृ
हाद्दक्षिणतः स्थितगृहंज्येष्ठपुत्रायेतिसाक्षिरूपतयापूर्वविवादस्यनिर्णायकहेतुरभूदितिसर्वैश्चालोच्य पू
र्वविवादंपरिहृत्य अन्यतरनिर्णयंकृतवंतः। इतिलौकिकगाधान्यायमनुसृत्य अर्थोस्मास तटस्थरूपसर्व
लोकगृहीतप्रमाणभूतशंकरभगवत्पादाचार्यविद्यारण्यविज्ञानेश्वरादिशाक्कालीनमस्करिणाकृतभाष्यग्रं
यात्मकस्वल्पन्यूनत्रिशतवर्षीसाक्षा। लिखितपुस्तकस्यगौतमधर्मसूत्रभाष्यलक्षणमस्करीपवचनबले
नापितवममभत्र। वाजसनेयिब्राह्मणानांश्राद्धभोजनादियोग्यतास्तिनास्तीतिविवादहेतुस्सम्यग्निरस्तः॥ ॥
एतद्गौतमसूत्रभाष्यमस्करीयाख्यपुस्तकं मैसूराख्यनगरस्यपूर्वदिग्भागे पंचक्रोशांतेकावेरीकपिलासं
गमसमीपस्थितगर्गेश्वराख्यग्रामेसामगलक्ष्मीनारायणश्रौतिगृहेवर्तते॥ ॥एतन्मूलपुस्तकं श्रृंगेरीश्रीम

प्र॰शा॰ शंकरभगवत्पादाचार्यमठेसरस्वतीकोशेवर्ततइति एतत्पुस्तकलेखनकर्ता कर्नाटकभाषायांशालिवाहनश नि॰
काब्दद्वादशोत्तरपंचशतविशिष्ट एकसहस्रसंख्याकविकृति।संवत्सरेमार्गशिरमासेशुक्लपक्षेपंचम्यांशृंगेरि
पीठस्थश्रीवृद्धनरसिंहभारतीस्वामीनांआगमनवेलायांश्रीरंगपटणेमंड्याख्यग्रामस्थतिरमलभटहस्ते
नलेखयित्वा।इदंमस्करीयपुस्तकंस्वामिनः।शृंगेरीसरस्वतीकोशेस्थापयितवंतइति एतत्पुस्तकंतालपत्रे
लिखितंवर्तते।कस्यचित्संशयोजातश्चेत्।एतदर्थः नेनपरीक्षणीयः॥ ॥एवंविस्तारेणशास्त्रार्थप्रतिपादने
सत्यपिपूर्वोक्तरीत्यावाजसनेयिनांस्वश्रेष्ठत्वव्यवहारप्रयुक्ततदितरसर्वशाखाप्रविष्ट।ब्राह्मणद्वेषनिमित्त
ककल्पितकालिकाखंडसहकृतैकदेशस्थमूढव्यवहारवासनावासितांतःकरणवतांयथावत्ज्ञानंसद्यः
।नजायते।तत्पूर्ववासनायाःप्रतिबंधकत्वात्।तत्प्रतिबंधकरूपवासनायाअपिप्रतिबंधकलक्षणउत्तेज
कस्यानापन्नशास्त्रन्यायजन्यसद्वासनायाःउत्पादनार्थंपूर्वग्रंथस्थन्यायादिप्रदर्शनपूर्वकंवक्ष्यमाणप्रमाणक
हेतु।न्यायादिसाधनानिप्रदर्श्यंते॥ तथाहि॥ पूर्वप्रकृतप्रतिपाद्यार्थदृष्टांतत्वेन उत्तरमिमांसाख्यंवदंति

वह्मसूत्रद्भाष्यादिषु। सिद्धोन्यायः प्रथमाध्यायेतृतीयपादे अपशूद्राधिकरणेप्रतिपादनक्रमानुसारेण।
देवानांकर्माधिकारोनास्ति।उपनयनादिसंस्काराद्यभावात्।कर्मप्रयोजक।अर्थित्वसामर्थ्याद्यभावाच्चेति
पूर्वाधिकरणेषु।साधितेसति।विद्यायामपि।तेषांअधिकारोमास्तुकर्मप्रयोजकअर्थित्वसामर्थ्यवेदाध्ययना.
दिसामग्र्यभावात्।इतिपूर्वपक्षेप्राप्तेतदुपर्यपि।बादरायणसंभवादित्यादिसूत्रैः देवानां वेदाध्ययनाभा
वेपिऐश्वर्यमहिम्नास्वयंप्रतिभातवेदानांउपनयनादिसंस्कारानपेक्षत्वेनसंस्काराभावेपिचब्रह्मविद्यायां
श्रुतिलिंगादिप्रमाणबलेनमुमुक्षुत्वादि।अर्थित्वाधिकारप्रयोजकसामर्थ्यादिसत्वेनब्रह्मविद्याधिकारस्संभ
वत्येवेति।व्यासेन।निर्धारितेसति।तदुपरिदृष्टांतेनउपनयनादिसंस्काराभावेपिवेदाध्ययनाभावेपिचवैदि
कविद्यायांशूद्रस्याप्यधिकारोअस्तीतिपुनः।पूर्वपक्षेप्राप्तेशूद्रस्यशूद्रोयज्ञेःनवक्लृप्तइतिशास्त्रबलेनउप
नयनादिसंस्काराभावसहकृतवेदाध्ययनश्रवणप्रतिषेधबलेनशूद्रोवैदिकविद्यायांनाधिक्रियतइति साधना
र्थंव्यासेनैवअपशूद्राधिकरणसूत्राणिप्रणीतानितेषु॥शुगस्यतदनादरश्रवणात्तदाद्रवणात्सूच्यतेहि॥ २४

क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात् ।।२५।। संस्कारपरामर्शात् तदभावाभिलापाच्च ।।२६।। तदभावनिर्धा
रणेचप्रवृत्तेः ।।२७।। श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ।।२८।। इत्यादिषुसूत्रेषु। शूद्रस्यवैदिकविद्यास्वन
धिकारः साधितः ।।तद्यथा।। छांदोग्योपनिषदि ।। संवर्गविद्यायांजानश्रुतिंपौत्रायणंप्रतिरैक्वः ।। अहह अरेशूद्र
इतिशूद्रशब्देन आहूयसंवर्गविद्यामुपदिष्टवानितिउक्तत्वात्। शूद्रस्यापिवैदिकविद्याधिकारःश्रूयते।। अनयो
र्विरोधइतिप्राप्ते। तच्छूद्रशब्दस्ययौगिकत्वेनजानश्रुतिपौत्रायणेऽपिक्षत्रियेवृत्तिसंभवतीतिकृत्वा। तच्छूद्र
स्यावयवव्युत्पत्त्यालिंगैरपिजानश्रुतेः क्षत्रियत्वसाधनेप्रवृत्तोव्यासः ।। क्षत्रियत्वगतेश्चोत्तरत्रचैत्ररथेनलिंगा
दितिसूत्रेणशौनकस्यकापेयस्यप्रायेणक्षत्रियाणांपुरोहितवंश्याएवयाजकाभवंतीति चैत्ररथपुरोहितवंश्य
त्वंकापेयस्यप्रसाध्यकापेयाःचित्ररथंअयाजयन्निति चित्ररथस्ययागकर्तृत्वश्रवणेनतस्यक्षत्रियत्वंप्रसा
ध्यकाक्षसेनेस्तद्वंशप्रभवत्वेनचैत्ररथत्वंज्ञापयित्वा। एतैर्हेतुभिः चैत्ररथस्यक्षत्रियत्वंप्रसाध्य। तस्यजान
श्रुतेःपौत्रायणस्यच। एकस्यामेव संवर्गविद्यायांसहाधिकारश्रवणबलात् जानश्रुतेःपौत्रायणस्यक्षत्रिय

त्वंसाधितवान् ।रैक्कंप्रतिगोहिरण्याश्वकरीरथादिकंदत्वास्वतत्वांस्ज्ञानस्रुतिः प्रेषयामासेतिऐश्वर्ययोगलिं
गेनबहुदायीबहुवाक्यः इतिश्रुत्यागोहिरण्ये अन्नादिकंब्राह्मणेभ्योददानीतिप्रसिद्धेः तदन्नादिकंब्रा
ह्मणैर्गृहीतमितिचलिंगेनतस्यक्षत्रियत्वंदृढीकृत्यशूद्रशब्दवाच्यत्वंरूढ्यामुख्ययावृत्यानसंभवतीति
निश्चित्यशूद्रस्यवैदिकविद्याधिकारोनसंभवतीत्युक्त्वानस्यामेवोपनिषदिचतुर्थप्रपाठकेसत्यकामोजाबा
यना। लोउपनेयार्थंगौतमंप्रतिगतवान् ।।अस्यब्राह्मणत्वशूद्रत्वसंशयेप्राप्तेशूद्रत्वाभावनिर्धारणार्थंपरीक्ष्यस
त्यवदनलिंगेनशूद्रत्वाभवंनिश्चित्य।सत्यकामस्जाबालस्यगौतमःउपनयनंकृतवानितितच्छ्रुत्याप्रतिपा
दितमर्थंतन्निर्धारणेचप्रवृत्तेरितिसूत्रेण।।शूद्रस्यवैदिकविद्याप्रयोजकउपनयनाध्ययनाधिकाराभावंदृढयि
त्वा।तद्रुपोद्बलकत्वेनसंस्कारपरामर्शात् तदभावाभिलापाच्चेतिसूत्रेणश्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्चे
तिसूत्रेणचशूद्रस्यअधिकाराभावःयथानिर्धारितवान्तथैवयाज्ञवल्क्यादीनांअयोग्यताभावनिर्धारणार्थंपूर्वोक्तश्रुतिविष्णु
पुराणभागवतमहाभारतमन्वादिस्मृतिआपस्तंबगौतमादिसूत्रभाष्यव्याख्यानपराशरमाधवीयादिनिबंधनादिग्रंथःपूर्वोक्त

रमीमांसा लौकिकन्यायानुमानादिप्रमाणैश्चप्रतिपादितग्रंथसंदर्भेणक्रोडीकृतार्थसंक्षेपस्तु याज्ञवल्क्यकण्वमाध्यं
दिनकात्यायनानांशापप्राप्तिरेवाप्रसिद्धा॥ प्रत्युत॥ पूर्वोक्तसाधितप्रकारेणअप्रसिद्धएकदेशस्थकल्पितकालि
काखंडवाक्यतदर्थजातीयमूढजनप्रवादानुसारिचंडालत्वप्रापकनिमित्ताख्यापिकाविचारे॥ विष्णुपुराण
श्रीभागवतादिषु याज्ञवल्क्यवैशंपायनयोः वाङ्मात्रेणवैमनस्यवशात् वैशंपायनोक्तप्रकारेण तस्मादधीत
यजुर्वेदभागच्छर्दिपूर्वकआदित्याभिगमनं तत्सकाशादध्ययनं याज्ञवल्क्येनकृतमित्येवार्थः॥ स्पष्टतया इ
दानीमपिप्रतीयते॥ अन्यत्रयत्रकुत्रवा॥ शापप्रसक्तिहेतुः। शापेनचंडालत्वप्राप्तिर्वानदृश्यते॥ अन्यच्चमू
ढलौकिकैः कचिद्देशस्थैकदेशजनैः शापप्राप्तचंडालत्वमपिमध्यान्हेकदेशघटिकाद्वयादिकालविशेष्वेव।
अनुभवेनैवनिवर्त्यतइत्यपियत्। तत्प्रवादस्यमूलभूतंप्रमाणं यत्रकुत्रापिनलभ्यते॥ कल्पितकालिकाखंड
वाक्येपि अयमर्थः नदृश्यते। कण्वमाध्यंदिनकात्यायनानांतु। याज्ञवल्क्यसहाध्यायित्वेनवैशंपायननिकटे।
अध्ययनंतदानीमेववैशंपायनेनचतुर्णामपि। एककालावच्छेदेनचंडालत्वप्रापकशापप्राप्तिरितितु। येनके

नापिप्रमाणे नयत्रकुत्रापिग्रंथे। शशविषाणतुल्यत्वेन नदृश्यत एव। आहूतनिमंत्रणादिविषयेष्वपि। तच्छाखि
नां वाजसनेयिब्राह्मणानां योग्यता नास्तीति कैश्चित् शास्त्रानभिज्ञैरुच्यते। तदपि आदिपुराणरूपप्रमाणेन
। अतीवमाहात्म्यप्रतिपादनपूर्वकं आहूतनिमंत्रणादिसर्वदानपात्रत्वेनप्रतिपादनं विनापि। मन्वादिस्मृतिषुगौ
तमापस्तंबबोधायनादिसूत्रेषु। तद्भाष्यमाधवीयादिनिबंधेषुच। पूर्वग्रंथेषु। विस्तारतयासाधितप्रकारेणआ
वश्यकतया। ऋगादिशाखिनामिवसर्वदानयोग्यत्वेन। गौतमसूत्रभाष्यरूपमस्करीयोक्तरीत्यापंक्तिपावन
त्वेन। आहूतनिमंत्रणे। वाजसनेयिनां। विशेषविधिबलादपि। सर्वदानपात्रत्वं। गणान्नगणिकान्नादिभोजन
निषेधकोटौ। स्मृत्यादिग्रंथेषुकुत्रापि। वाजसनेयिनां अप्रवेशात्॥ एतदन्नभोजने प्रायश्चित्तकांडे। कुत्रापि
स्मृतिग्रंथेषु। प्रायश्चित्तविधानाश्रवणात्। एतैस्सह। यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहादिव्यवहा
रस्यस्मृत्यादिषुकुत्रापि। निषेधस्य अप्रतीयमानत्वात्। प्रत्युत क्वचित्क्वचित्सामान्याकारेण विशेषाकारेणवा।
शब्दतः। न्यायतः। यजनयाजनादिषट्कर्मव्यवहारस्य। अन्यसर्वशाखिभिस्सह। वाजसनेयिनां। एतैस्सह

तेषांच अ वश्यकर्त्तव्यतयाबलाल्लभ्यत्वाच्च। वाजसनेयि। ब्राह्मणानांसर्वप्रकारेणापीतर शाखिब्राह्मणस
मानत्वेन कादिदनुपपत्तिस्संभवतीतिसाधितं॥ कालिकाखंडस्थकल्पितवाक्यस्य पूर्वोक्तरीत्याश्रुतिस्म
ति।भारतपुराण। मीमांसादिन्याययुक्त्यनुभवादिभिः वहुप्रमाणैः।अप्रमाण्यंचसाधितं। इतिहेतोःपुनःतद्रू
पप्रमाणस्य। अत्रउदाहरणीयत्वासंभवात् तेनइदानींकृतसिद्धांतस्यनप्रतिबद्धत्वंसंभवति। अपितु।व
स्यमाणबहुप्रमाणबलैः कालिकाखंडवाक्यस्य तदर्थसजातीयशास्त्रविरुद्धव्यवहारस्यचपुनरुत्पत्तिर
हितनिर्मूलन रूपकार्यसंभवात्।प्रोक्तरीत्यावाजसनेयिब्राह्मणेष्वारोपित। अयोग्यतायाः। यदाकदापि।प्र
सक्तिरेवनसंभवति॥ यद्यपि॥बादरायणेन। परमेश्वरावतारवतापि। अपशूद्राधिकरणेजानःश्रुतेःपौत्रा
यणस्य।क्षत्रियत्वसाधने। शूद्रस्यवैदिकविद्याअनधिकारित्वसाधनेच। परंपरयाहेतुतद्धेतुंतद्धेतुतद्धेतुस्वरू
पसाधनद्वाराबहुदूरसाधनप्राप्तिर्ज्ञाता।किमुत।अल्पशक्तिमद्भिरस्माभिः वाजसनेयिनामयोग्यत्वाभा
वसाधनेमहत्प्रयत्नपूर्वकबहुदूरान्वेषणंप्राप्यतइति किमुवक्तव्यं॥ तथापिबादरायणयाज्ञवल्क्य शां

कराचार्यादिस्वरूपभूतपरमेश्वरानुग्रहात्। प्रत्यक्षश्रुति। तदनुगृहीतमन्वादिस्मृति। आपस्तंबबोधायनगौ
तमादि। सूत्रतद्भाष्यव्याख्यानपराशरमाधवीयप्रयोगपारिजातधर्मप्रवृत्ति उज्वला। मस्करीय। मेधातिथीय
। हेमाद्रिनिर्णयसिंधु। धर्मसिंध्वादि। आसेतुहिमाचलांतसर्वप्रसिद्धसर्वजनानुष्ठापकसर्वप्रमाणशिरोमणि
स्थानापन्नग्रंथेष्वेव। अतिसुलभतया अन्वेषणप्रयासराहित्येनैवबहूनांसाधनानांप्राप्तिःसंपाद्यत एव ॥
तथाहि ॥ सर्वोपनिषत्स्वरूपसंख्यादिप्रतिपादकमुक्तिकोपनिषदि ॥ हनुमताप्रष्टः ॥ श्रीरामचंद्रउवाच ॥ ऋ
ग्वेदस्य तुशाखास्युरेकविंशतिसंख्यया ॥ नवाधिकशतंशाखा यजुषोमारुतात्मज। सहस्रसंख्यया जाताःशा
खासाम्नःपरंतप ॥ ॥अथर्वणस्यशाखास्युःपंचाशद्भेदतोहरे। एकैकस्यास्तुशाखायाएकेकोपनिषन्मता ॥
तासामेकामृचंयेनपठ्यतेभक्तितोमयि ॥ समस्सायुज्यपदवींप्राप्नोतिमुनिदुर्लभां ॥ इत्यादिवाक्यैः यजुषः
नवाधिकशतसंख्याकाः उपनिषद इति। सामान्यतो यजुर्वेदस्येति तैत्तिरीय। वाजसनेयोभय साधारण्येन
यजुःशब्दप्रयोगात्। काश्चिदुपनिषदः। शुक्लयजुः शाखात्मकवाजसनेयिशाखागताः। काश्चित्। तैत्तिरी

यशारवागताः । इति । विभागस्य संख्यावाचकशब्दाभावेपि ॥ तासु श्रीरामचंद्रेण सारतरोपनिषदः । अष्टोत्तरसं
ख्याकाः उपदिष्टाः तासु शुक्लयजुषः एकोनविंशतिसंख्याकाः उपनिषदः ॥ कृष्णयजुषः द्वात्रिंशत्संख्याकाः
उपनिषद् इति उपदिष्टाः ॥ तथाच ॥ श्रीरामचंद्रवचनं ॥ अथ हैनं श्रीरामचंद्रं मारुतिः । पप्रच्छ । ऋग्वेदा
दि विभागेन पृथक् शांतिमनुब्रूहीति ॥ सहोवाच श्रीरामः ॥ ऐतरेयकौषीतकीनादबिंद्वात्मप्रबोधनि
र्वाण मुद्गलाक्षमालिका त्रिपुरासौभाग्य बह्वृचानां ऋग्वेदगतानां दशसंख्याकानामुपनिषदां वाङ्मेम
नसीति शांतिः । ईशावास्य बृहदारण्य जाबाल हंस परमहंस सुबाल मंत्रिक निरालंब त्रिशिखीब्राह्मण मंडल
ब्राह्मणाद्वैततारक पैंगल भिक्षु तुरीयातीताध्यात्म तारसार याज्ञवल्क्य शाट्यायनि । मुक्तिकानां ।
शुक्लयजुर्वेदगतानामेकोनविंशतिसंख्याकानामुपनिषदां पूर्णमद इति शांतिः ॥ एतदुक्तप्रकारेण अष्टो
त्तरशतसंख्यांतर्भूतत्वेन शुक्लयजुषः एकोनविंशतिसंख्याकत्वेपि । पूर्वोक्त सहस्रसंख्योपयुक्तोपनिष
त्सु यजुषः नवाधिकशतसंख्याकासु शुक्लयजुषोपि एकोनविंशत्संख्यया अधिकसंख्याकाः उपनिषदः शुक्लयजुषो भवं

तीति वक्तव्यं भवेत्। एतावता। वाजसनेयिशाखायाः। एतावत्संख्याकोपनिषदामपि वेदवेदांतत्वेन सर्वैः ब्रा
ह्मणैः गृहीतव्यस्यावश्यंभावित्वात्। चतुर्वेदविभागकरणपूर्वकं पैलादिशिष्यद्वारा सर्ववेदप्रवर्त्तकपुराण
भारतेतिहासस्मृतिकर्तृव्यासशिष्यजैमिनिद्वारा पूर्वमीमांसाशास्त्रे। व्यासरूपेण उत्तरमीमांसात्मकब्रह्मसू
त्रकर्तृविष्णववतारएवतां व्यासेनैव ब्रह्मसूत्रात्मकवेदांतमीमांसाशास्त्रे च शुक्लयजुर्गतईशावास्यबृहदारण्य
जाबालादि उपनिषदां संहिताशतपथब्राह्मणादीनां च प्रमाणत्वेन वेदांतांतर्भूततया पूर्वमीमांसांतर्भूततया
च विषयवाक्यकोटौ प्रवेशयित्वा। विचारः कृतः। इतोपि हेतोः। तच्छाखाप्रवर्तकस्य याज्ञवल्क्यस्य तदवांतर
शाखाप्रवर्तकानां कण्वमाध्यंदिनादीनां तच्छिष्यपरंपरया तच्छाखाध्येतृवाजसनेयिब्राह्मणानां च अयोग्य
ताभावः। स्पष्ट एव। अन्यथा मूढव्यवहारानुसारेण। एतेषां शापादिदोषयुक्तत्वे तादृशव्यासेनैव। सुषुप्त्यु
त्क्रांत्योर्भेदेन॥ प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः॥ ॥उत्क्रमिष्यत एवं भावादित्यौडुलोमिः॥ ॥अवस्थितेरि
तिकाशकृत्स्नः स्पष्टो ह्येकेषां॥ असत्यन्ने॥ ॥पत्यादिशब्देभ्यः॥ ॥स्वाप्ययसंपत्त्योरन्यतरमाविष्कृतं हि अ

प्र॰शा॰

५२८

मनंतिचैनमस्मिन्॥ इत्यादिबहुसूत्रेषुजैमिनिकृतपूर्वमिमांसासूत्रेषु तद्वृत्तिकृततद्भाष्यकृताशवरस्वा
मिनाचविषयवाक्यत्वेन। बृहदारण्यलघुजाबालतदवांतरकाण्वमाध्यंदिनपाठशतपथब्राह्मणादिवा
क्यानांबहुशोउदाहरणीयत्वेनप्रामाणिकग्रंथेषुस्वीकारोत्यंता।संगतएवभवेत्॥ तथैवलघुजाबालो
पनिषदाख्यशुक्लयजुः।शाखांतर्भूतशाखाविशेषब्राह्मणैकदेशोपनिषदि।बृहस्पतिरुवाच॥ याज्ञवल्क्य
मिति अत्रिःपप्रच्छयाज्ञवल्क्यमिति।जनकःपप्रच्छयाज्ञवल्क्यमित्यादिनाकाशीमाहात्म्यसन्यासविधि
वैश्वानरविद्यारुद्रजपादिमोक्षसाधनप्रश्नोत्तराभ्यांयाज्ञवल्क्यमाहात्म्यंप्रदर्शितं। तथाहि। तस्यामेवो
पनिषदि। बृहस्पतिरुवाचयाज्ञवल्क्यं। यदनुकुरुक्षेत्रमिति। यत्शास्त्रलोकप्रसिद्धं।कुरुक्षेत्रं धर्मक्षेत्रं
।धर्मक्षेत्रेकुरुक्षेत्रइतिगीतोक्तेः देवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनं।ब्रूहीतिशेषः। यदनुइत्य
त्रस्यअनुशब्दःब्रूहीत्यध्याहृतक्रियापदेनसंबध्यते।अन्विति। वेदशास्त्रमनुसृत्यब्रूहीतियावत्।
एवंबृहस्पतिनापृष्टः। याज्ञवल्क्यआह अविमुक्तंवैकुरुक्षेत्रमिति।अविमुक्तंरुद्रव्याप्रसिद्धंअधिभूतका

शीक्षेत्रमेव। अविमुक्तमाश्रितोभवतीति कैवल्यश्रुतेः। काशीखंडेतु विश्वेश्वरेण सह यदा कदा वा न विमुक्त मविमुक्तं। अविनाभावसंबंधेन स्थितमित्यर्थः। प्रदिपादितः। वस्तुतस्तु। विरुद्धामुक्तिर्विमुक्तिः। सालोक्य सामीप्यसायुज्यादिरूपा। भेदघटितगौणीमुक्तिः। सायुज्यस्यापि सयुक् सयुजो। इत्यादौ सयुग्भिः क्रियते। इत्यादि षुच। संबंधविशिष्टस्यैव सयुग्शब्द वाच्यत्वात्। युजुर्योग इति धातोश्च। द्वौ सुपर्णौ सयुजौ इति श्रुतेश्च। सयुग्भिः क्रियत इत्यत्रापि। सयुजा सयुग्भ्यां सयुग्भिरिति। योविद्यया युक् सतु इति भागवते। अपत्यधवयुगिति धर्मप्रवृत्ति प्रयोगात्। संबंधविशिष्टभेदघटितत्वप्रतीतेः। सयुजो भावः सायुज्यमिति व्युत्पत्तेः। विरुद्धामुक्तिर्विमुक्तिरित्य त्रापि विवर्णः। विफलः। विकर्मा इत्यादयो दृष्टांता भवंति। भेदघटितसालोक्यादिसायुज्यांताः मुक्तयः। कैवल्या त्मकब्रह्मैक्यरूपमुख्याद्वैतमुक्तेः। विरोधिन्य एव भवंति। अतः विमुक्तशब्देन। भेदविशिष्टमुक्तयः लक्ष्यंते। न भवति विमुक्तिः सालोक्यादिरूपा। यस्मिन्क्षेत्रे मृतस्य न तत्क्षेत्रं अविमुक्तमिति। तत्र मृतस्य कैवल्यमुक्ति रेव भवतीत्यर्थः। यौगिकेन। व्युत्पत्त्या अधिभूतकाशीक्षेत्रं लक्ष्यत इति कस्मिंश्चिद्ग्रंथे अर्थः कृतः। तस्माद वि-

मुक्तं। शास्त्रलोकप्रसिद्धं। काशीक्षेत्रमेव। वै इति शब्दः शास्त्रलोकप्रसिद्धिं द्योतयति। कुरुक्षेत्रमिति। प्रसिद्ध
कुरुक्षेत्रस्य दानधर्माद्यनुष्ठानाश्रयत्वेन शास्त्रप्रसिद्धेः। कुरुक्षेत्रस्यापि कुरुक्षेत्रं। अविमुक्तं। देवदेवः गुरोर्गु
रुरित्यादिवत्। कुरुक्षेत्रस्यापि कुरुक्षेत्रं। इति तत्क्षेत्रानुष्ठितदानधर्मापेक्षया अधिकफलप्रयोजकमिति सूच्य
ते। सायुज्यशब्दस्य लोके मुक्तित्वेन प्रसिद्धत्वेपि विद्यारण्यगुरुणा तैत्तिरीयकाठके। सावित्रचयनप्रकरणस्य
अनेकेषां सायुज्यशब्दानां। इंद्रस्य सायुज्यं आदित्यस्य सायुज्यं। वायोस्सायुज्यं ब्रह्मणस्सायुज्यमितेषां ता
दात्म्यसंबंधरूपभेदघटितसयोगस्यैव प्रतिपादितत्वात्। कैवल्यरूपऐक्यमुक्तिभिन्नसायुज्यादीनां तद्विरु
द्धत्वमेव सिद्धं भवति। देवानां देवयजनमिति। देवानामिंद्रादीनां देवः विश्वेश्वरः॥ तं देवतानां परमं च दैवतमि
ति श्रुतेः। इंद्रादिदेवनाकर्तृक विश्वेश्वरकर्मक पूजास्थानमित्यर्थः। अत एव काशीखंडोक्तरीत्या। सर्वैर्देवैः प्र
तिष्ठित लिंगानि काश्यां दृश्यंते सर्वेषां भूतानां ब्रह्मसदनमिति। स्थावरजंगमादीनां मरणकाले ईश्वरोप
देशद्वारा। परब्रह्मप्रापकस्थानमित्यर्थः। यथा सदन विश्ववस्तु मास्ति। नियमेन सिद्धा भवति। एवं काश्यामृत

स्य नियमेन ब्रह्मात्मैक्यप्राप्तिसिद्धे वभवतीति यावत्। तदन्नु। तस्माद्यत्र क्वचन गच्छतीति। यस्मात्। का
यिकवाचिककर्मानुष्ठाने यस्य अशक्तिः। अनधिकारो वा भवति। तस्य तदुपासनारूपमानसिकक्रिया विधा
नं दृश्यते। श्रुत्यादौ। तद्यथा। अनधिकारिणः असार्वभौमस्य राज्ञः। अनधिकारिणः ब्राह्मणस्य च। अश्व
मेधादौ। यज्ञविशेषादौ च। तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते। इत्युक्त्वा। तदनधिकारे य उ चैनदेवं
वेद इति। अश्वमेधोपासना उषा वा अश्वस्य मेध्यस्य शिरः इत्यादिप्रकारेण विधीयते। तथा यज्ञविशेषेपि। द्रव्या
द्यसंभवे सोत्र जुहोतीत्युक्त्वा। य उ चैनदेवं वेदेति। तदुपासनापि विधीयते। तस्मादिति संबंधः तस्मादिति श
ब्दानुरोधेन पूर्वं यस्मादिति शब्दः अध्याहर्तव्यः। यस्य काशीवासादिना। काशीमरणासंभवः। सः। यस्मिन्नत्र
देशे वासं करोति। तद्देशमेव द्वयं काशीति। भावनारूपोपासनां कुर्यादिति। तद्भावनाकारं दर्शयति। यत्र क्वचन ग
च्छति तदेव मन्येतेति। इदं वै कुरुक्षेत्रं। देवानां देवयजनं। सर्वेषां भूतानां ब्रह्मसदनमित्यंतं स्वगमनस्ववासप्रदे
शस्यैव। इदं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनमिति। सर्वदा भावयेदित्यर्थः। व्याख्यातार्थे

प्र·शा

४३०

मेवपदजातं। तदेवमन्येते तीत्यत्रस्थइतिशब्दः ब्रह्मसदनमित्यनेन संबध्यते। मन्येतेतिशब्दस्यभावयेदित्य
र्थः। अविमुक्तंवैकुरुक्षेत्रमित्यारभ्यब्रह्मसदनमित्यंतं प्रथमवाक्यं। लोकप्रसिद्धसर्वजनगम्यअधिभूतका
शीविषयं। यत्रक्वचनगच्छतीत्यारभ्यब्रह्म सदनमित्यंतंद्वितीयवाक्यं। भावनाकाशीविषयं। अनयोःअ
धिभूतकाशीभावनाकाश्योः। अन्यतरस्मिन्क्षेत्रमरणेपि परमेश्वरः तारकोपदेशंकरोतीत्याह। अत्रहि
जंतोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकब्रह्मव्याचष्टे। येनासावमृती भूत्वामोक्षी भवतीति। अत्र। अधिभूत
काशीभावनाकाश्योरन्यतरक्षेत्रे। जंतोः। जनिमत्प्राणिनः स्थावरजंगमात्मकवृक्षक्रिमिकीटादिप्राणि
मात्रस्य। प्राणेषुइंद्रियप्राणादिषु। उत्क्रममाणेषुसत्सु रुद्रः रुजंभवरोगंद्रावयति नाशयतीतिरुद्रः। परमे
श्वरः। तारकब्रह्म। तारकं। संसारसमुद्रात्तारकं। ब्रह्म। ब्रह्मात्मैक्यप्रतिपादकं। तत्वमस्यादिमहावाक्यंव्या
चष्टे व्यक्तीकृतवान्। आख्यानंकृतवान्। उपदिष्टवानित्यर्थः उपदिशतीतियावत्। लङादिव्यत्यासश्छां
दसः। येनासावमृतीभूत्वेति। येनतारकोपदेशेन। असौप्राणी अमृतीभूत्वामरणोपलक्षितजननादिषड्

नि·

२०

भावविकाररहितस्सन्। मोक्षीभवति। मोक्षंप्राप्नोति। तादृशंतारकं व्याचष्ट इत्यन्वयः। तस्मादविमुक्तमेव
निषेवेत्ताविमुक्तंन विमुंचेदेवमेवैतद्याज्ञवल्क्य ॥१॥ अथहैनमत्रिः पप्रच्छयाज्ञवल्क्यंयएषोनंतोव्य
क्तआत्मातंकथमहं विजानीयामिति। सहोवाचयाज्ञवल्क्यस्सो विमुक्तउपास्योयएषोनंतोव्यक्तआ
त्मासोविमुक्तेप्रतिष्ठितइति। सोविमुक्तःकस्मिन्प्रतिष्ठितइति। वरणायांनास्यांचमध्येप्रतिष्ठितइति।। इ
त्यादिवाक्येन। अध्यात्मकाशींस्वशरीरादिसंघातरूपां। ज्ञातुकामः अत्रिः याज्ञवल्क्यं पृष्टवान्। तंप्र
ति। सः। अव्यक्तः। इंद्रियाद्यगोचरः। अतएवाऽव्यक्तः। शून्यविलक्षणः। सन्मात्ररूपः। अतएवाऽनं
तः। अपरिछिन्नः। त्रिविधपरिच्छेदशून्यः। सएव अज्ञानांतःकरणाभिमानादिउपाधियोगेन। अवि
मुक्तः। जीवरूपेणस्थितः। उपास्यः। विशेषेण मुक्तः विमुक्तः। न। विमुक्तः। अविमुक्तः सामान्यतः
स्वरूपेणनित्यमुक्तोपि। विशेषतः। अज्ञानादिभिः विमुक्तोनभवतीति अविमुक्तः। अज्ञानाहंकारादि
उपाधिवशात्जीवत्वमापन्नः। सएवउपास्यः। तेनप्रकारेणसजीवउपास्योभवतीत्यत आह। यएषो

प्र॰श्रा॰ नेतोव्यक्त आत्मेति। यः अविमुक्तः। एषः। जीवत्वोपलक्षितः। यएषशब्दाभ्यांप्रत्यक्ष तेननिर्दिष्टः। इदंत्वं श्रोतृत्व
प्रमातृत्वादिनाव्यवहारविषयः। अनंतः। अपरिच्छिन्नः। अव्यक्तः। सन्मात्ररूपः इतिब्रह्माभेदेनउपास्योभवति।

४३१

वालाग्रशतभागस्यशतधाकल्पितस्यच। भागोजीवस्यविज्ञेयस्सचानंत्यायकल्प्यते। इतिश्वेताश्वतरश्रुतेः। स
एवआत्मा। सर्वस्यजगतः। सर्वस्यापिमुमुक्षोः। आत्मा। स्वरूपभूतः। स्वयमात्मन्यर्थेइतिप्रमाणात्। सः कुत्रप्रतिष्ठि
तइत्याकांक्षायां सोविमुक्तेप्रतिष्ठितइति। अविमुक्तस्यजीवस्यसाधनीभूतदेहाद्यंतः करणांतसंघातेप्रतिष्ठितइ
तिआत्मशब्दस्यस्वसाधनेअंतःकरणदेहादौप्रयोगवत्। अविमुक्तसंज्ञिकजीवस्यसाधनभूतेदेहादावपि
अविमुक्तशब्दप्रयोगः इत्यादिवाक्येषु। अधिभूतकाशीभावनाकाशीअध्यात्मकाशीति। त्रिविधेषु। लो
कप्रसिद्धकाशींक्षेत्रकाशीभावनाविशिष्टस्ववासक्षेत्रअध्यात्मकाश्यात्मकदेहादिआत्मांतउपास्यक्षे
त्राश्रितानां। मरणकाले रुद्रः तारकोपदेशंकरोतीतितात्पर्यपञ्चकदनार्थंबृहस्पतिस्मृत्यादिप्रश्नपूर्वकयाज्ञ
वल्क्योपदेशः। प्रतीयते। अतोपिहेतोः। तस्यब्रह्मज्ञानतत्साधनादिबोधकपरत्वसिद्धमितिकृत्वाअयो ४३१

ग्यतासंभावनापिनास्ति। तदुपनिषदः शुक्लयजुःशाखाप्रतिष्ठत्वात् । आमनंति। चैनमस्मिन्निति सूत्रे
ण वैश्वानरस्सा धारणशब्दविशेषादित्यधिकरणे॥ ॥ वैश्वानरविद्यांतर्भूतार्थप्रतिपादकत्वेन च व्यास
कृतब्रह्मसूत्रविषयवाक्यरूपत्वाच्च। एतच्छाखाप्रवर्तकयाज्ञवल्क्यकण्वमाध्यंदिनादीनां तच्छाखा
प्रविष्टब्राह्मणादीनां च सर्वोत्कृष्टत्वप्रतिपादनमुचितं तद्विहाय। अज्ञानभ्रांतिज्ञानासूयाभिमानादि
भिराविष्टाः। अविवेकेन दूषयंतीत्यहो आश्चर्यं पूर्वोक्तवेदांताधिकरणसूत्रैः स्मर्यमाणमनुमानं स्या
दित्यादिभिः प्रदर्शितन्यायेन काशीखंडादि काशीमाहात्म्यप्रकाशकपुराणादीनां मनुस्मृति याज्ञवल्क्य
स्मृति आपस्तंबगौतमादिसूत्र। आत्रेयादिस्मृतिप्रतिपाद्यसंन्यास काशीमरण। वैश्वानरोपासनरुद्र
जपादिविधायकस्मृतिमूलत्वेन जाबालोपनिषदः। अवश्यमभ्युपेयत्वात्। काशीखंडे च जाबाला
रण्यके प्रोक्तमित्याद्यर्थकपंचमषष्ठाध्यायादि बहुवाक्यैः स्पष्टतया काशीखंडमूलत्वप्रतीतेश्च। मह
प्रमाणभूतत्वं जाबालादिशुक्लयजुःशाखागतबह्वीनामुपनिषदां सर्वशाखाप्रविष्टब्राह्मणैः प्रमाणत्वे

म॰शा॰

१

४३२

नं। अनन्यगत्यावश्यकतयाचकेषुचिद्विषयेषुबलात्कारेणापिगृहीतव्यत्वेनप्राप्तेः दुर्वारत्वात्। किंचावे
दांतमीमांसासूत्रेषु। तृतीयाध्यायेचतुर्थपादे॥ ॥परामर्शंजैमिनिरचोदनाचापवदतिहि॥१८॥ एत
त्सूत्रभाष्ये। त्रयोधर्मस्कंधाः॥ इत्याद्यायेशब्दाः इत्यारभ्य॥ ॥ननुब्रह्मचर्यादेवप्रव्रजेदितिविस्पष्टमि
दंप्रत्यक्षंपारिव्राज्यविधानंजाबालानां। सत्यमेवमेतत्। अनपेक्ष्यत्वेतांश्रुतिमयंविचारइतिजैमिन्यभि
प्रायंभाष्यकाराः प्रकटीकृतवंतः॥ तथाचजैमिनिना। एतज्जाबालश्रुतिः प्रमाणत्वेनगृहीतेत्यपिस्पष्टं
प्रतीयते। एतेनापि। एतच्छाखाधिपतेः। एतच्छ्रुतिप्रतिपाद्यमहिमावतः याज्ञवल्क्यस्यअयोग्यतेति
केनवक्तुंशक्यतेनकेनापीतिद्रष्टव्यं॥ ॥एवंमुक्तिकोपनिषत्स्थशुक्लयजुः शाखागतपूर्वोक्तसंख्याकानां
पृथक्कंठात्युपदेशप्रकरणे। ईशावास्यबृहदारण्यकजाबालहंसपरमहंसादिमुक्तिकांत। एकोनविंशत्सं
ख्याकोपनिषदां। वाजसनेयिशाखागतानां अवश्यानुष्ठापकत्वेनावश्यज्ञातव्यब्रह्मतज्ज्ञानतत्साधनादि
प्रतिपादकत्वेनच। महाप्रमाणतया। सर्वैर्ग्राह्यत्वंप्राप्तं ननुतैत्तिरीयशाखायाः वाजसनेयिशाखायाश्चम

नि॰

३२

जुष्टेनरूपेणएकत्वात्। शाखाद्वयमपिसमानमेवेतित्वयोच्यते। तथाचेत्। वाजसनेयिशाखायाः। पूर्णमद इतिशांतिः। तैत्तिरीयशाखायाः। सहनाववत्विति किमर्थंश्रीरामेणभेदः उक्तः। इतिचेत्। शांतिभेदमात्रेण। न्यूनत्वं अधिकत्वंप्राप्यतेवा। तथासति शंनोमित्रश्शंवरुणइतितैत्तिरीयशाखायामेव अथसीक्षांव्याख्यास्यामः इतिउपनिषदनुवाकस्यब्रह्मविदाप्नोतिपरं। भृगुर्वैवारुणिः। इत्याद्यनुवाकानांसहनाव वत्वितिशांतिः। तैत्तिरीयैः सर्वैःपठ्यते। तयोः परस्परशांतिभेदमात्रेणन्यूनाधिकभावः आगतोवाएतावन्मात्रेण न्यूनाधिकभावः नप्राप्नोति॥ नोचेत्। सर्वशास्त्रीपकार्यासिद्धिद्वारा। सर्वशास्त्रवैपर्थ्यप्रसंगोदुर्वारः॥ अपिच। एतच्छाखाः प्रविष्टाथर्वणशाखाप्रविष्टरामतापनीयोपनिषदः। पूर्वतापनीयावच्छेदेनरामायणमूलत्वं उत्तरतापनीयावच्छेदेनकाशीमाहात्म्यप्रतिपादकपुराणादिमूलत्वेनरामषडक्षरीमंत्राद्वैतार्थादिप्रतिपादकस्मृतिमूलत्वेनचमहाप्रामाण्यवत्यांतस्यामुपनिषदि॥ बृहस्पतिरुवाच। याज्ञवल्क्यमित्यादिभिर्याज्ञवल्क्यमाहात्म्यप्रतिपादनाच्च। तच्छाखावेदभागस्यतच्छाखाप्रवर्तकयाज्ञव

प्रश्न
१
४३२

ल्क्यतच्छिष्यकाण्वमाध्यंदिनतच्छिष्यपरंपरया। इदानींतनवाजसनेयिब्राह्मणानामपि। यत्किंचिन्न्यून ता
नर्संभवति। किंच खलु जाबालरामतापनीयअद्वैततारकादिपूर्वोक्तासु कासुचिदुपनिषत्सु। बृहस्पतिरुवाच
याज्ञवल्क्यमितिकाशीमाहात्म्यादिविषयकप्रश्नं॥ याज्ञवल्क्यंप्रति बृहस्पतिः कृतवानिति प्रतीयते। ते
नयाज्ञवल्क्यस्यबृहस्पत्युपदेशकर्तृत्वप्रतिपादनेनसर्वज्ञबृहस्पत्यपेक्षया। याज्ञवल्क्यस्यउत्कृष्ट
त्वंप्रतीयते। नचयाज्ञवल्क्यंप्रति बृहस्पतिप्रश्नस्य तन्निकटेस्वस्याज्ञातविषयकज्ञानसंपादनार्थत्वेन
तदुपदेशः अपेक्षितइति। न। अपितु। याज्ञवल्क्यज्ञानपरीक्षार्थ इतिवाच्यं। याज्ञवल्क्यः बृहस्पतिं प्र
ति। अप्राप्तफलप्राप्त्यर्थंतप आदिकर्मनकृतवान्‌ बृहस्पतिरीश्वरः सन्‌ याज्ञवल्क्यपरीक्षांकृत्वा याज्ञव
ल्क्यायमोक्षादिकंदातुंप्रवृत्तइतिवक्तुंनशक्यते। बृहस्पतेरपिदेवगुरुत्वेपि। जीवत्वात्‌। याज्ञवल्क्य
समानत्वमेव। अपि चयाज्ञवल्क्यस्यमहायोगित्वेन महाकर्मित्वेनमहातपस्वित्वेन ब्रह्मज्ञानित्वेन चबृहस्प
त्यपेक्षया आधिक्यमेववक्तव्यं भवेत्‌ तस्मात्‌ परीक्षार्थमितिवक्तुंयोग्यंनभवति तथात्वांगीकारेतु त।

पि·

स्वेवउपनिषत्सु याज्ञवल्क्यं अत्रिःपप्रच्छ भरद्वाजः पप्रच्छा जनकः पप्रच्छ इत्यादिबहुऋष्यादिप्रश्नाउपल
भ्यंते। तेषामपि तथावक्तव्यं भवेत्।तथाअभिवदनं।अत्यंतासंगतंस्यात्तस्मात् बृहस्पतिःप्रश्नः स्वज्ञानार्थमेव
नतुपरिक्षार्थमितिनिश्चयोयुक्तः॥अपिच॥ तच्छाखाप्रविष्टत्वेनैवएतेषांन्यूनतातच्छाखाध्येतृत्वेनैवएए
तेप्रथमशाखिनः।एतेकाण्वाः॥एतेमाध्यंदिनाः।इतिअन्यैरितरशाखिभिःशास्त्रानभि तैर्दूष्यते॥ तथास
तिशाखांपुरस्कृत्यैवदूषणस्यप्रवृत्तत्वात्।शाखायाएवदूषणप्रयोजकत्वेनतदध्येतृणांदोषवत्वंप्राप्तं।तद्वारा
तद्वेदभागस्यैवदोषवत्वेतद्वेदभागस्यइतरैस्सर्वैरपि।अग्राह्यत्वापत्तिप्रसंगः।तथासतिपूर्वोक्तरीत्याव्यासा
दिभिः।सर्वैरपिभाष्यकारांतैगृहीतत्वदर्शनमसंगतं भवेत्।उत्तरत्रतुव्यासादिस्मृतिनिबंधनकर्तृभिस्सर्वै
र्महद्भिः।एतच्छाखावेदभागस्यतच्छाखाप्रविष्टयाज्ञवल्क्यकण्व।कात्यायनादिस्मृतिसूत्रवचनानां प्र
माणत्वेनगृहीतत्वंप्रदर्शइष्यते।इतिहेतोरपि॥ तेषांयाज्ञवल्क्यादीनांतच्छाखिब्राह्मणानांयत्किंचिन्न्यू
नतापिब्रह्मणापिसाधितुंनशक्यते॥एवमेवएतेषांब्राह्मणानांभोजनप्रतिभोजनविषयेसर्वधर्मशास्त्रेषुअ

न्नभोजननिषेधः तद्भोजनेप्रायश्चित्तंचकुत्रापिनदृश्यते॥तथाहि॥ हेमाद्रौप्रायश्चित्तकांडेपि॥ अभोज्यान्न
निरूपणप्रस्तावे॥ अथेदानींजातिभ्रंशप्रकरणप्रायश्चित्तमाह॥ देवलः दुरान्नानि॥देवलः॥व्यतीपातइत्युपक्र
म्य॥भूतप्रेतपिशाचानांयदन्नपरिकल्पितं।कुटुंबभोजनंचैवब्रह्मराक्षसभोजनं॥एतान्यन्नानिदुरान्नानि॥ए
तेष्वन्येषुयोविप्रोधनलोभपरायणः॥भुक्त्वातस्यगतिर्नास्तितस्मादेतत्परित्यजेत्॥इतिनिंदित्वा॥ननस्यपुनरा
वृत्तिर्यमलोकात्कदाचनेति॥पापफलंदर्शयित्वा॥अस्यदोषोपशांत्यर्थेप्रायश्चित्तमिदंस्मृतं।प्राजापत्यद्वयंकृत्वा
पुनःसंस्कारपूर्वकं॥पंचगव्यंपिबेत्सम्यक्।शुद्धोभवतिभूतले॥इतिप्रायश्चित्तमुक्तं॥इतिदुरान्नप्रायश्चित्तं॥अ
थअयुतसहस्त्रब्राह्मणभोजनप्रायश्चित्तमाह॥देवलः॥अयुतेवासहस्रेवानानावर्णसमागमे॥पतितक्लीबवै
डालव्रात्यतस्करपूरिते॥इत्युपक्रम्य॥वचनद्वयेनक्लीबकुंडगोलकादिनिंदितपुरुषसंघातवत्वेनभोजनंनिषि
ध्य॥योविप्रोलोभमन्विच्छन्सभुंजीतकदाचन॥यमोजिव्हांदहत्याशुइत्यादिनापापफलंप्रतिपाद्यतच्छेषानुभव
स्यतदंतेभुवमासाद्यविड्वराहत्वमाप्नुयात्॥इत्यादिना॥मार्कंडेयादिवचनजातेनपापंदर्शयित्वा।एकस्मिन्दिव

संभुत्का पंचगव्यं पिबेत्ततः॥ इत्यादिना। भोजनकालतारतम्यानुसारेणतप्तपराकचांद्रायणादिकृच्छ्रादीन्युक्त्वा। तत्प्रा
यश्चित्तेनशुद्धिं दर्शयित्वा। प्रायश्चित्ताकरणे शूद्रत्वप्राप्तिः प्रदर्शिता। इतिअयुतसहस्रब्राह्मणभोजनप्रायश्चित्तं॥ अ
थदीर्घसत्रभोजनप्रायश्चित्तमाह। देवलः। वर्षद्व्यं त्रिवर्षं वा पौवाको वाजनाधिप। संकल्प्य भोजयेद्विप्रान् तद्दीर्घ
सत्रमुच्यते॥ इत्युपक्रम्य॥ दीर्घसत्रभोजनं निंदित्वा॥ पूर्ववत्। पापविशेषं प्रदर्श्य पूर्वप्रायश्चित्तमेव भोजनकाला
दितारतम्येन कर्त्तव्यमितिअतिदेशः सूचितः॥ अथशूद्रसत्रभोजनप्रायश्चित्तमाह॥ देवलः॥ शूद्रसत्रेन भुंजीयात्प्राणैः
कंठगतैरपि॥ भुंजन्विप्रस्तथालोके दुःसंगाद्ब्रह्मद्रयात्॥ देहांतेनरकं गत्वा भुवि भूयात्सवायसः॥ इत्युपक्रम्य॥ शू
द्रान्नभोजनादिना इह शूद्रत्वप्राप्तिः परत्रनरकप्राप्तिः इत्युक्त्वा तदनुष्ठानकालानुसारेण यावकतप्तकृच्छ्रचांद्राय
णादिकमुक्तं॥ अथशूद्रवैश्यादिगृहेस्वयंपाकादिप्रायश्चित्तमाह जातूकर्ण्यः॥ शूद्रवैश्यगृहे विप्रस्तदामासंपचन्
मुदा। तत्रैव भोजनं कृत्वा सद्यश्चंडालतां व्रजेत्॥ इत्युपक्रम्य शूद्रादिगृहे तैः आमादिकं गृहीत्वा तद्गृहे पचनं कृ
त्वा तत्रैव भोजने चंडालत्वप्राप्त्यादिदोषं प्रतिपाद्य अनुष्ठानतारतम्येन क्षीरतप्तकृच्छ्रपंचगव्यादिकं प्रायश्चित्तं

मुक्तं ॥ अथ अश्राद्धे एकोद्दिष्टभोजनप्रायश्चित्तमाह ॥ देवलः ॥ मृताहे एकादशे विप्रो भुक्त्वा कबलसंख्यया ॥ ताव
द्युगसहस्राणि रौरवं नरकं व्रजेत् ॥ इत्युपक्रम्य ॥ एतद्भोजनकबलसंख्याकयुगेषु रौरवप्राप्तिमुक्त्वा ॥ अंते भू
लोके रक्तपायिप्राणित्वं प्राप्य तदनंतरं प्रेतरूपेण वर्तत इति ॥ प्रतिपाद्य अस्य प्रायश्चित्तरूपं पटगर्भपुरः
सरं पुनःसंस्कारादिकप्रायश्चित्तमुक्तं ॥ अथ नग्नश्राद्धे नवश्राद्धे च आमग्रहणे प्रायश्चित्तं ॥ देवलः ॥ नवश्रा
द्धे च नग्ने च सूतकांते तथैव च । नग्नश्राद्धे नवश्राद्धे गृहीत्वा मां द्विजोत्तमः ॥ इत्युपक्रम्य ॥ तस्य रौरवनरकानंत
रं सूकरजन्मप्राप्तिरूपदोषमुक्त्वा तयोः यथायोग्यं चांद्रायणप्राजापत्यकृच्छ्रद्वयं प्रायश्चित्तमुक्तं ॥ अथ सूत
कद्वितये भोजनप्रायश्चित्तमाह ॥ देवलः ॥ सूतकद्वितये राजन् ज्ञातेरन्यो द्विजो यदि ॥ अज्ञानाद्भोजनं कृत्वा सद्यः
संस्कारमर्हति ॥ इत्युपक्रम्य ॥ तद्दिन नक्षणसवत्सर्दिला एकसत्रमुपोष्य पंचगव्यप्राशनेन शुध्यति अन्नेजी
र्णे तु वपनं पुनःसंस्कारादि पंचगव्यादिकं प्रायश्चित्तमुक्तं ॥ अथ श्राद्धावशिष्टान्नभोजनप्रायश्चित्तमाह देवलः
॥ अमायां प्रेतकश्राद्धे पर्वश्राद्धे महालये । श्राद्धे वा वार्षवत्यादौ सपिंडीकरणे तथा । इत्याद्युपक्रम्य शेषभो

जिनः नरकादिकमुक्त्वा अधिकारिभेदेन वपनप्राजापत्यतप्तपराकादिकृच्छ्राचरणंप्रायश्चित्तमुक्तं ॥ अथक्री
तान्नभोजनप्रायश्चित्तमाह ॥ देवलः ॥ देवालयेषुमार्गेषुग्रामेषुनगरेषुच। विप्रःक्रीतान्नभोक्ता चेत्तदानरकमा
प्नुयात् ॥ इत्युपक्रम्य ॥ भोजनकालतारतम्यानुसारेणप्राजापत्यादिकृच्छ्रादिकंप्रायश्चित्तमुक्त्वा अकृतप्राय
श्चित्तस्य दीर्घकालानुष्ठानेशूद्रतुल्यत्वमुक्तं ॥ अथसंघातान्नभोजनप्रायश्चित्तमाह ॥ देवलः ॥ संघीभूताय
दाविप्रास्त्रीयोवाराजवल्लभाः। स्वैस्वैर्द्रव्यैःस्वेकभांडेपाचयेयुःपृथक्पृथक् ॥ इत्युपक्रम्य ॥ तस्यनरकादिदोष
मुक्त्वा ॥ भोजनकालतारतम्यानुसारेणपंचगव्ययावकप्राजापत्यादिकृच्छ्राचरणप्रायश्चित्तमुक्त्वा। अकृतप्राय
श्चित्तस्यदीर्घकालतद्भोजनेशूद्रतुल्यत्वमुक्तं ॥ अथयागान्नभोजनप्रायश्चित्तमाह। देवलः ॥ यज्ञेषुपशुबंधे
वायागार्थंपाचितंहविः। नदाविप्रैर्नभोक्तव्यंलोकेप्सुभिःकल्मषैः ॥ पचनंहविरितियज्ञशालायांदीक्षितगृहेवा
संपादितमन्नमित्यर्थः ॥ इत्युपक्रम्य ॥ यागशालायांदीक्षितगृहेवा। तत्कृतपाकान्नभोजनेदोषमुक्त्वावपा
यागात्पूर्वकालभोजनेपुनःसंस्कारः। प्राजापत्यकृच्छ्रंप्रायश्चित्तंवपायागानंतरभोजनेप्राजापत्यंप्रायश्चित्त

प्र॰ श॰ ४३६

ऋत्विजांयोग्यस्त्रीणांचभोजननिषेधः॥ यतिब्रह्मचारिविधवादीनांप्रायश्चित्ताधिक्यंचोक्तं॥ अथचौलसीमं
तादिसंस्कारकर्मप्रयुक्तअन्नभोजनेप्रायश्चित्तमाह॥ देवलः॥ चौलकर्मणिसीमंतेमुहूर्त्ताभोजनेपरं॥ सुरा
पानसमंप्रोक्तंततोनेच्छेतिसूरयः॥ इत्युपक्रम्य॥ तदन्नभोजनेसुरापानसमत्वमुक्त्वामुहूर्तात्पूर्वभोजनेसह
स्रगायत्रीजपः उत्तरकालभोजनेतप्तकृच्छ्रंप्रायश्चित्तमुक्तं॥ चौलकर्मणिपूर्वभोजननिषेधः अन्येषुसंस्कारक
र्मसुउत्तरकालभोजननिषेधःविवक्षितः॥ अथगणकदेवलकान्नभोजनप्रायश्चित्तमाह॥ देवलः॥ देवलस्या
न्नभुग्वापिगणकान्नंतुभोजकः॥ मद्यपायीतिजानीयात्सर्वकर्मबहिष्कृतः॥ इत्युपक्रम्य॥ गणकदेवलक
योः॥ अन्नभोजनेमद्यपानसमत्वमुक्त्वासकृदसकृदभ्यासतारतम्येनपंचगव्ययावकपराककृच्छ्रादिप्रायश्चि
त्तमुक्तं॥ अथदुर्भक्ष्यभक्षणप्रायश्चित्तमाह देवलः॥ दुर्गंधसहितंभक्ष्यंतथापर्युषितंचयत् शुष्कुलीमाषनि
र्मीणंविपणिस्थंचयद्भवेत्॥ इत्याद्युपक्रम्य॥ विपणस्थतैलादिसहितशुष्कुल्यादिभक्षणे॥ देवाद्यसमर्पितभक्ष
णेच॥ दोषमुक्त्वायावकादिप्रायश्चित्तमुक्तं॥ अथव्रात्यान्नकुष्टान्नभोजनप्रायश्चित्तमाह॥ देवलः॥ व्रात्यान्नेप

नि

३॰

दिकुष्टान्नंभुङ्क्तेविप्रः क्षुधातुरः। कबलेकबलेचांद्रंकृत्वाशुद्धिमवाप्नुयात्॥ इत्युपक्रम्यकुष्टिलक्षणमाह॥ मरीचिः॥ नग्नोवे
दपरित्यागीव्रात्योगायत्रिनाशकः। कुष्ठीतत्रसविज्ञेयोदुश्चर्मामातृघातकः॥ इति॥ अथयत्यन्नदंपति भुक्तशिष्टान्नभोजन
प्रायश्चित्तमाह॥ देवलः॥ यतिपात्रस्थमन्नंयत् यतिनाप्रेरितंतथा। दंपत्योर्भुक्तशेषंयत् तद्भुक्त्वाचांद्रमाचरेत्॥ इत्यादि अथ
दुष्टान्नभोजनप्रायश्चित्तमाह॥ देवलः॥ उल्लंघनंपादघातंविडालाखुविमर्दितं॥ पूर्वोक्तशाकसंयुक्तंपलांडुलशुनाहृतं॥ इ
त्यादिदुष्टान्नभोजनेयथायोग्यंपराककृच्छ्रादिप्रायश्चित्तमुक्तं॥ अथपत्नीसहभोजनप्रायश्चित्तमाह॥ देवलः॥ द्विजःका
मातुरोपस्तपत्न्यासहयदन्नभुक्॥ पश्चाच्चांद्रायणंकृत्वा शुद्धिमाप्नोतिपौर्विकीं॥ इत्यादिप्रायश्चित्तमुक्तं॥ विवाहादिकेषु
चिन्निमितेषुनोक्तदोषः॥ अथशूद्रभांडस्थजलपानेभांडस्थान्नभोजनेचप्रायश्चित्तं॥ देवलः॥ अतीवतृषितोविप्रोनशूद्रस्यो
दकंपिबेत् तद्भांडेभोजनैर्वैवद्यत्ता नाद्यादिमार्गतः॥ इत्याद्युपक्रम्य॥ तस्यतद्भांडान्नभोक्तुः पुनरुपनयनतत्तकृच्छ्रादिप्रायश्चि
त्तमुक्तं॥ अथपतितदुर्मार्गेदुष्टपङ्क्तौभोजनेप्रायश्चित्तमाह॥ देवलः॥ पतितश्चखलश्चैवदुर्जनः पिशुनस्तथा। जारश्चगायक
श्चैवनित्यंयानपरस्तथा॥ इत्याद्युपक्रम्यदुर्जनादीनांलक्षणमुक्त्वातत्सङ्क्तौभोजनेदोषंप्रतिपाद्यभोजनाभ्यासादिक्रमेणचा
द्रपराकमहाचांद्रादिकृच्छ्राचरणप्रायश्चित्तमुक्तम्॥ अथरजस्वलान्नभोजनप्रायश्चित्तमाह॥ देवलः॥ रजस्वलान्नंयोभु
क्त्वाद्विजोज्ञानात्सकृद्यदि। रौरवंनरकंयातिभवेसश्चाद्विगर्हितः॥ इत्याद्युपक्रम्यरजस्वलारजोनिर्गतं अज्ञात्वापाकादिकं

प्र॰शा॰

७

४३७

कृत्वाब्राह्मणान् भोजयित्वा पश्चात् शुष्करजोयुक्तंवस्त्रंदृष्ट्वा अहंपूर्वस्मिन्नेवकालेरजस्वला। अभवंइतिज्ञात्वाभोक्तॄन्
ब्राह्मणान्प्रतिज्ञापयितवतीचेत्। भोक्तारः पुनरुपनयनचांद्रायणपंचगव्यादिप्रायश्चित्तानुष्ठातारो भवेयुरितिप्रायश्चि
त्तमुक्तं॥ अथअस्पृश्यदर्शनस्पृष्टान्नादिभोजनप्रायश्चित्तमाह॥ देवलः॥ शूद्रैर्नानाविधैर्वर्णैः चंडालादिनिरीक्षितं। पु
ष्पवत्यासूतिकयादृष्टंवापतितादिभिः॥ इत्याद्युपक्रम्य॥ दोषमुक्त्वाकायकृच्छ्रपंचगव्यादिप्रायश्चित्तमुक्तं॥ अथनिषि
द्धदिवसेषुद्विभोजनप्रायश्चित्तमाह॥ देवलः॥ पित्रोर्मृताहात्पूर्वेद्युर्भानुवारेचसंक्रमे॥ तथाचतुर्दश्यष्टम्योर्व्रतेषुचमहो
त्सवे॥ इत्याद्युपक्रम्यनिषिद्धदिवसेषुद्विवारभोजनंनिषिध्य॥ तद्भोजनस्यज्ञानाज्ञानकृतभेदेनकायकृच्छ्रतप्तकृच्छ्रपं
चगव्यादिकंप्रायश्चित्तमुक्तं॥ अथसूतकद्वितयपक्वमन्नंसूतकरहितपुरुषभोजने प्रायश्चित्तमाह॥ देवलः॥ आशौ च
द्वितयेराजन् असगोत्रोथवाव्रती विधवाअन्यगोत्रावायतिर्वानियमस्थितः॥ इत्याद्युपक्रम्यसूतककालेकृतान्नभोजने
नरकप्राप्तिमुक्त्वा। तद्दोषपरिहारार्थंपुनःसंस्कारपंचगव्यादितप्तकृच्छ्रप्रायश्चित्तमुक्तं॥ इतिसूतकद्वितयविशिष्टपुरुष
कृतान्नंसूतकरहितपुरुषभोजनप्रायश्चित्तं॥ अथकुंडगोलकपरिवित्तिपरिवेत्रोरन्नभोजनेप्रायश्चित्तमाह॥ देवलः॥ कुं
डश्चगोलकश्चैवपरिवित्तिः परीवेत्ता॥ तेषामन्नंनभोक्तव्यंविप्रैःपापपराङ्मुखैः॥ इत्युपक्रम्य॥ तेषामन्नभोजनेसकृदस
कृदभ्यासाद्यनुसारेणप्राजापत्यपराकचांद्रायणादिकृच्छ्राचरणंप्रायश्चित्तमुक्तं॥ मनुस्मृतौचतुर्थाध्यायेदुरान्नप्रक

नि

३७

रणे॥ नाश्रोत्रियततेयज्ञे ग्रामयाजिकृतेतथा॥ स्त्रियाक्लीबेनचहुते भुंजीतब्राह्मणः क्वचित् ॥२०५॥ ॥नाश्रोत्रियेति॥
अनधीतवेदेनोपक्रांतेयज्ञे अग्नीषोमीयादूर्ध्वमपिभोजनयोग्यसमयेब्राह्मणोनभुंजीततथाबहूनांयाजकेनऋत्विजा।
स्त्रियानपुंसकेनचयत्रयज्ञेहूयतेतत्रकदाचिन्नभुंजीत॥२०५॥ अश्लीकमेतत्साधूनांयत्रजुव्हत्यमीहविः॥ प्रतीपमे
तद्देवानांतस्मात्तत्परिवर्जयेत्॥२०६॥ व्याख्या॥ अश्लीकमिति॥ पूर्वोक्ताबहुयाजकादयोयत्रहोमंकुर्वंति। नत्कर्मशि
ष्टानांअश्लीकमश्रीकं शीघ्रेरेफस्थानेलकारः। देवानांप्रतिकूलं तस्मादेतत्सोमंनकारयेत्॥२०६॥ मत्तक्रुद्धातुराणां
चनभुंजीतकदाचन। केशकीटावपन्नंचपदास्पृष्टमकामतः॥२०७॥ व्याख्यानं॥ मत्तक्रुद्धातुराणामिति॥ क्षुब्धक्रु
द्धव्याधितानामन्नंतथाकेशकीटसंसर्गदुष्टंपादेनचेच्छातस्संस्पृष्टमन्नंनभुंजीत॥२०७॥ भ्रूणघ्नावेक्षितंचैवसंस्पृष्टंचा
प्युदक्यया पतत्रिणावलीढंचशुनासंस्पृष्टमेवच॥२०८॥ व्याख्या॥ भ्रूणघ्नेति॥ भ्रूणघ्नेत्युपलक्षणात्। गोघ्नेत्यादि
पतितापेक्षितंरजस्वलयान्वस्पृष्टंपक्षिणाचकाकादिनास्वादितंकुक्कुरेणचस्पृष्टमन्नंनभुंजीत॥२०८॥ गवाचान्नमु
पाघ्रातंघुष्टान्नंचविशेषतः। गणान्नंगणिकान्नंचविदुषाचजुगुप्सितं॥ व्याख्यानं॥ गवेतियदन्नंगवाघ्रातं। घुष्टान्नं
कोभोक्ताइत्युद्घुष्टान्नेसत्रादौयद्दीयतेविशेषतइति भूरिदोषतयाप्रायश्चित्तगौरवार्थंगणान्नं शठब्राह्मणसंघान्नंगणि
कावेश्यातस्याअन्नंतच्चनभुंजीत॥२०९॥ स्तेनगायनयोश्चान्नंतक्ष्णोवार्धुषिकस्यच। दीक्षितस्यकदर्यस्यबद्धस्य

प्र॰ शा॰ ४३८

निगडस्यच ॥२१०॥ व्याख्यानं ॥ स्तेनेति चौरगायनजीविनोस्तथा तस्य वृत्तिजीविनो वृध्युपजीविनश्चान्नं भुंजीत । तथा यज्ञेदीक्षितस्य प्रागग्नीषोमीयात् कदर्यस्य कृपणस्य निगडस्येति तृतीयार्थे षष्ठी ॥ गोविंदराजस्तु बद्धशब्दस्य बंधनैर्विनाप्या निर्गतैर्विगलितस्य दत्तायो निगडस्येति व्याख्यातवान् ॥२१०॥ अभिशस्तस्य षंडस्य पुंश्चल्या दांभिकस्यच । शुक्तं पर्युषितं चैव शूद्रस्योच्छिष्टमेवच ॥२११॥ व्याख्यानं ॥ अभिशस्तस्येति ॥ महापातकित्वेन संजात लोकविक्रोशस्य नपुंसकस्य । पुंश्चल्या व्यभिचारिण्या अगणिकाया अपि दांभिकस्य छद्मना धर्मचारिणो बैडालवृत्तिकादेरन्नं न भुंजीत शुक्तं यत्स्वभावतो मधुरं दध्यादिसंपर्कवशेन चाम्लादिभावं गतं पर्युषितं रात्र्यंतरितं शूद्रस्यान्नं च न भुंजीतेति संबंधः । उच्छिष्टं च भुक्तावशिष्टान्नमविशेषात्कस्यापि न भुंजीत । गुरूच्छिष्टं तु विहितत्वाद्भोज्यं । गोविंदराजस्तु शूद्रस्योच्छिष्टं तद्भुक्तावशिष्टं स्थालीस्थमपि न भुंजीतेत्याह ॥२११॥ चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजनः । उग्रान्नं सूतिकान्नंच पर्याचांतमनिर्दशं ॥ व्या॰ ॥ २१२ ॥ व्याख्यानं ॥ चिकित्सकस्येति । चिकित्साजीविनः । मृगयोर्मांसविक्रयार्थं मृगादिपशुहंतुः । क्रूरस्यानृजुप्रकृतेः निषिद्धोच्छिष्टभोक्तुश्च । अन्नं न भुंजीत उग्रो दारुणकर्मा तस्यान्नं ॥ श्लोक ॥ गोविंदराजो मं जुर्यामुग्रं राजानमुक्तवान् मनुवृत्तौ च शूद्रायां क्षत्रियोत्पन्नमभ्यधात् भेदोक्तेर्याज्ञवल्कीये नोग्रो राजेति वावदत् आश्चर्यमिदमेतस्य स्वकीयहृदिभूषणं । सूतिकान्नं सूतिकामुद्दिश्य यत्क्रियते तदन्नं । तत्कुलजैरपि न भोक्तव्यम् ॥ एक

नि॰ २८

पंक्तिस्थानन्यानवमन्ययत्रान्ने भूज्यमाने केनचिदाचमनं क्रियते ॥ तत्पर्याचांतं ॥ अनिर्दिशं सूतिकान्नं वक्ष्यमाणत्वा
न्नभुंजीत ॥ २१२ ॥ अनर्चितं वृथामांसमवीरायाश्च योषितः ॥ द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतं ॥ २१३ ॥ व्याख्यानं ॥
अनर्चितमिति । अर्चार्हस्य यदवज्ञयादीयते तदनर्चितं । वृथामांसं देवतादीनुद्दिश्य यन्न कृतं । अवीरायाः पतिपुत्ररहि
तायाः । शत्र्वन्नं नगर्यन्नं पतितान्नं च । उपरिकृतक्षुतं चान्नं न भुंजीत ॥ २१३ ॥ पिशुनानृतिनोश्चान्नं क्रतुविक्रयिणस्त
था ॥ शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च ॥ २१४ ॥ व्याख्यानं । पिशुनेति । पिशुनः परोक्षे परापवादभाषणपरः । अनृते
ति । अतिशयेनानृतवादी कूटसाक्ष्यादिः । क्रतुविक्रयकः मदीययागस्य फलं तव भवत्वित्यभिधाय यो धनं गृह्णाति ।
शैलूषो नटः । तुन्नवायः सूचिकः । कृतघ्नो यः कृतोपकारस्यापकारे प्रवर्त्तते तस्यान्नं न भुंजीत ॥ २१४ ॥ कर्मारस्य निषाद
स्य रंगावतरणस्य च ॥ सुवर्णकर्त्तुर्वैणस्य शस्त्रविक्रयिणस्तथा ॥ २१५ ॥ व्याख्यानं ॥ कर्मारस्येति ॥ कर्मारस्य । लो
हकारस्य निषादस्य दशमाध्याये वक्ष्यमाणस्य च । नटगायनव्यतिरिक्तस्य । रंगावतरणजीविनः । सुवर्णकारस्य
वेणोर्भेदनेन यो जीवति स वैण इति विश्वरूपः ॥ शस्त्रं लोहः ॥ तद्विक्रयिणश्चान्नं न भुंजीत ॥ २१५ ॥ श्ववतां शौंडिका
नां च चेलनिर्णेजकस्य च । रंजकस्य नृशंसस्य यस्य चोपपतिर्गृहे ॥ २१६ ॥ व्याख्यानं ॥ श्ववतामिति ॥ आखेटका
र्थं शुनः पोषकानां मद्यविक्रयिणां ॥ वस्त्रधावकस्य । कुसुंभादिना वस्त्ररागकर्त्तुः । निर्दयस्य । यस्य चोप

प्रश्रा
२९
४५२

पतिर्गृहे जारश्च यस्याज्ञानतो गृहे स्थितस्तस्य गेहे नाद्यात् ॥ २१६ ॥ मृष्यंति ये चोपपतिं स्त्रीजितानां च सर्वशः ॥ अनिर्दशं च प्रेतान्नमतुष्टिकरमेव च ॥ २१७ ॥ मृष्यंतीति ॥ गृहइत्यनुषज्यते । गेहे ज्ञातं भार्याजारं ये सहंते । तेषामन्नं न भुंजीत । तेन गृहान्निस्सारिता या जारसहने प्यदोषः । तथा सर्वकर्मसु स्त्रीपरतंत्राणां ॥ अनिर्गताशौचं च । सूतकान्नं । अतुष्टिकरमन्नं च न भुंजीत ॥ २१७ ॥ राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसं ॥ आयुस्सुवर्णकारान्नं यशश्चर्मावकर्तिनः ॥ २१८ ॥ राजान्नमिति ॥ राजान्नं तेजो नाशय ति ॥ इत एव दोषदर्शनात्तदन्नभक्षणनिषेधः कल्प्यते । एवमुत्तरत्रापि पूर्वमनिषिद्धस्य दोषदर्शनादेव निषिद्धकल्पनं । नाद्याच्छूद्रस्य पक्वान्नमिति निषेधिष्यति । तदतिक्रमणफलकथनमिदं । शूद्रस्य पक्वान्नमध्ययनादिनिमित्तं तेजो नाशयति ॥ सुवर्णकारस्यान्नमायुः । चर्मकारस्यान्नं ख्यातिं नाशयति ॥ २१८ ॥ कारुकान्नं प्रजां हंति बलं निर्णेजकस्य च । गणान्नं गणिकान्नं च लोकेभ्यः परिकृंतति ॥ २१९ ॥ कारुकान्नमिति ॥ कारुकस्य सूपकारादेरन्नं प्रजामपत्यं निहंति । चर्मकारादेः कारुकत्वे पि गोबलीवर्दन्यायेन पृथङ्निर्देशः ॥ ॥ ॥ निर्णेजकस्यान्नं बलं हंति ॥ ॥ गणगणिकयोरन्नं च कर्मांतरार्जितेभ्यः स्वर्गादिलोकेभ्य आच्छिनत्ति ॥ २१९ ॥ पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिंद्रियम् । विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलं ॥ २२० ॥ पूयमिति ॥ चिकित्सकस्यान्नं ॥ पूयं पूयभक्षणसमदोषं । एवं पुंश्चल्या अन्नं इंद्रियं शुक्रं ।

गणिकस्यान्नं पुंश्चल्यास्त्वन्नमिंद्रियं विक्रयिणोमलं ४४२

संधायइमांस्त्रीन्लोकान्पूर्णान्प्रतिगृण्हीयाद्योस्याएतत्प्रथमंपादमाप्नुयात् अथयावतीत्रयीविद्याधतावत्प्रतिगृह्णीयाद्योस्याएतद्द्वितीयंपादमाप्नुयात् अथयावतीदंप्राणियस्तावत्प्रतिगृण्हीयाद्योस्याएतत्तृतीयंपादमाप्नुयादथास्याएतदेवतुरीयंदर्शितंपादंपरोरजायएषतपतीनैवकेनचाप्यंकुतएतावत्प्रतिगृण्हीयादितितदध्यायेतच्छ्लोकव्याख्यानेमूलश्लोकेदेवतातिथिपूजयमित्यत्रदेवताशब्दार्थस्यस्वरूपसंख्यानिर्णयायशतपथब्राह्मणांतर्गतबृहदारण्योपनिषत्पंचमाध्यायस्थविदग्धशाकल्ययाज्ञवल्क्यसंवादमुदाहरति॥ देवतास्वरूपंचवाजसनेयिब्राह्मणेशाकल्ययाज्ञवल्क्यसंवादेविचार्यनिर्णीततत्रशाकल्यःप्रष्टा। याज्ञवल्क्योवक्ता। देवताविस्तारसंक्षेपौचप्रष्टव्योर्थः। अत्रचैषाश्रुतिः। अथहैनंविदग्धशाकल्यःपप्रच्छकतिदेवायाज्ञवल्क्येतिसहैतयैवनिविदाप्रतिपेदेयावंतोवैश्वदेवस्यनिविद्युच्यंतेत्रयश्चत्रीचशतात्रयश्चत्रीचसहस्रेत्योमितिहोवाचकत्येवदेवायाज्ञवल्क्येतित्रयस्त्रिंशदित्योमितिहोवाचकत्येवदेवायाज्ञवल्क्येतिषडित्योमितिहोवाचकत्येवदेवायाज्ञवल्क्येति त्रयइत्योमितिहोवाचकत्येवदेवायाज्ञवल्क्येतिद्वावित्योमि

स्योच्छास्त्रवर्त्तिनः प्रतिग्रहे सूनिचक्रीध्वजी वेश्या नराधिपाः तस्मिन्नेवाध्याये तच्छ्लोकव्याख्याने अदुष्ट तज
प्रतिग्रहे दोषो नास्तीत्याह याज्ञवल्क्यवचनेपि राजप्रतिग्रहनिंदा विशेषिता लुब्धस्योच्छास्त्रवर्तिन इति राज
विशेषाददुष्टराजप्रतिग्रहोननिंदित इति गम्यते तस्मिन्नेवाध्याये तच्छ्लोकव्याख्याने स्वयमाहृतान् कां
श्चित्पदार्थान् दुष्टेनाप्याहृतान् न प्रत्याख्यानं कुर्यादित्यत्र याज्ञवल्क्यः कुशशाकपयोमत्स्यान् गंधाः पु
ष्पं दधि क्षितिः मांसं शय्यासनं धान्यं प्रत्याख्येयं न वारि चेति तस्मिन्नेवाध्याये तच्छ्लोकव्याख्याने तपो
विद्यारहितेन प्रतिग्राह्य पदार्थाः न प्रतिगृहीतव्याः स प्रतिगृण्हन् सन् दातारं स्वमात्मानं च नाशयतीत्यत्र
याज्ञवल्क्योपि विद्यातपोभ्यां हीनेन । नतु ग्राह्यः प्रतिग्रहः गृण्हन् प्रदातारमधो नयत्यात्मानमेव चेति त
स्मिन्नेवाध्याये तच्छ्लोकव्याख्याने सगुण निर्गुणब्रह्मणोन्यतरउपासकस्य प्रतिग्रहदोषो नास्तीत्यत्र शतप
थब्राह्मणांतर्गत बृहदारण्य सप्तमाध्यायवाक्यमुदाहरति विदुषस्तानकोपि प्रतिग्रहो दोषावह इति वाजस
नेयिब्राह्मणे गायत्री विद्यायां श्रूयते यदिहवा अप्येवंविद्वान् द्विजः प्रतिगृण्हाति सहैतद्गायत्र्या एकं पदं प्रति

प्रत्यहं पात्रे निमित्तेतु विशेषतः याचितेनापिदातव्यंश्रद्धापूर्वंतुशक्तितः इतितस्मिन् अध्यायेतस्मिन् स्लोके दान प्रकरणे तत्र दानपात्रमाह याज्ञवल्क्यः नविद्ययाकेवलयातपसावापिपात्रता यत्र वृत्तमिमेचोभेतद्धिपात्रंप्रचक्षतइति तस्मिन् अध्यायेतच्छ्लोकव्याख्यानेतत्प्रकरणेअशेषस्यदेयत्वप्रसंगौविशेषमाह याज्ञवल्क्यः स्वकुटुंबाविरोधेनदेयंदारसुतादृतेनान्वयेसतिसर्वस्वंय त्वस्मैप्रतिश्रुतमिति तस्मिन्नेवाध्यायेतच्छ्लोकव्याख्यानेदानकालविशेषफलमाह ॥ याज्ञवल्क्यः शतमिंदुक्षयेदानंसहस्त्रंतुदिनक्षयेविषुवेशतसाहस्त्रांव्यतीपातेष्वनंतकमितितस्मिन्नेवाध्यायेतच्छ्लोकव्याख्यानेप्रतिग्रहपराङ्मुखस्यफलविशेषमाह ॥ तथाचयाज्ञवल्क्यः प्रतिग्रहसमर्थोपिनादत्तेयः प्रतिग्रहं येलोकादानशीलानांसतानप्नोतिपुष्कलान् इतितस्मिन्नेवाध्यायेतच्छ्लोकव्याख्याने आपत्कालेप्राणात्ययसंशयेसर्वप्रतिग्रहाभ्यनुज्ञाप्रकरणेयाज्ञवल्क्योपि ॥ आपद्गतस्संप्रगृण्हन् भुंजानोवायतस्ततः नलिप्येतैनसाविप्रोज्वलनार्कसमप्रभः इतितस्मिन्नेवाध्यायेतच्छ्लोकव्याख्याने अनापदिराजप्रतिग्रहंनिंदतियाज्ञवल्क्यः नराज्ञः प्रतिगृण्हीयाल्लुब्ध

तच्छ्लोकव्याख्याने नैमित्तिकानध्यनप्रकरणे नैमित्तिकानाह याज्ञवल्क्यः श्वक्रोष्टुगर्दभोलूकसामबाणार्त
निस्वने ॥ अमेध्यशवशूद्रांत्यश्मशानपतितांतिक इति तस्मिन्नेवाध्याये तच्छ्लोकव्याख्याने तत्प्रकरणे याज्ञ
वल्क्योपि त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये मृते इति तदध्याये त
च्छ्लोकव्याख्याने नित्यनैमित्तिककर्माकरणे प्रत्यवायसूचनेन अवश्यकर्तव्यमाह वाजसनेयशाखायामपि कु
र्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः इति तदध्याये तच्छ्लोकव्याख्याने आग्रयणं विनानवान्नप्राशने प्रा
यश्चित्तविधानार्थं कात्यायनोपि पितृयज्ञात्यये चैव वैश्वदेवात्यये पि च अनिष्ट्वा नवयज्ञेन नवान्नप्राशने तथा
इति तदध्याये तच्छ्लोकव्याख्याने त्रिवर्षकुटुंबभरणपर्याप्तधनाधिकवान् सोमयागं कुर्वीतेत्यत्र याज्ञवल्क्यो
का पि त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद्द्विजः इति तदध्याये तच्छ्लोकव्याख्याने अयाज्ययाजन अप्रतिग्राह्य
प्रतिग्रहप्रायश्चित्तप्रकरणे तदा वाजसनेयब्राह्मणं प्राणस्य वै सम्राट् कामायायाज्यं याजयत्यप्रतिग्राह्यस्य
प्रतिगृह्णातीति तस्मिन्नेवाध्याये तच्छ्लोकव्याख्याने दानप्रकरणे याज्ञवल्क्यः स्तकसाक्षाद्दानं व्यधत्ते दातव्यं

ग्राहयामास मरीच्यादीनहंमुनीन् इतियथाचतुर्मुखस्तथैव स्वायंभुवोमनुस्तस्मिन्नवांतरकल्पेवेदोक्तधर्मा
न्ग्रंथ्नातिमनुग्रहणेनात्रयाज्ञवल्क्यविष्णवादयउपलक्ष्यंतेइति तत्रैवआचारकांडेप्रथमाध्यायेउपोद्घातप्रक
रणेयुगेयुगेचयेधर्माइति ॥३२॥ संख्याकश्लोकव्याख्यानेभर्तृवाक्योल्लंघिनीयातांशिक्षयेदित्यत्रयाज्ञव
ल्क्यवचनंस्त्रीभिर्भर्तुर्वचः कार्यएषधर्मः परस्त्रियाइतियाज्ञवल्क्योक्तः इतितत्रैवाचारकांडे प्रथमाध्या
येवाजसनेयशाखायामपिपूर्वकलियुगवर्ज्यप्रतिपादनप्रकरणेतत्प्रायश्चित्तस्यमनुयाज्ञवल्क्यादिभिरुक्त
स्यापिग्राह्यत्वमित्यत्र अनेनविधिनापापिस्थावरेषुन संशयः कायेनपंक्त्याहस्ताभ्यामपसधाहिमुच्यतेच
तुर्गुणंकर्मकृतेहि गुणंवाक्यप्रदूषितेकल्वानुमानसंपापंतथैवैकगुणंस्मृतंचकारोयाज्ञवल्क्यमन्वादिसमु
च्चयार्थप्रसिद्धोहितदीयग्रंथेषुप्रायश्चित्ताध्यायाः इतितदध्याये षट्कर्माभिरतोनित्यमिति ॥३८॥ संख्याक
श्लोकव्याख्यानेब्रह्मचारीवेदाध्ययनांगगुरुशिश्रूषाप्रकरणे अध्ययनस्यातिकर्तव्यतामाह याज्ञवल्क्यः गुरुं
चैवाप्युपासीतस्वाध्यार्थंसमाहितः आहूतश्चाप्यधीयीतलब्धंचास्मैनिवेदयेत् इति तस्मिन्नेवाध्याये। न
या

माश्वपादनः। ब्रह्मणा कथिताश्चैव कौमाराश्च श्रुतामया॥ धूम्रायनकृता धर्माः काण्वा वैश्वानरा अपि॥ भार्गवा या
ज्ञवल्क्याश्च मार्कंडेयाश्च कौशिकाः॥ इत्यादिना तच्छ्लोकव्याख्यान एव। जगत्सृष्टिप्रकरणे॥ तथा च वाजस
नेयिब्राह्मणे॥ सृष्टिप्रकरणे॥ प्रजापतिर्मनुष्यादिपिपीलिकांतप्राणिनां चतुर्वर्णाभिमानिदेवतानां च सृष्टिमा
म्नायास्तु ग्रमपि क्षत्रियादिकं नियन्तुं समर्थस्य धर्मस्य सृष्टिराम्नायते स नैव व्यभवत्तच्छ्रेयो रूपमत्यसृजत ध
र्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्मात्परं नास्तीति॥ अस्यायमर्थः। प्रजापति मन्वादिरूपधारी जगत्स्रष्टा परमेश्व
रः॥ प्रजाः सृष्टाः तन्नियामकाभावात्। कृतकृत्यता रूपं विभवन्नैव प्राप्तवान् ततो विचार्य नियामकत्वेन श्रेष्ठं
धर्ममतियत्नेनासृजदिति अहो महदिदं धर्मस्य सामर्थ्यं। इत्यादिना प्रथमाध्याये॥ आचारकांडे उपोद्घातप्र
करणे न कश्चिद्वेदकर्त्ता चेति॥२१॥ संख्याकश्लोकव्याख्याने॥ कल्पादौ तिरोभूतवेदस्मृत्यादिशास्त्रग्रंथा
न् चतुर्मुखाय परमेश्वरः प्रेरयामास॥ चतुर्मुखः स्वायंभुवमन्वादीन् आहूयामास॥ इत्यस्मिन्नर्थे पूर्वप्रतिपा
दनक्रमेण चतुर्मुखस्य स्मृतिशास्त्रकर्तृत्वं मनुनाप्युक्तं॥ इदं शास्त्रं तु कृत्वासौ मामेव स्वयमादितः॥ विधिव

न् धर्मान् शंखस्य लिखितस्य च। कात्यायनकृतांश्चैव तथा प्राचेतसान्मुनेरिति॥ तत्रैव आचारकांडे प्रथमा᳚
ध्याये॥२०॥ संख्याकश्लोकव्याख्याने॥ तथाच मूलश्लोकः। कल्पे कल्पे क्षयोत्पत्त्या ब्रह्मविष्णुमहेश्वराः॥
श्रुतिस्मृतिसमाचार निर्णेतारश्च सर्वदा इति॥ २०॥ एतद्व्याख्यानावसरे। जगत्कारणत्व विचारे। आत्मा वा
इदमेक एव। इति ऋग्वेदोपनिषदः॥ आत्मन आकाशः संभूत इति। तैत्तरीयोपनिषदः॥ सदेव सोम्येदमग्र
आसीदिति छांदोग्योपनिषदः॥ यथा सुदीप्तादिति अथर्वणोपनिषदः॥ तद्धेदं तर्ह्यव्याकृतमासीत् तन्नाम
रूपाभ्यामेव व्याक्रियतेति वाजसनेयवाक्यमिति। तच्छ्लोकव्याख्यान एव। धर्मशास्त्र कर्तृ नाम निरूप
ण प्रस्तावे। पैठीनसिः॥ तेषां मन्वंगिरोव्यासा गौतमात्र्युशनायमाः॥ वसिष्ठदक्षसंवर्त्त शातातप पराशराः।
विष्णवापस्तंबहारीताः शंखः कात्यायनो भृगुः॥ प्रचेता नारदो योगी बोधायन पितामहौ॥ सुमंतुः कश्यपो बभ्रुः
पैठीनो व्याघ्र एव च॥ सत्यव्रतो भरद्वाजो गार्ग्यः कार्ष्णाजनिस्तथा॥ जाबालिर्जमदग्निश्च लोगाक्षिर्ब्रह्मसंभ
व इति॥ एतच्छ्लोकव्याख्यान एव॥ श्रुतामे मानवा धर्मा इत्यनुक्रम्य एवं पठ्यते। औमामा हेश्वराश्चैवं नदीध

परंपरया ज्ञानद्वारा मोक्षं प्राप्नोतीत्यत्र ॥ अत एव याज्ञवल्क्येनेदमुक्तं ॥ वीणावादनतत्त्वज्ञः श्रुतिजातिविशा
रदः । तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छतीति ॥ तत्रैव प्रथमाध्याये ॥ तस्मिन्नृषिसभामध्य इति ॥ ८
॥ संख्याकश्लोकव्याख्याने ॥ तस्मिन्नित्याश्रमोक्तिः ॥ वक्ष्यमाणधर्माणामशेषमुनिसंमतत्वं दर्शयितुमृषि
सभेत्युक्तं ॥ ऋषिष्वपि विशेषेण स्मृतिकारिणां गोत्रप्रवर्त्तकानां चात्रियाज्ञवल्क्यादीनां संमतिं विवक्षित्वाह मु
निमुख्य इति ॥ तत्रैव तस्मिन्नेवाध्याये पराशरमूलं । तस्मिन्नृषिसभामध्ये शक्तिपुत्रं पराशरं सुखासीनं
महातेजा मुनिमुख्यगणावृतं ॥ कृतांजलिपुटो भूत्वा व्यासस्तु ऋषिभिः सह । प्रदक्षिणाभिवादैश्च स्तुतिभिः
समपूजयत् । ततः संतुष्टहृदयः पराशर महामुनिः । आह सुस्वागतं ब्रूहि ह्यासीनो मुनिपुंगवः ॥१०॥ कुशलं
सम्यगित्युक्त्वा व्यासः पृच्छत्यतः परं ॥११॥ यदि जानासि भक्तिं मे स्नेहाद्वा भक्तवत्सल । धर्मं कथय मे तात ह्यनु
ग्राह्योप्यहं तव ॥१५॥ श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथा । गार्गीया गौतमीयाश्च तथा चौशनसाः श्रु
ताः । अत्रेर्विष्णोश्च संवर्त्ताद्दक्षादंगिरसस्तथा । शातातपाच्च हारीताद्याज्ञवल्क्यात्तथैव च । आपस्तंबकृता

प्र॰श्रा॰ मपश्यत्। अत्रिरददाद्दौर्वाय प्रजां। पुत्रकामाय। अथह। याज्ञवल्क्यस्य द्वे भार्ये बभूवतुरित्याद्याः श्रुतयः नचैवं सति मन्वादि नि॰
स्मृतौ कुतो नादर इति शंकनीयं। मन्वादिस्मृतेर्मेधातिथ्यादिभिर्व्याख्यातत्वात्। याच मूलभूतचोदनानुपलब्धिरुपन्यस्ता
साप्यसिद्धा तत्रैव। प्रथमभागे उपोद्घातप्रकरणे। व्यासंप्रति धर्मज्ञानकांक्षिणः ऋषयः धर्मप्रश्नं कृतवंतः व्यासस्तु। नचाहं सर्व
४८९ तत्वज्ञः कथं धर्मं वदाम्यहं। अस्मत्पितैव प्रष्टव्य इति व्यासः सुतो ब्रवीदिति। वचनेन स्वस्य कलियुगधर्मविषये तत्वज्ञता
नास्ति स्वपितुः पराशरस्यैव असाधारणत्वेन कलियुगधर्मज्ञानहेतुभूततप आदिबलातिशयात्। तादृशज्ञानातिशयवत्वं अ
साधारणं भवति तथा मम नास्तीत्यभिप्रायं माधवाचार्यो विवृणोति॥ यद्यपि मन्वादयः कलिधर्माभिज्ञाः। तथापि पराश
रस्यास्मिन्विषये तपोविशेषबलादसाधारणः कश्चिदतिशयो द्रष्टव्यः॥ इत्यत्र। दृष्टांतत्वेन वाजसनेयतैत्तरीय
सामगशाखाविशेषप्रवर्तककण्वमाध्यंदिनकाठकादिशाखाप्रवर्तकऋषीणां स्वस्वशाखाज्ञाने असाधारणत्वं ए
वं कलियुगज्ञाने पराशरस्य असाधारणत्वमिति ज्ञापनार्थं माधवाचार्येणोक्तं॥ यथा कण्वमाध्यंदिनकाठककौ
थुमतैत्तरीयादिशाखासु कण्वादीनां असाधारणत्वं तद्वदवगंतव्यमिति॥ उक्त्वा पराशरस्मृतिव्याख्यानं कर्तु
मारभते माधवाचार्यः तत्र तावत्। तदर्थे याज्ञवल्क्यकण्वकात्यायनादीनां वचनानि माधवाचार्यैः उदाहृता राम॰
नि वयं प्रदर्शयिष्यामः॥ ॥ तथाहि॥ ॥ तत्रैव माधवीये परमेश्वरप्रीत्यर्थमेव नृत्यगीतादिकं कुर्वन्॥ ४७

कर्तुः। विवरणोपन्यासवार्तिकसार पंचदशीप्रकरणजीवन्मुक्तिप्रकरणादि अनेकवेदांतग्रंथकर्तुः पुरुषार्थकलानिध्या
दिइतिहासपुराणादिसारसंग्रहरूप धर्मार्थकाममोक्षलक्षणपुरुषार्थचतुष्टयस्वरूपप्रतिपादकग्रंथकर्तुः। अष्टोत्त
रशतोपनिषद्दीपिकाकर्तुः अन्येषां अस्माभिरज्ञातानां बहुशास्त्रग्रंथानांकर्तुः सर्वज्ञस्यमाधवाचार्यस्यकृतौपराश
रस्मृतिव्याख्यानात्मकपराशरमाधवीयेपि। याज्ञवल्क्यकण्वकात्यायनादीनांवाजसनेयिशाखाप्रवर्तकानांसंबंधिस्मृ
तिवाक्यानांसमस्तधर्मशास्त्रादिग्रंथेषुप्रमाणत्वेनउदाहृतत्वात्। शास्त्रानभिज्ञजनैःशुक्तिरूप्यवत्। आरोपितदोषाणां
तत्वयुक्तअयोग्यतादीनांचसुतरांनसंभवतीति॥ श्रुतिस्मृतिइतिहासपुराणादिप्रमाणैकशरणानां। आस्तिकैकशि
रोमणीनांस्पष्टतयाप्रतिभात्येवतथाहि। माधवीयेप्रथमभागेउपोद्घातप्रकरणे। किंच। वाजसनेयिशाखायांवंशब्राह्म
णेवेदसंप्रदायप्रवर्तकगुरुशिष्यपरंपरायांपराशरस्यपुत्रपौत्राःश्रूयंते। कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः। पा
राशर्यायणात्पाराशर्यायणः। पाराशर्यात्। पाराशर्योजातुकर्ण्यादिति। तस्मात्पराशरोपिमनुसमानएव। एषएवन्यायो
वसिष्ठात्रियाज्ञवल्क्यादिषुयोजनीयः। तत्तद्विषयश्रुतीनामुपलंभात् ऋषयोवाइंद्रंप्रत्यक्षंनापश्यन्। तंवशिष्ठःप्रत्यक्ष

र्तव्यः इत्यत्र। पूर्वेद्युः परेद्युर्वा पूर्वे दिशि पश्चिमदिशि वा चंद्रो न दृश्यते॥ न स्विन्नेव पिंडपितृयज्ञ इत्यत्र शतपथब्राह्मणं। यदै
वैष न पुरस्तान्न पश्चाद्दृश्यते अथ पितृभ्यो ददातीति॥ पर्वसंधिदिने हि पूर्वतः पश्चाद्वा चंद्रो न दृश्यत एवेत्यर्थः॥ चतुर्दश्याः
अष्टमांशे काले चंद्रः क्षीयते। अमावास्यायाः। अष्टमांशे काले चंद्रः। अणुरूपो वर्धते। अतः पूर्वेद्युरेव पिंडपितृयज्ञः।
इत्यत्र कात्यायनवचनं। कात्यायनेन। अष्टमेंशे चतुर्दश्याः क्षीणो भवति चंद्रमाः॥ अमावास्याष्टमेंशे तु तत्वं पुनः किल
भवेदणुरिति॥ एवं निर्णयसिंधुकारेणापि पूर्वोक्तवचनादि बहुग्रंथेषु स्वेन निमितवाक्यजातेषु सर्वत्र सकलधर्मविष
येष्वपि मुख्यप्रमाणत्वेन शतपथब्राह्मणवाक्यानां याज्ञवल्क्यकण्वकात्यायनादिवचनानां च बहुशोप्युदाहृतत्वा
त् याज्ञवल्क्यादीनां शापाद्ययोग्यतासत्वस्य। रज्जुसर्पतुल्यत्वात्। तत्स्मरणस्यापि प्रसक्तिरेव नास्तीति गम्यते॥ स
वं विद्यारण्याख्य पूर्वाश्रम माधवाचार्यनामक चतुर्वेदभाष्यकर्तुः पूर्वमीमांसाख्य जैमिनिसूत्राणां अधिकरणरत्नमा
लाख्यजैमिनिन्यायमालाकर्तुः। ब्रह्ममीमांसाख्य वेदांतशास्त्रास्य वैय्यासकीन्यायमालेति संज्ञितव्यासकृतसूत्रा
णां अधिकरणरत्नमालाकर्तुः पराशरस्मृतिव्याख्यानरूप पराशरमाधवीयकर्तुः कालनिर्णायक कालमाधवीय

थैवात्यधिकाश्रयाः। नदर्द्द कृत्स्यापूर्वस्मिन् ह्रासवृद्धीप्रकल्पयेदिति॥ तत्रैव प्रकृतिविकृतियागयोः प्रतिपत्पर्वावि
शिष्टसंध्यादिकालभेदेनच प्रकृतिविकृतियागनिर्णयेकात्यायनश्च। आवर्तनात्साम्यदिपर्वसंधिः कृत्वाद्युत्तस्मिन्
प्रकृतिंविकृत्याक्तदेवयागः परतोयदिस्यात्तस्मिन्विकृत्याः प्रकृतेः परेद्युरिति॥ तत्रैव पशुबंधक्रियाकालविचा
रिसंधिनिमित्तभेदेनदिनद्वयेपिव्यवस्थामाह कात्यायनः॥ अर्द्धादन्होभवति नियतंपर्वसंधिः परस्तात्कृत्वान
स्मिन्महनितुपशुः सद्यएवद्यहंवा। आरभ्याथप्रकृतिरथचेत्पर्वसंधिः परस्तात्कृत्वात्तस्मिन्प्रकृतिमथतुस्या
त्पशुस्त्वपराव॥ इति॥ तत्रैव दर्शश्राद्धस्यकालनियममाह॥ पिंडान्वाहार्यकंश्राद्धंक्षीणे राजनिशस्यते। वास
रस्यतृतीयांशनातिसंध्यासमीपतइति॥ कात्यायनोक्तेः॥ तत्रैव पूर्णामावास्याशेषामावास्यादिकालभेदेनदर्श
श्राद्ध पिंडपितृयज्ञयोरपिकालभेदशास्त्रोअनुष्ठानक्रमंदर्शयति॥ यदाचतुर्दशीयामंतुरीयमनुपूरयेत्। अमाव
स्याक्षीयमाणतदैवश्राद्धमिष्यतइतिकात्यायनोक्तेः॥ ॥पिंडपितृयज्ञस्तुकात्यायनैः यागदिनात्पूर्वेद्युः कार्यः॥
इत्यत्रकात्यायनः। पूर्वोवांगत्वात्॥ पिंडपितृयज्ञइतितत्सूत्रात्॥ इति॥ तत्रैवपर्वसंधिदिनएव पिंडपितृयज्ञःक

स्य व्रतेनानेन केशव ॥ प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव इति ॥ तत्रैव ॥ पूर्वोक्तनियमाः ॥ काम्यव्रते नि
यमिताः ॥ नित्यव्रते तु । सति संभवे कार्याः ॥ शक्तिमांस्तु पुनः कुर्यान्नियमं सविशेषणमिति कात्यायनोक्तेः ॥
इति ॥ तत्रैव ॥ वाजसनेयिनां पर्वसंधिकालमाह ॥ कालमाधवः ॥ यस्तु वाजसनेयी स्यात्तस्य संधिदिनात्पुरा
। नकाप्यन्वाहितः किंतु सदा संधिदिने हि स इति ॥ तत्रैव वाजसनेयिनां इष्टिकालमाह । यच्च कालादर्शे प्युक्तं ।
आवर्त्तनादधः संधिर्यद्यन्वाधाय तद्दिनं । परेद्युरिष्टिरित्याहुर्विप्रा वाजसनेयिन इति ॥ तत्रैव ॥ पौर्णमास्यां सं
धः स्कालान्वाधाने ष्टिमाह ॥ संधिश्चेत्संगमादूर्ध्वं भाक्पर्यावर्तनाद्रवेः ॥ सा पौर्णमासी विज्ञेया सद्यः स्कालविं
धौनैरिः ॥ इति ॥ तत्रैव ॥ बोधायनकात्यायनयोः यजनीयदिवसे चंद्रदर्शने सति । प्रायश्चित्त पूर्वकं । यागः प्रव
र्तते इत्यत्र । कात्यायनस्त्र । यजनीयेन्हि सोमश्चेद्वारुण्यां दिशि दृश्यते ॥ तत्र व्याहृतिभिर्हुत्वा दंडं दद्याद्द्विजातये
इति ॥ एतच्च बोधायनवाजसनेयिविषयं ॥ तत्रैव ॥ इष्टिकालस्य तिथिवृद्धिक्षयाभ्यां दिवापरिमाणस्य वृद्धि
क्षयाभ्यां च कालभेदप्राप्ते अनुगतं इष्टिकाललक्षणं संक्षेपेणाह ॥ कात्यायनोपि । परेन्हि घटिकान्यूनास्त

कण्वेनोक्तः॥उदयोपरिविद्धा तु दशम्यैकादशीयदि दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासनइति॥ तत्रैव ए
कादशीविषये॥ माधवीये कात्यायनोक्तिः॥ अष्टवर्षाधिकोमर्त्यो ह्यशीतिन्यूनवत्सरः। एकादश्यामुपवसेत्पक्ष
योरुभयोरपीति॥ इति॥ तत्रैव॥ एकादशीउपवासाकरणे दोषमाह॥ माधवीये कात्यायनः॥ अर्के पर्वद्वये रा
त्रौ चतुर्दश्यष्टमी दिवा॥ एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेदिति॥ तत्रैव॥ शुक्लैकादश्यां कृत्वभिगमने तां
बूलचर्वणे च सत्यपि उपवास परिपालनमात्र इत्यत्र॥ संभोगो ऋतु कालादन्यत्र रतः से कात्मसंभोगमृते न्य
त्र क्षयः स्मृत इति कात्यायनोक्तेः॥ तत्रैव॥ वैष्णवानां उपवासः एकादशी प्रयुक्तः नित्ये यदा स्यात्। तदानीं
श्राद्धप्राप्तौ उपवासपरिपालनार्थं पितृशेषमाघ्राय उपवासपरिपालनं आवश्यकं भवतीत्यत्र॥ कालमाध
वीये कात्यायनः॥ उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्॥ उपवासं तदा कुर्यादाघ्राय पितृसेवितमिति॥
तत्रैव एकादशीव्रतसंकल्पप्रकारमाह॥ अष्टाक्षरेण मंत्रेण त्रिर्जप्तेनाभिमंत्रितं। उपवासफलं प्रेप्सुः पिबे
त्पात्रगतं जलमिति। कात्यायनोक्तः। इति॥ तत्रैव एकादशीव्रतविषये॥ कात्यायनेन। अज्ञानतिमिरांध

पूजयंतोग्रहानेतान् लभंतेसकलंफलं॥ इति॥ तत्रैवकन्यादातृनाह याज्ञवल्क्यः॥ पितपिता महोभ्राता सकुल्यो
जननीतथा। कन्याप्रदः पूर्वनाशेप्रकृतिस्थः पर पर इति॥ तत्रैवगोदानप्रकरणे॥ तत्रयाज्ञवल्क्यः॥ यथाकथंचिद्द
त्वागांधनंवाधेनुमेववा॥ अरोगामपरिक्लिष्टांदातास्वर्गेमहीयतइति॥ तत्रैवतत्प्रकरणे॥ याज्ञवल्क्यः॥ हेमशृंगी
शफैरौप्यैः सुशीलावस्त्रसंयुता॥ सकांस्यपात्रादातव्याक्षीरिणीगौः सदक्षिणा॥ इति॥ एवंमयूखकारेणापि महाप्रमा
णत्वेनसमस्तधर्मनिर्णयविषयेयाज्ञवल्क्यकण्वकात्यायनादिवचनानांउदाहृतत्वेनयाज्ञवल्क्यादीनांशाप
वयोग्यता। असूयादिवद्भिः कैश्चित्कल्पितेतिनिश्चितोभवति॥ निर्णयसिंधावपि॥ निर्णयसिंधौप्रथमपरिच्छेदे
॥ काम्यदर्शश्राद्धप्रकरणे॥ काम्यंनैवकदाचनेतिवचनात्दर्शेचकाम्यंश्राद्धंकन्यांकन्यावेदिनःश्वेत्यादिनाया
ज्ञवल्क्येनोक्तमिति॥ तत्रैवभार्यायाः भर्तुराज्ञां विनास्नानव्रतादिकंनिष्फलंभवतीत्यभिप्रायककात्यायनोक्तः
॥ तत्रैवव्रतोपवासाशक्तभर्तृपितृमातृगुर्वादिनिमित्तकोपवासकर्तॄणांफलविशेषमाह॥ कात्यायनः॥ पितृमातृ
भ्रातृपतिगुर्वर्थेचविशेषतः। उपवासंप्रकुर्वाणः पुण्यंशतगुणंलभेत्। इति॥ दशमीविद्धएकादशीविषये॥ तत्रैव

यिलोकादानशीलानांसततानाप्नोतिपुष्कलानिति ॥ तत्रैवप्रतिग्रहेदोषविशेषमाह ॥ याज्ञवल्क्यः ॥ प्रतिग्रहीस्त
निभृक्रीध्वजीवेश्यानराधिपाः । अष्टादशगुणात्पूर्वपूर्वंदितेयथाक्रमं ॥ इति ॥ तत्रैवकर्मवैकल्येप्रायश्चित्त
माह ॥ याज्ञवल्क्यः ॥ यदिवास्यांगलोपस्यात् क्रियादिषुकयंचन ॥ व्याहारेहृष्यावंमंत्रंस्मरेद्धविष्णुमव्यय
मितितत्रैव ॥ एतेषुवक्ष्यमाणेषुनिमित्तेषु आचमनंविहितमित्याह ॥ कात्यायनः ॥ पित्र्यमंत्रानुद्रवणे आत्मा
लंभेप्यवेक्षणे । अधोवायुसमुत्सर्गेप्रहासेनृतभाषणेइति ॥ तत्रैव ॥ सर्वेषामंत्राणांऋषिदेवताछंदोज्ञानंविना
कर्मफलंनसंभवतीत्याह । याज्ञवल्क्यः ॥ आर्षंछंदश्चदैवत्यंविनियोगंतथैवच वेदितव्यंप्रयत्नेनब्राह्मणेन
विशेषतइति ॥ तत्रैव ॥ मधुरत्रयमाह ॥ कात्यायनः ॥ आज्यंक्षीरंमधुतथामधुरत्रयमुच्यतइति ॥ तत्रैव ॥ द्रव्य
मानं ॥ याज्ञवल्क्यः ॥ जालसूर्यमरीचिस्थंत्रसरेणुरजःस्मृतं । तेष्टौलिक्षास्तुतास्तिस्रोराजसर्षपउच्यतेइति ॥
तत्रैवनवग्रहादिपूजाप्रकारमाह ॥ याज्ञवल्क्यः ॥ यथावर्णंप्रदेयानिवासांसिकुसुमानिच ॥ गंधाश्चवलयश्चैव
वधूपोदेयोत्रगुग्गुलुः । इति ॥ तत्रैवतत्पूजाप्रकरणेयाज्ञवल्क्यः ॥ शक्तितोवायथालाभंसंस्कृत्यविधिपूर्वकं

श्चित्रऋषिगोविंदराजजयादित्यधरणीधरविश्वरूपभट्टभास्करपुत्रकुल्लूकभट्टादिभिः॥कृतव्याख्यामेषु॥महा
प्रमाणतयायाज्ञवल्क्यकण्वकात्यायनादिवचनानांशतपथब्राह्मणवाक्यानांचधर्मनिर्णयविषयेषुसर्वत्रउ
दाहृतत्वात्। याज्ञवल्क्यादीनांअयोग्यतासंसर्गोपिनास्तीतिदृढतरंप्रतीयते॥ दानमयूखे॥ भट्टभास्करा
ख्यः शंकराचार्यविद्यारण्यपूर्वकालीनः॥ब्रह्मपरिणामवादीवेदब्रह्मसूत्रउपनिषदादिभाष्यकर्तुःतस्य
पुत्रः मनुस्मृतिव्याख्यानकर्ताकल्लूकभट्टः तस्यपुत्रः भट्टशंकराख्यः तस्यपुत्रः भट्टनीलकंठाख्यः तत्कृ
तमयूखाख्यधर्मशास्त्रनिबंधनग्रंथेपि॥याज्ञवल्क्यादीनांस्मृतिकर्तृत्वेनतत्कृतस्मृतीनांचउदाहृतत्वा
त्॥ तेषां अयोग्यतानास्तीति अनेनाप्यनुमीयते॥ तथाहिदानप्रकरणे॥ अथपात्रंयाज्ञवल्क्यः। नविद्य
याकेवलयातपसावापिपात्रता। यत्रवृत्तमिमेचोभेतद्धिपात्रंप्रचक्षतइति॥ तत्रैव॥ दातुःकृत्यंवक्ष्यते॥
कात्यायनः कुशोपरिनिविष्टेनतथायज्ञोपवीतिना॥ देयंप्रतिगृहीतव्यंअन्यथाविफलंभवेत्।इति।तत्रैव।
प्रतिगृहीतुः धर्मादिज्ञानविशेषेणफलविशेषमाह॥ याज्ञवल्क्यः॥प्रतिग्रहसमर्थोपिनादत्तेयःप्रतिग्रहं॥

श्लो॰ व्या॰ ॥ तदाह याज्ञवल्क्यः ॥ संग्रामे वाहतो लक्ष्यभूतः शुद्धिमवाप्नुयात् ॥ मृतकल्पः प्रहारार्त्तो जीवन्न
पि विशुध्यतीति ॥ तस्मिन्नेवाध्याये ॥ यक्षरक्षःपिशाचान्न इति ॥ ९५ सं॰ श्लो॰ व्या॰ ॥ पतिलोकं न सा याति
ब्राह्मणी या सुरां पिबेत् ॥ इहैव सा शुनी गृध्री सूकरी चोपजायत इति याज्ञवल्क्यादिस्मृतिविरोधात् ॥
तस्मिन्नेवाध्याये ॥ गृहीत्वा मुसलं राजा । इति ॥ १०० सं॰ श्लो॰ व्या॰ ॥ स च स्तेनो वधेन मुसलाभिघातेन हतो
मुक्तोऽपि वा शुचिरिति याज्ञवल्क्यस्मरणात् ॥ इति ॥ तस्मिन्नेवाध्याये ॥ गोमूत्रमिति ॥ ११२ सं॰ श्लो॰ व्या॰ ॥
तथा च याज्ञवल्क्यः ॥ कुशोदकं च गोक्षीरं दधि मूत्रं शकृद्घृतं । जग्ध्वा परेऽह्न्युपवसेत् कृच्छ्रं सांतपनं चरन्निति
॥ तस्मिन्नेवाध्याये ॥ यथाकथंचितमिति ॥ २२॰ सं॰ श्लो॰ व्या॰ अत एव याज्ञवल्क्यः ॥ धर्मार्थं यश्चरेदेतच्चं
द्रस्येति सलोकतां ॥ कृच्छ्रकृच्छ्रमकामस्तु महतीं श्रियमाप्नुयात् । अतः प्राजापत्यादिकृच्छ्रमपि अभ्यु
दयफलमिति याज्ञवल्क्येनोक्तमिति ॥ एवं यद्वै किंच मनुरवदत्तद्भेषजं भेषजमेवास्मै करोति इत्यादिश्रुति
प्रतिपाद्यमहाप्रामाण्यवन्मनुस्मृतेः व्याख्यनकृद्भिः शंकरभगवत्पादाचार्यकालादपि प्राचीनैः मेधाति

याद्वैश्याश्च शूद्रायां जातस्योत्कर्षापकर्षौ जानीयात् ॥ किंतु जातेरपकर्षात् जात्युत्कर्षौ कुले ज्ञेयः सप्तमं पंच
मेपि वा इति याज्ञवल्क्यदर्शनाच्च इति ॥ तच्छ्लोकव्याख्याने ॥ क्षत्रियाज्जातस्य पंचमे जन्मनि उत्कर्षो
पकर्षौ बोद्धव्यौ वैश्याज्जातस्य ततोप्युत्कर्षात् याज्ञवल्क्येनापिशब्देन पक्षांतरस्य संगृहीतत्वात् । इति
॥ तस्मि न्नेवाध्याये ॥ अपशास्मृतिषमिति ॥ ८८ सं० श्लो० व्या० ॥ अप इति ॥ जललोहविषमांससोमक्षी
रदधिघृततैलगुडदर्भान् । तथा गंधवती सर्वाणि कर्पूरादीनि । क्षौद्रं माक्षिकं मधु मधूच्छिष्टं सश्रामरं मधू
च्छिष्टेति याज्ञवल्क्येन पठितं वर्जयेत् । इति । ८८ ॥ तस्मिन्नेवाध्याये ॥ धर्मेप्सव इति ॥ १२७ सं० श्लो० व्या०
॥ ये पुनः शूद्राः स्वधर्मवेदिनो धर्मप्रासिकामास्त्रैवर्णिकानामाचारमनिषिद्धमाश्रिताः । तेन मस्कारेण
मंत्रेण पंच यज्ञान्नहापयेदिति । याज्ञवल्क्यवचनात् । नमस्कारमंत्रेण तं चां तरहितमिति ॥ मनुस्मृतौ एका
दशाध्याये ॥ चरितव्यमतो नित्यमिति ॥ ५३ सं० श्लो० व्या० ॥ याज्ञवल्क्यः ॥ विहितस्याननुष्ठानान्निंदित
स्य च सेवनात् । अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छतीति ॥ तस्मिन्नेवाध्याये ॥ लक्ष्यं शास्त्र इति ॥ ७३ सं०

श्लोकव्याख्याने॥अन्वाधेयंव्याख्यातंकात्यायनेन॥श्लो॰॥विवाहात्परतोयत्तुलब्धंभर्तृकुलेस्त्रिया।अ॰
न्वाधेयंतदुक्तंतुसर्वबंधुकुलेतथा।इति॥तस्मिन्नेवाध्यायेविद्याधनंतुइति॥२०६संख्याकश्लोकव्याख्या
ने॥कात्यायनेन॥परभक्तप्रदानेनप्राप्ताविद्यायदान्यतः।तयाप्राप्तंचविधिनाविद्याप्राप्तंतदुच्यते इति
॥तस्मिन्नेवाध्याये॥अनपत्यस्यइति॥२१७॥संख्याकश्लोकव्याख्याने॥याज्ञवल्क्येन।पितरावित्येकशे
षकारणात्॥तस्मिन्नेवाध्यायेसंधिन्नित्वादिति॥२७७सं॰श्लो॰व्या॰॥उत्क्षेपकग्रंथिभेदौकरसंदंशहीन
काविितियाज्ञवल्क्यवचनात्॥दशमाध्याये।सर्ववर्णेभ्यइति॥५।सं॰श्लो॰व्या॰॥याज्ञवल्क्योपि॥सवर्णे
भ्यस्सवर्णासुजायंते॥हीनजातयः।इति॥तस्मिन्नेवाध्याये।स्त्रीष्वनंतरइति॥६सं॰श्लो॰व्या॰॥एतेषां
चनामानिमूर्धाभिषिक्तमाहिष्यकरणाख्यानियाज्ञवल्क्यादिभिरुक्तानि॥तस्मिन्नेवाध्याये॥ब्राह्मणा
द्वैश्यकंन्याइति॥८सं॰श्लो॰व्या॰॥कन्याग्रहणादत्रऊढायामित्यध्याहार्यंविन्नास्वेषविधिः।स्मृतइति
याज्ञवल्क्येनस्फुटीकृतत्वाच्चइति॥तस्मिन्नेवाध्याये।शूद्रोब्राह्मणइति॥६५सं॰श्लो॰व्या॰एवंसंत्रि

॥ तस्मिन्नेवाध्याये ॥ कर्मणापिसमइति ॥ ७७ संख्याकश्लोकव्याख्याने ॥ कर्मणासत्रविद्गुद्रान्समानजा
तीयान् ॥ हीनांस्तुदापयेत् । इतिकात्यायनेनविशेषितत्वात् ॥ तस्मिन्नेवाध्याये ॥ सर्वेषामिति ॥ २१० ॥ संख्याक
श्लोकव्याख्याने ॥ अतएवकात्यायनेनयद्वादशेभ्यइतिभस्यैकंद्वादशगोदानंविहितंयद्यपि ॥ तस्यार्धपंचा
शद्भवतितथापीहन्यूनार्थग्रहणेनापि । इमेअर्थिनउच्यंते ॥ अस्यश्लोकस्यव्याख्याने ॥ एवाच्चषट्टद्वित्री
येभ्यः चतस्रस्तृतीयेभ्यः तिस्रश्चतुर्थेभ्यइतिसूचयता । कात्यायनेनस्फुटीकृतमिति ॥ अस्मिन्नेवाध्याये ॥
तेपृष्ठास्तुइति ॥ २५५ संख्याकश्लोकव्याख्याने ॥ तसाक्षिणइतिसामान्यश्रवणेपिरक्तस्रग्वाससः । सीमान
येयुरिति याज्ञवल्क्यवचनात् ॥ इति ॥ अस्मिन्नेवाध्याये ॥ ग्रासनाद्वाविति ॥ ३१६ संख्याकश्लोकव्याख्याने
॥ अतएवयाज्ञवल्क्यः ॥ श्लो· ॥ मृतकल्पःप्रहारार्तोजीवन्नपिविशुध्यतीति ॥ अस्मिन्नेवाध्याये ॥ गुरुंवाबाल
वृद्धौवाइति । ३५० संख्याकश्लोकव्याख्याने । कात्यायनश्च भृगुशब्दोल्लेखेनमन्वर्थश्लोकमेवव्यक्तंव्याख्यात
वान् । श्लो· ॥ आततायिनिचोत्कृष्टेतपस्वाध्यायजन्मतः । वधस्तत्रतुनैवस्यात्पातंहीनेवधोभृगुः ॥ इति । मनुस्मृतौ

विद्वांस्तु ब्राह्मण इति ॥ ३८ ॥ संख्याकश्लोकव्याख्याने ॥ याज्ञवल्क्यो प्याह ॥ श्लो० ॥ राजालब्ध्वा निधिंदद्या

त् द्विजेभ्योर्धं द्विजः पुनः ॥ विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यत इति ॥ तस्मिन्नेवाध्याये ॥ नोत्पादयेदिति ॥ ४३

संख्याकश्लोकव्याख्याने ॥ तदाह कात्यायनः ॥ नराजातु वशित्वेन धनलोभेन वा पुनः ॥ स्वयं कर्माणि कुर्वी

त नराणामविवादिनामिति ॥ तस्मिन्नेवाध्याये ॥ स्त्रीणामिति ॥ ६८ संख्याकश्लोकव्याख्याने ॥ अतएव या

ज्ञवल्क्यः ॥ यथाजाति यथा वर्णं सर्वे सर्वेषु वा स्मृताः ॥ इति ॥ तस्मिन्नेवाध्याये ॥ द्विकं त्रिकमिति ॥ १४२

संख्याकश्लोकव्याख्याने ॥ तदाह याज्ञवल्क्यः ॥ श्लो० ॥ असीतिभागो वृद्धिस्स्यात् मासिमासि सबंधके

॥ वर्णक्रमाच्छतं द्वित्रिचतुः पंचकमन्यथा इति ॥ तस्मिन्नेवाध्याये ॥ कृतानुसारादिति ॥ १५२ संख्याकश्लो

कव्याख्याने ॥ तदाह कात्यायनः ॥ प्रीतिदत्तं न वर्धेत यावन्न प्रतियाचितं ॥ याच्यमानंनदत्तं चेद्वर्धते पंच

कंशतमिति ॥ १५२ तस्मिन्नेवाध्याये ॥ नातिसांवत्सरीमिति ॥ १५३ संख्याकश्लोकव्याख्याने ॥ कात्या

यनः ॥ श्लो० ॥ ऋणिकेन कृता वृद्धिरधिकासंप्रकल्पिता ॥ आपत्कालकृतानित्यं दातव्या कारिता तथा इति

के॥ यत्तु याज्ञवल्क्येन उभयसंबधिरिक्थहरत्वमुक्तं तत्क्षेत्रिकपितुः औरसपुत्राभावे बोद्धव्यमिति॥ तस्मिन्नेवा
ध्याये॥ क्रीणीयाद्यस्त्वपत्य इति॥१७४ संख्याकश्लोकव्याख्याने॥ सजातीयेस्वयंप्रोक्तस्तनयेषु मयाविधिरि
ति याज्ञवल्क्येन इति॥ तस्मिन्नेवाध्याये॥ यंब्राह्मणस्तु इति॥१७०॥ संख्याकश्लोकव्याख्याने॥ यमितिवि
न्नास्त्वेषविधिः स्मृत इति याज्ञवल्क्यदर्शनादिति॥ तस्मिन्नेवाध्याये॥ भ्रातणामेकमिति॥१८२ संख्याक॰
व्याख्याने॥ पत्नीदुहितरश्चैवपितरौ भ्रातरस्तथा॥ तत्सुता इति याज्ञवल्क्यवचनात्॥ इति॥ तस्मिन्नेवाध्या
ये अनंतरसपिंडाद्य इति॥१८७॥ संख्याकश्लोकव्याख्याने॥ तदाह याज्ञवल्क्यः। पत्नीदुहितरश्चैवपितरौ
भ्रातरस्तथा। तत्सुतो गोत्रजो बंधुः शिष्यस्सब्रह्मचारिणः॥ इति॥ तस्मिन्नेवाध्याये॥ अध्यग्न इति॥ १९४
संख्याकश्लोकव्याख्याने। तदाह कात्यायनः॥ विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसन्निधौ। तदध्यग्नि
कृतं सद्भिः स्त्रीधनं परिकीर्तितं इति॥ तस्मिन्नेवश्लोके॥ यथाच कात्यायनः। यत्पुनर्लभते नारी नीयद्भूम तु पै
तृकात्। अध्यावाहनिकं नाम तत् स्त्रीधनमुदाहृतं। इति। तस्मिन्नेवाध्याये॥ अन्वाधेयं च इति॥१९५ संख्याक

नवमाध्याये ॥ एतावानेव पुरुष इति ॥ ८५॥ संख्याकश्लोकव्याख्याने ॥ एतावानिति ॥ नैकः पुरुषो भव
ति अपि तु भार्या स्वदेहमपनीयं । पत्न्या नीत्येतत् परिमाण एव पुरुषः ॥ तथा च वाजसनेयब्राह्मणं अर्धो ह
वा एष आत्मनस्तस्मात् यज्जायां न विंदते नैतावत् प्रजायते असर्वो हि तावद्भवति । अथ यदैव जायां विंदते
थ प्रजायते तर्हि सर्वो भवति तथा चैतद्वेदविदो विप्रा वदंति यो भर्ता सैव भार्या स्मृतेति एवं च तस्या मुता दि
तं भर्तुरेवापत्यं भवतीति यतश्च दंपत्योरैक्यमतः ॥ ८५॥ तत्रैव नवमाध्याये ॥ ऊर्ध्वं पितुश्च मातुश्च इति ॥
१०४ संख्याकश्लोकव्याख्याने ॥ तदाह याज्ञवल्क्यः विभागश्चेत्पिता कुर्यादिच्छया विभजेत् सुतानिति ॥
॥ तस्मिन्नेवाध्याये स्वेभ्योंशेभ्यस्तु इति ॥ ११८ संख्याकश्लोकव्याख्याने ॥ तथा च याज्ञवल्क्यः ॥ असं
स्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः ॥ भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकमिति ॥ तस्मिन्नेवा
ध्याये ॥ यद्येकरिक्थिनौ इति ॥ १६२ संख्याकश्लोकव्याख्याने ॥ अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः
उभयोरप्यसौ रिक्थी पिंडदाता च धर्मत इति याज्ञवल्क्योक्तविषये ॥ इति ॥ तस्मिन्नेवाध्याये ॥ तस्मिन् श्लो

कव्याख्याने॥ तथाहयाज्ञवल्क्यः॥ अग्रमत्तश्चरेद्भैक्षं सायान्हेनाभिसंधित इति॥५६ तत्रैव षष्ठाध्याये॥ ॥
प्राणायामाइति॥७० संख्याकश्लोकव्याख्याने॥ तदाह योगी याज्ञवल्क्यः॥ श्लो·॥ नासिकोत्कृष्टउच्छ्वासो
ध्मातः पूरक उच्यते॥ कुंभको निश्चलश्वासो मुच्यमानस्तु रेचक इति॥ मनुस्मृतौ सप्तमाध्याये॥ मार्गशीर्षे
इति॥१८२ संख्याकश्लोकव्याख्याने॥ अतएव मन्वर्थव्यापारपरं संक्षेपेण याज्ञवल्क्यवचनं॥ श्लो·॥ य
दासस्य गुणोपेतं परराष्ट्रं तदा व्रजेदिति॥ तत्रैव सप्तमाध्याये॥ जित्वा संपूजयेदिति॥२०१ संख्याकश्लोक
व्याख्याने॥ तदाह याज्ञवल्क्यः॥ श्लो·॥ नातः परतरो धर्मो नृपाणां यदुपार्जितं। विप्रेभ्यो दीयते द्रव्यं प्र
जाभ्यश्चाभयं सदेति॥ तत्रैव तस्मिन्नेव अष्टमाध्याये॥ व्यवहारानिति॥ प्रथमश्लोकव्याख्याने॥ तदाह
कात्यायनः॥ श्लो·॥ विनानार्थेन संदेहे हरणो हार उच्यते। नानासंदेहहरणाद्व्यवहार इति स्मृत इति॥ मनु
स्मृतौ अष्टमाध्याये॥ जातमात्रेति ॥२० संख्याकश्लोकव्याख्याने॥ अतएव कात्यायनः॥ श्लो·॥ यत्र विप्रोन
विद्वान्स्यात् क्षत्रियं तत्र योजयेत् वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्॥ इति॥ तस्मिन्नेवाध्याये॥ ॥

२०४ संख्याकश्लोके॥ तदाह याज्ञवल्क्यः॥ ब्रह्मचर्यं दयाक्षांतिर्ध्यानं सत्यमकल्पिता॥ अहिंसास्तेयमाधुर्ये दमश्चेति यमाः स्मृताः॥ इति॥ तत्रैव चतुर्थाध्याये २४७ संख्याकश्लोके॥ अन्यत्र कुलटाषंडपतितेभ्यस्तथा द्विष इति याज्ञवल्क्यवचनात्कुलटादिवर्जं सर्वतः प्रतिगृण्हीयात् अभयदक्षिणां च॥ इति॥ मनुस्मृतौ पंचमाध्याये॥ पाठीन इति॥ १६ संख्याकश्लोकव्याख्याने॥ याज्ञवल्क्यः॥ भक्ष्याः पंचनखाः श्वाविगोधाः कच्छपशल्यकाः॥ शशश्च मत्स्येष्वपि तु सिंहतुंडकरोहिताः॥ इति॥ मनुस्मृतौ पंचमाध्याये॥ नास्य कार इति॥ ६९ संख्याकश्लोकव्याख्याने॥ तथाप्यून द्विवार्षिकं निखनेदिति याज्ञवल्क्यवचनादिति॥ तत्रैव पंचमाध्याये॥ नवर्धयेदिति ६४ संख्याकश्लोकव्याख्याने॥ याज्ञवल्क्येन च॥ ऋत्विजां दीक्षितानां चेत्यादिना सद्यः शौचमुक्तं॥ इति॥ तत्रैव पंचमाध्याये॥ दिवाकीर्तीति॥ ६५ संख्याकश्लोकव्याख्याने॥ गोविंदराजस्तु याज्ञवल्क्यवचनाच्च स्पृष्टिनमेव तत्स्पृष्टिनमाह नोदक्यादिस्पृष्टिनं तत्राचमनविधानात्। तदाह याज्ञवल्क्यः॥ उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेदिति॥ मनुस्मृतौ षष्ठाध्याये॥ विधूम इति॥ ५६ संख्याकश्लो

तीतिशेषः॥ कुतः इत्युक्ते अनपेक्षत्वादिति। प्रत्यक्षप्रमाणस्य स्वजनने अन्यप्रमाणानपेक्षत्वादित्यर्थः॥ बा
दरायणस्येति॥ पदं तु बादरायणस्यापि इदं प्रत्यक्षलक्षणाद्युपपादनं संमतमिति द्योतनार्थं न तु
बादरायणमतमिदं॥ ममम तन्त्रा। इतिपक्षांतरद्योतनार्थं॥ अपि तु। स्वगुरोः ब्रम्हत्वनिर्णायक
उत्तरमीमांसासूत्रकर्तुः बादरायणस्यापि मयोक्त प्रत्यक्षस्वरूपादिकथनं संमतमिति गौरवा
र्थं इति शाबरस्वामिभाष्ये भाट्टप्राभाकरकृतराणकयोश्च व्यवस्थितः॥ एवं वेदस्यापि प्रमाणां
तरानपेक्षतया प्रत्यक्षसदृशत्वेन प्रमाकरणत्वेनैव स्वतः प्रामाण्यं संभवति॥ एतत्प्रत्यक्षं॥ अ
नुसृत्यमानं प्रमाणं भवतीति॥ अनुमानं भवति तस्य पक्षहेतुव्याप्तिदृष्टांतपक्षधर्मतादीनां प्रत्यक्ष
विषयत्वात्॥ तदपेक्षा वर्तते॥ एवं उपमानस्य उप समीपे सन्निहितकाल इत्यर्थः॥ गोसदृशो ग
वय इत्यत्र गवयप्रत्यक्षसन्निहितकाले ज्ञडिति गोसदृशो गवय इति ज्ञानं जायते॥ तत्रापि तद्ज्ञान

स्यापि प्रत्यक्षसापेक्षत्वं वर्तते॥ एवं शाब्दस्यापि पदादिवर्णादिप्रत्यक्षसापेक्षत्वं सिद्धमेव॥ तस्मात्प्रत्य
क्षस्य लोकव्यवहारे प्रत्यक्षप्रमाणस्य। प्रमाणांतरानपेक्षत्ववत्॥ वेदस्यापि स्वोद्देश्यविषयकज्ञानज
नने प्रमाणकरणत्वेन प्रामाण्यं सिद्धमेव भवति॥ ननु वेदस्य प्रमाकरणत्वेनैव प्रामाण्यमित्युक्तं
प्रमानाम॥ अनधिगताबाधितार्थविषयकं ज्ञानं तत्करणं प्रमाणमिति प्रमाणलक्षणं सर्वशास्त्रसि
द्धं॥ तथा सति वेदजन्यज्ञानविषयस्य स्वर्गादेः येन केनापि पुरुषेण अदृष्टत्वात् तादृशस्वर्गादिज्ञान
जनकवेदस्य प्रामाण्यं संदिग्धमेव भवति॥ अपि च वादिविप्रतिपत्तेः॥ वेदाः अप्रमाणं वाक्यत्वात्
अस्मदादिवाक्यवत्॥ इत्यादिसत्प्रतिपक्षानुमानस्य पूर्वपक्षसहकारित्वादिति चेत्सत्यं॥ यथा लो
केन द्यास्तीरे कपित्थवृक्षे पंच फलानि संतीति अज्ञातज्ञापकवाक्यश्रवणानंतरं नदीतीरगमनेन त
त्फलानुभवप्राप्त्यनंतरं तल्लौकिकवाक्यस्यापि प्रमाकरणत्वेन प्रामाण्यसिद्धौ सत्यां सर्वदेश सर्व-

कालप्राप्तैकरूपापौरुषेयाज्ज्ञानसंशयभ्रांतिरूपदोषरहितत्वेनादुष्टात्स्वकवेदस्यप्रमाकरणत्वेनैवप्रामा
ण्यसिद्धेः॥कोवासंदेहःप्राप्नुयात्॥वेदस्तुत्रिभागतयावर्तते॥क्रियाभागःभावनाभागःज्ञानभागश्चे
ति॥क्रियाभागस्तुअग्निहोत्रादिस्रौतप्रतिपादकः॥भावनाभागस्तुमंत्रजपादिनाउपास्यदेवताभावनाजन्य
साक्षात्कारपर्यंतउपासनादिसाधनप्रतिपादकः ज्ञानभागस्तुप्रमाणजन्यअपरोक्षब्रह्मसाक्षात्कारपर्यंतसा
धनादिप्रतिपादकः तेषुसाधनेषुअनुष्ठितेषुतत्तत्साध्यरूपफलानुभवस्यकैश्चित्प्राप्तत्वात्तथाहि।पुत्रका
मःपुत्रेष्ट्यायजेतवृष्टिकामःकारीरेष्ट्यायजेत॥ततइत्यादिकाम्यकर्मणापुत्रवृष्ट्याद्यैहिकफलप्राप्तेर्दर्शनात्तद्वत
दृष्टांतेनस्वर्गादीनामपिसाध्यत्वप्राप्तेःअनुमानसंभवात्लोकेपिसर्वस्याप्यर्थस्यप्रत्यक्षविषयत्वंनसंभवतियथायो
ग्यंअनुमितिउपमितिशाब्दादिविषयत्वस्यावश्याभ्युपेयत्वात्तद्यथाज्योतिःशास्त्ररीत्याग्रहणनवग्रहचारातिचार
वक्रादिप्रत्यक्षदर्शनेनअमावास्यादितिथियोगकरणादिप्रत्यक्षाविषयाणांअनुमानप्रमाणजन्यज्ञानविष

यत्वसंभवः॥एवंपाकोषधिकृष्यादिफलानांक्वचित्कदाचित्प्रत्यक्षदर्शनविषयत्वेनतत्सजातीयभावि
कालप्रत्यक्षविषयफलादीनामपिअनुमितिविषयत्वसंभवश्चदृश्यते॥एवंपुत्रेष्टिकारीरेष्ट्यादिफलदर्श
नेनस्वर्गाद्यप्रत्यक्षफलानामपिअनुमानविषयत्वसंभवाच्च॥क्रियाभागोवेदःप्रमाणमितिवक्तुंशक्यते॥ए
वमेव॥वस्तुगत्यापरमार्थतःविचारेकृतेसतिवेदमात्रस्यब्रम्हात्मैकाबोधनेमुख्यतात्पर्येणप्रवृत्तिरव
गम्यते॥तथाहि ऋचोअक्षरेपरमेव्योमन्यस्मिंदेवाअधिविश्वेनिषेदुः॥यस्तन्नवेदकिमृचाकरिष्य
तियइत्तद्विदुस्तइमेसमासतइतिसर्वेवेदायत्पदमामनंतीति॥वेदैश्चसर्वैरहमेववेद्यः॥इति॥ना
वेदविन्मनुतेतंबृहंतमिति॥तंत्वौपनिषदंपुरुषंपृच्छामीत्यादिश्रुतिभ्यःब्रम्हबोधनार्थमेवश्रुतिप्रवृ
त्तेःनिश्चयात्॥तादृशब्रम्हज्ञानार्थसाधनत्वेनउपासनाभागस्यवेदस्यचित्तैकाग्रताद्वाराअदृष्टप्र
तिबंधकरूपपापनिवर्तनार्थंदृष्टप्रतिबंधकरूपविपरीतभावनानाशनार्थंचउपासनायोगध्यानमं

त्रजपादिभावनारूपस्य विनियोगात्॥ एवमेव पापक्षयद्वारा चित्तशुद्धिप्रयोज्यब्रम्हविविदिषाजननार्थं श्रौतादिनित्यनैमित्तिककर्मणां सर्वेषां विनियोगः॥ इति कर्मप्रतिपादकवेदभागस्येति॥ विद्वदनुभूतआत्मज्ञानरूपफलप्राप्तौ अनयोः वेदभागयोः मुख्यसाधनत्वेन इतिकर्तव्यतारूपत्वात् ज्ञानोत्पत्तिरूपफलस्य इदानीमेव क्वचिद्दर्शनात्॥ तत्प्रतिपादकवेदभागस्य प्रमाकरणत्वेन प्रामाण्यमबाधितं तत्साधनयोगोपासनादिरूपभावनाप्रयोज्यैरौहिकविषप्रहरणपिशाचनिवृत्तिशत्रुमरणअणिमादिसिद्धिनिर्विकल्पसमाधिउपास्यदेवतासाक्षात्कारेष्टप्राप्त्यादिफलस्य अनुभूतत्वात्॥ तद्वेदभागस्य प्रमाकरणत्वेन प्रामाण्यं सिध्यति॥ एवमेव श्रौतादिकर्मणां मुख्यफलत्वेनोक्तं तमेतं वेदानुवचनेन ब्राम्हणा विविदिषंति यज्ञेन दानेन तपसेत्यादि श्रुतिप्रतिपाद्यब्रम्हविविदिषायाः उत्पत्ति दर्शनात् कर्मप्रतिपादकवेदभागस्यापि प्रमाकरणत्वेन प्रामाण्यं सिद्धमेव भवति॥ एवं च सति वे

दभागस्यमुख्ययावृत्त्याआत्मज्ञानजननेसाक्षात्परंपरयावातात्पर्येणविनियोगात्॥ वेदस्यब्रम्हज्ञा
नजननएवमुख्यंतात्पर्यंइतिनिश्चीयते॥ ब्रम्हवेदब्रम्हैवभवतिब्रम्हैवसन्ब्रम्हाप्येतितमेवंविद्वान
मृतइहभवति॥ नान्यःपंथाविद्यतेयनायइत्यादिश्रुत्युक्तज्ञानोत्पत्तितस्तयोज्यमुक्तिरूपफलानुभव
प्राप्तिदर्शनेनज्ञानोत्पादकवेदभागस्यप्रमाकरणत्वेनस्वतःप्रामाण्यं॥ देवोभूत्वादेवानप्येतिसर्वेस्मै
देवाबलिमावहंतिइत्याद्युक्तअलौकिकइतरासाधारणाप्राप्यप्राणनिरोधनिर्विकल्पसमाधिविष:
रोगादिप्रहाणइष्टसिध्यादिभावनाफलानुभवप्राप्त्यातत्प्रतिपादकभावनावेदभागस्यप्रमाकरणत्वे
नप्रामाण्यंभवत्येव॥ तथैवआत्मविविदिषाजनकश्रौतादिकर्मानुष्ठानफलस्यआत्मविविदिषातत्प्रयु
क्तसर्वभोगत्यागपूर्वकवैराग्यविशिष्टसन्यासग्रहणस्यदर्शनात्कर्मप्रतिपादकवेदभागस्यापिविवि
दिषोत्पत्तिंप्रमाकरणत्वेनप्रामाण्यंसिद्धंभवति॥ तस्मात्वेदःज्योतिष्टोमेनस्वर्गकामोयजेत॥ पुत्रका

मः पुत्रेष्ट्या यजेत ॥ वृष्टिकामः कारीरेष्ट्या यजेत ॥ इत्यादिश्रुतिवाक्यैः काम्यकर्मानुष्ठाने पुरुषनियोगस्य वेदतात्पर्यविषयत्वं नास्ति ॥ अपि तु प्ररोचनोत्पादनद्वारा वेदोक्तकर्मानुष्ठाने पुरुषं प्रवर्तयन् तत्फलप्राप्तिप्रदर्शनेन वेदोक्तानां सर्वेषामप्यर्थानां अवश्यंभावित्वनिश्चयजननेन वेदमात्रस्य महाप्रामाण्यज्ञानं जनयति ॥ अत एव कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ॥ इति ॥ नानाहिताग्निर्मीयेत इति यावज्जीवमग्निहोत्रं जुहुयात् ॥ यावज्जीवं दर्शपूर्णमासाभ्यां यजेत ॥ इति ॥ वसंते वसंते ज्योतिषा यजेत इत्यादिश्रुतिभ्यः कामनासंयोगाभावेन एतदुपलक्षितसर्वेषां कर्मणां नित्यत्वज्ञापनात् काम्यकर्मविधाने वेदस्य तात्पर्याभावः ॥ कामनासंयोगश्रवणं तु पुरुषप्रवृत्तिजनकत्वेन प्ररोचनार्थं ॥ अतः स्वर्गादिपरोक्षफलादर्शनेपि आत्मविविदिषाजनकनित्यनैमित्तिककर्मणां विधान एव वेदतात्पर्यस्य पर्यवसानात् ॥ विविदिषोत्पत्तिफलदर्शनेन तत्प्रतिपादकवेदवाक्यानां प्रमाकरणत्वेनैव प्रामाण्यं सुस्थितं ॥

तथाच शास्त्रतात्पर्यं॥ तमेतं वेदानुवचनेन ब्राम्हणा विविदिषंति यज्ञेन दानेन तपसानाशकेने
त्यादि श्रुतिभ्यः॥ सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥ इति गीतावचनात्॥ यथोक्तान्यपि
कर्माणि परिहाय द्विजोत्तमः॥ आत्मज्ञाने शमे च स्यात् वेदाभ्यासे च यत्नवान्॥ इति॥ तपो विद्या च वि
प्रस्य निःश्रेयसकरं परं॥ तपसा किल्बिषं हंति विद्ययामृतमश्नुते॥ इत्यादि मनुस्मृतिवचनाभ्यां स
र्वापेक्षा च॥ यज्ञादिश्रुतेरश्ववत्॥ इत्यादि ब्रम्हसूत्रेभ्यश्च प्रकटीकृतं भवति बृहि बृह बृंह वृद्धावितिधातोः
निष्पन्नरूपब्रम्हार्थप्रतिपादकत्वेन वेदस्यापि ब्रम्हशब्दप्रयोगार्हत्ववत्॥ विद् ज्ञाने इति धातोः वेदनार्थरू
पब्रम्हार्थप्रतिपादकत्वेन वेदस्यापि वेदशब्दप्रयोगार्हत्वं लब्धं॥ तथाच महाभारते उद्योगपर्वणि धृ
तराष्ट्रं प्रति सनत्सुजातेन उपदिष्टब्रम्हपरसनत्सुजातीय उपाख्यानवाक्येषु॥ न वेदानां वेदिता कश्चिद
स्ति वेदेन वेद्यं न विदुर्न वेद्यं॥ यो वेद वेद्यं स च वेद वेद्यं यो वेद वेद्यं न स वेद सत्यं॥ इत्यत्र वेदशब्दस्य वेद

नस्वरूपब्रम्हार्थकत्वं तद्भाष्यकारशंकराचार्यैरेवोक्तं॥ तस्मात्सर्वोपिवेदःस्वेनमुख्यतयाप्रतिपाद्य
ब्रम्हतज्ज्ञानतत्प्रयोज्यमोक्षतत्साधनउपासनामंत्रयोगादिविविदिषाजनककर्मादिप्रतिपादकःस
र्वोपिप्रमाकरणत्वेनप्रामाण्यंप्राप्तवान्॥इतिसर्वैरपिअभ्युपगंतव्यं॥ वैदिकगारुडमंत्राभिचारिक
मंत्रसमाधियोगादिसाधनसाध्यविषप्रहरणशत्रुमरणइष्टप्राप्तिनिर्विकल्पसमाध्यादिदृष्टादृष्टफल
चित्तैकाग्रताप्रापकउपासनालक्षणप्रतिपादकवेदभागानांभावनाप्रयोजकानांउपासनादिवाक्यानां
प्रामाण्यमबाधितमेवदृश्यते॥तथैवस्वप्नमायादिवत्॥जाग्रज्जगतोपिसुषुप्तिसमाध्याद्यवस्थायांअ
सत्वेनमिथ्यात्वप्रतिपादकवेदभागस्यअन्नमयप्राणमयादिकोशानांआत्मव्यतिरिक्तानुभवजनक
साधनप्रतिपादकज्ञानभागस्यउपनिषद्रूपवेदस्यापि॥निरतिशयप्रामाण्यसंभवेनवेदस्यप्रमाकर
णत्वेनप्रामाण्यंअबाधितमेवभवति॥नचकेनचित्पुरुषेणकृतेपिकारीरेष्टिपुत्रेष्ट्यादिकर्मणितत्फल

स्यवृष्टिपुत्रादेः अप्राप्तत्वदर्शनात् गारुडादिमंत्रैः क्वचित् विषप्रहरणादिफलादर्शनात् ॥ उपनिष
द्भागात्मकवेदश्रवणमननादिनापिब्रह्मसाक्षात्काररूपफलादर्शनाच्च ॥ भागत्रयात्मकवेदस्यप्रमा
करणत्वेनप्रामाण्यंकथंसंभवतीतिवाच्यं लोकेपिसर्वेषुकार्येषुआरब्धेष्वपिबहुशोफलादर्शनस्यसर्व
संमतत्वात् ॥ फलाजननेसामग्रीवैकल्यात् दृष्टादृष्टप्रतिबंधकसत्वाद्वासर्वैरपिफलोत्पत्त्यभावः ॥
अभ्युपेयोभवेत् ॥ अन्यथाकस्यचित्पुरुषस्यबहुभार्यासंयोगेपिएकस्यामपिपुत्रोत्पत्त्यदर्शनात् ॥
अन्यस्यकस्यचिद्बहुवर्षेषुप्रतिदिनंस्त्रीसंयोगेसत्यपिकदाचिदेवपुत्रोत्पत्तिप्राप्तावपितद्भिन्नेषुत
स्नाक्कालेषुसंयोगप्रयुक्तपुत्रोत्पत्त्यदर्शनात् कृष्यादिषुसर्वसामग्रीसंपन्नेष्वपिकदाचित्संपूर्णफल
स्यवा ॥ फलमात्राभावस्यवादर्शनात् ॥ एवंपाकौषधादिसर्वक्रियास्वपिसाधनानुष्ठानेपिसामग्रीवै
कल्याद्वा ॥ दृष्टादृष्टप्रतिबंधकसत्वाद्वाफलोत्पत्त्यभावः ॥ युक्तएवेतिसर्वलौकिकैः अभ्युपगतविरोध

प्राप्तिप्रसंगस्यदुर्वारत्वात् प्रत्युतएतादृशफलादर्शनेनतत्फलप्राप्तिसुहृद्भ्यकस्यापिपुरुषस्यस्त्रीवि
वाहकृषिपाकौषधादिसर्वक्रियासुप्रवृत्त्यभावप्रसंगश्चभवेत्॥एवमेववैदिककर्मसुभावनारूपउपा
सनादिषुब्रह्मज्ञानप्रयोजकश्रवणादिषुच॥सतिसाधनानुष्ठानेसामग्रीवैकल्यात्तदृष्टादृष्टप्रति
बंधकसत्वात्योग्यकालप्राप्त्यभावाद्वाफलादर्शनस्ययुक्ततरत्वमेवेति॥अकामेनाप्यभ्युपगंतव्यं
अपिचवेदांगभूतज्योतिष्याद्युक्तप्रकारेणचंद्रसूर्यग्रहणनवग्रहातिचारवक्रगतिजातकफलप्रश्न
फलादीनांप्रत्यक्षतयाप्राप्तिदर्शनात्॥उपवेदात्मकआयुर्वेदनामकवेदभागेषु॥उक्तवैद्यशास्त्ररूप
वाक्यानुसारेणकृतौषधसेवनेनरोगनिवृत्तिफलदर्शनाच्च॥एवमेववेदैकदेशभूतउपनिषदात्म
कयोगप्रतिपादकवाक्यानुसारेणाभ्यस्तयोगरूपसाधनफलानांनिर्विकल्पसमाधिलोकासाधार
णसिद्धिप्राप्तिरूपाणांमंत्रानुष्ठानेनविषग्रहरणपिशाचनिवृत्तिरोगनिवृत्त्यादिरूपाणांचबहुशोदृ

ष्टत्वात्॥वेदस्यप्रमाकरणत्वेनप्रामाण्यंसिद्धमेव॥लोकेभाविकार्यफलोद्देशेकप्रवृत्तेःअन्यपुरुष
कृतसाधनानुष्ठानप्रयुक्ततत्फलप्राप्तिदर्शनप्रयोज्यत्वंसर्वैर्दृष्टं॥अन्यथाभाविफलस्यसाधनप्रवृ
त्तिकालेअनुत्पत्त्याविद्यमानत्वाभावादेवतत्प्रत्यक्षासंभवात्॥यत्किंचित्फलमुद्दिश्यतत्साधनप्र
वृत्तिमात्रोच्छेदप्रसंगः॥दुर्वारएवभवति॥सर्वस्यापिफलस्यप्रत्यक्षविषयत्वांगीकारेसर्वमनुष्या
भ्युपगततत्तच्छास्त्रोक्तफलानांधर्माधर्ममोक्षादिरूपाणांवर्तमानदेहावच्छेदेनप्रत्यक्षविषयत्वा
संभवात्॥सर्वमनुष्याणामपितत्तदभिमतशास्त्रोक्तपारलोकसाधनप्रवृत्तेःभाविफलात्मकपुत्र
नारिकेलपूगकदलीसस्यादिफलोद्देशेनतत्साधनप्रवृत्तेश्च॥अत्यंताभावप्रसंगोदुर्वारएवेतिकृ
त्वा॥वेदोक्तकर्मोपासनाज्ञानफलानांस्वर्ग-अणिमाद्यैश्वर्यमोक्षरूपादीनांयथासंभवंअयोग्यदेहका
लसामग्र्याद्यवच्छेदेनलौकिकफलानांविवाहकृष्यादिसाधनकालएव॥अयोग्यदेहकालसाम-

ग्याय वष्ठे देन पुत्रोत्पत्ति कृषि सस्य फलादिप्रत्यक्षायविषयत्ववत्॥ तत्तत्संभवयोग्य कालदेहादिवि
शिष्टदशायां प्रत्यक्षविषयत्वसंभवात्तत्तत्फलतत्तत्साधनप्रतिपादकत्वेन वेदस्य प्रमाकरणत्वेनप्रा
माण्यं निराकर्तुं कोपि समर्थो न भवति॥ अपि च ज्योतिःशास्त्रेपि ग्रहणा[illegible]काचि त्॥
फलानि दृष्ट्वा प्रत्यक्षायोग्यतिथिवारयोग्यकरणजातकफलादीनां मध्ये केषांचित् फलानां अदर्श
नेपि सर्वमनुष्यैरपि तत्फलस्यासंदिग्धतयांगीकारात्॥ एवमेव आयुर्वेदात्मक वैद्यशास्त्रे उपनिष
द्रूपयोगशास्त्रमंत्रशास्त्रधर्मशास्त्राद्युक्त साधन फलादीनां केषांचिद प्रत्यक्षत्वेपि तेषामपि यथासं
भवं फलवत्त्वं अंगीकृत्य तत्तत्साधनप्रवृत्त्या तत्तत्प्रतिपादक वेदस्यापि प्रामाण्यं॥ अंगीकर्तव्यमेव
भवेत॥ ग्रामं प्रति गंतुं मार्गज्ञानाभावे कुशलस्यापि प्रत्यक्षानुमानादिना मार्गज्ञानासंभवेन कुंचित
गोपालं प्रति वा बालं प्रति वा चंडालं प्रति वा मार्गप्रश्नस्य अवश्यकरणायत्त्वसिद्धेः एवं पाके अधिक

ष्यादिकर्मविषयकप्रश्नस्यापिअवश्यंभाविस्वात्॥तस्प्रश्नंप्रतिउत्तररूपवाक्यस्य मनुष्यमात्रकर्तृक
स्यापिअज्ञातज्ञापकत्वेनफलवत्वेनचविधितुल्यत्वात्॥अतएवमनुस्मृतौद्वितीयाध्यायेसप्तत्रिंशाद
धिकद्विशतसंख्याकश्लोके॥श्रद्दधानःशुभांविद्यामितिश्लोकव्याख्याकर्तुर्मेधातिथिऋषेर्वचनं।
मेधातिथिस्तुश्रुतिस्मृत्यपेक्षयापरोधर्मोलौकिकःधर्मशब्दोव्यवस्थायामपियुज्यतेयदि॥चंडा
लोवाप्यत्रप्रदेशेमाचिरंस्थामावास्मिन्नंभसिस्नायाइतिवदतितमपिधर्ममनुतिष्ठतीति॥शाब्दप्र
माणंविना॥लौकिकवैदिकैहिकामुष्मिकफलतत्साधनतत्प्रतिबंधकतन्निवर्तकअनर्थप्राप्तितत्परि
हारादिसर्वपदार्थविषयकज्ञानासंभवात्अज्ञातविषयेशब्दस्यैवप्रथमंप्रामाण्यंप्राप्यते॥तच्छब्दःस
त्यरूपवचनंवा॥प्रतारकवचनंवेतिसंशयेप्राप्तेतदर्थसंभावनार्थेअनुमानंप्रमाणंप्राप्तं॥तद्वाक्यस्य
सत्यत्वेतुतदर्थःप्रायेणानुभवविषयोभवति।अतोपिहेतोःशास्त्रस्यैवमुख्यंप्रामाण्यंमनुष्यमात्रैरंगी

कर्तव्यमेवप्राप्तं॥अन्यथालोकदृष्टपशुपक्षिक्रिमिकीटमनुष्यादिजन्मतत्संयुक्तसुखित्वदुःखित्वपुत्रै
श्वर्यधनरोगअंगवैकल्यादिबहुविधविचित्रफलप्रयोजकस्य अनुमितिकर्मणःशास्त्रप्रतिपा[illegible]
भावेअनुपपत्तिरितिहेतोरपिवेदस्यप्रामाण्यंअंगीकर्तव्यं॥ ननुवेदस्य[illegible]नेनप्रामाण्य
मितिचेत्॥वेदांतैकवेद्यब्रम्हापरोक्षानुभवादर्शनेनतद्भागस्यवेदस्यप्रामाण्यंकथंसं[illegible]तिचेन्मै
वं॥यत्साक्षादपरोक्षाद्ब्रम्हयआत्मासर्वांतरः ब्रम्हैवसन्ब्रम्हाप्येतिब्रम्हवेदब्रम्हैवभवति॥ स
[illegible]षनेतिनेतीत्यादिश्रुतिभ्यः॥ वेदशास्त्रार्थतत्वज्ञोयत्रतत्राश्रमेवसन्॥इहैवलोकेतिष्ठन्सन्ब्र
म्हभूयायकल्पते॥ इहजीवितेक्षेमंगच्छतिपंडितः इत्यादिमन्वापस्तंबस्मृतिवचनैःअनुभवावसायि
त्वात्॥वेदवाक्यानामित्यर्थः शंकरभाष्योक्तेश्च॥तथाहि॥उत्तरमीमांसाख्यवेदांतशास्त्रेश्रीशंकरभग
वत्पादकृतब्रम्हसूत्रभाष्ये॥ अथातोब्रम्हजिज्ञासेतिप्रथमाध्यायप्रथमाधिकरणसूत्रभाष्यावसरे।

प्र·श्रा·
१६२

तत्पुनर्ब्रम्ह प्रसिद्धमप्रसिद्धं वा स्यात्॥ यदि प्रसिद्धं॥ न जिज्ञासितव्यं॥ अथाप्रसिद्धं॥ नैव शक्यं जिज्ञासि
तुमिति॥ उच्यते अस्ति तावन्नित्य॥ शुद्ध॥ बुद्ध मुक्त स्वभावं॥ सर्वज्ञं॥ सर्वशक्ति समन्वितं॥ ब्रम्ह॥ ब्रम्हश
ब्दस्य हि॥ व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोर्थाः प्रतीयंते॥ बृहतेर्धातोः॥ अर्थानुगमात्॥ सर्वस्यात्मत्वाच्च
ब्रम्हास्तित्व प्रसिद्धिः॥ सर्वो हि॥ आत्मास्तित्वं॥ प्रत्येति॥ न नाहमस्मीति॥ यदि हि॥ नात्मास्तित्व प्रसिद्धिः
स्यात्॥ सर्वो लोको नाहमस्मीति॥ प्रतीयात्॥ आत्मा च॥ ब्रम्ह यदि लोके ब्रम्ह॥ आत्मत्वेन प्रसिद्धमस्ति॥ ततो
ज्ञातमेवेत्यजिज्ञास्यत्वं॥ पुनरापन्नं॥ न॥ तद्विशेषं प्रति॥ विप्रतिपत्तेः॥ देहमात्रं चैतन्यविशिष्टमात्मेति॥
प्राकृता जनाः॥ लोकायतिकाश्च प्रतिपन्नाः॥ इंद्रियाण्येव चेतनान्यात्मा॥ इत्यपरे॥ मन इत्यन्ये॥
विज्ञानमात्रं क्षणिकं॥ इत्येके॥ शून्यमित्यपरे॥ अस्ति देहादि व्यतिरिक्तः॥ संसारी॥ कर्ता भोक्ता॥ इ
त्यपरे॥ भोक्तैव केवलं॥ न कर्ता॥ इत्येके॥ अस्ति तद्व्यतिरिक्तः॥ ईश्वरः॥ सर्वज्ञः॥ सर्वशक्तिः॥ इति केचित्

नि

म॰श्रा॰

४८०

नानिवाः पारं नीत्वाप्युभयमेव वेति ॥ तत्रैव तृतीयाध्याये ॥ ऋतुकाल इति ॥ ७९ श्लोकव्याख्याने ॥ याज्ञवल्क्यो
प्याह ॥ यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्निति ॥ तत्रैव तृतीयाध्याये ॥ अग्नेः सोममिति ॥ ८५ संख्याक
श्लोकव्याख्याने ॥ कचन हूयं स्वाहाकार प्रधान होम इति कात्यायनस्मरणात् इति ॥ तत्रैव तृतीयाध्याये ॥ अ
संगतानिति ॥ ॥१४० संख्याक श्लोकव्याख्याने ॥ श्राद्धस्यापि स्वर्गफलत्वमाह ॥ याज्ञवल्क्य ॥ श्लोक
युः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च । प्रयच्छति तथा राज्यं प्रीता नृणां पितामहा इति ॥ १४० तत्रैव तृतीया
ध्याये । दातृनिति ॥ १४३ ॥ संख्याक श्लोकव्याख्याने ॥ आयुः प्रजां धनं विद्यामित्यादैहिकामुष्मि कादि फलत्वे
नापि श्राद्धस्य याज्ञवल्क्यादिभिरुक्तत्वात् ॥ इति ॥ मनुस्मृतौ ॥ चतुर्थाध्याये । कुसूलधान्य इति ॥ ७ संख्या
क श्लोकव्याख्याने ॥ प्राक्सौमिकीः क्रियाः कुर्याद्यस्यान्नं वार्षिकं भवेदिति ॥ याज्ञवल्क्ये ॥ स्यास्य वार्षिकसं
चयाभ्यनुज्ञानादिति ॥ तत्रैव चतुर्थाध्याये ॥ परकीय । इति । २०१ संख्या श्लोकव्याख्याने ॥ तदाह याज्ञवल्क्यः
पंच पिंडाननुद्धृत्य न स्नायात्परवारिषु ॥ उद्धृत्य चतुरः पिंडान् परकीये स्नानमाचरेदिति ॥ तत्रैव चतुर्थाध्याये ॥

नि॰

राम॰
३८

पैव मश्लोकव्याख्याने ॥ याज्ञवल्क्येनतु । परमधर्मत्वेन यदाह ॥ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां ॥
अयंतु परमोधर्मो यद्योगेनात्मदर्शनं । इति ॥ तत्रैव द्वितीयाध्याये अंगुष्ठ इति ॥ ९९ श्लोकव्याख्याने सैवाह याज्ञ
वल्क्यः ॥ कनिष्ठदेशिन्यंगुष्ठमूलान्यग्रं करस्यच । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् । ९१ इति ॥ त
त्रैव द्वितीयाध्याये पूर्वामिति ॥ १०१ श्लोकव्याख्याने ॥ तदाह योगी याज्ञवल्क्यः ॥ ह्रासवृद्धी तु सततं दिवसा
नांयथाक्रमं ॥ संध्यामुहूर्त्तमात्रंतु ह्रासवृद्धौ च सा स्मृता इति ॥ तत्रैव द्वितीयाध्याये ॥ पूर्वामिति ॥ १०२ संख्या
श्लोकव्याख्याने ॥ अतएव याज्ञवल्क्यः ॥ दिवावा यदिवा रात्रौ यदज्ञानकृतं भवेत् । त्रिकालसंध्याकरणा
त्तत्सर्वं विप्रणश्यतीति ॥ तत्रैव द्वितीयाध्याये । तत्स्वाध्यायमिति ॥ १०६ संख्याकश्लोकव्याख्याने ॥ अतएव
व याज्ञवल्क्यः ॥ मधुनापयसा चैव सदेवांस्तर्पयेद्द्विजः । पितॄन्मधुघृताभ्यां च रुचा वा नैव हि इति ॥
तत्रैव तृतीयाध्याये ॥ षड्विंश इति ॥ प्रथमश्लोकव्याख्याने ॥ तदाह योगी याज्ञवल्क्यः ॥ प्रतिवेदं ब्रह्मचर्यं द्वा
दशाब्दानि पंच वेति ॥ तत्रैव तृतीयाध्याये ॥ वेदानिति ॥ द्वितीयश्लोकव्याख्याने ॥ याज्ञवल्क्योप्याह वेदं व्र

वाक्यानां। वाजसनेयिशतपथब्राह्मणानां च मुख्यप्रमाणत्वेन एतद्भाष्ये बहुशो उदाहृतत्वात्। मूलसूत्र
कारेण आपस्तंबेनापि पूर्वोक्तरीत्या ब्रह्मयज्ञाध्ययन धारणाध्ययननिमित्त अध्ययनानध्ययन विद्यागत
वस्या प्रदर्शनाय शतपथब्राह्मणस्य मुख्यप्रमाणतया उदाहृतत्वेन ॥ कण्वः पुण्य इति को[illegible]यः तस्या कण्व
पुष्करसादि संत्यपराधाद् इति अनडुह्मिति वाजसनेयिकं मुखादग्निरजायत इत्यादि वाक्यैः। कै[illegible]स्या
पि स्वसमानत्वेन स्वीकृत्य तद्वाक्यस्य वाजसनेयिब्राह्मणस्य च महाप्रमाणत्वेन उदाहृतत्वोच्च। आपस्तं
बस्य तत्सूत्रभाष्यकर्तुः उज्वलाकारस्य च याज्ञवल्क्य कण्व कात्यायन शतपथब्राह्मणादिषु असूया
अयोग्यताज्ञानादिकं स्वल्पमपि नास्तीति तत्तात्पर्यं स्फुटमेव प्रतीयते ॥ एतावता याज्ञवल्क्य कण्वादी
नां अयोग्यताशंकापि नास्तीति आपस्तंबाख्य तत्सूत्रकारेण तद्भाष्यकारेणापि च [illegible]ीकृतं भवति ॥
एवं मनुस्मृतिव्याख्यानरूप कण्वपुत्रमेधातिथि ऋषि गोविंदराजजयादित्य विश्वरूप विभाज्यी [illegible]
भास्करपुत्र कल्लुकभट्टादिकृत मन्वर्थमुक्तावल्याख्य भाष्येपि ॥ मनुस्मृतौ प्रथमा[illegible]दियं वेदोनन्दकृति

तस्मिन्नेवखंडे तस्मिन्नेवपटले तत्प्रकरणे ॥ याज्ञवल्क्यः ॥ कमाद्भ्यागतं द्रव्यं हृतमभ्य [illegible] देयं
न नद्यचाहूिता या लब्ध मेव चेति ॥ तस्मिन्नेवखंडे तत्प्रकरणे ॥ याज्ञवल्क्यः ॥ संसृष्टिनस्त [illegible] दरस्तु
सोदरः । दद्यादपहरेच्चांशं जातस्य च मृतस्य चेति ॥ द्वितीयप्रश्ने सप्तमपटले सप्तदश संख्या [illegible] डे ॥ द्वितीय
प्रश्ने नवमपटले एकविंशति संख्याकखंडे गृहस्थस्यापि मोक्षो भवती त्यत्र यथाह याज्ञवल्क्यः ॥ न्यायागत
तधनस्तत्वज्ञाननिष्ठोतिथिप्रियः । श्राद्धकृत्सत्यवादी च गृहस्थोपिहि मुच्यत इति ॥ द्वितीयप्र [illegible] दश [illegible] पटले
पंचविंशतिसंख्याकखंडे द्यूतपणग्रहण प्रकरणे ॥ याज्ञवल्क्यः ॥ गृह्णीशतिकवृद्धस्तु भीतकः [illegible] कं शके । ग
ह्णीयात्धूर्तकितवादितराद्दशकंशतं ॥ इति ॥ द्वितीयप्रश्ने तस्मिन्नेव पटले सप्तविंश [illegible] संख्या [illegible] खंडे [illegible] अनु
लोमप्रतिलोम स्त्रीगमनेवधादि यथा योग्य दंडादि प्रकरणे याज्ञवल्क्येनतु ॥ मा तलो म्य [illegible] गमन म [illegible] वेव
धउक्तः ॥ सजातावुत्तमो दंडः आनुलोम्येन मध्यमः ॥ प्रातिलोम्येव धः पुंसां स्त्रीणां नासादि कर्त [illegible] मिति
॥ एवं उज्वलाकारेण हरदत्त मिश्रेण विचारस्य काजात ॥ प्राक्कालीनानपि या ज्ञवल्क्य कण्व कात्या यना दि

ले। दायग्रहणनिर्णयप्रकरणे॥ कात्यायनस्तु॥ भ्रात्रापितृव्यमातृभ्यां कुटुंबार्थमृणं कृतम्। विभागकाले दे नि-
यं तद्रणिभिस्सममेवतत्। इति॥ तत्प्रकरणे॥ अत्र याज्ञवल्क्यः॥ पितुरूर्ध्वं विभजतां माताप्यंशं समं हरे दि-
ति॥ अस्मिन्नेव पटले। अस्मिन्नेव खंडे। दायविभागप्रकरणे॥ याज्ञवल्क्यः॥ [illegible] का म-
तोंशहरो भवेत्। मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकमिति॥ अस्मिन्नेव पटले॥ अस्मिन्नेव खंडे॥ [illegible]
ल्क्यः॥ क्षेत्रजादिगौणपुत्रप्रकरणे॥ अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः। उभयोरप्यसौ [illegible] क्थी पिंडदा-
ता च धर्मत इति॥ द्वितीयप्रश्ने तस्मिन्नेव पटले। तस्मिन्नेव खंडे॥ कात्यायनः॥ क्लीबं विहाय पतितं या पुनर्लभ-
ते पतिं। तस्यां पौनर्भवो जातो व्यक्तमुत्पादकस्य स इति॥ तस्मिन्नेव पटले तस्मिन् खंडे॥ गौणपुत्राः पंचाय-
था योग्यं भ्रंशहरास्ते पिंडदात्तल्वेच। सजातीयेष्वयं प्रोक्तस्तनयेषु यथा विधिरिति याज्ञवल्क्यवचनात्॥ याज्ञव-
ल्क्यः॥ पिंडदोंशहरश्चैषां पूर्वाभावे परः पर इति॥ तस्मिन्नेव खंडे तस्मिन्नेव पटले॥ अविभाज्य [illegible] राम-
पण प्रकरणे॥ कात्यायनः॥ नाविद्यानां तु वैद्येन देयं विद्याधनं क्वचित्। समविद्याधनानां तु देयं वैद्येन [illegible] मिति

कामात् मघामूलंच वर्जयेत् ॥ आचार्यस्तु ॥ चतुर्थीप्रभृतिगमनकालमाह ॥ चतुर्थीप्रभृत्याषोडशीमुत्तर
मुत्तरां। युग्मां प्रजानिश्रेयसमृतुगमनइत्युपदिशंति। इति। द्वितीयप्रश्ने तृतीयपटले पंचम संख्याकखंडे
आहिताग्नेः रोमखंडनेनियमः॥ आहिताग्नेस्तु अप्यत्यतोलोमानि वापयत इति श्राजसनेयके। इति ॥ द्वि
तीयप्रश्ने चतुर्थपटले। एकादशासंख्याकखंडे ॥ आहिताग्नेः द्वितीयविवाहप्रकरणे॥ याज्ञवल्क्योपि ॥ दाहे
यित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः। आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन्। इति॥ तस्मिन्नेवपटले त
स्मिन्नेवखंडे ॥ तस्मिन्नेवप्रकरणे॥ याज्ञवल्क्यः॥ अनन्यपूर्विकांकांतामसपिंडांयवीयसीं। अविप्लुतब्र
ह्मचर्योलक्षण्यांस्त्रियमुद्वहेदिति॥ द्वितीयप्रश्ने षष्ठमपटले त्रयोदशसंख्याकखंडे। क्षेत्रजादिगौणपुत्र
प्रकरणे याज्ञवल्क्यः॥ अपुत्रेणापरक्षेत्रे नियोगोत्पादितः सुतः। उभयोरप्यसौ रि[illegible] ॥ इति
॥ द्वितीयप्रश्ने त्रयोदशसंख्याकखंडे ॥ स्वापत्यविक्रयनिषेधप्रकरणे॥ याज्ञवल्क्योप्याह॥ ॥नास्ति क्रयप्रत्य
लोपश्चस्वसुतानांचैवविक्रयइति॥ अस्मिन्नेवपटलेचतुर्दशसंख्याकखंडे। भ्रात्रादिऋणरुद्धविभागका

पदिवाभूयांसमल्पंवापरपरिग्रहंपरस्वमभिमन्यते। ममेदमस्त्विति बुद्धौकुरुते बुद्धौकृत्वा आदत्तइत्यर्थः सर्वथास्तेन एव भवतीति। कौत्सहारीतादयो मन्यंतइति॥ एकादशपटले त्रिंशति संख्याकखंडे॥ ॥ समावर्तनप्रकरणे॥ अत्र याज्ञवल्क्यः॥ वेदव्रतानिवापारंनीत्वाह्युभयमेववा॥ अग्निपूतन्महन्तर्ये.... स ण्यांस्त्रियमुद्वहेदिति॥ तस्मिन्नेवपटले एकत्रिंशति संख्याकखंडे॥ मूत्रपुरीषोत्सर्गप्रकरणे॥ याज्ञवल्क्योपि॥ दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः। कुर्यान्मूत्रपुरीषेतु रात्रौ चेद्दक्षिणामुखइति॥ तस्मिन्नेवपटले। तस्मिन्नेवखंडे सर्वक्रियास्वपि नमोरुद्रायेति अनुमंत्रणपूर्वकं प्रवृत्तिंकुर्यादित्यत्र॥ अत्र वाजसनेयिनां गृह्ये वनंप्रवेक्ष्यन्ननुमंत्रयते। नमोरुद्राय वनसदे स्वस्ति मासंपादयेति। पंथानमारोक्ष्यन्ननुमंत्रयते। नमोरुद्राय पथिषदे स्वस्ति मासंपादयेस्यपः प्रवेक्ष्यन्ननुमंत्रयते नमोरुद्राया प्सुषदे स्वस्ति मासंपादयेति तस्माद्यत्किंचित्कर्म कुर्वन्स्यात् तत्सर्वं नमोरुद्रायेत्येव कुर्यात्। सर्वोह्येषरुद्रइति श्रुतेरिति च भारद्वाजगृह्ये यत्र विषये क्रियातत्र विशेषः। द्वितीयप्रश्ने प्रथमपटले प्रथमखंडे स्वभार्यागमनप्रकरणे॥ याज्ञवल्क्यस्तु॥ एवंगच्छन्स्त्रियं

त्मज्ञानप्रकरणे॥ याज्ञवल्क्योप्याह॥ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां। अयंतुपरमोधर्मोय
द्योगेनात्मदर्शनमिति॥ तस्मिन्नेवपटले तस्मिन्नेवखंडे तत्प्रकरणे॥ बृहदारण्यके॥ श्रोतव्योमंतव्योनि
दिध्यासितव्य इतिश्रुतेः॥ तत्रश्रुतमुपनिषदादिशब्दजन्यं ज्ञानंमननमुपपत्तिभिर्निरूपणमेवंश्रुतेमतेचा
त्मनिसाक्षात्कारहेतु॥ रविक्षिप्तेनचेतसानिरंतरभावनानिदिध्यासनंतत्सिद्धपेक्षितंज्ञानंतावदाह॥ इति
तस्मिन्नेवपटले तस्मिन्नेवखंडे॥ तत्प्रकरणे॥ तेजस्कायंतेजसः शरीरंतेजोराशिंस्वयंप्रकाशआत्मज्यो
तिः सम्राडितिहोवाचेति बृहदारण्यकमिति॥ तस्मिन्नेवपटलेत्रयोविंशतिसंख्याकखंडेतत्प्रकरणे॥ आत्म
ध्यानद्वारेणपंडितः लब्धात्मसाक्षात्कारं क्षेममभयंमोक्षं॥ अभयंवैजनकप्राप्तोसीति बृहदारण्यकं क्षेमंग
च्छति आत्मध्यानद्वारेणेह लब्धज्ञानः आत्मसाक्षात्कारं क्षेमं अभयंमोक्षं अभयंवैजनकप्राप्तोसीति बृह
दारण्यकेसमासाश्लोकः॥ इति॥ दशमपटले। अष्टाविंशतिसंख्याकखंडे॥ परस्वापहरणनिषेधप्रकरणे॥ य
थाकथंचपरपरिग्रहमभिमन्यतेस्तेनोहभवतीतिकौत्सहारीतौतथाकण्वपुष्करसादिपद्यातथाचआपं(स्तं)बःना

प्र·शा· ५७६

गोतत्क्षितजोयं प्रकृतिस्थं महीगतमिति याज्ञवल्क्यः॥ तस्मिन्न्नेव खंडे। श्रौताग्निधमनं मुखेनैव कार्यमि-
त्यत्र ॥ अपर आह॥ वाजसनेयके श्रौतप्रकरणे मुखादग्निरजायत तस्मान्मुखेनोपसमिंध्यादिति दर्शनात्। श्रौ
तेतु मुखेनैवोपधमनं अन्यत्र स्मार्ते प्रतिषेद्धव्य इति तस्मिन्नेव खंडे शौचप्रकरणे॥ तथाच याज्ञवल्क्यः॥
गंधलेपक्षयकरं शौचं कुर्याद्‌तंद्रित इति॥ तस्मिन्नेव पटले॥ सप्तदश संख्याक खंडे॥ मांसभक्षण प्रकरणे॥
गोप्रतिषेधस्य प्रतिप्रसवः मेध्यमानडुहमिति वाजसनेयकं। आनडुहं मांसं न केवलं भक्ष्यं। किंतर्हि मेध्यमपी
ति वाजसनेयिनः समामनंति॥ षष्टमपटले एकोनविंशति संख्याक खंडे॥ भोजनीयान्न प्रकरणे॥ य ईप्से दि
ति कण्वः॥ य एव प्रार्थयते॥ स अर्थ्यान्न इति कण्व ऋषिर्मन्यते प्रतिषिद्धवर्जं॥ इति॥ तस्मिन्नेव पटले तस्मि
न्नेव खंडे भक्ष्याभक्ष्य प्रकरणे॥ क्षुद्रा भिक्षा भोक्तव्येकं कुणिकोकण्व कुत्सौ॥ तथा पुष्करसादिः॥ इति॥ त
स्मिन्नेव पटले॥ तस्मिन्नेव खंडे॥ तत्प्रकरणे॥ इदानीं स्वमतमाह। पुण्यस्येप्सितो भोक्तव्यं कण्वकुत्सयोः॥ श्राम
पक्षौ समुच्चितावाचार्यस्य पक्ष॥ इति॥ अष्टमपटले॥ द्वाविंशति संख्याक खंडे॥ सर्वप्रायश्चित्त रूप आ

नि·

३४

ध्यायं चोपदिशंतीति तदुपदेशमनर्थकं स्यात्। यदि वाजसनेयिब्राह्मणं यथाश्रुतमवेक्षेताध्येता॥ ॥ नन्व
नर्थकमेतदस्तु। श्रुतिविरोधात् तत्राह आर्यसमयो ह्यगृह्यमानकारणः॥ योयमध्यायानध्यायविषय
आर्यसमयः न तत्र किंचित्कारणं गृह्यते यथा वैसर्जनहोमीयं वासोध्वर्यवे ददातीत्यत्र गृह्यमाणकारणं
चार्यसमयश्रुत्यनुमानद्वारेण प्रमाणं अतो वाक्यपरिसमाप्तिरेव युक्ता एवं हि वाजसनेयब्राह्मणस्यापि
नात्यंतबाधः॥ अनध्यायोपदेशस्यापि प्रभूताध्ययनविषयतयार्थवत्त्वमिति सूत्रे अगृह्यमाणकारण
मिति णत्वाभावश्छांदसः। का पुनः सा स्मृतिः या ब्रह्मयज्ञेप्यनध्यायमुप दिशति मानवे तावद्विपर्ययः
श्रूयते नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतमिति सामान्येन॥ ॥ अनध्यायोपदेशस्तु ब्रह्मयज्ञा
दन्यत्र चरितार्थकः॥ तस्मात्तादृशी स्मृतिर्मृग्या एवं तर्हि अग्निहोत्रादिष्वपि मंत्राणामनध्यायः॥ आस्समितिने
त्याह विद्यां प्रत्यनध्यायः श्रूयत इति॥ पंचमपटले पंचदशसंख्याकखंडे॥ भूमिगतास्वप्स्वाचमनं याज्ञवल्
क्येन दर्शितं॥ अपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत्। अव्याप्ताश्चेदमेध्येन गंधवर्णरसान्विताः। शुचि

त्तिपर्यवसानं। तदेवशाखांतरं पठति। अथयदिवातोवावायतिस्तनयहाविद्योततेतदा अवस्फूर्जेद्वै
कांच चैमेकंवायजुरेकंवासामाभिर्व्याहरेत्। भूर्भुवस्स्वस्सत्यंतपश्रद्धायांजुहोमीतिवैतत्तेनोहैवास्यै
तदहस्स्वाध्यायउपात्तोभवति। अंतेइतिशब्दाअध्याहर्तव्यः। वात्यादिषुसत्सुएकांऋचमधीयीतशास्त्र
प्रदेशेयजुर्वेदाध्ययनेएकंयजुः सामवेदाध्ययनेएकंसाम। सर्वेषुवावेदेषुभूर्भुवस्स्वरित्यादिकंयजुरभि
व्याहरेत्॥ नपुनर्यथापूर्वंप्रश्नमात्रंतेनैवतावतैवास्मादृतोः तदहअस्मिंतस्मिन्नहनिस्वाध्यायउपा-
त्तोभवति अधीतोभवतीतियावत्। स्वीकृतोभवतीत्यर्थः केचिद्भूर्भुवस्स्वरित्यादिकंब्राह्मणभागाध्ययन
विषयं। मन्यंतेनसार्वत्रिकंतस्मात्पुनर्वाजसनेयिब्राह्मणस्योदाहृतेशाखांतरेवाक्यसमाप्तिराश्रियते
नपुनर्यथाश्रुतमात्रं। गृह्यते। तत्राह। एवंसत्यार्यसमयेनाविप्रतिषिद्धं सर्ववाक्यसमाप्तावाश्रयमाणायां।
आर्यसमयेन आर्याः मन्वादयः तेषां समयो व्यवस्था अविप्रतिषिद्धं भवति॥ इतरथाविप्रतिषिद्धंस्या-
त्कथं। अध्यायानध्यायंह्युपदिशंति तदनर्थकंस्याद्वाजसनेयिब्राह्मणंचेदवेक्षेत॥ ॥ आर्याह्यध्यायमन

ह्मणंब्रह्म यज्ञो ह वा एष यत्स्वाध्यायस्तस्यैते वषट्काराः। एतेस्तनयति यद्विद्योतते यदवस्फूर्जति यद्वातोवा
यतितस्मात्स्तनयतिविद्योतमानेवस्फूर्जतिवातेवावायत्यधीतैवषट्काराणांचंबट्कारयेति॥ अथापि॥
अपिच स्वाध्यायोनामाम्नायान् एषब्रह्मयज्ञः॥ ब्रह्मवेदः तत्साधनो यागः यथादर्शपूर्णमासादयः पुरोडाशा
दिसाधनो। ह वै शब्दौ प्रसिद्धिं द्योतयतः तस्ययज्ञस्य एते वक्ष्यमाणास्तनयित्वादयो वषट्काराः बहुव
चननिर्देशात्। वषट्कारा स्वाहाकारास्सर्वे प्रदानादयः गृह्यंते। स्तननं मेघशब्दः। विद्योतनं विद्युद्भापारः
अवस्फूर्जनमशनीपातः। तत्र्यावस्फूर्जे लिंगमितिदर्शनात्। वायतीति ओं वै शोषणे इत्यस्य रूपं यथार्द्र
प्रवेशः शुष्को भवति॥ ॥तथावायतीर्थः। तस्मादेते वषट्कारास्तस्मात्। स्तननादिष्वनध्यायनिमित्तेषु।
सत्स्वप्यधीयीतैवा॥ नपुनरनध्यायइतिनाधीयीत किमर्थं वषट्काराणामेतेषां अच्चंवट्काराय अव्यर्थ
त्वाया अन्यथा। एते वषट्कारा व्यर्थास्युः ततश्च यथा होत्रा वषट्कृते अध्वर्युर्नजुहुयात्। तादृगेवतध्या
त्। तस्यशाखांतरे वाक्यसमाप्तिः। तस्यवाजसनेयिब्राह्मणस्यशाखांतरे वाक्यसमाप्तिर्भवति॥ नता

नियुक्तमंत्राणां अनध्ययनदोषोनसंभवतीत्युक्तं॥ ॥एतावतावाक्यसंदर्भेणसूत्रतात्पर्यार्थजातमेतदुक्तं
भवतिवेदाध्ययनस्यसामान्यतः। अध्ययननिषेधः अनध्यायकालेप्राप्तः तदुपरिब्रह्मयज्ञस्य। अनध्यय
नमस्तिवानवा इति संशये। प्राप्तेब्रह्मयज्ञे अनध्ययनंनास्तीति वाजसनेयिब्राह्मणेनप्रतिपादितं तदुपरि
ब्रह्मयज्ञाध्ययनंप्रतिदिनकर्तव्यब्रह्मयज्ञाध्ययनवदेवकर्त्तव्यंवा अन्यथावेतिसंशये प्राप्ते अनध्ययन
कालेकर्तव्यब्रह्मयज्ञाध्ययनस्य अध्ययनकालब्रह्मयज्ञाध्ययनवत्। प्रश्नाध्ययनादिकंनकर्तव्यं। किंतु अ
ल्पाध्ययनंकर्तव्यंइति। एकांवाऋचंएकंयजुरेकंसामेत्युक्तत्वात्। तावन्मात्रेणैवब्रह्माध्ययनफलंप्राप्नोती
त्युक्तं तदुपरि अनध्ययनकालेप्रतिपदादौइष्ट्यादिश्रौतस्मार्तकर्मणांवेदाध्ययनाभावशंकायां। कर्मवि
नियुक्तमंत्रपठनस्य अनध्ययनदोषोनास्तीत्युक्तं॥ ॥अयमर्थःएतद्धर्मसूत्रभाष्यरूपोज्ज्वलायां द्रष्टव्यः
सोपिवक्ष्यतएव॥ अस्य आपस्तंबधर्मसूत्रस्यउज्वलाख्यंभाष्यं॥ तृतीयपटलेदशमखंडे॥ तत्रयाज्ञवल्क्यः
पंचदश्यांचतुर्दश्यां अष्टम्यांराहुसूतकइति॥ चतुर्थपटलेद्वादशसंख्याकखंडे॥ अथापिवाजसनेयिब्रा

जसनेयिब्राह्मणंब्रह्मयज्ञोहवाएषयत्स्वाध्यायस्तस्यैतेवषट्कारायत्स्तनयतियद्विद्योततेयदवस्फूर्ज
तियद्वातोवायतितस्मात्स्तनयतिविद्योतमानेवस्फूर्जतिवातोवावापत्यधीय्यीतैववषट्काराणामच्छंब
ट्कारायेतितस्यशारवांतरेवाक्यसमाप्तिरथवातोवावायात्स्तनयेद्वाविद्योततेतदावस्फूर्जेद्वैकांवाचं
मेकंवायजुरेकंवासामाभिव्याहरेद्भूर्भुवस्वस्सत्यं।तपःश्रद्धायांजुहोमीतिवैतत्तेनोहैवास्यैतदहस्वाध्या
यउ पात्तोभवत्येवंसत्यार्यसमयेनाविप्रतिषिद्धमध्यायानध्यायंह्युपदिशंतितदनर्थकंस्याद्वाजसनेयि
ब्राह्मणंचेद्वेक्षेतार्यसमयोह्यमानकारणोविद्यांप्रत्यनध्यायःश्रूयतेइति॥ सप्तदशसंख्याकखंडे॥ क्वभो
ज्यमितिहि।ब्राह्मणं॥एकखुरोष्ट्रनययामसूकरशरभगवांधेन्वनडुहोभक्ष्यंमध्यमान्नुडुहमितिवाजसनेय
कं।कुक्कुटोविकिराणांप्लवःप्रतुदांक्रव्यादोहंसभासचक्रवाकसुपर्णाश्चेति॥ प्रथमप्रश्ने॥एकोनविंशति
संख्याकखंडे॥ ॥कण्वःपुण्यइतिकौत्सोयःकश्चिद्दद्यादिवार्ष्यायणिर्यदिहरजस्थावरंपुरुषेभोक्तव्यंअशु
चेच्चलंदानेननिर्दोषोभवति।।शुद्धाभिक्षाभोक्तव्येककुणिकाकण्वकुत्सौतथापुष्करसादिसर्वतोपेतंवार्ष्या

।। दर्शपूर्णमासप्रकरणे ।। प्रस्तरमेव मंत्रेण दातीत्तूष्णीमितरदितिवाजसनेयकं ।। अप्यल्पशो लोमानि कापय
तइतिवाजसनेयकं ।।आधानप्रकरणे। अजस्यप आदधीतेतिवाजसनेयकं ।। पशुप्रकरणे ।। इष्टिविधो वा ।।
अन्यः पसुबंधः सोमविधोन्यः । सयत्रैतदपः प्रणयति पूर्णपात्रं निनयति विष्णुक्रमं नक्रामतिसइष्टिविधिः
अतोन्यत्सोमविधिइतिवाजसनेयकं ।। यस्यचैते भवंति ।। तेनततोनानेष्टानं पशुना संवत्सरोतियात् । अयथ्यो
हवअस्त्येष आत्मनिष्क्रयणमितिवाजसनेयकं भवति भवती ।। अग्निष्टोमप्रकरणे। तभूतदीक्षाप्रश्ने प्राग्वंशस्य
मध्यमस्थूणाराजमालभ्यजपतीतिवाजसनेयकं कुंडे हिरण्यं निधायनस्मिन्स्नातीतिवाजसनेयकं ।। इत्या
दिसूत्रवाक्यैः तत्रतत्र सुव्यक्ततयातत्तत्कर्मानुष्ठानस्थले विकल्पतया स्वसंमतत्वेन आपस्तंबेनैव वाजसनेयि
मतस्य प्रमाणत्वेन गृहीतत्वात् । वाजसनेयिमतानुसारेणैव बहुषु श्रौतकर्मसु अशमीगर्भारण्यादिग्रहण वि
षयेषु सर्वदेशेषु इदानीमपि अनुष्ठानदर्शनाच्च । याज्ञवल्क्यादीनां अयोग्यतालेशोपि नास्तीति धृष्टो भवति ।। ।। राम
एवमेव आपस्तंबधर्मसूत्रे ।। प्रथमप्रश्ने ।। एकादशासंख्याकखंडे ।।मूलसूत्रं ।। ब्रह्मयज्ञप्रकरणे ।।अथापि वा

शास्त्रेप्रोक्तं गणेशस्यकृत्वा तं शुभमाचरेदिति ॥ दत्तकन्याप्रकरणे ॥ याज्ञवल्क्यः ॥ दत्तामपिमपिहरेत्पूर्वश्रे
यांश्चेद्वर आव्रजेदिति ॥ दत्तांवाचादत्तामित्यर्थः ॥ निर्निमित्तस्त्रीत्यागेदोषमाह ॥ याज्ञवल्क्यः ॥ आज्ञासं पा
दिनीं दक्षांवीरसूं प्रियवादिनीं । त्यजन्दाप्यद्वादशेप्यब्देतृतीयांशंत्यजेत् स्त्रियः ॥ इति ॥ चंद्रचूडीयकारेणा
पि आपस्तंबतुल्यत्वेनयाज्ञवल्क्यकात्यायनादीनांवचनजातस्य धर्मनिर्णय विषयेप्रमाणत्वेन उदाहृतत्वात्
।तेषांअयोग्यताभावः स्पष्टएव ॥ तथैवआपस्तंबश्रौतसूत्रे ॥ आपस्तंबश्रौतसूत्रेआधानप्रकरणे विशेषमा
ह ॥ शमीगर्भस्याश्वत्थस्य अरणीआहरति अप्यशमीगर्भस्येतिवाजसनेयकम् ॥ आहसूत्रकारः ॥ आधा
नप्रकरणे ॥ सप्तपार्थिवान्संभारानाहरति ॥ एवंवानस्यत्यान् पंचपंचवाभूयसो वापार्थिवान् । नसंभारान् सं
भरेदितिवाजसनेयिकं ॥ दीक्षाप्रकरणे ॥ अहतेनवाससादक्षिणमंसं यजमानः प्रोर्णितेऊष्णीषेणप्रदक्षि
णंशिरोवेष्टयतइति वाजसनेयकं ॥ दीक्षाप्रकरणे ॥ अध्वर्युरत्रपत्नीशिरसिकुंबकुरीरमध्यूहते ॥ कृष्णा
जीर्णानामिति वाजसनेयिकं ॥ इष्टिप्रकरणे ॥ श्वपुरितेवाखर्विकांतृतीयायांवाजसनेयिनः समामनंति ॥

रणे ॥ याज्ञवल्क्योपि ॥ केशांतश्चैव षोडश इति केशांतो गोदाना ख्यं कर्मेत्यर्थः ॥ उपाकर्मप्रकरणे ॥ शिष्याभा
वे स्वयमेोपासनाग्नावेव स्वयंकुर्यादित्यत्र ॥ कर्मस्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही इति याज्ञवल्क्यवचना
च्चेति ॥ अनध्ययनप्रकरणे ॥ याज्ञवल्क्यः ॥ त्र्यहं प्रेष्य तेन ध्यायशिष्यर्त्विग्गुरु बंधुषु ॥ उपाकर्मणि चोत्सर्गे स्व
शाखा श्रोत्रिये तथेति ॥ अनध्ययनप्रकरणे ॥ याज्ञवल्क्यः । श्वक्रोष्टुगर्द भोलूकश्रवणा तैविनिस्वने । अमेध्यशवशूद्रां
त्यश्मशान पतितांतिकइति ॥ समावर्तनप्रकरणे ॥ याज्ञवल्क्योपि ॥ गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया ॥ वेदव्रता
नि वा पारं नीत्वा ह्युभयमेव वेति ॥ विवाहप्रकरणे ॥ याज्ञवल्क्यः ॥ अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्
। अनन्यपूर्विकां कांतामसपिंडां यवीयसीं इति ॥ तस्मिन्नेव प्रकरणे ॥ असमानार्षगोत्रामिति याज्ञवल्क्योक्तेश्च
। इति ॥ विवाहे कन्यादातॄणां मध्ये पूर्वपूर्वाभावे उत्तरोत्तरस्य दातृत्वं इत्याह ॥ याज्ञवल्क्यः ॥ पिता पिता
महो भ्राता सकुल्यो जननी तथा । कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः इति ॥ सपिंडीकरणप्रेतश्राद्धानि
कार्यांतरप्रसक्तौ अपकृष्यापि कर्तव्यानीत्यत्र कात्यायनः ॥ प्रेतश्राद्धानि सर्वाणि सपिंडीकरणं तथा । अपकृ
ष्यापि कुर्वीत विभक्तानां न दोषकृत् ॥ संकष्टहरणेश पूजाप्रकरणे ॥ संकटे समनुप्राप्ते याज्ञवल्क्येन योगिना ॥

प्युग त्वोदक्यां विशुध्यतीति॥ गर्भिण्याः प्रियपदार्थोदातव्य इत्यत्र॥ याज्ञवल्क्यः दौहृदस्याप्रदानेन ग
र्भो दोषमवाप्नुयात्॥ वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः॥ इति॥ अथ जातकर्मोच्यते॥ तदाह या
ज्ञवल्क्यः॥ मास्यं तेजातकर्म चेति॥ नामकर्मप्रकरणे॥ अथ नामकर्मोच्यते॥ भविष्ये॥ नामधेयं दशम्यांतुद्वाद
श्यां वापि केचन अष्टादशेऽहनि तथा वदंत्यन्ये मनीषिणः॥ तच्च एकादशाहातिक्रमे ज्ञेयं॥ याज्ञवल्क्यः॥ अह
न्येकादशे नाम इति॥ उपनयन प्रकरणे॥ याज्ञवल्क्यः॥ गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनमिति॥
गर्भाधानादिसंस्कारलोपे प्रायश्चित्तमाह॥ कात्यायनः॥ लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते॥ प्रायश्चित्ते
कृते पश्चात् लुप्तकर्म समाचरेदिति॥ ब्रह्मचारिणः मधुमांसादिवर्जनादिप्रकरणे॥ याज्ञवल्क्यः॥ मधुमांसज
नोच्छिष्ट शुक्लस्त्री प्राणहिंसनं॥ भास्करालोकनं श्लीलपरिवादादि वर्जयेत्॥ इति॥ ब्रह्मचारिणः अग्निकार्य
भिक्षाचरणादिनियमप्रकरणे॥ याज्ञवल्क्यः॥ कृताग्निकार्यो भुंजीतेति॥ यज्ञोपवीतप्रकरणे॥ कात्यायनः पृ
ष्ठदेशे च नाभ्यां च धृतं यद्विंदते कटिं। तद्धार्यमुपवीतं स्यान्नातिलंबनचोच्छ्रितमिति॥ समावर्तनं गगोदानप्रक

नइदानींतनभाष्यप्रतिनिधिरूपतात्पर्यदर्शनाख्यव्याख्याकर्त्रा सुदर्शनाचार्येणापि शतपथब्राह्मणस्य मुख्य
प्रमाणतया श्रौतकर्मणि संदेहनिर्णयार्थमुदाहृतत्वात्। याज्ञवल्क्यस्य तु केषुचित्। धर्मनिर्णयस्थलेषु मनु
याज्ञवल्क्याभ्यामिति मनुसहचर्यत्वेन तद्वाक्यप्रमाणस्य असकृदुदाहृतत्वाच्च। याज्ञवल्क्यादीनां अयो
ग्यताप्रसक्तिरेव न दृश्यते॥ आपस्तंबगृह्यसूत्रानुवृत्ततद्व्याख्याप्रविष्टजनानां गर्भाधानादिसंस्कारककर्म
प्रतिपादकप्रयोगरूपचंद्रचूडीयेपि॥ तत्रैव ऋतुगमनकालनिर्णयप्रकरणे॥ याज्ञवल्क्यः॥ षोडशर्तुनिशा
स्त्रीणां तस्मिन्युग्मासु संविशेत्॥ ब्रह्मचर्येण पर्वण्याद्याश्चतस्रश्च वर्जयेत्॥ इति॥ तत्रैव भार्यागमने निषि
द्धकालप्रकरणे॥ याज्ञवल्क्यः॥ सर्वं गर्भस्त्रियं नैम्यां मघामूलं च वर्जयेत् इति॥ तत्रैव तस्मिन्नेव प्रकरणे
॥ अत्र अयुग्मासु सकृत्सकृदेव गमनं कुर्यात्तदाह याज्ञवल्क्यः॥ सुस्थ इंदौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् इ
ति॥ तस्मिन्प्रकरणे॥ स्त्रीरागाद्गमनेन न दोषः॥ यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्निति याज्ञवल्क्योक्तेः
इति॥ स्वभार्यारजस्वलागमने निषेधे॥ स्वभार्यारजस्वलागमने विशेषमाह याज्ञवल्क्यः॥ त्रिरात्रांते घृतं प्रा

पृथक्त्वाभावः॥ स्पष्टएवावगम्यते॥ इहचसूत्रभाष्यकाराभ्यामनुक्तमपिविश्वेदेवार्थयुग्मभोजनंकर्तव्यं।द्वौदैवे
इतिमनुयाज्ञवल्क्याभ्यामुक्तत्वादिति॥ मनुसमानत्वेनयाज्ञवल्क्यस्यापिसंग्रहात् तस्यदोषाभावइतिकिमु
वक्तव्यं॥ अष्टमपटले॥ मातामहश्राद्धस्यापिनित्यत्वानित्यत्वविकल्पसंशयविचारप्रस्तावे॥ पृथङ्मातामः
हानांचवैश्वदेवसमन्वितं।कुर्वीतभक्तिसंपन्नंतंत्रंवावैश्वदेविकमिति॥ याज्ञवल्क्यविष्णुस्मृतौ॥श्रीविष्णु
पुराणेचविधिदर्शनात्।मातामहश्राद्धमपिनित्यमेवेत्यवगम्यते॥ तंत्रमिति॥ सूत्रभाष्यकारौनब्रूतः उ
च्यते।नैवतत्रस्मृत्यंतरेषु।पित्र्यवत्।सर्वस्यैकजीवतोद्विजस्यावश्यंमातामहश्राद्धमपिनियमेनविधित्सि
तं।कृतेभ्युदयःअकरणेतु।नप्रत्यवायइति।कस्यतर्हि।नियमेनकर्त्तव्यमिति। विधित्सेतिचेत्।यःपुत्रिकाहू
तायाः आसुरादिविवाहोढाबालायावापुत्रोमातामहेनसहमातुः सापिंड्यंकरोति।तस्य।मातामहश्राद्धंनि
यतमेवाकरणेचप्रत्यवायः।मासिश्राद्धेतुमातुः।पृथक्श्राद्धाभावात्।मातामहश्राद्धांशभावित्वोपपत्तेः॥ इ
त्यादिवचनेनआपस्तंबगृह्यसूत्रभाष्यस्यकपर्दिस्वामिकृतस्यउत्सन्नत्वेनअदृष्टत्वात्॥ तत्स्थानापंनत्वे

पटलेसप्तसंख्याकखंडे॥ वैश्वदेवे विश्वेदेवाइतिसूत्रार्थविचारेजीवत्पितृकपिंडपितृयज्ञप्रकरणे॥ कात्यायन
स्तु। प्रत्युत पक्षे पिंडदानमेवप्रधानं। होमःतदंगमित्याह जीवत्पितृकस्यहोमांतमारंभो वेतीति॥ तस्मिन्नेव प
टलेअष्टसंख्याकखंडे। उपाकरणेसमापनेचऋषिर्यःप्रज्ञायते॥ सदसस्पतिर्द्वितीयः इतिसूत्रार्थविचारेस द
सस्पति र्द्वितीयइति होमस्य। स्विष्टकृत्स्थानापन्नत्वेनार्थप्रतिपादनविषये॥ उपाकरणसमापनयोराज्यहवि-
ष्कयोः स्विष्टकृदेवनास्ति। कथं तत्स्थानेसदस्पतिविधिरितिचेन्न। अनेनैववचनेनास्यप्रसंगोविधीयते।
यथाग्निहोत्रेद्वितीयस्याहुतेः। शतपथेनब्राह्मणेनतेनाभिरुत्तरार्द्धपूर्वार्धसस्वहोमः। एतद्धिस्मरणेस्विष्टकृल्लो
पप्रायश्चित्तंच। अथपंचलिंगक्रमोहोमाभ्यांसदस्पति मद्भुतमित्येतयाहोतव्यइतिस्पष्टत्वादिति॥ अष्टमपट
ले॥ मासिश्राद्धेसूत्रभाष्यकाराभ्यांविश्वेदेवस्थानीयब्राह्मणस्यानुक्तत्वात्। विश्वेदेवब्राह्मणनिमंत्रणंकथंभ
वेदिति आशंकायांमनुयाज्ञवल्क्याभ्यांपृथक्त्वेन विश्वेदेवब्राह्मणनिमंत्रणविधानादस्त्यत्र अष्टकासुचरधौव
गयापांचमृतेहनि। मातृश्राद्धं पृथक्कुर्यात्। अन्यत्रपतिनासहेतिमनुवचनादष्टकादिभ्योन्यत्रमासिश्राद्धादौ

दिष्टदितः॥ अविशेषेण पित्र्यस्य तथा मातामहस्य च। युगपच्च सपिण्डये वचनाद्वक्ष्यमाणकात्। इत्यादि॥ तत्प्र
करणे॥ अथमन्त्राशयः। अमावास्याश्वकेत्यादिना श्राद्धकालो याज्ञवल्क्येनाभिहितं॥ इति॥ तस्मिन्नेव प्रकरणे।
अनग्निकः। पितृब्राह्मणमूर्धन्यहस्ते होमं कुर्यादित्यत्र। अमुमेवार्थं कात्यायनोप्याह॥ पित्र्ये यः पंक्तिमूर्धन्य
स्तस्य पाणावनग्निकः। हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेदिति॥ तत्रैव॥ प्रथमभार्यामरणे श्रौताग्नयः।
दहनार्थं देया इति नियमे प्राप्ते। याज्ञवल्क्यः॥ द्वितीयादिसवर्णभार्याया अपि देया इत्यत्र॥ याज्ञवल्क्यस्तु।
दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिरिति॥ उक्तवानित्यर्थः॥ पुनस्तत्प्रकरणे। याज्ञवल्क्येन। उत्सर्गस्य प्र
तिपादितत्वात्। द्वितीयादेरप्यग्निहोत्रेण दाहः कार्य इति॥ सामशाखागृह्यसूत्रात्मकखादिरऋषिकृतगृह्य
सूत्रस्य तद्भाष्यरूपरुद्रस्कंधीयप्रयोगोभयात्मकतत्त्वाख्यागृह्यकर्मानुष्ठापकमुख्यप्रामाणिकग्रंथेपि याज्ञ
वल्क्यकात्यायनादिस्मृतिसूत्रवाक्यानां विशेषितधर्मनिर्णयस्थले प्रामाणत्वेन उदाहृतत्वाच्च तेषां अयोग्य
ताभावः सिद्ध एव॥ आपस्तंबगृह्यसूत्रव्याख्यानरूपसुदर्शनाचार्यकृततात्पर्यदर्शनाख्यग्रंथेपि॥ तृतीय

विनायकोदेवतागायत्रीच्छंदः। शिवग्रहयज्ञे विनियोगः॥ तस्मिन्नेव सर्वतोभद्रयंत्रे। मोघाणः कण्वानिरुक्ति
तिर्गायत्री निरुक्तिं पश्चिमे वरुणः॥ इति॥ तस्मिन्नेव कौतुकबंधनप्रकरणे॥ श्रीयोजात इत्यस्य मंत्रस्य काण्वः
पवमान सोमस्त्रिष्टुप् इति॥ तत्रैव धर्मनिरूपणप्रकरणे॥ याज्ञवल्क्योपि॥ उत्सन्नशाखाः याः काश्चित्ता सांवे
दांतराणि च॥ अंतर्धानंगतानां हि स्मृत्वा तैस्मृतयः कृता इति॥ द्विजातीनां संस्कारनिरूपणे॥ यथा ह याज्ञव
ल्क्यः॥ विप्रक्षत्रियविट्शूद्रवर्णास्तेषाद्यास्त्रयो द्विजाः। निषेकादिस्मशानांतास्तेषां वै मंत्रतः क्रिया इति॥ ए
वं प्रयोगपारिजातकारेणापि याज्ञवल्क्यकण्वादीनां तेषां वचनानां पूज्यतया प्रमाणतया च उदाहृतत्वात्। ते
षां अयोग्यता नास्तीति गम्यते॥ साम शाखा गृह्यसूत्रभाष्य प्रयोगो भयात्मकग्रंथेपि॥ श्राद्धप्रकरणे॥ मातामं
हादीनां एकतंत्रेण दर्शश्राद्धप्रकरणविषये॥ तदुक्तं याज्ञवल्क्येन॥ द्वौ दैवे प्राक्त्रयः पित्र्ये उदगेकैकमेव वा॥ मा
तामहानामप्येवं तंत्रं वा वैश्वदेविकमिति॥ तत्रैव तत्प्रकरणे॥ कर्षोसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशं। प्रत्या
ब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिरिति कात्यायनवचनात्॥ तत्प्रकरणे याज्ञवल्क्येन कालस्वमाचास्या

निश्चीयतएव॥ आश्वलायनगृह्यकर्मप्रयोगस्मार्तप्रदीपिकायां॥ नवग्रह आराधनप्रकरणे॥ अग्निंदूतंकण्व
पुत्रोमेधातिथिरग्निर्गायत्री॥ मेधातिथिऋषिः। अग्निर्देवतागायत्रीछंदः नवग्रहाराधनेविनियोगः॥ इति॥ त
त्रैवतत्प्रकरणे॥ कद्रुद्रायकण्वोरुद्रोगायत्रीकण्वऋषिः रुद्रोदेवतागायत्रीछंदः। ग्रहयज्ञे विनियोगः॥ इ
ति॥ तत्रैववृषोत्सर्गप्रकरणे॥ कद्रुद्रायेतिनवर्चस्यसूक्तस्यकण्वऋषिः रुद्रोदेवतागायत्रीछंदः। वृषोत्सर्गे
विनियोगइति॥ इत्यादिनास्मार्तप्रदीपिकाकारेणापि तत्रतत्रस्वग्रंथे याज्ञवल्क्यकण्वकात्यायनादिसूत्र
स्मृत्यादिवाक्यानांप्रमाणत्वेनोदाहृतत्वात्। कण्वादेः। ऋग्वेदगतमंत्रद्रष्टृत्वश्रवणात्। कण्वस्य आंगीरस
त्वेनहेमाद्रौप्रतिपादितत्वाच्च कण्वादीनां अंगिरोगणप्रविष्टत्वेनापि इतरसर्वऋषिभिस्सहतुल्यत्वाव ग
माच्च एनकेनापिरूपेणकण्वयाज्ञवल्क्यादीनांशापादि अयोग्यतारूपदोषादेः संभवाशंकाया अपिअत्यं
तदुर्लभतरत्वात्। तेषांदोषारोपणं असूयाकृतं इतिनिश्चीयते॥ नरसिंहपारिजातप्रयोगे। शिवग्रहयज्ञप्रक
रणे॥ शिवस्यदक्षिणपाणौ आतून इंद्र इत्यस्यकाण्वकुशीद विनायकोगायत्री कण्वपुत्रः। कुशीद ऋषि

प्र॰पा॰ मद्दर्शितं कात्यायनादिभिरपि तंत्रे विहितमेव। न च बह्वृचैर्वाजसनेयैर्वा पुनर्दहनं नेष्टमिति तत्समाचर्यते। बह्वृत्वं वास्व
गृह्योक्तमिति वचनादिति॥ तत्रैव तस्मिन्नेव प्रकरणे॥ अथ किंद्रव्यो पिंडो अन्नपिंडा वित्येके सक्तुपिंडा वित्यपरे
।उक्तं च कात्यायनेन अथानुस्तरणी नास्ति। तदा सक्तुहवींषि तत्स्थाने कुर्यादिति। पिंडग्रहणमुपलक्षणं। तेन व

४६७

पादिसर्वपशुकार्यं सक्तुभिरेव समापयेदित्येके। अन्नपक्षे वपास्थाने अपूपः। वृक्कास्थाने पिंडौ अन्यान्यपि तत्तदं
गसदृशानि सक्तुभिरेव कार्याणीति॥ इत्यादिना आश्वलायनशाखाप्रविष्टज्ञनानां काश्यादि रामेश्वरपर्यंतेसं
स्थितानां बहूनां ऋग्वेदिब्राह्मणानां सर्वेषां मुख्यतया अनुष्ठापक आश्वलायनसूत्रतात्पर्यार्थज्ञापक नृसिं
हपारिजातधर्मप्रवृत्त्यादि ग्रंथप्रवर्तक नारायणवृत्तिकारेणापि कात्यायनादीनां स्वग्रंथेषु आश्वलायनतुल्य
तया आश्वलायनेनोक्तधर्माणां विकल्पत्वेन आहिताग्निसंस्कारादिमुख्यशास्त्रोक्तश्रौतकर्मानुष्ठानादि पर
मधर्मसंशयविषये उदाहृतत्वेन कात्यायनादिसूत्रस्मृतीनां परमप्रामाण्येन अंगीकृतत्वस्य स्पष्टतया प्रतीय
मानत्वादपि कात्यायनकण्वादीनां तदाचार्यस्य याज्ञवल्क्यस्य चायोग्यतासंभावनापि न संगच्छत इति सर्वैः

दितितेन द्वयोश्चतुर्विंशतिः। त्रयाणां षट्त्रिंशत्। चतुर्णां अष्टचत्वारिंशत् ग्रहणांतं वा। वेदग्रहणांतं वा ब्रह्मचर्यं भवति॥ प्रागूर्ध्वं द्वादशाब्देभ्यः॥ एवं तत्त्रिविधं स्नानं। कात्यायनेन प्रदर्शितं। विद्यास्नानं व्रतस्नानं विद्याव्रतस्नानमिति प्राक्। द्वादशाब्देभ्यो वेदमधीत्य स्नाति स विद्यास्नातकः। यस्तु द्वादशवर्षाणि ब्रह्मचर्यं कृत्वा अनधीतविद्यः स्नाति स व्रतस्नातकः। यस्तु पुनर्द्वादशवर्षाणि ब्रह्मचर्यं कृत्वा अधीतविद्यः। स्नाति स विद्याव्रतस्नातकः। ननु विद्यांते गुरुमर्थेन निमंत्र्य स्नानमिति वक्ष्यति॥ अतः कथं व्रतस्नानस्य संभवः॥ उच्यते न विद्यापरिसमाप्तौ स्नानं चोच्यते। किं तर्हि। विद्याया अंते तेन व्रतस्नातकोऽपि मध्यमुत्सृज्यांतमारण्यकमधीत्य स्नायादिति॥ ॥तत्रैव चतुर्थोध्याये अहिताग्निसंस्कारप्रकरणे॥ अत्राप्येकग्रहणं संबध्यते। मध्यगतस्य विशेषाभावात्॥ अप्रयोजनत्वाच्च। तेनानुत्तरणी अनित्या कात्यायनेनाप्युक्तं॥ न चास्ति संदेहादिति अनुत्तरणीकृतानेदस्थिसंचयनकाले। कानिचिद्यजमानास्थीनि कानिचित् अनुत्तरण्या इति संदेहः॥ स्यात्तस्मात् च वा भवतीत्यर्थः। इति। तत्रैव चतुर्थोध्याये अहिताग्निसंस्कारप्रकरणे॥ यत्तु परैरुक्तं पेषणांतं सोमयाजिनः। नित्यंतमग्निचितइ इति तदाचार्यस्यनेष्टं। अत एव

कलंधर्मलक्षणं॥ इति॥ भूश्शुद्धिप्रकरणेयाज्ञवल्क्यः॥ भूश्शुद्धिर्मार्जनाद्दाहात्कालो ग्गोक्रमणात्तथा॥ नि·
सेकादुल्लेखनाल्लेपा द्गृहेमार्जनलेपनात्॥ इति॥ इत्यादिनाबहुवाक्यजातेनयाज्ञवल्क्यकण्व दीनांस्मृति
वाक्यजातस्य सर्वधर्मेषुप्रधानतया महाप्रमाण त्वेनधर्मप्रवृत्तिकारेणा पिउदाहृतत्वात्॥ ॥धर्मप्रव
त्तौउदाहृतप्रवरखंडेपि। भरद्वाजगणाकण्वगणविश्वामित्रगण पठितानां ऋषीणामपिगणैक्य स्य
प्रतीयमानत्वाच्च याज्ञवल्क्य कण्वादीनांआश्वलायनआपस्तंबादितुल्यत्वेनसर्वव्यवहारेषु शास्त्र
प्रतिपाद्यत्वात् तेषामेतेषां अयोग्यतालेशोपिनसंभवतीतिनिश्चितोर्थः प्रतीयतएवआश्वलायनगृह्यसूत्र
स्यव्याख्यानरूपनारायणवृत्तावपिस्नातकप्रकरणेतस्मादध्यमेवश्रेयान्वेदग्रहणंकथमेकैकस्यवेदस्यद्वादशवर्षा
णिब्रह्मचर्यस्या

मिथोविवाहंनार्हेतिसमानप्रवरायतः॥आंगीरसाघोकण्वइति॥ तत्प्रकरणे॥विश्वामित्रगणः॥विश्वामित्रोदेवरातचि-
तिकागालवोमनुः भूत्तालिकिर्वालखिल्योयाज्ञवल्क्यश्चकौशिकइति॥दशविधपुत्रानाह याज्ञवल्क्यः।औरसोधर्मप-
त्नीजःतत्समःपुत्रिकासुतः॥क्षेत्रजःक्षेत्रजनितःस्वगोत्रेणेतरेणवा॥इत्यादि॥अथश्राद्धकालानाहयाज्ञवल्क्यः।अमा-
वास्याष्टकावृद्धिकृष्णपक्षोयनद्वयं॥द्रव्यंब्राह्मणसंपत्तिविषुवत्सूर्यसंक्रमा॥इति॥ भाद्रपदापरपक्षमहालयश्राद्धमाह
याज्ञवल्क्यः॥प्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीं॥शस्त्रेणतुहतायेवैतेभ्यस्तत्रप्रदीयतइति॥श्राद्धेएकब्राह्मणभो-
जनविषयमाह याज्ञवल्क्यः॥यद्येकंभोजयेच्छ्राद्धेदैवंतत्रकथंभवेत्॥अन्नंपात्रेसमुद्धृत्यसर्वस्यप्रकृतस्यचेति॥त-
त्रैववैष्णवानामेकादश्यांश्राद्धंप्राप्तौश्राद्धंकृत्वाश्राद्धशेषमन्नमाघ्रायोपवसेदित्याह।कण्वः।एकादश्यांयदाश्राद्धंभत्य-
र्थंयदिवाभवेत् कार्यमेवहितच्छ्राद्धंउपवासःकथंभवेत् उपवासोयदानित्यंश्राद्धंनैमित्तिकंभवेत् कृत्वातूपवसे-
च्छ्राद्धंशेषमाघ्रायवैचरोरिति श्राद्धप्रशंसायांयाज्ञवल्क्यः॥न्यायागतधनस्तत्वज्ञाननिष्ठोतिथिप्रियः श्राद्धकृत्स-
त्यवादीचगृहस्थोपिहिमुच्यते॥दानप्रकरणेयाज्ञवल्क्यः॥देशकालानुरोधेन द्रव्यंश्रद्धासमन्वितंपात्रेप्रदीयतेयत्त त्स-

हैममेवचबिभृयाद्दक्षिणेपाणौपवित्रंचोत्तरोत्तरं॥ तत्रैवतल्लक्षणप्रकरणेयाज्ञवल्क्यः॥ अनामिकयाधृतंहैमंतर्जन्यांकांस्य
मेवच॥ कनिष्ठिकयाधृतंरवड्गंतेनपूतोभवेन्नरः॥ तत्रैवप्राणायामप्रकरणेयाज्ञवल्क्यः॥ गायत्रींशिरसासार्द्धंजपे
द्व्याहृतिपूर्विकांत्रिः पठेदायतःप्राणः प्राणायामस्सउच्यते। इति॥ तत्रैवसवर्णस्त्रीभ्यः पत्नीमात्रादिभ्यःनित्यतर्पण
विधानेयाज्ञवल्क्यः सवर्णेभ्योजलंदेयंनासवर्णेभ्यएवचनामगोत्रस्वधाकारैःप्रत्यहंतर्पयेत्सुधीः॥उपनयनप्रकर
णे तथाचयाज्ञवल्क्यः॥ आषोडशाद्द्वाविंशा च्चतुर्विंशाच्चवत्सरात् ब्रह्मक्षत्रविशांकालोह्युपनायनिकःपर
मिति॥ तत्रैवगणपतिपूजाप्रकरणेसंकटेसमनुप्राप्ते याज्ञवल्क्येनयोगिना शांति रुक्ता गणेशस्य पूजांकृत्वा
समाचरेदिति॥ विवाहप्रकरणेयाज्ञवल्क्यः मूलगोत्रादन्यगोत्रामुद्वहेदष्टमोष्टमां॥ अन्यगोत्रादन्यगोत्रांषष्ठःष
ष्ठींसमुद्वहेत्॥ गोत्रप्रवरनिर्णयप्रकरणे॥ अथांगिरसगणः॥ गौतमश्चभरद्वाजोकपिः कण्वोथमुद्गलः॥ विरूपो
हरितोविष्णुरयवाश्चाष्टमोमतः॥ इति॥ तत्प्रकरणे॥ अथभरद्वाजगणः॥ भरद्वाजोथकण्वाग्निवेश्योअर्वायनस्तथा॥
सर्वस्तंबस्तंबशब्दश्शृंगश्चावटकस्तथेति। तत्प्रकरणे। अथकण्वगणः॥ आंगीरसअजामीढकण्वश्चापिअयोह्यमे॥ ४६५

तव्यानिहेतुभिः इत्युदाहृतस्पूर्वोक्तस्मृतिवचनानां अनुल्लंघ्यत्वस्यप्रतिपादितत्वात् एतन्मूलस्मृत्युपस्मृतिकर्तृ
कोटौयाज्ञवल्क्यकण्वकात्यायनपारस्करादीनामप्यनुप्रविष्टत्वेनएतेषांवचनानामपिमहाप्रामाण्यसिद्धे एते
षांशापप्रयुक्तायोग्यतानास्तीतिसाधनीयंकिमस्ति अर्थसिद्धत्वात् इत्यलमतिवादेनप्रकृतमनुसरामः॥ धर्मप्र
वृत्तावपि॥ आदिभागेधर्मदेशानाह योगीश्वरः॥ योगीश्वरइत्युक्तेयाज्ञवल्क्य इत्यर्थः॥ यस्मिन् देशेमृगःकृ
ष्णस्तस्मिन्धर्मान्निबोधत॥ धर्मसंरक्षणार्थायतस्मिन्देशेमहाद्विजः॥ तत्रैवशौचप्रकरणेयाज्ञवल्क्यः दिवा
संध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः कुर्यान्मूत्रपुरीषेतुरात्रौचेद्दक्षिणामुखइति॥ तत्प्रकरणेयोगीश्वरः॥ त
स्मात्कायंनमृज्येतद्यवरेणकरेणवाप्यानलेह्यनसाप्यंचपुनस्नानेनशुध्यति। इति। तत्रैवतत्प्रकरणेयाज्ञवल्क्य
॥ दग्धंजीर्णंचमलिनंमूषकोपहतंतथाखादितंगोमहिष्याद्यैःतत्त्याज्यंसर्वथाद्विजैरिति॥ तत्रैवरजस्वलाव
स्थाप्राप्तनद्यादिषुस्नानादिनिषेधः॥ तथाचयोगीश्वरःरजोदुष्टेषुचस्नानंवर्जंनद्यादिषुद्विजैःकदर्थितंरजस्त
सांसंध्योपास्तिंचतर्पणं॥ तत्रैव अंगुलीषुस्वर्णादिधारणप्रकरणे॥ योगीश्वरः॥ दार्भ्यंपवित्रंताम्रंवारजतं

प्रसिद्धादिबहुधर्मशास्त्रपरिगृहीतहेमाद्रिग्रंथेपिप्रतिधर्मविषयेयाज्ञवल्क्यकण्वकात्यायनादिवचनानांपरमप्रमा
णतयाउदाहृतत्वात् कण्वतत्पुत्रमेधातिथ्यादिवाजसनेयऋषीणांचतुर्वेदादिसर्वमंत्रेषुमंत्रद्रष्टृत्वेनप्रदर्शित
त्वाच्च एतेषांवचनानांमेवमनुपराशरापस्तंबाश्वलायनबोधायनादिवचनतुल्यत्वेनप्रामाण्यस्यगृहीतत्वाद
व एतेषांशापादिप्रयुक्तायोग्यतायाः शशविषाणतुल्यत्वेनात्यंतासत्वात् प्रत्युततेनैवहेमाद्रिणास्वग्रंथेप्रथ
मारंभेधर्मशास्त्रकर्तृऋषिनामप्रतिपादनप्रकरणे॥ तत्रैवधर्मप्रमाण इत्युक्त्वाशंखलिखिताविति तद्वचनमु
दाहृतं तथाचशंखलिखितवचनं॥ स्मृतयोधर्मशास्त्राणितेषांप्रणेतारोमनुविष्णुयमदक्ष त्याद्युपक्रम्य
हारीतयाज्ञवल्क्यप्राचेतसादयः इतिप्रदर्श्य॥ यमः॥ मनुर्यमोवसिष्ठोत्रिरित्युपक्रम्यहारीतोलिखितस्तथा इत्यं
तंस्मृतिकर्तॄन्प्रदर्शयित्वा एतैर्यानिप्रणीतानिनहंतव्यानिहेतुभिः इतियमवचनेनापितत्स्मृतीनांप्रामाण्यद
र्ढ्यंसंपाद्य आदिशब्दाच्च बुधदेवलसोमजमदग्निप्रजापतिरित्युपक्रम्यमरीचिकाश्यपइत्यंतंउपस्मृतिकर्तॄ
न्प्रदर्शयित्वा तत्रैवशंखयमादिवचनं एतैर्यानिप्रणीतानिधर्मशास्त्राणिवैपुरा तान्येवातिप्रमाणानिनहं

तिष्ठिराधोगायत्रीतत्रस्योनापृथिवीमेधातिथिः काण्वः पृथ्वीगायत्रीकुद्रुद्रायेतिनवघोरः कण्वोरुद्रः॥ उदुत्यं
जातवेदसमितित्रयोदशर्चस्यसूक्तस्यकण्वपुत्रःप्रस्कण्वऋषिः सूर्योदेवताजगतीछंदः॥ अग्निमस्तोष्यीति
दशर्चस्यनाभाकः कण्वोग्निर्महापङ्क्तिः द्विचत्वारिंशदृचस्यकण्वइंद्रोगायत्री पृषदः काण्वयेंद्रं गायत्रं सोअ
स्मैमहद्दशप्रगाधः काण्वः येंद्रंपाङ्क्तं॥ पवस्वदेववीतिदशर्चस्यमेधातिथिः काण्वः सोमोगायत्री अंधिधकू पंच
र्चस्यकण्व आंगीरसोधौरः सोमस्त्रिष्टुप् कनिक्रंति पंचर्चस्यप्रस्कण्वः सोमस्त्रिष्टुप मेधातिथिःकाण्वःसदसस्प
तिर्गायत्रीवायुनामेधातिथिः काण्वः ऋभवोगायत्रीमेधातिथिः पृथ्वीगायत्री मेधातिथिः काण्वोमित्रावरुणेगायत्री उदु
त्तमंमेधातिथिःकाण्वोविष्णुर्गायत्री इदंविष्णुर्मेधातिथिः काण्वोविष्णुर्गायत्री। तद्विष्णोः काण्वोघोरोरुद्रोगायत्री आक्र
ष्णेनउदुत्यंजातवेदसमिति त्रयोदशर्चस्यसूक्तस्यकण्वपुत्रप्रस्कण्वऋषिः सूर्योदेवतानवाद्यागायत्रीछंदःएषो.
उषाकण्वपुत्रःप्रस्कण्वाश्विनौगायत्री। तत्रैवहविर्योग्यद्रव्याण्याह छंदोगपरिशिष्टेकात्यायनः हविष्येषुयवामुख्यास्त
दनुव्रीहयस्स्मृताः॥माषकोद्रवगौरादीन् सर्वाभावेपि वर्जयेत् इति॥ एवंप्राचीनधर्मनिबंधनरूपमहाप्रमाणभूतनिर्ण

५६

त्र॥ छंदोगपरिशिष्टे कात्यायनः॥ यत्रोपदिश्यते कर्म कर्तुरंगं न उच्यते॥ दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः

इति॥ तत्रैव कर्मकाले मंत्रऋषिदैवताछंदसां ज्ञानपूर्वकमेव कर्म कर्त्तव्यमित्यत्र॥ याज्ञवल्क्यः॥ आर्षं छंद

श्च दैवत्यं विनियोगस्तथैव च॥ वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः॥ इति॥ तत्रैव कर्मांगलोपे विष्णुस्मरणादि

कं कर्त्तव्यमित्यत्र॥ याज्ञवल्क्यः॥ यदि वास्यांगलोपस्स्यात् क्रियादिषु कथंचन व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णु

मव्ययमिति॥ तत्प्रकरणे याज्ञवल्क्यः॥ अज्ञानाद्यदि वा मोहात्प्रच्युतेताध्वरेषु यत्॥ स्मरणादेव तद्विष्णोः संपूर्णं

स्यादिति श्रुतिः॥ तथा च शतपथश्रुतिः॥ अथ यद्वाचंयमो व्याहरेत्तस्मादु हैष विशिष्टो यज्ञः परापवर्तते ततो वैष्णा

वीमृचं वा यजुर्वा जपेदित्यादि॥ तत्रैव यज्ञोपवीतप्रकरणे॥ छंदोगपरिशिष्टे कात्यायनः॥ सदोपवीतिना भा

व्यं सदा बद्धशिखेन तु॥ विशिखो व्युपवीतश्च यत्करोति न तत्कृतमिति॥ तत्रैव पितृरुद्रराक्षसाभिचारिकान्मं

त्राननुच्चार्य यदाज्जुहोति॥ तत्रात्माभिमर्शनं उदकोपस्पर्शनं च कर्तव्यमित्याह॥ याज्ञवल्क्यः॥ रौद्रपित्र्यासुरान्मं

त्रांस्तथा चैवाभिचारिकान्॥ व्याहृत्यालभ्य चात्मानमपस्पृश्य तदाचरेत्॥ तत्रैव तत्प्रकरणे॥ छंदोगपरिशि

कात्यायनः॥ पित्र्यमंत्रानुद्रवणे॥आत्मालंभे अवेक्षणे॥ अधोवायुसमुत्सर्गेप्रहासेनृतभाषणे॥ इति॥ तत्रैव
दर्भप्रकरणे॥ छंदोगपरिशिष्टेकात्यायनः॥ हरितायज्ञियादर्भापीतकाःपंचयज्ञियाः॥ समूलापितृदैवत्याकुल्मा
षावैश्वदेविका इति॥ तत्रैवसमित्प्रकरणे॥ छंदोगपरिशिष्टेकात्यायनः॥ नांगुष्ठादधिकाकार्यासमित्स्थूलतया
क्वचित्। नवियुक्तात्वचानैवनसकीटानपाटिताइति॥ तत्रैवहोमपरिवारप्रकरणे॥ छंदोगपरिशिष्टेकात्यायनः।
पाण्याहुतिर्द्वादशपर्वपूरिकारसादिनाचेत्स्रुवसर्वपूरिका। दैवेनतीर्थेनचहूयतेहविः स्वंगारिणिस्वर्चिषितच्चपा
वकेइति॥ तत्रैवपदार्थपरिमाणप्रकरणे॥ याज्ञवल्क्यः॥जालसूर्यमरीचिस्थंत्रसरेणुरजस्मृतं। तेष्टाविक्षाह्नुता
स्तिस्रोराजसर्षपउच्यते। तत्प्रकरणे॥ कात्यायनः॥ माषोविंशतिभागस्तुज्ञेयः कार्षापणस्यतु। काकिणीतुचतु
र्भागोमाषकस्यपणस्यच। इति। तत्रैवऋषिदेवताछंदप्रकरणे॥ तत्रऋग्वेदेमंत्राणां अग्निमीळेतिसूक्तस्यमधु
च्छंदविश्वामित्रोऽग्निगायत्रीइत्यादिमंत्राणांसर्वेषांवैदिकानांऋष्यादिज्ञापनार्थं अनुक्रमणिकाक्रमेण इत्यस्य
मंत्रस्य सदसस्पतिरितिमंत्रस्यकाण्वोमेधातिथिः।सदसस्पतिर्गायत्री। ...

हारीतो लिखितस्तथा। एतैर्यानि प्रणीतानि धर्मशास्त्राणि वै पुरा॥ तान्येवाति प्रमाणानि न हंतव्यानि हेतुभिः॥
आदिशब्दाच्च। बुधदेवलसोमजमदग्निप्रजापतिविश्वामित्रवृद्धशातातपपैठीनसि। पितामहबोधायनछाग
लेयजाबालीच्यवनमरीचि। कास्यपाः। इति॥ इत्यादिषु स्मृतिषु। मूलस्मृतिकर्तृकोटौ याज्ञवल्क्य कात्याय
नयोरपि॥ मुख्यतया गृहीतत्वात्। एतैर्यानि प्रणीतानि धर्मशास्त्राणि वै पुरा। तान्येवाति प्रमाणानि न हंतव्यानि
हेतुभिः॥ इत्यादिना च याज्ञवल्क्यकात्यायनस्मृत्योरपि। अतिप्रमाणत्वेन गृहीतत्वात्। तेषां अयोग्यता नास्ती
ति हेमाद्रिणापि ज्ञापितो भवति॥ तत्रैव विधिना कर्म कर्त्तव्यमित्यत्र॥ याज्ञवल्क्यः॥ विधिदृष्टं तु यत्कर्म करोत्य
विधिना तु यः। फलं न किंचिदाप्नोति क्लेशमात्रं हि तस्य तत्॥ इति॥ तत्रैव स्वशाखोक्तं विहाय अन्यशाखोक्त क
र्मणि दोषः॥ छंदोगपरिशिष्टे कात्यायनः॥ अक्रिया विविधा प्रोक्ता विद्वद्भिः कर्मकारिणां॥ अक्रिया च परा प्रोक्ता
तृतीया वा परा क्रिया इति॥ तत्रैव द्विजस्य एकवस्त्रनिषेधप्रकरणे॥ याज्ञवल्क्यः॥ परिधानाद्बहिः कक्षा निबद्धा ह्यास·
ह्यासुरी भवेत्। धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः। इति॥ तत्रैव कर्मकाले दक्षिणहस्तेन कर्म कर्त्तव्यमित्य

ह्मणानांइतरशाखिनांचसमानन्यायेनसर्वव्यवहारस्यतुल्यत्वात्॥वाजसनेयशाखाप्रवर्तकयाज्ञवल्क्य
ऋषिप्रभृतिब्राह्मणानांयत्किंचिद्दोषाभावः प्राप्यतइतिस्पष्टतयागम्यते॥ माधवाचार्याख्यविद्यारण्याचार्यका
लात्पूर्वकालीनःसहस्रसंवत्सरसंख्याककालादपिप्राचीनः।धर्मशास्त्रनिबंधनकर्ताहेमाद्रिः।धर्मनिर्णयकर्ता
तत्कृतग्रंथोपिहेमाद्रिरितिव्यवह्रीयतेसर्वदेशव्यासःबहुप्राचीनकालोत्पन्नः ग्रंथः॥ एवमेवहेमाद्रावपि॥ प्र
थमभागेतिथिनिर्णयव्रतादिप्रकरणे॥ धर्मप्रशंसाप्रकरणे॥याज्ञवल्क्यः॥कर्मणामनसावाचायत्नाद्धर्मं
समाचरेत्॥इति॥ तत्रैवधर्मप्रमाणे॥ याज्ञवल्क्यः॥ श्रुतिस्मृतिस्सदाचारः स्वस्यचप्रियमात्मनः॥ सम्यक्
संकल्पजःकामोधर्ममूलमिदंस्मृतं॥ इति॥ तत्रैवधर्मप्रमाणे॥शंखलिखितौ॥ स्मृतयोधर्मशास्त्राणितेषां
प्रणेतारो॥मनुविष्णुयमदक्षांगिरोत्रिबृहस्पत्युशनआपस्तंबवसिष्ठकात्यायनपराशरव्यासशंखलिखित
संवर्तगौतमशातातपहारीतयाज्ञवल्क्यप्राचेतसादयः॥ तत्रैवयमः॥ मनुर्यमोवसिष्ठोत्रिर्दक्षोविष्णुस्तथांगि
राः।उशनावाक्पतिर्व्यासआपस्तंबोथगौतमः॥कात्यायनोनारदश्चयाज्ञवल्क्यःपराशरः।संवर्तश्चैवशंखश्च

स्याद्द्वितीयारत्निवर्धिनी दृष्टमेव फलं तत्र नादृष्टमुपपद्यत इति॥ द्वितीयविवाहप्रकरणे॥ सदारोन्यान्पुनर्दारानुद्वो
ढुं कारणाद्दूरान्। यदीच्छेदग्निमान्कुर्वन्स्वह्नो मोस्य विधीयत इति॥ तत्रैव सायं होमकालमाह॥ कात्यायनोपि॥
यावत्सम्यङ्ङ्भाव्यं तेन भो रूक्षाणि सर्वतः॥ लोहितत्त्वं च नापैति तावत्सायं तु हूयत इति॥ तत्रैव होमकाले सभा
र्ये यजमाने सीमां उल्लंघ्य गते॥ पुनः स्वस्थानं प्रत्यनागते सति पुनराधानमित्यत्र कात्यायनः॥ विहायाग्नीं सभार्यश्चे
त्सीमामुल्लंघ्य गच्छति॥ होमकालात्ययेतस्य पुनराधानमिष्यत इति॥ इष्टिकालविचारे॥ संधिलक्षणमाह का
त्यायनः। संधिश्चेत्संगमादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः॥ सा पूर्णमासी विज्ञेया सद्यस्कालविधौ तिथिरिति॥ एवं ध
र्मसिंधु निर्णयसिंधु वैद्यनाथीय धर्मप्रवृत्यादिषु महाप्रमाणत्वेन उदाह्रीयमाण प्रयोगपारिजाताख्यनृसिंह प्रयो
ग पारिजातरूपनिबंधनग्रंथेपि मनु पराशर आपस्तंब बोधायन गौतमादितुल्यतया याज्ञवल्क्य कण्व कात्या
यन पारस्करादि वाजसनेयि ऋषीणां वाक्यानामपि महाप्रमाणत्वेन उदाहृतत्वात् याज्ञवल्क्य कण्वादि प्रवरखं
डेष्वपि इतरशाखा ऋषिप्रवरखंडोक्त ऋषीणां च परस्परैक्यतया गोत्रप्रवरादीनां ऋष्यैक्यतयाच्च वाजसनेयिब्रा

॥ इति ॥ तत्रैवकन्यादातृनिरूपणे ॥ याज्ञवल्क्योपि ॥ पिता पितामहो भ्राता सकुल्यो जननी तथा । कन्याप्रदः पूर्व
नाशे प्रकृतस्थः परः परः ॥ इति ॥ तत्रैवबहुभ्यो वाग्दानेपि प्रथमतः वाग्दान प्राप्तस्यैवकन्या भार्या भवतीत्यत्र का
त्यायनोपि ॥ अनेकेभ्योपि दत्तायामनूढायांतुतत्रवै ॥ पुरागतश्च सर्वेषां लभते यदिमां सुतां ॥ इति ॥ तत्रैवदत्तक
न्यायाः अन्यस्मिन्दाने दातुः दंड इति प्रस्तावे ॥ यत्तु याज्ञवल्क्येनोक्तं ॥ ॥ सकृत्प्रदीयते कन्या हरंस्तां चोरदं
ड भागिति ॥ तच्चादुष्टाभिप्रायमिति ॥ तत्रैवतस्मिन्नेवप्रकरणे ॥ पूर्वो वरः ॥ दुष्टश्चेत् ॥ वाचा दत्तापि पुनः गु
णवते देयेति ॥ दत्तामपि हरेत् पूर्वं श्रेयांश्चेद्वर आव्रजेदिति ॥ इष्टिकालनिर्णये वाजसनेयिनां तु यदा मध्यान्हा
त्प्राक् । संगमादूर्ध्वं पर्वसंधिः । तदा तस्मिन्नेवदिने अन्वाधानं तत्परदिने इष्टिः ॥ इति ॥ तत्रैवस्त्रियाः अधि
वेदनप्रकरणे याज्ञवल्क्यस्तु आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं ॥ तत्रैव बहुभार्यासमवायेज्येष्ठ
यैव अग्न्यतिथ्यादिपरिचर्या कारयितव्येत्यत्र हेमाद्रौ कात्यायनः । अग्निशिष्टादिशुश्रूषां बहुभार्यः सवर्णया
॥ कारयेत्तद्बहुत्वं चेज्ज्येष्ठया नविगर्हिता न चेत् प्रथमभार्याप्रशंसायां स्मृतिभास्करे कात्यायनः । प्रथमं धर्मपत्नी ।

याज्ञवल्क्योपि। अनन्यपूर्विकांकांतामसपिंडांयवीयसीं। अरोगिणींभ्रातृमतींअसमानार्षगोत्रजामिति॥ विवाहप्रकरणे
॥सापिंडसगोत्रविचारे। याज्ञवल्क्यः॥ ॥पंचमात्सप्तमादूर्ध्वंमातृतःपितृतस्तथेति॥ ॥तत्रैवयाज्ञवल्क्यो प
प्रवरखंडे॥ तथाचयाज्ञवल्क्यः॥शार्धूलमौनमौकानांभिन्नगोत्राणांभार्गववैतहव्यसावेतसेतिप्रवरस्यैक्यात्॥
अतस्तत्रविवाहप्रसक्तौ तद्व्यवच्छेदायाश्रमनार्षमित्युक्तं क्वचित्प्रवरभेदेपिगोत्रैक्यमिति।तत्रैवप्रवरखंडे। कण्व
॥कण्वोजमीडइत्यकगोत्रेकण्वगणास्मृतः॥ इति॥ तत्रैवप्रवरखंडे॥ वालिकिम्यश्रिकौलोकौयाज्ञवल्क्यश्च
नारदः॥ इति॥ तत्रैवविवाहार्थंकन्यासामुद्रलक्षणपरीक्षायां॥ याज्ञवल्क्यः॥ अविप्लुतब्रह्मचर्यौलक्षण्यांस्त्रि
यमद्वहेदिति॥ ॥तत्रैवपुंस्त्वपरीक्षायां॥ ॥याज्ञवल्क्यः॥ एतैरेवगुणैर्युक्तःसवर्णश्रोत्रियोवरः। यत्नात्परीक्षि
क्षितःपुंस्त्वेयुवाधीमानजनप्रियइति॥ तत्रैववरदोषपरीक्षायांवर्ज्यानाह॥ कात्यायनः॥ उन्मत्तःपतितःकुष्ठीत
थाषंडःस्वगोत्रजः॥ चक्षुःश्रोत्रविहीनश्चतथापस्मारदूषितइति॥ तत्रैवपरिवित्तिपरिवेदनप्रकरणे॥ ॥दोषाभा
वः॥कात्यायनोपि। देशांतरस्थानक्लीबांश्चकु वृषणान्सहोदरान। वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः

ज्ञवल्क्यः॥ प्रतिवेदंब्रह्मचर्यंद्वादशाब्दानि पंचवा ग्रहणांतिकमित्येकेकेशांतंचैवषोडशेति॥ ॥केशांतंनाम
गोदानिकं॥ वेदानधीत्यवेदौवावेदंवापि यथाविधि। अविप्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेदिति॥ ॥नैष्ठिकब्र
ह्मचारिधर्मप्रस्तावे। तत्रयाज्ञवल्क्यः॥ नैष्ठिकोब्रह्मचारीतु वसेदाचार्यसन्निधौ। तदभावेस्यतनयेपत्न्यांवैश्वानरे
पिवाइति॥ ॥नैत्रैवतत्प्रकरणे॥ याज्ञवल्क्योपि॥ अनेनविधिनादेहंसाधयन्विजितेंद्रियः। ब्रह्मलोकमवाप्नोतिन चे
हाजायतेपुनरिति॥ ॥ब्रह्मचारिणः गुरुशिश्रूषाप्रकरणे॥ आह याज्ञवल्क्यः॥ गुरूणामध्यधिक्षेपोवेदनिंदासु
हृद्वधः। ब्रह्महत्यासमंज्ञेयमधीतस्यचनाशनमिति॥ असूयाद्रोहादिरहितस्यैव अध्यापनंकर्त्तव्यमित्यत्र। याज्ञ
वल्क्यः॥ ॥कृतज्ञोद्रोहिमेधाविशुचिकल्योनसूयकः। अध्याप्यधर्मतः साधुः शक्तःप्रज्ञानवित्तदः॥ इति॥ अनध्याय
नप्रकरणे॥ याज्ञवल्क्यः॥ त्र्यहंप्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु। उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रियेतथा इ
ति॥ ॥वेदोत्सर्गप्रकरणे॥ याज्ञवल्क्योपि। पौष्यमासस्यरोहिण्यामष्टकायामथापिवा। जलांतेछंदसांकुर्यादुत्सर्गं
विधिवद्विजइति॥ ॥स्नातकप्रकरणे॥ याज्ञवल्क्योपि॥ गुरवेतुवरंदत्वास्नायीततदनुज्ञयाइति॥ ॥विवाहप्रकरणे

प्र·शा

८५९

नामाशौचाभावप्रकरणे॥ ॥याज्ञवल्क्यः॥ ऋत्विजांदीक्षितानांचयज्ञीयंकर्मकुर्वतां सत्रिव्रतिब्रह्मचारिदातृब्रह्म
विदांतथाइति॥ ॥सीमंतादिसंस्कारकर्माणिऔपासनाग्नौकर्तव्यानिइत्यादिप्रकरणे॥ ॥स्मृतचूडाकरणांतानां
ममीषांसंस्काराणांफलमाह याज्ञवल्क्यः॥ ॥एवमेनःशमंयातिबीजगर्भसमुद्भवमिति॥ ॥उपनयनशब्दा·
र्थप्रतिपादनेसावित्र्याप्रापणमुपनयनमितिकात्यायनः॥ गायत्र्याब्राह्मणमुपनयीतेनियेनखलुसंस्कारेण
वटुराचार्यादिसमीपंनीयतेतदुपनयनमिति॥ ॥तत्रैवद्विजातिशब्दनिर्वचनप्रस्तावे। इदमेवद्वितीयजन्मे
त्याह याज्ञवल्क्यः॥ मातुर्यदग्रेजायंतेद्वितीयंमौंजिबंधनात्। ब्राह्मणक्षत्रियविशांतस्मादेतेद्विजानयइति॥ ॥
व्रात्यप्रायश्चित्तप्रकरणे॥ याज्ञवल्क्योपि॥ यवोद्भवयवागूंचपिबेन्मासद्वयंप्रति॥ पयःपिबेदेकमासं मामिक्षां·
चार्धमासकमिति॥ ॥उपवीतपरिमाणादिविचारे। कात्यायनः॥ पृष्ठदेशेचनाभ्यांचधृतंयद्विंदतेकटिं॥ तद्धार्य
मुपवीतंस्यान्नातिलंबंनचोच्छ्रितमिति॥ ब्रह्मचारिभोजनप्रकरणे॥ याज्ञवल्क्योपि॥ कृताग्निकार्योभुंजीतवाग्य
तोगुर्वनुज्ञया। आपोशनक्रियापूर्वंसत्कृत्यान्नमकुत्सयनइति॥ ॥ब्रह्मकालावधिविचारेब्रह्मचर्यकालमाह या

नि·

ग्रम·

नः कण्वः कुसीदी विनायको गायत्रीति॥ मंत्रस्य मंत्रद्रष्टा ऋषिः कण्व इति। कण्वस्यापि। मंत्रद्रष्टृत्वेन ग्रहणात्॥
तत्रैव मंत्रेषु॥ निररुत्यद्रला ग्रेमो षूणः कण्वो निररु तिर्गायत्रीति॥ तन्मंत्रद्रष्टृत्वेनापि। कण्वस्य ऋषेः ग्रहणात्॥ स्त्री
णां रजोदर्शने रागज रोगज कालजादिनिमित्तक कालविशेषप्रकरणे॥ कात्यायनोपि॥ रात्रौ तृतीयभागात्प्रा
दिनारी रजस्वला। पूर्वेण स्नानतः शुद्धेदूर्ध्वं चेदुत्तरेण तु॥ इति॥ गर्भोत्पत्तिप्रकरणे अथ प्रसंगाद्गर्भोत्पत्तिप्रसवका
ल उच्यते॥ याज्ञवल्क्यः॥ तत्रतावत्। अजस्यात्मनः। शरीरग्रहणप्रकारमाह॥ सर्गादौ स यथाकाशं वायुं ज्योतिर्ज
लं महीं। सृजत्येकोत्तरगुणांस्तथादत्ते भवन्नपीति॥ ॥तत्रैव गर्भिणीपतिधर्मप्रकरणे॥ गर्भिणीपतिधर्मानाह॥ गर्भि
ण्या यदभिलषितं। तत्पतिना दातव्यं। अन्यथा दोषश्रवणात्। तदाह याज्ञवल्क्यः॥ दौहृदस्याप्रदानेन गर्भो दोषमवा
प्नुयात्। वैरूप्यं निधनं वापि। तस्मात्कार्यं प्रियं स्त्रिया इति॥ ॥आशौचेप्यग्निहोत्रं स्वयमपि कुर्यान्न कुर्यादिति। विचारे य
त आह याज्ञवल्क्यः॥ वैतानोपासनाः कुर्युः क्रियाश्च श्रुतिचोदितादिति॥ ॥तत्रैवाशौचनिवृत्तौ कर्माधिकारनिरू
पणे विशेषः॥ ॥ब्रह्मचारिणं प्रत्याह॥ कात्यायनः॥ नत्यजेत्सूतके कर्म ब्रह्मचारी स्वयं क्वचित्॥ इति॥ ऋत्विगादी

स्मार्त्तादिकर्मानुष्ठानविषयेप्रमाणत्वेन। मनु। व्यास। पराशर। आपस्तंब। बोधायन। गौतमादि। वचनानाम्। मन्व
मध्ये। याज्ञवल्क्यकात्यायनकण्वादिवचनानामपि। स्मृत्यर्थनिबंधनकर्तृभिः। उदाहृतत्वेमनेषां अयोग्यताभावः
। सिद्धएवभवति॥ ॥तथाचपारिजाते॥ प्रथमभागेगर्भाधानादिसंस्कारप्रकरणे॥ ॥नांदीपितृविचारे॥ नांदीमुखा
न्पितॄनावाहइष्ये। इत्येवमादिभिर्वाक्यैः प्रयोगोविधेयः। एवमेवकात्यायनीयंप्रयोगवचनम्। नांदीमुखान्पितॄ
नावाहयिष्यइतिपृच्छतीति॥ ॥तत्रैवतत्प्रकरणे॥ कात्यायनोपि॥आभ्युदयिकेप्रदक्षिणमुपचारः पूर्वाह्णइति॥ ॥त
त्रैवतत्प्रकरणे॥ एवंप्रदक्षिणावृत्तोवृद्धौनांदीमुखान्। पितॄन्। यजेतेतियाज्ञवल्क्येनवृद्धिश्राद्धेनांदीमुखसंज्ञ
कानां। पितॄणांदेवतात्वेनविधानात्। इति॥ ॥तत्रैवनवग्रहयज्ञप्रकरणे॥ ॥तत्रग्रहानाहयाज्ञवल्क्यः॥ सूर्यस्सो
मोमहीपुत्रःसोमपुत्रोबृहस्पतिः। शुक्रःशनैश्चरोराहुःकेतुश्चेतिग्रहास्मृताइत्यादि॥ ॥तत्रैवनवग्रहयज्ञदान
प्रकरणे॥ ॥दक्षिणादानविशेषमाह याज्ञवल्क्यः धेनुः शंखस्तथानड्वान्हेमवासोहयःक्रमात्॥ कृष्णागौरायसं
छागएतावैदक्षिणास्मृताः॥ इति॥ तत्रैवशिवग्रहयज्ञप्रकरणं॥ ॥तद्देवताआवाहनमंत्रेषु। तत्रायंक्रमः। आत्

नि·
राम·
१६

दोलौगाक्षिकाश्यपो। व्यासः सनत्कुमारश्च शंतनुर्जनकस्तथा॥ व्याघ्रः कात्यायनश्चैवजातूकर्ण्यः कपिंजलः। बौ
धायनश्च कणवश्च विश्वामित्रस्तथैवच। पैठीनसिर्गोभिलश्चेत्युपस्मृतिविधायकाः॥ वसिष्ठोनारदश्चैव सुमंतुश्च
पितामहः। बभ्रुःकार्ष्णाजनिस्सत्यव्रतोगार्ग्यश्चदेवलः॥ जमदग्निर्भरद्वाजः पुलस्त्यः पुलहः क्रतुः। अत्रेयश्चगवे
यश्चमरीचिर्वत्सएवच॥ पारस्करोरुष्यश्रृंगोबैजावापस्तथैवच। इत्यन्न्येस्मृतिकर्तार एकविंशतिरीरिताः॥
एतैर्यानिप्रणीतानिधर्मशास्त्राणिवैपुरेति॥ ॥एतेषुअनाश्वासेदोषउच्यते॥ तान्येतानिप्रकीर्णैस्तुनहंतव्यानि
हेतुभिः॥ यस्तानिहेतुभिर्हन्यादंधेतमसिमज्जति॥ विष्णुश्च। पुराणंमानवोधर्मः सांगोवेदश्चिकित्सकं॥ आज्ञा
सिद्धानिचत्वारिनहंतव्यानिहेतुभिः॥ ॥इत्यादिधर्मशास्त्रवचनैरेव पूर्वोक्तऋषिकृतस्मृतिवचनेषु। अनाश्वासे।
अप्रामाण्यापादने॥ अंधतमः प्रवेशादिदोषप्रतिपादनात्॥ याज्ञवल्क्यकण्वकात्यायनपारस्करादि प्रथम
शाखाप्रविष्टऋषिवचनेष्वपि॥ अनाश्वासेकृतेदोषश्रवणेसति। तत्कर्तॄणां। याज्ञवल्क्यादीनांब्रह्मविद्व रि
ष्ठानांदूषणे अनाप्तत्वशापादिनानीचत्वारोपणे च। तद्दूषणकर्तॄणांमहान् दोषइतिकिमुवक्तव्यम्॥ तथाच

ब्र·मा

४५७

याज्ञवल्क्यादिवाक्यानांप्रमाणत्वेननिश्चितत्वात्तद्वक्तॄणामयोग्यतानास्तीतिदृढीकृतंभवति॥ एवंनृसिंह
पारिजाताख्यप्रयोगपारिजातेपि। तत्रतत्रउदाहरणस्थलेमनुवसिष्ठपराशरव्यासापस्तंबगौतमबोधायनादि
स्मृतिसूत्रादिवाक्योदाहरणपङ्क्तौ।याज्ञवल्क्यकण्वकात्यायनमेधातिथिपारस्करादिप्रथमशाखाप्रविष्टऋषी
णाम्। स्मृतिसूत्रवचनानामपि॥ प्रमाणत्वेनउदाहृतत्वात्। तेषांअयोग्यतानास्तीतिनिश्चीयतएव॥ ॥तथाहि
॥पारिजातेप्रथमभागेगर्भाधानादिसंस्कारप्रस्तावे। स्मृतिरूपधर्मशास्त्रस्यप्रथमविचारणीयत्वेन मूलस्मृति
कर्तृगणनायाम्। याज्ञवल्क्यस्ययोगीश्वरशब्देनप्रतिपादितत्वात्॥कंण्वकात्यायनपारस्करादीनाव्यासबो
धायनादिउपस्मृतिकर्तृकोटौ।प्रविष्टत्वेन।एतेषां।याज्ञवल्क्यकण्वकात्यायनपारस्करादीनामपिस्मृतिकर्तृ
त्वेननिबंधनकारैरपि।गृहीतत्वंप्रतीयते॥ ॥तथाचमूलस्मृतिकर्तारः॥ मनुर्बृहस्पतिर्दक्षोगौतमोथयमोंगि
राः॥योगीश्वरःप्रचेताश्चशातातपपराशरौ।संवर्तोशनसौशंखलिखितावत्रिरेवच॥ विष्ण्वापस्तंबहारीताध
र्मशास्त्रप्रवर्तकाः॥एतेह्यष्टादशप्रोक्तामुनयोनियतव्रताइति॥ मूलस्मृतिकर्तारः॥जाबालीनाचिकेतश्चस्कं

राम

१५

ल्बिषादिति॥ ॥तत्रैवतत्सपाठकेतदध्यायेअभक्ष्य भक्षणप्रायश्चित्तेभोजयितुः द्विगुणंदंडइतिकात्यायनोक्त
त्वात्॥ ॥कात्यायनस्यापिस्मृतिकर्तृत्वेनतद्वाक्यस्यापिमहाप्रामाण्यंसिद्धमितिकृत्वातस्यापिशापत्तत्प्रयुक्ता
योग्यताभावश्चसिद्धएवभवति॥ एवमेवकण्वकात्यायनयाज्ञवल्क्यादीनांवचनान्यपिमनुवसिष्ठपराशरा
दिवाक्यानामिवतत्सहचर्येणैवप्रमाणत्वेनगृह्यधर्मसूत्रभाष्यादिकारैःप्रसिद्धसर्वानुष्ठापकग्रंथेषु। मुख्यतयाप्र
माणत्वेनस्वीकृतत्वात्। याज्ञवल्क्यादीनांशापग्रस्तत्वंतत्प्रयुक्तनिंद्यत्वं। तत्प्रयुक्तायोग्यतावत्वंचनसंभवतीति
॥आपंडितगोपालैः॥ मनुष्यमात्रसर्वजनैश्चस्पष्टतयाज्ञायतएव॥ अन्यथा। तेषांशापग्रस्तत्वेनायोग्यतावत्वे
धर्मसूत्रभाष्यकारैः तेषांवचनानांप्रमाणत्वेनकथंगृह्येत। विद्यारण्यकालात्। पूर्वभाष्यकारश्रीमच्छंकरभ
गवत्पादाचार्यकालादपिपूर्वकालीनद्विसहस्रसंवत्सरात्प्राक्॥ ॥ कृतमस्करीयरूपभाष्येपि॥ ॥
॥ ॥ तत्पूर्वकालीनभाष्यकारवचनेष्वपि॥ ॥याज्ञवल्क्य कण्वकात्यायनादिवचनानांप्रमा-
णत्वेनउदाहृतस्यापि मस्करीयकारेणस्वग्रन्थेउदाहृतत्वात्॥ ॥ ॥ ॥ अनादिकालमारभ्य

गएवच ॥ अस्पृश्याःपतिता ह्येते श्वापचरितस्समंइति ॥ तत्रैव तत्सपाठके तदध्याये शूद्रदारगर्भोत्पत्तिप्राय
श्चित्ते ॥ कण्ववचनात् ॥ शूद्रदारानगतो विप्रो ह्यतिकृच्छ्रं समाचरेदिति ॥ तत्रैव तत्सपाठकेत्र यो विंशोध्याये मू
त्रादिप्राशनप्रायश्चित्ते तथाह कण्वः ॥ ततो मूत्रपरीषाणां प्राशने मतिपूर्वके ॥ नाश्नीयात्र्यहं मत्यात स कृच्छ्रं च
रेद्द्विजइति ॥ तत्रैव तत्सपाठके तदध्याये गुरुतल्पगमनप्रायश्चित्ते ॥ यथाह कण्वः ॥ मत्यागत्वा पुनर्भार्यां गुरोस्तत्र
सुतां द्विजः ॥ वृषणावर्जितं लिंगमुत्कृत्यच मृतःशुचिरिति ॥ तत्रैव तत्सपाठके तदध्याये ब्रह्मचार्यवकीर्णिप्रायश्चि॰
त्ते ॥ यथाह कण्वः ॥ प्रथँदिवसे त्रिरात्रावेव ॥ अवकीर्णी गर्दभेनानुयाजेत ॥ स वंयथाभ्यासं सोब्दे नैकेन सुध्यतीति ॥
तत्रैव तत्सपाठके तदध्याये बुद्धिपूर्वकरेतोत्सर्गप्रायश्चित्ते ॥ यतीनां वनस्थानां च प्रयत्नाद्रेतोत्सर्गे कण्वोक्तं द्रष्ट॰
व्यं ॥ यत्नोत्सर्गं गृहीकृत्वा वारुणीभिरुपस्पृशेत् ॥ वानप्रस्थो यतिश्चैव चरेच्चांद्रायणं व्रतं ॥ गृह्यमंत्रैस्त्रिराचामेत
भूर्भुवस्वरितित्रिभिः ॥ यतिर्वनस्थश्च जपेत् पुनर्मामितिषोडशेति ॥ तत्रैव तत्सपाठके तदध्याये पुरुषमैथुनप्राय
श्चित्ते ॥ कण्वोक्तं द्रष्टव्यम् ॥ ॥ पुंसि मैथुनमासेव्य वानप्रस्थो यतिस्तथा ॥ कृच्छ्रं चांद्रायणं चैव कृत्वा शुध्यत कि॰

इत्यनेनापि तद्वाक्यस्य प्रामाण्यमायातं। तत्रैव तत्प्रपाठके तदध्याये। ब्राह्मणस्य अवमति ताडन रक्तोत्पादना
दि प्रायश्चित्त प्रकरणे यथाह कण्वः। अवगूर्य्य चरेत्कृच्छ्र मति कृच्छ्रं निपातने कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्योत्पा
द्य शोणितमिति॥ इत्यनेनाप्ययोग्यत्वाभावोनुमीयते॥ तत्रैव तत्प्रपाठके। द्वाविंशोध्याये॥ ॥ ब्रह्महत्या प्राय
श्चित्त प्रकरणे॥ यथाह कण्वः॥ पवित्रपाणिर्दंडी च पंकदंतो रजस्वलः॥ तीर्थवादी कुशाच्छादि जेटिलो ब्रह्म
हा भवेदिति॥ ॥ तत्रैव तत्प्रपाठके तदध्याये॥ ॥ मंडूकादि अस्थिमत्क्षुद्रप्राणि हनन प्रायश्चित्ते॥ यथाह कण्वः
॥ हनने स्थिमतां दद्यान्मत्या काकनिकां नरः॥ अबुध्यातु ततस्तेषां प्राणायामान्षडाचरेत्॥ तत्रैव तत्प्रपाठके तद
ध्याये व्यभिचारिणी हनन प्रायश्चित्ते॥ यथाह कण्वः॥ वृत्तस्थायाः स्त्रियाः सर्वं। प्रायश्चित्तं विधीयते। मतिपूर्वं प्र
वृत्ताया अर्धहीनं भवेत्तु तदिति॥ तत्रैव तत्प्रपाठके तदध्याये॥ वेश्यागमनेन प्रजोत्पादन प्रायश्चित्ते॥ कण्वोक्तं
द्रष्टव्यं॥ यथाह प्रसूतो यस्तु वेश्यायां भैक्षभुग्नियतेंद्रियः। शतसाहस्रमभ्यस्य सावित्रीमेति शुद्धतामिति॥ ॥
तत्रैव तत्प्रपाठके तदध्याये ब्रह्महादि पतितानामस्पृश्यत्व विचारे॥ यथाह कण्वः॥ ब्रह्महा मद्यपः स्तेनो गुरुतल्प

यातपसावापिपात्रता। यत्रवृत्तमिमेचोभेतद्धिपात्रंप्रचक्षतइति॥ तत्रैवतृतीयप्रपाठके॥ विंशत्संख्याकाध्या
ये॥ अन्त्यावसायिसहवासप्रायश्चित्तप्रकरणे॥ ॥यथाहकण्वः॥चाक्रिकः पुल्कसोजंभः खरजीवीप्रदीपि
कः॥एतेशूद्रसमाअस्पृश्याः परिकीर्तिताइति॥ तत्रैवतृतीयपाठकेएकविंशाध्यायेपतितसंसर्गप्रायश्चित्त
प्रकरणे॥ तथाचकण्वः॥संवत्सरेणपततिपतितेनसमाचरन्। यानासनैश्चशयनैरित्याहुर्ब्रह्मवादिनइति॥ ॥
तत्रैवतत्प्रपाठकेतदध्यायेतत्प्रकरणे॥ ॥तद्धयाज्ञवल्क्यः॥ याजनंयोनिसंबंधंस्वाध्यायंसहभोजनम्॥कृत्वा
सद्यःपतत्येवपतितेनसमाचरन्निति॥ तत्रैवतत्प्रपाठकेतदध्यायेतत्प्रकरणे॥ याज्ञवल्क्यः॥ यश्चान्नंयोनि
संबंधंस्वाध्यायंसहभोजनं। कृत्वासद्यःपतत्येवपतितेनसमाचरन्निति॥ इत्यनेनापितद्वाक्यस्यप्रामाण्यद्वारा
योग्यताभावोनुमीयते॥ तत्रैवतत्प्रपाठकेतदध्यायेतत्प्रकरणे॥ ॥यथाहकण्वः॥एकमध्ययनंकुर्यात् प्राजाप
त्यमथापिवा॥ दद्यात्कोशसहस्रंवागवामष्टंविचक्षणइति॥ ॥तत्रैवतत्प्रपाठकेतदध्यायेतत्प्रकरणे॥ बुद्धिपूर्वेतु
कण्वोक्तंद्रष्टव्यम्॥ पतितेनतु। संसर्गस्त्वभिसंधिकृतोयदि॥ कृत्वालब्धंसमुत्सर्गंचरेच्चांद्रायणंव्रतमिति॥ ॥

त्तिपरिवेदनप्रकरणे॥ ॥तथाचकण्वः॥ व्यसनासक्तचित्तोयोनास्तिकोवाभवेद्यदि। कनीयसोवृत्तवतोनदोषःपरिवे
दन इत्यादिवाक्यस्यापिप्रामाण्यं॥ ॥तत्रैवतत्प्रपाठके॥ षोडशखंडाध्यायेअनध्ययनप्रकरणे॥ ॥तथाचकण्वः॥
विद्युद्दर्शनेनाधीयीत। मूत्रितउच्चारितः। यावन्मूत्रोच्चारोत्पद्येत। अनुत्सर्गेप्यनध्यायतीत्येतद्वचनस्यप्रामाण्यं॥ ॥
तत्रैव। द्वितीयप्रपाठके। सप्तदशाध्यायखंडे॥ मांसभक्षप्रकरणे॥ तथाचवसिष्ठः॥ ॥भक्ष्यौतुधेन्वनडुहौवाजसने
यिकेविज्ञायतेतितत्रातिथिरूपेणागतस्य। धेन्वनडुहौभक्ष्यौ। इतरेषामभक्ष्यादितिद्रष्टव्यमिति॥ शतपथब्राह्मण
वाक्यस्यापिवेदत्वविशेषात्। महाप्रामाण्यंसिद्धमेवभवति॥ ॥तत्रैवप्रायश्चित्तखंडे। तृतीयप्रपाठके॥ एकोनविं
शतिखंडाध्यायेप्रायश्चित्तप्रकरणे॥ ॥यथाहकण्वः॥ ॥ब्राह्मणःक्षत्रियोवापि। वैश्यश्चापितथैवच॥ सुरा
यागंधमाघ्रायचरेत्सांतपनंव्रतमिति॥ तत्रैवतत्प्रपाठके। तदध्यायेमूत्रादिप्राशनप्रायश्चित्तप्रकरणे॥ यथा
हकण्वः॥ रेतोमूत्रपुरीषाणांप्राशनेमतिपूर्वके। नाश्नीयाच्चअहंमत्स्यौतत्सतकृच्छ्रंचरेद्द्विजइति॥ तत्रैवतत्पाठकेप्रा
यश्चित्तकाण्डेतदध्यायेप्रायश्चित्तार्थंजपतपोहोमदानविधानप्रकरणे॥ तथाचयाज्ञवल्क्यः॥ नविद्ययाकेवल

तत्रैवद्वितीयप्रपाठकेचतुर्दशसंख्याकखंडाध्याये आशौचप्रकरणे॥ ॥एकादशरात्रेणेतिगौतमः।पंचरात्रेणे
तिवसिष्ठः।द्वादशरात्रेणेतियाज्ञवल्क्यः। षोडशरात्रेणेतिपराशरः॥इत्यनेनवाक्येनगौतमवसिष्ठपराशरपं
क्तौयाज्ञवल्क्यस्यापिस्मृतिकर्तृत्वेनतद्वाक्यस्यप्रमाणत्वेनगृहीतत्वात्॥तस्यायोग्यताभावस्पष्टएव॥ ॥वा
जसनेयिशाखाप्रविष्ठस्यपारस्करस्यापिउपस्मृतिकर्तृत्वेनतद्वाक्यस्यापिप्रमाणत्वेनमस्करीयामपिउदाह
रणंदृश्यते॥ तथाचपारस्करः॥आचार्यादाचारमाचिनोतीति॥ तत्रैवद्वितीयप्रपाठकेपंचदशसंख्याकखंडा
ध्यायेश्राद्धप्रकरणे॥ ॥यथाहकात्यायनः॥ अथैकोद्दिष्टमेकोद्विजः एकपात्रमेकार्घ्यमेकः।पिंडोनावाहनं॥ना
ग्नौकरणमिति॥ तदाशौचानन्तरमारभ्यसपिंडीकरणात्कार्क्तव्यमिति॥ कात्यायनवचनस्यापिस्मृतित्वेनप्रमा
णत्वेनगृहीतत्वात्।तस्यायोग्यताभावः।सिद्धएव॥ ॥तत्रैवद्वितीयप्रपाठकेपंचदशसंख्याकखंडाध्यायेस्त्री
धनस्यभर्त्रेधिकारभावप्रकरणे॥ ॥स्त्रीधनस्येशनीस्त्रीस्यादतश्चतदनुज्ञयाभोक्तुंपालयितुंयोग्यंभर्तुर्नाश
यितुंनचेतिकण्ववचनादिति॥ ॥कण्ववचनस्यापिप्रामाण्यंदृश्यते॥ ॥तत्रैवतत्प्रपाठकेतदध्यायेपरिवि

नि

सवेदपारगोभवतीति॥ ॥एतेनापिकण्वस्यायोग्यताभावेनतद्वचनस्यस्मृतिरूपत्वेनप्रामाण्यग्रहात्। मस्क
रीपकारेण। गृहीतमितिहेतोः कण्वस्य। शापप्रयुक्तायोग्यताभावोनिश्चितोभवति॥ ॥तत्रैवप्रथमप्रपाठ
के।आचारकांडेनवमाध्यायात्मकखंडे॥ ॥समावर्तनानंतरविवाहकालावधिप्रकरणे॥ स्नातोब्दत्रयंनतिष्ठे
दितिकण्ववचनाच्च इत्यनेनापि। कण्वप्रणीतस्मृतेः प्रामाण्यांगीकारद्वारेणतस्यायोग्यताभावःसिद्धः॥ ॥
तत्रैवद्वितीयप्रपाठकेदशमखंडात्मकदशमाध्याये॥ ॥श्राद्धविभागप्रकरणे॥ ॥ यथाहकण्वः॥ नित्यंनैमि
त्तिकंकाम्यंवृद्धिश्राद्धमथापरं। पार्वणंचेतिविज्ञेयंश्राद्धंपंचविधंस्मृतमिति ॥इत्यनेनापि॥अयोग्यताभावः॥
तत्रैवद्वितीयप्रपाठकेएकादशखंडात्मकएकादशाध्याये॥ व्यवहारकांडेराजधर्मे॥ ज्योतिष्यशाकुनगुरुवा
क्यादीनांआदरणीयत्वप्रस्तावे॥ तथाचकण्वः॥ पूर्वजन्मकृतंकर्मदैवमित्यभिधीयते॥ एकजन्मकृतंयत्तुपौ
रुषकारमिहोच्यत इति॥अनेनापिअयोग्यताभावः॥तत्रैवद्वितीयप्रपाठकेएकादशसंख्याकखंडाध्यायेरा
जधर्मेश्रोत्रियस्वापहारदंडप्रकरणे॥ ॥श्रोत्रियस्वहरणेद्विगुणमितिकण्ववचनादित्यनेनाप्ययोग्यताभावः॥ ॥

अतोऽपि तेषां याज्ञवल्क्यकात्यायनकण्वादीनां नच्छारिविब्राह्मणानां च अयोग्यताभावः सिद्धो भवति॥ ॥ नि॰
एवमेव॥ ॥ गौतमधर्मसूत्रस्य मस्करीयभाष्ये स्मृतिकर्तृसंख्याप्रकरणे॥ स्मृतिरूपनिबंधनं। मनुमपवसि
ष्ठभृग्वंगिरोबृहस्पत्युशनोभारद्वाजगौतमापस्तंबसंवर्तव्यासशातातपशंखलिखितबोधायनयाज्ञवल्क्य
प्रचेतादिभिः कृतम्॥ स्मृतिरूपनिबंधनं प्रमाणमित्यभिप्रायेण दर्शितं। तत्कोटौ याज्ञवल्क्यस्य प्रविष्टत्वात्
॥शापग्रस्तत्वेनायोग्यताभावो अनुमीयते॥ ॥ तत्रैव गृहस्थाश्रमप्रकरणे दारग्रहणप्रस्तावे॥ नार्यो विजनि
ष्यमाणाः पतिभिः सह शयीरन्निति। वाजसनेयश्रुतिदर्शनादितिपरमप्रमाणत्वेन उदाहृतत्वात्॥ तच्छाखा
श्रुतेरपि वेदत्वं सिद्धं भवति॥ तत्रैव प्रथमप्रपाठके॥ चतुर्थाध्यायरूपचतुर्थखंडे॥ ॥नित्यपितृतर्पणवैश्वदेव
तर्पणादिविचारप्रस्तावे॥ ॥ तत्र कात्यायनो विषयविभागमाह॥ देवानां च पितॄणां च जले दद्याज्जलांजलिम्॥
असंस्कृतप्रमीतानां स्थले दद्याज्जलांजलिमिति॥ तत्रैव प्रथमप्रपाठके। चतुर्थाध्यायरूपचतुर्थखंडे॥ दानप्रकरण
रणे॥ अनंतं वेदपारगाय दत्तं। वेदपारगशब्देन सांगवेदाध्याय्युच्यते॥ यथाह॥ कण्वः। येन सांगो वेदोऽधीतः॥

एतयोः विवादविषयेउपसाक्षित्वेन याज्ञवल्क्यादि माहात्म्योपष्टंभकत्वेनचमन्वादिस्मृतिआपस्तंबादिसूत्रमा
धवीयोज्वलामस्कर्यादिव्याख्यानभाष्यनिबंधनादिषु। याज्ञवल्क्यादिवाक्यप्रामाण्यं। प्रदर्शयिष्यते तथाहि। श्री
मद्ब्रह्मसूत्रभाष्यकृता। शंकरभगवत्पादाचार्येण। भारतसनत्सुजातीयब्रह्मोपदेशप्रकरणभाष्ये। उदाहृतयाज्ञ
वल्क्यस्मृतिवचनम्॥ ॥कोसौनियुङ्क्ते तमजपुराणं सचेदिदं सर्वमनुक्रमेण। किंवास्यकार्यमथवासुखंच त
न्मेविद्वन्ब्रूहिसर्वंयथावत्। इति श्लोकेयथावदितिवाक्यविवरणस्थलेतद्भाष्यम्। यद्येवंसकथंब्रह्मन् पाप
योनिषुजायते। ईश्वरस्यकथंभावेरनिष्टेसंप्रयुज्यते। इतियाज्ञवल्क्यस्मृतिवचनस्यशंकराचार्येणप्रमाण-
त्वेनोदाहृत त्वात्। याज्ञवल्क्यस्यअयोग्यताभावः। सिद्धोभवति। एवमेव। याज्ञवल्क्यशिष्यस्य। वाजसने
यिशाखिनः। तद्ब्रह्मसूत्रकर्तुः अष्टादशस्मृत्यंतर्गतमूलस्मृतिकर्तुः कात्यायनस्यापि। व्याकरणमूलभूत
पाणिनीसूत्रस्य। व्याख्यारूपमहाभाष्यनामकमहाशेषकृतभाष्यस्यमूलत्वेनवार्तिककर्तृत्वं ऋग्वेदमंत्रा
णांसर्वेषांऋषिदेवताछंदोविनियोगादिनियामकअनुक्रमणिकाभाष्यकर्तृत्वंचलोकप्रसिद्धतयावर्तते॥

विंदते। अपचेता: सत्यंब्रवीमिवधइत्सतस्यनार्यमणंपुष्यतिनोसखायंकेवलाघोभवति। केवलादीति। आचमन
व्यपेतंयदर्धभुक्तमाचम्यपुनस्तदेवभुङ्क्ते। उत्थानव्यपेतं। यदर्धभुक्तमोत्थायभुङ्क्ते। एतत्त्रिविधमप्यभोज्यम्।
आचमनोत्थानव्यपेतौमिति। वक्तव्येबहुवचनमेकपङ्क्तावन्यतरेणाचमने उत्थाने अन्यतरस्याभोज्यमिति॥ ॥
एवंदुरान्नस्यभोजननिषेध: कथंचित्। तद्भोजने कृतेतत्प्रायश्चित्तंचप्रतिपादितंतयो: भोजननिषेधतद्भोजनप्राय
श्चित्तप्रतिपादनप्रकरणेषु। धर्मशास्त्रेषु। यत्रकुत्रचिद्वाजसनेयिब्राह्मणस्पृष्टान्नभोजननिषेध:। तदन्नभोजनप्रा
यश्चित्तंवानप्रतिपादितं। अतोपिहेतो: तद्ब्राह्मणानांअयोग्यतानसिध्यति। प्रत्युतवाजसनेयिनां अयोग्यताविष
ये। कालिकाखंडवाक्यस्यवादित्वं आदित्यपुराणस्यप्रतिवादित्वंइतिपूर्वंप्रतिपाद्य। तयो: साक्षित्वेन महाभारत-
विष्णुपुराणभागवतादीनांसाक्षित्वेन। उदाहरणंकृतम्। उत्तरत्रस्कांदपुराणस्थकालिकाखंडांतर्गतत्वेनशापप्रति
पादकवाक्यत्वेनवादिना उदाहृतत्वात्। तस्मिन्नेवस्कांदपुराणेप्रतिपादितषट्संहितानांमध्येसौरसंहितास्व्य
चरमसंहितारूपसौरसंहितावाक्यै:॥ याज्ञवल्क्यमाहात्म्यंतच्छापप्रयुक्तअयोग्यताभावश्चप्रदर्श्यिष्यते॥

तथाचवसिष्ठः॥ गणान्नंगणिकान्नंचेति अभिशस्तदोषेणव्याख्यातः अनपदेश्यः। स्त्रीलिंगेनपुल्लिंगेनवा। अनिर्देश्यः। तृतीयप्रकृतिरित्यर्थः। दंडिकोराज्ञानिग्रहेनियुक्तः। तक्षोरथकारः। कदर्यः असभ्यभाषणरतः नाश्लीलं कीर्तयेद्यथाचशीलम्। कीर्तयेत्तं कदर्यमाहुरि। ब्राह्मणदर्शनात्। बंधनिकोगुप्तपालः चिकित्सकोवैद्योब्राह्मणः तस्माद्ब्राह्मणेनभेषजंनकार्यमिति। तैत्तिरीयाणांब्राह्मणं। तथाचवसिष्ठोपि। नायंब्राह्मणोभवति। नवणिक्कुशीलः। नशूद्रापेक्षणां। कुर्वन्नस्तेनोनचिकित्सकइति। तेनोपजीविकइत्येकेशल्यहर्तेत्यपरे। चिकित्सकस्यमृगयोः शल्यगरस्यपाशिनइतिदर्शनात्। मृगयुर्लुब्धः। सचेदनिषुचारीवागुरिकः। उच्छिष्टभोजीउच्छिष्टभोजकं। गणोजनसमुदायः। विद्विषाणः शत्रुः एषामन्नमभोज्यंअशस्तानांभोजनोपदेशात्। आपद्यप्येषामन्नमभोज्यंअपांक्तानां प्राग्दुर्वालादयः। आपांक्त्याभागुपदिष्टाः स्तेनादयस्त्यक्ताः तत्पर्यतास्तेषामकृतप्रायश्चित्तानामन्नमभोज्यंब्रह्महादीनांकृतप्रायश्चित्तानामपिनास्याास्मिन्लोकेप्रत्यापत्तिर्विद्यते। कल्मषंतुनिर्हण्यतइत्यापस्तंबवचनात्। वृथान्नाचमनोयानव्यपेतानि। रथान्नंयदतिथ्याद्यनुद्देश्यं। आत्मार्थंपच्यतेतथा। बहुचानामृक्। मोघमन्नं

प्रा॰

प्र॰शा॰
४५१

कन्याविवाहे यस्य वृषली जीवति इतरा मृताः स वृषलीपतिः स श्रोत्रियोप्यभोज्यान्न इति॥ ॥मत्तउन्मत्तौ बद्धोणि-
कः प्रत्युपविष्टो यश्च प्रत्युपवेशयते तावंतं कालं मत्तः मदकरद्रव्यसेवया विकृतिं गतः॥ उन्मत्तो भ्रांतः। बद्धो नि-
गलितः अणिकः पुत्राभृतया हि पुत्राचार्ये इति शास्त्रे निंदितः प्रत्युपविष्टः ऋणादिकारणेन धर्मादिकं निरुध्य तत्-
त्पार्श्वे उपविष्टः। इतरस्तस्य परिहारमकुर्वन् तेन सहासीनः। प्रत्युपवेशिता एते मत्तादयः तावंतं कालमभोज्या-
न्नाः यावन्मत्ताद्यनुवृत्तिः। अपर आह। अणिकः ऋणिकः ऋणस्य दाता प्रत्युपवेष्टुरिदं विशेषणमिति॥ ॥
क अस्यान्नः ये ह्येते अभोज्यान्नाः कस्तर्ह्याश्यान्नः कस्य तर्ह्यशनीयमन्नमिति यद्यप्येते अभोज्यान्ना इत्यु-
क्ते परिशिष्टा भोज्यान्ना इति गम्यते॥ ॥तस्माद्धुतस्त्रियोमधुनाश्नंतीति संसर्गदुष्टं चोक्त्वा सांप्रतमाश्रयदु-
ष्टमाह। उत्सृष्टपुंश्चल्यभिशस्तानपदेश्यादंडिकतक्षककदर्यकबंधनिकचिकित्सकमृगयुवणिगिषुका-
र्युच्छिष्टभोजीगणविद्विषामवत्सानी उत्सृष्टमस्वामिकं। पुंश्चली व्यभिचारिणी। अनेनैव गणिका चार्थसिद्धा॥

नि॰

राम॰
९

न्यादेशोक्तेशेषाद्ब्राह्मणाभुंजीरन्निति ब्राह्मण्यं भवति। ब्राह्मणग्रहणं प्रीत्युपलब्धितः। प्रवृत्तेरपस्कृतितामा
भूदिति प्रत्यक्षमेवात्र ब्राह्मणमिति। क्लीवः षंडकः सोप्यभोज्यान्नः। राज्ञां प्रेष्यकरः राज्ञामिति बहुवचनात्।
ग्रामादेर्यः प्रेषकरः तस्यापि प्रतिषेधः। अहविर्याजियश्चाहविषा नररुधिरादिना यजते भिचारादौ यथा यमभि
चरेत्तस्य लोहितमवधानं कृत्वेति सोप्यभोज्यान्नः॥ ॥चारी॥ चारो वृत्त्याचारः स्पर्शः सोप्यभोज्यान्नः॥ ॥
अविधिना च प्रव्रजितः ये चाविधिना प्रव्रजिताः शाक्यादयः तेप्यभोज्यान्नाः॥ ॥यश्चाग्निं न पास्यति। यः अना
पद्यग्निं त्यक्तकामा यश्चित्तं नाचरति सोप्यभोज्यान्नः। अपिच। अविधिनेत्येव यश्चाविधिनोत्सर्गेष्ट्याविनाग्नी न
पास्यति सोप्यभोज्यान्नः॥ यश्च सर्वान्नं वर्जयते सर्वान्नी च श्रोत्रियो निराकृति वृषलीपतिः। यश्च सर्वान्नं वर्जयते।
भोजनेन कंचित्। भुंक्ते न कश्चित्। भोजयति यश्च सर्वान्नी सर्वेषामन्नं भुंक्ते तावप्यभोज्यान्नौ श्रोत्रियइत्युभयोः
शेषः॥ ॥श्रोत्रियोपि सन्न भोज्य एवेति निराकृतिः अस्वाध्यायः अव्रत इत्यन्ये सोप्यभोज्यान्नः वृषलीपतिः।

नामन्नेन भोज्यं। येच शस्त्रमाजीवंतियेचशस्त्रेणजीवंतितेषामप्यन्नमभोज्यम्। क्षत्रियवर्जं। येचाधिंआजीवं
तीत्यवेक्षतेस्वगृहेपरान्वासयित्वातेभ्योभृतिग्रहणमाधिः यस्तेवाइति॥ प्रसिद्धः। भूमौकुटिंकृत्वास्तोमं दत्वा
सेत्तुयइतितथ्याधिंयेआजीवंति। तेषामप्यभोज्यमिति। येतुप्रसिद्धमाधिमाजीवंतितेषांवार्धुषिकत्वादेवसि
द्धोदोषः। भिषक् अभोज्यान्न इतिप्रकरणाद्गम्यते॥ भिषग्भैषज्यवृत्तिः॥ धर्मार्थेतुयेसर्वदृष्टादींश्चिकित्संति
तेभोज्यान्नाः वार्धुषिकः। वृध्याजीवीसोप्यभोज्यान्नः। दीक्षितोक्रीडराजकः। दीक्षिनोदीक्षिणीयेष्ट्यांसंस्मृतः
सोपियावत्क्रीडराजकोनभवति॥ सोयमक्रयंकरोति तावत्। अभोज्यान्नः। अग्नीषोमीयसंस्थायामेवभोक्त
व्यमितिवक्ष्यमाणमपेक्षते। अग्निषोमीयेपशौसंस्थिते। समाप्तेएवभोक्तव्यं। नप्रागितिपक्षांतरं। हुतायांवाव
पायांदीक्षितस्यभोक्तव्य अग्निषोमीयस्यवपायांहुतायांवादीक्षितस्यभोक्तव्यम्। तथाचबह्वृचब्राह्मणं। राम
अशितव्यंवपायांहुतायामितिपक्षांतरमाह। यज्ञार्थेवानिर्दिष्टेशेषाद्भुंजीरंनिनिहिब्राह्मणांइदंयत्तार्थमिति

होत्रे वैश्वदेवाद्यकरणप्रायश्चित्तं उक्त्वा। तदनुरूपं नित्यमाभ्युदयिकं वा कर्म सेवते। तात्पर्येण करोति। न करोति प्रायश्चित्तवत्।
आत्मनि चोदितं प्रायश्चित्तं न तस्मात्कारणाद् भोज्यमिति। चरितनिर्वेषस्य भोक्तव्यम्। चरितो निर्वेषः प्रायश्चित्तं ये
न तस्यान्नं भोक्तव्यं। तद्भोजनेन न दोषः। निष्ठाभूत — कालस्याभिधानात्। चर्यमाणेपि निर्वेषेन भोज्यं किं तर्हि
चरिते। सर्ववर्णानां स्वधर्मे। वर्तमानानां भोक्तव्यम्। शूद्रवर्जमित्येके। शूद्रवर्जितानां स्वधर्मे वर्तमानानां सर्वेषां व-
र्णानां भोज्यम्। न ब्राह्मणस्येत्येके मन्यंते। तस्यापि धर्मोपन — तस्यापि शूद्रस्यान्नं भोज्यं। यदि असौ धर्मार्थमुपनत आ-
श्रितो भवति। धर्मग्रहणादर्थार्थमुपनतस्य न भोज्यं। आपत्कल्पश्चायं। अत्र गुणविधिः सुवर्णं दत्वा पशुं वा भुं-
जीत नात्यंतमन्ववस्येद्वृत्तिं प्राप्य विरमेत्। द्रुस्न्वयविधिः। संघान्नमभोज्यम्। संघो गणः। तस्य यत्। स्वमन्नं न
त्वेकस्य तदभोज्यं। यद्यपि तत्सर्वे दद्युः। परिक्रुष्टं च भोक्तुकामा आगच्छतेत्येवं। परिक्रुश्य सर्वत आहूय यद्दीयते तेन तत्प-
रिक्रुष्टं। तदभोज्यं। सर्वेषां च शिल्पाजीवानां चित्रकर्म चित्रनिर्माणादिकं शिल्पं ये आजीवंति तेषां। सर्वेषामपि। ब्राह्मणा

मांसादने त्रिरात्रमुपवसेदिति॥ ॥ तत्र त्रिरात्रोपवासो कामकृतसकृद्भोजनविषयम्। तस्मिन्नेव विषये मूलु
वचनोक्तब्रह्मकूर्चमशक्तं प्रति वेदितव्यं॥ ॥ सप्तरात्रपयोव्रतमकामकृताभ्यासविषयं शंकितप्रतिषिद्धान्न
योः हारीत आह॥ मृतसूतकशूद्रान्नं सदोषेनापि संस्कृतं। शंकितं प्रतिषिद्धान्नं विद्विषोन्नमथापि वा॥ यदि भुं
जीत विप्रोयः प्रायश्चित्तं ध्रुवं भवेत्। एकरात्रोपवासश्च गायत्र्यष्टशतं भवेत्। प्राशयेत्पंचभिर्मंत्रैः पंचगव्यं पृथ
क् पृथक्॥ एतेन शुध्यते विप्रो ह्यन्यैश्चाभोज्यभोजनैरिति। एतच्च ब्रह्मकूर्चव्याख्येयं। पूर्वोच्छिष्टे तु ब्रह्मकूर्च
समानं। व्रतं स्मृत्यंतरे दर्शितं। स्वमुच्छिष्टं तु यो भुंक्ते यो भुंक्ते मुक्तभाजने। एवं वैवस्वतः प्राह भुक्त्वा सांतपनं चरेदिति। आपस्तंब
धर्मसूत्रभाष्य उज्वलायां। एवमापदि वृत्तिमुक्त्वा सुभिक्षेणापदि वृत्तिमाह। त्रयाणां वर्णानां क्षत्रियप्रभृतीनां समावृत्तेन
न भोक्तव्यं। समावृत्तो हि द्विजातिः क्षत्र्यादीनां त्रयाणां वर्णानां न भुंजीत। प्रकृत्या ब्राह्मणस्य भोक्तव्यं कारणाद्भोज्यं। ब्राह्मण

स्यैतन्न प्रकृत्या स्वभावेनैव भोक्तव्यं। कारणादेतत्स्वभोज्यं कारणमाह। यत्र प्रायश्चित्तं कर्मशेषवत्ते प्रायश्चित्तवृत्तित्रयपरा॥

णंचरेत्।एतेषांब्राह्मणोदत्त्वाभुक्त्वाकृत्वाप्रतिग्रहं।प्राजापत्येनशुध्येततस्मात्पापान्नसंशयइति।तत्रचांद्रायणं
पूर्वोक्तचांद्रायणेनसमानविषयम्।प्राजापत्यंतुतस्मिन्नेवविषयेवेदविदंप्रत्यवगंतव्यं।ब्राह्मणइतिविशेषाभि
धानात्।यच्चोक्तमंगिरसाअभोज्यानांतुसर्वेषांभुक्त्वाचान्नमुपस्कृतम्।अन्त्यावसायिनांभुक्त्वापादकृच्छ्रे
णशुध्यतीति।विष्णुरपि।स्तेनगायकान्नानिभुक्त्वासप्तरात्रंपयसावर्तेत।तक्षान्नंचर्मकारकृतंचवार्धुषिकक
दर्यदीक्षितबंधनिगलाभिशस्तषंडानांपुंश्चलीडांभिकचिकित्सक–लुब्धकक्रूरोच्छिष्टभोजिनांचअवीरास्त्री
स्वर्णकारसपत्नपतितानांचापिपिशुनानृतवादिधर्मसोमविक्रयिणांचशैलूषतुन्नवायकृतघ्ननिषादरजका
नांचचर्मकारनिषादरंगावतारवेदशास्त्रविक्रयिणांचध्वजीवीशौंडिकतैलिकचेलनिर्णेजकानांचरजस्वलास
ह्योपपतिवेश्मनांच भ्रूणघ्नवेक्षितमुदक्यासंस्पृष्टत्वंचपतत्रिणावलीढंशुनासंस्पृष्टंगोघ्रातंचकामतः पादस्पृष्ट
मवक्षुतंचमत्तक्रुद्धातुराणांचअनर्चितवृथामांसंचपाठीनरोहितंचराजितसिंहकुंडंचसशुल्कवर्जंसर्वमत्स्य

रचित्रवृत्तिघोषकतंतुवायरंगावतारमानकूटशौंडिकवधजीविनाराशंस्यात्मविक्रयिवार्धुषिकश्यावक
भटवृत्तिव्रात्यतस्करगणान्नभोजनेष्वतिकृच्छ्रं समाचरेदिति। एतदुभयमेव चांद्रायणं कर्तुमशक्तं प्रतिवे
दितव्यं॥ यत्तु बृहस्पतिना दर्शितं गांधर्वो लोहकारश्च सौनिकस्तंतुवायकः। चक्रोपजीवी रजकः कितवस्त
रसस्तथा॥ यजमानोपजीवी च शूद्राध्यापकयाजकौ। कुलटाश्चित्रकर्मा च। वार्धुषिश्चर्मविक्रयी। समार्घं प
ण्यमाहृत्य महार्घं यः प्रयच्छति। स वै वार्धुषिको नाम यश्च वृध्योपयोजयेत्॥ व्रतानामाश्रमाणां च भेदकः
पुण्यविक्रयी। विक्रयी ब्राह्मणो यश्च योनिसांकरिकश्च यः॥ रंगोपजीवि कूटाशः कुहको गुरुगुप्तिकः। भिन्न
कूरजिकश्चैव वस्त्रूपाजीवी च सूचकः। सौनिको वर्णिकश्चैव निषादेन समाः स्मृताः। कर्मणा तेषु यो मोहाद्ब्राह्म
णो वर्ततेसदा। प्रायश्चित्तेतु चरिते परिहार्यो भवेद्द्विः एते ब्राह्मणचंडालाः सर्वे ब्रह्महणः किल। तस्माद्दैवे च राम
पित्र्ये च वर्जितास्तत्त्वदर्शिभिः। एतेषामेव सर्वेषां प्रत्यासत्त्यस्तु मृग्यतां। भैक्षान्नमुपभुंजानो द्विजश्चांद्राय
ह

लैंगिकषंडबंधकगणगणिकान्नानिच। भोज्यान्नानि सैनिककव्यादनिषादबुरुडचर्मकाराअभोज्यान्नाअ
तिग्राह्यास्च। अशनप्रतिग्रहयोश्चांद्रायणं चरेदिति। तत्काम कृताभ्यासविषयं। यच्चशंखेनोक्तं। शूद्रान्नंब्राह्मणो
भुक्त्वा तथारंगावतारिणां। चिकित्सकस्य क्रूरस्य तथा स्त्रीमृगजीविनः॥ षंडस्य कुलटायाश्च तथाबंधकरस्य
णः। अभिशस्तस्य चोरस्य अवीराया स्त्रियास्तथा। चर्मकारस्य फेनस्य क्लीबस्य पतितस्य च। रुक्मकारस्य तक्ष
स्य रजकस्य च वार्धुषेः। कदर्यस्य नृशंसस्य वेश्यायाः कितवस्य च। गणान्नं भूमिपालान्नं मृगजीविश्वशतिनां।
सैनिकान्नं सूतिकान्नं भुक्त्वा मासं व्रती भवेदिति॥ तच्च पूर्वेणसमानविषयं मासव्रतस्य चांद्रायणरूपत्वात्।
यदपि बृहस्पतिनोक्तं। शौंडिकान्नं नटस्यान्नं क्लीबदंडिकयोस्तथा। दुष्टान्नमवशिष्टान्नं सोमविक्रयिणस्तथा
स्त्रयन्नं सूतिकान्नं च वार्धुषेः पतितस्य च। एतेषां ब्राह्मणो भुक्त्वा द्वादशाहं यवान्पिबेदिति। यदपि शंखलिखि
ताभ्यामुक्तं। अभिशस्तपतितरजकचाक्रिकतैलिकव्याभगाजक शूद्रसांवत्सरिक वुलिकसुवर्णकारचर्मक

प्र॰शा॰
४५७

णादिरूपास्तमसदेवतास्तोषयितुं नरबलिं संकल्प्य। मनुष्यान्मारयितुमन्नमध्ये निगूढं विषं प्रक्षिपंतीत्यस्ति
महाप्रसिद्धिः। तादृशेषु गृहेषु विषशंकासंभवाच्छंकितमन्नमित्युच्यते। तत्तु न भोक्तुं योग्यं। विषं चोपविषं भु
क्त्वा चरेच्चांद्रायणं व्रतमिति। चतुर्विंशतिमते विषभोजनादि निन्दास्मरणात्। तथा केचिच्छूद्रालवः शूद्राद
पः स्वगृहे श्रोत्रियो न भुङ्क्ते इत्यभिप्रेत्य श्रोत्रियांतरगृहे द्रव्यं दत्त्वा भोजयंति। तादृशस्य श्रोत्रियांतरस्य गृहे
सिद्धमन्नं निंद्यत्वेन शंकितम्। प्रतिषिद्धान्नं गोघ्रातादि॥ तत्र याज्ञवल्क्यः॥ गोघ्रातं शकुनोच्छिष्टसुच्छि
ष्टं पतितेक्षितं। उदक्यास्पृष्टसंघुष्टं पर्यायान्नं च वर्जयेदिति पात्रे पतितस्यान्नस्यार्धं भुक्त्वा शिष्टमन्नं कालांत
रेण भोक्तुं यदि संगृह्यते। तदा तदन्नं पूर्वोच्छिष्टमभिधीयते। तेष्वेतेषु सूतकादिषु पूर्वोच्छिष्टांतेषु। पंचसु भु
क्तेषु शूद्रान्नवद्ब्रह्मकूर्चकृच्छ्रौ वेदितव्यौ। सूतकान्ने येव वक्तव्यविशेषास्ते सर्वेप्युपरिष्टाद्दक्ष्यंते। यत्त्व भोज्या
न्नेषु मंतुनोक्तं। अभिशस्तपतितपौनर्भवपुंश्चल्यसुचिशस्त्रकारतैलिकचाक्रिकध्वजसुवर्णकारलेखक॰

नि॰
राम
५

णस्यैवमूद्रान्नमभोज्यं परिकीर्तितम्। सकृद्भुक्त्वा तदज्ञानाद्ब्रह्मकूर्चं सकृत्पिबेत्। अभ्यासे च तदभ्यस्येद्राम
मन्नमगर्हितम्। मत्या त्रिरात्रं कुर्वीत कृच्छ्रमभ्यासतश्चरेदिति॥ जाताशौचेन मृताशौचेन वा युक्तस्य पुरुषस्या
न्नस्य निंदा च मधुना दर्शिता। तक्ष्णान्नं रजकस्यान्नं चोरस्यान्नं तथैव च॥ मृतके सूतके चैव स्वर्गस्थमपि पातये
दिति नटादीन भोज्यान्न विप्राणां भोजयितुमनर्हत्वात्। तथा च। बृहस्पतिः। नटनर्तकतक्षाणश्चर्मकारस्सुव
र्णकृत्। स्थाणुपाषंडगणिका अभोज्यान्नाः प्रकीर्तिताइति। याज्ञवल्क्योपि। कदर्यबद्धचोराणां क्लीबरंगाव
तारिणां। वैणाभिशस्तवार्धुष्यगणिकागणरक्षिणाम्। चिकित्सकातुरोन्मत्तपुंश्चलीक्रुद्धविद्विषां। क्रूरोग्रप
तितव्रात्यदांभिकोच्छिष्टभोजिनाम्। अवीरस्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनां। नृशंसराजरजककृतघ्नवद
जीविनां। चैलधावसुधाजीवसहोपपतिवेश्मनां। एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथेति। शंकितमित्यत्र
द्विविधाशंका विपश्चितां विषयसेपि काशास्त्रनिंदिताशंका चेति ॥तथाहि॥ केषुचित्कीकटदेशेषु प्रेतभूतग

प्र·शा
४४६

शूद्रान्नेनप्रवर्धते। पंचतस्यमणस्यंति आत्माब्रह्मत्रयोग्नयः। सुमंतुरपि। राजान्नंतेजआदत्ते शूद्रान्नंब्रह्मवर्चसं
॥ आयुःसुवर्णकारान्नंयशश्चर्मप्रकर्तिनः। कारुकान्नंप्रजांहंतिबलंनिर्णेजकस्यच। गणान्नंगणिकान्नंचलो
केभ्यःपरिकृंतति॥ रूपंचिकित्सकस्यान्नंपुंश्चल्याश्चान्नमिंद्रियं। विष्ठावार्धुषिकस्यान्नंशस्त्रविक्रयिणोमल
म्। एतेभ्योन्येत्वभोज्यान्नाःक्रमशःपरिकीर्तिताः। तेषांत्वगस्थिरोमाणि वदंत्यन्नंमनीषिणइति॥ ॥ तदिदंग
र्हितंशूद्रान्नमज्ञानाद्वा आपत्कालेवायोविप्रोभुंक्ते सब्रह्मकूर्चं समाचरेत्। तस्यपावनत्वंबहुमंत्रसंस्तुत
त्वात्॥ यस्तुज्ञात्वाशूद्रान्नंभुंक्ते सप्राजापत्यंचरेत्। यथाहसुमंतुः। भुक्त्वातोन्यतमस्यान्नममत्याक्षपयेत्र्यहं
। मत्याभुक्त्वाचरेत्कृच्छ्रं रेतोविण्मूत्रमेवचेति। सचब्रह्मकूर्चस्यैकोपवासरूपत्वात्त्र्यहक्षपणेनविरोधइतिशं
कनीयतयाशक्ताशक्तविषयत्वात्। अत्रदिनत्रयोपवासंशंखलिखितावप्याहतुः। भुक्त्वावार्धुषिकस्यान्न
मव्रतस्यासुरस्यच। शूद्रस्यतुतथाभुक्त्वात्रिरात्रंस्यादभोजनमिति। प्रजापतिश्चात्रव्यवस्थितान्याह। ब्राह्म

नि·

राम
४

आमंवायदिवापक्वंशूद्रान्नमुपसादयेत्॥किल्बिषंभजतेभोक्तायस्यविप्रःपुरोहितः॥गुर्वर्थंत्यातिथीनांतुभ
त्यानांतुविशेषतः।प्रतिगृह्यप्रदातव्यंनतुतृप्येत्स्वयंततः।शूद्रान्नरसपुष्टस्यह्यधीयानस्यनित्यशः।जपतो
जुह्वतोवापिगतिरूर्ध्वानविद्यते॥षण्मासानथयोभुंक्तेशूद्रस्यान्नंनिरंतरं।जीवन्नेवभवेच्छूद्रोमृतःश्वानो
भिजायते।अकृत्वैवनिवृत्तिंयःशूद्रान्नान्म्रियतेद्विजः।आहिताग्निर्विशेषेणसशूद्रगतिभाग्भवेत्।व्यासोपि
।शूद्रान्नरसपुष्टस्यदित्सोरपिचनित्यशः।यजतोजुह्वतोवापिगतिरूर्ध्वानविद्यते।मृतसूतकपुष्टांगोद्विज
शूद्रान्नभोजनः।अहमेवनजानामिकांवायोनिंगमिष्यति।गृध्रोद्वादशजन्मानिदशजन्मानिसूकरः।श्वाचैव
सप्तजन्मानीत्येवंमनुरुवाचह।शूद्रान्नेनोदरस्थेनयःकश्चिन्म्रियतेद्विजः।सभवेत्सूकरोग्राम्यस्तस्यवाजा
यतेकुलइति॥आपस्तंबोपि।यस्तुभुंजीतशूद्रान्नंमासमेकंनिरंतरं।इहजन्मनिशूद्रत्वंमृतःश्वाभिजायते
।शूद्रान्नंशूद्रसंपर्कंशूद्रेणचसहासनं।शूद्राज्ज्ञानागमश्चापिज्वलंतमपिपातयेत्।।आहिताग्निस्तुयोविप्र

चेयत्प्रायश्चित्तमुक्तं तदेवक्षत्रियादीनामपिद्रष्टव्यं। द्विगुणत्रिगुणक्रमेणाधिकंहीनजातिषुद्रष्टव्यम्। उत्तमजातिषुतत्क्रमेणैवहीनंतथा। तत्रैवाभिहितं। समानजातौसर्वेषांविप्रवन्निष्कृयस्मृतः। क्रमाद्द्व्यक्रमाद्धीनहीनजात्युत्तमेष्वपीतिसर्वत्राशौचोत्तरकालमेवप्रायश्चित्तम्॥ ॥ ॥पराशरमाधवीयेद्वादशाध्यायेप्रायश्चित्तकाण्डे॥ ॥शूद्रान्नंसूतिकान्नंच अभोज्यस्यान्नमेवच। शंकितंप्रतिषिद्धान्नंपुरोच्छिष्टंतथैवच॥४॥यदिभुक्तंतुविप्रेणअज्ञानादापदोपिवाज्ञात्वासमाचरेत्कृच्छ्रंब्रह्मकूर्चेनपावनम्॥५॥ अस्यव्याख्यानम्॥विप्रस्यशूद्रान्नभोजनप्रायश्चित्तमाह॥ ॥शूद्रान्नमिति॥ अत्रशूद्रान्नस्यनिषेधअंगीरसाप्रपंचितः॥ आहिताग्निस्तुयोविप्रःशूद्रान्नंप्रतिगृह्यतु॥ भोगात्तत्समतांयातितिर्यग्योनिंचगच्छति॥ यस्तुवेदमधीयानशूद्रान्नमुपभुंजते। शूद्रोवेदफलंयातिशूद्रत्वंयातिसद्विजः। प्रात्ताचैवोष्मणेचैवस्तुष्वाचप्रतिगृह्यच। प्रशस्यस्वस्तिचेत्सुत्वाभोक्तैवतुनसंशयः॥ एतेदोषाभवंत्यस्यशूद्रान्नस्यप्रतिग्रहे॥ अनुग्रहंतुवक्ष्यामिमनुनाचोदितंपुरा॥

व्यं। वणिक्का शिल्पी। भोज्यान्न इत्यनुषंगः। वाणिज्योपजीवी च शूद्रो भोज्यान्नः। स चेदशिल्पी। कुंभकारादिको न भवति। स च शब्दाद् शूद्रोपि शिल्पी। अभोज्यान्नः। अनेनैव प्रसंगेनान्यदप्यभोज्यमाह। नित्यमभोज्यं। यन्न हरहरनाथाय दीयते। नित्यं न भोक्तव्यं। नित्यं वा सर्वदा परगृहे नापद्यपि भोक्तव्यम्। यथाह मनुः॥ उपासंते ये गृहस्थाये। परपाकमबुद्धय इत्यादि॥ ॥जैमिनिगृह्येप्रतिपादितत्वात्॥ ॥शूद्रान्नभोजने तु प्रजापतिराह। ब्राह्मणस्यैव शूद्रान्नमभोज्यं परिकीर्तितं। सकृद्भुक्त्वा तदज्ञाना ब्रह्मकूर्चं सकृत्पिबेत्॥ अभ्यासे तु तदभ्यस्येदामममन्नमगर्हितं। मत्या त्रिरात्रं कुर्वीत कृच्छ्रमभ्यासकृच्चरेदिति॥ सूतकशावान्नभोजनेपि। स्मृत्यंतरोक्तं द्रष्टव्यं॥ यथाह गर्गः। शावे च सूतके चैव मत्या भुक्त्वं चरेत्। मत्याभ्यासे ततः कुर्यात्कृच्छ्रं चांद्रायणोत्तरम्। अहं त्वकामतः कुर्यादभ्यासे कृच्छ्रमेव चेति॥ एतदपि ब्राह्मणस्य। ब्राह्मणाशौचे क्षत्रियादीनामाशौचेपि तत्रैवोक्तम्॥ द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि च। क्षत्रविट्छूद्रजातीनामाशौचे परिकीर्तितमिति। तत्र ब्राह्मणस्य। ब्राह्मणी शौ

शूद्रप्रतिग्रहणमन्तरेण न निवर्त्तेत तत्र शूद्रात्तन्नतु याजनभोजनप्रवचनानि कुर्यात्॥ तथाह मनुः॥ नाद्याच्छूद्रस्य पक्वान्नमित्यादि। तथाच वसिष्ठः। शूद्रान्नेनोदरस्थेन योधिगच्छति मैथुनम्॥ यस्यान्नं तस्य ते पुत्रा अन्नाच्छुक्लं प्रवर्तत इति॥ याजने तु वक्ष्यति॥ शूद्रयाजकम्। शूद्रार्थयाजकमित्यादि तथाध्यापने तु। शूद्रशिष्यो गुरुश्चैवेत्यादि। अस्यापवादः। पशुपालक्षेत्रकर्षककुलसंगतकारयितापरिचारका भोज्यान्नाः पशुपालः पशूनां। सधनस पशुस्वामिनो भोज्याः। तथा क्षेत्रकर्षकस्य। तथाहोशनाः। स्वगोपालः। भोज्यान्नः॥ स्वक्षेत्रकर्षकश्चेत्यादि कुलसंगतः। पारंपर्येण। मित्ररूपेणागतः। कारयितानापितः। परिचारको दासः। एतल्लिंगान्नापितस्य शूद्रत्व मध्यवसीयते। तथाचाह मनुः॥ मैत्रकः कुलमित्रश्च गोपालोदासनापितो। एते शूद्रेषु भोज्यान्ना इत्यादि प्रकरणाद्यदि शूद्रान्नभोजनमन्तरेण प्राणधारणं न स्यात्। ततः एतेषामन्नमदनीयं कुतः। कुलसंगतः कारयितृपरिचारकाणां अन्नं भोज्यमिति। वक्तव्यो भोज्यान्न इति लिंगात्तत्। भोक्तव्यमिति द्रष्ट

नि॰

राम
२

तान्देवानागत्यब्रह्माप्रोवाच।विषममन्नं।मासमंकुरुत।विषमसमीकरणमनुचितम्।कः पुनरनयोर्विशे
षः इत्यपेक्षायांमसएवावोचत्।दानशीलवार्धुषिकस्यापिश्रद्धयान्नंपवित्रंभवति।कृपणान्नंपुनरश्रद्ध
याहतंदूषितमधर्मप्राशुभयप्रतिषेधेपि।श्रद्धादत्तविद्वद्वार्धुषिकान्नंविशुद्धिबोधनपरमिदं॥२२५॥
मनुस्मृतौएकादशाध्यायेदुरान्नप्रायश्चित्तम्॥ ॥अभोज्यानांतुभुक्त्वान्नंस्त्रीशूद्रोच्छिष्टमेवच॥ज
ग्ध्वामांसमभक्ष्यंचसप्तरात्रंयवान्पिबेत्॥१५२॥अस्यव्याख्यानं॥अभोज्यानामिति॥अभोज्यान्नानां
।नाश्रोत्रियकृतेयज्ञेइत्याद्युक्तानाम्॥अन्नंभुक्त्वाजलमिश्रितसक्तुरूपेणयवागूरूपेणवायवान्पानयो
ग्यान्कृत्वासप्तरात्रंपिबेत्।अमुष्मिन्नेवविषयेमत्याभुक्त्वाचरेत्कृच्छ्रमि — तिचतुर्थोध्यायेप्रायश्चित्तमुक्तं
तेनसहवैकल्पितंविकल्पश्चकर्तृशक्त्यपेक्षः तयाद्विजातिस्त्रीणामुच्छिष्टंशूद्रोच्छिष्टंवाभुक्त्वाएतदेवकु
र्यात्।तथाक्रव्यादसूकरोष्ट्राणामित्यादिनायद्विशेषप्रायश्चित्तंतन्निषिद्धमांसंभुक्त्वाइदमेवकुर्यात्१५३

म॰ शा॰
४४२

स्यान्नं दुष्टमित्यभ्यस्यदास्यत। नत्वन्यतमस्य तु भुक्ते इति। तस्मादेतस्य करणाद्यन्मेधातिथिरभ्यधात्। प्रायश्चित्तं नि-
ष्क्रिंदं युक्तं शुक्लादौ तदसुंदरं। अप्रकरणे च प्रायश्चित्तस्याभिधानं लाघवार्थं तत्र क्रियमाणे मत्तादिग्रहणमपि
कर्तव्यं स्यात्॥२२२॥ नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः। आददीताममेवास्मादवृत्तावेकरा
त्रिकं॥२२३॥ नादद्यादिति। अविशेषेण शूद्रान्नं प्रतिषिद्धं तस्येदानीं विशिष्टविषयतोच्यते। अश्राद्धिनः श्र
द्धादिपंचयज्ञशून्यस्य शूद्रस्य शास्त्रविद्द्विजः पक्वान्नं न भुंजीत किं त्वन्नांतराभावे सति एकरात्रनिर्वाहोचित
सामममेवान्नमस्माद्गृह्णीयान्न तु पक्वान्नम्॥२२३॥ श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः। मीमांसित्वोभ
यं देवास्सममन्नमकल्पयन्॥२२४॥ श्रोत्रियस्येति॥ एकोधीतवेदः कृपणश्च परो दाता वृद्धिजीवी च॥ तयो
रुभयोरपि गुणदोषवत्त्वं विचार्य देवास्तुल्यमन्नमनयोरिति निरूपितवंतः। उभयोरपि गुणदोषसाम्यात्॥
२२४॥ तान्प्रजापतिराहैत्य मा कृध्वं विषमं समम्। श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत्॥२२५॥ तानिति॥

राम॰
१

ष्टाव्यतिरिक्तश्लेष्मादि। गोविन्दराजस्तु। चिकित्सकान्न। भक्षणेन। तथाविधायाम्। जातौजायते। यत्रपूयश्चभ
वतीत्याह ॥२२०॥ यएभ्योन्येत्वभोज्यान्नाः क्रमशः परिकीर्तिताः। तेषांत्वगस्थिरोमाणिवदन्त्यन्नंमनीषिणः
॥२२१॥ यएभ्योन्यइति ॥ प्रतिपदनिर्दिष्टेभ्योयेन्येक्रमेणभोज्यान्ना अस्मिन् पठितास्तेषांयदन्नंतत्॥ त्वग
स्थिरोमाणितदीयत्वचः कीकस्यरोम्णांच भुक्तानांयोदोषः। सएवतदन्नस्यापिभुक्तस्यबोद्धव्यः॥२२१॥
भुक्त्वातोन्यतमस्यान्नममत्याक्षपणंत्र्यहम्॥ मत्याभुक्त्वाचरेत्कृच्छ्रं रेतोविण्मूत्रमेवच॥२२२॥ भुक्त्वेति॥ एषां
मध्ये अन्यतमसंबन्ध्यान्नमज्ञानतो भुक्त्वात्र्यहमुपवासः। ज्ञानतस्तुकृच्छ्रं। एवंरेतोविण्मूत्रभोजनेपि। एत
स्यान्यतमस्येति। षष्ठीनिर्देशान्मत्तादिसंबंधिनः परिग्रहदुष्टान्नस्यैवप्रायश्चित्तंनसंसर्गदुष्टस्य। केशकी
टावपन्नादेः नापिकालदुष्टस्यपर्युषितान्नादेः। नापिनिमित्तदुष्टस्यघुष्टादेः। एकप्रकरणोपदेशाच्चैषांस्नात
कव्रतलोपज्ञापनार्थंप्रायश्चित्तंचैतेष्वेकादशेवक्ष्यति। यदितुसर्वेष्वेवंप्रायश्चित्तंस्यात्तदा। भुक्त्वातोन्यतम

इति तदध्यायेतच्छ्लोकव्याख्याने आचमनेपंचतीर्थान्याह याज्ञवल्क्यः कनिष्ठदेशिन्यंगुष्ठमूलान्यग्रंकरस्यतु
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् इति तदध्याये तच्छ्लोकव्याख्यानेशुद्धोदके विकृतिरहिते ब्राह्मणक्षत्रियवि
शां क्रमेणहृदयकंठताल्वादिपर्यंतगमाभिरद्भिराचमनवि धायकं याज्ञवल्क्यवचनं याज्ञवल्क्यः अद्भिस्तुप्र
कृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः हृत्कंठतालुगाभिश्च यथासंख्यंद्विजातयः इतितदध्यायेतच्छ्लोकव्याख्यानेरो
गाद्यातुरादीनांपूर्वसामान्यापवादपूर्वकं उष्णोदकेनैवआचमनंकर्तव्यमित्याह याज्ञवल्क्यः तत्रापवादमाह
याज्ञवल्क्यः तत्रापनिष्ठितेनापि शुचिरुक्तामनीषिणाउदकेनातुराणांचतथोष्णेनोष्णपायिनामिति तदध्या
येतच्छ्लोकव्याख्याने भोजनपथिगमनादिनिमित्तेषुनैमित्तिकाचमनमाह याज्ञवल्क्योपिस्नात्वापीत्वाक्षुते
सुप्तेभुक्त्वारथ्याप्रसर्पणे आचांतःपुनराचामेद्वासोपिपरिधायचेति तदध्यायेतच्छ्लोकव्याख्यानेमुखनिस्
तबिंदूनांआचमन पितृपादोपरिस्खलितआचमनबिंदूनां आस्यगतश्मश्रूणांदंतगतवस्तूनांचयथायो
ग्यंउच्छिष्टत्वाभावमाहयाज्ञवल्क्यः याज्ञवल्क्योपि मुखजा विप्रुषोमेध्यास्तथाचमनबिंदवः श्मश्रुचा

प्र॰श्रा॰

४९५

स्यगतंदंतगतंत्यक्त्वा ततश्शुचिरितितदध्यायेतच्छ्लोकव्याख्यानेदंतकाष्ठाभिमंत्रणमाहकात्यायनोपिदंतयावन
स्यकाष्ठाभिमंत्रणमंत्रंदर्शयति आयुर्बलंयशोवर्चः प्रजाः पशुवसूनिचब्रह्मप्रज्ञांचमेधांचत्वंनो देहिवनस्प
तेइतितदध्यायेतच्छ्लोकव्याख्यानेदंतथावनेपदार्थविशेषान् निषेधतियाज्ञवल्क्योपि इष्टकालोष्ठपाषा
णैरितरांगुलिभिस्तथा मुक्त्वाचा नामिकांगुष्ठौवर्जयेद्दंतथावनमिति तदध्यायेतच्छ्लोकव्याख्यानेदर्भा
णांहरितादिवर्णभेदेन कर्मभेदेविनियोगभेदमाह कात्यायनः हरितायज्ञियादर्भाः पीतकाः पाकयज्ञि॰
याः समूलाः पितृदैवत्याः कुल्माषावैश्वदैविकाः इतितदध्यायेतच्छ्लोकव्याख्याने पवित्रप्रकरणे पवित्र
प्रकारमाहकात्यायनः अनंतगर्भिणंसाग्रंकुशंद्विदलमेवच प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचिदिति तदध्या
येतच्छ्लोकव्याख्यानेस्नानप्रकरणेकात्यायनोपि यथाहनितथाप्रातर्नित्यंस्नायादतंद्रितः दंतान्प्रक्षाल्यन
द्यादौगृहेचेत्तदमंत्रवत् इतितदध्यायेतच्छ्लोकव्याख्यानेउदयास्तमयानंतरसंध्यानिषेधप्रकरणेयाज्ञव
ल्क्येनसंधौसंध्यामुपासीतनास्तगेनोद्गतेरवाविति तदध्यायेतच्छ्लोकव्याख्यानेवस्त्रधारणादिप्रकरणे यो

नि॰

रामः

५३

गयाज्ञवल्क्यः स्नात्वैवं वाससी मुक्ते अच्छिन्ने परिधाय च प्रक्षाल्योरू मृदाचाद्भिर्हस्तौ प्रक्षालयेदिति तद्ध्या
येतच्छ्लोकव्याख्याने वस्त्राभावे अनुकल्पमाह तत्रानुकल्पमाह योगयाज्ञवल्क्यः अलाभे धौतवस्त्रस्य शाण
क्षौमाविकानि च कुतपं योगपट्टं च विवासास्तु नवै भवेत्। इति तद्ध्यायेतच्छ्लोकव्याख्याने उष्णोदकस्नान
स्य पंङ्क्तौ ब्राह्मणाभावभोजनस्य अवैदिकतान्त्रिकमन्त्रजपस्य अश्रोत्रियदानस्य च वैफल्यमाह यज्ञवल्क्यः
वृथा तूष्णोदकस्नानं वृथा जप्यमवैदिकं वृथा त्वश्रोत्रिये दानं वृथा भुक्तमसाक्षिकमिति तद्ध्यायेतच्छ्लोक
व्याख्याने संध्याप्रकरणे गायत्रीजपविषये याज्ञवल्क्योपि प्राणानायम्य संप्रोक्ष्य त्र्यृचेनाब्दैवतेन तु इति
तद्ध्यायेतच्छ्लोकव्याख्याने प्राणायाम प्रकरणे याज्ञवल्क्यः गायत्रीं शिरसा सार्धं जपेद्व्याहृतिपूर्विकां
प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयम इति तद्ध्यायेतच्छ्लोकव्याख्याने तत्प्रकरणे योगयाज्ञवल्क्यः भूर्भु
वस्स्वर्महर्जनस्तपस्सत्यं तथैव च प्रत्योंकारेणसंयुक्तं तथा तत्सवितुः पदमिति ओमापोज्योतिरित्येतच्छिरः।
पश्चात्प्रयोजयेत् त्रिरावर्तनयोगात्तु प्राणायामस्तु शब्दितः इति स च प्राणायामः पूरककुंभकरेचकभेदेन

४९५

०॥० त्रिविधोज्ञेयः तथाचयोगे याज्ञवल्क्यः पूरकः कुंभकोरेच्यः प्राणायामस्त्रिलक्षणः नासिकाकृष्टउच्छ्वासो
ध्मातः पूरकउच्यते कुंभकोनिश्चलश्वासोरिच्यमानस्तुरेचकइति तदध्यायेतच्छ्लोकव्याख्यानेसंध्यामार्जन
प्रकरणेकात्यायनोपिशिरसोमार्जनंकुर्यात्कुशैःसोदकबिंदुभिः प्रणवोभूर्भुवस्वश्च गायत्रीचतृतीयका
ः तदध्यायेतच्छ्लोकव्याख्यानेसंध्यावंदनप्रकरणेदोषमाह याज्ञवल्क्यः अनार्तश्चोत्सृजेद्यस्तुसविप्रःशू
द्रसंमितः प्रायश्चित्तीभवेच्चैवलोकेभवतिनिंदितइतितदध्यायेतच्छ्लोकव्याख्यानेगायत्रीजपकालेगाय
त्र्याःपूर्वोत्तरयोः प्रणवसंपुटकरणार्थमाह ॐकारपूर्वमुच्चार्यभूर्भुवस्वस्तथैवचगायत्रीप्रणवंचांते ज
पएवमुदाहृतमिति तदध्यायेतच्छ्लोकव्याख्यानेसंध्याजपकालेवागुच्चारणादिनियमभंगेविष्णुस्मरण
मित्याहयोगयाज्ञवल्क्यः यदिवाग्यमलोपस्याज्जपादिषुकदाचनव्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्य
यमिति तदध्यायेतच्छ्लोकव्याख्यानेजपप्रदेशानाहदेशनियमस्तुयाज्ञवल्क्येनोक्तः अग्न्यागारेजलांते
वाजपेद्देवालयेपिवापुण्यतीर्थेगवांगोष्ठेद्विजक्षेत्रेथवागृहेइति तदध्यायेतच्छ्लोकव्याख्याने आग्न

नी०

राम:

५७

तिहोवाच कत्येव देवा याज्ञवल्क्येत्यध्वर्य इत्योमिति होवाच कतमे ते त्रयश्च त्रीच शता त्रयश्च त्रीच सहस्रेति सहो
वाच महिमान एषामेते त्रयस्त्रिंशत्त्वेव देवा इति कतमे ते त्रयस्त्रिंशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त
एकत्रिंशदिंद्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति शकल्य मेते वस इति अग्निश्च पृथिवी च वायुश्चांतरिक्षं चादित्यश्च द्यौ
श्च चंद्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदं सर्वं वसु निहितमिति तस्माद्वसव इति कतमे ते रुद्रा इति दशवि पुरुषे प्राणा
त्मैकादशस्ते यदस्माच्छरीरान्मर्त्यादुत्क्रामंत्यथ रोदयंति यद्रोदयंति तस्माद्रुद्रा इति कतम आदित्या इति द्वादश वै मा
सास्संवत्सरस्यैत आदित्या एते हीदं सर्वं आददाना यंति तस्मादादित्या इति कतम इंद्रः कतमः प्रजापतिरिति स्तनयित्नुरे
वेंद्रो यज्ञः प्रजापतिरिति कतमस्तनयित्नुरित्यशनिरिति कतमो यज्ञ इति पशव इति कतमे षडित्यग्निश्च पृथिवी च वा
युश्चांतरिक्षं चादित्यश्च द्यौश्चैते षडेते हीदं सर्वं षडिति कतमे ते त्रयो देवा इतीम एव त्रयो लोका एषु हीमे सर्वे देवा इति
कतमौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोध्यर्ध इति योयं पवत इति तदाहुर्यदयमेक इवैव पवतेथ कथमध्यर्ध इ
ति यदस्मिन्निदं सर्वमध्यार्ध्नोत्तेनाध्यर्ध इति कतम एको देव इति प्राण इति स ब्रह्म त्यदित्याचक्षत इति प्रथमाध्याये आचार्

ड्डे संध्यास्नानं जपो होमो देवतानांच पूजनं आतिथ्यं वैश्वदेवंच षट्कर्माणि दिने दिन इति एतत्संख्याकश्लोकव्याख्यानेनित्याह्निकप्रकरणे तत्र याज्ञवल्क्यः ब्राह्मे मुहूर्त उत्थाय चिंतयेदात्मनो हितं धर्मार्थकामान् स्वेकाले यथाशक्ति न हापयेदिति तदध्यायेतच्छ्लोकव्याख्याने नित्यकृत्यप्रकरणे कात्यायनः श्रोत्रियं सुभगं गां च अग्निमग्निचितं तथा प्रातरुत्थाय यः पश्येदापद्भ्यस्स विमुच्यत इति तदध्यायेतच्छ्लोकव्याख्याने शौचप्रकरणे तत्र कालभेदेन दिङ्नियममाह याज्ञवल्क्यः दिवासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः इति तदध्यायेतच्छ्लोकव्याख्याने शौचप्रकरणे याज्ञवल्क्यवचनस्य यमदेवलादिवचनानां च पुरीषोत्सर्गे दिङ्नियमविधाने विरोधात् केचित् तुल्यविकल्प इति मन्यंते तदयुक्तं उत्सर्गापवादन्यायेन याज्ञवल्क्यवचनं सामान्यविधायकं यमवचनं विशेषविधायकमित्यत्र याज्ञवल्क्यवचनमुदाहृतं तदध्यायेतच्छ्लोकव्याख्याने शौचप्रकरणे याज्ञवल्क्यः गृहीतशिश्नस्त्वोत्थाय मृद्भिरभ्युद्धृतैर्जलैः गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः तदध्यायेतच्छ्लोकव्याख्याने आचमनप्रकरणे याज्ञवल्क्यः अंतर्जानु शुचौ देशे उपविष्ट उदङ्मुखः प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशे-

मभेदेन संध्यागायत्रीजपसंख्यानियमभेदमाह योगयाज्ञवल्क्यः ब्रह्मचार्याहिताग्निश्च शतमष्टोत्तरं जपे
त् वनप्रस्थो यतिश्चैव सहस्रादधिकं जपेदिति तदध्यायेतच्छ्लोकव्याख्याने अग्निहोत्रऔपासनयोर्होमः दं
त्योरन्यतरसंनिधान एव ऋत्विजा होतव्यः इत्यत्र नियममाह तदुक्तं कात्यायनेन असमक्षं तु दंपत्योर्होतव्यं न
र्त्विगादिना द्वयोरप्यसमक्षं तु भवेत्स्तुतमनर्थकमिति तदध्यायेतच्छ्लोकव्याख्याने होमप्रकरणे होमका
लः कात्यायनेन दर्शितः यावत्सम्यङ्न भाव्यंते नभस्युस्राणि सर्वतः रोहितत्वं च नापैति तावत्सायं तु हूयत इ
ति तदध्यायेतच्छ्लोकव्याख्याने अग्निहोत्रादिहोमप्रकरणे आपस्तंबोपि समुद्रो वा एष यदहोरात्रस्तस्यै
ते गाधती र्थे यत्संधि तस्मात्संधौ होतव्यमिति कात्यायनीयब्राह्मणं भवति इति तदध्यायेतच्छ्लोकव्या
ख्याने सभार्ये यजमाने ग्रामसीमोल्लंघ्य गते सति होमकालरूपसूर्योदयसूर्यास्तमयकालातिक्रमे पुनरा
धानमित्यत्र तथा कात्यायनः विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति होमकालादतीतस्य पुनराधान
मिष्यते इति तदध्यायेतच्छ्लोकव्याख्याने श्रौतस्मार्तकर्मणोः वेदे न व्यवस्था विधानप्रकरणे श्रौतस्मार्तयो

मं॰श्रा

५९७

रपिव्यवस्थामाह याज्ञवल्क्यः कर्मस्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही यथाकालाहृते चापि श्रौतं वैतानिका।
ग्निष्विति तदध्यायेतच्छ्लोकव्याख्याने गुर्वादिनिरूपणप्रकरणे याज्ञवल्क्योपि स गुरुर्यः क्रियाः कृत्वा वेदम
स्मै प्रयच्छतीति तदध्यायेतच्छ्लोकव्याख्याने त्रैवर्णिकानां यज्ञतपश्शुभादि सर्वकर्मणां श्रेयस्करः वेद एव
मुख्य इत्यत्र याज्ञवल्क्योपि यज्ञानां तपसां चैव शुभानां चैव कर्मणां। वेद एव द्विजातीनां निःश्रेयसकरः परं इति तद
ध्यायेतच्छ्लोकव्याख्याने क्षत्रियवैश्यादिवर्णधर्मप्रकरणे याज्ञवल्क्योपि प्रधानं क्षत्रिये कर्म प्रजानां परिपालनं कु
सीदं कृषिवाणिज्यं पशुपाल्यं विशः स्मृतम् इति पूर्वश्लोकव्याख्याने ब्राह्मणस्य गृहस्थाश्रमिणः जीविकावृत्तिनिरूपण
प्रस्तावे याज्ञवल्क्योपि कुसूलकुंभीधान्यो वा त्र्याहिको श्वस्तनोपि वा जीवेद्वापि शिलोंछेन श्रेयानेषोपरः परः इ
ति पूर्वश्लोकव्याख्याने शूद्रस्य जीवनवृत्तिनिरूपणे ब्राह्मणादिशुश्रूषां वणिग्वृत्तिं शिल्पिवृत्तिं वा आश्रयेदिति विधा
नप्रकरणे याज्ञवल्क्योपि शूद्रस्य द्विजशुश्रूषा तयाजीवन् वणिग्भवेत् शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचर
न् इति पूर्वश्लोकव्याख्याने ब्रह्मयज्ञप्रकरणे तथा चयोग याज्ञवल्क्यः प्रदक्षिणं समावृत्य नमस्कृत्योपविश्य।

स्या

नी॰

रामः

५५

चदर्भैश्च दर्भपाणिभ्यां संहतभ्यां कृतांजलिः स्वाध्यायं तु यथाशक्ति ब्रह्मयज्ञार्थमाचरेदिति पूर्वश्लोकव्याख्यानेब्र
ह्मयज्ञप्रकरणे जप्यवेदादिमंत्रानाह याज्ञवल्क्योपि वेदाथर्वपुराणानि सेतिहासानि शक्तितः जपयज्ञप्रसिध्यर्थं
विद्यां चाध्यात्मिकीं जपेदिति पूर्वश्लोकव्याख्याने तत्प्रकरणे तत्तदध्ययनफलमाह याज्ञवल्क्योपि यं यं क्रतुमधी
यीत तस्य तस्याप्नुयात्फलं वित्तपूर्णायाश्च पृथिवीदानस्य फलमाप्नुयादिति पूर्वश्लोकव्याख्याने तर्पणविधिप्रकरणे
तिलग्रहणे तु विशेषमाह योगयाज्ञवल्क्यः यद्युद्धृतं निषिंचेत्तु तिलान्संमिश्रयेज्जले अतोन्यथा तु सव्येन तिला
न्ग्राह्या विचक्षणैरिति पूर्वश्लोकव्याख्याने नित्यतर्पणे देवऋषिपितॄनाह योगयाज्ञवल्क्येपि ब्रह्माणं तर्पयेत्पूर्वं
विष्णुं रुद्रं प्रजापतिं वेदांश्छंदांसि देवांश्च ऋषींश्चैव तपोधनान् इत्यादिपूर्वश्लोकव्याख्याने वसुरुद्रादित्यगणतर्प
णविधाने विशेषमाह योगयाज्ञवल्क्यः वसून्रुद्रान् तथादित्यान् नमस्कारसमन्वितान् इति पूर्वश्लोकव्या।
ख्याने तर्पणप्रकरणे सवर्णपितृभ्य एव तर्पणं कुर्यात् नासवर्णेभ्य इत्यत्र योगयाज्ञवल्क्यः सवर्णेभ्यो जलं देयो।
नासवर्णेभ्य एव च गोत्रनामस्वधाकारैस्तर्पयेदनुपूर्वशः इति पूर्वश्लोकव्याख्याने तस्मिन्नेव प्रकरणे जीवपितृकस्य त

र्पणे उद्देश्यानुद्देवपितॄनाह जीवपितृतर्पणेविशेषमाह योगयाज्ञवल्क्यः कव्यवाहोनिलस्सोमोयमश्चैवार्यमातथा
अग्निष्वात्तास्सोमपाश्चतथा बर्हिषदोपिच यदिस्याज्जीवपितृकस्तान्विद्याच्चतथापितॄनिति पूर्वश्लोकव्याने तस्मिन्ने
वप्रकरणे ज्ञाताज्ञातसर्वेभ्यः पितृभ्यश्चअवसानांजलिरूपं एकंतर्पणंआह अवसानांजलिमाह कात्यायनः पितृ
वंश्यामातृवंश्यायेचान्येपितरोजनाः मत्तस्तूदकमर्हंति एतांस्तान्तर्पयाम्यहं इतिपूर्वश्लोकव्याख्यानेतर्पणाकरणे
दोषमाह योगयाज्ञवल्क्योपिनास्तिक्यभावद्यस्तांस्तुनतर्पयतिवैपितॄन् पिबंति देहनिस्रावंपितरोस्यजलार्थिनइ
ति पूर्वश्लोकव्याख्यानेसर्वप्राणिनः ब्राह्मणहस्तात् तर्पणरूपंजलंअपेक्षंते तस्मात् तर्पणाकरणेदोषसंभवात्
करणेचविश्वंबिभर्तीतिफलश्रवणात् अवश्यंकर्तव्यमित्याह कात्यायनः छायायथेच्छेच्छरदातपार्तःपयःपि
पासुःक्षुधितोन्नमन्न बालोजनित्रींजननीचबालं योषित्पुमांसंपुरुषश्चयोषामितितदर्थयिपूर्वश्लोकव्याख्यानेयावं
तंकालंनित्यतर्पणंनकरोतितावंतंकालंकेशोदकंवासोदकंचपितृभ्योनदद्यादित्यत्रतदाह योगयाज्ञवल्क्यः याव
द्देवानृषींश्चैवपितॄंश्चापिनतर्पयेत् तावन्नपीडयेद्वस्त्रंयोहिस्नातोभवेद्द्विजः इति पूर्वश्लोकव्याख्याने कालद्वये

पि अनग्न्नापि वैश्वदेवं कर्तव्यमित्याह कात्यायनः सायंप्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च अनश्नतापि सततमन्यथा किल्बिषी भवेत् इति पूर्वश्लोकव्याख्याने वैश्वदेवप्रकरणे देवता आहुतिप्रकारमाह कात्यायनोपि वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयादिति पूर्वश्लोकव्याख्याने अनग्निवैश्वदेवप्रकरणे कात्यायनोपि उद्धृत्याह विप्रासिच्यहविष्येण घृतादिनाख्यशाखाविधिना हुत्वा तच्छेषेण बलिं हरेत् इति पूर्वश्लोकव्याख्याने नित्यश्राद्धप्रकरणे कात्यायनस्तत्रानुकल्पमाह एकमप्याशयेन्नित्यं पितृयज्ञार्थसिद्धये अदैवं नास्ति चेदन्यो भोक्ता भोज्यमथापि वा इति पूर्वश्लोकव्याख्याने नित्यश्राद्धप्रकरणे अन्नदाता अशक्तश्चेत् गृहान्नस्य एकदेशमुद्धृत्य ब्राह्मणाय दद्यादित्यत्र कात्यायनः अभ्युद्धृत्य यथाशक्ति किंचिदन्नं समाहितः वेदतत्त्वार्थविदुषे द्विजायैवोपकल्पयेत् इति पूर्वश्लोकव्याख्याने मनुष्ययज्ञप्रकरणे कात्यायनोक्तं अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं होमो दैवो बलिर्भौतो नृयज्ञोतिथिपूजनमिति अथातिथिनिरूपणं पराशरमूलश्लोकः इष्टो वा यदि वा द्वेष्यो मूर्खः पंडित एव च संप्राप्तो वैश्वदेवांते सोतिथिः स्वर्गसंक्रमः अस्य माधवीयव्याख्यानं तत्र कीदृगतिथिरित्याकांक्षायामाह

प्र॰ श्रा॰

४९९

इष्ट इति इष्टस्स्वादिस्तस्य भोजनीयत्वं याज्ञवल्क्येनोक्तं भोजयेदागतान्कालेसखिसंबंधिबांधवान् इति पराश

रमूलं इष्टाध्वोपगतंश्रांतं वैश्वदेवउपस्थितं अतिथिंतं विजानीयान्नातिथिः पूर्वमागतः अस्यमाधवीयव्याख्यानंय

ज्ञवल्क्योपि अध्वनीनोतिथिर्ज्ञेयश्श्रोत्रियोवेदपारगः मान्यावेतौगृहस्थस्यब्रह्मलोकमभीप्सतः इति पराशर मूलं अपूर्वस्सुव्रतीविप्रोह्यपूर्वश्चातिथिस्तथा

वेदाभ्यासरतोनित्यंत्रयः पूज्यादिनेदिने अस्यमाधवीयंव्याख्यानेभिक्षवेभिक्षादानप्रकरणे अतिथिदृष्टांतेनभि

क्षुकयोर्यतिब्रह्मचारिणोः पूज्यतामाह अपूर्वइति सुष्टुव्रतंसुव्रतंमोक्षहेतुर्यतिधर्मोअस्यास्तीतिसुव्रतीयतिः वे

दाभ्यासरतोब्रह्मचारीतदर्थत्वात्तस्याश्रमस्यतावुभौप्रतिदिनमपूर्वोवातिथिवत्पूज्यावित्यर्थः तथाचयाज्ञवल्क्यः

सत्कृत्यभिक्षवेभिक्षादातव्यासुव्रतायचेति पराशरमूलंयोवेष्टितशिराभुंक्तेयोभुंक्तेदक्षिणामुखः वामपादेकरं

स्थित्वातद्वैरक्षांसिभुंजते ॥ ५८॥ भोजनकालेदिगादिनियममाह प्रथमाध्यायेएतत्संख्याकश्लोकव्याख्यानेभोज

नकालेभार्यासमक्षमएकवस्त्रादिनिषेधमाह याज्ञवल्क्योपि नभार्यादर्शनेश्नीयान्नैकवासानसंस्थितइति एत

च्छ्लोकव्याख्यानेचंडालरजस्वलादिवाक्यश्रवणकाले भोजननिषेधमाह कात्यायनः चंडालपतितोदक्यावाक्यम्श्र

नि॰

रामः

५०

त्वाद्विजोत्तमः भुंजीतग्रासमात्रंतु दिनमेकमभोजनमिति॥ एतच्छ्लोकव्याख्याने ग्रहणकालभोजनेप्रा यश्चित्त
मुक्तं॥ याज्ञवल्क्येन। चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति। तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यतीति
पूर्वश्लोकव्याख्याने दिवाचतुर्थकालकृत्यमाह। याज्ञवल्क्योपि। अहःशेषं समासीत शिष्टैरिष्टैश्च बंधुभिः उपा
स्यपश्चिमां संध्यां हुत्वाग्नींस्तानुपास्य च इतिपराशरमूलं॥ अव्रताह्यनधीयाना यत्र भैक्षचराद्विजाः तंग्रामं दं
डयेद्राजा चोरभक्तप्रदो हि सः॥५७॥ क्षत्रियो हि प्रजा रंजन् शस्त्रपाणिः प्रदंडवान् निर्जित्य परसैन्यानि
क्षितिं धर्मेण पालयेत् पुष्पमात्रं विचिनुयान्मूलच्छेदं न कारयेत्। मालाकार इवारामे न यथांगारकार
क इति॥ अस्य माधवीयव्याख्यानं॥ ब्रह्मचारिणः ब्रह्मचर्यागव्रतमाह तथा च याज्ञवल्क्यः व्रतमपीडयन्नित्युक्त्वा
विवक्षितं तद्व्रतं स्पष्टीचकार। मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं भास्करालोकनाश्लीलपरिवादांश्च वर्ज
येत् इति॥ तत्रैव पूर्वश्लोकव्याख्याने राजधर्मे शास्त्रविहितानुष्ठातॄणां शास्त्रनिषिद्धानुष्ठातॄणां च तत्तत्कृतगु
णदोषानुसारेण राज्ञा शिक्षा कर्तव्येत्याह। याज्ञवल्क्यः। अश्णास्त्रीकृतेषु चान्येषु पापयुक्तेषु कर्मसु प्रसमीक्ष्यात्म

प्र॰ए॰

५००

नाराजादंडं दंडयेत्पुपातयेत् इति। तत्रैव पूर्वश्लोकव्याख्याने राज्ञः मातुलस्य भार्यायाः सुतस्य बंधूनामपि अका
र्यकरणप्रयुक्तशिक्षा कर्तव्येत्याह याज्ञवल्क्योपि॥ अपि भ्राता सुतो भार्या श्वशुरो मातुलोपि वा नादंड्यो नाम रा
ज्ञोस्ति धर्माद्विचलितस्स्वकात् इति॥ एतच्छ्लोकव्याख्याने क्षत्रियस्य प्रजापालनमेव मुख्यो धर्मः अत एव
याज्ञवल्क्यः प्रधानः क्षत्रिये धर्मः प्रजानां परिपालनमिति॥ एतच्छ्लोकव्याख्याने राज्ञा मित्रब्राह्मणादियोग्य
तातारतम्यक्रमेण वाग्दंड धनदंड शरीरदंडादिकं कर्तव्यमित्याह॥ कात्यायनः मित्रादिषु प्रयुंजीत वाग्दंडं धि
क्तपस्विनां यथोक्तं तस्य   तकुर्युरनुक्तं साधुकल्पितं॥ एतच्छ्लोकव्याख्याने राज्ञः बहिरंगभूतराज्यकार्य
क्रमं प्रदर्शयितुमाह याज्ञवल्क्येन दर्शिताः सुमंत्रिणः प्रकुर्वीत प्राज्ञान्मौलान् स्थिरान् शुचीन् तैः सार्धं चिं
तयेद्राजा विप्रेणाथ ततः स्वयं॥ एतच्छ्लोकव्याख्याने राजसेवकस्य लक्षणमाह॥ ते च राजधर्माः याज्ञवल्क्ये
न निर्णीताः॥ महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः विनीतः सत्वसंपन्नो कुलीनः सत्यवाक्छुचिः। एतच्छ्लो
कव्याख्याने राज्ञः पत्तनादिनिर्माणस्थलमाह॥ तच्च याज्ञवल्क्येन दर्शितं॥ रम्यं प्रशस्यमाजीव्यं जांगलं देशमावसे

नी॰

रामः

५

त्र तत्र दुर्गाणि कुर्वीत जनकोशादिगुप्तये इति॥ एतच्छ्लोकव्याख्याने॥ राज्ञः आचरणीयधर्मानाह याज्ञवल्क्यो
पि॥ कुर्वीत ऋत्विक्पुरोहिताचार्यैराशीर्भिरभिनंदितः॥ दृष्ट्वा ज्योतिर्विदो वैद्यान्दद्याद्गाः कांचनं महीः॥ एतच्छ्लोकव्या
ख्याने॥ राजधर्मार्थशास्त्रज्ञं पुरोहितं। ज्योतिश्शास्त्रज्ञं दैवज्ञं च कुर्यादिति आह॥ याज्ञवल्क्योपि॥ पुरोहितं च
कुर्वीत दैवज्ञमपि चाधिकं। दंडनीत्यां च कुशलं अथर्वांगिरसे तथा इति पराशरमाधवीये॥ श्लो॥ लाभकर्म
तथा रत्नं गवां च परिपालनं कृषिकर्म च वाणिज्यं वैश्यवृत्तिरुदाहृतेति॥ अस्य माधवीयव्याख्यानं वैश्यधर्मा
नाह कुसीदादीनां वैश्यधर्मत्वमाह याज्ञवल्क्यः कुसीदकृषिवाणिज्यपाशुपाल्यं विशस्स्मृतमिति पराशरमूल
श्लोकः शूद्रस्य द्विजशुश्रूषा परमो धर्म उच्यते अन्यथा कुरुते किंचित्तद्भवेत्तस्य निष्फलं॥ इति अस्य माध
वीयं व्याख्यानं तत्र शूद्रधर्मानाह याज्ञवल्क्योपि भार्यारतश्शुचिर्भृत्यभर्ता श्राद्धक्रियापरः नमस्कारेण मं
त्रेण पंचयज्ञान्न हापयेत् इति॥ पराशर मूलश्लोकः लवणं मधु तैलं च दधि तक्रं घृतं पयः न दूष्येच्छूद्रजा
तीनां कुर्यात्सर्वेषु विक्रयमिति॥ अस्य माधवीयं व्याख्यानं तत्र शूद्रस्य शिश्रूषया जीवनासंभवे वणिग्वृत्त्या

जीवेदित्याह॥ याज्ञवल्क्यः शुश्रूषयाजीवितुमशक्तस्यवाणिज्यादिकमाह॥ शूद्रस्यद्विजशुश्रूषातयाजीवनूव
णिग्भवेत्॥ शिल्पैर्वाविविधैर्जीवेद्द्विजातिहितमाचरन्निति॥ पराशरस्मृतौआचारकांडेद्वितीयाध्यायेपराशरमू
लश्लोकः स्वयंकृतेतयाक्षेत्रइति ६ संख्याकश्लोकव्याख्याने कर्मानुष्ठानार्थंद्रव्यभावेतिलरसादिपदार्थानामपि
नियमेनधान्यसंपादनंकुर्यादित्याह॥ याज्ञवल्क्येनापि॥ धर्मार्थंविक्रयंनेयास्तिलाधान्येनतत्समाः॥ इति एत
स्मिन्नेवाध्यायेपराशरमूलश्लोकः॥ चतुर्णामपिवर्णानामेषधर्मस्सनातनः॥ अस्यमाधवीयंव्याख्यानं॥ सीमंतो
न्नयनप्रकरणे॥ अतएवयाज्ञवल्क्यः चूडांतानूसंस्कारान्निरूप्याह एवमेनश्शमंयातिबीजगर्भसमुद्भवं॥ इति॥
तत्प्रकरणेतदाहयाज्ञवल्क्यः ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वाद्यास्त्रयोद्विजाः॥ निषेकादिश्मशानांतास्तेषांवैमं
त्रतः क्रियाइति एतच्छ्लोकव्याख्याने तत्प्रकरणे जातकर्मणः कालोयाज्ञवल्क्येनदर्शितः मासेतेजातकर्मचे
ति॥ एतच्छ्लोकव्याख्यानेयज्ञोपवीतप्रकरणे कात्यायनोपित्रिवृदूर्ध्ववृतंकार्यंतंतु त्रयमधोवृतमिति पूर्वश्लो
कव्याख्याने ग्रंथिनियममाह कात्यायनः त्रिवृतंचोपवीतंस्यात्तस्यैकोग्रंथिरिष्यतेइति॥ यज्ञोपवीत परिमाण

माह। स एव कात्यायन एवेत्यर्थः पूर्वश्लोकव्याख्यानेऽस्मिल्लक्षणमाह कात्यायनः नांगुष्ठादधिका कार्या समि
त्स्थूलतया क्वचित् विनियुक्तात्वचा चैव न सकीटा न ना पिता इतिपूर्वश्लोकव्याख्याने भिक्षाचर्यप्रकारमाह याज्ञव
ल्क्यः॥ ब्राह्मणेषु चरेद्भैक्ष्यमनिंद्येष्वात्मवृत्तये॥ आदिमध्यावसानेषु भवच्छब्दोपलक्षिता इतिपूर्वश्लोकव्या।
ख्याने॥ भोजने आचार्याय भिक्षान्निवेद्य तदनुज्ञातः भुंजीतेत्यत्र॥ तथाह याज्ञवल्क्यः कृताग्निकार्यो भुंजीत
वाग्यतो गुर्वनुज्ञया आपोशनक्रियापूर्वं सत्कृत्याऽन्नमकुत्सयन् इति॥ पूर्वश्लोकव्याख्याने मधुमांसवर्जनप्रक
रणे तदाह याज्ञवल्क्यः मधुमांसंजनोच्छिष्टं शुल्कस्त्रीप्राणिहिंसनं भास्करालोकनाश्लीलपरिवादांश्च वर्ज
येदिति पूर्वश्लोकव्याख्याने ब्रह्मचर्यकालावधिमाह याज्ञवल्क्यः प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पंच वा। ग्रहणां
तिकमित्येके केशांतं चैव षोडशेति॥ पूर्वश्लोकव्याख्याने नैष्ठिकब्रह्मचर्यप्रकरणे तत्राह याज्ञवल्क्यः नैष्ठिको
ब्रह्मचारी तु वसेदाचार्यसन्निधौ तदभावे स्य तनये पत्न्यां वैश्वानरेऽपि वा॥ इति पूर्वश्लोकव्याख्यने तस्य फलमाह
याज्ञवल्क्यः अनेन विधिना देहं साधयन्विजितेंद्रियः ब्रह्मलोकमवाप्नोति न चेहाजायते पुनः इति पूर्वश्लोक।

प्र·श्रा

५०२

नि·

व्याख्याने स्नानप्रकरणे तत्र याज्ञवल्क्यः गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया वेदव्रतानि वा पारं नीत्वा ह्युभयमेव
वेति पूर्वश्लोकव्याख्याने विवाहप्रकरणे याज्ञवल्क्योपि अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्। अनन्यपू
र्विकां कांतामसपिंडां यवीयसीं इति पूर्वश्लोकव्याख्याने पुनर्भूलक्षणमाह। अक्षता च क्षता चैव पुनर्भूः संस्कृता पु
नः इति पूर्वश्लोकव्याख्याने सापिंड्यनिवृत्तिप्रकरणे याज्ञवल्क्योपि पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथेति इ
ति पूर्वश्लोकव्याख्याने शिष्टलोकविरुद्धं शास्त्रोक्तमपि नाचरणीयमित्यत्र शिष्टगर्हितस्यानुपादेयत्वं याज्ञव
ल्क्य आह। अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु इति पूर्वश्लोकव्याख्याने मातुलकन्यापरिणयपितृष्वसृ
सुतकन्यापरिणयस्य च लोकगर्हितत्वेपि देशभेदव्यवस्था या सापिंड्यसगोत्रत्वनिवृत्त्यनिवृत्तिव्यवस्थया च गर्हि
तत्वागर्हितत्वयोः स्वीकारस्य अवश्यंभावित्वात् तदुपष्टंभकप्रमाणाकांक्षायां वाजसनेयिब्राह्मणश्रुतिमाह वा
जसनेयकेपि। तस्मात्समानादेव पुरुषादत्ता चाद्यश्च जायते उत तृतीये संगच्छावहै चतुर्थे संगच्छावहा इति एत
च्छ्लोकव्याख्याने गोत्रैक्यप्रवरैक्यदोषं प्रदर्शयितुमाह याज्ञवल्क्यः वाधूकवतानकानां भिन्नगोत्राणां भार्गवीतह

न्मसावदसेतिप्रवरैक्यादिति तत्रैवाचारकांडेद्वितियाध्याये एतच्छ्लोकव्याख्याने प्रवरग्रंथकर्तृणां नामान्याह माधवाचार्यः प्रवरगोत्रयोःसमानत्वासमानत्वेबोधायनकात्यायनविश्वामित्रगर्गादिप्रणीतेषु प्रवरग्रंथेषुप्रसिध्धे इति एतच्छ्लोकव्याख्याने सत्कुलात्कन्या उपादेया इत्यभिप्रायेणउपादेयकुलंविष्टणोति उपादेयंतु याज्ञवल्क्य आह दशपूरुषविख्याताच्छ्रोत्रियाणांमहाकुलादिति॥ एतच्छ्लोकव्याख्याने विवाहः पूर्वोक्तगुणविशिष्टायपरीक्षितवरायकन्यांदत्वाकर्तव्य इत्याह याज्ञवल्क्यः एतैरेवगुणैर्युक्तस्सवर्णःश्रोत्रियोवरः यत्नात्परीक्षितेपुंस्त्वे युवाधीमान् जनप्रिय इतिविवाहेवर्जवरानाह कात्यायनः दूरस्थानामविद्यानांमोक्षधर्मानुवर्तिनां शूराणांनिर्धनानांचनदेयाकन्यकाबुधैरिति एतच्छ्लोकव्याख्यानेयःकन्यादानंकृत्वापुनरेवतांकन्यां अन्यस्मैददातिसचोरस्ययादृशोदंडःतादृशदंडार्हो भवतीत्यत्र तदाहयाज्ञवल्क्यःसकृत्प्रदीयतेकन्याहरन् तांचोरदंडभागिति॥ एतच्छ्लोकव्याख्याने वाग्दत्तामपिकन्यां पूर्ववरापेक्षयासर्वगुणसंपन्नःवरः आगतश्चेत् तस्मैदद्यादित्यत्रयाज्ञवल्क्यः दत्तामपिहरेत्पूर्वाच्छ्रेयांश्चेद्वरआव

जेदिति एतद्वाग्दानाभिप्रायकं एतच्छ्लोकव्याख्यानं वरदोषास्तु कात्यायनेनोक्ताः उन्मत्तः पतितः कुष्ठी तथा
षंडः स्वगोत्रजः चक्षुःश्रोत्रविहीनश्च तथापस्मारदूषिताविति एतच्छ्लोकव्याख्याने विवाहयोग्यदोषवत्वेनत्या
ज्योवर इत्यत्र कात्यायनोपि सतु यद्यन्यजातीयः पतितः क्लीब एव वा विकर्मस्थस्सगोत्रो वा दासो दीर्घामयो
पि वा इति एतच्छ्लोकव्याख्याने पूर्वोक्तादीन् अन्यांश्च दोषान् स्थितान् आच्छाद्यावंचनया यः कन्याग्रह
णं करोति कालांतरे तद्दोषः निश्चितश्चेत् तस्य राज्ञा दंडः कर्तव्यः इत्यत्र याज्ञवल्क्योपि अनाख्याय तु तद्दोषं
दंड्य उत्तमसाहसइति एतच्छ्लोकव्याख्याने कन्यावरणानंतरं वरः देशांतरं गतश्चेत् त्रीणि वर्षाणि इष्ट्वास
नागतश्चेत् अन्यस्मै वराय कन्यां दद्यादित्यत्र कात्यायनः वरयित्वा तु यः कश्चित्प्रवसेत्पुरुषो यदा तदा समास्त्रीन
तीत्य कन्यान्यं वरयेद्वरमिति॥ एतदपि वाग्दानविषयं॥ एतच्छ्लोकव्याने कन्यायाः शुल्कं आभरणादिकं च वरः दत्वा
संवत्सरादर्वाक् नागतश्चेत् अन्यस्मै तत्कन्या देयेत्यत्र कात्यायनेनोक्तः प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं त
या॥ धार्यं सा वर्षमेकं तु देयान्यस्मै विधानतः इति एतच्छ्लोकव्याख्याने अनेकेषां वराणां वाग्दानरूपकन्यादाने पि

निः
त
गमः
ई॰

प्रथमो वरः कन्यायामूढायां सत्यां आगच्छेत् तेन दत्तं मुक्तादिकं हरेत् अनूढायां सत्यां तु पूर्ववर एव तां लभत
इत्यत्र॥ अत एव कात्यायनः अनेकेभ्योपि दत्तायामनूढायां तु तत्र वै पूर्वागतश्च सर्वेषां लभेत तदिमां तु त्ता इति
एतच्छ्लोकव्याख्याने॥ ब्राह्मणस्य चतुर्षु वर्णेषु कन्याग्रहणं क्षत्रियस्य क्षत्रियादित्रिषु वर्णेषु कन्याग्रहणं वै
श्यस्य द्वयोः कन्याग्रहणं शूद्रस्य एकस्मिन् वर्णे कन्याग्रहणं विहितं इत्यत्र तथा च याज्ञवल्क्यः तिस्रो वर्णा
नुपूर्व्येण द्वे तथैका यथाक्रमं ब्राह्मणक्षत्रियविशां भार्या स्वा च शूद्रजन्मनः इति॥ एतच्छ्लोकव्याख्याने ब्राह्मणा
दिक्रमेण कन्याग्रहणविधानं पूर्वोक्तरीत्या वशिष्ठऋषिणा वाजसनेयिशाखाप्रविष्टपारस्करऋषिणा च प्रति
पादितमित्याह माधवाचार्यः वसिष्ठपारस्करावपि तिस्रो ब्राह्मणस्य वर्णानुपूर्व्येण द्वे राजन्यस्यैका वैश्यस्य सर्वे
षां शूद्रामेके मन्त्रवर्जं वर्जमिति एतच्छ्लोकव्याख्याने अन्यसर्वऋषिभिः स्मृतिकारैश्च ब्राह्मणस्य चातुर्वर्ण्यस्त्री
विवाहः अंगीकृतः मम तु शूद्रस्त्रीविवाहः न सम्मत इति याज्ञवल्क्य आह। अत एव याज्ञवल्क्येन मतभेदः।
स्पष्टीकृतः॥ यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः न तन्मम मतं यस्मात्तत्रायं जायते स्वयमिति एतच्छ्लो

प्र॰शा॰
१०४

कव्याख्यानेस्वस्त्रीगमनेऋतुकालमाह याज्ञवल्क्योदर्शयति॥ षोडशर्तुनिशास्त्रीणांतस्मिन्युग्मासुसंवि
शेत् ब्रह्मचार्येवपर्वण्याद्याश्चतस्रश्चवर्जयेत् इति एतच्छ्लोकव्याख्यानेऋतुगमनवर्जप्रकरणेनिषिध्यं
चनक्षत्रंयाज्ञवल्क्येनदर्शितं एवंगच्छन्स्त्रियंक्षामांमघामूलंचवर्जयेत् क्षामांलघ्वाहारादिनाकृशामि
त्यर्थः एतच्छ्लोकव्याख्यानेपूर्वनियमस्यअपवादमाहस्त्रीणांकामेसंजातेतदातभ्यः इंद्रेणदत्तवरं अनुस्मर
न्ताःगच्छेदित्याह याज्ञवल्क्यापियथाकामोभवेद्वापिस्त्रीणांवरमनुस्मरन् स्वदारनिरतश्चैवस्त्रियोर
क्ष्यायतस्स्मृताइति एतच्छ्लोकव्याख्यानेबहुपुत्रविषयकदंपत्योः यदाअपेक्षाजायतेतदाऋतुकालेषु
सर्वेष्वपिस्त्रियंगच्छेत् बहुपुत्रोत्पत्तौइहलोकपरलोकादौबहुफलंभवति इत्यत्रवाजसनेयिब्राह्मणमुदाह
रति माधवाचार्यः अतएववाजसनेयिब्राह्मणेपुत्रानुशासनविधिराम्नातः तस्मात्पुत्रमनुशिष्टंलोक्यमाहु
तमाहुस्तस्मादेनमनुशासतियदनेनकिंचिदक्षणयाकृतंभवति तस्मादेनमेनसः सर्वस्मान्मोचयतितस्मा
त्पुत्रोनामसपुत्रवानस्मिन्लोकेप्रतितिष्ठतीति॥ एतच्छ्लोकव्याख्यानेव्यभिचारिणीस्त्रियंकर्मानधिकारि

नि॰

राम॰
६२

णीं कृत्वा सर्वव्यवहारेषु निरस्कृत्य अन्नवस्त्रमात्रदानेन गृहे रक्षेदित्यत्र तथा च याज्ञवल्क्यः हृताधिकारां
मलिनां पिंडमात्रोपजीविनीं परिभूतामधश्शय्यां वासयेद्व्यभिचारिणीमिति एतच्छ्लोकव्याख्याने अधि-
विन्नापि स्त्रीर्भर्तव्यादृनिस्स्मृति सुप्रतिपाद्यते अधिविन्नेत्युक्ते निमित्तांतरेण तां पितृगृहे अथवा स्वाधीनान्यगृहे
वा तां निक्षिप्य अन्नवस्त्रादिकं दत्वा अन्यस्त्रीविवाहं प्राप्य कर्मानुष्ठानं कुर्यादिति॥ शास्त्रविधिनात्यक्ता अ
धिविन्ना अधिवेदननिमित्तानि वक्ष्यंते तदाह याज्ञवल्क्यः अधिविन्नापि भर्तव्या महदेनोन्यथा भवेदिति
अधिवेदनं भार्यांतरपरिग्रहः अधिवेदननिमित्तानि याज्ञवल्क्येन दर्शितानि सुरापी व्याधिता धूर्ता वंध्यार्थ
घ्न्य प्रियंवदा स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा इति पूर्वश्लोकव्याख्याने स्वानुकूलां विहितदृनिमत्तां नि
र्निमित्तं त्यक्त्वा अन्यस्त्रीपरिग्रहे तस्यै स्वद्रव्यतृतीयांशः स्वेन दातव्यः इत्यभिप्रायं दर्शयति तदाह याज्ञवल्क्यः
आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीं त्यजन् दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रिया इति पूर्वश्लोकव्याख्याने ब
ह्वीषु पत्नीषु सतीषु सवर्णा याः ज्येष्ठभार्या या एव सर्वधर्मकार्येषु मुख्येत्व मित्यत्र बह्वीषु पत्नीषु सहधर्मचारि

प्र॰ रा॰ णीं निर्धारयति याज्ञवल्क्यः सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरे नि॰
ति पूर्वश्लोकव्याख्याने बहुपत्नीकस्य आहिताग्नेः सर्वभार्या अपि आधानकाले अन्वारंभणकर्त्र्यः भवे
५०५ युरन्यथा तत्कर्म निष्फलं भवेदित्यत्र कात्यायनः एकैकया विना कार्यमाधानं भार्यया द्विजैः अकृतं तद्वि
जानीयात्सर्वा नान्वारभंति येति यत्तु विष्णुवचनं अग्निहोत्रादियज्ञेषु न द्वितीयया सह चरेदिति अस्य पत्नी
सहाधिकारनिषेधाभिप्रायकएतद्व्याख्यानं बोधायनकात्यायनवचनविरोधान्नादरणीयं इति माधवेनोक्तं
तत्रैव विशेषमाह कात्यायनः अग्निहोत्रादिशुश्रूषां बहुभार्यः सवर्णया कारयेत्तद्बहुत्वे च ज्येष्ठया गर्हिता न
चेत् एतच्छ्लोकव्याख्यान बह्वीनां पत्नीनां मध्ये ज्येष्ठाया एव मुख्याधिकारः यत्तु कात्यायनेनोक्तं प्रथमा धर्मप
त्नी स्याद्द्वितीया रतिवर्धनी दृष्टमेव फलं तत्र नादृष्टमुपपद्यते इति एतच्छ्लोकव्याख्याने पुत्राणां मध्ये सवर्ण रा॰ म॰
स्त्रीपुत्राणामेव संतानवृद्धिकरत्वं नासवर्णीपुत्राणां संततित्वेन व्यवहारः संभवति इत्यत्र याज्ञवल्क्यः स १३
र्णेभ्यः सवर्णासु जायंते हि सजातयः अनिंद्येषु विवाहेषु पुत्राः संतानवर्धनाः इति॥ एतच्छ्लोकव्याख्या

निअनुलोमप्रभवजातिविशेषानाह याज्ञवल्क्यः विप्रान्मूर्धावसिक्तोहिक्षत्रियायांविशःस्त्रियां। अंबष्ठःशूद्र्यां
निषादःजातःपारशवोपिवा इति एतच्छ्लोकव्याख्याने अनुलोमप्रकरण एवतदवांतरविशेषस्समनुयाज्ञ
वल्क्यदेवलादिभिर्दर्शितमित्यत्र माधवाचार्यः एकत्रनिषादपारशवसंज्ञाविकल्पस्य मनुदेवलयाज्ञव
ल्क्यैरुदाहृतत्वात् एतच्छ्लोकव्याख्याने प्रतिलोमजजातिविशेषविभागे याज्ञवल्क्योपि ब्राह्मण्यांक्षत्रियात्सू
तोवैश्याद्वैदेहकस्तथा शूद्राज्जातस्तुचंडालस्सर्वधर्मबहिष्कृतः इति एतच्छ्लोकव्याख्याने प्रतिलोमजअ
नुलोमजानांमध्ये अनुलोमजाउत्तमाः प्रतिलोमजाः अधमाः इत्यत्र यज्ञवल्क्योपि असत्संतस्तुवि
ज्ञेयाः प्रतिलोमानुलोमजाः इति एतच्छ्लोकव्याख्याने तत्रोपाकर्मविधिमाह याज्ञवल्क्यः अध्याया
नामुपाकर्मश्रावण्यां श्रवणेनवा हस्तेनौषधिभावेवा पंचम्यांश्रावणस्यतु इति एतच्छ्लोकव्याख्या
ने॥ अथोत्सर्जनंयाज्ञवल्क्यः॥ पौषमासस्य रोहिण्यां मष्टकायामथापिवा जलांते छंदसांकुर्यादुत्सर्गंवि
धिवद्बहिरिति एतच्छ्लोकव्याख्यान उपाकरणोत्सर्जने प्रशंसति कात्यायनः प्रत्यब्दंयदुपाकर्मसो

त्सर्गविधिवद्द्विजैः कि यतेच्छंदसां तेन पुनराप्यायनं भवेदिति एतच्छ्लोकव्याख्याने वानप्रस्थप्रकरणे त
त्र याज्ञवल्क्यः सुतविन्यस्तपत्नीकस्तया वानुगतो वनं वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेदिति ए
तच्छ्लोकव्याख्याने वनं प्रविष्टस्य कर्तव्यमाह याज्ञवल्क्यः अफालकृष्टेनाग्नींश्च पितृदेवातिथीनपि
भृत्यांश्च तर्पयेच्छ्मश्रुजटालोमभृदात्मवानिति एतच्छ्लोकव्याख्याने वानप्रस्थप्रकरणे तस्य धान्यसं
चयनप्रस्तावे संग्राह्यद्रव्यस्येयत्तामाह याज्ञवल्क्यः अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा अर्थ-
स्य संचयं कुर्यात् कृतमाश्वयुजे त्यजेदिति एतच्छ्लोकव्याख्याने वानप्रस्थस्य तपोनियममाह याज्ञवल्क्यः
दान्तस्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात् स्वाध्यायवान् दानशीलः सर्वसत्त्वहिते रतः इति एतच्छ्लोकव्या-
ख्याने वानप्रस्थस्य अग्निहोत्रादिकार्येषु असमर्थश्चेत् श्रोताग्नीन् आत्मनि समारोप्य एवं चरेदित्यत्र अ
ग्निपरिचर्यायामक्षमं प्रत्याह याज्ञवल्क्यः अग्नीनप्यात्मसात्कृत्वा वृक्षवासो मिताशनः वानप्रस्थगृहे
षिवयानार्थं भैक्षमाचरेत् इति एतच्छ्लोकव्याख्याने सर्ववानप्रस्थधर्माननुष्ठातुमशक्तश्चेत् देहपात

नि·
एमः
ईष

एवकर्तव्यद्दूत्यत्रसर्वानुष्ठानासमर्थप्रत्याह याज्ञवल्क्यः वायुभक्षः प्रागुदीचीं गच्छेद्दावर्ष्मसंचयादिति ए
तच्छ्लोकव्याख्यानेवानप्रस्थः सन्यासंकरिष्यन् कर्तव्यमाह याज्ञवल्क्योपि वनाद्गृहाद्वाकृत्वेष्टिं सर्ववेदस
दक्षिणां प्राजापत्यां तदंतेतानग्नीनारोप्यचात्मनि इति एतच्छ्लोकव्याख्याने संन्यासप्रकरणेविद्वत्संन्यास
माह वाजसनेयिब्राह्मणात्मकबृहदारण्यश्रुतिः वाजसनेयिकब्राह्मणमिति एतंवैतमात्मानंविदित्वाब्राह्म
णाः पुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंतीति एतच्छ्लोकव्याख्याने
ब्राह्मणादीनांप्रत्येकंचतुर्णामपिवर्णानां आश्रम   तारतम्यमाह। योगयाज्ञवल्क्यः चत्वारोब्राह्मणस्यो
क्ताआश्रमाश्रुतिचोदिताः क्षत्रियस्यत्रयः प्रोक्ताद्वावेकोविश्यशूद्रयोः इति एतच्छ्लोकव्याख्याने संन्या
सप्रकरणे अतएवयाज्ञवल्क्येनसंन्यासप्रकरणेद्विजशब्दः प्रयुक्तः संनिरुध्येंद्रियग्रामंरागद्वेषौप्रहाय
च भयंहित्वाचभूतानाममृती भवतिद्विजः इति एतच्छ्लोकव्याख्यानेसंन्यासप्रकरणेआदौसंन्यासंक
रिष्यन् अष्टश्राद्धानिकर्तुं योग्यतासंपादनाय आश्रम्यनाश्रमिभेदेन द्वैच्छिकविकल्पमाह। तदाह का

त्यायनः कृच्छ्रं तु चतुरः कृत्वा पावनार्थमनाश्रमी आश्रमी चेत्ततः कृच्छ्रं तेनाशौ योग्यतां व्रजेदिति एत
च्छ्लोकव्याख्याने संन्यासप्रकरणे प्रैषोच्चारणक्रममाह तदाह कात्यायनः आसन्यग्नीन् समारोप्य वेदिम
ध्ये स्थितो हरिं ध्यात्वा हृदि त्वनुज्ञातो गुरुणा प्रैषमीरयेदिति एतच्छ्लोक व्याख्याने संन्यासप्रकरणे ल
घुजाबालोपनिषद्विजनक याज्ञवल्क्य संवादे याज्ञवल्क्येन संन्यासे उपदिष्टे अत्रिणा अयज्ञोपवीतीक
थं ब्राह्मण इति याज्ञवल्क्यं प्रति ब्राह्मण्ये आक्षिप्ते याज्ञवल्क्यो समाधत्ते तस्यामेव जाबालश्रुतौ ज
नक याज्ञवल्क्य संवादरूपेण यज्ञोपवीतत्यागआक्षिप्य समाहितः पृच्छामि त्वा याज्ञवल्क्य यज्ञोपवीती
कथं ब्राह्मण इति स होवाच याज्ञवल्क्यः इदमेवास्य तद्यज्ञोपवीतं य आत्मेति आरुणिश्रुतावपि पार
महंस्यं प्रपंचितं एतच्छ्लोकव्याख्याने ब्राह्मणस्यैव संन्यासाधिकारः क्षत्रियवैश्ययोरपि द्विजत्वे

न द्विजमात्रस्याधिकार इत्यत्र विप्रतिपत्तौ ब्राह्मणस्यैव अधिकार इति निगमनप्रदर्शनप्रस्तावे वाजसनेयि
ब्राह्मणे तदुपलंभात् एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्यु

ध्यायाध भिक्षाचर्यंचरंति इतिविद्वत्संन्यासे प्रमाणं तमेवविदित्वामुनिर्भवति एतमेवप्रव्राजिनोलोकमिच्छं
तः प्रव्रजंति इतिएतच्छ्लोकव्याख्यानेसंन्यासी असंगतयास्थित्वाभिक्षार्थंग्रामंप्रविशेदित्यत्र तदाह याज्ञव
ल्क्यः सर्वभूतहित शांतस्त्रिदंडीसकमंडलुः एकारामः परिव्रज्यभिक्षार्थंग्राममाविशेदिति तृतीयाध्यायप्रा
रंभेपराशरमूलं अतःशुद्धिंप्रवक्ष्यामिजननेमरणेतथा दिनत्रयेणशुध्यंतिब्राह्मणाः प्रेतसूतके ॥१॥अस्य
श्लोकस्यमाधवीयंव्याख्यानंसूतकेमृतकेचब्राह्मणादीनांआशौचव्यवस्थाप्रकरणे अतएवयाज्ञवल्क्योन्या
यवर्तिनःशूद्रस्याप्यर्धमाशौचमाह क्षत्रस्यद्वादशाहानिविशः पंचदशैवतुत्रिंशद्दिनानिशूद्रस्य तदर्धंन्या
यवर्तिन इति एतस्मिन्नेवाध्यायेपराशरमूलंजातौविप्रोदशाहेनद्वादशाहेनभूमिपः वैश्यःपंचदशाहेनशू
द्रोमासेनशुध्यति अस्यमाधवीयंव्याख्यानंवर्णक्रमेण आशौचदिनसंख्याप्रकरणेह स्म याज्ञवल्क्यः कुमा
रजन्मदिवसेविप्रैः कार्यःप्रतिग्रहः हिरण्यभूगवाश्वाजा —— वासश्शय्यासनादिषु तत्रसर्वप्रतिग्राह्यं
पक्वान्नंतुनभक्षयेत् भक्षयित्वातुतन्मोहाद्द्विजश्चांद्रायणंचरेत् इतिएतस्मिन्नेवाध्याये पराशरमूलंभ

अ॰ शा॰ ६६

स्वग्निमरणे चैवदेशांतरमृते तथाबाले प्रेते च संन्यस्ते सद्यः शौचं विधीयते अस्य माधवीयंव्याख्यानं भृग्वग्नि
पतनादिबुद्धिपूर्वमरणे संन्यासादिमरणे च आशौचाभावः स्नानमात्रमित्यत्र तथा च याज्ञवल्क्यः हतानांनृ
पगोविप्रैरन्वक्षं चात्मघातिनामिति एतच्छ्लोक व्याख्याने बालाशौचप्रकरणे कात्यायनोपि आनिवृत्तेदशा
हितु पंचत्वं यदि गच्छति सद्य एव विशुद्धिस्स्यान्नप्रेतं नोदकक्रिया इति एतस्मिन्नेवाध्याये पराशरमूलं
देशांतरमृतः कश्चित् सगोत्रः श्रूयते यदि नत्रिरात्रमहोरात्रं सद्यः स्नानेन शुध्यति अस्य माधवीयं व्याख्यानं
देशांतरमृत सपिंडाशौचप्रकरणे याज्ञवल्क्योपि प्रोषिते कालशेषस्स्यात् पूर्णे दत्वोदकं शुचिरिति एतस्मिन्नेवा
ध्याये पराशरमूलं यदि गर्भो विपद्येत स्रवते चापि योषितः यावन्मासंस्थितो गर्भो दिनं तावत्तु सूतकं ॥ २२ ॥ अस्य
माधवीयं व्याख्यानं अजातदंतादिबालशौचप्रकरणे तथा च याज्ञवल्क्यः गर्भस्रावे मासतुल्यानिशाश्शुद्धेस्तु
कारणमिति एतस्मिन्नेवाध्याये पराशरमूलं आदंतजन्मनस्सद्य आचूडान्नैशिकी क्रिया त्रिरात्रमाव्रतादेशाद्द
शरात्रमतः परम् २६ ॥ अस्य माधवीयं व्याख्यानं गुर्वाद्याशौचप्रकरणे यत्तु याज्ञवल्क्यवचनं गुर्वंतेवासिनृ

नि॰

राम:

६६

चानमातुलश्रोत्रियेषुचेति एतच्छ्लोकव्याख्यानेतत्प्रकरणेतदाह याज्ञवल्क्यः निवासराजनिप्रेतेतदहः
शुद्धिकारणमितिपराशरमूलं शिल्पिनः कारुकावैद्यादासीदासाश्चनापिताः राजानः श्रोत्रियाश्चैवसद्यःशौ
चाः प्रकीर्तिताः ॥ १९ ॥ २० ॥ २१ ॥ तृतीयसंख्याकश्लोकव्याख्याने अग्निहोत्रिब्रह्मचारिणोराशौचाभावप्रक
रणं याज्ञवल्क्योपि ऋत्विजांदीक्षितानांच यज्ञीयंकर्मकुर्वतांसत्रीव्रतीब्रह्मचारिदातृब्रह्मविदांतथाइति ए
तस्मिन्नेवाध्यायेपराशरमूलं अंतरातुदशाहस्यपुनर्मरणजन्मनि तावत्स्यादशुचिर्विप्रोयावत्तत्स्यादनि
र्दशं ॥ २७ ॥ अस्यव्याख्यानं आशौचमध्येप्राप्ताशौचप्रकरणं याज्ञवल्क्योपि अंतराजन्ममरणेशेषाहोभिर्वि
शुध्यति इति एतस्मिन्नेवाध्याये पराशरमूलं यस्तुभग्नेषुसैन्येषुविद्रवत्सुसमंततः परित्रांतुंयदागच्छेत्सचक्र
तुफलंलभेत् अस्यमाधवीयव्याख्यानंविरक्तस्यसंन्यासिनः विरक्तस्ययुद्धेशत्रुसैन्याभिमुखः सन्देहाभिमा
नंत्यक्त्वायुद्धार्थंगच्छतःप्रव्रस्तलोकावाप्तिफलंप्रदर्शनप्रस्तावे ॥ वाजसनेयिब्राह्मणं वाजसनेयिशाखायांभु
ज्युब्राह्मणे क्वचन्दश्वमेधयाजिनोगच्छंतीत्यादिप्रश्नप्रतिवचनयोर्विस्पष्टमवगम्यते अस्मिन्नेवाध्यायेपरा

प्र. १

५०९

शरमूलं असगोत्रमबंधुंच प्रीतिभूतं द्विजोत्तमं वहित्वाच दहित्वाच प्राणायामेन शुध्यति ॥ ३९ ॥ अस्य माध
वीयव्याख्याने ब्रह्मचारिणश्शावदहनप्रकरणे याज्ञवल्क्योपि आचार्यपितृपाध्यायान्निर्हृत्यापि व्रती व्रती स
तदन्नंच नाश्नीयान्नचतैस्सह संवसेदिति एतस्मिन्नेवाध्याये पराशरमूलं। अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव
वा स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ॥ ४० ॥ अस्य व्याख्याने शवानुगमनाशौचनिर्णयप्रकरणे त।
थाच याज्ञवल्क्यः अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक्छुचिरिति एतस्मिन्नेवाध्याये पराशरमूलं विनि
वर्त्य यदा शूद्राद्ग्रामुदकान्तमुपस्थिताः द्विजैस्तदानुगन्तव्य एष धर्मस्सनातनः अस्य माधवीयव्याख्याने अनु
गमनादिविधिस्तु याज्ञवल्क्येन दर्शितः आश्मशानादनुव्रज्य इतरो ज्ञातिभिस्सह यमसूक्तं तथा गाथां जपद्भि
र्लौकिकाग्निना इति पूर्वश्लोकव्याख्याने दहने अग्निविशेषप्रकरणे तदाह वृद्ध याज्ञवल्क्यः आहिताग्निर्य
थान्यायं दग्धव्यस्त्रिभिरग्निभिः अनाहिताग्निरेकेन लौकिकेनेतरो जनः इति तच्छ्लोकव्याख्याने अनाहिता
ग्नेः स्नानानन्तरं दाहनमित्यत्र तथाच कात्यायनः दौर्बलं स्नापयित्वाच शुद्धचेलाभिसंवृतं दक्षिणाशिरसं भू

राम:
६०

मीबर्हिष्मत्यांनिवेशयेदिति एतच्छ्लोकव्याख्याने चितिअनवेक्षमाणः स्नात्वाजलांजलिंदत्वा गृहं प्रविशेयु
रित्यत्र तथाहकात्यायनः तथा वल्मीकमत्यापस्तर्व एवशवस्पृशः स्नात्वासचेलमाचम्यदद्युरस्योदकंस्थ
लेइति एतच्छ्लोकव्याख्याने मातामहाचार्यादीनामपि यथाधिकारप्रेतकर्मकर्तव्यमित्यत्रतथाहयाज्ञ
वल्क्यः एवंमातामहाचार्यप्रेतानामुदकक्रियामतिलोदकंसखिप्रत्तास्वस्त्रियश्चश्वशुरर्त्विजाः इतिएतच्छ्लोकव्या
ख्यानेआतुराश्वासनप्रकरणे तथाचयाज्ञवल्क्यः कृतोदकान्समुत्तीर्णान्मृदुशाद्वलसंस्थितान् स्नातानप
वदेयुस्तानितिहासैः पुरातनैरिति एतच्छ्लोकव्याख्यानेतत्प्रकरणेकात्यायनः एवंकृतोदकंसम्यक्सर्वान्
शाद्वलसंस्थितान् आप्लुत्यपुनराचांतान्वदेयुस्तेसुयायिनः इतिएतच्छ्लोकव्याख्याने आतुराश्वासनानंत
रंकृत्यंयाज्ञवल्क्येनदर्शितंइतिसंश्रित्यगच्छेयुर्गृहंबालपुरःसराः पुरस्यनिंबपत्राणिनियताद्वारिवेश्म
नः इतिएतच्छ्लोकव्याख्यानेप्राणनिर्गमनस्थलेअंतरिक्षेशिक्यादौमृण्मयपात्रे एकस्मिन्क्षीरं अन्यस्मिन्
उदकमपिस्थापनीयमित्यत्रतदाहयाज्ञवल्क्यः जलमेकाहमाकाशेस्थाप्यंक्षीरंचमृण्मयइति एतच्छ्लोक

व्याख्याने श्राद्धस्थलमाह याज्ञवल्क्योऽपि परिश्रिते शुचौ देशे दक्षिणाप्रवणे तथेति एतच्छ्लोकव्याख्याने श्राद्धभेदप्रकरणे तदाह याज्ञवल्क्यः अमावास्याष्टकावृद्धिः कृष्णपक्षोयनद्वयं द्रव्यब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः एतच्छ्लोकव्याख्याने श्राद्धकालविशेषे काम्यफलप्रकरणे तदाह याज्ञवल्क्यः स्वर्ग्यं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा पुत्रं श्रैष्ठ्यं च सौभाग्यं समृद्धिं मुख्यतां शुभामिति एतच्छ्लोकव्याख्याने मासिश्राद्धमहालयश्राद्धादिषु तिथ्यादिषु तिथ्यादिविशेषफलविशेषप्रतिपादनप्रकरणे याज्ञवल्क्योऽपि कन्यां कन्यावेदिनश्च पशून्वै सत्सुतानपि द्यूतं कृषिं च वाणिज्यं द्विशफैकशफांस्तथा इति एतच्छ्लोकव्याख्याने तत्प्रकरणे अत एव कात्यायनः स्त्रियोऽप्रतिरूपाः प्रतिपदि द्वितीयायां तृतीयायां चतुर्थ्यां क्षुद्रपशवः पुत्राः पंचम्यां द्यूतं षष्ठ्यां इत्यादि एतच्छ्लोकव्याख्याने महालयप्रकरणे यत्तु कालायनेनोक्तं नभस्यास्यपरे पक्षे तिथिषोडशिकं तु यत् कन्यस्थार्कान्वितं चेत्स्यात्स कालः श्राद्धकर्मणि इति एतच्छ्लोकव्याख्याने महालयप्रकरणे चतुर्दशीश्राद्धव्यवस्थाप्रस्तावे याज्ञवल्क्योऽपि शस्त्रेण तु हता ये वै तेभ्यस्तत्र

निं॰

रामः

प्रदीयत इति एतच्छ्लोकव्याख्याने असपिंडानां बांधवत्रयादीनां एकोद्दिष्टमेवेत्यत्र कात्यायनोपि संब
धिबांधवादीनामेकोद्दिष्टं तु सर्वथेति एतच्छ्लोकव्याख्याने आमश्राद्धानुष्ठानकालमाह कात्यायनोपि आ
पद्यनग्नौ तीर्थे च प्रवासे पुत्रजन्मनि आमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वलेति एतच्छ्लोकव्याख्याने श्रा
द्धब्राह्मणपरीक्षाप्रकरणे श्राद्धे भोजनीयब्राह्मणा याज्ञवल्क्येन दर्शिताः अग्र्याः सर्वेषु वेदेषु श्रोत्रियो
ब्रह्मविद्युवा वेदार्थवित् ज्येष्ठसामा त्रिमधुः त्रिसुपर्णिकः इति एतच्छ्लोकव्याख्याने श्राद्धप्रकरणे स्वली
यादिबंधूनां श्राद्धनिमंत्रणप्रस्तावे प्रथमपक्षब्राह्मणासंभवे अनुकल्पपक्षमनुकरोति अत्रानुक
ल्पो याज्ञवल्क्येन दर्शितः। स्वस्रीयऋत्विग्जामातायाज्यश्वशुरमातुलाः। त्रिनाचिकेतदौहित्रशिष्यसंबंधि
बांधवा इति। एतच्छ्लोकव्याख्याने॥ श्राद्धे वर्जनीयब्राह्मणाः याज्ञवल्क्येन दर्शिताः॥ रोगी हीनातिरिक्तांगः
काणः पौनर्भवस्तथा। अवकीर्णी कुंडगोलौ कुनखी श्यावदंतकः इति॥ एतच्छ्लोकव्याख्याने॥ परिवेत्रादिनि
षिद्धब्राह्मणप्रकरणे कात्यायनोपि॥ देशांतरस्थक्लीबैकवृषणांश्च सहोदरान्। वेश्यातिसक्तपतितशूद्रतु

स्यातिरोहिणः॥ इति॥ एतच्छ्लोकव्याख्याने॥ पितृवर्गे मातामहवर्गे च एकैकं ब्राह्मणं निमंत्र्य उभयवर्गयोर
पि। एकमेव विश्वेदेवस्थाने ब्राह्मणं निमंत्रयेदित्यत्र। अत एव याज्ञवल्क्योपि॥ संकोचपक्षमेवांगीकृतवान
द्वौ दैवे प्राक्त्रयः पित्र्ये उदगेकैकमेव वा॥ मातामहानामप्येवं तंत्रं वा वैश्वदेविकमिति॥ एतच्छ्लोकव्याख्याने॥
संधिन्यादिग्राम्यारण्यकपशुक्षीरपाननिषेधप्रस्तावे॥ याज्ञवल्क्योपि॥ संधिन्यनिर्दशावत्सं गोः पयः परिवर्ज
येत्॥ औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकमिति॥ एतच्छ्लोकव्याख्याने॥ भोज्यान्ननिषेधप्रकरणे॥ तथा च
याज्ञवल्क्यः॥ कदर्यबद्धचोराणां क्लीबरंगावतारिणां वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणामिति॥ एत
च्छ्लोकव्याख्याने॥ आपत्काले। अग्निहीनस्यान्नं अदत्तमप्यन्नं प्राणात्यये भोजनीयं भवंति॥ अनापदि तु न भोज्य
मित्यत्र अत एव याज्ञवल्क्यः॥ अदत्तान्यग्निहीनस्य नान्नमद्यादनापदीति॥ अग्निहीनः शूद्रः॥ एतच्छ्लोकव्या
ख्याने॥ अविधिना पशुहननप्रस्तावे यच्च याज्ञवल्क्येनापि॥ वसेत्स नरके घोरे दिनानि षेधपशुलोमभिः॥ संमि

तानि दुराचारो यो हंत्यविधिना पशूनिति॥ एतच्छ्लोकव्याख्याने॥ श्राद्धनिमंत्रणोत्तरदिवसे तद्ब्राह्मणाय तैलोद्व

र्तनादि सामर्थ्योदद्यादित्यत्र कात्यायनः ॥ तैलमुद्वर्तनंस्नानंदंतधावनमेवच कृत्तनरोमनखेभ्यस्तु दद्यात्तेभ्योपरेहनीति ॥ एत
च्छ्लोकव्याख्याने । देवताकर्मणि दक्षिणजान्वाच्यकुर्यात् ॥ पित्र्येकर्मणि तु सव्यंजान्वाच्यकुर्यादित्यत्र ॥ अत्रैवविशेषां
तरमाह कात्यायनः ॥ दक्षिणंपातयेज्जानुदेवान्परिचरन्सदा ॥ पातयेदितरज्जानुंचपितॄन्परि   रंत्सदेति ॥ एतच्छ्लोकव्याख्या
नेदर्शादिश्राद्धप्रकरणे पितृविश्वेदेवनिमंत्रणप्रकारमाह याज्ञवल्क्योपि ॥ द्वौदैवेप्राक्त्रयः पित्र्यउदगेकैकमेववा ॥ माता
महानामप्येवंतंत्रंवावैश्वदेविकमिति ॥ एतच्छ्लोकव्याख्याने ॥ श्राद्धप्रकरणे विष्टरार्थान्कुशान्दद्यादित्यत्र अतएवया
ज्ञवल्क्यः ॥ पाणिप्रक्षालनंकृत्वाविष्टरार्थान्कुशानपीति ॥ एतच्छ्लोकव्याख्यानेदर्शश्राद्धादिप्रकरणेअर्घ्यपात्रयोःयवा
दिप्रकीर्णप्रस्तावे ॥ तथाचयाज्ञवल्क्यः ॥ यवैरन्ववकीर्याथभाजनेसपवित्रके ॥ शन्नोदेव्यापयः क्षिप्त्वायवोसीतियवां
स्तथेति एतच्छ्लोकव्याख्यानेश्राद्धप्रकरणे अर्घ्यपात्राणांसौवर्णरजतादिद्रव्यविशेषत्वमाह कात्यायनः ॥ सौवर्णराज
तोदुंबरखड्गादीत्यादि ॥ एतच्छ्लोकव्याख्याने ॥ पवित्रादिमंत्रानाह योगयाज्ञवल्क्यः ॥ पवित्रेस्थइतिमंत्रेणद्वेपवित्रेच
कारयेत् अंतर्दर्भेकुशच्छिन्नेकौशेप्रादेशसम्मितइति ॥ एतच्छ्लोकव्याख्याने तत्रैवअर्घ्यप्रदानमंत्रः ॥ तदाह याज्ञवल्क्यः
यादिव्याइतिमंत्रेणहस्तेष्वर्घ्यंविनिक्षिपेदिति ॥ एतच्छ्लोकव्याख्याने ॥ तत्रैवब्राह्मणानांगंधपुष्पादिदानप्रकरणं ॥ तदाह
याज्ञवल्क्यः । अपसव्यंततःकृत्वापितॄणामप्रदक्षिणमिति ॥ एतच्छ्लोकव्याख्याने ॥ तत्रैवतत्प्रकरणेतदाहकात्यायनः ॥

गन्धान्ब्राह्मणसात्कृत्वापुष्पाण्यृतुभवानिचधूपंचैवानुपूर्व्येणह्यग्नौकुर्यात्ततःपरमिति॥एतच्छ्लोकव्याख्यानेअग्नौकरण
प्रकारमाहयाज्ञवल्क्यः॥अग्नौकरिष्यन्नादायपृच्छत्यन्नंघृतप्लुतंकुरुष्वेत्यभ्यनुज्ञातोहुत्वाग्नौपितृयज्ञवदिति॥ए
तच्छ्लोकव्याख्याने अनग्निकानांपाणिहोमोविधीयतइत्यत्रपाणौहोमेविशेषःकात्यायनेनदर्शितः॥पित्र्येयःपङ्क्तिमूर्ध
न्यस्तस्यपाणावनग्निकः॥हुत्वामंत्रवदन्येषांतूष्णींपात्रेषुनिक्षिपेदिति॥एतच्छ्लोकव्याख्याने॥अग्निमान्मातामहश्राद्ध
मपिदर्शश्राद्धादौसमानतंत्रेणकुर्यादित्यत्र॥तथाचकात्यायनः॥मातामहस्यभेदेपिकुर्यात्तंत्रेणसाग्निकइति॥एतच्छ्लोक
व्याख्याने॥श्राद्धान्नदानप्रकरणे॥तत्रविशेषमाह याज्ञवल्क्यः॥दत्वान्नंपृथिवीपात्रमितिपात्राभिमंत्रणंकृत्वेदंविष्णु
रित्यन्नेद्विजांगुष्ठंनिवेशयेदिति॥एतच्छ्लोकव्याख्यानेव्याहृतिपूर्वकंसावित्रीमधुवातेत्यादिमंत्रजपपूर्वकंयथासुखंजु
षध्वमितिब्राह्मणान्प्रतिनिवेदयेदित्यत्रतथाचयाज्ञवल्क्यःसव्याहृतिकांगायत्रींमधुवाताइतित्र्यृचंजप्त्वायथासुखंवा
च्यंभुंजीरंस्तेपिवाग्यताइति।एतच्छ्लोकव्याख्यानेअभिश्रवणप्रकरणेभोजनोपक्रमानंतरकर्त्तव्यमाह कात्यायनः॥अ
श्नत्सुजपेद्व्याहृतिपूर्वांगायत्रींसप्रणवांसकृत्त्रिर्वारक्षोघ्नीः पित्र्यमंत्रान्पुरुषसूक्तमप्रतिरथमन्यानिचपवित्राणीति॥
एतच्छ्लोकव्याख्यानेतृप्तिप्रश्नप्रकरणेतदाहकात्यायनः।गायत्रींमधुमतींमध्वितिचजप्त्वातृप्ताःस्थेतिपृच्छतीति॥एतच्छ्लो
कव्याख्यानेपिंडदानप्रकरणेपिंडनिर्वपणंकुर्यात्तदाहयाज्ञवल्क्यः।सर्वमन्नमुपादायसतिलंदक्षिणामुखः।उच्छि

श सन्निधौ पिंडान् दद्यात्तु पितृयज्ञवदिति ॥ एतच्छ्लोकव्याख्याने तृप्तान् पितॄन् प्रति अमीमदंत पितर इति निवेदनमित्य
त्र अनंतरकर्त्तव्यमाह कात्यायनः ॥ अत्र पितर इत्युक्त्वोदङ्मुख अतमनावृत्यामीमदंत पितर इति जपतीति ॥ एत
च्छ्लोकव्याख्याने अक्षय्योदकमस्त्विति अन्नसफलत्ववचनमित्यत्र अनंतरकृत्यमाह याज्ञवल्क्यः ॥ ततः कुर्यादक्ष
य्योदकमेव चेति ॥ एतच्छ्लोकव्याख्याने श्राद्धानंतरं पितॄनुद्वासयिष्यन् एतन्मंत्रान् पठति यजमानः ॥ अनंतरं याज्ञ
वल्क्यः ॥ दत्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत् ॥ वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः स्वधोच्यतमिति एतच्छ्लोकव्या
ख्याने ॥ ब्राह्मणविसर्जनात् पूर्वं नोच्छिष्टोत्थरणमित्यत्र अतएव याज्ञवल्क्यः ॥ तत्रैव सत्सु विप्रेषु द्विजोच्छिष्टं नैमाजें
येदिति एतच्छ्लोकव्याख्याने ब्राह्मणान् प्रदक्षिणीकृत्य विसर्ज्य पितृशेषं भुंजीतेत्यत्र तदाह याज्ञवल्क्यः ॥ प्रदक्षिणमनुव्रज्य
भुंजीत पितृसेवितमिति ॥ एतच्छ्लोकव्याख्याने ॥ सपिंडीकरणे प्रेतैकोद्दिष्टप्रत्याब्दिकश्राद्धानि विना अन्यत्र सर्वश्राद्धेषु
षट्पिंडा एवं नियमाः इत्यत्र तथा च कात्यायनः ॥ कर्षूसमन्वितं मुक्त्वा तदाद्यं श्राद्धषोडशं ॥ प्रत्याब्दिकं च शेषेषु पिंडाः स्युः
षडिति स्थितिरिति एतच्छ्लोकव्याख्याने एकोद्दिष्टलक्षणमाह । याज्ञवल्क्यः ॥ एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकं
॥ आवाहनाग्नौकरणरहितं ह्यपसव्यवत एतच्छ्लोकव्याख्याने एकोद्दिष्टलक्षणं प्रदर्शितं ॥ कात्यायनेनापि ॥ अथैको
द्दिष्टमेकं पात्रमेकार्घ्यमेकः पिंडो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः ॥ एतच्छ्लोकव्याख्याने

द्वादशमासिकानां कालो याज्ञवल्क्येन दर्शितः ॥ मृतेहनीतु कर्त्तव्यं प्रतिमासंतु वत्सरं प्रतिसंवत्सरं चैव माद्यमेकादशेह नि। एतच्छ्लोकव्याख्याने सपिंडीकरणप्रस्तावे कात्यायनोपि। अथ सपिंडीकरणं संवत्सरे पूर्णे त्रिपक्षे वा यदहर्वा वृद्धिरापद्यत इति। एतच्छ्लोकव्याख्याने सपिंडीकरणकालविशेषविधाने तदाह याज्ञवल्क्यः। आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात्। अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यत इति। एतच्छ्लोकव्याख्याने विशेषनिषेधः कात्यायनेनोक्तः। निर्वृत्ते वृद्धितंत्रंतु मासिकानि न तंत्रयेदिति। एतच्छ्लोकव्याख्याने सपिंडीकरणे इतिकर्तव्यतामाह। याज्ञवल्क्यः। गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं। अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेदिति। एतच्छ्लोकव्याख्याने सपिंडीकरणविधानमाह कात्यायनोपि ॥ ततः संवत्सरे पूर्णे चत्वारि पात्राणि तिलगंधोदकैः पूरयित्वा त्रीणि पितृणामेकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिंचतीति ॥ एतच्छ्लोकव्याख्याने वृद्धिश्राद्धप्रकरणे तत्र याज्ञवल्क्यः ॥ एवं प्रदक्षिणावृत्तो वृद्धौ नांदीमुखान्पितॄन्। यजेत दधिकर्कंधूमिश्रान्पिंडान्यवैः क्रिया इति ॥ एतच्छ्लोकव्याख्याने नांदिश्राद्धविधानं तेच विशेषाः कात्यायनेन दर्शिताः ॥ आभ्युदयके प्रदक्षिणमुपचारः पित्र्यमंत्रवर्जमृजवो दर्भाः यवैस्तिलार्थः सुसंपन्नमिति तृप्तिप्रश्नः सुसंपन्नमित्यनुज्ञा ॥ दधिबदराक्षतमिश्राः पिंडा नांदीमुखाः पितरः नावाह यिष्यत इति पृच्छति नांदीमुखाः पितरः प्रियंतामित्यक्षय्यस्थाने नांदीमुखान्पितॄनर्चयिष्यत इति पृच्छतीति। एतच्छ्लोकव्याख्याने पितुः कर्मकर्तृकौ दौ पौत्रसद्भावेपि पुत्रस्यैव कर्तृत्वमित्यत्र नैतत्सौत्रेण कर्तव्यं पुत्रवांश्चेत्यितामह इति कात्यायनस्म॰

रणात् ॥ एतच्छ्लोकव्याख्याने सपिंडीकरणषोडशीप्रत्याब्दिकव्यतिरेकेण सर्वश्राद्धेषु पितृमातामहवर्गयोरेव क्लृप्त
त्वात् षडेव पिंडाः स्युरित्यत्र मातामहश्राद्धं क्वचिदपवदति कात्यायनः ॥ कर्षूसमन्वितं मुक्त्वा तथा श्राद्धानि षोडश ॥ प्र
त्याब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिरिति ॥ एतच्छ्लोकव्याख्याने नित्यनैमित्तिकानां बहूनां श्राद्धानामेकस्मिन् दिने स
न्निपाते सति नैमित्तिकानामेव मुख्यत्वेन कर्तव्यत्वं तेषां निमित्तानामपि बहूनां मध्ये गौरवलाघवानुक्रमेण कर्तव्यत्वं
भवेदित्यत्र तथा च कात्यायनः ॥ हूं बहूनि निमित्तानि जायेरन्नेकवासरे नैमित्तिकानि कार्याणि निमित्तोत्पत्त्यनुक्रमादि
ति पराशरमाधवीये चतुर्थाध्याये प्रायश्चित्ताकरणे रौरवादिमहानरकान् पापिनो यांतीत्यत्र याज्ञवल्क्येनापि प्रायश्चि
त्तमकुर्वाणाः पापेषु निरता नराः ॥ अपश्चात्तापिनः कष्टान्नरकान् यांति दारुणानिति । प्रायश्चित्तकांडे उपोद्घातप्रकर
णे पूर्वोक्त आचारकांडप्रतिपादितार्थस्य प्रायेण नित्यत्वं अकरणे प्रत्यवायः श्रवणात् । प्रायश्चित्तकांडोक्तं तु प्रायेण
नैमित्तिकं केनचिन्निमित्तेन पातकं संभवेत् तन्निवारणार्थं प्रायश्चित्तमपेक्षितं । अतः तस्य नैमित्तिकत्वमित्यत्र तन्नि
मित्तं दुरितं पूर्ववृत्तं तदुत्पत्तिकारणं याज्ञवल्क्येन दर्शितं विहितस्याननुष्ठानान्निषिद्धस्य च सेवनात् ॥ अनिग्रहाच्चेंद्रि
याणां नरः पतनमृच्छतीति पराशरमूलं । पूयशोणितसंपूर्णे त्वंधे तमसि मज्जति ॥ षष्टिवर्षसहस्राणि नरकं प्रतिप
द्यते ॥ २ ॥ नाशौचं नोदकं नाग्निं नाश्रुपातं च कारयेत् । अस्य माधवीयव्याख्याने उद्बंधनादिना आत्मघातिनः पाषंडाः

वेदविरुद्धव्रतनियमानुष्ठातारः सुरापायिनः ब्रह्मस्वस्वर्णापहारिणः शास्त्राविहितमार्गेचरंतः एतेसर्वेउदकोपलक्षितश्मशानकर्मतस्त्र नि-
युक्ताशौचदहनादिक्रियादिभाजिनोनभवंतीत्यत्रयाज्ञवल्क्यः॥पाषंडयनाश्रितास्तेनभर्तृघ्न्यः कामगादिकाः॥सु घ्यआत्मत्या
गिन्योनाशौचोदकभाजनाइतिपराशरमूलं॥गोभिर्हतंतथोद्बद्धंब्राह्मणेनतुघातितं॥संस्पृशंतिनुयेविप्रावोढारस्त्राग्निदाहकाः॥४।५।
६।इत्यादिश्लोकत्रयस्यव्याख्याने तप्तकृच्छ्रस्वरूपनिरूपणं।यत्तुयाज्ञवल्क्येनोक्तं।तप्तक्षीरघृतांबूनामेकैकंप्रत्यहंपिबेत्॥ ए
करात्रोपवासश्चतप्तकृच्छ्रंउदाहृतमिति॥पराशरमूलम्॥ ॥संसर्गमाचरेद्विप्रः पतितादिष्वकामतः॥ ॥पंचाहं
वादशाहंवाद्वादशाहमथापिवा॥इत्यादिश्लोकद्वयस्यव्याख्याने। पतितादिभिः संवत्सरादर्वाक्कालेषुसंसर्गेपि
महान्दोषः प्राप्तिरित्यत्रकण्वः।आसनाच्छयनाद्यानात्सल्लापात्सहभोजनात्॥ संक्रामंतीहपापानितैलबिंदु
रिवांभसीति॥पराशरमूलं॥त्रिरात्रंप्रथमेपक्षेद्वितीयेकृच्छ्रमाचरेत्॥ तृतीयेचैवपक्षेतुकृच्छ्रंसंतपनंचरेत्॥
१०॥११॥इत्यादिश्लोकत्रस्यव्याख्याने॥ सांतपनकृच्छ्रलक्षणमाहयाज्ञवल्क्यः॥गोमूत्रंगोमयंक्षीरंदधिसर्पिकुशोद
कं॥जग्ध्वापरेह्न्युपवसेत्कृच्छ्रंसांतपनंचरन्॥पूर्वश्लोकव्याख्याने॥ महापातकिसंसर्गेणसंवत्सरादूर्ध्वंअयमपिप
तितोभवतीत्यत्रयाज्ञवल्क्येनदर्शितं॥संवत्सरेणपततिपतितेनसहाचरन्निति।एतस्मिन्नेवाध्यायेपराशरमूलं॥
ऋतुस्नातातुयानारीभर्तारंनोपसर्पति सामृतानरकंयातिवैधव्यंचपुनःपुनः॥१२॥ इत्यादिश्लोकाष्टकव्याख्याने १४

अस्यमाधवीयव्याख्यानं॥भार्यायाः भर्तृमते नैवव्रतादिकर्तव्यं॥अन्यथादोषइत्यत्रकात्यायनोपि॥भार्याभर्तृमते
नैवव्रतादीनिचरेदिति॥पूर्वश्लोकव्याख्याने॥यागदीक्षितहनने ब्रह्महत्याद्विगुणंप्रायश्चित्तमुपदिशेदित्यत्र॥तथा
चयाज्ञवल्क्यः॥द्विगुणंसवनस्थेतुब्राह्मणेव्रतमादिशेदिति॥पूर्वश्लोकव्याख्याने॥गुरोर्विरोधंकृत्वा गुरुप्रसादेनैव
तद्दानयाप्रायश्चित्तेनैवशुध्यतीत्यत्र तथाचयाज्ञवल्क्यः॥प्रतिकूलंगुरोः कृत्वाप्रसाद्यैवविशुद्ध्यतीति॥पूर्वश्लो
कव्याख्यानेकश्चनपापीब्राह्मणहननार्थंआगतः॥ब्राह्मणहननाभावेपि ब्राह्मणहननव्रतमाचरेदित्यत्रयाज्ञवल्क्ये
नदर्शितं॥चरेद्व्रतंमहापापीघातनार्थंचेत्समागतइति॥पराशरमूलं॥ओघवाताहृतंबीजंयस्यक्षेत्रेप्ररोहतिसक्षेत्रीलभते
बीजंनबीजीभागमर्हति॥२०॥२१॥अस्यमाधवीयव्याख्याने॥उपपातकानांप्रायश्चित्तानिर्देशस्यलेशतप्राणायामं
कुर्यादित्यत्रयाज्ञवल्क्येनदर्शितं॥प्राणायामशतंकुर्यात्सर्वपापापनुत्तये॥उपपातकजातानामनादिष्टस्यचैवहीति॥प
राशरमूलं॥औरसः क्षेत्रजश्चैवदत्तः कृत्रिमकस्सुतः॥२२॥अस्यमाधवीयव्याख्याने॥औरसादिदशविधपुत्रनामा
नियाज्ञवल्क्येनापि॥औरसः पुत्रिकापुत्रः क्षेत्रजोगूढजस्तथा॥कानीनः पंचमःप्रोक्तःषष्ठः पौनर्भवः स्मृतइति॥परा
शरमूलं॥परिवित्तिः परिवेत्तायय्याच्चपरिविद्यते।सर्वेतेनरकंयांति दातृयाजकपंचमाः॥२३॥२४॥इत्यादिश्लोकद्वयस्य
व्याख्यानेप्रसंगात् कृच्छ्रातिकृच्छ्रस्वरूपमाह याज्ञवल्क्यः॥कृच्छ्रातिकृच्छ्रः पयसादिवसानेकविंशतिमिति॥परा

शरमाधवीयेपंचमाध्याये॥मूलं॥ वृकश्वानसृगालाद्यैर्दष्टोयस्तुद्विजोत्तमः॥स्नात्वाजपेत्सगायत्रींपवित्रांवेदमातरं।
२।३।४।५।६।७।८।९॥इत्यादिनवमसंख्यानश्लोकानांव्याख्यानेप्रसंगात्॥व्यभिचारिणीवानरगार्दभकाकोष्ट्राभिर्दष्ट
जलेप्राणायामपूर्वकघृतप्राशनेनशुद्धोभवतीत्याहयाज्ञवल्क्यश्च॥पुंश्चलीवानरखरैर्दष्टश्चोष्ट्रादिवायसैः प्राणाया
मंजलेकृत्वाघृतंप्राश्यविशुध्यतीति॥पराशरमूलं॥चंडालेनश्वपाकेनगोभिर्विप्रैर्हतोयदि॥आहिताग्निर्मृतोविप्रो वि
षेणात्माहतोयदि॥१०।११॥इत्यादिश्लोकद्वयस्यव्याख्यानेप्रसंगात् प्रतिलोमजातिप्रभवानांलक्षणमाह याज्ञवल्क्यः
ब्राह्मण्यांक्षत्रियात्सूतोवैश्याद्वैदेहकस्तथा॥शूद्राज्जातस्तुचंडालस्सर्ववर्णबहिष्कृतइति॥पराशरमाधवीयेषष्ठाध्या
ये मूलं॥क्रौंचसारसहंसांश्चचक्रकारंडकुक्कुटान्‌जलपादंचशरभमहोत्रेणचशुध्यति॥२॥अस्यमाधवीयव्याख्याने
॥हंसादिहननेप्रायश्चित्तमाहयाज्ञवल्क्यः॥हंसश्येनकपिक्रव्याज्जलस्थलशिखंडिनः॥भासंचहत्वादद्याद्गामक्रव्या
भस्तुवत्सिकामिति॥पराशरमूलं॥वृककाककपोतानांशारितित्तिरिघातकः॥अंतर्जलउभेसंध्येप्राणायामेनशुध्य
ति॥४॥अस्यमाधवीयेव्याख्याने॥प्रसंगात्शुकादिपक्षिवधेद्विसंवत्सरगोवत्सादिप्रायश्चित्तमित्यत्रयाज्ञवल्क्ये
नापि॥शुकादिवधेद्विहायनवत्सादिदानमुक्तं॥गजेनीलवृषाःपंचशुकेवत्सोद्विहायनः।खराजमेषेषुवृषोदेयःक्रौं
चेत्रिहायनइति॥पराशरमूलं भेरुंडभाषभासांश्चपारावतकपिंजलौपक्षिणांचैवसर्वेषामहोरात्रमभोजनम्॥

अस्यमाधवीयव्याख्यानेप्रसंगात् दोषरहितस्त्रीहननेशूद्रहत्याप्रायश्चित्तंकुर्यादित्यत्रयाज्ञवल्क्यः॥अप्रदुष्टांस्त्रि
यंहत्वाशूद्रहत्याव्रतंचरेत्॥अस्थिमतांसहस्रंतुतथानस्थिमतांपुनरिति॥पराशरमूलं॥शिंशुमारंतथागोधांहत्वा
कूर्मंचशल्यकं॥वृंताकफलभक्षीचाप्यहोरात्रेणशुद्ध्यती॥१०॥अस्यमाधवीयव्याख्याने प्रसंगात् मार्जालगो
धनकुलादिहननेत्र्यहंक्षीरपानमात्रेणवसेत्॥अथवा॥पादकृच्छ्रंत्र्यहसाध्यंलघुप्राजापत्यंवाचरेत्॥इत्य
त्रयाज्ञवल्क्यः॥मार्जारगोधानकुलामंडूकश्वपतत्रिणः॥हत्वात्र्यहंपिबेत्क्षीरंकृच्छ्रंवापादिकंचरेदिति॥वैश्यं
वाक्षत्रियंवापिनिर्दोषंयोभिपातयेत्॥सोतिकृच्छ्रद्वयंकुर्यात्गोविंशद्दक्षिणाददत्॥१७॥अस्यमाधवीयव्या
ख्याने॥क्षत्रियहननेएकवृषभा [illegible] धिकएकसहस्रगोदानंकुर्यात्॥अथवाक्षत्रेयब्रह्महत्याव्रतंचरेदित्यत्रया
ज्ञवल्क्यः॥ऋषभैकसहस्रागाददद्यात्क्षत्रवधेपुमान्ब्रह्महत्याव्रतंवापिवत्सरत्रितयंचरेदिति॥एतच्छ्लोक
व्याख्यानेदुष्टस्त्रीणांदुर्वृत्तानांहननेवर्णभेदेनप्रायश्चित्तार्थंदानविशेषमाहयाज्ञवल्क्योपि॥ ॥दुर्वृत्ताब्रह्म
विट्क्षत्रशूद्रयोषाःप्रमाप्यतु॥दृतिंधनुर्बस्तमविंक्रमाद्दद्याद्विशुद्धयइति॥एतच्छ्लोकव्याख्याने॥दोषरहितां
स्त्रीमात्रव्यक्तिंहत्वाशूद्रवधप्रायश्चित्तंकुर्यादिति॥याज्ञवल्क्यआह॥अप्रदुष्टांस्त्रियंहत्वाशूद्रहत्याव्रतं

चरेदिति॥एतस्मिन्नेवाध्यायेपराशरमूलं॥ ॥चंडालंहतवान्कश्चिद्ब्राह्मणोयदिकंचन॥प्राजापत्यंचरेत्कृच्छ्रं
गोद्वयंदक्षिणांददत्॥ १९॥ ॥इत्यादिश्लोकद्वयस्यमाधवीयव्याख्याने॥अपकृष्टान्मनुष्यान्हत्वा प्रत्येकं
चांद्रायणव्रतंचरेदित्याह॥तदाहयाज्ञवल्क्यः॥चांद्रायणंचरेत्सर्वानपकृष्टान्निहत्यत्विति॥एतस्मिन्नेवाध्यायेप
राशरमूलं॥एकंकंयासमश्नीयाद्गोमूत्रंयावकस्यच॥दशाहंनियमस्थस्यव्रतंकर्तुंविनिर्दिशेदिति॥३३॥अस्यमाध
वीयव्याख्यानं॥नियमलक्षणमाह याज्ञवल्क्यः॥स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः॥नियमागुरुशुश्रूषाशौ
चाक्रोधाप्रमाददताइति॥एतस्मिन्नेवाध्यायेपराशरमूलं॥गवांमूत्रपुरीषेणदधिक्षीरेणसर्पिषा॥त्र्यहंस्नात्वाचपी
त्वाचक्रिमिदष्टः शुचिर्भवेत्॥४९॥५०॥इत्यादिश्लोकद्वयस्यमाधवीयव्याख्याने॥द्रव्यतुलापरिमाणक्रममाहत
दाहयाज्ञवल्क्यः॥जालसूर्यमरीचिस्थंत्रसरेणारजस्मृतंतेष्वालीक्षातुतास्तिस्रोराजसर्षपउच्यतइति॥पराशर
माधवीयेसप्तमाध्याये॥पराशरमूल॥अथातोद्रव्यशुद्धिस्तुपराशरवचोयथा॥दार वाणांतुपात्राणांतक्षणाच्छु
द्धिरिष्यते १ अस्यमाधवीयव्याख्यानं॥यज्ञपात्राणांशुद्धिमाह। अतएवयाज्ञवल्क्यः॥चरुस्रुक्स्रुवसस्नेहपा
त्राण्युष्णेनवारिणेति॥एतस्मिन्नेवाध्यायेद्रव्यशुद्धिप्रकरणेपराशरमूलं। अतएवयाज्ञवल्क्यः॥त्रपुसीसकताम्रा

णां क्षाराम्लोदकवारिभिरिति ॥ एतस्मिन्नेवाध्याये पराशरमूलं ॥ भस्मना शुध्यते कांस्यं ताम्रमाम्लेन शुध्यति ॥ रजसा
शुध्यते नारी विकलं या न गच्छति ॥ २ ॥ अस्य माधवीयव्याख्यानं ॥ स्त्रीणां मानसिकव्यभिचारे रजोदर्शनेन शुद्धिरि
त्यत्र तथाह याज्ञवल्क्यः ॥ व्यभिचाराद‍ृतौ शुद्धिर्गर्भे त्यागो विधीयत इति ॥ एतस्मिन्नेवाध्याये द्रव्यशुद्धिप्रकरणे परा
शरमूलं ॥ वेणुवल्कलचीराणां क्षौमकार्पासवाससां और्णनेत्रपटानां च प्रोक्षणाच्छुद्धिरिष्यते ॥ अस्य माधवीयव्या
ख्याने आविककौशेयादिवस्त्राणां उष्णोदकगोमूत्रादिभिः शुद्धिरित्यत्र याज्ञवल्क्य आह ॥ सोष्णैरुदकगोमूत्रैः शु
ध्यत्याविककौशिकं ॥ सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथेति ॥ एतस्मिन्नेवाध्याये मुंजादीनां शुद्धिप्रकरणे पराशरमूलं
॥ मुंजोपस्कर शूर्पाणां शणस्य फलचर्मणां तृणकाष्ठस्य रज्जूनामुदकाभ्युक्षणं मतम् ॥ २९ ॥ अस्य माधवीयव्याख्या
ने ॥ शाकरज्ज्वादीनां केवलोदकेनैव शुद्धिरित्यत्र याज्ञवल्क्यः ॥ शाकरज्जुमूलफलवासोविदलचर्मणां पात्राणां च मसा
नां च वारिणा शुद्धिरिष्यत इति ॥ तस्मिन्नेवाध्याये रथ्योल्कादीनां शुद्धिप्रकरणे पराशरमूलं ॥ रथ्याकर्दमतोयानि नावः प
थास्तृणानि च मारुतार्केण शुध्यंति पक्वेष्टकचितानि च ॥ ४ ॥ अस्य माधवीयव्याख्याने ॥ मार्गस्थोदककर्दमानां चंडा
लवायसैः स्पृष्टानामपि न दोष इत्यत्र याज्ञवल्क्यः ॥ रथ्याकर्दमतोयानि स्पृष्टान्यंत्यश्ववायसैः ॥ मारुतार्केण शुध्यंति
पक्वेष्टकचितानि चेति ॥ तस्मिन्नेवाध्याये मुखादिगतधारादिशुद्धिः पराशरमूलं ॥ अदुष्टाः संतता धारा वातोद्धूताश्च रे

पावः ॥ स्त्रियो वृद्धाश्च बालाश्च न दूष्यंति कदाचनेति। विषयविशेषेण शुद्धिमाह याज्ञवल्क्यः ॥ रश्मिरग्नी रजश्छाया
गौरश्वो वसुधानिलः ॥ विप्रुषो मक्षिकास्पर्शे वत्सः प्रस्रवणे शुचिरिति ॥ एतच्छ्लोकव्याख्याने भूशुद्धिप्रकरणे लेपे तु या
ज्ञवल्क्य आह ॥ भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा ॥ सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनादिति ॥ एतच्छ्लो
कव्याख्याने द्रव्यशुद्धिप्रकरणे याज्ञवल्क्योऽपि वाक्शास्त्रमंबु निर्णिक्तमज्ञातं च सदा शुचिरिति ॥ एतस्मिन्नेवाध्याये
पराशरमूलं ॥ आपत्काले समुत्तीर्णे शौचाचारं तु चिंतयेत् ॥ शुद्धिं समुद्धरेत्पश्चात्स्वस्थो धर्मं समाचरेत् ॥ ३ ॥
अस्य माधवीयव्याख्याने अन्नाद्यभावेन जीवनाद्यत्ययसंशये ब्राह्मणः क्षत्रियवृत्त्या जीवेत् ॥ तदसंभवे वैश्यवृत्त्या
वा जीवेत्। आपदि निवर्तितायां सत्यां तद्वृत्तिं विहाय यथोक्तं प्रायश्चित्तं कुर्यादित्यत्र याज्ञवल्क्यः ॥ क्षात्रेण कर्मणा जीवेद्वि
शां वाप्यापदि द्विजः ॥ निस्तीर्य तामथात्मानं पावयित्वा न्यसेत्सुधीरिति ॥ परा[illegible] माधवीये अष्टमाध्याये पराशरमूलं ॥
गवां बंधनयोक्त्रेषु भवेन्मृतिरकामतः ॥ अकामकृतपापस्य प्रायश्चित्तं कथं भवेत् ॥ १ ॥ अस्य माधवीयव्याख्याने
ब्रह्महत्यादिमहापातकानां केषांचिन्मुनिमतेषु बुद्धिपूर्वकानां देहांतप्रायश्चित्तमेव कार्यं ॥ न तु द्विगुणितप्रायश्चि
त्तानुष्ठानेनापि इह लोके तेन सह शिष्टानां व्यवहारोऽस्तीति एकः पक्षः ॥ अन्येषां मुनीनां मतेषु बुद्धिपूर्वकृतमहापात
कानामपि द्विगुणितप्रायश्चित्तकरणेन नाशः संभवतीति एकः पक्षः ॥ अनयोः पक्षयोः कथं व्यवस्थेति संशये महापात

कानांबुद्धिपूर्वकाणांद्विगुणितकृतप्रायश्चित्तेनइहलोकेशिष्टैर्व्यवहार्यो भवति॥ नतुपरलोकेनरकप्राप्तिभयान्निवृ
त्तिर्भवतीतिअभिप्रेत्यअयंनिर्णयोयाज्ञवल्क्येनस्पष्टमभिहितः॥ प्रायश्चित्तैरपैत्येनोयदज्ञानकृतंभवेत्॥ कामतोव्य
वहार्यस्तुवचनादिहजायते॥ पूर्वंएतच्छ्लोकव्याख्यानावसरेबुद्धिपूर्वकमहापातकस्यकेषांचिन्मुनिवचनमाश्रित्य
कृतद्विगुणप्रायश्चित्तस्यपरलोकेनरकभयनिवृत्तिर्नास्ति॥ इहलोकेतुशिष्टैस्सहव्यवहार्योभवतिइत्युक्त्वातदर्थेया
ज्ञवचनं॥ प्रायश्चित्तैरपैत्येनोइतिवचनमुदाहृतं॥ इदानींअन्येषांमुनीनांमतमाश्रित्यपूर्वार्थवैपरीत्येनबुद्धिपूर्वकम
हापातकिनःद्विगुणितप्रायश्चित्ताचरणेनइहलोकेसहशिष्टैर्व्यवहार्योनभवति॥ किंतुपरलोकेनरकभयात्निवर्त्त
ते॥ इत्येतमर्थंप्रतिपादयितुंपूर्वोक्तमेवयाज्ञवल्क्यवचनंप्रायश्चित्तैरपैत्येनोयदज्ञानकृतंभवेत्॥ कामतोव्यवहा
र्यस्तुवचनादिहजायते॥ इत्यत्रतृतीयपादेकामतोव्यवहार्यस्तु इतिपदत्रयेषुमध्येकामतोअव्यवहार्यइतिपदच्छे
दंकृत्वाउत्तरव्याख्यानानुसारेणसतुइहलोकेअव्यवहार्योभवतीतिमाधवाचार्येणव्याख्यातं॥ तथाचमाधवीयव्या
ख्यानं॥ अपरेतुपुनरेवमाहुः॥ यदुक्तंमरणांतिकप्रायश्चित्तेननरकनिवृत्तिरिति तत्तथैवयुक्तं॥ यदुक्तंव्रतचर्य
याव्यवहारसिद्धिरेव॥ नतुनरकनिवृत्तिरिति॥ तद्विपर्ययेणचीर्णव्रतस्यनरकस्तावन्निवर्तते॥ इहलोकेतस्यन
शिष्टैर्व्यवहारोस्ति॥ एतच्चाव्यवहार्यइतियाज्ञवल्क्यवचनेपदंछित्वायोजनीयमिति॥ पराशरस्मृतौअष्टमा

ध्यायेपराशरमूलं॥ब्राह्मणान्भोजयित्वातुगोघ्नःशुध्येन्नसंशयः॥४१ अस्यमाधवीयव्याख्यानं॥गोवधप्रायश्चित्त
प्रकरणेतत्रयाज्ञवल्क्यः॥पंचगव्यंपिबन्गोघ्नोमासमासीनसंयतः॥गोष्ठेशयोगोनुगामीगोप्रदानेनशुध्यतीति॥पूर्व॰
श्लोकव्याख्यानेगोहत्याप्रायश्चित्तविशेषमाह॥यत्तुकात्यायनेनोक्तं॥गोघ्नस्तच्चर्मसंवीतोवसेद्गोष्ठेतथाप्लुतः॥गा
श्चानुगच्छेत्सततंरात्रौवीरासनादिभिरिति॥पराशरमाधवीयेनवमाध्यायेपराशरमूलं॥यंत्रितागौश्चिकित्सार्थंमूढ
गर्भविमोचने॥यत्ने कृतेविपद्येतप्रायश्चित्तंनविद्यते॥४४॥ अस्यमाधवीयव्याख्यानं॥गवांहितेप्रवृत्तस्यप्रमादिकं
गोमरणंनप्रत्यवायजनकमित्याह याज्ञवल्क्योपि॥म्रियमाणेपिकालेतुमृतेविप्रेनपातकं॥निपातेगोवृषाणांचभेष
जाग्निक्रियासुचेति॥पराशरमाधवीयेदशमाध्याये॥पराशरमूलं॥श्वपाकींवाथचंडालींशूद्रोवायदिगच्छति॥प्रा॰
जापत्यंचरेत्कृच्छ्रंचतुर्गोमिथुनंददत् ८ अस्यमाधवीय व्याख्यानं॥शूद्रस्यस्वल्पव्रतमधिकादक्षिणेत्याह॥श्वपा
केमिति॥याज्ञवल्क्योपि॥सखिभार्याकुमारीषुस्वयोनिष्वंत्यजासुच॥सगोत्रासुसुतस्त्रीषुगुरुतल्पसमंस्मृतमिति॥ए
तस्मिन्नेवाध्यायेपराशरमूलं॥मातरंयदिगच्छेत्तुभगिनींस्वसुतांतथा॥एतास्तुमोहितोगत्वात्रीणिकृच्छ्राणिसं
चरेदित्यादिश्लोकद्वयस्यमाधवीयव्याख्याने॥मातृगमनप्रायश्चित्तमाह॥याज्ञवल्क्योपि॥तप्तायश्शयनेसार्धमय
स्यायोषितःस्वपेत् गृहीतोत्कृत्यवृषणं नैरृत्यांजोत्सृजेत्तनुमिति पराशरमूलं॥एतस्मिन्नेवाध्याये॥ अज्ञानेनतु

योगच्छेत्कुर्याच्चांद्रायणद्वयं ॥ दशगोमिथुनं दद्याच्छुद्धिं पराशरोऽब्रवीत् ॥ ११ ॥ एतस्मिन्नेवाध्याये एतच्छ्लोकव्याख्याने । ननु ।
याज्ञवल्क्येन मातृष्वसृगमने गुरुतल्पव्रतमिति निर्दिष्टं । पितृष्वसारं मातुःश्वमातुलानीं स्नुषामपि मातुस्सपत्नीं भगिनीमाचा
र्यतनयां तथा आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पग इति । बाढं । कामकृते गुरुतल्पव्रतमस्माभिरपि पूर्वं वाक्ये दर्शितं । चांद्रायणं
त्वकामकृत इत्यविरोधः ॥ एतस्मिन्नेवाध्याये पराशरमूलं । पितृदारां समारुह्य मातुराप्तां तु भ्रातृजां । गुरुपत्नीं स्नुषां चैव भ्रातृभा
र्यां तथैव च ॥ १२ ॥ इत्यादिश्लोकद्वयस्य व्याख्याने ॥ जननीव्यतिरिक्तपितृभार्यागमने गुरुतल्पप्रायश्चित्तविधाने गुरुशब्दार्थ
माह याज्ञवल्क्योऽपि ॥ स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छतीति । पूर्वश्लोकव्याख्याने अज्ञानकृतगुरुतल्पगमने रेतसेकात्प्राङ्नि
वृत्तौ प्रायश्चित्तं यच्च याज्ञवल्क्येनोक्तं ॥ प्राजापत्यं चरेत्कृच्छ्रं प्रमादाद्गुरुतल्पगः । चांद्रायणं वा त्रीन्मासानभ्यस्यन्वेदसंहिता
मिति । पूर्वश्लोकव्याख्याने बुद्धिपूर्वकगुरुतल्पगमने देहांतप्रायश्चित्तमाह यथाह कण्वः । मत्या गत्वा पुनर्भार्यां गुरोः स त्रपुसंतोहि
पि ॥ पितृष्वसारं मातुःश्वमातुलानीं स्नुषामपि । पितृव्यपत्नीं भगिनीमाचार्यतनयां तथा । पूर्वश्लोकव्याख्याने शूद्रस्त्रीगमने प्रायश्चि
तमाह कण्वोऽपि । शूद्रदारगतो विप्रो ह्यतिकृच्छ्रं समाचरेत् । चांद्रायणं विशो राज्ञः समं च ब्राह्मणव्रतमिति । एतस्मिन्नेवाध्याये पराश
रमूलं । पतत्यर्धं शरीरस्य भार्या भर्तुः सुरां पिबेत् ॥ पतितार्धशरीरस्य निष्कृतिर्न विधीयते २७ अस्य व्याख्याने भार्यासुरापाने भर्तुः

अर्थं शरीरस्य पतितत्वात्प्रायश्चित्तं न विद्यत इत्यत्र याज्ञवल्क्य आह ॥ पतिलोकं न सा याति ब्राह्मणी या सुरां पिबे
त्॥ इहैव साश्शुनी गृध्री सूकरी चोपजायत इति ॥ एतस्मिन्नेवाध्याये पराशरमूलं ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कु
शोदकं ॥ एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतं ॥ २८ ॥ अस्य माधवीयव्याख्यानं ॥ सांतपनस्यानेकधाभिन्नत्वात्
अत्र विवक्षितं सांतपनविशेषं दर्शयति गोमूत्रमिति ॥ अत्र द्विरात्रं सप्तरात्रं चेति द्विविधं सांतपनं निर्दिश्यते ॥ तत्रोभ
यं प्रायश्चित्तकांडे प्रथमाध्याये याज्ञवल्क्यवचनद्वयोदाहरणेन विशदीकृतं ॥ एतस्मिन्नेवाध्याये पराशरमूलं ॥
जारेण जनयेद्गर्भं मृते त्यक्ते गते पतौ तां त्यजेत्परे राष्ट्रे पतितां पापकारिणीं ॥ २९ ॥ अस्य माधवीयव्याख्याने ॥ दु
ष्कार्यैपरतां गर्भरहितां प्रायश्चित्तात्प्रेरितया पूर्वाचरितपापेन अनुतापवतीं यथोक्तप्रायश्चित्तं कारयित्वा गृहे स्थाप
येत् ॥ तद्रूपशीं तां जारेण गर्भवतीं परित्यजेदित्यत्र याज्ञवल्क्योपि ॥ व्यभिचारादृतौ शुद्धिर्गर्भे त्यागो विधीयते गर्भ
भर्तृवधादौ च तथा महति पातके इति ॥ तत्रैव यद्यपि याज्ञवल्क्येनोक्तं ॥ हृताधिकारां मलिनां पिंडमात्रोपजीविनीं ॥
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीमिति ॥ तस्मिन्नेवाध्याये पराशरमूलं ॥ ब्राह्मणी तु यदा गच्छेत्परपुंसा स
मन्विता ॥ सा तु नष्टा विनिर्दिश्या न तस्या गमनं पुनः ॥ ३० ॥ अस्य व्याख्यानं ॥ अथ शंकितव्यभिचारां प्रत्याह ॥ ब्राह्मणी
ति स्त्रियस्तावद्रक्ष्याः ॥ याज्ञवल्क्येन परिगणिताः ॥ रक्षेत्कन्यां पिता विन्नां पतिः पुत्रस्तु वार्धके ॥ अभावे ज्ञातयस्ते

षांस्वातंत्र्यंनकचित्स्त्रियादिति।पराशरमूलं॥कामान्मोहाच्चुयागच्छेत्यक्त्वाबंधून्पतिंसुतान्॥सातुनष्टापरेलोके
मानुषेषुविशेषतः॥३१॥तथाचधर्मप्रकरणेयाज्ञवल्क्यः॥पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः॥हीनानस्याद्वि
नाभर्त्रागर्हणीयान्यथाभवेदिति॥तस्मिन्नेकादशाध्यायेपराशरमूलं॥शूद्रान्नंसूतकान्नंचअभोज्यःस्नानमेवच
॥शंकितंप्रतिषिद्धान्नंपूर्वोच्छिष्टंतथैवच॥४॥इत्यादिश्लोकद्वयस्यमाधवीयव्याख्यानेअभोज्यान्ननिषेधप्रस्तावे
याज्ञवल्क्योपि॥कदर्यबद्धचोराणांक्लीबरंगावतारिणांवैणाभिशस्त वार्धुष्यगणिकागणदीक्षणामिति॥पूर्वश्लो
कव्याख्याने॥अन्ननिषेधप्रकरणेतत्रयाज्ञवल्क्यः॥गोघ्रातंशकुनोच्छिष्टमुच्छिष्टंपतितेक्षितं॥उदक्यास्पृष्ट
संघुष्टंपर्यायान्नंचवर्जयेदिति॥तस्मिन्नेवाध्यायेपराशरमूलं॥बालैर्नकुलमार्जारैरन्नमुच्छिष्टंयदातिलदर्भो
दकैःप्रोक्षाच्छुध्यतेनात्रसंशयः॥अस्यमाधवीयव्याख्यानेवर्णक्रमेणप्रायश्चित्तह्रासमाहकण्वोपि॥विप्रा
र्थेक्षत्रियस्यस्याद्वैश्यानांचतदर्धकं तदर्धमेवशूद्राणांप्रायश्चित्तंविदुर्बुधा इति॥तस्मिन्नेवाध्यायेपराशर
मूलं॥पियूषंश्वेतलशुनवृंताकफलगृंजनं॥पलांडुवृक्षनिर्यासादेवस्वकराणिच॥९॥श्लोकद्वयस्यमाधवीयव्या
ख्यानेनिषिद्धपदार्थभक्षणेदोषइत्यत्रयाज्ञवल्क्यः॥पलांडुंविड्वराहंचछत्राकंग्रामकुक्कुटं॥लशुनंगृंजनंचैवजग्ध्वा
चांद्रायणंचरेदिति॥अस्मिन्नेवाध्यायेपराशरमूलं॥मंडूकंभक्षयित्वातुमूषिकामांसमेवच ज्ञात्वाविप्रस्त्वहोरात्रं

॥ यावकान्नेन शुध्यतीति १० अस्य माधवीयव्याख्याने निषिद्धभक्षणे प्रायश्चित्तमाह याज्ञवल्क्यः ॥ देवतार्थं हविः शिग्रुलोहितान्व्रश्चनांस्तथा ॥ अनुपाकृतमांसानि विविधानि कमकानि च ॥ एतस्मिन्नेवाध्याये पराशरमूलं ॥ घृतं क्षीरं वयातैलं भक्ष्यं स्नेहेन पाचितं गत्वा नदीतटे विप्रो भुंजीयाच्छूद्रभोजनं ॥ अस्य माधवीयव्याख्याने शूद्रपदार्थस्यापि क्षीरतैलघृतादेर्ग्रहणे ब्राह्मणस्य दोषो नास्तीत्यत्र याज्ञवल्क्य आह । आपद्गतः संप्रगृह्णान् भुंजानोपि यतस्ततः न लिप्येतैनसा विप्रो ज्वलनार्कसमो हि स इति । एतदेवानेको विप्रो ज्वलनार्कसमो हि स इति । एतदेवानेकोपाख्यानपुरःसरं मनुराह । सर्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयं गतः । पवित्रं दुष्यतीत्येतद्धर्मतो नोपपद्यत इत्यादि ॥ तस्मिन्नेवाध्याये पराशरमूलं ॥ आपत्कालेषु विप्रेण भुक्तं शूद्रगृहे यदि ॥ मनः स्तापेन शुध्येत द्रुपदां वा जपेच्छतं ॥ माधवीयव्याख्याने ॥ आपत्काले ब्राह्मणस्य शूद्रगृहे भुक्त्वापि यथोक्तप्रायश्चित्तेन शुध्यतीत्यत्र याज्ञवल्क्य आह ॥ पश्चात्तापो निराहारः सर्वेमी शुद्धिहेतव इति ॥ मनुरपि ॥ ख्यापनेनानुतापेन तपसाध्ययनेन च ॥ पापकृच्छुध्यते पापात्तथा दानेन चापदीत्यादि ॥ तस्मिन्नेव श्लोकव्याख्याने याज्ञवल्क्य आह द्रुपदा नाम गायत्री यजुर्वेदे प्रतिष्ठिता ॥ सर्वपापहरा जप्तुर्महतोप्येनसः स्मृतमिति ॥ तस्मिन्नेवाध्याये पराशरमूलं ॥ दासनापितगोपालकुलमित्रार्धसीरिणः ॥ एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥ श्लोकत्रयव्याख्याने भोज्यान्नेषु शूद्रविशेषस्वरूपमाह । याज्ञवल्क्योपि ॥ शूद्रेषु दासगोपालकुलमित्रार्धशीरिणः ॥ भोज्यान्ना नापित

नाच

श्चैव वयस्था त्मानं निवेदयेदिति ॥ तस्मिन्नेवाध्याये पराशरमूलं ॥ ताडयित्वा तृणेनापि कंठं बध्वापि वाससा ॥ विवादे वा
पि निर्जित्य प्रणिपत्य प्रसादयेत् ॥ अस्य माधवीय व्याख्यानं ॥ गुरुं त्वंकारेण हुंकारेण च अन्यं ब्राह्मणं वादेन निर्जित्य
धिक्कारं कृत्वा तत्प्रायश्चित्तार्थं तत्प्रसादं संपाद्य उपवसेदित्यत्र याज्ञवल्क्योपि ॥ गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वा
दतः ॥ बध्वा वा वाससा क्षिप्रं प्रसाद्योपवसेद्दिनमिति ॥ तस्मिन्नेवाध्याये पराशरमूलं ॥ अपगूर्य त्वहोरात्रं
त्रिरात्रं क्षितिपातने ॥ अतिकृच्छ्रं च रुधिरे कृच्छ्रोभ्यंतरशोणिते ॥ व्याख्यानेब्राह्मणावमानादिरक्तपातपर्यंतब्राह्म
णदंडने प्रायश्चित्तविशेषविधान प्रस्तावे याज्ञवल्क्योपि ॥ विप्रदंडोद्यमे कृच्छ्रस्त्वतिकृच्छ्रो निपातने कृच्छ्रातिकृ
च्छ्रौ स्वक्पातेकृच्छ्रोभ्यंतरशोणित इति ॥ एतस्मिन्नेवाध्याये पराशरमूलं ॥ नवाहमतिकृच्छ्रः स्यात्पाणिपूरान्नभो
जिनः त्रिरात्रमुपवासी स्यादतिकृच्छ्रः स उच्यते ॥ ५४ ॥ अस्य माधवीयव्याख्यानं ॥ एतदेवाभिप्रेत्य याज्ञवल्क्यः ॥
प्राजापत्यमुपदिश्य तस्यैव गुणविकृतत्वेनातिकृच्छ्रं निर्दिशति । अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजन इति ॥
पराशरमूलं ॥ सर्वेषामेव पापानां संकरे समुपस्थिते ॥ दशसाहस्रमभ्यस्ता गायत्री शोधनं परं ॥ ५५ ॥ अस्य माधवीय
व्याख्यानं । प्रतिपदोक्तप्रायश्चित्ताभावे बहुपापानां सांकरीयसामान्यप्रायश्चित्तमाह याज्ञवल्क्यः ॥ देशं कालं वयः
शक्तिं पापं चावेक्ष्य यत्नतः प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिरिति ॥ द्वादशाध्याये पराशरमूलं ॥ जलाग्नि

प्र॰श॰ ५२१

पतनेचैवप्रव्रज्यानाशकेषुच॥प्रत्यावसितवर्णानांकथंशुद्धिर्विधीयते॥५॥इत्यादिश्लोकचतुष्टयव्याख्याने॥सन्यासा नि॰
र्थंउद्यमंकृत्वातस्मान्निवृत्तः पुनः पूर्वाश्रमेवशितुंयत्नंकरोतितस्यब्राह्मणस्यराजास्वदेशाद्बहिष्कार्यत्वंकारयेत॥क्ष
त्रियवैश्ययोश्चयावज्जीवराजसेवायांनियोगंकुर्यादित्यत्रकात्यायनोपि॥प्रव्रज्यावसितायत्रत्रयोवर्णाद्विजातयः॥
निर्वासंकारयेद्विप्रंदास्यंक्षत्रविशोर्नृपइति॥तस्मिन्नेवश्लोकव्याख्यानेयाज्ञवल्क्योपि॥प्रव्रज्यावसितोराज्ञोदासस्या
न्मरणांतिकमिति॥तस्मिन्नेवाध्यायेपराशरमूलं॥यस्तुकृच्छ्रःशुमान्ब्रूयाज्ञ्यायांसमानुगम्यतां॥पुनीरक्षतिचेदेनांविप्र
मध्येतुश्रावयेत॥६१॥श्लोकत्रयस्यमाधवीयव्याख्यानेब्राह्मणादिवर्णानांमध्येकस्यचितवधप्रसक्तौतन्निवृत्त्यर्थंअ
नृतंसाक्षीवदेत॥तदनृतप्रायश्चित्तंविवर्णार्थंतदाहयाज्ञवल्क्यः॥वर्णिनांतुवधोयत्रतत्रसाक्ष्यनृतंवदेत॥पावना
र्थंतुनिर्वाप्यः चरुस्सारस्वतोद्विजैरिति॥अस्मिन्नेवाध्यायेपराशरमूलं॥गृहस्थः कामतःकुर्याद्रेतस्स्खलनंभुवि
॥सहस्रंतुजपेद्देव्याःप्राणायामैस्त्रिभिस्सह॥६३॥माधवीयव्याख्याने॥गृहस्थस्यअकामतः रेतस्स्खलनेप्रायश्चि
त्तंयाज्ञवल्क्यआह॥यन्मेद्यरेतइत्याभ्यांस्खलनेरेतोभिमंत्रयेत॥स्तनांतरंभ्रुवोर्मध्येतेनानामिकयास्पृशेत॥अ
स्मिन्नेवाध्यायेपराशरमूलं॥पुनःप्रत्यागतोवेश्मवासार्थमुपसर्पति॥सपुत्रस्सहभृत्यैश्चकुर्याद्ब्राह्मणभोजनम्॥
७१॥७२॥श्लोकद्वयस्यमाधवीयव्याख्याने॥गुणहीनब्राह्मणवधेअकामकृतेविध्युक्तसेतुस्नानादिककुर्यात॥अथवा ५२१

अस्मिन्नेवविषयेपस्तोतरमाहयाज्ञवल्क्यः। पात्रेधनंवापर्याप्तंदत्वाशुद्धिमवाप्नुयादिति। तस्मिन्नेवाध्यायेपराशरमूलं। तच्छ्लोकव्याख्या नेब्रह्महत्याप्रायश्चित्तप्रकरणे। तत्रयाज्ञवल्क्यः। शिरःकपालीध्वजवान्भिक्षाशीकर्मवेदयन्ब्रह्महाद्वादशाब्दानिमितभुक्शु द्धिमाप्नुयादिति। तच्छ्लोकव्याख्यानेतत्प्रकरणेकण्वोपि। पवित्रपाणिर्दंडीचपंकदंतोरजस्वलः। तीर्थवासीकुशाच्छादीजटिलोब्रह्म हाभवेदिति। तच्छ्लोकव्याख्यानेतत्प्रकरणेकामकृतात्यंताभ्यासेतुयाज्ञवल्क्यआह। लोमभ्यःस्वाहेत्येवंहिलोमप्रभृतिवैतनुमज्जां तांजुहुयाद्वापिमंत्रैरेभिर्यथाक्रममिति। तच्छ्लोकव्याख्यानेतत्प्रकरणेयाज्ञवल्क्यः। चरेद्व्रतमहत्वापिघातार्थंचेत्समागतइति। त च्छ्लोकव्याख्यानेतत्प्रकरणेदंडतारतम्यमाहयाज्ञवल्क्यः॥ दंडप्रणयनंकार्यंवर्णजात्युत्तराधरैरिति॥ तस्मिन्नेवाध्याये पराशरमूलं॥ मद्यपश्चद्विजःकुर्यान्नदींगत्वासमुद्रगां॥ चांद्रायणेततश्चीर्णेकुर्याद्ब्राह्मणभोजनं॥ अनडुत्सहितां गांचदद्याद्विप्रेषुदक्षिणां॥ ७४॥ एतच्छ्लोकव्याख्याने॥ राजन्यवैश्ययोस्तुमद्यपानमनुजानातिवृद्धयाज्ञवल्क्यः॥ कामाद्यदिद्विराजन्योवैश्योवापिकथंचन॥ मद्यंमद्यसुरांपीत्वानदोषंप्रतिपद्यतइति॥ तस्मिन्नेवाध्यायेपराशरमूलं॥ सुरापानंसकृत्कृत्वाअग्निवर्णांसुरांपिबेत्॥ सपातयेदथात्मानमिहलोकेपरत्रच॥ ७५॥ सुरापानप्रायश्चित्तेअका मकृतेतुयाज्ञवल्क्यआह॥ वालवासाजटीवापिब्रह्महत्याव्रतंचरेत्॥ पिण्याकंवाकणान्वापिभक्षयेत्त्रिसमानि शीति॥ तस्मिन्नेवाध्यायेपराशरमूलं॥ अपहृत्यसुवर्णंतुब्राह्मणस्यततःस्वयंगच्छेन्मुसलमादायराजानंस्ववधाय

प्र॰शा॰ ५२२

तु॥७८॥इत्यादिश्लोकद्वयोर्व्याख्यानेस्वर्णस्तेयप्रकरणेद्रव्यतुलपरिमाणविभागः याज्ञवल्क्येन दर्शितः॥जालसू
र्यमरीचिस्थं त्रसरेणूरजःस्मृतं तेष्टौतिक्षा तु।तास्तिस्रोराजसर्षपउच्यते॥इत्यादि॥एतस्मिन्नेवाध्यायेपराशरमूलं
चांद्रायणं यावकंचतुलापुरुषएवच॥गवांचैवानुगमनंसर्वपापप्रणाशनं॥७९॥एतच्छ्लोकव्याख्यानेमाधवीये॥
अन्यान्यपिब्रह्महत्यासमानपातकान्याह॥याज्ञवल्क्यः॥गुरुणाभ्यधिक्षेपोवेदनिंदासुहृद्वधः॥ब्रह्महत्यासमं
ज्ञेयमधीतस्यचनाशनमिति॥तस्मिन्नेवाध्याय ॥तस्मिन्नेवश्लोकव्याख्यानेसुरापानसमानपा
तकप्रस्तावेयाज्ञवल्क्योपि॥निषिद्धभक्षणंजैह्ययमुत्कर्षेचवचोनृतं॥रजस्वलमुखास्वादःसुरापानसमानिषड्िति॥
तस्मिन्नेवश्लोकव्याख्याने॥याज्ञवल्क्योन्यानिसुवर्णस्तेयसमान्याह॥अश्वरत्नमनुष्यःस्त्रीभूधेनुहरणंतथा॥नि
क्षेपस्यचसर्वेहिसुवर्णस्तेयसंमितमिति॥तस्मिन्नेवश्लोकव्याख्याने॥याज्ञवल्क्यस्तुविष्णुनानुक्तान्यपिकानि
चिदुपपातकान्यृणानपक्रियादीन्युदाजहार गोवधोव्रात्यतास्तेयमृणानांचानपक्रिया॥अनाहिताग्नितापण्यवि
क्रयःपरिवेदनमित्यादि॥पूर्वश्लोकव्याख्याने॥अनृताभिवदनस्यविषयभेदेनपातकभेदंपिप्रकुते।उपपातकांतर्ग
तअनृताभिवदनेप्रायश्चित्तमाहयाज्ञवल्क्यः॥मयितेजइतिच्छायांस्वांदृष्ट्वांबुगतांजपेत्।सावित्रीमश्रुचौदृष्टेचाप
ल्येचानृतेपिचेति॥तच्छ्लोकव्याख्याने॥याज्ञवल्क्योपिसाधारणंप्रायश्चित्तमाह॥उपपातकशुद्धिस्याद्देवंचांद्रा

नि॰

यणेनवा॥पयसावापिमासेनपराकेणाथवापुनरिति॥ तच्छ्लोकव्याख्याने॥ असत्प्रतिगृहे याज्ञवल्क्य आह॥ गोष्ठेवस
न्ब्रह्मचारीमासमेकंपयोव्रतं॥गायत्रीजप्यनिरतःशुद्ध्यते सत्प्रतिगृहादिति॥ तच्छ्लोकव्याख्याने॥ याज्ञवल्क्योवृ
धाश्चेदितिविशिनष्टि।वृक्षगुल्मलतावीरुच्छेदनेजप्यमृक्छतं।स्यादोषधिवृथाच्छेदेक्षीराशीगोनुगोदिनमिति॥त
च्छ्लोकव्याख्याने॥ व्रतलोपिनो वर्णिनो व्रतं याज्ञवल्क्य आह॥ अवकीर्णीभवेद्गत्वाब्रह्मचारीतु योषितं॥गर्दभं प
शुमालभ्यनैर्ऋत्येनविशुध्यतीति॥पूर्वश्लोकव्याख्याने॥ ब्रह्मचारिणः रोगाद्यभावेपिसप्तरात्रअग्निकार्यभिक्षाचर
णादिव्रतलोपेप्रायश्चित्तविधाने॥ यत्तुयाज्ञवल्क्यआह॥भैक्षाग्निकार्येत्यक्त्वातुसप्तरात्रमनातुरः॥कामावकीर्ण
इत्याभ्यांजुहुयादाहुतिद्वयं॥इति॥ स्वरोष्ट्रयानादौसामान्यतः गृहस्थानादीनांप्रायश्चित्तं याज्ञवल्क्य आह॥प्राणा
यामंजलेस्नात्वा खरयानोष्ट्रयानगः॥नग्नःस्नात्वाचभुक्त्वाचगत्वाचैवदिवास्त्रियमिति॥ पूर्वश्लोकव्याख्याने॥
मिथ्याभिशंसनेप्रायश्चित्तमाह॥याज्ञवल्क्यः॥ महापापोपपापाभ्यां योभिशंसेन्मृषापरं॥अब्भक्षोमासमासीत
सजापीनियतेंद्रियइति॥पूर्वश्लोकव्याख्याने॥अभिशस्तप्रायश्चित्तमाह॥याज्ञवल्क्यः॥ अभिशस्तोमृषा कृच्छ्रं
चरेदाग्नेयमेववा॥निर्वपेत्तुपुरोडाशंवायव्यंचरुमेववेति।पूर्वश्लोकव्याख्याने।यस्यचित्पातकेप्राप्तेइतरैःअज्ञातपातकस्य
प्रायश्चित्तंरहस्यप्रायश्चित्तविधानेनकर्त्तव्यं॥प्रकटितपानकस्यतुप्रकाशप्रायश्चित्तविधानेनैवकर्त्तव्यमित्यत्र॥तदाह

प्र॰शा॰
५२३

तुः॥ बृहस्पतियाज्ञवल्क्यौ॥ विख्यातदोषः कुर्वीत॥ पार्षदानुमतं व्रतं॥ अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेदिति॥ पूर्वश्लो-
कव्याख्याने। रहस्यकृतानां पापानां ऋग्वेदादिमंत्रविशेषजपादेव पापविशेषस्य प्रायश्चित्तं इत्यत्र॥ याज्ञवल्क्यः॥ अथ-
र्वणाश्च ये केचिन्मंत्राः कामविवर्जिताः॥ ते सर्वे पापहंतारो याज्ञवल्क्यवचो यथा॥ इति॥ पूर्वश्लोकव्याख्याने॥ अथ प्रतिप-
दोक्तानि रहस्यप्रायश्चित्तानि॥ तत्र याज्ञवल्क्यः॥ त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणं॥ अंतर्जले विशुध्येत गां दत्वा
च पयस्विनीमिति॥ पूर्वश्लोकव्याख्याने॥ सुरापस्य रहस्यप्रायश्चित्तमाह॥ याज्ञवल्क्यः॥ त्रिरात्रोपोषितो हुत्वा कु-
ष्मांडीभिर्घृतं शुचिरिति॥ पूर्वश्लोकव्याख्याने॥ ब्राह्मणस्वर्णस्तेयस्य रहस्यप्रायश्चित्तमाह॥ याज्ञवल्क्यः॥ ब्राह्मणस्व-
र्णहारी तु रुद्रजापी जले स्थित इति॥ पूर्वश्लोकव्याख्याने॥ गुरुतल्पगस्य रहस्यप्रायश्चित्ते याज्ञवल्क्यः॥ सहस्रशी-
र्षजापी तु मुच्यते गुरुतल्पगः॥ गौर्देया कर्मणोस्यांते पृथगेभिः पयस्विनीमिति॥ पूर्वश्लोकव्याख्याने॥ उपपातकानां विशे-
षतः अनुपदिष्टप्रायश्चित्तेवतां सामान्यतः रहस्यप्रायश्चित्तमाह॥ याज्ञवल्क्यः॥ प्राणायामशतं कार्यं सर्वपापापनुत्तये
उपपातकजातानां अनादिष्टस्य चैव हि॥ इति॥ पूर्वश्लोकव्याख्याने। अथ व्रतलक्षणानि सर्वत्र साधारणान्यंगान्याह॥
याज्ञवल्क्यः॥ ब्रह्मचर्यं दया क्षांति र्दानं सत्यमकल्कता॥ अहिंसास्तेयमाधुर्ये दमश्चेति यमाः स्मृताः॥ इति॥ पूर्वश्लोक-
व्याख्याने॥ प्राजापत्यकृच्छ्रस्य लघुगुर्वादिरूपेण प्रभेदमाह॥ याज्ञवल्क्यः॥ एकभुक्तेन नक्तेन तथैवायाचितेन च॥

ने॰

उपवासेनचैकेनपादकृच्छ्रः प्रकीर्तितः॥ इति। पूर्वश्लोकव्याख्याने॥ प्राजापत्यकृच्छ्रस्यैवपरिणामविशेषेण अतिकृच्छ्रत्वं
याज्ञवल्क्य आह॥ अयमेवातिकृच्छ्रःस्यात्पाणिपूरान्नभोजन इति॥ तत्रैवव्याख्याने॥ कृच्छ्रातिकृच्छ्रलक्षणंयाज्ञवल्क्ये
नैवदर्शितं॥ कृच्छ्रातिकृच्छ्रः पयसादिवसानेकविंशतिमिति॥ पूर्वश्लोकव्याख्याने॥ पर्णकृच्छ्रमाह याज्ञवल्क्यः॥ पर्णो
दुंबरराजीवबिल्वपत्रकुशोदकैः॥ प्रत्येकंप्रत्यहं पीतैः पर्णकृच्छ्र उदाहृत इति॥ पूर्वश्लोकव्याख्याने॥ सौम्यकृच्छ्रस्व
रूपमाह याज्ञवल्क्यः॥ पिण्याकचामतक्राम्बुसक्तूनांप्रतिवासरं॥ एकरात्रोपवासश्चकृच्छ्रःसौम्योयमुच्यत इति॥ पू
र्वश्लोकव्याख्याने॥ याज्ञवल्क्यस्तु॥ पंचदशादिवससाध्यमाह॥ एषांत्रिरात्रमभ्यासादेकैकस्ययथाक्रमं॥ तुलापुरुष
इत्येवं ज्ञेयः पंचदशाह्निक इति॥ पूर्वश्लोकव्याख्याने प्राजापत्यकृच्छ्रप्रतिनिधिमाह। कण्वः। एकमध्ययनं कुर्या
त्प्राजापत्यमथापिवा॥ दद्याद्द्वादशसाहस्रंगवांमुष्टिंविचक्षण इति॥ पूर्वश्लोकव्याख्याने॥ पापप्रायश्चित्तप्रसक्त्याक
र्मविपाकप्रकरणे परमार्थकः॥ असंगस्यपरमात्मन एवजीवरूपेणप्रवेशश्रवणात्कथं॥ पापलेपः अस्य संभवेतेति
याज्ञवल्क्यंप्रतिऋषीणां प्रश्नवचनं॥ याज्ञवल्क्यस्मृतिस्थं॥ उदाहरति माधवाचार्यः। आत्मन ईश्वरस्वरूपत्वंप्रति
पाद्य आह॥ याज्ञवल्क्यंप्रति ऋषिवचनं॥ यद्येवंसकथंब्रह्मन्पापयोनिषुजायते॥ ईश्वरःसकथंपापैरनिष्टैःसंप्रयु
ज्यते॥ इति। पूर्वश्लोकव्याख्यानं॥ कर्मपाकानुसारेणजीवस्यस्वेन कृतपापविशेषकर्मणायोनितास्तन्यप्राप्तिंसू

चयति॥ याज्ञवल्क्यः॥ परद्रव्याण्यभिध्यायंस्तथानिष्टानि चिंतयन्॥ वितथाभिनिवेशी च जायतेंत्यासु योनिषु॥ पूर्वश्लोकव्याख्याने॥ पूर्वोक्तमेव शरीरविशेषं कर्मविशेषेण प्राप्नोतीत्यत्र याज्ञवल्क्यः॥ हीनजातौ प्रजायेत पररत्नापहारकः॥ पत्रशाकं शिखी हृत्वा गंधान् छुछुंदरी शुभान्॥ सर्वं माधवाचार्यस्य तत्कृतवेदभाष्यादिबहुग्रंथैरेव सर्वज्ञत्वमित्यापि वाक्येनापि मर्वज्ञत्वं प्रतीयते॥ तथा च वेदभाष्यपराशरस्मृतिव्याख्यानादौ॥ यस्य बोधायनं सूत्रं शाखा यस्य च याजुषी॥ भारद्वाजकुलं यस्य सर्वज्ञः स हि माधवः॥ ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात्॥ कृपालुर्माधवाचार्यो वेदार्थं वक्तुमुद्यतः॥ ब्राह्मणं कल्पसूत्रे द्वे मीमांसां व्याकृतिं तथा॥ उदाहृत्यायनत्सर्वं मंत्रार्थः स्पष्टमीर्यते॥ एवं च चतुर्वेदभाष्यादिबहुप्रमाणभूतग्रंथकर्तृसर्वज्ञमाधवाचार्याख्यविद्यारण्यस्वामिना पराशरस्मृतिव्याख्याने माधवीये सर्वप्रमेयविषयेष्वपि प्रतिपदं याज्ञवल्क्यस्मृतिवचनजातस्य कण्वकात्यायनादिस्मृतिसूत्रवचनानां वाजसनेयिशतपथब्राह्मणस्य च बहुशो महाप्रमाणत्वेन बहुसंख्याकोदाहरणोदाहृतत्वात्॥ तस्मिन्नेव वाक्योदाहरणप्रकरणे मध्यगतवाक्यानि॥ प्रवरग्रंथकर्तृणां नाम॥ न्याह माधवाचार्यः प्रवरगोत्रयोः समानत्वासमानत्वे बोधायनकात्यायनविश्वामित्रगर्गादिप्रणीतेषु प्रवरग्रंथेषु प्रसिद्धे इति॥ कात्यायनादीनामपि प्रवरग्रंथकर्तृकौ तौ बोधायनविश्वामित्रगर्गादीनां समानत्वेन कात्यायनस्यापि गोत्रनियामकत्वेन पृथक्तया स्वीकाराच्च याज्ञवल्क्यकात्यायनकण्वादीनां यत्किंचिद्विषयेपि योग्यतानु

नसंनसंभवतीति॥ इदंचीकृतोभवति एवंपूर्वोक्तरीत्या हेमाद्रि विज्ञानेश्वर आश्वलायननारायणवृत्तिकार आपस्तंबधर्म
सूत्रभाष्यरूपोज्ज्वलाकारसामसूत्रभाष्यकारगौतमसूत्रभाष्यरूपमस्करीयकार आपस्तंबगृह्यसूत्रव्याख्यानरू
पतात्पर्यदर्शनकारमनुस्मृतिव्याख्याकर्तृमेधातिथ्यादिकुल्लूकभट्टांतैः नरसिंहशास्त्रिजातधर्मप्रवृत्तिमयूखकाररवि
ज्ञानेश्वरनिर्णयसिंधुधर्मसिंधुकारादिभिः सर्वैः धर्मशास्त्रकर्तृभिः। याज्ञवल्क्यकण्वकात्यायनादीन्स्मृतिकर्तृकोटौ
निवेशयित्वातेषांवचनानांमहाप्रमाणत्वेनउदाहरणं॥ कृताऋग्वेदादिअन्यशाखाध्यापकत्वेन ऋग्वेदादिमंत्रद्र
ष्टृत्वेनगोत्रप्रवरनिर्णायकसूत्रकर्तृत्वेनच अतीवादरपुरस्सरमेवउदाहृतत्वाच्च याज्ञवल्क्यादीनांशापप्राप्तेः तत्प्रयु
क्तायोग्यतादीनांचप्राप्तेः अत्यंतासंभवः निश्चीयते। तादृशायोग्यतासत्वेधर्मशास्त्रकारैः बोधायनआपस्तंबादि
सूत्रकारैश्चसतेषांवचनानांप्रमाणत्वेनकथंउदाहरणंक्रीयेत आयोग्यतासत्वेपिउदाहरणस्यापिसंभवस्वीकारे॥
बुद्धावताररूपिणः विष्णोः जैनावताररूपिणः ब्रह्मणः लोकायतिकाख्यचार्वाकसूत्रकर्तुः बृहस्पतेश्चवचनाना
मपितत्तत्तंत्रगतानांधर्मशास्त्रादिषुप्रमाणत्वेनउदाहरणप्रसंगः दुर्वारएवभवति। प्रत्युत। पराशरमाधवीयादि
पुण्यानिचार्वाकवाक्यानि बौद्धानि पठितानितु। विप्रलंभकवाक्यानितानिसर्वाणिवर्जयेत॥ इत्यादि धर्मशास्त्रवच
नैः निषेधस्यापिसत्वात्। तस्मात्याज्ञवल्क्यकण्वादीनांशापग्रस्तत्वतत्प्रयुक्तायोग्यत्वादिकं शास्त्रानभिज्ञजनम्र

प्र॰ श॰
५२५

तिपादितं अस्येनाज्ञानमूलकमेवेति सिद्धं भवति॥ असूयामूलकं वेति वा भाति॥ एवं स्थिते शास्त्रार्थेशास्त्रानभिज्ञाः अ
सूयपान्वा॥ अज्ञतया वा केन चिद्द्वेषेण वा॥ भ्रांतिज्ञानेन वा॥ क्वचित्कचित्प्रदेशेषु क्वचित्कचित्कालविशेषेषु केश्चित् प्र
वृत्ताविवेकव्यवहारमनुसृत्य इदानीमपि क्वचित्कचित्प्रदेशे केचित्॥ याज्ञवल्क्यकण्वमाध्यंदिनकात्यायनानां वैशंपो
यनशापत्रास्यात्तस्युक्तचंडालत्वमिति अन्येकेचित्॥ नादृशचंडालत्वस्यापि मध्यान्हकाले घटीकाद्वयमिति घटिकात्र
यमिति घटिका चतुष्टयमिति च स्वस्वेच्छानुरूपेण अभिवदंति॥ तंनिमित्तीकृत्य तच्छाखाप्रविष्टानां तच्छाखाध्येतृत्वे
नतच्छिष्य परम्परयाप्राप्तानां वाजसनेयिब्राह्मणानां यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहभोजनप्रतिभोजनश्रा
द्धनिमंत्रणकन्यादानप्रतिग्रहादिव्यवहाराः॥ वाजसनेयिव्यतिरिक्तैस्तैत्तिरीयऋक्सामाथर्वणवेदशाखाध्येतृभिः
सर्वैरपि न कर्तव्याः इत्यपि वदंति॥ एतद्दुर्थनिर्णयार्थं कश्चिदृग्वेदी रामाख्यः ब्राह्मणः प्रवृत्तः सन् यथाशक्ति यथाम
ति श्रुतिस्मृतीतिहासपुराणआश्वलायनआपस्तंबद्राह्यायनबोधायनगोतमादिगृह्यसूत्रधर्मसूत्रमनुपराशरादिस्मृतितद्व्या
ख्यानद्व्याख्यानतत्त्वह्वितत्त्वप्रयोगनरसिंहपारिजातधर्मप्रवृत्तिनिर्णयसिंधुधर्मसिंधुमाधवीयविज्ञानेश्वरीयादि
प्रसिद्धसर्वजनपरिगृहीतप्रमाणग्रंथेषु विचार्य निर्णीतमर्थं वाजसनेयिनां तदितरसर्वशाखाप्रविष्टब्राह्मणानां च ज्ञाप
नायतद्विवरणरूपतदर्थप्रकाशकप्रथमशाखान्यायनिर्णयनामकग्रंथं कृतवान् तस्मिन्नेतस्मिन्ग्रंथे याज्ञवल्क्यस्य

योगीश्वरत्वप्रसिद्धिप्रपंचनं तस्यैव परमात्मबोधकवरत्वसाधनार्थं बृहदारण्योपनिषद्भाष्यव्याख्यानतात्पर्यप्रकाशनं
तस्य याज्ञवल्क्यस्य चतुर्वेदवित्त्वेन अष्टादशस्मृत्यंतर्गतविज्ञानेश्वरीयव्याख्यानमूलभूतयाज्ञवल्क्यस्मृतिकर्तृत्व
प्रकाशनं ॥ बृहदारण्यपंचमषष्ठाध्याययोः ॥ आश्वलप्रभृतिविदग्धशाकल्यांतबहुऋषिजेतृत्वजनकमैत्रेय्यादि
ब्रह्मबोधकत्वप्रकटनं ॥ चतुर्वेदवित्त्वेन सामवेदाध्येतृत्वाध्यापयितृत्ववत् ॥ ऋग्वेदाध्येतृत्वाध्यापयितृत्वेन परं
परया ब्रह्मात्मैकत्वज्ञानोत्पत्ति प्रयोजकत्वेन च स्वस्य ऋग्वेदिनः शमाख्यस्यापि एतद्ग्रंथकर्तुः याज्ञवल्क्यः शिष्य
त्वसाधनं ॥ बृहदारण्यादिश्रुतिसिद्धयाज्ञवल्क्यमाहात्म्यप्रकाशकबृहदारण्योपनिषद्भाष्यतद्व्याख्यानरूपशंकर
भगवत्कृतआनंदगिरीयाचार्यकृतसुरेश्वराचार्यकृतबृहदारण्यवार्त्तिकादिसर्वप्रमाणभूतग्रंथाद्यनुसारेण वि
चारण्यकृतपंचदशीप्रकरणजीवन्मुक्तिप्रकरणादिग्रंथेषु ॥ प्रतिपादिता ये ह्यारा भाष्यकारभगवत्पादाचार्यतद्व्या
ख्यकारआनंदगिरीयाचार्यवार्तिककारसुरेश्वराचार्यचतुर्वेदभाष्यपूर्वोत्तरमीमांसाधिकरणार्थमालापराशर
स्मृतिव्याख्यानादिकर्तृसर्वज्ञमाधवाचार्याख्यविद्यारण्यादितात्पर्यप्रकटनं। शास्त्राद्धोनभित्तैः क्वचिद्देशगतक्वचि
त्कालप्रवृत्तअसत्यव्यवहारं पुरस्कृत्य कैश्चित्कृतलोकव्यवहाररूपाप्रमाणिकपूर्वपक्षः। तस्य मनुपराशरगौतमा
दिस्मृतितद्भाष्यव्याख्यानादिप्रतिपादितवाक्यन्यायादिहेतुभिः शास्त्रविरुद्धलोकव्यवहारादेः अप्रामाणिकत्वप्र

दर्शनेन॥ निराकरणपूर्वकतत्प्रत्युत्तररूपसिद्धांतप्रदर्शनं पूर्वपक्षिणोक्तलोकव्यवहारमूलभूतकालिकाखंडा
ख्यपुराणस्थयाज्ञवल्क्यकण्वकात्यायनमाध्यंदिनानां वैशंपायनदत्तशापमूलप्रमाणभूतवाक्यस्यपूर्वपक्षांत
र्गतत्वेनवादित्वं तद्विरुद्धार्थरूपयाज्ञवल्क्यादितच्छाखाप्रविष्टवाजसनेयिब्राह्मणानां तानां सर्वोत्कृष्टत्वेननिरतिश
यमाहात्म्यप्रतिपादकआदित्यपुराणस्थवाक्यस्यसिद्धांतकोटिप्रविष्टत्वेनप्रतिवादित्वं इत्येवंप्राप्ते॥ विप्रतिप
त्तौसाक्षिनिमित्तासत्यव्यवस्थितेति। गौतमधर्मसूत्रादिबहुधर्मशास्त्रन्यायपूर्वमीमांसाशास्त्रन्यायउत्तरमीमां
सात्मकवेदांतशास्त्रन्यायेदानींतनलौकिकन्यायानुसारिभिः श्रुतिःलिंगवाक्यप्रकरणादिबलाबलसदृशैः उपक्रमोपसं
हाराभ्यासेत्यादिषड्विधतात्पर्यलिंगसदृशैः मीमांसोक्तअर्थनिर्णायकस्थानीयैः हेतुभिः अन्यानेकलिंगात्मकहेतुसह
कृतसाक्षिरूपसर्वलोकसिद्धअबाधितप्रमाणभूतमहाभारत॥ श्रीमद्भागवत वाल्मीकिरामायण॥ विष्णुपुराण॥ स्कां
दपुराणांतर्गतसौरसंहितादिवाक्यादिभिः॥ पूर्वोक्तकालिकाखंडवाक्यस्यअप्रमाणत्वसाधनं प्रथमशाखाशब्दस्यप्रा
माणिकभारतादि[illegible]तात्पर्यप्रकाशनपूर्वकअतिशयत्वविशिष्टवाजसनेयिशाखापरतया॥ निर्वचनप्रदर्शनं॥ शुक्ल
यजुश्शाखाशब्दस्य अन्वर्थनामकत्वेनभारतादिप्रमाणग्रंथोपष्टंभेन॥ वाजसनेयिशाखापरत्वसाधनं॥ कालिकाखंडवा
क्यस्य॥ आदित्यपुराणवाक्यस्य च॥ परस्परविरुद्धार्थत्वपरिहाराय॥ अनयोःकल्पभेदेनव्यवस्थाकर्तव्येति॥ पूर्वपक्षे ५२६

नि॰

त्रान्ने वेदांतमीमांसादेवताधिकरणन्यायप्रदर्शनेन॥ तत्पूर्वपक्षनिराकरणं॥ प्रायेण क्वचिद्देशविशेषेषु॥ वाजसनेयिशाखि
ब्राह्मणो [illegible] हतदितरसर्वशाखिब्राह्मणानां यजनयाजनअध्ययनाध्यापनश्राद्धनिमंत्रणकन्यादानग्रहणादिव्यवहारोन
दृश्यत इतिपूर्वपक्षिणोद्भावितस्य॥ शास्त्रानुसारेण॥ बहुदेशलोकव्यवहारपरंपरैतिह्यसंभावनाहेत्वनुभवादिभिः॥ बहुस्
वकैः। प्रत्युत्तरेदानेन सर्वजनसंभावनोत्पादनद्वारा। समाधानीकरणं। यजुर्वेदत्वस्यतैत्तिरीयवाजसनेयिशाखोभयानुग
तत्वेन स्थिततात्त्वात्। वेदांतशास्त्रप्रतिपाद्यचतुर्वेदोपदिष्टचतुर्णांमहावाक्यानांमध्येतैत्तिरीयवाजसनेयिशाखोभय
गतत्वेन एकमेव महावाक्यं॥ यजुर्वेदोपदिष्टत्वेन अहंब्रह्मास्मीतिश्रुतिभाष्यादिबहुग्रंथेषुप्रतिपादितं॥ नत्तु अहंब्र
ह्मास्मीति यजुर्वेदमहावाक्यं॥ वाजसनेयिशाखागत बृहदारण्योपनिषत्तृतीयाध्याये॥ प्रतिपादितं॥ वर्त्तते॥ अतः प्रा
मान्येन॥ शुक्लयजुषएव॥ यजुर्वेदत्वप्रयोगस्य भूयोदर्शनद्वारातैत्तिरीय वाजसनेयोभयशाखाअभेदाभिप्रायेण॥ ए
कमेव यजुर्वेदे महावाक्यं। श्रुत्यादिसर्वप्रमाणग्रंथैः उपदिष्टमित्यर्थप्रकाशनं॥ सर्वेषांऋगादिशाखिनांब्राह्मणानांचतु
र्वेदाध्ययनस्यविधानं॥ सूत्रस्मृत्यादिषु सर्वत्र दृश्यते। नेतः॥ सर्वेषांब्राह्मणानांसर्ववेदाध्येतृत्वेसंभवतिसति। अयं
वाजसनेयी॥ अयं तदितरशाखावान्। इत्येवं विभक्ततयानिश्चेतुंनशक्यत इत्यपिप्रतिपादनं वाजसनेयिब्राह्मणानां
सर्पशाखागृह्यसूत्रधर्मसूत्रमन्वादिस्मृतिमाधवीयादिनिबंधनग्रंथेषु॥ सर्वत्रश्राद्धनिमंत्रणप्रस्तावे॥ सामान्यतः॥ ऋ

गादिशारिवनामिव॥ श्राद्धनिमंत्रयितव्यत्वेन॥ विधानस्यविशेषाकारेणापि॥ वाजसनेयित्वेन रूपेणापि॥ गौतमधर्मे
सूत्रभाष्येमस्करीयें॥ श्राद्धभोजनीयब्राह्मणप्रस्तावेः वसिष्ठस्मृत्युदाहरणपूर्वकपङ्क्तिपावनकोटौ॥ निवेश्यअवस्यक
तया। भोजनीयत्वस्यचप्रदर्शनं। गणान्नगणिकान्नादिनिषेध्यतया अभोज्यान्नको टिषु॥ वाजसनेयिब्राह्मणानां। पू
र्वोक्तआपस्तंबबोधायनगौतमादिगृह्यसूत्रधर्मसूत्रेषु॥ मनुपराशरादिस्मृतिषु। माधवीयहेमाद्रिनिर्णयसिंध्वादिधर्मे
निबंधनग्रंथेषुच। यत्रकुत्रापि॥ नामग्रहणाभावात्॥ तादृशअभोज्यान्नभोजनप्रायश्चित्तेषु॥ पूर्वोक्तग्रंथेषुयत्रकुत्र
पि॥ वाजसनेयिब्राह्मणान्नभोजने॥ प्रायश्चित्तस्यविधानाभावः। इत्यादिप्रदर्शनंएवमेवकालिकाखंडवाक्योक्तश
मस्यनदनुसारिशास्त्रानभिन्नलोकव्यवहारस्य॥ आदित्यपुराणवाक्योक्तयाज्ञवल्क्यादिवाजसनेयिब्राह्मणांतः
माहात्म्यप्रतिपादनस्यच॥ परस्परविरोधपरिहाराय॥ पूर्वोक्तरीत्यान्यायनिर्णयविषये॥ अन्यानिबहूनिसाधनानि
।मध्येमध्येकृतपूर्वपक्षादीनां निराकरणपूर्वकसिद्धांतसाधनान्यपि। अस्मिन्ग्रंथेप्रदर्शितानि॥ वर्तंते। अपिच॥ एत
न्यायनिर्णयाय॥ पूर्वोक्तरीत्यान्यायाद्युपष्टंभकत्वेन॥ उपसाक्षिरूपअनुकूलतर्कस्थानापन्नानां। लघुजाबालरामता
पनीयमुक्तिकोपनिषदादिरूपश्रुतिशतपथब्राह्मणादिश्रुतिमन्वादिस्मृतिबोधायनापस्तंबादिसूत्रहेमाद्रिमाधवीया
दिनिबंधनरूपशास्त्रकारैः॥ याज्ञवल्क्यकण्वकात्यायनानांवचनानिप्रमाणतया॥ स्वस्वग्रंथेषु। सर्वधर्मेउपासनाब्र

ह्मज्ञानादिविषयेष्वपिगृहीतत्वप्रदर्शनं॥इत्यादिपूर्वोक्तानिसिद्धांतकोट्यभिप्रेतार्थनिर्णये॥ परमसाधकानिभवंती
ति॥ [illegible] ग्रंथस्यसंक्षेपतोर्थः प्रदर्शितः॥एतावताग्रंथसंदर्भेणयाज्ञवल्क्यकण्वकात्यायनमाध्यंदिनानांशापप्राप्तेः
पूर्वोक्तरीत्याश्रुतिस्मृतीतिहासपुराणतद्भाष्यव्याख्यानादिकेनचित्प्रमाणभूतग्रंथेनापिव्याप्तिविशिष्टसद्धेतुमानादिप्रमा
णादिनावा॥असिद्धत्वात्॥तच्छाखाप्रविष्टप्रथमशाखिब्राह्मणानां॥अयोग्यत्वनिष्ठूयः केनचिद्धेतुनाप्यसिद्धः॥तेषां
याज्ञवल्क्यादीनांशापनिमित्तीकृत्यतच्छाखाध्येतृत्वतच्छिष्यपरंपराशिष्यत्वादिहेतुनैवतच्छाखिब्राह्मणानांसर्वेषामपि
अयोग्यतावक्तव्याभवेत्॥तादृशहेतुंविनाप्रकारान्तरेणवाजसनेयिब्राह्मणानामेव अयोग्यताहेतुत्वसिद्धेः तेषांतुउक्तरी
त्याशापस्यासिद्धत्वात्॥ तेषांस्तेषांब्राह्मणानांचयेनकेनापिरूपेणायोग्यतायाः॥प्रसक्तेरेवासंभवात्॥शास्त्रज्ञैः तैः
सह॥करणीयसर्वव्यवहारेषुनकाचिदनुपपत्तिसम्भवति॥शास्त्रानभिज्ञैः केवलासूयाप्रधानैस्तुयथातथावाक्रियता
नाम।तावन्मात्रेणवाजसनेयिब्राह्मणानांशास्त्रप्रयुक्तन्यूनतालेशोऽपिनसंभवति॥तादृशदोषप्रमाणाभावेपि॥
असूयादिनादोषआरोप्यतइतिचेत्। शुक्तौरजितादिवत्॥आरोपणस्यसर्वसुलभत्वात्॥सर्वशाखाकृषिषुतच्छा
खीयब्राह्मणादिषुचअन्यैरपिइतोप्यधिकदोषसमुदायस्य आरोपयितुं॥शक्यत्वात् तथापिसर्वेषांसमत्वमेव॥आ
याति। तथैववेदवादीनांब्रह्मविष्ण्वादीनांमहर्षीणांचमहादोषारोपणंसर्वैरपिकर्तुंशक्यतएव प्रत्युतब्रह्मविष्णुम

प्र॰ सं॰
५१

हेश्वर इन्द्रयमसूर्यबृहस्पत्यादिदेवानां दूर्वासविश्वामित्रादिदेवर्षिब्रह्मऋष्यादिमहर्षीणांच॥ कचित्कचित्का
लविशेषेषु येनकेनापिहेतुना येनकेनापिक्रोध्यादिनाशापः दत्तइति येनकेनचित्प्रकारेणशापोनिवृत्त इतिच॥ पु
राणादिषु बहुशोऽनूपतं॥ एवंव्यासस्यकेनचिन्निमित्तेनसत्यवतीसुतत्वंतथैववसिष्ठस्यापिऊर्वसीसुतत्वं। प्राप्त
मिस्येतावन्मात्रेणनन्यूनता॥ एवंयाज्ञवल्क्यस्यापि॥ अप्रामाणिकशापग्रस्तत्वांगीकारेपितन्निष्ठकर्मसिद्धि
तपःसिद्धियोगसिद्धि ओलज्ञानसिध्यादिनाकेनचित्प्रभावेनतन्निवृत्तिद्वारामाहात्म्यस्यसिद्धत्वेननन्यूनता
प्राप्तिः। तद्द्वारातच्छाखिब्राह्मणानामपिन्यूनताभावःसिद्धएव॥ अतएवगौतमधर्मसूत्रादिप्रामाणिकग्रंथेषुदृष्टो
हिधर्मव्यतिक्रमः साहसश्चमहतांतेषां तेजो विशेषेणप्रत्यवायोनविद्यते॥ इत्यादिवाक्यैः तेजःप्रभावेदीप्ताविति
प्रमाणेनतेषांव्यक्तिप्रभावात्॥ यादृशदोषोपिनसंभवति॥ प्रस्तुत व्यासस्यचतुर्वेद प्रवर्तकत्वेनसर्वशाखिनां
ब्राह्मणानामपिगुरुत्वेनसर्वशाखिसमानः॥ व्यासइति॥ एवंयाज्ञवल्क्यस्यापिचतुर्वेदाध्ययनपूर्वकचतुर्वेदाध्या
पयितृत्वेनसर्वशाखिब्राह्मणगुरुत्वप्राप्त्यासर्वब्राह्मणानांसर्वशाखिसमानः। याज्ञवल्क्यइति। तन्निष्ठशापस्यतन्निवृत्तिपूर्वकयोग्य
तायाश्चतच्छिष्यपरंपरयाचतुर्वेदाध्येतॄणामपिकथंचित्। यथासंभवं। अनुवर्ततइतिहेतोः वाजसनेयिनामपितथैवतावन्मात्रप्रा
प्तिरेवेतिवक्तव्यंभवेत्। ननुतेषांशापोनास्तीतित्वयोच्यते॥ माध्यंदिनइतितन्नामतएवतत्सिद्धिसंभवः। इति

चिन्न॥ तन्नामनिर्वचनं कृतेपित्वदृभिमतशापप्राप्तिः॥ कथं संभवति। ननु याज्ञवल्क्यादिप्राप्तशापस्य मध्यान्ह
काले केऽ-चिद्द्वादिका विशेषेषु पर्यवसन्नत्वात्॥ मध्यान्हकालीन शापग्रस्तत्वात्॥ माध्यंदिन इति अर्थः प्राप्तः इ
तिचेत्॥ तदपि न संभवति॥ मध्यंदिने भवः माध्यंदिनः इत्यर्थस्य अवयवव्युत्पत्तिसिद्धत्वात् त्वदभिमतमध्या
न्हप्राप्तशापग्रस्तत्वार्थस्य केनचित्पदेनापि कयापि व्युत्पत्यापि संभवो नास्ति॥ शापरूपार्थज्ञापकपदाभावात्॥ किं
तर्हि। माध्यंदिनशब्दस्यार्थः इत्युच्येत॥ तथा सत्युच्यते॥ केवल रूढ्यैव तादृशऋषेर्माध्यंदिन इति संज्ञारूपनामभ
वति॥ डित्थडिबिड्ड इत्यादिवत्॥ संज्ञामात्रमेव॥ न तु यौगिकी संज्ञा॥ तथैव बृहदारण्योपनिषद्ब्राह्मणे विद्यागुरु
परम्परानामग्रहणप्रस्तावे॥ माध्यंदिनान्माध्यंदिन इति केवलरूढिनाम्नः स्वैप्रतिपादितत्वात्॥ अन्यथा शौनक
इति शुनकस्यापत्यं पुमान् शौनकः शुनश्शेपः इत्यादिस्थलेषु॥ योगव्युत्पत्या नामनिर्वचने कृते लोकविरुद्धार्थस्य
प्रतिपाद्यत्वप्रसंगः॥ एवं श्रुत्यादिषु ऋषिनामानि अव्युत्पन्नान्येव बहुशो दृश्यन्ते॥ तैत्तिरीयकाठकादिश्रुतिषु शौच
आन्हेयः॥ कुऔहलोद्धमिः कुत्तसि- इत्यादि ऋषिनामानि बहुशो प्रयुक्तानि वर्तन्ते॥ तथैव पराशरमाधवीये॥ क्वचि
रण्यगुरुभिः॥ वेदशाखाभेदवर्णनप्रस्तावे॥ काण्वमाध्यंदिन तैत्तिरीपक ठकौथुमाद्याशाखा इत्युक्तं॥ तस्मात्॥ मा
ध्यंदिनशब्दस्य मध्यंदिने भवः॥ माध्यंदिन इति व्युत्पत्तिसंभवात्॥ भवशब्दस्य भू सत्तायामिति॥ धातोः मध्यान्ह

कालस्थित्यर्थत्वसम्भवः अथवा गौणतया तत्कालोत्पन्नत्व अर्थसंभवः । लभ्यते न तु मध्यान्हकाले शापप्राप्तत्वं तत्त
युक्तचंडालत्वं वा कथंचिदपि नार्थो भवति ॥ शापस्यैव असंभवस्य पूर्वं ग्रंथेषु साधितत्वात् ॥ तत्पर्यवसानस्य मध्यान्ह
काले प्राप्तिरित्यत्रापि प्रमाणाभावः साधित एव ॥ एवं स्थितत्वेन माध्यंदिन शब्दः त्वदभिप्रेत शापग्रस्तत्व अर्थबोधको
न भवति ॥ किंच केचित् ॥ काश्यादिदूरदेशं गताः पुनः स्वदेशं प्रति आगतास्संतः अत्रत्यैः कैश्चित् ॥ जनैः तद्देशीयासाधा
रणाज्ञातपूर्व आश्चर्यं चर्यादिप्रश्ने कृते सति देशांतरं गताः अपूर्वाश्चर्यव्यवहार द्रष्टृत्व रूप स्वमहात्म्य प्रदर्शनाय
क्वचिद्देशे वाजसनेयि ब्राह्मणाः शास्त्रद्रष्टारः शिष्टाः मध्यान्हकाले सकुटुंबाः ग्रामान्निर्गत्य बहिर्जले घटिकात्रयं चंडा
लत्वमनुभूय अनंतरं स्नात्वा सकुटुंबाः स्वस्वगृहं प्रविशंति ॥ इत्येव अस्माभिः दृष्टमिति वदंति ॥ द्विवारं काशीं प्रति
अस्मद्गमनवेलायां गोदावर्युत्पत्ति पंचवटे नागपुर नर्मदादिमार्गेण गमनसमये तुंगभद्रामारभ्य काशीपर्यंतेषु ।
देशेषु कर्नाटक महाराष्ट्र घूर्जिर गौडादि ब्राह्मणाः प्रायेण काण्वमाध्यंदिनाः बहुसंख्याकाः स्थितवंतः काशीपु
र्याः सकाशात् ॥ निर्गत्य कावेरीपर्यंतास्मदागमनवेलायां बहुशः काण्वाः बहुसंख्याकाः गौड उत्कल आंध्र
द्राविडादि देशेषु स्थितवंतः ॥ एवं द्विरावृत्या काशीगमनागमनवेलायामपि काश्यां च बहुदेशस्थाः काण्वमा
ध्यंदिनाः कर्नाटक महाराष्ट्र घूर्जर माळवीय सारस्वत कानकुब्जा गौड उत्कल आंध्र द्राविड केरळीयादि ब्राह्म

णास्थितवंतः तस्मान्निग्रामेश्वरपर्यंतं गौडउत्कलआंध्रद्राविडादिदेशेए तेषु यत्रकुत्रापिकाण्वमाध्यंदिनादिशा
खाप्रविष्टब्राह्मणाः प्रतिदिनंमध्यान्हकालेकंचित्कालमपि ग्रामाद्बहिः स्थित्वाचंडालत्वमनुभूयअनंतरंस्नात्वा
ग्रामंप्रविष्टाः इतिवयंतु। यत्रकुत्रापिनदृष्टवंतः नश्रुतवंतश्च॥ इदानीमपियेकेचनजनाः तथावदंतिनेजनाः अ
स्मदीयाः अभ्यसाक्षिणश्च सवैजनाः॥ मिळित्वाधूमशकटोपरिगत्वायस्मिन्देशेकाण्वमाध्यंदिनाः प्रतिदिनंग्रा
माद्बहिः जलंसकुटुंबाः गत्वामध्यान्हसमयेकंचित्कालंचंडालत्वमनुभूयअनंतरंस्नानंकृत्वास्वग्रामंस्वगृहंप्रविशंतीति। व्यवहारोऽस्ति
तादृशव्यवहारंपूर्वपक्षकोटिप्रविष्टाः वादिनः प्रदर्शयिष्यंतिचेत्॥ तदानीमेतद्दूषणपरिहारं तः नैरुक्तप्रकारेण वयंवर्णिष्यामः
इतिअस्माभिः प्रतिज्ञाक्रियते। प्रस्तुत। तद्व्यवहारनिदर्शनार्थंगमनागमनवेलायांवादिप्रतिवादिसाक्षिणां सर्वेषा
धूमशकटादिनिमित्तं यावंतिद्रव्याणि अपेक्षितानिभवंति॥ तानिद्रव्याणि अस्माभिर्दीयंते तत्रगत्वातादृशव्यवहा
रः अप्रसिद्ध इति॥ निश्चयोभवेद्यदितदानीं पूर्वपक्षकोटिप्रविष्टाः तद्व्यवहारप्रदर्शयितारः॥ एतेवयंतद्द्रव्याणि नद्द्र
व्याणिदास्याम इति तैः प्रतिज्ञापत्रिकालिखित्वाअस्मात्प्रतिदातव्या इतिसमास्थापत्रिकापूर्वमेवउभयोः पक्षयोः
लेखपितव्या इति तादृशव्यवहारप्रदर्शनार्थंप्रवृत्तेपरत्वात्पूर्वमेवेदानींअस्माभिरुच्यते॥ एतेनवाजसनेयिपक्षे सर्व
दोषपरिहृतेसतिवाजसनेयिब्राह्मणानां नदितरशाखाब्राह्मणानामिवसर्वशास्त्रीयव्यवहारेषुयोग्यतायांन्यूननाना

स्तीति सिद्धं॥ यद्यपि एतदुपष्टंभकत्वेन सर्वशाखागृह्यसूत्रधर्मसूत्रमन्वादिस्मृतितत्तद्भाष्यव्याख्यानादिषु तत्तद्ग्रं
थकर्तृभिः स्वस्वोक्तवाक्यार्थनिर्धारणाय याज्ञवल्क्यकण्वकात्यायनादिसूत्रस्मृतिवाक्योदाहरणबलादेव पूर्वो
क्तोर्थः दृढीकृत एव॥ तथापि शास्त्रकारमुख्यतात्पर्यसूचनार्थं यत्किंचिद्वचनजातं अल्पतया सूच्यते॥ तथाहि
बोधायनधर्मसूत्रे प्रथमाध्याये तृतीयखंडे अभिवादनप्रकरणे॥ ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां
प्रत्युत्थायाभिभाषणं प्रत्यभिवादनमिति कात्यायन इति वाक्ये॥ बोधायनेन॥ ऋत्विक्श्वशुरपितृव्यमातुलानां तु
यवीयसां प्रत्युत्थायाभिभाषणमिति स्वमतमुक्त्वा प्रत्यभिवादनमिति कात्यायन इति॥ कात्यायनमतं दर्शयित्वा त
न्मतमपि स्वयं अंगीकृत्य कात्यायनमतस्यापि प्रामाणिकत्वेन उदाहृतत्वात्॥ बोधायनादितैत्तिरीयशाखासूत्र
काराणामपि याज्ञवल्क्यकण्वकात्यायनादीनां शापप्रयुक्तअयोग्यता नास्ति॥ शापग्रस्तत्वमपि नास्तीति तात्पर्यं
निश्चीयते॥ एवं पराशरमाधवीये प्रथमाध्याये उपोद्घातप्रकरणे ग्रंथादावेव॥ न च पराशरमहिम्नो अश्रौतत्वं॥ सहोवाच
व्यासः पाराशर्य इति श्रुतौ पराशरपुत्रत्वमुपजीव्यते तदा किमु वक्तव्यमचिन्त्यमहिमा पराशर इति॥ किंच वाजसनेयिशाखायां वं
शब्राह्मणे वेदसंप्रदायप्रवर्तकगुरुशिष्यपरम्परायां पराशरस्य पुत्रपौत्राः श्रूयन्ते॥ कौशिकायनिर्घृतकौशिकाद्धृतकौशिकः॥ पारा
शर्यायणात्पाराशर्यायणः पाराशर्यात्॥ पाराशर्यो जातूकर्ण्यादिति॥ तस्मात्पराशरोपि मनुसमान एव॥ एष एव न्यायो वसिष्ठात्रि

याज्ञवल्क्यादिषु योजनीयः तत्तद्विषयश्रुतीनामुपलंभात् ॥ ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यन्तं वसिष्ठः प्रत्यक्षमपश्य
त् ॥ अत्रिरददादौर्वाय प्रजां पुत्रकामाय ॥ अथाह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुरित्याद्याः श्रुतयः ॥ इत्यादिवाक्यजा
तेन माधवाचार्याख्य चतुर्वेदभाष्यकर्तृ विद्यारण्याचार्येण पराशरस्मृतिव्याख्यानावसरे पराशरस्मृतेः महाप्रमाण
त्वसाधनार्थं पराशरऋषेः माहात्म्यख्यापनाय तैत्तिरीयब्राह्मणोक्तव्यासः पाराशर्य इति श्रुतिवाक्यप्रतिपाद्यव्या
सस्य पराशरपुत्रत्वेन आधिक्यप्रतिपादनात् पराशरमाहात्म्यं किमु वक्तव्यमिति तथैव वाजसनेयिशाखाब्राह्मणो
पनिषदि वंशब्राह्मणे वेदसंप्रदायप्रवर्तकगुरुशिष्यपरंपरायां पराशरस्य पुत्रपौत्राः श्रूयंते इत्यादिश्रुतिवाक्येन च
पराशरस्य श्रुतिप्रतिपाद्यत्वेन माहात्म्यमपि प्रदर्शितं । एवमेव तन्नैव माधवाचार्येण तत्रैव पराशरमाधवीये पराशर
स्य वेदप्रतिपाद्यत्वेन मनुतुल्यत्वमुक्त्वा ॥ एष एव न्यायो वसिष्ठात्रियाज्ञवल्क्यादिषु ॥ योजनीय इत्युक्त्वा वसिष्ठविष
ये ॥ ऋषयो वा इंद्रं प्रत्यक्षं नापश्यन् इति वेदमंत्रेण ॥ अत्रिविषये ॥ अत्रिरददादौर्वायेति वेदवाक्येन ॥ याज्ञवल्क्य
विषये ॥ अथाह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुरिति वेदवाक्येन एतेषां स्मृतिकर्तॄणां वेदवाक्यैः कथंचित् ॥ नामग्रहण
मात्रेण माहात्म्यं प्रकटीकृतं ॥ याज्ञवल्क्यस्य तु वाजसनेयिब्राह्मणे सप्तदशसंख्याककांडे याज्ञवल्कीयकांड इति वै
दिकसंज्ञाविशिष्टबृहदारण्योपनिषदंतर्गतपंचमषष्ठाध्याययोः पूर्वग्रंथेषु अस्माभिः प्रकटीकृततात्पर्यानुरोधेन सास्म

तच्छ्रुत्यैव याज्ञवल्क्यमाहात्म्यं प्रकाशितं। इति हेतोः श्रुतिनात्पर्यविषयीभूतमाहात्म्यविशिष्टबहुवाक्यं प्रतिपाद्य या
ज्ञवल्क्यस्य महिमा सर्वोत्कृष्ट इति किमु वक्तव्यम्। तादृशश्रुतिप्रतिपाद्यमाहात्म्येन ततः याज्ञवल्क्यस्य शापो वा। तस्य
मुक्तायोग्यता वा यदा कदापि यत्र कुत्रापि॥ येन केनापि यः कश्चिदपि अस्तीति साधयितुं न समर्थो भवति॥ इत्यपि कि
मु वक्तव्यं॥ ॥अत एव अनेनैव माधवाचार्येण याज्ञवल्क्यस्मृतेः कुतो भवद्भिः व्याख्यानं न कृतं मनुयाज्ञवल्क्यपरा
शरस्मृतीनां समानमाहात्म्यवत्कर्तृकत्वादिति पूर्वपक्षम्॥ अस्मिन्नेव माधवीये स्वयमेवोद्घाट्य याज्ञवल्क्यस्मृ
तेः ज्ञानेश्वरेण व्याख्याने॥ कृतमिति॥ अस्माकं नादर इति॥ समाधानं कृतम्॥ यद्यपि इदानींतन च न पट्टण मु
द्रितमाधवीयपुस्तकेषु एतद्वाक्यस्य विद्यमानत्वेपि प्राचीनकाले नलिखितपुस्तकेषु बहुदेशस्थितेषु एतद्वाक्यस्यास्मा
भिः दृष्टत्वात्। अपि च। इदानींतनचन्नपट्टणमुद्रापुस्तकेष्वपि पूर्वोक्तवाक्यस्योत्तरवाक्ये॥ न चैवं सति मन्वादिस्मृतौ कु
तो नादर इति। इति शंकनीयम्। मन्वादिस्मृतेर्मेधातिथ्यादिभिर्व्याख्यातत्वादिति॥ माधवेनैवोक्तं तद्वाक्येपि मन्वादि
स्मृताविति अत्रस्य आदिशब्देन याज्ञवल्क्यस्मृतिरेव गृह्यते। मनुयाज्ञवल्क्यपराशराणामेव प्राधान्येन प्रमाणतया स्मृतिकर्तृ
त्वप्रसिद्धेः सर्वधर्मशास्त्रेषु प्रायेण प्रतीयमानत्वात्। इदानीमपि मनुयाज्ञवल्क्यपराशरस्मृतीनामेव व्याख्यानानि सर्वदेशेषु दृ
श्यंते। तथैव तद्व्याख्यातृप्रतिपादनकोटावपि मेधातिथ्यादिभिरिति इत्यत्र स्यादिशब्देन विज्ञानेश्वरेण याज्ञवल्क्यस्मृतिव्याख्या

नंकृतमिति सूच्यते ॥ ॥अतोपिहेतोः॥ याज्ञवल्क्यस्मृतेः व्याख्यानंमाधवाचार्येण कर्त्तव्यमिति॥ अभिप्रेतमेवस्थि
तमितिगम्यते॥ तस्मात्सर्वैः माधवाचार्येणापियाज्ञवल्क्यस्य तत्स्मृतेः॥ तच्छिष्यकण्वकात्यायनादीनांच स्मृतिस्
त्रादीनामपि महाप्रामाण्यं अभ्युपगनमितितदनुमितः तेषांशापाभावपूर्वकं अयोग्यताभावः। निश्चितोभवति॥ प्र
स्तुत॥ विद्यारण्यस्वरूपमाधवाचार्यात् प्राक्कालीनमनुस्मृतेः प्रथमव्याख्याकर्तुः मेधातिथिऋषेरपि कण्वपुत्रत्वप्रसि
द्धेः॥ हेमाद्रौ दृष्टत्वात्। सोपिमेधातिथिः। याज्ञवल्क्यशाखाप्रविष्टकण्वपुत्रत्वेनवाजसनेयिशाखाप्रविष्टएव॥ इत्य
पिहेतोः वाजसनेयिनां अयोग्यताभावः सिद्धोभवति॥ अतएवइदानीमपि गयामाहात्म्यप्रतिपादकपुराणधर्मशा
स्त्रादिप्रमाणग्रंथेषु ईशानविष्णुकमलासनकार्त्तिकेयवन्हिचन्द्रार्करजनीशगणेश्वराणांसभ्यावसथ्यदधिकण्व
मतंगजानांक्रौंचामरेन्द्रकलशोद्भवकस्यपानां पादान्मामिसेततोपितृमुक्तिहेतूनितिवाक्योक्तप्रकारेणप्रत्यक्षतो
पिवर्तमानकालेगयाक्षेत्रेधर्मशिलायां अक्कत्रिमतयास्वयमेवचिन्हितत्वेनव्यक्तमेव॥ ईशानविष्णुकमलास
नादीनांसर्वेपादादृश्यंते॥ एतन्मध्यगतकण्वपादस्यापिमुक्तिहेतुत्वेनब्रह्मविष्णुमहेश्वरसूर्यचंद्रेंद्र अगस्त्यकाश्य
पादिईश्वरदेवताऋष्यादिकोटौप्रविष्टत्वेनापियाज्ञवल्क्यशाखाप्रविष्टस्यकण्वऋषेरपि अयोग्यतानसंभवतीति
सर्वैरपिस्पष्टतयानिश्चितत्वेनएतन्मुरोः। याज्ञवल्क्यस्यतच्छिष्यकात्यायनमाध्यंदिनादीनांचअयोग्यताभावः

सिद्धएवभवति।अपिच।महाभारतेसभापर्वणित्रयस्त्रिंशत्संख्याकाध्याये।वैशंपायनउवाच।रक्षणाद्धर्मराजस्यसत्यस्यपरिपाल
नात्।शत्रूणांक्षपणाच्चैवस्वकर्मनिरताःप्रजाः।अस्यव्याख्यानं।रक्षणात्शात्रणंदस्यूनां।मू॰।बलीनांसम्यगादानात् ध
र्मश्चानुशासनात्॥निकामवर्षीपर्जन्यःस्फीतोजनपदोभवत्२ अस्यव्याख्यान॥बलीनांकराणां निकामंयथेष्टं
वर्षतीतिनिकामवर्षः।स्फीतःसमृद्धः२ सर्वारंभाःसुप्रवृत्तागोरक्षाकर्षणंवणिक्॥विशेषात्सर्वमेवैतत्संजज्ञेराज
कर्मणः॥३॥अस्यव्याख्यानं॥सुप्रवृत्ताःस्वस्यपरेषांचहितावहाः नतुक्रूराः राजकर्मणःराज्ञःपुण्यात् ३ दस्युभ्यो
भ्योवंचकेभ्योवाराजन्प्रतिपरस्परं॥राजवल्लभतश्चैवनाश्रूयंतमृषागिरः॥४॥अस्यव्याख्यानं॥दस्युभ्यःचोरे
भ्यः वंचकेभ्यः।धूर्तेभ्यःराज्ञोराजवल्लभतोवामृषागिरोवानाश्रूयंते सर्वेपिसत्यवादिनः।राजवदित्यर्थः दस्यवो
पिपरस्परंनवंचयंतिनाप्यन्यानेवंअन्यत्रपितेजानितः।रक्लाअपिनतत्कुर्वतीत्यर्थः॥४॥अवर्षंजातिवर्षंचव्या
धिपावकमूर्छनम्॥सर्वमेतत्तदानासीद्धर्मनित्येयुधिष्ठिरे५अस्यव्याख्यानं।मूर्छनंप्रदीन५ मूलं॥प्रियंक
र्तुमुपस्थातुंबलिकर्मस्वभावजं॥अभिहर्तुंनृपाजग्मुर्नान्यैःकार्यैःपृथक्पृथक्६ अस्यव्याख्यानं६जग्मुःराजा
नं।पृथगितिशेषः नान्यैःजिगीषादिभिः॥ ॥धर्म्यैर्धनागमैस्तस्यववृधेनिचयोमहान॥कर्तुंयस्यनशक्येतक्ष
योवर्षशतैरपि॥७॥अस्यव्याख्यानं॥निचयोभांडागारं७ स्वकोष्ठस्यपरीमाणंकोशस्यचमहीपतिः॥विज्ञा

यराजा कौंते योप्रज्ञा थैव मनोद्ये ॰ अस्यव्याख्यानं ॥ कोशोधनं कोष्ठं वस्त्रधान्यादितयोः परिमाणं ॰ सुहृन्दैव
येसर्वेपृथक्कृच सहिताब्रुवन् ॥ यस्तुकालस्तवविभोक्रियतामत्रसांप्रतं ९ अस्यव्याख्यानं नास्ति ९ अथैवं ब्रुवतामे
वंतेषामभ्यायं यौहरिः ॥ ऋषिः पुराणो वेदात्मा दृश्यश्चैव विजानतां । अस्यव्याख्यानं ॥ ऋषिर्नारायणः अदृश्य
इतिच्छेदः विजानतां विदुषां अदृश्यः प्रत्यगात्मत्वात् । अविजानतांतु कार्यकारणरूपेण दृश्यः तथाचश्रुतिः ॥ अवि
ज्ञातं विजानतां विज्ञातमविजानतामिति ॥१०॥ मू॰ ॥ जगतस्तस्थुषां श्रेष्ठः प्रभवश्चाप्ययश्चयः ॥ भूतभव्यभवन्ना
थः केशवः केशिसूदनः ॥११॥ अस्यव्याख्यानं ॥ प्रभवउत्पत्तिस्थानं ॥ अप्ययोलयस्थानं ॥११॥ मू॰ प्राकारस्सर्ववृ
ष्णीनामापत्स्वाभयदोहरिः ॥ बलाधिकारेविक्षिप्य सम्यगानकदुंदुभिः ॥१२॥ अस्यव्याख्यानं ॥ नास्ति ॥१२॥ मू॰
उच्चावचमुपादाय धर्मराजायमाधवः ॥ धनौघं पुरुषव्याघ्रो बलेनमहतावृतः ॥१३॥ अस्यव्याख्यान ॥ नास्ति ॥ मू॰
तंधनौघमपर्यंतं रत्नसागरमक्षयं ॥ नादयन्रथघोषेण प्रविवेश पुरोत्तमं ॥१४॥ अस्यव्याख्यान नास्ति ॥१४॥ मू॰
पूर्णमापूरयन्स्तेषां द्विषच्छोकावहोभवेत् ॥ असूर्यमिव सूर्येण निवातमिव वायुना ॥ कृष्णेन समुपेतेन जहृषे भार
तंपुरं ॥१५॥ तंमुदाभिसमागम्य सत्कृत्य च यथाविधि ॥ सपृष्ट्वा कुशलं चैव सुखासीनं युधिष्ठिरः ॥१६॥ धौम्यद्वैपाय
नमुखैरृत्विग्भिः पुरुषर्षभः ॥ भीमार्जुनयमैश्चैव सहितः कृष्णमब्रवीत् ॥१७॥ युधिष्ठिर उवाच ॥ त्वत्कृते पृथिवीसर्वा

स॰भा॰
५२३

महंहंसेकृष्णवर्धते ॥ धनं च बहु वार्ष्णेय त्वत्प्रसादादुपार्जितं ॥१८॥ सोहमिच्छामि तत्सर्वं विधिवद्देवकीसुत ॥ उपयोक्तुं
द्विजाग्रेभ्यो हव्यवाहे च माधव ॥१९॥ तदहं यष्टुमिच्छामि दाशार्ह सहितस्त्वया ॥ अनुजैश्च महाबाहो तदनुज्ञातुम
र्हसि ॥२०॥ त्वं दीक्षापय गोविंद त्वमात्मानं महाभुज ॥ त्वयीष्टवति दाशार्ह विपाप्मा भविता ह्यहं ॥२१॥ अस्य व्याख्यानं
॥ ॥ मामनुज्ञातुं त्वं दीक्षस्वेति वक्तव्ये आत्मानं दीक्षापयेत्युक्तिः ॥ अकर्तुरात्मनो दीक्षणायोगादौपाधिकमेव प्रति
बिंबचलनन्यायेनैव तस्य दीक्षापनं ज्ञेयं ॥२१॥ मां वाप्यभ्यनुजानीहि सह हैभिरनुजैर्विभो ॥ अनुज्ञातस्त्वया कृष्ण प्रा
प्नुयां क्रतुमुत्तमं ॥२२॥ वैशंपायन उवाच ॥ तं कृष्णः प्रत्युवाचेदं बहूक्त्वा गुणविस्तरं ॥ त्वमेव राजशार्दूल संम्राडर्हो म
हाक्रतुं ॥ संप्राप्नुहि त्वया प्राप्ते कृतकृत्यास्ततो वयं ॥२३॥ यजस्वाभीप्सितं यज्ञं मयि श्रेयस्यवस्थिते ॥ नियुंक्ष्व त्वं च मां
कृत्ये सर्वं कर्तास्मि ते वचः ॥ अस्य व्याख्यानं ॥ श्रेयसि कल्याणकरे ॥२४॥ युधिष्ठिरः ॥ सफलः कृष्ण संकल्पः सिद्धिश्च
नियता मम ॥ यस्य मे त्वं हृषीकेश यथेप्सितमुपस्थितः ॥२५॥ वैशंपायनः ॥ अनुज्ञातस्तु कृष्णेन पांडवो भ्रातृभिः
सह ॥ ईजितुं राजसूयेन साधनान्युपचक्रमे ॥२६॥ ततस्त्वाज्ञापयामास पांडवोरिनिबर्हणः ॥ सहदेवं युधां श्रेष्ठं मं
त्रिणश्चैव सर्वशः ॥२७॥ अस्मिन् क्रतौ यथोक्तानि यज्ञांगानि द्विजातिभिः ॥ तथोपकरणं सर्वं मंगलानि च सर्वशः ॥२८॥
अधियज्ञांश्च संभारान् धौम्योक्तान् क्षिप्रमेव हि ॥ समानयंतु पुरुषा यथायोगं यथाक्रमं ॥२९॥ अस्य व्याख्यानं ॥

नि॰

अधियज्ञान् यज्ञीयान्संभारान् आज्यपश्वादीन् २९ मू॰॥ इंद्रसेनोविशोकश्च पूरुश्चार्जुनसारथिः॥ अन्नाद्याहरणेयु
क्ताः संतुमत्प्रियकाम्यया॥३०॥ सर्वकामांश्चकार्येतांरसगंधसमन्विताः॥ मनोरथप्रीतिकराद्विजानांकुरुसत्तम॥३१
अस्यव्याख्यानं॥काम्यंतइति॥कामाः मृष्टान्नादीनि॥३१॥ तद्वाक्यसमकालंचकृतंसर्वंन्यवेदयत्॥ सहदेवोयुधां
श्रेष्ठोधर्मराजेयुधिष्ठिरे॥३२॥ ततोद्वैपायनोराजन्नृत्विजः समुपानयत्॥ वेदानिवमहाभागान्साक्षान्मूर्तिमतोद्विजा
न्॥३३॥ स्वयंब्रह्मत्वमकरोत् तस्यसत्यवतीसुतः॥ धनंजयानामृषभः॥ सुसामासामगोभवत्॥३४॥ अस्यव्याख्या
नं॥धनंजयानांधनंजयगोत्राणांमध्येश्रेष्ठःसुसामानाम आंगिरसः॥३४॥ मू॰॥ याज्ञवल्क्योबभूवाथब्रह्मिष्ठोध्वर्युस
त्तमः॥ पैलोहोतापसोः पुत्रोधौम्येनसहितोभवत्॥३५॥एतेषांपुत्रवर्गाश्च शिष्याश्चभरतर्षभ॥ बभूवुर्होत्रगाःस
र्वेवेदवेदांगपारगान्३६अस्यव्याख्यानं॥ होत्रगाःसप्तसंख्याः॥३६॥ मू॰॥ तेवाचयित्वापुण्याहमूहयित्वाचतंवि
धिं॥शास्त्रोक्तंपूजयामासुस्तं देवयजनंमहत्३७अस्यव्याख्यानं॥ ऊहयित्वाचतंविधिंराजसूयेनयक्ष्येस्वारा
ज्यमवाप्नवानितिसंकल्पादिरूपमूहं कृत्वादेवयजनंयज्ञस्थानं॥३७॥ मू॰॥ तत्रचक्रुरनुज्ञाताःशरणान्युतशिल्पि
सा नः॥गंधवंतिविशालानिवेश्मानीवदिवौकसां॥३८॥ अस्यव्याख्यानं॥शरणानिपत्नीशालादीन्यग्न्यागाराणि३८मू॰
ततआज्ञापयामाससराजाराजसत्तमः॥ सहदेवंतदासद्योमंत्रिणंपुरुषर्षभः॥३९॥ आमंत्रिणार्थंदूतांस्त्वंप्रे

प्र·शा·
५३४

षयिस्वाग्रुगान्हुतं॥ उपश्रुत्यवचोराज्ञःसदूतान्प्राहिणोत्तदा॥४०॥ आमंत्रयध्वंराष्ट्रेषुब्राह्मणान्भूमिपानथ॥वि
शश्चमान्यान्शूद्रांश्चसर्वानानयतेतिच॥४१॥ वैशंपायनउवाच॥ समाज्ञप्तास्ततोदूताःपांडवेयस्यशासनात्॥
आमंत्रयांबभूवुश्चआनयंश्चापरान्द्रुतं॥ तथापरानपिनरानात्मनःशीघ्रगामिनः॥४२॥ ततस्तेतुयथाकालेकुं
तीपुत्रंयुधिष्ठिरं॥ दीक्षयांचक्रिरेविप्राराजसूयायभारत॥४३॥ दीक्षितःसतुधर्मात्माधर्मराजोयुधिष्ठिरः॥जगाम
यज्ञायतनंवृतोविप्रैःसहस्रशः॥४४॥ भ्रातृभिर्ज्ञातिभिश्चैवसुहृद्भिःसचिवैःसह॥क्षत्रियैश्चमनुष्येंद्रैर्नानादेश
समागतैः॥४५॥ अमात्यैश्चनरश्रेष्ठोधर्मोविग्रहवानिव॥आजग्मुर्ब्राह्मणास्तत्रविषयेभ्यस्ततस्ततः॥४६॥सर्ववि
द्यासुनिष्णातावेदवेदांगपारगाः॥तेषामावसथांश्चक्रुर्धर्मराजस्यशासनात्॥४७॥ बह्वन्नाच्छादनैर्युक्तान्सगणानां
पृथक्पृथक्॥सर्वर्तुगुणसम्पन्नान्शिल्पिनोथसहस्रशः॥४८॥ तेषुतेन्यवसन्राजन्ब्राह्मणाभृत्यसत्कृताः॥
कथयंतःकथाबह्वीःपश्यंतोनटनर्तकान्॥४९॥ भुंजतांचैवविप्राणांवदतांचमहास्वनः॥ अनिशंश्रूयतेतत्रमु
दितानांमहात्मनां॥५०॥ दीयतांदीयतामेषांभुज्यतांभुज्यतामिति॥ एवंप्रकाराःसंजल्पाःश्रूयंतेस्मात्रनित्य
शः॥५१॥ गवांशतसहस्राणिशयनानांचभारत॥ रुक्मस्ययोषितांचैवधर्मराजःपृथग्ददौ॥५२॥ [illegible]
ख्यानं॥ रुक्मस्यकांचनस्यशयनानांतूलिकादिसहितानांतल्पादीनां॥५२॥ मू·॥प्रावर्ततैवंयज्ञःसःपांडवस्य

नि·

महात्मनः ॥ पृथिव्यामेकवीरस्यशक्रस्येवत्रिविष्टपे ॥ ५३ ॥ ततोयुधिष्ठिरोराजाप्रेषयामासपांडवं ॥ नकुलंहा
स्तिनपुरंभीष्मायपुरुषर्षभः ॥ ५४ ॥ द्रोणायधृतराष्ट्रायविदुरायकृपायच ॥ भ्रातृणांचैवसर्वेषांयेनरक्तायुधिष्ठिरे ॥
॥ ५५ ॥ इतिश्रीमन्महाभारतेसभापर्वणिराजसूयेराजनिमंत्रणंनामत्रयस्त्रिंशोध्यायः ॥ ॥ वैशंपायनउवाच
सगत्वाहस्तिनपुरंनकुलःसमितिंजयः ॥ भीष्ममामंत्रयांचक्रेधृतराष्ट्रंचपांडवः ॥ १ ॥ इत्यादिवाक्येषुततोद्वैपा
यनोराजानृत्विजःसमुपानयत् ॥ वेदानिवमहाभागान्साक्षान्मूर्तिमतोद्विजान् ॥ ३३ ॥ स्वयंब्रह्मत्वमकरोत्तस्य
सत्यवतीसुतः ॥ धनंजयानामृषभःसुसामासामगोभवेत् ॥ ३४ ॥ याज्ञवल्क्योबभूवाथब्रह्मिष्ठोध्वर्युसत्तमः ॥ पै
लोहोतापसोःपुत्रोधौम्येनसहितोभवत् ॥ ३५ ॥ एतेषांपुत्रवर्गश्चशिष्याश्चभरतर्षभ ॥ बभूवुर्होत्रगाःसर्वेवेदवे
दांगपारगाः ॥ ३६ ॥ तेवाचयित्वापुण्याहमूहइत्वाचतंविधिम् ॥ शास्त्रोक्तंपूजयामासुस्तद्देवयजनंमहत् ॥ ३७ ॥
इत्यादिवाक्यैःधर्मराजकर्तृकराजसूयाख्ययागस्यव्याससस्वकर्त्विजःयोग्यान्दृष्ट्वाससमुपानयत् ॥ इत्यनेनता
सर्वेणउक्तत्वात् ॥ व्यासस्यैवब्रह्मत्वं इत्यनेनऋग्वेदेनहोताकरोति ॥ यजुर्वेदेनाध्वर्युः । सामवेदेनोद्गातासर्वै
लिइत्यादिश्रौतशास्त्रैः उक्तन्यायेनपैलस्यव्यासशिष्यस्यऋग्वेदप्रवर्तकस्यहौत्रं ॥ व्यासशिष्यसामवेदप्रवर्तक
मिनेः शिष्यस्यधनंजयकुलश्रेष्ठस्यसुसाम्नःअन्वर्थनामकस्यऔद्गात्रंएवंव्यासशिष्ययजुर्वेदप्रवर्तकवैशं

पायनशिष्यस्य याज्ञवल्क्यस्य आध्वर्यमितिव्यासएवनिश्चयंकृतवान् इत्याद्यर्थप्रतिपादनेनव्यासपैलसुसामादि
ऋत्विक्कोटौ॥अध्वर्युत्वेनव्यासेनैवनियमितत्वात्॥याज्ञवल्क्यस्यशापस्यवा॥तत्रप्रयुक्तअयोग्यतायावाप्रस
क्तिरेवासंभवइतिसर्वैः आपंडितगोपालैःस्पष्टतयाज्ञायतएव।अस्तुतु।धर्मराजस्यापिश्रीकृष्णसंमतत्वेनव्यासे
ननियमितत्वेनचयाज्ञवल्क्यस्य आध्वर्यवरणदानेमुख्याभिप्रायइति अवगम्यते॥अपिच॥अस्मिन् यागे याज्ञ
वल्क्यस्य आध्वर्यवरणदानेनयजुर्वेदेनाध्वर्युः॥ इत्यादिश्रौतशास्त्रस्यापि तैत्तिरीयवाजसनेयान्यतरशाखया आ
ध्वर्यप्रयोगः॥कर्त्तव्य इति यजुर्वेदसामान्यस्य अध्वर्युशाखेत्यभिप्रायः प्रकटीकृतो भवति॥ननु। तैत्तिरीयशाखयै
व आध्वर्यः॥ कर्त्तव्यइति नियामकहेतुर्दृश्यते॥एतेन वैशंपायनश्रीकृष्णधर्मराजवेदव्यासादीनां याज्ञवल्क्यस्य
ब्रह्मिष्ठस्य आध्वर्यवरणदानं अत्यंत इष्टमेवेति प्रतिभाति भारतस्य इतिहासत्वात् पुराणापेक्षयास्मृतिरूपत्वेनप्रब
लतरप्रमाणत्वात्॥भारतः पंचमो वेद इति॥ इतिहासपुराणपंचमो वेद इति छांदोग्यसप्तमाध्यायेप्रयुक्तत्वाच्च भारत
स्य वेदतुल्यत्वंअतएव॥ इतिहासपुराणाभ्यां॥ वेदंसमुपबृंहयेत्। इति मनुस्मृत्याचवेदार्थः। इतिहासादिने
वज्ञातव्यंइतिप्रतिपादनाच्च। भारतोक्तोअर्थः वेदार्थएवेति निश्चितः। ततश्चवेदस्वरूपभारतादेः। श्रीकृष्णव्या
सपैलवैशंपायनादीनां च सर्वसंमतत्वेन धर्मराजकर्तृकयागे याज्ञवल्क्यस्य आध्वर्यवरणदानेन सुतरां याज्ञवल्क्य ५३५

स्यशाप तत्प्रयुक्त अयोग्यतादीनां लेशमात्रसंभवो नास्तीति। दृढीक्रियते॥ अन्यथाशापदातुः वैशंपाय

नस्य वा तद्गुरोः सर्वज्ञस्य सर्ववेदप्रवर्तकस्य विष्णवंशस्य व्यासस्य वा साक्षात्परमेश्वरस्य श्रीकृष्णस्य वा। सा

क्षाद्धर्ममूर्ति मद्धर्मराजस्य वा पैलादिमहर्षीणां वा। शापग्रस्तशापप्रयुक्त चंडालत्वाद्ययोग्यतापन्नयाज्ञव

ल्क्यस्य आध्वर्यवरणदानं कथं वा संमतिर्भवेत्॥ अनेन याज्ञवल्क्येन सहितैः सर्वैरपि यजनयाजनादिव्यवहारो

वा कथं घटेत्। कथंचित्। याज्ञवल्क्यस्य शापप्राप्तत्वांगीकारेपि॥ याजनाध्यापनाद्यौनात्सद्यः पतति नान्यथेति

।मनुवचनानुसारेण व्यासपैलधर्मराजादीनां सर्वेषामपि पतितत्वप्राप्तिप्रसंगः तथात्वांगीकारेपि धर्मराजस्य या

जनादिव्यवहारो वा कथं घटेत। कथंचित्। याज्ञवल्क्यस्य शापप्राप्तत्वांगीकारेपि केनचित्। निमित्तेन शापनिवृ

त्तिरभूदिति। अनुमातव्यं भवति॥ अन्यथा॥ सर्वज्ञैः श्रीकृष्णव्यासादिभिः। कथं वा एतादृशव्यवहारः। अंगी

क्रियेत। इत्यपि अन्यथानुपपत्तिप्रमाणेनापि अयोग्यताभावः साधितो भवति॥ प्रत्युत वेदानिव महाभागा

न्साक्षान्मूर्त्तिमतो हि द्विजान्। स्वयं ब्रह्मत्वमकरोत्॥ तस्य सत्यवतीसुतः इत्यादिवाक्ये नापि ऋत्विजः इति सामा

न्यनिर्देशात्। तत्कोटौ प्रधानतया प्रविष्टस्य अध्वर्योः याज्ञवल्क्यस्यापि वेदानिव महाभागान्साक्षान्मूर्त्तिम

तो हि द्विजान्॥ इति वचनार्थभूतवेदमूर्तित्वप्रतिपादनात्॥ एतद्वाक्यस्यापि जनमेजयं प्रति वैशंपायनेनैव

उक्तत्वाच्च ॥ सर्वर्त्विजां मध्ये देवेभ्यः हविर्भागदातृत्वेन यजमानस्यारणिप्रदातृत्वेन तद्गुरुतुल्यत्वात् ॥ इतर
र्त्विग्दक्षिणाद्विगुणितप्रतिगृहीतृत्वेन प्रायेण यजमानदातव्ययज्ञांगवरदानपात्रत्वेन च र्त्विक्ष्वाधान्यमपि या
ज्ञवल्क्यस्य दर्शितं भवति ॥ अत एव तस्मिन्नेव वचने याज्ञवल्क्यो बभूवाथ ब्राह्मिष्ठोऽध्वर्युसत्तमः ॥ इति याज्ञव
ल्क्यस्य ब्रह्मिष्ठत्वं अध्वर्युश्रेष्ठत्वं च विशेषणद्वयं वैशंपायनेनैव दत्तं एतद्द्वयमपि बृहदारण्योपनिषदि पंचमषष्ठा
ध्याययोः तत्पूर्वाग्निरहस्यकांडे च विशदीकृतं वर्तते ॥ ॥ एतावता ग्रंथसंदर्भेण धर्मराजस्य धर्ममूर्तिस्वरूपस्य ध
र्मैकप्रधानस्य अन्यदाक्षिण्यादि हेतुना अधर्मप्रवृत्तिलेशरहितस्य यजमानस्य संबंधि राजसूययागे याज्ञवल्क्यस्य
प्रधानार्त्विज्यरूपआध्वरदानेन सर्वर्त्विजां नियामकत्वेन सर्वर्त्विक्कर्तव्यमंत्रप्रयोगक्रियादिसर्वव्यापारगु
णदोषतत्प्रायश्चित्तादिविधायकत्वेन तत्तत्कृतसर्वदोषाणां भागित्वेन च ब्रह्मत्वरूपआर्त्विज्यवतः व्यासस्य अति
संमतत्वेन याज्ञवल्क्याध्वरदानस्य सिद्धत्वात् ॥ सर्वर्त्विजां प्रधानभूतः ॥ अध्वर्युः तत्रापि सर्वलोकनिष्ठ अध्वर्यूः
णामपि याज्ञवल्क्यः श्रेष्ठ इति अध्वर्युसत्तम इति विशेषणेन सद्वैशंपायनोक्तत्वात् । ब्रह्मिष्ठं ब्रह्माणं कुर्यादिति ऐत
रेयारण्योपनिषदि नेवंविधं ब्रह्माणं कुर्यादिति छांदोग्यब्राह्मणोपनिषदि च ब्रह्मलक्षणस्य ब्रह्मिष्ठत्वस्य उक्तत्वेऽपि त
दार्त्विज्यस्य आध्वरस्य ब्रह्मिष्ठयाज्ञवल्क्यप्रधानेन क्रतोः । अत्यंतप्रशस्ततरत्वसूचनेनापि याज्ञवल्क्यस्य य

त्किंचिद्दोषो भावः स्वतएव सिध्यतीति किमु वक्तव्यं ॥ अपि च ॥ स्कांदपुराणाख्य शतसहस्रसंहितायां पंचाशत्खंड
मंडितायां शंकरसंहितायां । कुमारसंहिता । विष्णुसंहिता ॥ सनत्सुजातसंहिता । सूतसंहिता ॥ सौरसंहिताख्य ष
ड्भागयुक्तायां अंत्यभागात्मक एकसहस्र ग्रंथरूप सौरसंहितानामक स्कांदपुराण चरमभागे याज्ञवल्क्यं प्रति सू
र्योपदिष्ट प्रमेयभागेषु प्रथमाध्याये ॥ ॥ वालखिल्यादिभिः ऋषिभिः पृष्टः सूतः ॥ मुनीनां वचनं श्रुत्वा सूतः पौराणि
कोत्तमः ॥ वंदे कुमारभर्तारं देवं नमस्कृत्वा पिनाकिनं ॥ श्रीसूतः । ब्राह्मं पाद्मं वैष्णवं चेत्युपक्रम्य मूलपुराणानि उपपुराणा:
न्यपि चोक्त्वा ॥ स्कांदमद्याभिवक्ष्यामि ॥ खिलग्रंथविनिर्मितं ॥ षड्विधं संहिताभेदैः ॥ पंचाशत्खंडभेदितं ॥ संहितां त्या
बुधास्तावत्सुधा सौरसमाह्वय ॥ तामहं वः प्रवक्ष्यामि संहितामतिशोभनां ॥ २८ ॥ पुरा सूर्यसमाख्येन कथिता भा
नुना यतः । याज्ञवल्क्याय तेनैव संहिता सौरसंहिता ॥ २९ ॥ सारसंज्ञा तु सा त्वत्र ग्रंथतस्तु सहस्रका ॥ निर्मितास र्ववि
त्तानसागरापावर्नीपरा ॥ ३० ॥ प्राधान्येन महादेवः पुराणेरखिलैरपि ॥ तात्पर्येणाविकानाथः सर्वज्ञः प्रतिपाद्यते
॥ ३१ ॥ इत्यादिवाक्यैः सर्वपुराणप्रतिपाद्यार्थः परमेश्वर इत्युक्त्वा । अष्टादशपुराणानां शिवपरत्वविष्णुपरत्वब्र
ह्मपरत्वाग्निपरत्वादिदेवतापरत्वविभागं कृत्वा ॥ ते दृष्ट्वा रुद्रमीशानं कृष्णद्वैपायनो मुनिः ॥ प्रणम्य लोकरक्षार्थं प्रसा
दे देवशूलिनः ॥ ५६ ॥ अप्रकाशमयाम्नायमशेषार्थावतंसकं ॥ चतुर्धाकृतवान्विप्रा यथापूर्वं सनातनं ॥ ५७ ॥ एक

विंशतिभेदेनऋग्वेदंकृतवान्मुनिः ॥ शालानांतुशतेनैवयजुर्वेदमथाकरोत् ॥ ५८ ॥ सामवेदंसहस्त्रेणशाखानांतु प्रभेदतः ॥ अथर्वणमथोवेदंबिभेदनवकेनतु ॥ ५९ ॥ अथशिष्यांस्तुजग्राह चतुरोवेदपारगान् ॥ सुमंतंजैमिनिंचैव वैशंपायनमेवच ॥ ६० ॥ पैलसंज्ञमथप्राज्ञंव्यासःसत्यवतीसुतः ॥ ऋग्वेदश्रावकंपैलंसजग्राहमहामुनिः ॥ ६१ ॥ यजुर्वेदप्रवक्तारंवैशंपायनमेवच ॥ जैमिनिंसामवेदस्यसुमंतुमितरस्यतु ॥ ६२ ॥ ऋग्वेदस्यचशाखानांश्रावकानेकविंशतिं ॥ जगृहेवेदविच्छ्रेष्ठः कृष्णद्वैपायनोमुनिः ॥ ६३ ॥ यजुश्शाखाशतस्यापि श्रावकानांशतंपुनः ॥ अद्भुयापरिजग्राहपराशरसुतःस्वयं ॥ ६४ ॥ सामशाखासहस्त्राणांमुनीनांचसहस्त्रकं ॥ जग्राहमुनिशार्दूलः साक्षात्सत्यवतीसुतः ॥ ६५ ॥ अथर्वणस्यवेदस्यशाखाभेदप्रवर्त्तकान् ॥ मुनीन्जग्राहसर्वज्ञःपाराशर्योयमास्तिकाः ॥ ६६ ॥ इत्यादिभिः वेदशाखाविभागतत्प्रवर्तकऋष्यादीन् अनुगृह्यवेदार्थः कःमोक्षः कःतत्साधनंज्ञानंकीदृशंज्ञानसाधनानिकानिएतत्प्रतिपादकानिकानिपुराणस्यलक्षणंकिंइत्यादिप्रश्नजातैः ॥ ऋषिभिः पृष्टःबादरायणः संक्षेपतः ॥ एतेषांउत्तरंदत्वाएतत्सौरसंहितायामेवएतेषांप्रश्नानांतदुत्तराणांचसंक्षेपतः ॥ प्रतिपादितत्वात् ॥ एतत्संहितापारायणंनित्यंकर्त्तव्यं ॥ इतितत्पारायणफलंचाह ॥ सहस्त्रकिरणः सूर्यः ॥ सर्वाभीष्टंप्रयच्छति ॥ श्रावयेच्चतुरोवर्णान्कृद्वयासंहितामिमां ॥ ॥ श्रावकस्सर्वपापेभ्योमुच्यतेसत्यमीरितम् ॥ ॥ इतिप्रथमाध्यायः ॥

॥ अथद्वितीयाध्याये॥ सूतंप्रतिश्रीवालुखिल्या ऊचुः॥ कथंयोगीश्वरः पूर्वंप्राप्यवेदार्थमुत्तमं॥ लब्धवानाम्नुनः
सूतवद त्वंसंग्रहेणतु ॥१॥ श्रीसूतः॥ पुराहिमवतः पार्श्वे योगीपरमधर्मवित्॥ याज्ञवल्क्यो महाधीमान् लोकानां
हितकाम्यया॥२॥ सहस्रकिरणंदेवंसमस्तजगदाश्रयं॥ सुरासुरभुजंगाद्यैर्मुनिभिश्चसुसेवितं॥३॥ त्रिलोक्यां म
नसादेवींसावित्रींवेदमातरं॥ साक्षाद्रुद्रस्यदेवस्यहरस्यप्रतिपादिकां॥४॥ चतुर्विंशतिकल्पसंजजापविजितेंद्रि
यः॥ ऊर्ध्वबाहुर्निराधारः पादांगुष्ठाग्रविष्ठितः॥५॥ जपेन भगवान् सूर्यः प्रसन्नः प्रकटप्रभः॥ स्वयमाविरभूत्तस्य
पुरतः परमेश्वरः॥६॥ इत्युपक्रम्यसूर्यंयाज्ञवल्क्यस्सुप्रीतः स्तुष्टावेत्युक्त्वा श्रीभगवानुवाच॥ इत्यारभ्य
अनेकजन्मसंसिद्धाः श्रोतस्मार्तपरानराः॥ सत्रैवपरिपश्यंतिनत्तेनंभुविमुक्तिदं॥ इति॥ अध्यायसमाप्तिपर्यंतं
मध्ये आत्मज्ञानस्वरूपतत्साधनादिकांश्चिदर्थान् याज्ञवल्क्यंप्रत्युक्तवानिति। द्वितीयोध्यायः॥ ॥अथतृती
योध्याये॥ श्रीभगवानुवाच॥ ततः परंप्रवक्ष्यामितत्रयोगींद्रवंदिता त्रैलोक्यस्यास्यविस्तारंसंक्षेपेणजग
गद्गुतम्॥१॥ इत्युपक्रम्यसूर्यः॥ याज्ञवल्क्यप्रतिजगत्सृष्टिस्थितिज्ञानसाधनप्रणवध्यानादिकंअध्यायपरि
समाप्तौ तंध्यानेनैवशिवज्ञानंज्ञानान्मुक्तिर्नकर्मणा॥ कर्मतुज्ञानहेतुः स्यादितितत्वविदांस्थितिः॥७३॥ इत्यंतं
उक्तवान् इतितृतीयोध्यायः॥ ॥अथचतुर्थोध्याये॥ सूतः॥ अथातः संप्रवक्ष्यामिजगत्कारणनिर्णयम्॥ श्रुति

भिः स्मृतिभिस्तहूस्पुराणैरपिभाषितं ॥१॥ इत्युपक्रम्यजगत्कारणत्ववादिनामभिमतपरमाणुप्रकृतिकर्मेविज्ञानभून्याद्यर्थजगत्कारणत्ववादनिराकरणपुरःसरेणब्रह्मजगत्कारणत्वसाधनपूर्वकवेदप्रामाण्यनिर्धारणद्वारावेदस्वश्रद्धाकर्त्तव्येति॥ अतःसर्वाकरं वेदं विशुद्धस्तुसमाश्रयेत्॥ नकरोतिश्रुतौश्रद्धामशुद्धःपापकर्मणा॥५५॥ अतः पापविशुध्यर्थंयत्नं कुर्याद्तंद्रितः॥५६॥ इत्यंत अध्यायसमाप्तिपर्यंतमुक्तं ॥ इतिचतुर्थोध्यायः॥ ॥अथपंचमोध्यायः॥श्रीभगवानुवाच॥ अथाप्यनेनपापानांसमस्तानांसमासतः॥ शुचिहेतुं प्रवक्ष्यामितवाहंकरुणाबलात्॥१॥ वर्णाश्रमपरिभ्रष्टःश्रुत्युक्तेनैववर्त्मना॥ त्रिपुंड्रधारणादेवभस्मनापूयतेनरः॥ इत्युपक्रम्यसर्वेषांपापानांप्रायश्चित्तत्वेनश्रौतकर्मप्रयुक्तश्रुत्युक्तविभूतिधारणोक्रमेणत्रिपुंड्रभस्मधारणादिकांश्चित्॥ क्रियाविशेषानुक्त्वा बहुनोक्तेनकिंसाक्षाच्छिवधर्मपरायणः॥सर्वपातकयुक्तोपिसद्यःपूतोभवेन्नरः॥ इति अध्यायेपरिसमाप्तंप्रायश्चित्तमुक्तमितिपंचमोध्यायः॥ ॥षष्ठाध्याये॥ ॥श्रीभगवानुवाच॥ भूयोपिसर्वपापानांशुद्धिहेतुंसमासतः॥ प्रवक्ष्यामितवाद्येवगुह्यमज्ञैर्बहिष्कृतं॥पुरादेविमहादेवंसर्वज्ञंकरुणाकरं॥ अपृच्छत्सर्वलोकानांशुद्धिहेतुंसमासतः॥ इत्याद्युपक्रम्यपार्वतीपरमेश्वरयोःप्रश्नोत्तरकथनेनकाशीकालहस्तीचिदंबरादिकेषुसुक्षेत्रविशेषेषु॥ वासादिनाक्रियाविशेषेणपापक्षयद्वाराज्ञानोत्पत्तिः॥ सदूरमं

पिगंतव्यंप्रयत्नेनापिमानवैः॥श्रीमद्व्याघ्रपुरंतत्र सदानृत्यतिईश्वरः॥ इत्यनेनाध्यायपरिसमाप्तिकंकृतमिति
प्रष्ठोध्यायः॥सप्तमाध्याये॥४७॥ श्रीभगवानुवाच॥ भूयोपिसर्वपापानांशुद्धिहेतुंसमासतः॥प्रवक्ष्यामि
तववातीवगुह्यमज्ञैर्बहिष्कृतं॥१॥ तीर्थसेवांचतीर्थेषुस्नानंतीर्थस्मृतिंतथा॥सर्वपापविशुध्यर्थं प्रवदंतिमह
र्षयः॥२॥ इत्युपक्रम्यकानिचित्॥ आकाशस्थानिकानिचित्भूम्यांस्थितानि प्रायश्चित्तद्वाराज्ञानोत्पादका
नितीर्थान्युक्तातानिकारुण्यतः। साक्षात्तथोक्तानिमयापुनः। भजेत्तानिमहायासात्सर्वपापनिवृत्तये॥३७
इति अध्यायांतं प्रायश्चित्तंप्रदर्शितमितिसप्तमोध्यायः॥ अष्टमाध्याये॥ श्रीभगवानुवाच॥ भूयोपिसर्वपापं
नाशुचीहेतुंसमासतः॥प्रवक्ष्यामितववातीवगुह्यमज्ञैर्बहिष्कृतं॥ अशुद्धिहेतुरज्ञानंखलुसर्वात्मनाबुधाः॥
तंनिमित्तास्यशुद्धिस्याद्विज्ञानंतंनिवर्त्तकं॥२॥ इत्युपक्रम्यपापादिसकलाशुद्धिकारणमज्ञानमित्युक्तातन्नि
वर्त्तकं ब्रह्मात्मविज्ञानं इत्यपिप्रतिपाद्यउभयस्वरूपलक्षणसाधनफलप्रदर्शनद्वाराविज्ञानस्यैवसकलपाप
निवर्त्तकत्वमुक्तं॥ अस्मिन्नेवचाध्यायेसप्तदशसंख्याकश्लोकेप्रसक्तानुप्रसक्त्या परमेश्वररूपब्रह्मणः सर्वां
तर्यामित्वेनस्थितंसत् सर्वकर्मफलदातृत्वसर्वप्रेरकत्वादिकंवक्तुंतत्पूर्वस्थितयोः श्लोकयोः॥ अंतरेणमहा
देवंफलंकर्त्तुंप्रयच्छति॥ इतिचेत्तन्नचाप्युक्तंतत्रापिस्थितईश्वरः॥१५॥ चेतनानांचसर्वेषामंतर्यामित्तयो

श्वरः ।स्थित्वाप्रेरयतिब्रह्मन् ततोगच्छतिचेतनः ॥१६॥ तिष्ठन्नात्मनि चात्मानं यमयत्यंतरास्थितः ॥ इत्याहब्रा
ह्मणंशुद्धं सत्यंतद्वचनंखलु ॥१७॥ इत्येतेषुश्लोकेषु अंतरेणमहादेवमित्यादिनाफलं ॥कर्मकर्तुः प्रयच्छतीस
त्रभयच्छतीतिक्रियापदस्य पुण्यंपापंवाकेमेवप्रयच्छतीतिकर्मणः फलदातृत्वं अध्याहर्त्तव्यमितिकर्मैवा
त्रकर्त्ताभवतीतिजैमिनिमतमनूद्यतिष्ठन्नात्मनि इतिश्लोके इत्याहप्रत्युदाहरणंशुद्धं ॥ इत्यत्रब्राह्मणश
ब्देनशतपथब्राह्मणान्तर्गतबृहदारण्योपनिषदुच्यते॥तत्रापिशुद्धमितिविशेषणेनशुद्धं। शुभ्रं।शुक्लं ।इ
तिपर्यायशब्दरूपत्वात् ॥ शुक्लयजुर्वेदब्राह्मणमितिविदक्षितोभवतिइत्यपिचप्रदर्शितंच अयमेवार्थः।
अतः किंबहुनोक्तेनब्रह्मविद्यामुनीश्वर ॥पापानामपिसर्वेषांशुद्धिहेतुर्महत्तरं ॥५७॥ इतिअध्यायपरिसं
माप्त्यंतविवक्षितमिति।अष्टमोध्यायः॥ नवमाध्याये॥ श्रीभगवानुवाच॥ अथविज्ञानमाहात्म्यंप्रवक्ष्या
मिसमासतः॥ इतःपूर्वंमयानोक्तंकस्यचिन्मुनीश्वर ॥१॥ इत्युपक्रम्यअध्यायांतस्थित॥ यथाविज्ञान
माहात्म्यंनशक्यंवर्णितुंबुधाः॥ तस्मात्सर्वंपरित्यज्य ज्ञानतीर्थोभवेद्द्विजः ॥४८॥ इत्यन्तंब्रह्मज्ञानमाहा
त्म्यंप्रतिपाद्यसाकल्येनब्रह्मज्ञानयाथात्म्यस्वरूपंवक्तुंमयाअशक्यमितियाज्ञवल्क्यंप्रतिसूर्यः।उक्तवा
न्इतिनवमोध्यायः॥अथदशमोध्याये॥ श्रीभगवानुवाच॥ अथातःसप्रवक्ष्यामितवाहंकरुणाबला

त॥ ज्ञानोपायः सर्वशश्चवेदेनैवप्रदर्शितः॥ १॥ शांतिर्दांतिश्चसंन्यासः परहंससमाह्वय॥ इंद्रादीनांस्वहिष्णु
त्वमेकाग्र्यं भस्मकुंठनं॥ २॥ त्रिपुंड्रधारणंतिर्यक्कृश्रद्धारुद्रस्यपूजनं॥ गुरुशुश्रूषणंशौचंमिताहारश्चसत्त
म॥ ३॥ इत्युपक्रम्य॥ ब्रह्मविद्यासाधनत्वेनशमदमसंन्यासादीन्वेदोक्तमार्गेणैवप्रतिपाद्यतथावैदिकक
र्मणा॥ ईश्वरोपासनादीनांचज्ञानसाधनत्वेनोपन्यस्यविध्युक्तकर्मणा॥ ईश्वरोपासनारूपत्वेनअनुष्ठाना
त्॥ ततोपापनिवृत्तिद्वाराचित्तशुद्धिः॥ ततोविविदिषोत्पत्तिः क्रमेणब्रह्मज्ञानं॥ उत्पद्यते॥ पापवतांतुवैदिके
कर्मणिबुद्धिर्नप्रवर्त्तते॥ अपितुतांत्रिकेप्रवर्त्तते॥ अतः निषिद्धाचरणंविहायसन्मार्गेणैवप्रवर्त्ततेतिचोक्त्वा
सत्वगुणप्राधान्येसतिशान्त्यादिसद्गुणाभिवृद्धिः भवेदितितात्पर्येण॥ यस्यसत्वगुणः सर्वस्तस्यसिध्यत्य
यन्ततः॥ रजसातमसाक्रांतः संसारेपरिवर्त्तते॥ ३५॥ इत्यध्यायांतेयाज्ञवल्क्यंप्रतिसूर्यभगवान्प्रतिपादितवा
न्इतिदशमोध्यायः॥ ॥अथएकादशाध्याये॥ श्रीभगवानुवाच॥ अथातः संप्रवक्ष्यामिसमासेननविस्त
रात्॥ गुणानांचस्वरूपंतेयज्ज्ञानात्मूयतेनरः॥ १॥ सत्वंरजस्तमइतिगुणामायासमुद्भवाः॥ मायाकार्येषुसर्वे
षुतेगच्छंतिमुनीश्वर॥ २॥ इत्युपक्रम्यसत्वरजस्तमोगुणानामेवमायारूपत्वेनजगत्प्रतिपरिणाम्युपादान
त्वात्॥ सर्वकार्येषुजगत्सुसर्वत्रव्यापकत्वात्॥ ॥सर्वमपित्रैगुण्यमेवब्रह्मतुनिस्त्रैगुण्यंइत्याद्यर्थंप्रतिप

द्दनपुरस्सरं अध्यायांते॥ अथकिंबहुनोक्तेनतेन तज्ज्ञैर्गुणैस्त्रिभिः॥व्यवहारस्यसर्वस्यमुनेसिद्धिर्नसंशयः॥
३३॥ इतियाज्ञवल्क्यंप्रतिसूर्य उक्तवान्॥ इतिएकादशोध्यायः॥ अथद्वादशोध्याये॥श्रीभगवानुवाच अ
गुह्यतमंवक्ष्येतवाहंकरुणाबलात्॥ शृणु तच्छ्रद्धयासार्धंमुनेयोगींद्रवंदित॥१॥ अस्तिदेहेंद्रियादिभ्यः पृ
थग् जीवसमाह्वयः॥ विभिन्नः फलभोक्ताचस्थिरंकर्त्ताचकर्मणां॥इत्युपक्रम्य॥जीवस्यपारमार्थिकंस्व-
रूपंऔपाधिकंचस्वरूपंतत्साधनानिवैदिकतांत्रिकसिद्धांतान् तदधिकारिणः तन्निमित्तीकृत्यप्रवृत्तशास्त्रा
णितेषांपरिभाषादींश्च॥ अथप्रसन्नचित्तस्तुश्रद्दधानः सुनिश्चलः॥ आत्मानंवेदसंसिद्धंगृह्णीयादपरंत्यजे
त्॥५२॥ इतिअध्यायसमाप्तिपर्यंतंयाज्ञवल्क्यंप्रतिसूर्यःउक्तवान्इतिद्वादशोध्यायः॥ अथत्रयोदशाध्या
ये॥ श्रीभगवानुवाच॥ अथातः संप्रवक्ष्यामि तवाहंकरुणाबलात्॥ अयत्नेनहिजातीनामुपायंभोगमोक्ष
योः॥पुराशेषजगन्माता देवीकरुणयाहरं॥अपृच्छत्सर्वलोकानांहितायेदंतपोधन॥ २॥ श्रीपार्वत्युवाच॥
भगवन्देवदेवेशप्रणतार्त्तिविनाशन॥ हरिब्रह्मादिदेवानामत्युन्नतफलप्रदा॥३॥ कलिदोषेणमर्त्यानां
महामोहोभविष्यति॥ वेदमार्गैरतिःप्रत्यूहानभविष्यतिसर्वथा॥४॥ इत्युपक्रम्यकलियुगेविहितस्यकर्मणः अ
ननुष्ठानात्। निषिद्धकर्मणः अनुष्ठानात्॥ बहुजन्मार्जितपापकर्मणां भूयिष्ठत्वाच्चकलियुगेसर्वकर्मनिवृत्ति

५५८

द्वारामोक्षसिद्धिः कथंभवेदितिपार्वती प्रश्नस्यपरमेश्वरेणसर्वपापनिवर्त्तकत्वेनप्रणवव्याहृतिसावित्र्यादि
मंत्रजपसगुणादिपरमेश्वरध्यानादिसाधनानिदर्शयित्वाएतादृशानुष्ठानेनसर्वपापनिवृत्तिद्वाराज्ञानोत्प
त्यामोक्षसिद्धिर्भवतीति॥ उक्तसाधनानियाज्ञवल्क्याय॥ भोगमोक्षार्थिनांनृणामुपायोयंमयोदितः॥
आत्मायात्येकत्वसिद्धोवदेयोपस्यकस्यचित्॥३२॥ पुत्रायपुत्रतुल्यायधार्मिकायदृढायच॥ अर्थोपकारि
णेदेयस्त्वपायंयोगितावर॥३३॥ इतिअध्यायपरिपसमाप्त्यंतेयाज्ञवल्क्यंप्रतिसूर्यउक्तवान्इतित्रयोदशोध्या
यः॥ अथचतुर्दशाध्याये॥ श्रीभगवानुवाच॥ अथमुक्तिस्वरूपंतेप्रवक्ष्यामिसमासतः॥ यज्ज्ञानेनपरामु
क्तिःसिध्यत्यखिलदेहिनां॥१॥ तामेवपरांमुक्तिंवेदांताःप्रवदंतिहि॥ ज्ञानंनकारकंविद्धिनबोधकंखलुः
केवलं॥२॥ दृश्यतेहिघटज्ञानंघटार्थस्यतुबोधकं॥ अतोवेदांतविज्ञानंमुक्तेःसाक्षात्प्रकाशकं॥३॥ इत्युप
क्रम्यजीवब्रह्मैक्यरूपमुख्यामुक्तिःवेदांतजन्यज्ञानेनैवसंभवतिनान्येनहेतुनाइत्युपपाद्यमुक्तिस्वरूपतत्
साधनतत्फलादिसोपस्कारपुरस्सरंमुक्तिलक्षणादिकंविविच्यदर्शयित्वा॥ मुक्तिर्योगीन्द्रविज्ञानात्कथित
वेदवर्त्मना॥ तांविद्धिपैवसंपापविमुक्तोभवबंधनात्॥४॥ इतिअध्यायांतेयाज्ञवल्क्यायसूर्यः। उपदिष्ट
वान्॥ इतिचतुर्दशोध्यायः॥ अथपंचदशाध्याये॥ श्रीभगवानुवाच॥ अथयोग्यंप्रवक्ष्यामियथायोगंमः

मास्तः॥ब्रह्मविद्योपदेशार्थं मुने योगीन्द्रवंदित॥१॥ श्रद्धाहीनालसास्त्यक्ता वर्त्तंते भुवि ये जनाः॥ब्रह्मविद्यामिमां तेषां न वदेच्च कदाचन॥२॥ कृच्छ्रचांद्रायणादीनि येन कुर्वंति मोहिताः॥ ब्रह्मविद्या॰॥३॥ तिलधेनुतिलमादिदानहीनाश्च ये द्विजाः॥ ब्रह्मविद्या॰॥४॥ येन कुर्वंति यत्तांश्चन्यायार्जितधनेन तु॥ ब्रह्मविद्या॰॥५॥ रागद्वेषपरा लुब्धाः पिशुना येभिमानिनः॥ ब्रह्मविद्या॰॥६॥ परदारपरद्रोहपरहिंसारताश्च ये॥ ब्रह्मविद्या॰॥७॥ दूषका वेदमार्गस्य ये चान्ये वेददूषकाः॥ब्रह्मविद्या॰॥८॥ वर्णाश्रमसमाचारनिष्ठानां ये च दूषकाः॥ ब्रह्मविद्या॰॥९॥ विद्याचोराश्च ये विद्वन् गुरुद्रोहपराश्च ये॥ ब्रह्मविद्या॰॥१०॥ वेदादन्येषु मार्गेषु दीक्षिता ये भ्रमादपि॥ ब्रह्मविद्या॰॥११॥ब्रह्महत्यादिदोषौ तु भयं येषां न विद्यते॥ ब्रह्मविद्या॰॥१२॥ दासभावेन युक्ता ये दग्धांगा देवतायुधैः॥ ब्रह्मविद्या॰॥१३॥ नराणां नामरूपाद्यैः लिखितांगाश्च ये द्विजाः॥ ब्रह्मविद्या॥१४॥ विधिवच्छूद्रयासार्थं यैश्चीर्णं न शिरोव्रतं॥ ब्रह्मविद्यामिमां तेषां न वदेच्च कदाचन॥१५॥ इति ब्रह्मविद्यानधिकारिण उक्ता अधिकारिणो वक्तुं। इदं शिरोव्रतं चीर्णं विधिवद्यैर्द्विजातिभिः। तेषामेव परां विद्यां वदेद्ज्ञानबाधिकां॥ इत्यारभ्य ब्रह्मविद्योपदेशस्य योग्यः प्रोक्तो मया तव॥ अयोग्योपि तथा प्रोक्तः संग्रहेणादरेण तु॥३६॥ इति अध्यायांतं अधिकारिणः॥याज्ञवल्क्यं प्रति सूर्यः उक्तवान् इति पंचदशोध्यायः॥ ॥अथ षोडशसंख्याकाध्याये॥ ॥

श्रीभगवानुवाच ॥ अथसर्वार्थसंक्षेपंप्रवक्ष्यामिसमासतः ॥ याज्ञवल्क्यतदात्यंतंश्रद्धयासहितःशृणु ॥१॥ अ
त्यंयवपरमंतत्वंप्रथमंसकलस्यतु ॥ स्वयंभातंनिराधारंनितरामेवनिर्मलं ॥२॥ तत्स्वरूपातिरेकेणनकिंचिदपि
विद्यते ॥ अस्तिनास्तीतिप्रज्ञानितत्तदेवनचापरं ॥३॥ विभातिनविभातीतियद्धिद्वन्विभासते ॥ तत्तत्वंवेत
त्स्वोक्तंहेमुनेतस्यवैभवं ॥४॥ अहंतेदंतयाभेदोनैवभेदात्मनापितत् ॥ विभातिकेवलंतत्र किंजानेकिंवदाम्यहं
॥५॥ तस्यार्थस्यतुकोवक्ताकःश्रोतावचनंचकिं ॥ कंःछेदोश्रवणस्यैवफलंतच्छ्रवणस्यकिं ॥६॥ कःप्रमाताप्रमा
णंकिंकिंप्रमेयंचकाप्रमा ॥ कःकर्त्ताकाक्रियाकानिकरणानिमुनीश्वर ॥७॥ तस्यात्रकेवलंसाक्षान्मौनमेवहिपुज्य
ते ॥ तत्तावत्तिष्ठतिब्रह्मन् शरीरेहिशरीरिणां ॥८॥ अनिरूपितरूपाचाप्यनिरूपितरूपिणी ॥ अविद्याभासतेसा
क्षादनंतस्फुरणात्मनि ॥९॥ अज्ञोस्मीत्यवगम्यायासाविद्याभ्युपगम्यते ॥ वस्तुगत्यातथाविद्यातयासर्वार्थकल्प
ना ॥१०॥ अविद्याज्ञानमायाख्यमनःसंसारकारणं ॥ नेतरत्सत्यमेवोक्तंतद्धिवेदांतदर्शनं ॥११॥ मलःकामोपि
संसारकारणंनास्तिसंशयः ॥ रागद्वेषादयोदोषाअपिसंसारकारणं ॥१२॥ आणवाख्यंमलंसाक्षात्संसारस्यै
दकारणं ॥ आत्मानंकल्पयत्यन्येतज्ज्ञावन्नैवसंहृत ॥१३॥ कल्पितोवापदार्थोवासमलःश्रवणाव्हयः ॥ कल्पि
तत्वेह्यविद्यैवप्रोक्तानामांतरेणवै ॥१४॥ यथार्थश्चैतत्स्वरूपंवाधमोदात्मवस्तुनः। स्वरूपश्चमलःसोयंकदा

पिचननश्यति ॥१५॥ स्वरूपस्यविनाशेतुसुसूक्ष्मंपरिपश्यतां ॥ नैरात्म्यवादस्संप्राप्तः कोवातस्यनिवारकः ॥१६
धर्मस्त्वसगुणत्वेननैवतिष्ठतिचात्मनः ॥ निर्गुणःखलुचिद्रूपःसाक्षादाहुर्मुनीश्वर ॥१७॥ अपिचात्मगतःस्सोयम
चिद्रूपचिद्रूदेवसः ॥ यदिचित्सामलःसाक्षाद्विभुरत्रैवकेवलं ॥ यद्यचित्तर्हिचिद्रूपेविरोधान्नैवतिष्ठति ॥ चैतन्या
श्रयएवात्मानचिदित्यब्रवीद्यदि ॥१९॥ तदप्यात्मन्यचिच्चिन्ननतिष्ठतिसहद्वये ॥ शीतोष्णसुखदुःखादिधर्मो
पद्रुतस्थैवच ॥ आत्मत्वादेवचात्मायंचैतन्यस्याश्रयोभवेत् ॥ इतिचेदात्मतानस्यादचित्वादेवतुह्यचित् ॥२१॥
चैतन्याश्रयताभावाद्घटोनात्मानचान्यथा ॥ अयंचैतन्यधर्मत्वादात्मास्यादितिचेन्नतत् ॥२२॥ आत्माचेत्व
तुचैतन्यधर्मत्वंतस्यसिद्ध्यति ॥ सिद्धेचैतन्यधर्मत्वेह्यात्मतातस्यसिद्ध्यति ॥२३॥ अतएवमलःसोयंमुख्य
स्तुगुणसंज्ञितः । नतिष्ठतिगुणत्वेनसर्वदाह्यात्मवस्तुनि ॥२४॥ कार्यद्रव्यतयाचापिमलोनात्मनितिष्ठति ॥
संसारकारणत्वेनमलोदेतितथामुने ॥ तैरभ्युपगतस्सोयंनक्रियात्वेनतिष्ठति ॥२५॥ नापिजात्यात्मनाते
षांनतथादर्शनंमुने ॥ अतएवाणवाख्योयंमलआत्मनिकल्पितः ॥ अविभागेनचाभ्यस्तोमलआणवसं
ज्ञितः ॥ ईषन्मात्रविभागेनकल्पितोमलआत्मनि ॥२७॥ मायाख्यैनैवशास्त्रेषुकीर्त्यतेसापरात्मनः ॥ तथादुघ
टकारित्वादपिमायाप्रकीर्त्तिता ॥२८॥ अतोमायातिरेकेणवास्तवेनाणवोमलः ॥ लौकिकोवैदिकस्त्वान्योमाय

यापरिकल्पितः ॥ २९ ॥ कल्पितेषु समस्तेषु वैदिको मोक्षसाधनः ॥ पारंपर्येण चान्योपि श्रुत्यर्थः परिपठ्यते ॥ अयं
साधारणः प्रोक्तो लौकिकस्तत्र वैदयोः ॥ आणवादिमलोच्छेदः साक्षान्मोक्षः प्रकीर्तितः ॥ ३१ ॥ कल्पितस्य म
लस्यापि निवृत्तिर्विद्यया वहिः ॥ विद्यावेदांतवाक्योत्थाद्या विद्याकर्मसाधनं ॥ ३२ ॥ संसारार्णवमग्नानां साक्षा
त्संसारमोचकः ॥ महाकारुणिको रुद्रः सोमः सोमार्धशेखरः ॥ ३३ ॥ प्रत्यक्षादिप्रमाणेषु श्रुतिरेव गरीयसी
स्मृतयः श्रुतिमूलाश्च पुराणानि च भारतं ॥ ३४ ॥ शिक्षाद्यंगानि मीमांसे कर्मब्रह्मपरे यवा ॥ श्रुतिमूलेषु शास्त्रे
षु समस्तेषु मुनीश्वर ॥ ३५ ॥ प्रत्यक्षश्रुतिसिद्धार्थं यद्वक्ति मुनिसत्तम ॥ तत्रस्थश्रुतेरर्थं अनुक्तार्थप्रकाशकं ॥
३६ ॥ तेषु श्रुत्यविरुद्धं यत्तस्य मूलतया श्रुतिः ॥ कल्प्यते हि विरुद्धं यत्तदमूलमिति स्थितिः ॥ ३७ ॥ केवलं भ्रांतिमू
लं तद्वदंत्यपरे जनाः ॥ ब्रुवंति सर्वार्थं तथा श्रुतिर्मानोत्तमोत्तमा ॥ ३८ ॥ शिष्टाचारोपि तुल्योयं न्यायस्तत्र
न संशयः ॥ वेदाविरुद्ध आचारः कर्तव्यः खलु सर्वथा ॥ ३९ ॥ धर्मे चार्थे च कामे च मोक्षे वा परमा श्रुतिः ॥ स्वतः
प्रमाणं नैवान्यत्स्व सहायमपेक्षते ॥ ४० ॥ श्रुतेस्तावदनुक्तांशः पुरुषार्थचतुष्टये ॥ अणुमात्रमपि ब्रह्मन्ना
स्ति नास्ति न संशयः ॥ ४१ ॥ पौरुषेयं वचः किंचिच्छ्रुत्या तुल्यं न विद्यते ॥ अनाद्यं श्रुतिस्साध्वी सर्वमानो
त्तमोत्तमा ॥ ४२ ॥ वेदोत्पत्तिपरं वाक्यं यद्यद्वेदविदां वर ॥ तत्तत्सर्वमभिव्यक्तं हृदि कृत्वा ब्रवीद्बुधः ॥ ४३ ॥

ल

अतस्तंत्रोपदिष्टार्थः श्रुत्यर्थश्च परस्परं॥ विरुद्धो न विकल्पेन ग्राह्यः सूक्ष्मनिरूपकैः॥४४॥ तुल्यप्रमाणे स्सि
द्धार्थो विरुद्धो हि विकल्प्यते॥ नैवास्ति वेदमानेन तुल्यमानं न किंचन॥४५॥ मानेतिष्ठति साध्यार्थः सिद्धार्थश्रुति द
र्शितः॥ यथा नैव न तथा तंत्रैर्दर्शिनः सकलैरपि॥४६॥ सह तेन विकल्प्यं तत्सिद्धवस्तु कदाचन॥ एकरूपं खलु प्राज्ञैः सि
द्धं वस्त्वखिलं मुने॥४७॥ तत्त्वमेव सदा ग्राह्यं नरैः श्रेयोर्थिभिर्बुधैः॥ तथा तंत्रोदिताचारं विरुद्धम विशेषतः॥४८॥
विसृज्य वेदसंसिद्धं केवलं तु समाचरेत्॥ प्रत्यक्षादिप्रमाणानां पंचानामपि मानता॥४९॥ साक्षाद्वेदाविरुद्धेन स्वी
कर्त्तव्यं निरूपकैः॥ दोषसंभावना तेषां पंचानामपि सत्तम॥५०॥ दोषसंभावना चास्याः श्रुतेर्नास्ति कदाचन॥ क
र्तृदोषेण दुष्टं स्यात्कर्त्तव्यं क्वचिदास्तिकाः॥५१॥ क्वचित्करणदोषेण क्वचिद्विषयदोषतः॥ क्वचिच्चादृष्टदोषेण त
त्सर्वं न श्रुतौ खलु॥५२॥ प्रत्यक्षमूलान्यन्यानि मानानि खलु सत्तम॥ अतो वेदातिरिक्तानां दोषसंभावनास्ति हि
॥५३॥ नैवं वेदस्य दोषेण यद्वस्तु प्रतिपादितं॥ तत्तु साक्षात्स्वतः सिद्धं प्रथमं सकलस्य तु॥५४॥ प्रथमं त्वन्यथा य
द्रूपं मायामयानहि॥ सर्वस्य प्रथमं साक्षात्स्वार्थभूतं परं पदं॥५५॥ स्वातिरिक्तं विजानाति मायया परिमोहितः
॥ स्वातिरिक्ततया ज्ञातं मायया परमं पदं॥५६॥ अन्यथा चान्यथा भ्रांतिं प्रवदंति च केचन॥ पंचविंशकमित्याहु
स्तदेव परमं पदं॥५७॥ अन्ये षड्विंशतिं प्राहुस्तथान्ये सप्तविंशकं॥ अन्ये शतसहस्रादिसंख्यासंख्योपमास्तिका॥५८

नरं संख्याविनिर्मुक्तं परं तत्वं शिवाभिदं ॥ संख्यासंशयनिर्मुक्तं संख्यासंख्येयसाक्षिणं ॥ ५९ ॥ संख्यासंख्येय
चित्रस्य भित्तिभूतं सदोदितं ॥ सत्यं विज्ञानमानंदं ब्रह्मानंदमकल्मषं ॥ ६० ॥ अहमर्थतया श्रुत्या गुरूक्त्या ॰
त्वानुभूतिकः ॥ पश्यन्योगी परिज्ञानान्निर्वाणं याति सत्तम ॥ ६१ ॥ ब्रह्मैव सन्नयं साक्षाद्ब्रह्माप्नोति सनातनं ॥
विमुक्तो मुच्यते ज्ञानाद्धि ज्ञानादेव केवलं ॥ ६२ ॥ अज्ञानस्य विनाशेन संसारश्च विनश्यति ॥ यदात्मनात्म विज्ञान
दग्धाविद्यो भवेत्सुधीः ॥ ६३ ॥ जीवन्मुक्तिस्तदा तस्य कर्मबंधो न विद्यते ॥ अनारब्धानि कर्माणि पुण्यपापात्म
कानि तु ॥ ६४ ॥ ज्ञानाग्निनैव दग्धानि भवेयुर्हि न संशयः ॥ देहे प्रारब्धकर्माणि फलभोगेन केवलं ॥ विनश्यंति
परिज्ञानात्तथा चाह परा श्रुतिः ॥ श्रुत्युक्तार्थो न चोद्यार्हः खलु सर्वैस्तर्कैरपि ॥ ६६ ॥ यथोपदेशं संग्राह्यं केवलं वे
दवित्तम ॥ अथ किं बहुनोक्तेन श्रुत्यर्थो निखिलो मया ॥ ६७ ॥ करामलकवद्ब्रह्मन्यथावत्कथितस्तव ॥ श्रीसू
तः ॥ इत्युक्त्वा भगवान्सूर्यः सोमार्धकृतशेखरं ॥ ६८ ॥ दध्यौ प्रसन्नहृदयः सांबं संसारभेषजं ॥ अथ देवो मह
देवः शिवः संसारभेषजः ॥ ६९ ॥ प्रसन्नहृदयः सांबः प्रत्यक्षमगमत्प्रभुः ॥ लंबोदरः कुमारश्च नंदी च गणना
यकः ॥ ७० ॥ ब्रह्मविष्ण्वादयो देवास्तत्र सन्निहिता बुधाः ॥ भगवानंशुमाली च प्रत्यक्षं पुरतः स्थितं ॥ ७१ ॥ सांबं
चंद्रकलाचूडं तुष्टाव परया मुदा ॥ श्रीसूर्यः ॥ नमस्ते देववदेवेश नमस्ते करुणाकर ॥ नमस्ते पार्वतीनाथ नम

स्तेसर्वसाक्षिणे॥ नमस्तेपाशबद्धानांपाशहंत्रेपरात्मने ॥७३॥ पापनाशकरज्ञानप्रदायगुरवेनमः॥ अविशेषे
णाज्जंतूनामभिप्रेतार्थदायिने॥७४॥ अभिप्रेतार्थरूपायनमस्तेभक्तवत्सल॥ नमस्तेकंदमूलायलोकाले
कद्रुमचक्रस्य॥७५॥ नमस्तेपद्मनाभस्यपद्मयोनेःपदप्रद॥नमस्तेपदनिष्ठानांवेदविद्याप्रदायिने॥७६॥ वे
दविद्यापराणांतुस्वात्मदायनमोनमः॥ त्वमेवतत्वंपरमेपरात्सरंत्वमेवचेंद्रःसकलामरेश्वरः ॥७७॥ त्व
मेववन्हिश्वयमश्चपाशभृत्वमेववायुश्चहिसर्वगःप्रभुः॥त्वमेवचेशानसमाव्हयोहरत्वमेवचोर्ध्वाधर
दिक्पतिर्हर॥त्वमेवविद्योभयपाशहारित्वमेवमायापहपाशबंधः॥ त्वमेवसंसारविमोचकस्सदात्वमेव
दुःखोदधिमग्नजंतवः॥७९॥ त्वमेववेदाअखिलास्सनातनस्त्वमेवचांगानिसदेश्वरेश्वर॥त्वमेवस्मृ
स्मृतयश्चभारतं॥ त्वमेवदेशादिपुराणमद्भुतं॥८०॥ त्वमेवशास्त्राणिमहंतिशंकरत्वमेवतर्कोश्रुतिमान
गामिनः॥त्वमेवशब्दाविविधावृषध्वजस्त्वमेवशब्दार्थतयेवसंस्थितः॥८१॥ त्वमेवमानंशमितद्युनिप्र
भोशंभोगिरीशःसततंत्वमेव॥त्वमेवसच्चित्सुखलक्षणशिवस्त्वमेवसर्वंशिवशंकरेश्वर॥ त्वमेवनान
विधचेतनेतरस्त्वमेवशक्तिःपरमासनातनी॥ त्वमेवमुक्तिःपरमासुशोभनात्वमेवमुक्तिर्विविधामहेश्वर॥८२॥
त्वमेवभर्त्ताचविनाशकारणंत्वमेवनानाविधचेतनानि॥त्वमेवभिन्नहृयकल्पनाश्रयस्त्वमेवचाभिन्नमभिन्न

वर्जितः ॥ ८४ ॥ त्वमेवसत्त्वंसततोदितंप्रभोक्षमस्वमेजल्पितमीश्वरेश्वर ॥ प्रजल्पितंचापितवप्रसादितः सुजल्पितं
तत्रनसंशयप्रभो ॥ ८५ ॥ कुरुप्रसादंभवरोगभेषजंमयिप्रसादेनमहेश्वरेश्वर ॥ श्रीसूतः ॥ इतिस्तुत्वामहादेवंस
र्वज्ञंकरुणाकरं ॥ ८६ ॥ भक्त्यापरमयासूर्योह्यिजेन्द्राह्यवशोभवत् ॥ देवदेवोमहादेवःप्रणतार्त्तिविनाशनः ॥ ८७ ॥
अनुगृह्यविवस्वन्तंतत्रैवांतरधीयत ॥ ब्रह्माविष्णुश्चभास्वंतंयाज्ञवल्क्यंमुनीश्वरं ॥ ८८ ॥ आलिंग्यागमतामः
येप्रसन्नाअगमन्सुधाः ॥ याज्ञवल्क्योपियोगींद्रः प्रसन्नंभास्करंप्रभुं ॥ ८९ ॥ स्तोत्रैस्तुत्वागमन्नत्वाश्रीमद्वाराण
सींपुरीं ॥ भवंतोपिमहादेवप्रसादात्सौरसंहितां ॥ ९० ॥ श्रुतवंतोविमोहेननियतेनांतरात्मना ॥ ९१ ॥ इत्यादिभिः
स्त्रैश्चैः याज्ञवल्क्यंप्रसुकासूर्यः अदृश्योऽभवत ॥ संहिताषोडशोध्यायीनिर्मितासौरसंहितामहाकारुणिकेनै
वव्यासेनामिततेजसा ॥ यःपठेच्छृणुयाद्वापिश्रद्धयासौरसंहितां ॥ यथावत्तस्यवेदार्थः प्रतिभातिनसंशयः ॥ व
भास्करोपमः ॥ श्रीयाधनदतुल्यः स्यात्तनहिसंशयकारणं ॥ इत्युक्त्वाभगवान्सूतः सर्वंतंसांबमीश्वरं ॥ ध्या
त्वापरमयाभक्त्याभवेत्सरवशोभृशं ॥ वालखिल्यामहात्मानंव्याससिष्याभिधानकं ॥ यथाहंपूजयामासुःसूतं
सुमनसप्रियं ॥ इतिश्रीस्कांदपुराणेपंचाशत्खंडिकेषट्संहितार्थभूषितेशतसहस्रितायांसंहितायांषष्ठ्यांसौर

संहितायामेकसहस्त्रिकायां शोडशोध्यायः॥ ॥एवंसौरसंहितायामपि सूर्येण याज्ञवल्क्यायोपदिष्टप्रमेयविचारे
कृते सति याज्ञवल्क्यस्य शापप्राप्तिर्वा तत्संयुक्तायोग्यता वा यदा कदा वा पूर्वं नासीत्॥ इदानीं नास्ति उत्तरकाले न भ
विष्यति इत्याकारकप्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वरूपमिथ्यात्ववत् न। संभवत्येव। तद्द्वारक त
च्छिष्यकण्वमाध्यंदिनकात्यायनपारस्करादीनां तद्द्वारक तच्छिष्यपरम्पराप्राप्तवाजसनेयिब्राह्मणानां चायो
ग्यता न संभवतीति सिद्धं भवति॥ तथाहि सौरसंहितायां प्रथमाध्याये अष्टपंचाशत् श्लोके॥ एकविंशतिभेदेन ऋ
ग्वेदं कृतवान्मुनिः॥ शाखानां तु शतेनैव यजुर्वेदमथाकरोत्॥ ५८॥ सामवेदं सहस्रेण शाखानां तु प्रभेदतः॥ अ
थर्वाणमथो वेदं बिभेद नवकेन तु॥ ५९॥ अथ शिष्यांस्तु जग्राह चतुरो वेदपारगान्। सुमंतुं जैमिनिं चैव वैशंपाय
नमेव च॥ ६०॥ पैलसंज्ञमथप्राज्ञं व्यासः सत्यवतीसुतः। ऋग्वेदश्रावकं पैलसंज्ञं जग्राह महामुनिः॥ ६१॥ यजुर्वेदप्रवक्तारं वैशंपायन
मेव च॥ जैमिनिं सामवेदस्य सुमंतुमितरस्य तु॥ ६२॥ इत्यादिना वेदव्यासः समुदायरक्षा ऋग्वेदादिशाखाचतुष्टयं विभज्य ते
त्येकं अवांतरशाखाभेदं कृत्वा तेषां चतुर्वेदप्रवर्तकान् पैलवैशंपायनादीन् शिष्यान् गृहीत्वा तद्द्वारा अवांतरब
हुशाखावेदभागान्प्रवर्तयामास॥ यथा विष्णुपुराणे श्रीमद्भागवते च वेदव्यासेन पैलादिशिष्यद्वारेण चतुर्वेद
तदवांतरशाखावेदभागाः लोके प्रवर्तिताः। इत्याद्युक्तं॥ तथैव अत्रापि तत्समानप्रमाणभूतप्रसिद्धस्कांदपुराण

व

स्थसौरसंहितायामपिसएवार्थः॥उक्तः॥ अतः अत्रापिकालिकाखंडस्थकल्पितवाक्योक्तरीत्यायाज्ञवल्क्य
कण्वादीनांवैशंपायनशापादिप्रसक्तेः अनुक्तत्वात्॥ तद्वाक्यंकल्पितमेवेतिनिश्चीयते॥ ॥ननुविष्णुपुराण
भागवतयोः शापस्य अनुक्तत्वेपिवैशंपायनोक्तप्रकारेणवैशंपायनेनप्राप्तयजुर्वेदभागस्ययाज्ञवल्क्येनछ
र्दितत्वंतत्रप्रतिपाद्यते॥ अत्रतुतदंशः नप्रतिपादितः इतिनद्वैलक्षण्यं॥ अत्रवर्ततइतिचेत्॥ खंडं॥ तत्रतैत्ति
रीयशाखोत्पत्तिकारणाकांक्षायांसत्यांतत्समाधानार्थंतावत्पर्यंतमुक्तं॥ अत्रतुतदाकांक्षाप्रसक्त्यभावेनतत्स
माधानार्थंतावत्पर्यंतनोक्तं॥ इतियुक्तमेव॥ तत्रापितैत्तिरीयशाखोत्पत्तिकथनार्थंजजुषांछर्दिरुक्ता॥ नतु
शापादिप्रसक्तिरेवनोक्ता इतिशापाद्यभावांशेविष्णुपुराणभागवतस्कांदपुराणानांसमानविषयप्रतिपादक
त्वेनशापाद्ययोग्यताभावः दृढएवभवति॥ एवंस्थितेस्कांदपुराणस्थएवकालिकाखंडाख्यएकदेशपुराण
वाक्येवैशंपायनेनयाज्ञवल्क्यकण्वकात्यायनमाध्यंदिनानांचंडालत्वप्रापकशापः॥ वैशंपायनेनदत्त इति
॥प्रतिपादकवाक्यस्यस्वपुराणस्थस्कांदपुराणरूपसौरसंहितावाक्यविरोधेनभागवतविष्णुपुराणादिवि
रोधेनचकल्पितत्वंअर्थात्सिद्धंभवति॥ विष्णुपुराणभागवतस्कांदपुराणात्मकसौरसंहितादीनांसर्वलोक
प्रसिद्धत्वेनअसंदिग्धप्रमाणतया सर्वाप्रसिद्धसंदिग्धप्रमाणरूपप्रसिद्धविरोधवत्त्वेनचकालिकाखंडवाक्य

स्याप्रामाण्यं युक्ततरमेव भवति ॥ एकस्मिन्नेवपुराणे परस्परवाक्ययोः ॥ अत्यंतविरोधासंभवात् ॥ तत्रापि तत्पु
राणस्थषट्संहितास्थ[illegible] वाक्य विरोधेन अन्यपुराणादिविरोधेनच कालिकाखंड वाक्यस्यैव अप्रामाण्यं भवत्ये
व ॥ अथैवतस्यामेव सौरसंहितायां द्वितीयाध्याये ॥ श्रीसूतः ॥ पुराहिमवतः पार्श्वे योगी परमधर्मवित् ॥ या
ज्ञवल्क्यो महाधीमां[illegible]नां हितकाम्यया ॥ २ ॥ सहस्रकिरणं देवं समस्तजगदाश्रयं ॥ सुरासुरभुजंगाद्यैर्मुनि
भिश्चस्तुतेविंते । [illegible]मनसादेवीं सावित्रीं वेदमातरं ॥ साक्षादुद्रस्य देवस्य हरस्य प्रतिपादिका ॥ ४ ॥ चतुर्विं
शतिकं रुद्रं जजापविजितेंद्रियः ॥ ऊर्ध्वबाहुर्निराधारः पादांगुष्ठाग्रविष्ठितः ॥ ५ ॥ जपेन भगवान् सूर्यः प्रसन्न
मुखः प्रभः ॥ स्वयमाविर्भूतस्य पुरतः परमेश्वरः ॥ ६ ॥ इत्यादिषु याज्ञवल्क्येन सूर्यप्रसादार्थं गायत्रीज प
कृतइति प्रतिपाद्यते ॥ याज्ञवल्क्यस्यशापप्रयुक्तंचंडालत्वे सिद्धं गायत्रीजपाधिकारः कथं वा घटेत ॥ कथंचि
त् ॥ अनेनजपकृतेपि सूर्यः अनधिकारिकृतगायत्रीजपेन प्रसन्नः सन् आविर्भूतः वक्ष्यमाणब्रह्मविद्यादिप्रति
पादक षोडशाध्यायांतेषु बहुवैदिकरहस्यधर्म उपासनाब्रह्मज्ञानादिकं कथंवा उपविशेत संन्यासधर्मप्रतिपाद
कनारदपरिव्राजकोपनिषत् ॥ अवधूतोपनिषत् ॥ संन्यासोपनिषत् मनुपराशरापस्तंबबोधायनगौतमादिस्मृति
सूत्रादिषु च संन्यासानधिकारिणः ॥ प्रतिपादिताः ॥ तेषामेवाधिकाराभावे चंडालत्वादिप्राप्तस्य संन्यासाधिकारो

वाकथंसंभवेत् एतादृशपुरुषंप्रतिब्रह्मज्ञानोपदेशंप्रतिसाधनभूतसंन्यासपूर्वकशांत्यादिविधानंवा आदि
त्येन कथं उपदिश्येत। कालांतरेवा अनेन याज्ञवल्क्येन सन्यासः कथंवा क्रियेत्॥ एतादृशअयोग्यंप्रतिवेदां
तरहस्यब्रह्मात्मज्ञानंतत्साधनादि कंचकथंवा उपदिश्येत॥ वेदांतज्ञानोपदेशे बहुप्रकारेणशिष्यपरीक्षाक
र्तव्येतिबहुवेदांतवाक्येषुपरीक्षाक्रमोपिउपपाद्यते॥ तस्मात् अयोग्यत्वस्यअस्मिन्सत्वे आदित्येन एतादृश
ब्रह्मज्ञानादिवेदरहस्यंनोपदिश्यतएव इत्यर्थः अनुमितोभवति॥ अपिच॥ अस्यामेवसौरसंहितायांव्यासेन
वेदविभागकृतप्रस्तावे॥ शाखानांतुशतेनैवयजुर्वेदमथाकरोत्॥ इतिप्रथमाध्यायोक्तअष्टपंचाशत्॥ श्लो
कार्थेप्रतिपादितस्ययजुर्वेदस्यसामान्यतः शतशाखावत्वेन अभिधानेपि॥ अस्यामेव अष्टमाध्यायेपंचदश
संख्याकश्लोकप्रभृतिसप्तदशसंख्याकश्लोकेषु प्रतिपादितअंतर्यामित्वेन सर्वत्रस्थितब्राह्मणएवकर्मफलदा
तृत्वं इत्यत्रसप्तदशसंख्याक॥ ॥तिष्ठन्नात्मनिचात्मानंयमयत्यं नरास्थितः॥ इत्याहब्राह्मणंशुद्धंसत्यंतद्व
चनंखलु॥१७॥ इतिश्लोकेब्राह्मणशब्देनबृहदारण्योपनिषदस्यैव उदाहृतत्वात्॥ ब्राह्मणंशुद्धं इतिविशेषणे
नब्राह्मणमित्युक्ते शतपथब्राह्मणांतर्भूतबृहदारण्योपनिषत॥ तत्रशुद्धमितिपदस्यशुद्धस्यशुक्लमितिपर्या
पत्वावगमात्॥ शुक्लयजुश्शाखाब्राह्मणमितियजुर्वेदस्यमुक्तिकोपनिषदिश्रीरामेणभागद्वयकृतयजुर्वेदैक

देशस्य वाजसनेयब्राह्मणस्य शुक्लयजुष्ट्वेननिर्देशावत्॥ अन्वर्थ नामक शुक्लयजुर्वेदत्वं सिद्धं भवति॥ ॥अपि च॥ तिष्ठन्नात्मनि चात्मान इत्यादिश्लोकेषु प्रतिपादितांतर्यामिस्वरूपस्य बृहदारण्यपंचमाध्यायगत अंतर्यामिब्राह्मणस्थ॥ उपलभ्यमानत्वात्॥ अन्यासूपनिषत्सु अनुपलभ्यमानत्वाच्च॥ अस्याः सौरसंहितायाः तन्मूलत्वमेव बहुशोऽप्रतीयते॥ ॥अनेन हेतुना शुक्लयजुश्शाखाभिधेयभूतवाजसनेयिब्राह्मणमेव प्रायेण सौरसंहितायाः मूलभूतश्रुतिरिति अनुमीयते॥ एतस्मादपि हेतोः शुक्लयजुश्शाखाप्रवर्तकस्य याज्ञवल्क्यस्यायोग्यता नास्तीत्यवगम्यते॥ ॥एवं पंचदशाध्याय॥ श्रीभगवानुवाच॥ इत्यस्य आदित्य उवाच इत्यर्थः॥ अथ योग्यं प्रवक्ष्यामि यथायोगं समासतः॥ ब्रह्मविद्योपदेशार्थं मुने योगींद्रवंदित॥ १॥ श्रद्धाहीनालसा ह्यज्ञा वर्तंते भुवि ये जनाः॥ ब्रह्मविद्यामिमां तेषां नवदेच्च कदाचन॥ २॥ इत्यादि ब्रह्मविद्योपदेशस्य योग्यः प्रोक्तो मया तव॥ अयोग्योऽपि तथा प्रोक्तः संग्रहेणादरेण तु॥ ३ इति अध्यायांते ब्रह्मविद्योपदेशस्य योग्यायोग्यप्रदर्शनप्रस्तावे॥ श्रद्धाहीनालसाज्ञकृच्छ्रचांद्रायणादिरहिततिलधेनुतिलहोमादिदानरहितन्यायार्जितधनसाधनयज्ञाकर्तृरागद्वेषलोभयुक्तपिशुनदेहाभिमानिपरदारगंतृपरद्रोहिपरहिंसकवेददूषकवेदमार्गदूषकवर्णाश्रमसदाचारदूषकविद्याचोरगुरुद्रोहीवेदविरुद्धतंत्रमार्गप्रविष्टब्रह्महत्यादिदोषभयरहितदेवतादासभावदेवतायुधदग्धचिन्हित

शरीरगुर्वादिमनुष्यनामरूपादिलिखितागोपनिषद्विध्युक्ताचीर्णशिरोव्रतादयः॥ ये द्विजाः ते ब्रह्मविद्यानधि
कारिणः ब्रह्मविद्यामिमां तेषां न वदेच्च कदाचन। इति॥ ब्रह्मज्ञानोपदेशो अनधिकारिणः॥ दर्शइत्वा अथाधिका
रिणः तद्विपरीताः इत्यर्थात्॥ सूचयित्वा। केषांचिदधिकारिणां प्रदर्शनार्थं उपलक्षणत्वेन कांश्चित्तु दर्शयितुं॥ इ
दं शिरोव्रतं चीर्णं विधिवद्यैर्द्विजातिभिः॥ तेषामेव परां विद्यां वदेद्ज्ञानबाधिकां॥१६॥ इत्यारभ्य अध्यायसमाप्ति
पर्यंतं अधिकारोपलक्षितान्। सूर्यः याज्ञवल्क्याय। दर्शयामास॥ अतस्तुतस्मिन्नेवाध्याये पूर्वश्लोके सुयोगींद्रवं
दितइति संबोधनेन याज्ञवल्क्यं प्रति सूर्येणासकृदुक्तत्वात्॥ याज्ञवल्क्यस्य योग्युत्तमत्वं सिद्धमेव भवति॥ एवं
स्थितेप्रसिद्धप्रमाणभूतस्कान्दपुराणस्थसौरसंहिताख्यशास्त्रार्थे याज्ञवल्क्यस्य स्कांदपुराणस्य कालिका
खंडाख्यएकदेशस्य कल्पितवाक्योक्तप्रकारेण वैशंपायनशापप्रयुक्तचंडालत्वप्राप्तिः कथं संभाव्येत संभाव
नैव नोपपद्यते। अन्यथा भगवच्छब्दवाच्यस्य सर्वज्ञस्य सर्वैश्वर्यसंपन्नस्य सूर्यस्य पूर्वोक्तश्लोकैर्ब्रह्मविद्यो
पदेशानधिकारिभ्यो अत्यंतनिकृष्टत्वरूपचंडालत्वप्राप्तनिकृष्टविशेषाकारेणापि पूर्वोक्तानधिकारिकोटि
प्रविष्टगुरुद्रोहप्रयुक्तगुरुशापग्रस्तयाज्ञवल्क्यं प्रति मोक्षप्रापकब्रह्मविद्योपदेष्टृत्वं न भवेत्। लोकेऽप्य
तमूढोऽपि कश्चिन्न एतद्दानविषये एते अनधिकारिणः तेषां नहि प्रयोनदेयइति स्वयमेव तद्दानं निषिध्य पुनः ते

भ्योवानधिकारिभ्यः। स्वेनैववेदयत्वेन निषिद्धमेव विषयं स्वयमेव दातुं प्रवृत्तः इति यत्र कुत्रापि न दृष्टं न श्रुतं च ए
वं न्याये सिद्धे सति परमेश्वरसदृशः। सूर्यः स्वयमेव ब्रह्मविद्यानधिकारिणः दर्शयित्वा तेभ्योपि अत्यंतनिकृष्टा
य शापप्रस्ताय याज्ञवल्क्याय स्वयमेव ब्रह्मविद्यां उपदिदेशेति कथं शास्त्रेषु प्रतिपादितं युक्तं भवेत्॥ तस्मादपि या
ज्ञवल्क्यस्यानधिकारः अत्यंतासत्तुल्य एव। अत एव षोडशाध्यायेपि॥ आद्यारभ्य अंतपर्यंतं वेदांतरहस्यार्थः
ब्रह्मविद्याजनकः सर्वोपि संक्षेपेण याज्ञवल्क्याय सूर्येण उपदिष्टः। इत्यपि युक्ततरः। अस्मिन्नेव षोडशसंख्या
काध्याये॥ शिक्षाद्यंगानि मीमांसे कर्मब्रह्मपरे अथवा। श्रुतिमूलेषु शास्त्रेषु समस्तेषु मुनीश्वर॥३५॥ प्रत्यक्षश्रुति
सिद्धार्थं यदुक्तिं मुनिसत्तम॥ तत्र त्वप्रत्यक्षश्रुतेरर्थं अनुक्तार्थप्रकाशकं॥३६॥ तेषु श्रुत्यविरुद्धं यत्तस्यान्मूलवत्पा॰
श्रुतिः॥ कल्प्यते हि विरुद्धं यत्तदमूलमिति स्थितिः॥३७॥ केवलं भ्रांतिमूलं तद्भवतीत्यपरे जनाः। ब्रुवंति सर्वार्थ
तया श्रुतिर्मानोत्तमोत्तमा॥३८॥ इत्येतेषु श्लोकेषु॥ श्रुतिमूलेषु शास्त्रेषु समस्तेषु मुनीश्वर। प्रत्यक्षश्रुतिसिद्धार्थं
। इत्यादिना मीमांसादि वैदिकन्यायः त्रिप्रकारप्रदर्शितः॥ तत्र तावत्। श्रुतिमूलेषु स्मृतीतिहासपुराणादिशास्त्रे
षु यः इदानीं प्रायेण सर्वदेशेषु अध्ययनाध्यापनादिव्यवहारविषयतां पा प्रत्यक्षयोग्यश्रुतिभागः तत्प्रतिपादि
तार्थतत्त्वमेय[illegible]वाक्यं। वक्ति। तत्त्वमेयज्ञातमेव। प्रत्यक्षश्रुतेरर्थः तमेवार्थं इतरैः अज्ञातं प्रकाशयितुं॥ श्रु

दिमूलानिस्मृत्यादिशास्त्राणिप्रवृत्तानि। इत्यर्थः अनुक्तार्थप्रकाशकः इत्यंतवाक्यस्य तात्पर्यविषयः अयमे
कः प्रकारः॥ पूर्वोक्तेषु श्रुतिमूलस्मृत्यादिशास्त्रेषु प्रत्यक्षश्रुत्यविरुद्धं। अर्थजातं। यदुच्यते॥ तन्मूलतयाश्रुतिः
कल्प्यते अनुमीयत इत्यर्थः। हि इति पूर्वोक्तमीमांसाधर्मशास्त्रादिवैदिकन्यायप्रसिद्धिद्योतकः॥ अयमर्थः ते
षु श्रुत्यविरुद्धं यत्तस्य मूलतया श्रुतिः। कल्प्यते हि अत्यंतवाक्यस्य अयमर्थः तात्पर्यविषयः। इत्येकः प्रकारः।
प्रत्यक्षश्रुत्या। विरुद्धं यत्। अर्थजातं तन्मूलतया श्रुतेः कल्पनीयत्वासंभवात्॥ प्रत्यक्षश्रुतिविरुद्धार्थानुसा
रेण श्रुतेः अनुमेयत्वे वेदविरुद्ध तत्रलौकिकोवाक्यार्थानुसारेण तन्मूलश्रुतिकल्पनास्वीकारेण अतिप्रसंग
स्य दुर्वारत्वात्। श्रुतिविरुद्धशास्त्रार्थजातं श्रुतिमूलं न भवति किन्तु तदप्रामाणिकमेव अतएव तत्त्याज्यं। इत्ययम
र्थः विरुद्धं यत्तदमूलमिति स्थितिः। इत्यंतवाक्यस्य तात्पर्यविषयः अयमेकः प्रकारः अस्य प्रकारस्य समूलत्वं।
उत्तरश्लोकेन स्पष्टी क्रियते। केवलं भ्रांतिमूलं तद्धि कुर्वित्यपरे जनाः ब्रुवंति। सर्वार्थतपाप्रतिमानोत्तमोत्तमा। इति
वाक्येन श्रुतिविरुद्धार्थस्य श्रुतिमूलत्वाभावेन भ्रांतिमूलत्वमुपपाद्य अतएव श्रुतेः मानोत्तमेत्तमत्वं प्रतिपादितं तस्मा
त् प्रकृते श्रुतिविरुद्ध अर्थप्रतिपादकशास्त्रादिवाक्यानां श्रुतिमूलकत्वासंभवेन भ्रांतिमूलकत्वेन अप्रमाण्यमेव नि
श्चितं। इतिकृत्वा याज्ञवल्क्यशापप्रतिपादककालिकाखंडवाक्यस्य प्रत्यक्षश्रुतिरूपबृहदारण्यलघुजाबालरामत।

पनीयादिबहुश्रुतिविरुद्धत्वेन अनुमितप्रमाणमूलत्वासंभवात्। केनचित् कल्पितत्वमित्येवं अर्थः पर्यवसितो भव
ति। अपिच। तत्रैव षोडशाध्याये। अंत्यभागे सूर्यः याज्ञवल्क्याय ब्रह्मविद्यादिसकलवेदार्थरहस्यमुपदिश्य याज्ञ
वल्क्याय स्वोक्तार्थप्रतिपत्तिदार्ढ्यार्थं ईश्वरध्यानं कृतवान् ततः परमेश्वरः तत्र सन्निहितो भवत्। तं सूर्यः स्तुत्वा त
त्प्रसादं प्राप्तवान्। अनंतरं परमेश्वरः तत्रैव अंतर्धानं प्राप्तवान् तदनंतरं याज्ञवल्क्यं ब्रह्माविष्णुश्च आलिंग्य स्व
स्वपुरीं प्रतिगतौ अनंतरं स्कंदलंबोदरनंदिकेश्वरादयो गणाः इन्द्रादयश्च देवाः प्रसन्नास्ते तः याज्ञवल्क्यं आलिं
ग्य स्वस्वपुरीं गताः इत्यत्र एतस्मिन्नेवाध्याये श्लोका भवंति। अनुगृह्य विवस्वंतं तत्रैवांतरधीयत। ब्रह्माविष्णु
श्च भास्वंतं याज्ञवल्क्यं मुनीश्वरं॥ ८॥ आलिंग्यागमतामन्ये प्रसन्ना अगमन्बुधाः याज्ञवल्क्योपि योगींद्रः प्रसन्नं
भास्करं प्रभुं॥ ८९॥ स्तोत्रैस्तुत्वागमन्नत्वा श्रीमद्वाराणसीं पुरीं। एतेषु श्लोकेष्वपि भास्वंतमिति याज्ञवल्क्यविशे
षणं। ननु सूर्यमित्यर्थः अन्यथा भास्वंतं याज्ञवल्क्यं चेति उभयसमुच्चायकचकारप्रयोगः अपेक्षितः स्यात्। न यान
प्रयुक्तः। अथवा भास्वंतमिति सूर्यपरत्वेन विशेष्यपदं याज्ञवल्क्यमिति तद्विशेषणं पदं इत्यपि वक्तुं न शक्यते। याज्ञ
वल्क्यपदस्य योगेन रूढ्या वा सूर्यपरत्वाप्रसिद्धेः भास्वंतमिति पदस्य याज्ञवल्क्यविशेषणत्वे यौगिकत्वेन भा
सादस्य ब्रह्मविद्यात्र पुस्तकप्रकाशपरत्वस्य ब्रह्मवर्चसपरत्वस्य वा संभवात् भास्वंतमिति पदस्य याज्ञवल्क्यविशेष

पत्त्वसंभवति। तस्मादेव ब्रह्मविद्यादिमत्वहेतोः मुनीश्वर इति विशेषणं लब्धं। एताभ्यां भास्वंतमिति ब्रह्मविद्याप्रमु
खकीर्तिमत्वेन सूर्यसदृशत्वब्रह्मवित्वेनमुनीश्वरत्वरूपविशेषणाभ्यां याज्ञवल्क्यस्य विशेषितत्वात्। ब्रह्मविष्णु
भ्यां आलिंगितत्वात्। अन्यैरपि सर्वैर्देवैः प्रसन्नैः तत्समभिव्याहारबलेन आलिंगितत्वसूचनाच्च याज्ञवल्क्यस्या
योग्यतालेशोपि न संभवति॥ प्रत्युत ब्रह्मविष्णुसांबोदरस्कंदनंदि इन्द्रादिदेवैः आलिंगितत्वे। प्रकाशवत्वमुनीश्व
रत्वादि अतिशयवत्वप्राप्त्या सर्वश्रेष्ठत्वं प्रतीयते। इत्यभ्युपगंतव्यं॥ अतएव सूर्येण प्रत्यध्यायं याज्ञवल्क्यं प्रति यो
गींद्रवंदितेत्यसकृत्संबोधनं कृतं॥ एवं सर्वशास्त्रार्थविचारणायां याज्ञवल्क्यस्य कण्वकात्यायनमाध्यंदिनादीना
मपि शापप्राप्तेः प्रमाणस्य तत्प्रयुक्तचंडालत्वस्य तस्मिन्सति मध्यान्हकाले घटिकाद्वयादिसंकुचितकालेन अनुभ
वस्य वा कुत्रापि मूलप्रमाणादर्शनात्। तच्छिष्यपरंपराप्राप्तवाजसनेयिशाखिब्राह्मणानां एतत्प्रयुक्तनिषेधस्य
वा तेषां ब्राह्मणानां इतरशाखिब्राह्मणैः श्राद्धनिमंत्रणविषये भोजनपंक्तिभोजनविषये यजनयाजनविषय अध्ये
नाध्यापनविषये कन्यादानादिसर्वदान प्रतिग्रहादिविषये निषेधस्यापि शास्त्रे कुत्राप्यदृष्टत्वात्। याज्ञवल्क्यादि
शिष्यपरंपराप्राप्त प्रथमस्वरांगवत्वनिमित्त विनापार्थिक्येन प्रकारांतरेण वाजसनेयिब्राह्मणानां यत्किंचिद्दूषयिकनि
षेधादर्शनाच्च। यस्मिन्कस्मिन्विषयेपि याज्ञवल्क्यप्रभृति इदानींतनवाजसनेयिब्राह्मणांतानां यः कश्चन निषेधो

वाक्कचिद्योग्यताबाकुत्रापिप्रामाणिकशास्त्रेषुनदृष्टा॥ प्रस्तुतश्राद्धनिमंत्रणप्रकरणादिषुसर्वेष्वपि। एतेषां
ब्राह्मणानांइतरशाखिब्राह्मणवत् सर्वग्राह्यत्वेनसव्यवहार्यत्वप्रतीतेः। याज्ञवल्क्यकण्वकात्यायनमाध्यंदि
नपारस्करादीनां। उपनिषत्सुमंत्रब्राह्मणेषुतत्कृतस्मृतिसूत्रादिवाक्यानांचासर्वैः सर्वविषयेषुग्राह्यत्वप्रती
तेश्च। उपनिषत्सुमंत्रब्राह्मणेषु। आपस्तंबआश्वलायनद्राह्यायनगौतमबोधायनहिरण्यकेश्यादिश्रौत
गृह्यधर्मसूत्रेषु मनुपराशरव्यासादिस्मृतिषु आश्वलायनादिषट्सूत्रभाष्यवृत्तिव्याख्यानप्रयोगादिषु म
नुस्मृतिव्याख्यानरूपमन्वर्थमुक्तावलिविज्ञानेश्वरीयपराशरमाधवीयकालमाधवीयहेमाद्रिनरसिंह
प्रयोगपारिजातधर्मप्रवृत्तिनिर्णयसिंधुधर्मसिंधुवैद्यनाथीयादिसर्वप्रमाणभूतधर्मशास्त्रनिबन्धनग्रं
थेषु। उपनिषद्भाष्यगीताभाष्यसूत्रभाष्यएतद्व्याख्यानएतद्वार्त्तिकपंचदशीप्रकरणजीवन्मुक्तिप्रक
रणउपनिषद्दीपिकाविष्णुपुराण भागवत स्कान्दपुराण सौरसंहिता भारतरामायणादिसर्वलो
कप्रसिद्धसर्वशाखिब्राह्मणानुष्ठापकसर्वग्रन्थेष्वपिस्फुटतयाविद्यमानत्वस्य पूर्वग्रन्थेषु अस्मा
भिः प्रकटीकृतत्वात्॥ ॥ यद्यपि वायुपुराण अग्निपुराण वाराहपुराण वामनपुराण
ब्रह्मपुराण ब्रह्मांडपुराणादिबहुपुराणेषु॥ ॥ ॥ ॥ याज्ञवल्क्य कण्वकात्यायना

नि:

दि माहात्म्यस्य तत्कृत ग्रंथस्य वा बहुलोप्रकटितत्वं वर्तते। तथापि। तेषां सर्वेषां अत्र लेखने ग्रंथबाहुल्यात् दु
ष्प्राप एतद्ग्रंथदर्शने अत्यंतौदासीन्योत्पत्तिशंकया लोकेषु बहुलोप्रचाराभाववत्पुराणानां इतरवादिभिः प्रामा
ण्याप्रामाण्यसंशयेन विप्रतिपन्नतया च। एतद्ग्रंथस्य सर्वजनाः ग्राह्यत्वे न प्रचारसंकोचशंकया च। अत्र अ
स्माभिः तद्वचनानि न लिखितानि॥ अपितु असंदिग्धप्रामाण्यक सर्वानुष्ठापक सर्वप्रसिद्धप्रमाण ग्रं
थानामेव अस्माभिरुदाहरणं कृतं। एतद्ग्रंथव्यतिरेकेण एतद्ग्रंथार्थविरुद्धत्वेन च एकदेशीपुराणादिनि
ष्टवचनं मितिकथंचित् केनचित् उदाहृतत्वेपि एतच्छ्रुत्यादिबलवत्प्रमाणभूतबहुप्रमाणविरुद्धत्वेन उ
भयमीमांसालौकिकादिन्यायरीत्या एकदेशभूत अप्र सिद्धप्रमाणकवाक्यस्य पूर्वोक्तकालिकाखंडस्य अ
प्रामाण्यसाधकयुक्तिन्यायादिभिरेव अप्रामाण्यं साधितं भवति। एतच्छास्त्रानुरोधेनैव प्राचीनसहस्र संव
त्सरादिकालेषु द्राविडकर्नाटकआंध्रादिबहुदेशेषु वाजसनेयिब्राह्मणानां श्रीरामप्रभृति महाराजवंशोत्प
न्नैः। महाराजैः। हरिहरमहाराज बु क्कमहाराज अच्युतरायकृष्णरायादि महाराजादिभिः तुंगभद्रातीर
पंपाक्षेत्रसमीपवर्तिराजधान्यधीशादिभिः। महिसूराख्यदेशाधिपतिमहाराजैः। तन्मंत्रिभूत दलवाद्या
दि धर्मप्रधानराजसहस्रैः। पांडिदेशचोलदेशकांचीदेशकेरलदेशआंध्रदेशमहाराष्ट्रदेशघूर्जरदेश

वंगदेशश्यामालविदेशादिमहाराजैः। काशीप्रभृतिरामेश्वरहिमवत्पर्वतांतदेशस्थसर्वमहाराजैश्च। अंगादिदेश
स्थब्राह्मणेभ्यइववाजसनेयिब्राह्मणेभ्यश्च पुत्रपौत्रपारंपर्यादिवंशानुक्रमेण आचंद्रार्ककालभोग्यतया अग्र-
हाराख्यजीवनवृत्तिरूपभूदानस्य कृतत्वेन। इदानीमपि सर्वदेशेषु भूरूपजीवनवृत्तिः। अग्रहाराख्यादिषु वा
जसनेयब्राह्मणैरपि अनुभूयत एव। अस्माभिः द्विवारं काशीरामेश्वरादितीर्थयात्रार्थं गमनवेलायां। प्रायेण
भूप्रदक्षिणरूपसंचारप्रवृत्तौ अयं विषयः बहुलो दृष्टः। इदानीमपि प्रायेण सर्वत्र वर्तते। अतः भूदानार्हत्वेन
यज्ञयागाद्यनुष्ठातत्वेन यजनयाजनादिकर्तृत्वेन दानप्रतिग्रहादिव्यवहर्तृत्वेन च। शास्त्रीययोग्यतां विचार्य
वता दृशयोग्येभ्य एव पूर्वकालीनाः धर्मप्रधानाः शास्त्रैकशरणाः। देवब्राह्मणआराधनैकपराः सर्वे राजानः। द
त्तवंतः इत्यपि हेतोः वाजसनेयिब्राह्मणानां दोषाभावः। सिद्ध एव इदानीमपि कुंभकोणादि चोलदेशप्रांतेषु
हृज्याकोल्याख्य अग्रहाररूपग्रामभूमिः। सर्वभोग्यतया केवलं वाजसनेयब्राह्मणैरेव भुज्यते। एवं मधुरादेशे
कांचीदेशे ब्रह्मऋषिदेशाख्यप्रांतेषु ताम्रपर्णीतीरादिषु महिसूरुदेशेपि कावेरीकपिलासंगमप्रांतेषु। गजार
ण्यक्षेत्रसमीपे कलियूराख्य अग्रहारेषु। नंजनगूडाख्य श्रीकंठक्षेत्रप्रांतेषु। तुरुवेकेर्याख्यग्रामांतरगतजन्न
किनकेर्याख्य अग्रहारादिषु। धारवाडाख्यदेशप्रांतेषु। तत्र तत्र बहुप्रदेशेषु श्रोत्रियमान्यमिति भटमान्यमिति।

न्नमहाः इति प्राचीनराजादिदत्तभूमिः वाजसनेयब्राह्मणैरपि क्वचित्क्वचित् इतरब्राह्मणैस्सह समुदायांतर्गत
त्वेन क्वचित्क्वचित् एतैरेव केवलैः उपभुज्यते। एवमेव कुंभकोणादिचोलदेशेषु ताम्रपर्णीतीरादि मधुरादेशेषु कां
चीदेशेषु धारवाडादिदेशेषु गोदावरीप्रांत्यदेशेषु पंचवटीनागपुर्यादिदेशेषु काशीप्रांत्यादिदेशेषु च प्रायेण वाजस
नेयब्राह्मणैस्सह इतरशाखिब्राह्मणानां परस्परश्राद्धनिमंत्रण भोजन प्रतिभोजन यथासंभव यजन याजन अध्यय
नाध्यापन दान प्रतिग्रहादि सर्वव्यवहारः निश्शंकतया दृश्यत एव॥ अपि च महिसूरुसमीपस्थितनंजनगूडा
ख्य श्रीकंठेश्वरस्थानभूत गरलपुरीक्षेत्रेपि श्रीकंठेश्वर आराधननिमित्तनियमितब्राह्मणानां बहूनां पूर्वकाले न
महाराजैर्दत्ता अग्रहारांतर्गत भूवृत्तिसमुदायेषु भालीकट्टेमुद्वैयाख्य वाजसनेयिब्राह्मण वंशस्थानामपि इतर
शाखिब्राह्मणसमानतया तद्भूमिदानपूर्वकं देवसेवार्थनियमितकार्येषु तद्भूशास्थैः देवतासन्निधौ इतरशाखि
ब्राह्मणवत् देवताविग्रहवाहन। निवेदितान्नस्पर्शन। अन्नपरिवेषणादि सर्वव्यवहारोपि निश्शंकतया प्रवर्त्तते।
एवं तोगेरे अग्रहाराख्यग्रामेपि इतरशाखिब्राह्मणैस्सह भूवृत्तिः राजादिभिः दत्तासति। इदानीमपि उपभु
ज्यते॥ एवं हरिहर महाराजदत्त वेलापुर समीपस्थ घट्टदहल्याख्य अग्रहारेपि इतरशाखिब्राह्मणैस्सह वा
जसनेयिब्राह्मणानां भूवृत्तिः। इदानीमपि वर्ततएव॥ एवं बहुप्रदेशेषु सकलव्यवहारोपि सर्वशाखिसमानतया।

प्र.गा. ५५४

नि.

दृश्यते॥ क्वचित्क्वचि द्देशेषु अज्ञत्व असूयद्वेषादि दोषनिमित्त ककालविशेषप्राप्त दोषादिना इतरशाखिभिः
वाजसनेयब्राह्मणानां च। केषुचिद्विषयेषु व्यवहारः संकुचितस्तयाप्रवर्त्तते। एतावन्मात्रेण वाजसनेयिब्राह्म
णानां अयोग्यता वा याज्ञवल्क्यकण्वकात्यायनादीनां शापग्रस्तत्वं वा प्रत्यक्षश्रुत्यादिमहाप्रमाणभूतवलव
द्ग्रंथन्यायादिविरुद्धत्वेन केनापि पुरुषेण ब्रह्मणा विष्णुना ईश्वरेण वा कल्पयितुं शक्यं न भवति॥ अपि च॥ चो
ळदेशे कुंभकोणसमीपस्थ वेपत्तूरु तिरपशिल्लूरु प्रभृति अग्रहारेषु स्थित महाप्रसिद्ध चतुःशास्त्रपंडित बहु
जनैः गुरुत्वेन गृहीतः स्वयंप्रकाशानंदनारायणानंदादियतिवर्यैः कण्वशाखाप्रविष्ट वाजसनेयिब्राह्मणस्य स
न्यासं दत्वा वासुदेवेंद्र इति नामधेयमपि दत्तं॥ एवं कांच्यां अष्टोत्तरशतोपनिषत्संचयं संपाद्य तासु महावाक्या
न्युद्धृत्य महावाक्यरत्नावल्याख्य ग्रंथं कृत्वा तस्य प्रभाख्य लोचनाख्यं च। व्याख्यानद्वयं कृतवान्। एउपनिष
द्ब्रह्माख्यः यतिश्रेष्ठः तेनैव सर्वज्ञेन व्याससमेन माध्यंदिनशाखाप्रविष्ट महाराष्ट्र ब्राह्मणस्य सन्यासं दत्वा राम
नंद इति नामधेयं दत्तवान्। तेन रामानंदाख्येन यतिवर्येणापि इतरशाखिनः। ऋग्वेद तैत्तिरीय सामादिशाखिनः
बहवो संन्यासिनः अभवन्। तेषामपि शिष्य प्रशिष्यादि परंपरया बहवोपि सन्यासिनः। कांच्यादिप्रदेशेषु अद्यापि
दृश्यंते। एवं कावेर्यां गोदावरीतीर समीपेषु चोळदेशादिप्रदेशेषु च। वाजसनेयिब्राह्मणानां इतरशाखिब्राह्मणा

५५२

नोच्चपरस्परसन्यासग्रहणसन्यासदानादिव्यवहारोदृश्यते॥ ॥ ननुऋग्वेदिनः तव। वाजसनेयिब्राह्मणपक्ष
पातः एतावान् किमर्थं प्रवृत्तइतिचेत्। धनग्रहणार्थे। तत्पक्षपातः नप्रवृत्तः। कीर्तिसंपादनार्थेनप्रवृत्तः। तैः यति
तु विक्रार्यला भार्थेन प्रवृत्तः। अपिश्रुतिस्मृतीतिहासपुराणभाष्यकारवार्तिककारव्याख्यानकारवेदभाष्यादि
कारशंकरभगवत्पादाचार्यसुरेश्वराचार्यआनंदगिरीयाचार्यवाचस्पत्याचार्यविद्यारण्याचार्यादिभिः। ब्रह्म
विद्यावत्शिरोमणित्वेनगृहीततदभिमत। याज्ञवल्क्ययोगिश्रेष्ठमुनीश्वरस्य तच्छिष्यभूतकण्वकात्यायनम
ध्यंदिनपारस्करादिस्मृतिसूत्रकर्तृणांश्रुतिमंत्रद्रष्टृणांमहर्षीणांचशापग्रस्तत्वेनतत्प्रयुक्तचंडालत्वादिप्रा
प्तिद्वारातेषुआयोग्यताप्राप्तिरूपदोषारोपणलक्षणदूषणकर्तृणांतदितरशाखाप्रविष्टशास्त्रानभिज्ञअज्ञ
व्यवहारमूलकव्यवहारवतांजन्मान्तरीयपापप्रेरितभाविजन्मअनुभाव्यमानदुखहेतुवर्तमानजन्मपा
पसंपादनपराणांशास्त्रार्थज्ञापनद्वारानादृशपापसंपादनप्रवृत्तिनिरोधनेनतेषांसहायार्थेवाजसनेयि
शाखिब्राह्मणानांस्वशाखाधिपतियाज्ञवल्क्यादियोग्यताअज्ञानेनस्वयोग्यताज्ञानसंपादनार्थेच। एत
द्ग्रंथकरणप्रवृत्तोत्रिंशद्वर्षप्रभृतितत्प्रयुक्तकार्योन्मुखतयामत्संबंधितत्पक्षपातःप्रवृत्तः। इतिबु
द्धिमद्भिः। असूयारहितैः। निष्पक्षपातवद्भिः शास्त्रतात्पर्यार्थज्ञैः। अस्मद्ग्रंथावलोकनेननिश्चयःक्रियते।

प्र॰शा॰ ननुअज्ञैःशास्त्रावलोकनासमर्थैः परम्पराप्राप्तअज्ञजनवासनावासितैः।वर्षशतेनापिनज्ञायते॥ अस्तुन। नि॰
५५३ शास्त्रतात्पर्यज्ञानवतां।पक्षपातरहितानां। अयंवाजसनेयिपक्षपातइत्येवंनभवति। किंतुशास्त्रहृदयता
त्पर्यार्थरूपशास्त्रपक्षपातएवइतिभवति। किंचशास्त्रानभिज्ञतयाएतद्दूषकाणांपापसंपादननिरोधक
त्य त्वात्।तेषामुपकारएव। अयंपक्षपातत्वेनप्रतीयतइंपिभवति॥ किंबहुनोवृथाप्रलापेन। वेदादिसर्व॰
तात्पर्यार्थस्यएतद्ग्रंथतात्पर्यस्यचतोलनेसमतयावर्त्ततइति।व्यत्यस्ततयावर्ततइति। विरुद्धतयावर्त्तत॰ या
तइतिच।नीरक्षीरविभागकर्तृहंसपक्षिवत् शास्त्रन्यायविवेकज्ञानवंतः सम्यक् जानंति॥ एतेनसह्याद्रि
खंडनामकग्रंथेवाजसनेयिब्राह्मणविषयकनिषेधः। संकेतिब्राह्मणविषयकनिषेधः। हैगकोटिकंदावरशि
वळिस्थानिकाश्चित्पावनसहवासिब्राह्मणमाकोदिनिषेधश्चवर्ततइति अज्ञजनप्रवादोनिरस्तः। पूर्वोक्तउ
भयमीमांसाधर्मशास्त्रादिलौकिकादिन्यायैः सर्वप्रसिद्धसर्वाभ्युपगतश्रुतिस्मृतीतिहासपुराणभाष्यव्याख्या
नवार्त्तिकप्रयोगादिविरुद्धार्थप्रतिपादकपुराणतदंतर्गतखंडतदंतर्गतवाक्यानांअप्रामाण्यस्यैवसा॰
धितुमुचितत्वात्॥विद्यमानः तादृशग्रंथः करिष्यमाणतादृशग्रंथोपिअप्रमाणभूतएव। इतिनिश्चेतुंच
युक्ततरमितिकृत्वासोपिनिरस्तप्रायएव॥ ॥अन्यथाप्रसिद्धप्रत्यक्षश्रुत्यादिबलवत्प्रमाणप्रतिपाद्यवि

द्धार्थप्रतिपादकाः प्रसिद्धसंदिग्धप्रामाण्यकपुराणादिशब्दवाच्यवाक्यानां पुराणत्वादिकल्पितहेतुनाप्रामाण्यस्वी
कारे अन्येन तत्प्रतिपक्षभूतेन कल्पितपुराणादिनामकवाक्येन तत्प्रतिपादितार्थदूषकेण सह विरोधे सति पुराणत्वा
दिकल्पितहेतोरविशेषान्। तत्प्रतिपक्षित्वेन नवीनतया कल्पितवाक्यस्यापि प्रामाण्यप्राप्त्या। पूर्वोक्तवाक्यस्य अ
प्रामाण्यद्वारा तदर्थोपि निरस्तप्राय एव भवति। अनयोरुभयोरपि प्रामाण्यांगीकारे अव्यवस्थितार्थत्वेन अतिप्र
संगस्य दुर्निवार्यत्वात्॥ तथानाभ्युपगंतव्य इति शास्त्रगतिः सिद्धा भवति यत्तु बहुदेशेषु कचित्कचित्प्रदेशविशे
षेषु वाजसनेयिब्राह्मणैस्सह तदितरशाखिना ब्राह्मणानां श्राद्धनिमंत्रण यजनयाजनादिके चिद्व्यवहाराः बहु
कालमारभ्य नदृश्यंत इति तदाचारस्य कालिकाखंडवाक्यमूलकस्य प्रामाण्यं भवतीति त्वयोक्तं॥ ॥तत्तु यद्यपि
अस्मत्कृत एतत्पूर्वग्रंथेषु बहुन्यायोपबृंहितश्रुतिस्मृतिपुराणादिवाक्यैः कालिकाखंडवाक्यस्य तन्मूलका
चारस्य च निराकृतत्वं जातं॥ तथापि तत्र कालिकाखंडवाक्यस्य स्कांदपुराणस्थत्वेन त्वयोक्तत्वात्। तन्मूलत्वेन त
दाचारस्यापि प्रामाण्यं त्वया प्रतिपादितं। एतदुभयमपि स्कांदपुराणस्थ सर्वजनपरिगृहीतासंदिग्धप्रमाणभूत
सौरसंहितावाक्यैरेव निराकरणीयमिति पुनरपि तदुद्घाटनं अस्माभिः क्रियते॥ तत्र तावत्। अव्यवहितपूर्ववा
क्येष्वेव प्रत्यक्षश्रुतिविरुद्धार्थबोधकस्मृतिपुराणादीनां अप्रामाण्यमिति अस्माभिः प्रदर्शितं॥ इदानीं तदाचार

स्य अव्यवहितवाक्येषु सौरसंहिताषोडशाध्यायगतेषु शिष्टाचारोपि तुल्यो यं न्यायः। तत्र न संशयः। वेदाविरुद्ध
आचारः कर्तव्यः खलु सर्वथा॥३९॥ इत्यादिवाक्यप्रतिपादितार्थानुसारेण प्रत्यक्षश्रुतिस्मृतिपुराणादिविरुद्धाचार
स्यापि अप्रामाण्यं सिद्धमेव भवति॥ तस्मात् याज्ञवल्क्यकण्वकात्यायनमाध्यंदिनपारस्करमेधातिथ्यादीनां वाज
सनेयिशाखि ऋषीणां तच्छाखि ब्राह्मणानां च शापादिप्राप्ति तदनुक्तं कंचित्कालानुष्ठेय चंडालत्वानुभवतत्प्रयु
क्त योग्यताभावादि दोषाणां मध्ये कस्यचिद्दोषस्यापि पूर्वोक्त बहुग्रंथजालेन प्रत्यक्षानुमानोपमानशब्दार्थापत्य
नुपलब्धि प्रमाणैश्च यत्र कुत्रापि शास्त्रलोकादिन्यायेष्वसिद्धत्वात्॥ तेषां ऋगादि शाखि ब्राह्मणसमानत्वमेव दृ
ढं भवति॥ तथाहि॥ एतेषामयोग्यतासत्वे प्रत्यक्षप्रमाणं न संभवति। प्रत्यक्षस्य अक्षमक्षं प्रति उत्पन्नं ज्ञानं प्रत्यक्ष
मिति न्यायेन। इंद्रियजन्यं ज्ञानं प्रत्यक्षं तस्य इंद्रियजन्यज्ञानविषयरूपघटपटादिविषयकत्वात्। अयोग्यतायाः
अतींद्रियरूपायाः शास्त्रैकवेद्यायाः प्रत्यक्षविषयत्वासंभवाच्च। प्रत्यक्षस्यानौपपन्नश्रुतिरेव प्रमाणं भवति॥ तथा श्रुतेः
प्रत्यक्षत्व प्रयोगः वैदिके शब्देषु वर्तते॥ न च यथा॥ वेदार्थनिर्णायक वेदतुल्य ब्रह्मसूत्रेषु अपि च। संराधने प्रत्यक्षा
नुमानाभ्यां॥ इति सूत्रभाष्ये। निष्कलं ध्यायमानः। इति श्रुतेरेव प्रत्यक्षत्वेन गृहीतत्वात्। प्रत्यक्षप्रमाणस्य प्रमाणांत
रानपेक्षत्वात् श्रुतेरपि प्रमाणांतरानपेक्षतया स्वतः प्रमाणत्वात्। तद्गुणयोगेन प्रत्यक्षत्वव्यपदेशः। अतींद्रियवि

षयेप्रथमप्रमाणत्वेनश्रुतिरेवप्रत्यक्षप्रमाणंभवति॥ तादृशश्रुतौयत्रकुत्रापियाज्ञवल्क्यादीनांशापादिप्रयु
क्ताऽयोग्यताप्रतिपादनंनोपलभ्यते॥प्रत्युत॥ तन्माहात्म्यप्रतिपादनमेवबृहदारण्यजाबालरामतापनीय।
अद्वैततारकादिश्रुतिषूपलभ्यते॥अतः तदयोग्यताविषयेप्रत्यक्षप्रमाणंनास्ति॥ अनुमानमित्युक्तेप्रत्यक्षम
नुसृत्यअनुमानंप्रमाणंभवतीति अनुमानमिति व्युत्पत्त्यैवसिद्धत्वात्॥पक्षधर्मताहेतुव्याप्त्यादीनांप्रत्यक्ष
विषयत्वेनअनुमितेः प्रत्यक्षापेक्षत्वात् पक्षादीनांप्रत्यक्षयोग्यस्यलेअनुमानस्यप्रत्यक्षानुसरणंभवति।
अतअतींद्रियाऽयोग्यताऽस्थलेतादृशानुमानस्यासंभवात्।श्रुत्यनुसारिस्मृत्यादीनामेव अनुमानत्वंवक्त
व्यं।तथावैदिकादोदर्शनात्।तथाच पूर्वमीमांसायांऔ दुंबराधिकरणेविरोधेत्वनपेक्षःस्यात्।असतिह्य
नुमानमितिसूत्रघटितानुमानशब्दस्यअनुमीयते।अनयास्मृत्यामूलभूताश्रुतिरितिअनुमानंस्मृतिः इतिव्युत्प
त्यास्मृत्यर्थकत्वंपूर्वोत्तरोभय मीमांसाभाष्यादिषुप्रतिपादितं॥ अतः प्रकृते॥अनुमानशब्देनविवक्षितपूर्वोक्त
बहुस्मृत्यादिषुयाज्ञवल्क्यादीनांअयोग्यतायाः यत्रकुत्राप्यनुपलंभात्॥प्रत्युत॥याज्ञवल्क्यादयः शापादिप्र
युक्तअयोग्यताभाववंतः श्रुतिप्रतिपादितमाहात्म्यवत्वात्॥व्यासवसिष्ठआपस्तंबादिवत्॥ इतिसत्प्रतिप
क्षानुमानस्यासंभवाच्च॥ अयोग्यताविषयअनुमानप्रमाणाभावः सिद्धः।अतएवतेषांयोग्यताभावविषय

उपमानप्रमाणमपिनसम्भवति तद्यथागोसदृशोगवयइतिवत्दृष्टांतस्यउपपादनीयत्वेनयाज्ञवल्क्यादीनांव
स्तुतोब्रह्मनिष्ठत्वयोगित्वसत्रांतश्रौतकर्मानुष्ठातत्वस्मृतिसूत्रादिकर्तृत्वादिसमानाधिकरणशापप्रयुक्तचं
डालत्वादिरूपायोग्यतावत्वेनतत्सदृशधर्मवतांऋष्यादीनांदृष्टांतत्वेनयत्रकुत्राप्यभावात्।दृष्टांताभावेनत
दयोग्यताविषयेउपमानप्रमाणमपिनसंभवत्येव॥तेषामयोग्यताविषयेशब्दप्रमाणमपिनास्ति।।शास्त्रज्ञ
याऽयोग्यतायांलौकिकशाब्दज्ञानजनकलौकिकवाक्यंशब्दरूपंप्रमाणंनभवति॥अतःवैदिकवाक्यरूपश्रु
तिस्मृतीतिहासपुराणाद्यात्मकवैदिकशब्दएवप्रमाणमितिवक्तव्यं।तत्तुपूर्वमेवश्रुतिस्मृतीतिहासपुराणादि
बहुवाक्योदाहरणेनयत्रकुत्रापिएतादृशप्रमाणंयाज्ञवल्क्याद्ययोग्यताप्रतिपादकंनास्तीति।प्रत्युत।श्रुतिस्मृ
त्यादिसर्वप्रमाणग्रंथेषुतेषांमाहात्म्यमेवप्रतिपाद्यतइतिचप्रदर्शितं।तस्मात्तदयोग्यतासत्वेशब्दोपिप्रमाणंन
भवति॥तदयोग्यत्वसाधनेअर्थापत्तिरूपप्रमाणमपिनोपलभ्यते।अर्थापत्तिरूपप्रमाणंतु।देवदत्तदिवाभोजन=
स्यादृष्टत्वात्।तस्यपीनत्वाच्चरात्रिभोजनंकल्प्यते।अन्यथा।रात्रिभोजनाभावेतस्यपीनत्वानुपपत्तिः।।एवंय
थापीनत्वान्यथानुपपत्यारात्रिभोजनंकल्प्यते।तथायाज्ञवल्क्यादीनांमाहात्म्यस्यसर्वशास्त्रदृष्टत्वेनायोग्यता
भावः अन्यथानुपपत्याकल्प्यते॥योग्यताभावाभावरूपशास्त्रीययोग्यतायाअसत्वे।श्रुत्यादिसर्वशास्त्रप्रति

साध्यमाहात्म्यबत्वानुपपत्तिरितितत्सिद्ध्यन्यथानुपपत्तिप्रमाणस्यसत्वात्। तदयोग्यतासत्वरूपसाध्य
साधकअन्यथानुपपत्तिप्रमाणस्यअत्यंतासंभवएवेतितद्विषयेऽन्यथानुपपत्तिप्रमाणमपिनसंगच्छते॥
एवंयाज्ञवल्क्यादिशापादिप्रयुक्तअयोग्यतासत्वविषयेअनुपलब्धिप्रमाणमपिनसंगच्छते॥ तद्यथा॥ अ
नुपलब्धिर्नाम। योग्यानुपलब्धिरितिपर्यवसितंभवति। अन्यथा। परमाण्वभावज्ञानस्यापिअनुपलब्धि
प्रमाणत्वप्रसंगात्॥ अनुपलब्धिप्रमाणस्वरूपंतु। यदिअस्मिन्भूतलेघटःस्यात्। तर्हिउपलभ्येत। नोपल
भ्यते। अतःघटोनास्तीत्येवंघटाभावप्रत्यक्षात्मकज्ञानेअनुपलब्धिप्रमाणमित्युच्यते। तदपिप्रत्यक्षयोग्यघटा
दिविषयंएवसंभवति। नतुप्रत्यक्षायोग्यपरमाण्वादिविषयकाभावज्ञानस्यनसंभवति। तस्यभावाभावयोरपि
प्रत्यक्षविषयत्वायोग्यत्वात्। एवंप्रकृते। तदयोग्यतासत्वेशास्त्रादिषुयत्रकुत्रापिअश्रुतत्वात्तदनुपलब्धिप्र
माणंअयोग्यताभावेसिद्धंभवति। अतःअयोग्यतासत्वेचनभवतीत्यलमतिप्रसंगेन॥ अन्यथाप्रमाणमात्रा
सिद्धस्याप्यर्थस्यकेवलाज्ञप्रवादमात्रेणप्रामाणिकत्वस्वीकारपक्षे। शशविषाणवंध्यापुत्रासत्वव्यवहा
रस्यापिप्रामाणिकत्वप्राप्तिप्रसंगोदुर्वारएवभवति॥ इतिश्रीप्रथमाशारवान्यायनिर्णयग्रंथस्समाप्तः।
श्रीयाज्ञवल्क्यगुरुभ्योनमः। मैसूरुदेशस्थितगरलपुरियाख्यश्रीकंठक्षेत्ररूपनंजनगूडाख्यग्रामनिवासि

श्रीकंठेश्वरभक्तसेवापरायणवेदांतिनामकरामकृतग्रंथोयंश्रीकंठेश्वरपार्वतीनारायणादिपादारविंदार्पि
तस्सन् प्रकाशयतु इतिप्रार्थना॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ अस्मिन्ग्रंथेश्री याज्ञवल्क्यं द्वादशनामस्तोत्रेणस्तुत्वा अस्यैवद्वादशनामभिः अष्टोत्तरशतनामभिश्चपूजांकरोमि॥

॥श्रीयाज्ञवल्क्यद्वादशनामस्तोत्रप्रारंभः॥

श्रीगणेशाय्यनमः॥ वंदेहंमंगलात्मानंभास्वंतंवेदविग्रहं॥याज्ञवल्क्यंमुनिश्रेष्ठं जिष्णुंहरिहरप्रभुं॥१॥जितेंद्रियंजि
तक्रोधंसदाध्यानपरायणं॥ आनंदनिलयंवंदेयोगानंदंमुनीश्वरं॥२॥एवंद्वादशनामानित्रिकालेयः पठेन्नरः॥यो
गीश्वरप्रसादेनविद्यावान्धनवान्भवेत्॥३॥ ॥ मंगलात्मनेनमः १ भास्वतेनमः २ वेदविग्रहायनमः ३ याज्ञ
वल्क्यायनमः ४ मुनिश्रेष्ठायनमः ५ जिष्णवेनमः ६ हरिहरप्रभवेनमः ७ जितेंद्रियायनमः ८ जितक्रोधायनमः
९ सदाध्यानपरायणायनमः १० आनंदनिलयायनमः ११ योगानंदमुनीश्वरायनमः १२ ॥ ॥ ॥ ॥

॥ इतिद्वादशनामस्तोत्रंसम्पूर्णम्॥

॥ श्रीयोगीश्वराष्टोत्तरशतनामावलीप्रारम्भः ॥

श्रीयाज्ञवल्क्यायनमः	१	शांतायनमः	११	भगवतेनमः	२१	जितेंद्रियायनमः	३१
ब्रह्मिष्ठायनमः	२	शरणत्राणतत्परायनमः	१२	शास्त्रतत्वज्ञायनमः	२२	अयातयामसंज्ञायांप्रव	
जनकस्यगुरवेनमः	३	धर्मशास्त्रप्रणेत्रेनमः	१३	तपस्विनेनमः	२३	र्तनपरायनमः	३२
लोकाचार्यायनमः	४	ब्रह्मविदेनमः	१४	शरणायनमः	२४	गुरवेनमः	३३
ब्रह्ममनोज्ञायनमः	५	ब्राह्मणोत्तमायनमः	१५	विभवेनमः	२५	वाजिविप्रोत्तमायनमः	३४
योगिनांपतयेनमः	६	योगीश्वरायनमः	१६	तत्वज्ञानप्रदात्रेनमः	२६	सत्यायनमः	३५
शाकल्यप्राणदात्रेनमः	७	योगमूर्तयेनमः	१७	सर्वज्ञायनमः	२७	सत्यवादिनेनमः	३६
मैत्रेयीज्ञानदायनमः	८	योगशास्त्रप्रवर्तकायनमः	१८	करुणात्मवतेनमः	२८	दृढव्रतायनमः	३७
महतेनमः	९	भूतानांगतागतज्ञायनमः	१९	सन्यासिनामादिमाय०	२९	धातृप्रसादसंलब्धगाय	
कात्यायनीप्रियायनमः	१०	विद्याविद्याविभागविदेनमः	२०	सूर्यशिष्यायनमः	३०	त्रीमहिमामतयेनमः	३८

प्र०आ० ५५७

गार्गिस्तुतायनमः	३९	विश्वप्रियहितेरतायनमः	५१	श्रीमतेनमः	६२	त्रयीमयायनमः	७१
धर्मपुत्रयागाध्वर्यवेनमः	४०	श्रुतिप्रसिद्धायनमः	५२	पंक्तिपावनपावनायनमः	६३	होताम्बरमुनिप्राप्तभा	
विचक्षणायनमः	४१	सिद्धात्मनेनमः	५३	संशयस्यापिसर्वस्यनिवर्त		वायनमः	७२
दुष्टराज्ञोशापदात्रेनमः	४२	समचित्तायनमः	५४	नपटुव्रतायनमः	६४	कार्यसाधकायनमः	७३
शिष्टानुग्रहकारकायनमः	४३	कलाधरायनमः	५५	सनकादिमहायोगिपूजि		शरणागतवैदेहायनमः	७४
अनंतगुणरत्नाढ्यायनमः	४४	आदित्यरूपायनमः	५६	तायनमः	६५	कृपालवेनमः	७५
भवसागरतारकायनमः	४५	आदित्यसहिष्णवेनमः	५७	पुण्यकृत्तमायनमः	६६	लोकपावनायनमः	७६
स्मृतिमात्रातापहंत्रेनमः	४६	मुनिसत्तमायनमः	५८	सूर्यावतारायनमः	६७	वसिष्ठप्रवरायनमः	७७
ज्योतिषेनमः	४७	सामग्रवादिशिष्येभ्यप्र		शुद्धात्मनेनमः	६८	दांतायनमः	७८
ज्योतिर्विद्वरायनमः	४८	जितात्मयेनमः	५९	आदिनारायणांशभूतेनमः	६९	वेदवेद्यायनमः	७९
विश्वाचार्यायनमः	४९	दयानिधयेनमः	६०	आदिवेदेहशालांगऋषि		महामुनयेनमः	८०
विष्णुरूपायनमः	५०	ब्रह्मरातसुतायनमः	६१	जैत्रेनमः	७०	वाजिनेनमः	८१

वाजसनेयायनमः ८२
वाजिविप्रकृताद्रिकृतेनमः ८३
कल्याणदायनमः ८४
यज्ञराशयेनमः ८५
यज्ञात्मनेनमः ८६
यज्ञवत्सलायनमः ८७
यज्ञप्रधानायनमः ८८
यज्ञेशश्रीनिवाससत्ताय नमः ८९

ध्रुवायनमः ९०
कृष्णद्वैपायनाचार्याय नमः ९१
ब्रह्मदत्तप्रसादकायनमः ९२
शाण्डिल्यविद्याप्रभृतिविद्यावादेषुनिष्ठितायनमः ९३
अज्ञानोद्धतमस्सूर्याय नमः ९४
भगवद्ध्यानपूजितायनमः ९५

त्रयीमयायनमः ९६
गवांनेत्रेनमः ९७
जयशीलप्रभाकरायनमः ९८
वैशंपायनशिष्याणांतैत्तिरत्वप्रदायकायनमः ९९
कण्वादिभ्योयातयामशाखाध्यापपतत्वभाजिनेनमः १००
पंक्तिपावनविप्रेभ्यायनमः १०१
परमात्मैकबुद्धिमतेनमः १०२

तेजोराशयेनमः १०३
पिशंगाक्षायनमः १०४
परिव्राजकराजेनमः १०५
[illegible]मुनयेनमः १०६
नित्यानित्यविभागज्ञायनमः १०७
सत्यासत्यविभागविदेनमः १०८
श्रीयाज्ञवल्क्यगुरुभ्योनमः १०९

॥ इतिश्रीयोगीश्वराष्टोत्तरशतनामावलिः समाप्ता ॥

॥ काशीस्थपंडितानांसंमतयः ॥ ॥ अस्मिन्नर्थेचौकलइत्युपनामबापूभट्टस्यसंमतिः ॥ १ ॥ संमतोयंखनंगइत्युपाव्ह बालशास्त्रिणः ॥ २ ॥ अस्मिन्नर्थेराजणकरइत्युपनामककृष्णभट्टस्यसंमतिः ॥ ३ ॥ अस्मिन्नर्थेवासुदेवभटमुंजेइत्युपनामकस्यसंमतिः ॥ ४ ॥ अस्मिन्नर्थेजयरामभटपिंपलेइत्युपनामकस्यसंमतिः ॥ ५ ॥ अस्मिन्नर्थेखोडइत्युपनामकस्यरंगभट्टस्यसंमतिः ॥ ६ ॥ अस्मिन्नर्थेडोंगरेइत्युपनामकस्यचिंतामणभट्टस्यसंमतिः ॥ ७ ॥ अस्मिन्नर्थेनीलकंठदीक्षितस्यसम्मतिः ॥ ८ ॥ अस्मिन्विषयेकाशीकररामशास्त्रिणः संमतिः ९ ॥ अस्मिन्नर्थेकाणेत्युपनामककेशवशास्त्रिणः संमतिः १० ॥ अस्मिन्नर्थेपल्लावझ्झिलवेंकटशास्त्रिणः संमतिः ॥ ११ ॥ अस्मिन्नर्थेमैसूरदक्षिणामूर्तिशास्त्रिणः संमतिः ॥ १२ ॥ अस्मिन्नर्थेडब्लीत्युपनामकअनन्तभट्टस्यसंमतिः ॥ १३ ॥ ॥ ॥ शाखाप्रथमपूर्वायातस्यान्यायस्यनिर्णयः । इत्याख्यंचमहाग्रंथंबालबोधेनयत्नतः १ अस्यार्थः । प्रथमपूर्वा । प्रथमशब्दः पूर्वयस्याः । शाखायाः । सा । प्रथमपूर्वा । प्रथमपूर्वा ॥ या । शाखा । प्रथमशाखा । तस्याः न्यायः । तस्यनिर्णयः ॥ प्रथमशाखान्यायनिर्णयः १ बापूभट्टादिमहतांकण्वादीनांसहायतः । काशीनिवासविदुषांकारयित्वाचसंमतिं । २ ॥ चहूपल्लिकुलोत्पन्नमल्लय्यइतिनामकः ॥ ३ ॥ काकर्लमूडिसूरय्यशास्त्रिणशिष्यएवच ॥ ४ ॥ वाराणस्यांमुद्रयित्वामेपद्यास्यहमादरात् ॥ पश्यंतुपंडिताः सर्वेदयांकृत्वाममोपरि ॥ ५ ॥

वीवर्शियरुजीवर्णगारायेमाध्यंदिनः प्रभुः॥ गोविन्दरामपुत्रोसौ श्रीमान्श्रीवत्सगोत्रजः ॥१॥ शमोदमस्तपः शौचंक्षांति
रार्जवमेवच॥ ज्ञानंविज्ञानमास्तिक्यमित्यादिगुणवान्सुधीः॥ २॥ दत्वाधनमिमंग्रन्थंमुद्रयित्वाविशेषतः ॥ विद्वद्भ्योस
द्देशेभ्युपुस्तकान्यदद्दत्स्वयं। प्रकाशंकृतवांस्तोपिप्रकाशमगमत्तदा॥ ३॥ ब्रह्मविद्वर्यवेदांतरामप्पानांचआशिषा॥ कृ
तेकृत्योऽभवत्सधरस्तेतुष्टास्सकलाजनाः॥४॥ ॥ अग्न्याधानेनीलकंठदीक्षिताइतिनामकाः॥ अभवन्कृतवन्तस्तेउ
पकारंपरंमम॥५॥ उपकारंपरंमत्वाउपकारपरास्सदा॥ रामानन्दाइतिख्यातायतिवर्येषुगौरवाः॥ ६॥ शिष्याणांसर्वे
दाब्रह्मज्ञानबोधेषुनिष्ठिताः॥ कृतोपकारास्तेप्यत्रनिजानंदेननंदिताः॥ ७॥ काशीनिवासिनस्तेतुविद्यारण्यमठेस्थिताः
॥ श्रीमत्परमहंसाश्चशिष्याश्चास्यमठस्यच॥ ८॥ अधुनाकूचिपंचाग्निराजमन्नारुशास्त्रिणः ॥ यात्रार्थमागतास्तेश्च
लिखिताप्यत्रसंमतिः॥ ९॥ ॥ अस्मिन्नर्थेकूचिपञ्चाग्निराजमन्नारुशास्त्रिणःसंमतिः॥ ॐ ॥ ॥ ॐ ॥ ॥

॥ श्रीविश्वेश्वरः प्रसन्नोस्तु॥

विद्योद्योनिराकुर्याद्विद्यातिमिरंसदा॥ ॥
सहस्रांशुरिवाशेषंमुद्राकिरणराजिभिः॥ १॥

॥ इति प्रथमशाखान्यायनिर्णयः समाप्तः ॥

पौषसु॰ १५ सं॰ ११३४